This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google™ books

https://books.google.com

Digitized by Google

IndL 350.2 Bd. June, 1893.

Harvard College Library

FROM THE BEQUEST OF

MRS. ANNE E. P. SEVER,

OF BOSTON,

Widow of Col. James Warren Sever,

(Class of 1817)

9 Mar. 1892 – 20 Mar. 1893.

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

6-1
3

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATON

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

VOL. XIV.

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO.

BENARES:

1892.

Digitized by Google

Ind L 350.2
~~IX, 60~~

1892, Mar. 9 - 1893, Mar. 20.
Sever fund.

Digitized by Google

INDEX TO VOLUME XIV. NEW SERIES.

GAṆAKATARAṄGIṆĪ,	1, 57, 113, 169, 225, 275, 331, 387, 491.
KĀŚIKĀVYĀKHYĀ PADAMANJARĪ,	17, 73, 129, 185, 241, 291, 347 403, 443, 497, 553, 609.
ŚRĪBHĀSHYA,	33, 89, 145, 201, 257, 307, 363, 419, 459, 513, 585, 641.
TATTVABINDŪ,	49, 105, 161, 217, 273.
SAṂKARSHAKĀṆḌA,	569, 625.

Digitized by Google

Digitized by Google

HARVARD COLLEGE
MAR 9 1892
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 1.] JANUARY, 1892. [Vol. XIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1892.

Price, Rs. 9-0 per annum.]

[All rights reserved.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

HARVARD COLLEGE
LIBRARY.

अथ गणकतरङ्गिणी ।

जयतो जयतोषकोशरूपौ चरणाववधपतेः सुधाकरः ।
तनुतेऽतनुतेजसा ययोस्तौ गणको गणकतरङ्गिणीमिमाम् ॥

अस्ति सिद्धान्तहोरासंहितारूपं स्कन्धत्रयात्मकमष्टादशमहर्षिप्रणीतं ज्योतिःशास्त्रं वेदचक्षूरूपं परम्परातः प्रसिद्धम् । अष्टादशमहर्षयश्च ज्योतिःशास्त्रप्रतिपादका ये तेषां नामानि प्रकाशितानि कश्यपादिभिः ।

यथा कश्यपः ।

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः ।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः ॥
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः ।
शौनकोऽष्टादशाश्चैते ज्योतिःशास्त्रप्रवर्त्तकाः ॥

पराशरश्च ।

विश्वसृङ्नारदो व्यासो वसिष्ठोऽत्रिः पराशरः ।
लोमशो यवनः सूर्यश्च्यवनः कश्यपो भृगुः ॥
पुलस्त्यो मनुराचार्यः पौलिशः शौनकोऽङ्गिराः ।
गर्गो मरीचिरित्येते ज्ञेया ज्योतिःप्रवर्त्तकाः ॥

अत्र पुलस्त्यपौलिशयोर्भेदेन पराशरेण ज्योतिःशास्त्रप्रवर्त्तका एकोनविंशतिसंख्याका आचार्या अभिहिताः । के चनाष्टादशाचार्यानुरोधेन पुलस्त्यो मनुविशेषणपर इति वदन्ति । नारदेन तु सूर्यं हित्वा सप्तदशाचार्या एव स्वसंहितायां प्रकाशिताः । तत्रापि ब्रह्माचार्यो वसिष्ठोऽत्रिरित्यादौ ब्रह्मसूर्यौ वसिष्ठोऽत्रिरित्यनेके पाठं वदन्ति ।

अथाहो एते संहिताकारा महात्मनो लगधस्य न कुर्वन्ति चर्चाम् । येन महात्मना वेदाङ्गमूलरूपं ज्योतिषं पञ्चवर्षयुगवर्णनपरं विलक्षणं चक्रे ।

सूर्येण मयाख्याकृते ब्रह्मणा नारदाय व्यासेन स्वशिष्याय वसिष्ठेन माण्डव्यवामदेवाभ्यां पराशरेण मैत्रेयाय पुलस्त्याचार्यगर्गात्रिभिश्चैवं स्वस्वशिष्येभ्यो ज्योतिःशास्त्रविशेषाः प्रतिपादिताः ।

तथा चाह पराशरः ।

नारदाय यथा ब्रह्मा शौनकाय सुधाकरः ।
माण्डव्यवामदेवाभ्यां वसिष्ठो यत्पुरातनम् ॥

Digitized by Google

नारायणो वसिष्ठाय रामेशायापि चोक्तवान् ।
व्यासः शिष्याय सूर्योऽपि मयाख्याकृते स्फुटम् ॥
पुलस्त्याचार्यगर्गात्रिरोमकाद्रिभिरीरितम् ।
विवस्वता महर्षीणां स्वयमेव युगे युगे ॥
मैत्रेयाय मयाप्युक्तं गुह्यमध्यात्मसंज्ञकम् ।
शास्त्रमाद्यं तदेवेदं लोके यच्चातिदुर्लभम् ॥

अष्टादशाचार्याणां मध्ये पूर्वं लोमशं वदता पराशरेणात्र पुलस्त्याचार्यगर्गात्रिरोमकाद्रिभिरीरितमित्यत्र रोमकपदमुक्तं तेन लोमशरोमकशब्दावेकस्यैवाचार्यस्य बोधकाविति प्रतीयते ।

अथैतेषामाचार्याणां समयादिनिरूपणं तत्तद्रचितसिद्धान्तानामलाभे ऽतीवकाठिन्यमतोऽस्माभिस्तावज्ज्यौतिषसिद्धान्तग्रन्थकाराणां पुरुषाणामुत्तरोत्तरं खण्डनप्रतिखण्डनद्वारेण बहुविशेषरचयितॄणां यावच्छक्यं तत्तद्ग्रन्थमर्मस्थलानां सम्यगवलोकनेन समयादिकं निरूप्यते ।

आर्यभटः । ३६८

अस्य भारतवर्षे ज्यौतिषसिद्धान्तमूलरूपस्य जन्मशको वसुनवाग्निमितः ३९८ । अयं रूपद्विवेदमिते ४२१ शके त्रयोविंशतिवर्षसमवयःकाले ज्यौतिषसिद्धान्तं संप्रति आर्यभटीयतन्त्रनाम्ना प्रसिद्धमकार्षीत् । अस्य नाम्नि टकारद्वयं नेति यद्यपि तत्तन्त्रस्य गणितपादप्रथमश्लोकेन "ब्रह्मकुशशिबुधभृगुरविकुजगुरुकोणभगणान् नमस्कृत्य । आर्यभटस्त्विह निगदति कुसुमपुरे ऽभ्यर्चितं ज्ञान"मित्यनेनैव सिध्यति टकारद्वये छन्दोभङ्गदोषात् । तथापि *डाक्टरभाऊदाजीनाम्नाऽत्र बहुविस्तरतो विलिखितं तच्च मन्मते ऽनावश्यकम् । नाम्नि विद्वांसश्छन्दोभङ्गभिया बहुत्र भटस्थाने भट्टस्य भट्टस्थाने भटस्य च प्रयोगं कुर्वन्ति भटभट्टयोर्नाम्नि विशेषाभावात् । प्राचीनज्योतिर्विदामयमेव शकाब्दानपहाय स्वजन्मवर्षवर्णनं कलियुगगतवर्षतः कृतवान् ।

तद्यथा

कालक्रियापादस्य दशमः श्लोकः ।

"षष्ट्यब्दानां षष्टिर्यदा व्यतीतास्त्रयश्च युगपादाः ।
त्र्यधिका विंशतिरब्दास्तदेह मम जन्मनोऽतीताः" ॥

* See "The Literary Remains of Dr. Bhau Dâji."

आर्यभटीये कुत्रापि शकचर्चा न कृता ग्रन्थकृता तेनैतद्देशे तस्मिन् समये प्रायः शकप्रचारो नासीदित्यनुमीयते यथा यूरपदेशीयराजतः पूर्वं भारतवर्षे खीष्टशकचर्चाऽभावः ।

ग्रन्थादौ विलक्षणसङ्केतेन* दशभिर्गीतिकाभिर्ग्रहगणितोपयोगिन्यो ग्रहमन्दोच्चशीघ्रोच्च† पातभगणमन्दशीघ्रपरिधिज्यार्द्धमन्वादिसंख्याः पठिताः । तत्र केवलं संख्यासङ्केत एव न वैलक्षण्यं किन्तु संस्कृतव्याकरणविरुद्धः पदप्रयोगश्च । यथा गीतिकापादस्य प्रथमसूत्रे "युगरविभगणाः ख्युघृ शशि चयगियिङुशुछ्लृ" इत्यादौ शशि पदेन शशिनः । शनिपदेन शनेः । गुरुपदेन गुरोः । कुजपदेन कुजस्य च ग्रहणं भवति । एवं समग्रदशगीतिकासु पदानां वैलक्षण्यमुपलभ्यते । एतद्वैलक्षण्यं संख्यादिसङ्केतरूपं गीतिकापादे ग्रहाणां भगणादिपाठ एव वर्त्तते ततः परं सर्वत्र प्राचीनपरम्पराऽऽगतेन सङ्केतेन सर्वाः संख्याः संस्कृतव्याकरणानुसारेण पदप्रयोगाश्च कृता ग्रन्थकृता ।

अहो अतिपरिश्रमेण परदेशीयपण्डितस्य देवतारूपस्य कृपालवेन लब्धा ग्रहगणितोपयोगिनो भगणादयः सर्वजनप्रसिद्धा मा भूयासुर्मद्भक्तशिष्या एव तान् जानन्त्विति धिया सुधियाऽऽर्यभटेन कृतं नवीनसङ्केतकल्पनमिति मन्मतिकल्पनं किमु न युक्तम् ।

गीतिकापादे प्रथममेतत्सङ्केतकल्पनं च यथा ।

"वर्गाक्षराणि वर्गे ऽवर्गेऽवर्गाक्षराणि कात् ङ्मौ यः ।
खद्विनवके स्वरा नव वर्गेऽवर्गे नवान्त्यवर्गे वा ॥

एकशतायुतादिवर्गस्थानानि तत्र ककारादिमकारान्तानि वर्गाक्षराणि स्थाप्यानि । एवमवर्गस्थानानि दशसहस्रलक्षादिसमस्थानानि तत्र यकारादिहकारान्तान्यवर्गाक्षराणि स्थाप्यानि । संख्या च कात् ककाराद्वेद्या । यथा क = १ । ख = २ । ग = ३ । घ = ४ । ङ = ५ । च = ६ । छ = ७ । ज = ८ । झ = ९ । ञ = १० । ट = ११ । ठ = १२ । ड = १३ । ढ = १४ । ण = १५ । त = १६ । थ = १७ । द = १८ । ध = १९ । न = २० । प = २१ । फ = २२ । ब = २३ । भ = २४ । म = २५ । यश्च ङ्मौ ङकारमकारयोः पञ्चपञ्चविंशतिसंख्ययोर्योगेन समः । अर्थात् य = ३० । एवं

* आर्यापूर्वार्द्धसममुत्तरार्द्धं च कृत्वा यच्छन्दः सा गीतिका कथ्यते छन्दोज्ञैः ।

† अत्र चन्द्रपातस्यैव भगणाः सन्ति: कुजादीनां पाताश्च स्थिरा एव पठिता स्तेषां खण्डनं च तेन हेतुना ब्रह्मगुप्तेन स्वसिद्धान्ते दूषणाध्यायस्याष्टमश्लोकेन कृतम्

Digitized by Google

र = ४० । ल = ५० । व = ६० । श = ७० । ष = ८० । स = ९० । ह = १०० ॥

नवस्वराश्च वर्गाक्षरेषु तथा ऽवर्गाक्षरेषु मिश्रिता अष्टादशस्थानप्रदर्शकाः। यथा

क् + अ = क = १
क् + इ = कि = १००
क् + उ = कु = १००००
क् + ऋ = कृ = १००००००
क् + लृ = कॢ = १००००००००
क् + ए = के = १००००००००००
क् + ऐ = कै = १०००००००००००००
क् + ओ = को = १००००००००००००००
क् + औ = कौ = १००००००००००००००००

एवं ख् + अ = ख = २
ख् + इ = खि = २००
ख् + उ = खु = २००००

एवमन्येऽपि बोध्याः ।

एवं य् + अ = य = ३०
य् + इ = यि = ३०००
य् + उ = यु = ३०००००

इत्यादयः ।

एवं र् + अ = र = ४०
र् + इ = रि = ४०००
र् + उ = रु = ४०००००

इत्यादयः ।

अत्र ह्रस्वदीर्घस्वरयोर्योगेन न संख्याभेदः । यथा कि वा की इति द्वयेनापि शतं गृह्यते । स्वरस्य प्रत्येकसंयुक्ताक्षरेण सम्बन्धो भवति ।

यथा युगरविभगणाः ख्युघृ इत्यत्र ख्यु इत्यत्र – उकारस्य खयो-र्द्वयोः सम्बन्धस्तेन
ख = २००००
यु = ३०००००
घृ = ४००००००
४३२००००

यवनैश्च (The Greek.)

	α′ =	1
	β′ =	2
	γ′ =	3
	δ′ =	4
	ε′ =	5
(Stigma) =	ϛ′ =	6
	ζ′ =	7
	η′ =	8
	θ′ =	9
	ι′ =	10
	ια′ =	11
	ιβ′ =	12
	ιγ′ =	13
	ιδ′ =	14
	ιε′ =	15
	ιϛ′ =	16
	ιζ′ =	17
	ιη′ =	18
	ιθ′ =	19
	κ′ =	20
	λ′ =	30
	μ′ =	40
	ν′ =	50
	ξ′ =	60
	ο′ =	70
	π′ =	80
(Koppa) =	ϙ′ =	90
	ρ′ =	100
	σ′ =	200
	τ′ =	300
	υ′ =	400
	φ′ =	500
	χ′ =	600
	ψ′ =	700
	ω′ =	800
(Sampi) =	ϡ =	900
	͵α =	1000
	͵β =	2000
	͵γ =	3000
	͵ι =	10000

अक्षरैः स्वरयुक्तैस्तथैव प्रायः संख्याः प्रकाश्यन्ते यथाऽऽर्यभटेन प्रकाशिताः । एकस्याः कल्पनाया अन्या कल्पना निःसरतीत्यर्थः । अत आर्यभटेन कस्माच्चिद्यवनपण्डिताद्वर्गणादयः प्राप्तास्ते च स्वाभ्यस्तसङ्केतेनैव संस्कृताक्षरैर्गोपनार्थं प्रकाशिता इत्यवबुध्यते । आर्यभटेन कुसुमपुरे संप्रति पटनानामतः प्रसिद्धे नगरे स्वतन्त्रं व्यरचीति तत्कृतमङ्गलेन गणितपादारम्भकेण ज्ञायते ।

आर्यभटेन स्वकल्पिता वा यवनैः प्राप्ता विशेषा ये स्वतन्त्रे प्रकाशितास्ते भारतवर्षे प्रायोऽपूर्वा विचारार्हाश्च ।

यथा । गणितपादे "एकं दश च शतं चेत्यादिना संख्यास्थानसंज्ञामुक्त्वा योगान्तरगुणनभजनानां प्रकारो न ततः परं वर्गघनलक्षणकथनं ३ श्लोकेन तत्रापि संवर्गपदं* घातार्थबोधकं सम्प्रतिप्रचलितघातवाचिशब्दतो भिन्नम् ।

४–५ श्लोकाभ्यां वर्गघनमूलानयनं चैतत्सर्वं चार्यभटकाले योगान्तराद्यानयनं प्रसिद्धं वर्गवर्गमूलाद्यानयनं चाप्रसिद्धमिति प्रकाशयति ।

* सम्प्रति प्रचलितसूर्यसिद्धान्तस्पष्टाधिकारेऽपि चापानयने चैकत्र संवर्गपदेन घातो गृह्यते ।

Digitized by Google

६ श्लोकस्य पूर्वार्द्धे फलस्थाने फलशरीरमिति नूतनमेव पदम् ।

उत्तरार्द्धेन यस्य घनक्षेत्रस्य घनफलं साधयति तस्य षड*श्रीति संज्ञाऽपूर्वा । अत्र परमेश्वरेण भटदीपिकायां षडश्रिपदेन सर्वतस्त्रिकोणं क्षेत्रमर्थात् त्रिभुजाधारं सूचीक्षेत्रं गृहीतम् । ऊर्ध्वभुजेन च क्षेत्रमध्योच्छ्रायस्ततो मध्योच्छ्रायत्रिभुजफलघातार्द्धं घनफलं सूचीक्षेत्रस्योक्तं तत्त्वयुक्तमेव सूचीक्षेत्रस्य वास्तवं घनफलं च त्रिभुजफलमध्योच्छ्रायघातत्र्यंशसमं भवति । यदि परमेश्वरोक्तं तथ्यं तर्ह्यार्यभटसाधनमशुद्धमेव । एवं ७ † श्लोकस्य पूर्वार्द्धेन वास्तवं वृत्तफलं संविधाय तदुत्तरार्द्धेन तत्फलं स्वमूलेन गुणितं वृत्तघनफलं भवति–इति विलक्षणमानयनमशुद्धमेवेति प्रतिपादितमाचार्येण । एव मत्र पादे प्रायोऽपूर्वा संज्ञा क्षेत्रभुजादीनां टीकाकारव्याख्यातः सिध्यति । टीकाकाराणां व्याख्या च सर्वथा न विश्वासयोग्येति मन्मतम् । अयुतद्वयव्यासे परिधिः = ८ × १०४ + ६२००० = ८३२ + ६२००० = ६२८३२ अयं वास्तव एव दशमश्लोकेन "चतुरधिकं शतमष्टगुणं द्वाषष्टिस्तथा सहस्राणाम् । अयुतद्वयविष्कम्भस्यासन्नो वृत्तपरिणाहः" इत्यनेन उक्तः । एवमत्र पादे संप्रति प्रचलितपाटीगणितस्यानेकानि कठिनानि सुगमानि च श्रेढीफलभिन्नसमच्छेदाद्यानयनानि गणितविदामस्यार्यभटस्य सम्यक्पाण्डित्यविवेचने भ्रमोत्पादकानि सन्ति । प्रकाराणां दर्शनेनाऽऽर्यभटः स्वयं तेषां कर्त्ता नेति मम निःसंशयं भाति ।

पृथिव्या अक्षोपरिभ्रमणमिति यद्यपि लिखितमत्र तथापि टीकाकारैरन्यथा व्याख्यातं मिथ्याज्ञानपरम् । कालक्रियापादे युगस्य समभागद्वयं कृत्वा पूर्वार्द्धस्योत्सर्पिणी द्वितीयार्द्धस्यावसर्पिणीति संज्ञा जैनमता-

---

* In Dr. H. Kern's edition. षडश्रिरिति पाठः स च वैदिकप्रयोगः शतपथब्राह्मणादौ दृश्यते ज्यौतिषग्रन्थेषु नोपलभ्यते । तथा छन्दोभङ्गभयेन ग्रन्थादौ परमेश्वरेण समासविधिना परमादीश्वर इति नाम लिखितं वस्तुतस्तन्नाम परमेश्वर एव । डाक्टरकर्णसाहिबेन तु भ्रमात्परमादीश्वर इति तन्नामाऽलेखीति सर्वत्राध्यायसमाप्तिलेखेन "इति पारमेश्वरिकायां भटदीपिकाया"मित्यादिना स्फुटमिति मदुक्तं सुधीभिर्भृशं विचिन्त्यम् । एवं तन्मुद्रितबृहत्संहितायाः ५३ अध्यायस्य २८ श्लोकेऽष्टाभिः पाठोऽपि वैदिकः ।

† समपरिणाहस्यार्द्धं विष्कम्भार्द्धहतमेव वृत्तफलम् ।
तन्निजमूलेन हतं घनगोलफलं निरवशेषम् ॥

नुसारतः कृता तथा युगस्य समभागत्रयं कृत्वाऽद्यन्तयोर्दुःसमा मध्यस्य च सुसमा संज्ञा चेति च प्रतिपादिता । अत्र व्याख्याकारैरिन्दूच्चादीनां कालभेदेन गतेर्भेदो भवतीत्याचार्यः कथयतीति व्याख्यातं मन्मते तच्च तथ्यं प्रसङ्गानुसारतोऽत्र ग्रहभगणादौ भेदप्रदर्शनानौचित्यात् । इन्दूच्चस्यैव पदस्य प्रयोगकरणे प्रमाणाभावाच्च । मन्मते तु "उत्सर्पिणी युगार्द्धं पश्चादवसर्पिणी युगार्द्धं च । मध्ये युगस्य सुसमाऽऽदावन्ते दुःसमाग्न्यंशात्" इति पाठः साधुः स च लेखकाध्यापकाध्येतृदोषैरन्यथा जातः । (See Dr. Kern's edition) कालक्रियापादस्य षोडशश्लोकेन सर्वे ग्रहा भूमिं परितो भ्रमन्तीति प्रतिपादितमाचार्येण तच्च यथा लोकैरवलोक्यते तथा लौकिकबुद्ध्या लिखितमित्यनुमीयते । कालक्रियापादे छेद्यकविधिना स्पष्टीकरणयुक्तिर्विस्तरतो वर्णिता बुधशुक्रयोश्च विलक्षणसंस्कारेण स्फुटीकरणमुक्तम् । गोलपादे मेर्वादिस्थितिवर्णनमक्षक्षेत्रानुपातेन लम्बाक्षज्यादिसाधनं परमक्रान्तिसंज्ञा च काष्ठान्त्यमित्युक्तम् ।

यद्यपि डाक्टरकर्णसाहिबमुद्रितमार्यभटीय*तन्त्रमष्टाधिकशतार्यारूपं परमेश्वरकृतभटदीपिकाख्यव्याख्यासहितं सम्यगार्यभटमतं न प्रकाशयति तथापि तस्मादेव पुस्तकात् स्वधिया विविच्य सर्वमिदमार्यभटस्य विषयेऽस्माभिर्लिखितमन्यपुस्तकानामलाभात् । बुद्धिमद्भिर्ज्योतिर्विद्भिरितिहासरसिकैश्च यत्नतः पुस्तकान्तरमवाप्य तत्सर्वं मन्मतं परीक्ष्यम् । यच्च बृहदार्यभटतन्त्रं प्रसिद्धं तच्च केन चिदाधुनिकेन सम्प्रति प्रचलितसूर्यसिद्धान्तानुसारं कलियुगादेः पराशरमतमिश्रितं नूतनं कृतम् । अत्र केरल†सङ्केतेन दक्षिणभागतः सर्वाः संख्याः प्रकाशिताः सन्ति । यथा क ख = १२ ।

* ब्रह्मगुप्तसिद्धान्ते एकादशाध्यायस्याष्टमश्लोके "आर्याष्टशते पाता भ्रमन्ति दशगीतिके स्थिराः पठिताः । मुक्त्वेन्दुपातमपमण्डले भ्रमन्ति स्थिरा नातः" इत्यत्र । अष्टाधिकं शतमित्यष्टशतमिति व्याख्येयम् । अन्यथा शताष्टके तु अष्टशतानि इति बहुवचनान्तः पाठो युक्तो भवेत् ।

† केरलमतीयाश्च

क = १ । ख = २ । ग = ३ । घ = ४ । ङ = ५ ।
च = ६ । छ = ७ । ज = ८ । झ = ९ । ञ = ० ।
ट = १ । ठ = २ । ड = ३ । ढ = ४ । ण = ५ ।
त = ६ । थ = ७ । द = ८ । ध = ९ । न = ० ।

लल्लः । ४२१

शाम्बस्य पौत्रो भट्टत्रिविक्रमस्य तनय आर्यभटीयतन्त्रटीकाभट-दीपिकाकारपरमेश्वरमतानुसारेणाऽऽर्यभटस्य शिष्यश्चासीत् । भारतवर्षे पौरुषग्रन्थेषु यद्यप्यार्यभटतन्त्रमेव स्वातन्त्र्येण सम्यग् ज्योतिषसिद्धान्तं प्राकाशयत्तथापि पठनपाठनयोरयमध्यायक्रमं यथार्थविवद्ध्य बहुत्र सिद्धान्त-प्रकारान् विशदीकृत्य त्रिस्कन्धविद्याकुशलैकमल्लो लल्लोऽयमादितन्त्रं शिष्यधीवृद्धिदमकार्षीत् । इदमेव तन्त्रं समधीत्य जातबोधेन भास्करेण तत्प्रकारनिकरमनुसृत्य सिद्धान्तशिरोमणिरकारि यत्र वृत्तफलं परिधिगुणं पृष्ठफलं न भवति । तथोत्क्रमज्यया वलनं दृक्कर्म च न समीचीनम् । नित्यं रविगतिलिप्तासमासुभिः सहितो भाहः सावनाहो नाहो स्फुटः । स्वीयचरार्द्धासवो यत्र विषये निरक्षविषयोदयासुसमा यस्य राशेस्त्पत्रान्ते तत्र स राशिः सदा न दृश्यः । ग्रहशीघ्रगतिफलं न विमलम् । यत्र षट्-षष्टिः सदला पललवास्तत्र धनुर्नक्रश्चेति राशिद्वयं यत्र च पञ्चाद्रयस्तत्र वृश्चिकचतुष्टयं च सततमदृश्यं नेत्यादि खण्डनमाडम्बरेण प्रतिपादितं बुद्धिविभवेन ।

यद्यपि भास्करकृतानि खण्डनानि समीचीनानि तथाप्यत्र लल्ल-सिद्धान्त आर्यभटादितन्त्रेभ्यो बहवो विशेषाः शोभन्ते । मृदूच्चरहितो मध्यो मन्दकेन्द्रं तस्मान्मन्दफलं साध्यं तथा मध्येनैवोनं शीघ्रोच्चं शीघ्रकेन्द्रं ततः शीघ्रफलं साध्यम् । सम्पूर्णाभ्यां मृदुचलफलाभ्यां संस्कृतौ मध्यौ बुधशुक्रौ स्फुटौ भवतस्तत्रापि स्फुटशुक्रो रवेः परमेण मन्दफलेन दलीकृतेन हीनोऽतिस्फुटः शुक्रः स्यादिति तथा सूर्योच्चेन रहितं बुध-शीघ्रोच्चं रविकेन्द्रं प्रकल्प्य तस्माद्यद्रविमन्दफलमागच्छेत्तेनार्कवत्पूर्वानीतः स्पष्टकुजः संस्कार्यस्तदाऽतिपरिस्फुटः कुजः स्यादिति स्पष्टाधिकारस्य ३६-३७ श्लोकाभ्यां "केचिद्वदन्ति बुधशुक्रपरिस्फुटत्वं मध्यान्मृदूच्चर-हितान्मृदुना फलेन । शीघ्रोच्चमध्यरहिताच्चलसंज्ञितेन संसाधितेन सक-लेन सदृद्धदध्यात् ॥ भानोः फलेन परमेण दलीकृतेन स्पष्टो भृगुर्वि-

प = १ । फ = २ । ब = ३ । भ = ४ । म = ५ ।

य = १ । र = २ । ल = ३ । व = ४ । श = ५ । ष = ६ । स = ७ । ह = ८ ।

अ = आ = इ = ई = ऋ = ॠ = लृ = लॄ = ए = ऐ = ओ = औ = ० ।

इति सङ्केतेन संख्याः प्रकाशयन्ति ॥

रहितोऽतिपरिस्फुटः स्यात् । सूर्योच्चवर्जितशशाङ्कजशीघ्रतुङ्गाज्जातेन भास्करफलेन कुजोऽर्कवच्चे"त्याभ्यां बुधशुक्रयोः कुजस्य च त्रिलक्षणा स्पष्टीक्रियाऽभिहिता ग्रन्थकृता । इदं कस्य मतमिति न ज्ञायते ।

शिष्यधीवृद्धिदस्य गणिताध्याये–मध्यमाधिकारः । स्पष्टाधिकारः । त्रिप्रश्नाधिकारः । चन्द्रग्रहणाधिकारः । सूर्यग्रहणाधिकारः । पर्वसम्भवाधिकारः । ग्रहोदयास्ताधिकारः । चन्द्रच्छायाधिकारः । चन्द्रशृङ्गोन्नत्यधिकारः । ग्रहयुत्यधिकारः । भग्रहयुत्यधिकारः । महापाताधिकारः । उत्तराधिकारः ॥ गोलाध्याये–छेद्यकाधिकारः । गोलबन्धाधिकारः । मध्यगतिवासना । भूगोलाध्यायः । ग्रहभ्रमसंस्थाध्यायः । भुवनकोशः । मिथ्याज्ञानाध्यायः । यन्त्राध्यायः । प्रश्नाध्यायः । एतेऽध्यायाः सहस्रश्लोकैः सन्ति । अत्र प्राचीनानामाचार्याणां न कुत्रापि नामानि । आर्यभटशिष्यैः खेटकर्मार्यभटप्रणीतं सम्यङ् नोदितमत इदं तन्त्रं मयाऽऽरभ्यत इत्येव ग्रन्थनिर्म्माणे कारणमभिहितं तद्यथा ग्रहगणिताध्यायारम्भे

नत्वा ब्रह्महरित्रिनेत्रदिनकृच्छीतांशुभूनन्दन-
प्रालेयांशुसुतेन्द्रमन्त्रिभृगुजच्छायासुतेभाननान् ।
आचार्याऽऽर्यभटोदितं सुविषमं व्योमौकसां कर्म्म य-
च्छिष्याणामभिधीयते तदधुना लल्लेन धीवृद्धिदम् ॥
विज्ञाय शास्त्रमलमार्यभटप्रणीतं
तन्त्राणि यद्यपि कृतानि तदीयशिष्यैः ।
कर्मक्रमो न खलु सम्यगुदीरितस्तैः
कर्म ब्रवीम्यहमतः क्रमशस्तु सूक्तम् ॥

इत्यनेन लल्लसमकालिकाः प्राचीना वाऽऽर्यभटशिष्या एव नाऽन्ये–इत्यनुमीयते । स्पष्टाधिकार ४३ श्लोकटीकायां "आर्यभटस्य शिष्याः प्रभाकरादय"इति भास्करो विलिलेख (काशिकराजकीयपुस्तकालयपुस्तकं तथा भास्करवर्णनं विलोक्यम्) अहो लल्लसिद्धान्ते प्राचीनानां नामोल्लेखाभावात्सर्वत्राऽऽर्यभटस्य शिष्यैरित्युपादानादार्यभटस्य विजयनन्दिप्रद्युम्नश्रीसेनलाटादयः कदाचिच्छिष्यप्रशिष्या आसन्निति प्रकल्पनं सर्वथाऽसंभवं न । लल्लस्य शृङ्गोन्नत्यधिकारे १२ श्लोके चन्द्रशुक्लानयनमुक्तमन्यया वस्तुतोऽतीव चमत्कृतं गोलयुक्तियुक्तं ज्योतिर्विद्भिरादरणीयमस्ति ।

Digitized by Google

तद्यथा "रविशीतकरान्तरांशजीवा विपरीता शशिखण्डताडिता च ।
विहृता त्रिभजीवया सितं स्याच्छशलक्ष्माङ्गुवदङ्गुलानि तस्मिन्" ॥

गणिताध्यायस्योत्तराधिकारे "शाके नखाब्धि ४२० रहिते" इत्यादिना लल्लेनाऽऽर्यभटानुसारागतग्रहेषु बीजसंस्कारश्च कृतो यत्र भटदीपिकाकारः परमेश्वरः शके रूपयुग्माब्धि ४२१ शोधनमुचितमिति स्वमतं प्रकाशयामास ।

भुवनकोशादौ लल्लपदलालित्यं नित्यमौचित्यं भास्करपाण्डित्यं तुच्छीकरोति ।

यथा तेषु मानसादिसरःसु सुराङ्गनानां स्नानेनेन्द्रधनुरुत्पद्यत इत्यनुभवकल्पनाप्रकाशको भुवनकोशस्य १७ श्लोकः ।

मज्जन्नाकनितम्बिनीघ्रजघनप्रोत्तुङ्गवक्षोरुह-
दुन्दुप्रच्युतकुङ्कुमारुणमलं पीतं सुवर्णत्विषा ।
प्रभ्रष्टप्रवरेन्द्रनीलशकलं प्राच्यां तु नीलं क्वचित्
तेष्वम्भश्च सहस्रलोचनधनुर्लीलांशमालम्बते ॥

भटदीपिकाकारपरमेश्वरस्य वाक्येनैवायं लल्ल आर्यभटशिष्य इति ज्ञायतेऽनुमीयते चापरशिष्येभ्योऽयं प्रधानो गणिताध्यायादिश्लोकाभ्यामुपरिलिखिताभ्याम् ।

आर्यभटशिष्यत्वादार्यभटतन्त्रसमय एव लल्लसमयो रूपयुग्मवेदमित ४२१ शकः ।

महापातं ब्रूहीत्येको गणकोऽन्येन केन चिद्गणकेन पृष्टो लल्लं वर्णयन्नाह ।

"त्रिस्कन्धविद्याकुशलैकमल्लो लल्लोऽपि यत्राऽप्रतिभो बभूव ।
यातेऽपि किञ्चिद्गणिताधिकारे पाताधिकारे मम नाऽधिकारः" ॥

इत्यस्य श्लोकस्य प्रथा भारतवर्षे बहुधा वर्त्तते ।

लल्लकृतं तन्त्रं गणितगोलाध्यायरूपं बहुनाऽऽयासेन संशोध्य बहुत्र टिप्पणीभिर्विभूष्यास्माभिर्मुद्रितम् । तत्र गणिताध्यायसमाप्तौ ।

आसीदशेषबुधवन्दितपादपद्मस्त्रल्लभ्रजो गुणवदग्रजवंशजन्मा ।
शाम्बस्ततोऽजनि जनेन्द्रगणकेरवेन्दुर्भट्टस्त्रिविक्रम इति प्रथितः पृथिव्याम् ॥

लल्लेन तस्य तनयेन शशाङ्कमौलेः शैलाधिराजतनयादयितस्य शम्भोः ।
सम्पूज्य पादयुगमार्यभटाभिधानसिद्धान्ततुल्यफलमेतदकारि तन्त्रम् ॥

लल्लकृतं पाटीगणितं चास्ति गोलाध्याये वृत्तपृष्ठफलखण्डने "वृत्तफलं परिधिघ्नं समन्ततो भवति गोलपृष्ठफलमिति स्वगणिते कथं परिधिघ्नं कृत"मिति भास्करस्योल्लेखादिति ज्ञायते परम्परातः श्रूयते च परन्तु एतत्कृतं पाटीगणितं वा बीजं न दृष्टं मयाऽद्यावधि ।

लल्लस्य काचित्कृतिः फलिते च वर्त्तते बहुत्र फलग्रन्थटीकायां तद्वचनोपलम्भादिति निश्चीयते यथा मुहूर्त्तचिन्तामणिटीकायां पीयूषधाराख्यायां गोविन्दकृतायां शुभाशुभप्रकरणस्य ४१ श्लोके, 'यदाह लल्लः वारर्क्षतिथियोगेषु यात्रामेव विवर्जयेत् । विवाहादीनि कुर्वीत गर्गादीनामिदं वचः" तत्रैव ४९ श्लोके "तदाह लल्लः गोदावर्य्युत्तरतो यावद्भागीरथीतटं याम्यम् । तत्र विवाहो नेष्टः सिंहस्थे देवपतिपूज्ये" । एवमनेकानि ॥ परन्त्वियं कृतिर्न दृष्टिपथमारूढाऽद्यावधि । लल्लकृतं शिष्यधीवृद्धिदं तन्त्रं वस्तुतो दर्शनार्हम् । नृसिंहदैवज्ञेन वासनावार्त्तिके येषां यन्त्राणां नामानि लिखितानि तानि चास्य यन्त्राध्याये वर्त्तन्ते । (नृसिंहदैवज्ञवर्णनं विलोक्यम्) ।

वराहः । वराहमिहिरो वा वराहमिहरः । ४२७

आदित्यदासतनयः काम्पिल्लके (कालपीनगरे) सूर्यदेवताया वरप्रसादमवाप्य स्वपितुर्ज्योतिषसिद्धान्तं समधीत्यावन्तिकायां तत्रत्यनृपतिना समादरमासाद्य लघुजातकं बृहज्जातकं विवाहपटलं बृहत्संहितां योगयात्रां पञ्चसिद्धान्तिकां च व्यरचयत् । बहूनां मते यथा लघुबृहन्नामभेदेन जातकद्वयमकारि वराहेण तथैव लघुबृहत्कृतभेदेन लघुसंहितायाः अर्थात् समाससंहितायाः कर्त्ता च वराहः । के चन "काम्पिल्लके" इत्यत्र "कापित्थके" इति पाठं वदन्ति । वराहकृतबृहज्जातकस्य षड्विंशत्यध्यायपञ्चमश्लोकेन ।

"आदित्यदासतनयस्तदवाप्तबोधः काम्पिल्लके सवितृलब्धवरप्रसादः ।

आवन्तिको मुनिमतान्यवलोक्य सम्यग्घोरां वराहमिहिरो रुचिरां चकार" ॥

Digitized by Google

इत्यनेन श्लोकेन पूर्वोक्तं सर्वं स्फुटं भवति ।

भट्टोत्पलमतेनायं मगधद्विजः । केषां चिन्मतेऽयं मगद्विजोऽर्थात्सूर्योपासको ब्राह्मणः । जीविकार्थं मगधादुज्जयिनीं गतस्य वराहस्य मगधद्विजत्वमसम्भवं न । एके मगधे स्वगेहे निजपितुः सम्यग्ज्योतिषमधीत्याऽऽर्यभटादिसिद्धान्तं चावगम्य स्वप्रसिद्ध्यर्थं धनार्जनार्थं च देशाटनं कुर्वता वराहेण काम्पिल्लके सूर्यदेवाराधनेन वरप्रसादमासाद्य परम्परया विक्रमनरपतिविभूषितां लब्धकान्तिकामवन्तिकामवाप्य तत्र वसतिः कृतेति निगदन्ति ।

यथा संप्रति यूरपभाषामधीत्य सुधियः प्रसिद्धा भवन्ति तथा वराहोऽपि स्वसमये यवनभाषामधीत्य नृपसभासु स्वप्रसिद्धिं कारयामासेति तत्संहितायां गर्गवचनेन ।

"म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम् ।
ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद् द्विजः" ॥

इत्यनेन यवनोत्कर्षवर्णनात् बृहज्जातके "क्रिय*तावुरिजितुमेत्यादिश्लोकेन यवनभाषायां राशिनामोल्लेखाच्च ज्ञायते ।

सिद्धान्तरीत्या कल्पादेरहर्गणसाधने गणिताधिक्यात् क्लेशो भवति तदपाकरणाय कमपि सिद्धान्तमवलम्ब्य गणकाः करणग्रन्थान् विरचयन्ति तत्रापि यदा गताब्दा अधिका भवन्ति तदाऽहर्गणसाधने तथैव क्लेशोऽतः पुनस्तदपाकरणार्थं नव्या नवं करणं कुर्वन्ति । एवं स्वसमये पञ्चसिद्धान्तिकायां "सप्ताश्विवेदसंख्यं शककालमपास्येत्यादिना

* क्रिय, तावुरि, जितुम, लेय, पाथेन वा पाथोन, जूक वा जूक, कौर्प्य, तौक्षिक, आकोकेर, हृद्रोग, इत्थम्, हेलि, हिमन, आर, ज्यौ, कोण, आस्फुजित्, होरा, केन्द्र, द्रेष्काण वा द्रेक्काण, लिप्ता, अनफा, सुनफा, दुरुधरा, केमद्रुम, वेशि, आपोक्लिम, पणफर, हिबुक, जामित्र, मेषूरण, द्यूनम्, द्यूतम्, रिःफ, कुलीर, त्रिकोण एते ग्रीकशब्दाः वेबर (Weber) महाशयेन प्रकाशितास्तत्र हृद्रोग्, कोण, लिप्ता, कुलीर, त्रिकोण, एते च संस्कृतशब्दा भ्रमाल्लिखिताः । (See Indische Literaturgeschichte, p. 227) केन्द्र, द्रेष्काण, इतौ चाऽऽर्यभटतन्त्रे च प्रसिद्धौ ॥ पञ्चसिद्धान्तिकाचतुर्दशाध्याये १७ श्लोकेन क्षितिजस्य हरिजमित्यपि संज्ञा नूतना तथा बृहज्जातके दुश्चिक्यसंज्ञा च नूत्ना । अन्यत्र वेशिसंज्ञा च ।

Digitized by Google

(See Pañchasiddhântikâ, edited by Dr. G. Thibaut and myself) रोमकसिद्धान्तानुसारेणाहर्गणं गणयता वराहेण रोमकसिद्धान्तरचनाकालात् सप्ताश्विवेदमित ४२७ शकादहर्गणः साधित इति वदतां डाक्टरभाऊदाज्यादीनां मतं युक्तिशून्यं प्रतिभाति भारतवर्षे सकलकरणग्रन्थेषु करणारम्भशकादेवाहर्गणसाधनदर्शनात् । वस्तुतः खण्डखाद्यकरणटीकायामामराजोक्तस्य "नवाधिकपञ्चशतसंख्यशाके ५०९ वराहमिहिराचार्यो दिवं गतः" इत्यस्य लेखस्य न किमपि प्रमाणम् । न ह्यन्योक्तवचनप्रामाण्यादाचार्यवचनाप्रामाण्यम् । यदि पञ्चसिद्धान्तिकारचनाकाले वराहस्य वयोऽष्टादशवर्षसमं कल्प्यते तदा तज्जन्मशकः = ४०९ । निधनसमयश्चाऽऽमराजोक्त एव गृह्यते तदा वराहस्य पूर्णमायुः शतमायाति तच्चाहो ह्यसम्भवं बहुश्रुते बहुविषयचतुरे मगधादागते बहुकृतिकर्त्तरि वराहे । अथ वाऽऽत्मजन्मयोगपरिचयार्थं स्वजन्मशकादहर्गणसाधनं कृतमाचार्येणेति बहूनां मतमपि नाऽसम्भवं परन्तु रोमकसिद्धान्तारम्भकालादहर्गणसाधने न काचिद्युक्तिरुत्पद्यते ।

आलबीरूनी (Albîrûnî) नाम्नाऽपि पञ्चसिद्धान्तिकासमयस्तत्र लिखितः सप्तद्विवेदमितः ४२७ शक एव स्वीकृतः ।

यद्यपि परदेशोद्भवजनस्य देशाटनं कुर्वतः आलबीरूनीनाम्नो लेखो न प्रामाणिकस्तथापि तत्समये सर्वत्रैव पञ्चसिद्धान्तिकायाः प्रचारात् तज्ज्ञानां च विदुषामाधिक्यात् भारते करणग्रन्थरीत्यनुसारतश्च तल्लेखे न संशयः । आधुनिकस्य ज्योतिर्विदाभरणकृतः कालिदासस्याप्रामाणिकं लेखमवलम्ब्य डाक्टरकर्णनाम्ना बृहत्संहिताभूमिका व्यर्थं विस्तारिता (गणककालिदाससमयवर्णनं विलोक्यम्) वराहानन्तरं सार्द्धसप्तशते-७५० वैर्षोद्भवस्य वराहादिविषयकलेखेषु परस्परमसङ्गतेषु कपोलकल्पितेषु न किमपि वाक्यं प्रामाणिकमिति मन्मतम् ।

बृहत्संहितायाः प्रथमाध्यायस्य १० श्लोकेन "वक्रानुवक्रास्तमयोदयाद्यास्ताराग्रहाणां करणे मयोक्ताः । होरागतं विस्तरतश्च जन्म यात्राविवाहैः सह पूर्वमुक्तम्" इत्यनेन यद्यप्यस्य सर्वासां कृतीनां नामानि न स्पष्टानि भवन्ति तथापि वराहस्यान्तिमा कृतिर्बृहत्संहितैवेति स्फुटं तेन श्लोकेन ।

लघुजातकं भट्टोत्पलटीकासहितं तथैव बृहज्जातकं च संप्रति फलितवेदिनां दैववेदिनां गृहेषु सर्वत्रैव लिखितं मुद्रितं चोपलभ्यते ।

Digitized by Google

मिथिलाप्रान्तेषु लघुजातकस्यापि प्रचारो विशेषरूपेण काश्यां च बृहज्जातकस्यैव । बृहत्संहिता च डाक्टरकर्णसाहिबमुद्रणकालाद्विशेषतः प्रसिद्धा । समाससंहिताऽद्यावधि न दृष्टिगोचरीभूता । योगयात्राविवाहपटले बहुनाऽऽयासेन लभ्येते । एतत्पुस्तकद्वयं च काश्यां ज्योतिर्विदः श्यामाचरणस्य गेहे क्रमेण यात्राविवाहमुहूर्त्तवर्णनपरमस्माभिर्दृष्टम् । पञ्चसिद्धान्तिका च बहुनाऽऽयासेन डाक्टरथिबोसाहिबेन मया च यावच्छक्यं संशोध्य नवीनां टीकां च विरचय्य मुद्रिता । अस्या अन्या प्रतिरद्यावधि नोपलब्धा । फलग्रन्थेषु विवाहपटलस्य बहूनि वाक्यान्युपलभ्यन्ते (पद्मनाभमिश्रवर्णनं विलोक्यम्) यथा शास्त्रान्तरेऽध्याया भवन्ति तथा तन्त्रशास्त्रेऽध्यायस्थाने पटलं लिख्यते तेन तान्त्रिकलेखानुसारेण विवाहपटलेन विवाहाध्यायो गृह्यते। यथा दुर्गापटलं कालीपटलमित्यादि। (See Dr. Kern's Preface to Brihatsaṃhitâ, p. 25.) बृहज्जातकोपरि भट्टोत्पलस्य । महीधरस्य, महादेवस्य च टीका प्रसिद्धा । एका केरलीटीका च दशाध्यायी नाम्ना दुर्मिलाऽस्ति यस्या एका प्रतिर्बहुनाऽऽयासेन काशिकराजकीयपुस्तकालये स्थापनार्थं मया लेखकद्वारेणोत्पादिता ।

अस्यां टीकायां—"गोविन्देनापि बृहज्जातकटीका कृतेति लिखितमस्ति । तथाऽत्र प्रथमश्लोकटीकायां "* चन्द्रो जलमर्कोऽग्निरि"त्यादि सूर्यभटस्य, भगवत्पादाचार्यवेदान्ताचार्यस्य, गोविन्दस्य, हलधरस्य, श्रीपतेः, सारावलीकारस्य, कृष्णाचार्यस्य, भट्टोत्पलस्य, आर्यभटस्य, "सिंहो वृषः प्रथममेष" इत्यादिचतुर्दशश्लोकटीकायां विद्यामाधवस्य, वसिष्ठस्य, पराशरहोरायाः, बादरायणस्य, यवनेश्वरस्य, एकोनविंशतिश्लोकटीकायां "शशिकृत†नभरामैराहता राशिजीवा"इत्यादि तथा "शून्याद्रिरसरूपाब्धिभूतरन्ध्रमुनीन्दवः । पञ्चाग्निरन्ध्रशशिनो मेषादीनां निरक्षजाः ॥ चरप्राणाः" इत्यादि भास्करस्य, विद्वज्जनबल्लभाख्यस्य, द्वितीयाध्यायान्तिमश्लोकटीकायां "कदाचिद्ब्रह्मसिद्धान्तः सावित्रस्तु कदाचन । कदाचिद्रोमशः

* अयं श्लोकश्चाऽऽर्यभटीयगोलपादस्य सप्तत्रिंशत्संख्याकः ।

† एतानि सिद्धान्तशिरोमणिरचयितुर्भास्करस्य वचनानि न तेनाऽयमन्यो भास्कर इत्यनुमीयते ।

Digitized by Google

स्पष्टो न कदाचित्तथेतरौ” (इतरौ ब्रह्मवासिष्ठौ) इति पराशरस्य, “अनिमिषपरमांशके विलग्ने शशितनये गवि पञ्चवर्गलिप्ते” इत्यादिश्लोकटीकायां “वृषस्य पञ्चविंशतिकलायां कदा बुधो भविष्यति—एतदर्थमाचार्येण पञ्चसिद्धान्तिका विनिर्मिता यदि पञ्चानां मतेन बुधः पञ्चविंशतिकलायामागच्छेत्तर्हि समीचीन एवान्यथा येन दृग्गणितैक्यं भवेत्तेनैव साध्यः” इति तत्कृतदशमाध्यायारम्भे “तथा चाऽऽचार्यपुत्रेणोक्तं” “यो यो भावः स्वामिदृष्टो युतो वे”त्यादिषट्पञ्चाशिकाकारस्य पृथुयशसो वचनान्युपलभ्यन्ते ।

बृहज्जातके च मय· यवन· मणित्थ· शक्ति· विष्णुगुप्त· देवस्वामि· सिद्धसेन·जीवशर्म·सत्याचार्याणां (*भदन्त) नामानि वराहेण लिखितानि। संहिताया अन्ते च तत्रत्यविषयाणामनुक्रमणिका च वर्णिता क्रमेण ।

अथ वराहेणाष्टपञ्चाशत्तमेऽध्याये ४४ श्लोकेन “पद्माङ्कितकरचरणः प्रसन्नमूर्त्तिः सुनीचकेशश्च । पद्मासनोपविष्टः पितेव जगतो भवेद्बुद्धः” ॥ इत्यनेन बुद्धप्रतिमालक्षणं ४५ श्लोकेन “आजानुलम्बबाहुः श्रीवत्साङ्कः प्रशान्तमूर्त्तिश्च । दिग्वासास्तरुणो रूपवांश्च कार्योऽर्हतां देवः” ॥ इत्यनेन चाऽर्हद्देवप्रतिमालक्षणं चोक्तमिति वैदिकधर्म्मावलम्बिनां न रीतिरिति वदतां मतं न तथ्यं प्रतिमालक्षणं कर्त्तुं प्रवृत्तस्य विदुषः सर्वलक्षणवर्णनाऽऽवश्यकत्वात् । पञ्चसिद्धान्तिकायाः पञ्चदशाध्यायस्य २० श्लोकेन “लङ्कार्द्धरात्रसमये दिनप्रवृत्तिं जगाद चार्यभटः । भूयः स एव सूर्योदयात् प्रभृत्याह लङ्कायाम्” ॥ इत्यनेन वराहेणाचार्यभटस्य दिनप्रवृत्तौ मतद्वयं कथितं परन्तु आर्यभटीयतन्त्रे दशगीतिकासूत्र सूर्योदयादेव दिनप्रवृत्तिर्लिखिताऽन्यमतस्य चर्चा न कुत्रापि वर्त्तते (See Dr. Kern's edition

* डाक्टरकर्णसाहिबेन भदत्त इति नाम लिखितं (See Preface to Bribat-saṁhitâ, p. 29 and 51) परन्तु तस्य भमिताः अर्थात् सप्तविंशतिसंख्याका दन्ता आसन् तेन भदन्त इति कथ्यत इति भारतवर्षे चिराज्जनश्रुतिः । यथा पुष्पदन्तः महिम्नःनामस्तोत्रकर्त्ता ।

प्राचीनानां ग्रन्थरचयितॄणां नामानि प्रायो दन्तान्तानि क्वचिदेवोपलभ्यन्ते । येषां सप्तविंशतिर्दन्तास्ते सत्यवादिनो भवन्तीत्यद्यावधि भारतवर्षे प्रसिद्धिः । तेनैवास्य सत्याचार्य इति नामान्तरम् ।

of Âryabhaṭîya) । वराहेण पञ्चसिद्धान्तिकायां बहवो गणितस्कन्धविशेषा विहितास्ते च विस्तरभयान्न लिख्यन्ते । (See Pañchasiddhântikâ,) वराहस्य सर्वे ग्रन्थाः प्रकटयन्ति ज्योतिषस्कन्धत्रये ऽद्वितीयं पाण्डित्यं सर्वजनमनस्तोषकरं काव्यकलाकलापवैभवं च । मन्मते वराहार्यभटौ समकालिकौ मगधराजधान्यां वराहश्चार्यभटमतं सम्यग् विज्ञाय ततोऽवन्तीं गत इति ।

कल्याणवर्म्मा । ५००

देवग्रामवासी व्याघ्रभटेश्वरो वराहमिहिरकृतबृहज्जातकतोऽपि बृहतीं होराशास्त्रे यवननरेन्द्रादिरचितहोराशास्त्रसारप्रसूतां सारावलीं कृतिं व्यरचयत् ।

यद्यप्यत्र समयादिकं नास्ति तथापि ग्रन्थारम्भकारणेन "विस्तरकृतानि मुनिभिः परिहृत्य पुरातनानि शास्त्राणि । होरातन्त्रं रचितं वराहमिहिरेण संक्षेपात् ॥ राशिदशवर्गभूपतियोगायुर्दायगोदशादीनाम् । विषयविभागः स्पष्टः कर्त्तुं नो शक्यते यतस्तेन ॥ अत एव विस्तरेभ्यो यवननरेन्द्रादिरचितशास्त्रेभ्यः । सकलमसारं त्यक्त्वा तेभ्यः सारं समुद्धृत्य ॥ देवग्रामपयःप्रपोषणबलादुत्पाटसत्पञ्जरं कीर्त्तिः सिंहविलासिनीव सहसा यस्येह भक्त्वा गता । होरां व्याघ्रभटेश्वरो रचयति स्पष्टां तु सारावलीं श्रीमान् शास्त्रविचारनिर्म्मलमनाः कल्याणवर्मा कृती" ॥ इत्यनेन सारावल्यारम्भस्थेन वराहमिहिरानन्तरं होराशास्त्रेऽस्यैव व्याघ्रनृपस्य कल्याणवर्म्मणः कृतिः । अर्थाद्वराहस्य कृतिं संक्षिप्तां दृष्ट्वा कल्याणवर्म्मणा विस्तारिता यवनेन्द्रादिशास्त्रेभ्य इति । अतो वराहानन्तरं "श्रीचापवंशतिलके श्रीव्याघ्रमुखे नृपे शकनृपालात् । पञ्चाशत्संयुक्तैर्वर्षशतैः पञ्चभिरतीतैः" इति ब्रह्मगुप्तोक्तात् (ब्रह्मगुप्तवर्णनं विलोक्यम्) श्रीव्याघ्रमुखनृपास्यैवात्रापि दर्शनात् परम्परातो ज्योतिर्विन्मुखात् "वर्षशतानां मध्ये न केन चित्पूरिता धृता चीनैः । भट्टोत्पलस्तु पूर्णां चकार सारावलीं सकलाम्" ॥ इति श्लोकस्य श्रवणात् (भट्टोत्पलवर्णनं विलोक्यं) बृहज्जातकटीकायां बहुत्र भट्टोत्पलस्य सारावलीप्रमाणोल्लेखाच्च ब्रह्मगुप्तासन्नसमयो हि पञ्चशतासन्नशकः कल्याणवर्म्मेण इत्यनुमीयते ।

Digitized by Google

॥ ॐ नमो गणेशाय ॥

काशिकाव्याख्या पदमञ्जरी ।

(*Continued from page* 652, Vol. XIII.)

"चार्थे द्वन्द्वः" ॥ 'समुच्चयेत्यादि'। यदा परस्परनिरपेक्षाः पदार्था एकस्मिन्प्रतिसम्बन्धिनि समुच्चीयन्ते तदा समुच्चयः, यथा ग्रहरहर्नयमानो गामश्वं पुरुषं पशुं वैवस्वतो न तृप्यति सुराया इव दुर्मदीति, दुर्मदी यथा सुराया न तृप्यति तथा यमो गवादीन्नयमान इत्यर्थः । ग्रत्र नयतिक्रियायामेकस्यां गवादीनां समुच्चयः, गम्यमानत्वाच्च चशब्दस्याप्रयोगः, एवं राज्ञो गौश्चाश्वश्चेति द्रव्ये द्रव्ययोः, रक्तः शुक्लश्चेति द्रव्ये गुणयोः, रक्तः पटः कुण्डलं चेति गुणे द्रव्ययोः समुच्चय इत्यादि द्रष्टव्यं, यदानेकस्य प्राधान्यात्तदनुरोधेन त्वितरदन्वाचीयते तदान्वाचयः, यथा भिक्षामट गाञ्चानयेति, ग्रत्र ह्यदर्शनादनानयन्नपि गामटत्येव भिक्षाम्, ग्रनटंस्तु भिक्षां न गामानयति, ग्रटन्नपि नान्विष्य गामानयति, इतरेतरयोगस्तु परस्परापेक्षाणामवयवभेदानुपगमेन समुदायरूपतामापन्नानामेकस्मिन्नर्थेऽन्वये सति भवति, यथा देवदत्तयज्ञदत्ताभ्यामिदं कार्यमिति, तथैकापायेऽपि तद्भवति, उद्भूतावयवभेदत्वाच्च द्विवचनबहुवचने भवतः, तादृशानामेवावयवतिरोधानसंहतिरूपेणान्वये तत्समाहारो यथाच्छत्रोपानहमिति, संहतिप्रधानत्वात्त्वेकवचनम् । 'तत्रेत्यादि'। स्यादेतत् । समुच्चये परस्परानपेक्षत्वेपि गवादीनामेकक्रियाद्वारकं सामर्थ्यं दध्योदनादिवदस्त्येवेति, तन्न युक्तं, दध्योदनादावेकत्वात्क्रियायाः, इह तु कर्मभेदात्क्रिया भिद्यते, तथा च 'समुच्चयेन्यतरस्या'मित्यत्र भ्राष्ट्रमट मठमटेत्यादिकं कर्मभेदनिबन्धनं क्रियाभेदमाश्रित्योदाहरिष्यते, ग्रन्वाचये त्वप्रधानमेव चार्थे वर्तते न प्रधानमित्यनेकस्य पदस्य चार्थे वृत्त्यभावादपि समासाभावः, इह पटुश्चासौ खञ्जश्चेत्येकस्मिन्नप्यनेकधर्मसमुच्चयाच्चार्थसद्भावात्समानाधिकरणयोरपि द्वन्द्वसंज्ञाप्रसङ्गः, ततश्च 'द्वन्द्वे घी'ति नियमः स्यात्, विशेषणमित्यादिना तु

Digitized by Google

तत्पुरुषकरणे खञ्जपटुरित्यपि सिद्ध्यति, नैष दोषः। एकसंज्ञाधिकाराद्विशेषविहितत्वात्तत्पुरुषसंज्ञैव भविष्यति, अन्यथा नीलं च तदुत्पलं चेत्यादावपि द्वन्द्वः स्यात्, यद्वा शेषइति वर्त्तते ऽतो विशेषणमित्यत्रोपयुक्तत्वान्न भविष्यति, सामानाधिकरण्याभावे तु द्वन्द्व एव पटुखञ्जावागताविति।

'प्लक्षन्यग्रोधाविति'। चशब्दस्याव्ययत्वेपि तदर्थे विधीयमानस्य द्वन्द्वस्य स्वभावादेव लिङ्गसंख्यायोगः, कथं पुनरत्र द्विवचनं, यावता शब्दपौर्वापर्यादर्थाभिधानेपि पौर्वापर्यन्ततश्च प्लक्षशब्दः सहार्थेन निवृत्तः न्यग्रोधशब्द उपस्थितः, एक एवार्थस्तस्यैकत्वादेकवचनमेव प्राप्नोति, तथा चा-'अन्तौ टकिता' विति क्रमेण प्रतीतिमङ्गीकृत्य यथासंख्यमित्यस्य प्रवृत्तिः, न च क्रमेण द्वयोरर्थयोः प्रतीतौ द्विवचनं भवति यथा वा वाक्ये प्लक्षश्च न्यग्रोधश्चेति, अत्र न्यग्रोधार्थप्रतीतिदशायां प्लक्षार्थस्याप्रतीतिरेव कारणम्, अस्तु तर्हि युगपदधिकरणवचने द्वन्द्वः। किमिदं युगपदधिकरणवचनमिति, अधिकरणं वर्तिपदार्थः, अधिकरणे युगपद्वचनं युगपदधिकरणवचनं, तत्र द्वन्द्वो भवति, केन पुनर्युगपद् द्वयोर्वचनम्, एकैकेन पदेन, एतदुक्तं भवति, यावतां पदानां द्वन्द्वो यदि तावतामन्योन्यार्थाभिधानं युगपद्भवत्येवं द्वन्द्वो भवतीति, अत्र हि द्विवचनबहुवचनान्यथानुपपत्तिरेव प्रमाणं, विग्रहे चापि दर्शनात्, विग्रहे खल्वपि युगपद्वचनता दृश्यते प्रमित्रयोर्वरुणयोः, द्यावा चिदस्मै पृथिवी नमेते इति, किं पुनः समासे यत्र चान्या चान्या च शक्तिः प्रादुर्भवति, कथं पुनः प्लक्षशब्देन न्यग्रोधाभिधानं तेन वा तस्य, साहचर्यादिति, यद्वा तद्वा निमित्तं भवतु, यद्यपि च लोकव्यवहारे केवलस्य प्लक्षशब्दस्य न्यग्रोधाभिधायित्वं न दृष्टं न्यग्रोधशब्दस्य वा प्लक्षाभिधायित्व, द्वन्द्वावयवानां त्वनेकार्थाभिधायित्वं न केवलानामित्यदोषः, नियतविषयाश्चापि शब्दार्था भवन्ति यथा भ्रातृशब्दस्यैकशेषएव स्वसरि वृत्तिः पुत्रशब्दस्य दुहितरि, एतेनैतदपि निरस्तम् एकेनोक्तत्वात्तस्यार्थस्य परस्य प्रयोगो नोपपद्यतइति, कथं द्वन्द्वावयवानामेव परस्परसन्निधानादेषा शक्तिर्वह्निसन्निधाविव घृते द्रवता, नो खलु वह्निविगतो भवति, यदि तर्हि प्लक्षोपि द्व्यर्थो न्यग्रोधोपि द्व्यर्थो

Digitized by Google

बहुत्वाद्बहुवचनं प्राप्नोति, नात्र चत्वारोऽर्थाः किं तर्हि याभ्यामेवात्रैकोऽप्यर्थ-स्ताभ्यामेवापरोऽपि । स्यादेतत् । उभयोरत्र पर्यायत्वे यथा प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधाविति द्विर्वचने प्रतीतिरेवं प्लक्षन्यग्रोधावित्यत्रापि प्राप्नोति, तच्च, युगपदुत्पादात्, तद्यथा द्वयोरक्ष्णोर्युगपद्विस्फारितयोः पुरोवर्त्तिन्यर्थे-द्वये युगपदेका प्रतीतिर्जन्यते तथेहापि द्रष्टव्यं, ननु यदा प्लक्षशब्दो न तदा न्यग्रोधशब्दो यदा न्यग्रोधशब्दो न तदा प्लक्षशब्द इति कथमत्र युगपद्व्यापारः, स्मृतिस्थयोर्युगपद्व्यापाराददोषः, पदानि हि श्रुतमात्राणि स्वं-स्वमर्थं स्मारयन्ति पश्चादाकाङ्क्षासन्निधियोग्यत्वेषु परामृष्टेषु स्मृतिस्था-न्यभिदधति, तस्यामेव स्मृतौ युगपदारोहात्सम्भवत्येव युगपद्व्यापारः, या च सा पदार्थानां स्मृतिः सा क्रमभाविनीति तत्क्रमेणैव यथासंख्यादि-व्यवस्था युगपदभिधानेऽप्युपपद्यते, तदेवं युगपदधिकरणवचने द्वन्द्व इति स्थितम् । इहैकविंशतिर्द्वाविंशतिरिति, यद्ययं द्वन्द्वस्स्याद् एकं च विंशति-श्चेतीतरेतरयोगे द्विवचनबहुवचनप्रसङ्गः, समाहारे च 'स नपुंसक'मिति नपुंसकप्रसङ्गः, अत एव एकाधिका विंशतिरेकविंशतिरिति शाकपार्थिवादि-त्वात्समासः क्रियते, नैवं शक्यं 'राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु संख्ये'ति पूर्वपदप्रकृतिस्वरो न स्यात्, तस्माद् द्वन्द्व एवायं स च समाहारे नेत-रेतरयोगे, अनभिधानात्, नपुंसकत्वन्तु लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्ग-स्येति न भवति ॥

"उपसर्जनं पूर्वम्" ॥ 'अनियमो हि स्यादिति' । यद्यपि विपरीतप्रयोगो लोके न दृष्टः परपुरुषापराधात्तु वाक्यवत्सम्भाव्येतेत्यर्थः । इह राज्ञः पुरुषस्य पुत्रो राजपुरुषपुत्र इति षष्ठीसमासशास्त्रे द्वयोरपि प्रथमानिर्द्दिष्टत्वेऽप्युपसर्जनसंज्ञा ऽन्वर्थत्वादप्रधानस्यैव भवति, पुरुषश्चात्र राजापेक्षया प्रधानमिति पूर्वनिपातनियमः ॥

"राजदन्तादिषु परम्" ॥ 'न केवलमित्यादि' । अत्र विहि-तपूर्वनिपातस्येति पाठे विहितः पूर्वनिपातो यस्य तस्येत्यर्थः । प्रायेण तु विहितस्येति पाठः, तत्रापवाद इति शेषः, अन्यस्यापि घ्याद्येः पूर्व-निपातो यथालक्षणं विहितस्तस्याप्यपवाद इत्यर्थः । 'अर्थेवणमिति' ।

वनं पुरगेत्यादिना णत्वं, तदेव तर्हि णत्वविधानं परनिपातस्य ज्ञापकं भविष्यति, तच्च, ‘ उपसर्जनं पूर्व ’ मिति नियमो न प्रवर्त्तत इत्येतावतोऽप्यर्थस्य ज्ञापकत्वेन तदुपपन्नं तस्मात्कथं नियमेन परनिपातः स्यात्, इह च निपातनादलुगिव णत्वमपि न भविष्यतीति तत्राग्रेग्रहणं शक्यमकर्त्तुम् । ‘ पूर्वकालस्येति ’। पूर्वकालैकेति प्रथमानिर्द्दिष्टशादुपसर्जनस्येत्यर्थः । उलूखलमुसलादिद्वन्द्वेषु क्व चिदल्पाच्तरत्वात्क्व चिद्घ्यन्तत्वात्क्व चिदजाद्यदन्तत्वात्पूर्वनिपातप्रसङ्गः, क्व चिदनियमः, दृषदुपलमिति प्रमादपाठः, अल्पाच्तरत्वात् । ‘ अग्रेभुवं दारगवमिति ’। अचतुरादिसूत्रेच् समासान्तो निपातितस्तेन परनिपातस्यापि सिद्धत्वादिह पाठः शक्योऽकर्त्तुम् ॥

“ द्वन्द्वे घि ” ॥ द्वन्द्वेनेकमिति प्रथमानिर्द्दिष्टात्सर्वेषामेवोपसर्जनत्वादनियमे प्राप्ते वचनम् । ‘ अनेकप्राप्ताविति ’ । आकृतौ पदार्थे समुदाये सकृल्लक्षणं प्रवर्त्तते न प्रतिव्यक्त्यावृत्त्या, तत्रैकस्यैव पूर्वनिपातेन जातौ लक्षणं प्रवृत्तमेवेति न पुनः प्रवर्तते । नन्वाकृतिपक्षेपि पटुगुप्तौ मृदुगुप्तावित्यादिषु बहुषु व्यक्तिषु यथा युगपत्प्रवर्तते तथात्रापि प्रवर्तताम् । एवं मन्यते, एकस्य युगपदवध्यवधिमद्भावो विरोधाच्च सम्भवति, न चान्तमपेक्ष्योभयोः पूर्वत्वमन्यतरेण व्यवधानादिति, अत्र च यदा पटुमृद्वोर्द्वन्द्वं कृत्वा पश्चाच्छुक्लशब्दस्य द्वन्द्वः क्रियते तदाल्पाच्तरत्वात्तस्य पूर्वनिपाते शुक्लमृदुपटवः शुक्लपटुमृदव इति च भवति । ‘ विस्पष्टपटुरिति ’। विस्पष्टशब्दः प्रवृत्तिनिमित्तस्य पाटवस्य विशेषणमिति विस्पष्टं पटुरिति विगृह्य ‘ सुप्सुपे ’ ति समासः ॥

“ अजाद्यदन्तम् ” ॥ अजादीति पृथक् पदं विशेषणसमासो वा । ‘ अश्वेन्द्ररथा इति ’। रथशब्दस्य पश्चात्समासे रथाश्वेन्द्रा इत्यपि भवति । ‘ द्वन्द्वे घ्यन्तादजाद्यदन्तं विप्रतिषेधेनेति ’। ‘ द्वन्द्वे घी ’ त्यस्यावकाशः पटुगुप्तौ, ‘ अजाद्यदन्त ’ मित्यस्यावकाश उष्ट्रखरम्, इन्द्राग्नी इत्यत्रोभयप्राप्तौ परत्वादजाद्यदन्तमित्येतद्भवति विप्रतिषेधेनेति ॥

“ अल्पाच्तरम् ” ॥ अत एव निपातनात्स्वार्थे तरप् कुत्वाभावश्च, यदि तु प्रकर्षे तरप् चेत्तदा धवखदिरपलाशा इत्यादौ बहुषु सवि-

हितेषु द्विवचनोपपदत्वाभावादस्याप्रवृत्तावनियमः स्यात्, द्वयोरेव तु स्यात् प्लक्षन्यग्रोधाविति । 'शङ्खदुन्दुभिवीणा इति' । तूर्याङ्गानामित्येकवद्भावो न भवति, तूर्यशिल्पोपजीविनामेव तत्र ग्रहणात्, नियतद्रव्यविवक्षायां जातिपरत्वाभावा 'ज्जातिरप्राणिना' मित्येतदपि न भवति, शङ्खवीणाभ्यां दुन्दुभेर्द्वन्द्वे दुन्दुभिशङ्खवीणा इत्यपि भवति, एवं मृदङ्गश्च शङ्खपणवौ च मृदङ्गशङ्खपणवाः, धनपतिश्च रामकेशवौ च प्रासादो धनपतिरामकेशवानामित्यादि भवति, तथा होता च पोता च नेष्टा चोद्गाता चेति बहूनां युगपद् द्वन्द्वे तृतीयस्योत्तरपदमनन्तरमिति तस्यैवानङ् भवति नेतरयोः होतृपोतृनेष्टोद्गातारः, द्वयोर्द्वयोर्द्वन्द्वे त्रयाणामप्यानङ् भवति होतापोतानेष्टोद्गातार इति, एवमन्यत्रापि द्वन्द्वक्रियायामानुपूर्व्यविशेषाद्रूपविशेषो वेदितव्यः । पूर्वाभ्यामल्पाच्तरमित्येतत्पूर्वानुसारेण गम्यमानत्वाद्वृत्तौ न पठितं, 'द्वन्द्वे घी' त्यस्यावकाशः पटुगुप्तौ, 'अल्पाच्तर' मित्यस्यावकाशः प्लक्षन्यग्रोधौ, वागग्नी इत्यत्रोभयप्राप्तौ अल्पाच्तरमित्येतद्भवति । अजाद्यदन्तमित्यस्यावकाश उष्ट्रखरम्, अल्पाच्तरमित्यस्य स एव, वागिन्द्रावित्यत्रोभयप्राप्तावल्पाच्तरमित्येतद्भवति । 'ऋतुनक्षत्राणामिति' । ऋतूनामानुपूर्व्यं प्रादुर्भावकृतम्, नक्षत्राणामुदयकृतम् । 'मातापितराविति' । आचार्यः श्रेष्ठो गुरूणां, मातेत्येकइति स्मृतिः । पितुर्द्दशगुणं माता गौरवेणातिरिच्यतइति च । 'श्रद्धामेधे इति' । सत्यां श्रद्धायामर्थक्रियाकारिणी मेधेत्यभ्यर्हितत्वं श्रद्धायाः । 'दीक्षातपसी इति' । दीक्षार्थं तप इत्यभ्यर्हितत्वं दीक्षायाः, लघ्वक्षरादपि तपसो विप्रतिषेधादभ्यर्हितमित्येतदेव भवति । 'समानाक्षराणामित्यत्र नास्तीति' । तेन ऋतुनक्षत्राणामित्यत्रैव वर्णग्रहणं न कृतमिति भावः । वर्णानामुत्पत्तिकृतमानुपूर्व्यं श्रूयतएव मुखतो ब्राह्मणमसृजद्बाहुभ्यां राजन्यमूरुभ्यां वैश्यं पद्भ्यां शूद्रमिति । 'संख्याया अल्पीयस्या इति' । द्वन्द्वे चाद्वन्द्वे चेत्याहुः । अल्पीयस इति पाठे अल्पीयसोर्थस्य वाचिकाया इत्यर्थः । 'नवतिशतमिति' । द्वन्द्वः, द्व्येकयोरिति तु सौत्रो निर्देशः ॥

"सप्तमीविशेषणे बहुव्रीहौ" ॥ 'कण्ठेकाल इति'। यदा कण्ठे किञ्चिदस्तीति निर्ज्ञाते काल इति विशेषणं प्रयुज्यते तदा सप्तमीग्रहणेन प्रयोजनम्, अन्यदा तु विशेषणत्वादेव सिद्धम्। 'सम्प्रधारणायामिति'। इदमस्तु इदमेवेति निरूपणा सम्प्रधारणा। 'परत्वादिति'। शब्दपरविप्रतिषेधादित्यर्थः, एवमर्थमेव च संख्यासर्वनाम्नोरिति नोक्तम्। 'गड्वादिभ्य इति'। गड्वादयः प्रयोगतो द्रष्टव्याः ॥

"निष्ठा" ॥ 'अवमुक्तोपानत्क इति'। उरःप्रभृतित्वात्कप्। 'ननु चेत्यादि'। 'यथा चित्रगुरिति'। गुणद्रव्यशब्दयोरुपनिपाते गुणशब्दस्य विशेषणत्वं क्रियाद्रव्यशब्दयोरपि क्रियाया एव विशेषणत्वं, ततश्च पूर्वेणैव सिद्धमिति भावः। 'विवक्षानिबन्धनत्वादिति'। यदा कृतं किञ्चिदनेनेति निर्ज्ञाते कट इति प्रयुज्यते तदा कटो विशेषणमिति मन्यते। 'कटे कटेन कृतमिति वा विग्रहीतव्यमिति'। एवं विग्रहे कृतस्य विशेषणत्वशङ्कैव नास्तीति भावः। क्वचित्तु वाशब्दो न पठ्यते तत्र विवक्षानिबन्धनत्वादित्युक्ते तामेव विवक्षां दर्शयतीति व्याख्येयम्। 'जातिकालसुखादिभ्यः परवचनमिति'। ज्ञापकात्सिद्धं, जातिकालसुखादिभ्यो नाच्छादनादित्याह, तज्ज्ञापयति जात्यादिभ्यः परा निष्ठा निपततीति। 'शार्ङ्गजग्धीति'। शार्ङ्गं जग्धमनयेति बहुव्रीहिः, । 'क्तादल्पाख्यायाम्' 'अस्वाङ्गपूर्वपदाद्वे' ति ङीष्। अत्राहुः। निष्ठाशब्देन या विहिता निष्ठा तस्या ग्रहणं तेन सुस्थितं चाहहसितमित्यादौ नपुंसके भावे क्त इत्यस्य परनिपात इति ॥

"कडाराः कर्मधारये" ॥ बहुवचननिर्देशादाकृतिगणोऽवगम्यत इत्याह। 'कडारादय इति'। इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां द्वितीयस्याध्यायस्य द्वितीयः पादः ॥

"अनभिहिते" ॥ अनभिहितशब्दोऽयमनेकार्थः, तथाहि। अभिपूर्वस्य दधातेर्हिनोतेश्चैतद्रूपं सम्भवति, अभिपूर्वश्च दधातिर्बन्धनेपि दृष्टः, अश्वाभिधानीमादत्त इति, उच्चारणेपि, अभिहितः श्लोक इति,

प्रतिपादनेपि अभिहितोर्थ इति। हिनोतिरपि गतौ वृद्धौ च वर्त्तते, इह तु वक्ष्यमाणानां कर्मादीनां बन्धनाद्यर्थचतुष्टयासम्भवात्प्रतिपादनवचनो-ऽभिहितशब्द इत्याह। 'अनभिहिते निर्दिष्टे ऽनुक्त इति'। क्वचिदत्र प्रति-पादनवचनः। 'उक्तार्थानामप्रयोग इति'। यथा सामान्येनानभिहित इत्ये-तावत्युच्यमाने कटं करोति भीष्ममुदारं दर्शनीयमित्यत्र कटशब्दाद्विशे-ष्यवाचिन उत्पद्यमानया द्वितीयया ऽनवयवेन कटगतस्य कर्मत्वस्याभिहि-तत्वाद्भीष्मादिभ्यो द्वितीया न स्यादिति मन्यमानः पृच्छति। 'केनानभि-हित इति'। इतरोपि विदिताभिप्राय आह। 'तिङ्कृत्तद्धितसमासैरिति'। बहुषु प्रयुक्तेषु केषांचिद्वर्जनेन केषांचित्कार्यान्वयप्रतिपादनं परिसंख्यानं, प्रत्युदाहरणेषु सर्वत्र द्वितीया न भवति। 'कटं करोति भीष्ममित्यादि'। कटः कृतो भीष्म उदारो दर्शनीय इति, करोतेरुत्पद्यमानः क्तप्रत्ययो ऽनवयवेन सर्वकर्माभिधत्ते तद्वद् द्वितीयापीति यो मन्दधीर्मन्यते तं प्रतीदं परिगणनं, सूक्ष्मदृशस्तु प्रति न वक्तव्यमेव। तथाहि। प्रातिपदिकादुत्पद्यमाना द्वितीया यदाकारविशिष्टोर्थः प्रातिपदिकेनाभिधीयते तदाकारविशिष्टस्यैव कर्मभा-वमाचष्टे, कटशब्देन कटत्वजातिविशिष्टोर्थो ऽभिधीयते न भीष्माद्याकार-विशिष्ट इति तत्प्रतिपादनाय यथा भीष्मादिशब्दप्रयोगो भवति तथा तदा-कारविशिष्टस्य कर्मत्वाभिधानाय द्वितीया भविष्यति, क्तप्रत्ययस्तु प्रकृत्य-र्थस्य न कर्मतामाचष्टे किं तु प्रकृत्यर्थं प्रति यस्य कर्मभावस्तमिति युक्तं यदनवयवेन सर्वकर्माभिधत्ते। ननु च कर्मादयो विभक्त्यर्थास्तेषां च तिङादि-भिरभिहितवचनमनर्थकम् अन्यत्रापि विहितस्याभावादभिहिते, यत्राप्य-नभिहिताधिकारो न क्रियते तत्रापि शब्दान्तरप्रतिपादितेर्थे नैव विहितं भवति तद् यथा बहुपटुरिति बहुचोक्तत्वादीषदसमाप्तेः सत्यपि सम्भवे कल्पबादयो न भवन्ति, द्विदश द्विदशाः समासेनोक्तत्वात्सुजर्थस्य सुज् न भवति, पटुगुप्तौ द्वन्द्वेनोक्तत्वाच्चार्थस्य चशब्दो न प्रयुज्यते, तद्वदत्रापि तिङादिभिरभिहितत्वादेव द्वितीयादयो न भविष्यन्ति। नन्वभिहिता-र्थस्यापि प्रयोगो दृष्टो ऽपूपौ द्वाविति, सत्यम्। अयं तु न्यायः यदुता-

भिहिते विहितं न स्यात्, नहि व्यसनितया शब्दः प्रयुज्यते ऽपि त्वर्थाभिधानाय, स चेदर्थः शब्दान्तरेणाभिहितः किमिति शब्दान्तरं प्रयुज्यते, अक्षिनिकोचादिभिरप्यवगतेर्थे शब्दो नैव प्रयुज्यते किं पुनः शब्देनैवाभिहिते, अपूपौ द्वावित्यादौ तु द्वावानय कौ द्वौ तावितिसामान्योपक्रमे वाक्यमिति यथा कथं चिदुपपादनीयं, तस्मात्कार्थ एतेनेत्याशङ्क्य संख्यापि विभक्त्यर्थ इति दर्शयन्नाह। 'बहुषु बहुवचनमित्येवमादिनेति'। अयमर्थः। त्रिकः प्रातिपदिकार्थ इत्यस्मिन्दर्शने कर्मादिवदेकत्वादिसंख्या विभक्त्यर्थः, तत्र कर्मादीनां युगपद्विभक्तिभिरभिधीयमानानां परस्परं विशेषणविशेष्यभावमनापन्नानां केवलप्रातिपदिकार्थगतानामभिधानं वृत्त एको वृत्तः कर्म पशुरेकः पशुः करणमिति वाभिधानं, पश्चाच्चैकक्रियान्वयबलेन परस्परसम्बन्ध इति प्राभाकरा मन्यन्ते। भाट्टास्तु परस्परासम्बद्धस्य स्वतन्त्रस्यानेकार्थस्याद्याः पादा माषा इत्यादावभिधानदर्शनेप्येकशेषमन्तरेणादर्शनाद्व्रजेतेत्यादौ च कृतिकार्ययोर्युगपल्लिङ्गाभिधीयमानयोरपि विशेषणविशेष्यभावस्य प्राभाकरैरप्यभ्युपगमात्तद्वदेव विशिष्टाभिधानं मन्यन्ते। अस्माकमप्ययमेव पक्षः। तत्र कर्मादयो विशेषणमेकत्वादयो विशेष्याः कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमिति, विपर्ययो वा एकत्वादिविशिष्टं यत्कर्म तत्र द्वितीयेति, तत्र यद्यपि कर्मादिप्राधान्यपक्षे तिङादिभिः प्रधानभूतानां कर्मादीनामभिहितत्वादप्रसङ्गो द्वितीयादीनां संख्याप्राधान्यपक्षे कर्मादिष्वभिहितेष्वपि प्रधानभूतसंख्याभिधानाय द्वितीयादयः स्युरेव। प्राभाकरे तु पक्षे कर्मांशाभिधानेपि संख्यांशस्यानभिहितस्याभिधानाय द्वितीयादयः स्युरिति। 'अनभिहितकर्माश्रयेष्विति'। अनभिहितानि कर्मादीन्याश्रयो येषां तेष्वित्यर्थः। एतेन कर्मणीत्यादिसप्तमीनिर्देश एकत्वादीनामाधारतया न पुनरभिधेयतयेति दर्शितम्। 'अनभिहितइति'। यदि प्रसज्यप्रतिषेधः स्यात्ततो द्वयोः क्रिययोः कारकेन्यतरेणाभिहितेपि विभक्त्यभावप्रसङ्गः, प्रासादआस्ते इत्यत्र सदिक्रियाया आसिक्रियायाश्चैकमधिकरणं प्रासादाख्यं तच्चान्यतरेण सदिप्रत्ययेन घञाभिहितं प्रसीदन्त्यस्मिन्प्रासाद इति तत्राभिहिते न भवतीत्युच्यमाने सप्तमी न स्यात्

Digitized by Google

पर्युदासे त्वासिप्रत्ययेन यदनभिधानं तदाश्रया सप्तमी सिद्ध्यति। ननु च प्रासादाख्यस्य द्रव्यस्य कारकत्वादभिहितत्वादन्यत्वं नास्ति। नैष दोषः, शक्तिः कारकं तत्र सदिक्रियाशक्त्यभिधानेप्यासिक्रियाशक्तेरनभिधानं, नन्वेवं प्रसज्यप्रतिषेधेपि या शक्तिरभिहिता तत्र मा भूद्विभक्तिर्या त्वनभिहिता तत्र भविष्यति। उच्यते, अनभिहिते कर्मणीत्येकत्वादीनामाधारनिर्देशः संख्या च द्रव्यधर्मा ऽतोनभिहिते कर्मणीत्यादिभिरपि शक्तिद्वारेण द्रव्यमेवोच्यते, अनभिहिता या कर्मादिशक्तिस्तदाधारभूतं यद्द्रव्यं तस्यैकत्वादिषु विभक्तय इति, एवं च यदि प्रसज्यप्रतिषेधः स्यात्ततोभिहितशक्तिद्वारेण द्रव्यस्याभिहितत्वात्प्रतिषेधः स्यात्, पर्युदासे त्वनभिहितशक्तिद्वारेणा विधिरिति स्पष्ट एव फलभेदः, यत्र तर्हि शक्तिभेदो नास्ति तत्र कथम् आसने आस्ते शयने शेतइति, अत्राप्यासनशयनादिशब्दैरासनादिक्रियायोग्यं वस्तुमात्रमनुद्भूतशक्तिकमभिहितमिति तस्य शक्त्युद्भवप्रतिपादनाय विभक्तिर्भविष्यति, यदि तर्हि पर्युदासोयमिति निर्णीयते इह पक्त्वा भुज्यतओदन इति भुजिप्रत्ययेनाप्यभिहितओदने क्त्वाप्रत्ययेनानभिधानमाश्रित्य द्वितीया प्राप्नोति भावे हि क्त्वाप्रत्ययः, प्रसज्यप्रतिषेधे तु भुजिप्रत्ययेनाभिधानमाश्रित्य प्रतिषेधः सिद्ध्यति, उच्यते, नात्रौदनस्य युगपदुभाभ्यां शाब्द एवान्वयः किं तर्हि भुजिनैव सन्निधानात्तु पचिनान्वयः, केवलशब्दव्यापारनिरूपणे तु किमिष्टकाः पक्त्वौदनो भुज्यत उतौदनमेवेति न ज्ञायते, अतः शब्दव्यापारापेक्षयाभिधानमेवेति द्वितीया न भविष्यति, अनभिहितवचनमनर्थकं प्रथमाविधानस्यानवकाशत्वात्, कृतः कट इत्यादिषु द्वितीयादयो मा भूवन्निति सूत्रारम्भः, यदि चात्रापि स्युः क्वेदानीं प्रथमा स्यात्, नन्वनवकाशत्वात्प्रथमा भवन्ती कृतः कट इत्यादावेव भवतीति न पुनः कटं करोतीत्यादावपीति, कुतोयं नियमः, उच्यते, कृतः कट इत्यादौ यद्यपि कृतशब्दसन्निधाने कटस्य कर्मता प्रतीयते तथापि तच्च वाक्यार्थत्वादव्यतिरिक्त एव प्रातिपदिकार्थ इति प्रथमा भविष्यति यथा वीरः पुरुष इति, कटं करोतीत्यत्र तु कटशब्देनैव कर्मशक्तिमानर्थोभिधीयतइति व्यतिरिक्तत्वात्प्रातिपदिकार्थस्य प्रथमा

न भविष्यति। नन्वकारकेषु सावकाशा प्रथमा यथा वृक्ष इति, तत्र। अत्राप्यस्तीति प्रतीतेः, कर्तृत्वात्तृतीयाप्रसङ्गः, यत्र ह्यन्यत्क्रियापदं न श्रूयते तत्रान्तरङ्गत्वादस्तीति गम्यते लब्धसत्ताकस्य हि विशेषणान्तरयोगो भविष्यति, अथापि यत्र विशेषणान्तरनिवृत्तौ तात्पर्यं न क्रियासम्बन्धे यथा नीलमुत्पलं न रक्तं राज्ञोयं पुरुषो न देवदत्तस्येति, नह्यत्र नील-मुत्पलमस्ति राज्ञः पुरुषोस्तीति प्रतीतिरतोस्त्येवाकारकमवकाश इत्यु-च्यते एवमपि विप्रतिषेधात्प्रथमा भविष्यति, द्वितीयादीनामवकाशो यत्र प्रातिपदिकार्थस्य व्यतिरेकः, कटं करोतीति प्रथमायास्त्वकारकमवकाशो नीलमुत्पलमिति, कृतः कट इत्यत्रोभयप्रसङ्गे परत्वात्प्रथमैव भविष्यति। ननु तामपि बाधित्वा परत्वात् षष्ठी प्राप्नोति, शेषलक्षणा षष्ठी प्राति-पदिकार्थमात्रस्य प्रथमाविधावुपयोगादशेषत्वान्न भविष्यति। इह तर्हि कर्त्तव्यः कट इति कृत्ययोगे प्रथमां बाधित्वा 'कर्तृकर्मणोः कृती' ति षष्ठी स्यात् तत्प्रतिषेधार्थमनभिहिताधिकारः कर्त्तव्यः, तदेवं संख्याविभक्त्यर्थ इत्यस्मिन्पक्षे कर्त्तव्यं सूत्रमिति स्थितम्॥

"कर्मणि द्वितीया"॥ 'द्वितियादयः शब्दा इति'। स्वनिकायप्र-सिद्धिरेषेत्यर्थः। 'उभसर्वतसोरिति'। उभयसर्वशब्दयोस्तसिलन्तयोः प्रयो-ग इत्यर्थः। उभयशब्दैकदेश उभशब्दोनुकृतः। उभशब्दस्य तसिलन्तस्याभा-वात् तस्य द्विवचनटाब्विषयत्वात्, धिगित्यविभक्तिको निर्देशः। 'आम्रे-डितान्तेष्विति'। कृतद्विर्वचनेष्वित्यर्थः। 'उभयतः सर्वत इति'। पञ्चम्या स्तसिल्। 'धिगिति'। निन्दार्थायम्। 'उपर्युपरीति'। 'उपर्यध्यधस-सामीप्य' इति द्विर्वचनं, ततोन्यत्रापीत्युक्तं, तानेवान्यान्परिगणयति। 'अ-भित इत्यादि'। 'अभितो ग्राममिति'। उभयत इत्यर्थः। 'परित इति'। सर्वत इत्यर्थः, 'पर्यभिभ्यां चे' ति तसिल्, आभिमुख्यवृत्तिरपि विभक्ति प्रतिरूपको निपातोभितःशब्दोस्ति सोपि गृह्यते, समयानिकषाशब्दौ समीपवचनौ गृह्येते, हाशब्दः शोकादिवृत्तिः, हा कन्ये इत्यादौ कार-कविभक्तित्वादन्तरङ्गत्वात्सम्बोधनविभक्तिर्भवति। 'बुभुक्षितं न प्रतिभा-तीति'। प्रतिरत्र क्रियाविशेषकत्वादुपसर्गो न कर्मप्रवचनीय इति पठ्यते

Digitized by Google

"तृतीया च होश्छन्दसि" ॥ 'यवाग्वाग्निहोत्रमिति' । क्व पुनरग्निहोत्रशब्दो वर्त्तते हविषि, तेष्वग्निहोत्रमधिश्रयेत्, अग्निहोत्रं शर-शरायत्, तदाहुर्यस्याग्निहोत्रमधिश्रितममेध्यमापद्येतेत्यादिषु दर्शनात् जुहोतिरपि प्रक्षेपे एकस्मिन्नेव प्रयोगे यवागूशब्दात् तृतीया अग्निहोत्र-शब्दाद् द्वितीया यवाग्वाख्यं हविर्देवतोद्देशेन प्रक्षिपतीत्यर्थः । अयं योगः शक्योऽवक्तुं, कथम्, अग्निहोत्रशब्दो ज्योतिष्यपि वर्त्तते अग्निहोत्रं प्रज्वलि-तमिति जुहोतिरपि प्रीणने तद्यदा यवागूशब्दात् तृतीया तदा यवाग्वा-ग्निहोत्रं प्रीणयतीत्यर्थः, यदा तु द्वितीया तदा यवाग्वाख्यं द्रव्यमग्नि-होत्रं हविरग्नौ प्रक्षिपतीत्यर्थः। मीमांसकास्त्वाहुः । अग्निहोत्रशब्दः कर्म-नामधेयमिति दृश्यते च स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासा-वित्यादि तस्य वा एतस्याग्निहोत्रस्य सप्त च शतानि च एतद्वा अग्नि-होत्रमन्येऽनुहूयते अजरामर्यं वा एतत्सत्रं यदग्निहोत्रमिति च तदत्याहुः । कर-णत्वात् तृतीयायां प्राप्तायां पक्षे द्वितीयार्थं वचनम्, इदं च सूत्रानुगुणं न भवति कर्मणीति हि वर्त्तते ॥

"अन्तरान्तरेण युक्ते" ॥ 'अन्तरान्तरेणशब्दावित्यादि' । ननु यथा नौर्नावि बद्धा नेतरेतरत्राणाय भवति तादृगेतत् द्वयोरपि निपात-त्वाव्यभिचारात् सत्यं, साहचर्यात्साजात्यं लक्ष्यते सजातीयविजातीयभावे सजातीयप्रत्ययो भवति तद्यथा गुरुभार्गवावित्युक्ते ग्रहयोरेव प्रतीति-र्भवति न त्वाचार्यपरशुरामयोः, यद्यन्तराशब्देनातृतीयान्तेन साहचर्या-दन्तरेणेत्यस्याप्यतृतीयान्तस्य ग्रहणं स च निपात एव, तथान्तरेण शब्दे-नाटाबन्तेन साहचर्यादन्तराशब्दस्याप्यटाबन्तस्यैव ग्रहणं स च निपात एव । 'षष्ठ्यपवादो योग इति' । असत्यस्मिन्योगे शेषत्वात् षष्ठी प्राप्नोति सति त्वस्मिन्नुपयुक्तत्वात् षष्ठी न भवतीत्यपवादत्वमेतत्, 'मध्यमाधेयेति' । आधेयपरतन्त्रमित्यर्थः, सप्तम्यन्तस्य मध्यशब्दस्यार्थे वर्त्तत इति यावत् । 'अन्तरा त्वां च मां च कमण्डलुरिति' । तव च मम च मध्ये कमण्डलु-रित्यर्थः । अत्र यथा मध्यस्यावध्यपेक्षायामवधिभूताभ्यां युष्मदस्मद्भ्यां योग-स्तथाऽधारस्याधेयपरतन्त्रत्वादाधेयेन कमण्डलुनापि योगास्ततोपि द्वि-

Digitized by Google

तीया प्राप्नोति, नैष दोषः कमण्डलुरित्यत्र तिष्ठत्यस्तीति वा क्रियापदानुषङ्गात्कमण्डलुः कर्त्ता स च तिङाभिहित इति प्रथमैव भविष्यति कारकविभक्तित्वात्, तदेत 'त्सहयुक्ते प्रधान' इत्यत्रोपपादयिष्यामः । निपातयोर्ग्रहणादिह न भवति किं तेन तयोरन्तरेण ज्ञातेन, विशेषवचनोयम् अन्तरायां पुरि वसतीति स्रुघ्नस्य प्राकार इति नात्र स्रुघ्नस्यान्तराशब्दार्थेन योगः किं तर्हि प्राकारेण ॥

"कालाध्वनो रत्यन्तसंयोगे" ॥ 'मासमधीत इति' । ननु कर्मत्वादेवात्र द्वितीया सिद्धा, कथं, कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्, अवश्यं कर्मसंज्ञैवाश्रयणीया आस्यते मास आसितव्य आसित स्वास इति कर्मणि लकृत्यक्तखलर्थो यथा स्युरिति, सत्यम्, इदमप्यवश्यं वक्तव्यं द्रव्यगुणाभ्यामत्यन्तसंयोगे द्वितीया यथा स्यादिति तत्र क्रियात्यन्तसंयोगेपि परत्वादनेनैव युक्ता द्वितीया मासस्येति 'कृत्वोर्थप्रयोगे कालेधिकरणे' इति षष्ठी ॥

"अपवर्गे तृतीया" ॥ 'अपवर्गः फलप्राप्तौ सत्यां क्रियापरिसमाप्तिरिति' । तत्रैवापवर्गशब्दो लोके प्रसिद्ध इति भावः । 'कर्तृव्यावृत्ताविति' । अशक्त्यादिना कर्त्तुरुपरमादित्यर्थः, तत्र मध्ये क्रियाविच्छिन्नेति प्रवृत्त्यपायो न त्वपवृत्तेति ॥

"सप्तमीपञ्चम्यौ कारकमध्ये" ॥ 'कारकमध्य इति' । मध्यस्यावधिद्वयापेक्षत्वाद् द्विवचनान्तेन समासः कालाध्वनोश्चैतद्विशेषणमित्याह । 'कारकयोर्मध्ये यौ कालाध्वानाविति' । 'अद्य भुक्त्वेत्यादि' । ननु चात्र देवदत्त एकः कर्त्ता तत्कथं कारकयोर्मध्ये काल इत्याह । 'कर्तृशक्त्योरिति' । स्यादेवं यदि द्रव्यं कारकं स्यात् शक्तिस्तु कारकं सेह भिद्यते एका अद्य भुजेः साधनमपरा द्व्यहभुजेः तेनानयोर्मध्ये काल इत्यर्थः । 'कर्तृकर्मणोरिति' । इहस्थोयमिष्वासः पुरुषः स कर्त्ता इष्वसने व्यधने स्थाने वा कर्म लक्ष्यम् । 'कर्मापादानयोरिति' । कर्म तदेव सामर्थ्याद्गम्यमानं धनुरपादानं यतः शरा अपयन्ति । 'कर्माधिकरणयोर्वेति' । कर्म तदेवा-

धिकरणमिहेति निर्दिष्टः प्रदेशः, इहकालाध्वानौ द्वौ सप्तमीपञ्चम्यावपि द्वे ततश्च संख्यातानुदेशः प्राप्नोति कालात्सप्तमी अध्वनः पञ्चमीति अत आह । 'संख्यातानुदेश इत्यादि' । 'अस्वरितत्वादिति' । स्वरितेन लिङ्गेन यथासंख्यमित्येतत्तत्रैव प्रतिपादितम् ॥

"यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी" ॥ यस्मादधिकं तदस्मिन्नधिकमिति च निर्देशादधिकशब्दयोगे पर्यायेण सप्तमीपञ्चम्यौ भवतः । 'उपखार्यां द्रोण इति' । 'उपोऽधिके चे'ति कर्मप्रवचनीयसंज्ञा । 'यस्य चेश्वरवचनमित्यादि' । द्वयमनेनोच्यते द्वयोरपि भवति तत्रापि पर्यायेणेति तत्र द्वयोरपि तावद्रूवति कथम् ईश्वर उच्यते येन तदीश्वरवचनमैश्वर्यम्, अथ वा ईश्वरशब्दो भावप्रधानः ईश्वरत्वस्योक्तिरीश्वरवचनं यस्य स्वामिन ईश्वरत्वमुच्यते ततः सप्तमीत्यर्थः । अथ वा यस्येति स्वं निर्दिश्यते यस्य स्वस्येश्वर उच्यते ततः स्वात्सप्तमीत्यर्थः । पर्यायेण वा भवति शेषविषये कर्मप्रवचनीयविभक्त्यारम्भादेकत उत्पन्नया विभक्त्या द्विष्ठस्यापि संबन्धस्याभिधानात् । 'अधिब्रह्मदत्त इति' । 'सप्तमी शौण्डै'रिति समासपक्षे ब्रह्मदत्ताधीना इति भवति विभक्त्यर्थवृत्तित्वेऽधिब्रह्मदत्तमित्यव्ययीभावः । अयं योगः शक्योऽवक्तुं स्वामिन्याधारे पञ्चालाः स्थिताः स्वेष्वाधारेषु ब्रह्मदत्तः स्थितः तत्र यदा यदधिकरणं तत्र सप्तमी भविष्यति एवं च कृत्वा 'धिरीश्वर' इति कर्मप्रवचनीयसंज्ञा न वक्तव्या ऐश्वर्यविषयश्चाधिः क्रियया नैव युज्यते अतो गत्युपसर्गत्वबाधार्थापि न युज्यते ॥

"प्रतिनिधिप्रतिदाने च यस्मात्" ॥ यस्मादित्यनेनैव सूत्रेण पञ्चमी । 'मुख्यसदृशः प्रतिनिधिरिति' । मुख्यः क्वचित्कार्ये रूढः यश्च तदभावे तत्कार्ये प्रतिनिधीयते स तत्प्रतिनिधिः, कर्मण्युपसर्गे घोः किः, एवं प्रतिदानमित्यपि कर्मण्येव ल्युट् । 'दत्तस्येति' । अथात्रानेनैव सूत्रेण पञ्चमी प्राप्नोति यथा यस्मादिति एवं तर्हि कर्मणि षष्ठी । ननु न दत्तमेव प्रत्यर्प्यते किं तर्हि द्रव्यान्तरं सत्यं, तुल्यमूल्यत्वात्तदेव प्रत्यर्पितमिति प्रति-

Digitized by Google

पत्तिः, प्रतिनिर्यातनं प्रत्यर्पणम् अत्र भावे ल्युट्। 'यस्मात्प्रतिनिधिरिति'। सूत्रवदेव पञ्चमी, एवं यतश्चेत्यत्रापि। 'अर्जुनतः प्रतीति'। प्रतियोगे पञ्चम्यास्तसिः, अर्जुनो युद्धादौ प्रसिद्धस्तत्सदृशोऽभिमन्युरित्यर्थः। 'माषानित्यादि'। ये पूर्वं गृहीतास्तिलास्तेभ्यो माषाः प्रतिदानम्। 'संबन्धिसंबन्धादिति'। प्रतिनिधिर्मुख्यमपेक्ष्य भवति प्रतिदानमपि पूर्वदत्तं ततश्च यस्य कर्मप्रवचनीयस्य प्रतिनिधिप्रतिदानाभ्यां योगस्तस्य ताभ्यामपि मुख्यपूर्वदत्ताभ्यां तद्द्वारको योगोस्तीत्यर्थः॥

"गत्यर्थकर्म्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि"॥ 'चेष्टाक्रियायामिति'। वस्तुव्याख्यानमेतत्, सूत्रे तु सप्तमी चेष्टायामिति। 'परिस्पन्दनक्रियायामिति'। परिस्पन्दनएव चेष्टा शब्दः प्रसिद्ध इति भावः। स्वं रूपमिति वचनात्स्वरूपग्रहणाशङ्कायामाह। 'अध्वन्यर्थग्रहणमिति'। सप्तमीनिर्देशादिति भावः, सप्तमीनिर्देशे ह्यनध्वनि कर्मणीत्यन्वयः, नानध्वनः प्रकृतेरिति अर्थ एव कर्म नाध्वशब्दः, तेनाध्वपर्यायेभ्योऽपि चतुर्थी न भवति द्वितीया तु कर्मणि द्वितीयेति भवति। 'आस्थितः संप्राप्त इति'। गन्त्राधिष्ठित इत्यर्थः। 'यत्र त्विति'। यदोत्पथेन पन्थैवाक्रमितुमिष्यते तदा भवत्येव चतुर्थीत्यर्थः। इह कस्मान्न भवति अजां नयति ग्राममिति अगत्यर्थत्वात् प्रतीता ह्यत्र गतिर्न त्वसौ नयतेरर्थः प्रापणवाचित्वात्, इह तर्हि स्त्रियं गच्छतीति चतुर्थी प्राप्नोति, सिद्धं त्वसंप्राप्तवचनात्, असंप्राप्तं यद्वस्तु गमनेन संप्रेप्स्यते तस्मिन्कर्मणीति वक्तव्यं स्त्री तु संप्राप्तैवेति चतुर्थ्यभावः, अध्वनश्चानपवादः, संप्राप्तो ह्यध्वा यदा त्वसंप्राप्तः संप्रेप्स्यते तदा भवितव्यमेव चतुर्थ्येत्युक्तं पुरस्तात्। 'न चतुर्थ्येवेति'। नञः काक्वा प्रयोगाद्विकल्प्येतेत्यनेनान्वयः, कर्मणि चतुर्थ्यां विकल्पितायां तथा युक्ते कर्मणि द्वितीयेत्येव द्वितीया भविष्यतीति भावः। 'ग्रामाय गन्तेति'। द्वितीया तावत्कृद्योगे षष्ठीं बाधते तया च तुल्यकक्षा चतुर्थी द्वन्द्वेन प्रतिपाद्यतइति चतुर्थ्यपि कृद्योगे भवतीति भावः। अयं योगः शक्यो वक्तुं, कथं, संदर्शनप्रार्थनाध्यवसायैराप्यमानत्वात्क्रियापि कृत्रिमं कर्म तत्र यदा गमनस्य संदर्शनादीनां च स्वरूपभेदो विवक्ष्यते तदा संद-

Digitized by Google

र्शनादिकर्मणा गमनेनाभिप्रेयमाणस्य ग्रामस्य संप्रदानत्वाच्चतुर्थी, अभेदविवक्षायां तु गमनस्य कर्मत्वाभावाद्ग्रामः कर्मैव भवतीति द्वितीया सिद्धा नार्थ एतेनेति भाष्यकारस्य पक्षः तत्र कृत्प्रयोगे षष्ठ्येव भवति॥

"चतुर्थी संप्रदाने"॥ 'तादर्थ्यइति'। तच्छब्देन कार्यं प्रति निर्द्दिश्यते तस्मादिदं तदर्थमिति समासेन विशिष्टकार्यप्रयोजनं कारणमभिधीयते तदर्थस्य भावस्तादर्थ्यमिति ष्यञा कार्यकारणसम्बन्धोऽभिधीयते समासकृत्तद्धितेषु सम्बन्धाभिधानं भावप्रत्ययेनेति वचनात्, तत्र द्विष्ठत्वेपि सम्बन्धस्य षष्ठीवद्विशेषणादेव चतुर्थी भवति यूपाय दार्विति हेतुतृतीयापि विशेष्याच्च भवति हेतुहेतुमद्भावस्यापि चतुर्थ्यैव प्रत्यायितत्वात् षष्ठीविषये च हेतुतृतीया, इह तु प्रातिपदिकार्थस्याव्यतिरेकात्प्रथमैव भवति, यदि तर्हि तादर्थ्यउपसंख्यानं क्रियते नार्थः संप्रदाने चतुर्थ्या योपि ह्युपाध्यायाय गौर्दीयते उपाध्यायार्थः स भवति, अवश्यं संप्रदानग्रहणं कर्त्तव्यं 'इ अर्थानां प्रीयमाण' इत्याद्यर्थम्। 'क्लृपिसंपद्यमानइति'। संपत्तिरभूतप्रादुर्भावरूपोत्पत्तिरिह गृह्यते तत्र यद्रूपमुपजायते ततो विकाराच्चतुर्थी। 'मूत्राय कल्पते यवागूरिति'। प्रकृतिविकारयोर्भेदविवक्षायां चतुर्थी. अभेदविवक्षायां तु मूत्रं संपद्यते, यवागूरिति प्रथमैव भवतीति केचिदाहुः। अन्ये त्वभेदविवक्षायामेव चतुर्थीमिच्छन्ति, यदा तु 'जनिकर्त्तुः प्रकृति'रित्यपादानत्वं विवक्ष्यते तदा विकाराच्चतुर्थी न भवतीति, केचिदाहुः मूत्रं संपद्यते यवाग्वा इति। अन्ये तत्रापि चतुर्थीमिच्छन्ति मूत्राय संपद्यते यवाग्वा इति। 'उत्पातेनेति'। प्राणिनां शुभाशुभयोः सूचको भूतविकार उत्पातः। 'अरोचकिन इति'। अरुचिररोचकं, रोगाख्यायामिति ण्वुल्, बहुलवचनादस्त्रीलिङ्गता॥

"क्रियार्थोपपदस्य च कर्मणि स्थानिनः"॥ 'क्रिया क्रियार्थोपपदं यस्येति'। ननु नास्मिन्नर्थे ऽक्षराणि सन्ति तत्राह। 'तुमुन्ण्वुलावित्यादि'। परिभाषितमुपपदं क्रियार्थमन्यत्र सम्भवतीत्ययमेव विषयो गृह्यते अत्र च विषये क्रियैव क्रियार्थोपपदं तेनायमर्थो लभ्यतइति भावः। यत्र गम्यते चार्थो न च प्रयुज्यते शब्दः स स्थानीति स्वनिकायप्रसिद्धिमाश्रि-

Digitized by Google

त्याह । 'स्थानिनो ऽप्रयुज्यमानस्येति'। 'एधेभ्यो व्रजतीति'। ननु चात्र तादर्थ्य इत्येव चतुर्थी सिद्धा इहापि तर्हि प्राप्नोति एधानाहर्तुं व्रजतीति हरणार्था व्रजिक्रिया न पुनरेधार्था चेदुदाहरणेपि तर्ह्येवमेव, एतावांस्तु विशेषः प्रत्युदाहरणे शब्दः प्रयुज्यते उदाहरणे तु नेति प्रतीयमाना च क्रिया कारकव्यपदेशस्य निमित्तं तत्र यथा प्रत्युदाहरणे आहरणापेक्षया द्वितीया सम्भवत्येवमुदाहरणेपि प्रतीयमानहरणापेक्षा द्वितीयैव स्यादित्ययमारम्भः। 'भक्षिश्च स्थानीति'। प्रविश गृहं पिण्डीं भक्षयेति गम्यमानत्वात् । 'न तु क्रियार्थोपपद इति' । यद्यपि पिण्डीभक्षणार्थं गृहप्रवेशनं तथापि पारिभाषिकमुपपदं न भवतीति भावः । 'शकटेनेति'। ननु मध्ये पवादा इति द्वितीयामेव चतुर्थी बाधिष्यते न करणतृतीयाम्, एवं तर्हि प्रत्युदाहरणादिगियं दर्शिता इदं त्वत्र प्रत्युदाहरणं द्रष्टव्यं ब्राह्मणस्यैधेभ्यो व्रजतीति, असति कर्मग्रहणे इतरोपपदविभक्तिवदियमपि शेषविषयैव स्यात् ॥

"तुमर्थाच्च भाववचनात्" ॥ 'तुमुना समानार्थस्तुमर्थ इति'। वस्तुव्याख्यानमेतत्, विग्रहस्तु तुमर्थास्येति तुम्शब्देन तुमर्थो लक्ष्यते । 'तुमर्थभाववचनप्रत्ययान्तादिति'। तुमर्थो भाववचनः प्रत्ययोन्ते ऽस्य तत्तथोक्तम् । 'तस्येदं ग्रहणमिति'। स एव हि तुमर्थो भाववचनो नान्यः । 'पाकाय व्रजतीति'। नन्वत्र तादर्थ्यैव सिद्धं, न चैवं पाचको व्रजतीत्यभाववचनादपि प्रसङ्गः, अत्र कर्त्ता प्रधानं न च तं प्रति तादर्थ्यमस्ति किं तु प्रकृत्यर्थं प्रति एवं तर्हि भाववचनेनैव तादर्थ्यस्य द्योतितत्वाच्चतुर्थी न सिद्ध्यतीति सूत्रारम्भः नह्येतल्लक्षणेनेत्रो ज्ञातुमर्हति घञादीनां चतुर्थीसापेक्षाणामेव तादर्थ्यप्रकाशने शक्तिरिति तुमर्थग्रहणं शक्यमकर्त्तुं कथं पाकस्त्यागो राग इति, क्रियार्थोपपदग्रहणमनुवर्त्तिष्यते, नन्वेतत् षष्ठीनिर्दिष्टं पञ्चमीनिर्दिष्टेन चेहार्थः, अर्थाद्विपरिणामो भविष्यति भाववचनादित्यनेन सम्बन्धात् न वै भाववचनस्य क्रियार्थोपपदत्' सम्भवति किं तर्हि धातोः धातोर्भाववचनस्यासम्भवादेवं विज्ञास्यते क्रियार्थोपपदाद्धातोर्यो विहितो भाववचन इति ॥

श्रीमते मीमांसाद्वयगुरवे रामानुजाचार्याय नमः ।

अथ श्रीभाष्ये

प्रथमाध्याये तृतीयः पादः ।

(*Continued from page* 644, Vol. XIII.)

मू० न चासता गुणेन कथितेन तेन प्ररोचना जायते, अतः कर्म्म प्ररोचयन्तो गुणसद्भावं बोधयन्त्येवार्थवादाः, मन्त्राश्च कर्म्मसु विनियुक्तास्तत्र तच्च किञ्चित्करत्वायानुष्ठेयार्थं प्रकाशयन्तो देवतादिगतविग्रहादिगुणविशेषमभिदधत एव तच्च किञ्चित्कुर्वन्ति ॥

टी० ॥ "न चासते"ति, अनेन "नासता स्तुतिरुपपद्यत" इति द्रमिडभाष्यं स्मार्यते । अर्थप्रकाशनानुपपत्तिं विवृण्वन् मन्त्राणां विग्रहादिमत्त्वे प्रामाण्यमुपपादयति मन्त्राश्चे"त्यादिना, द्रव्यदेवते हि कर्मनिरूपिके एतद्दैवत्यमिदं कर्मेति प्रतिपत्तौ देवताविशिष्टत्वेन हि कर्मप्रतिपत्तिः "यस्यै देवतायै हविर्गृहीतं स्यात् तां ध्यायेद्वषट्करिष्यन्नि"ति देवता ध्यातव्येति श्रूयते, देवता चेदृशीत्येव प्रतिपत्तव्या निर्विशेषवस्तुनः प्रतिपत्तुमशक्यत्वात्, इन्द्रत्वादिकञ्च न शुद्धात्मस्वरूपस्य विद्यते अतो विग्रहादौ विवक्षितत्वं, प्रतीतेरालम्बनमात्रमपेक्षितं नार्थसद्भाव इति चेन्न न ह्यतस्मिंस्तद्दृष्टिः फलाय विधीयत अपि तु यथाऽवस्थितकर्मस्वरूपबोधनं हि क्रियते, तस्मादनुष्ठेयार्थप्रकाशकत्वसिध्यर्थम्मन्त्राणां विग्रहादिमत्त्वे च प्रामाण्यमस्तीत्यर्थः, अर्थसद्भावाभावेऽपि प्ररोचना दृश्यत इति चेन्न दृष्टसाधनत्वाभावेऽपि बालातुरादिषु विप्रलम्भकवाक्यानां प्रवृत्तिहेतुत्वं दृश्यत इति विधिवाक्यस्याप्ययथाऽर्थत्वप्रसङ्गात्, अपौरुषेयतया निर्दोषविधिवाक्यं निरूपकविषयमिति याथार्थ्यमिति चेत्तर्हि मन्त्रार्थवादानामप्यपौरुषेयतया निरूपकविषयत्वादतस्मिंस्तद्दृष्टिविधानपरत्वाभावाच्च स्वार्थे प्रा-

Digitized by Google

माण्यमस्तीति भावः । एवमर्थशिक्षाप्रदर्शनेन प्रयोगप्रकारोऽर्थसिद्धः, विमता इन्द्रादिशब्दाः स्वरूपातिरिक्तपदार्थप्रतीतिहेतवः अपारिभाषिकत्वे सति बोधकत्वात् निर्दोषवाक्यस्थत्वात् विधिपदवत्, विमता चतुर्थी प्रकृत्यतिरिक्तार्थनिष्ठस्वार्था अपारिभाषिकशब्दस्थविभक्तित्वात् दध्नेति विभक्तिवत् विमता सम्प्रदानकारकबुद्धिः शब्दातिरिक्तविषया कारकबुद्धित्वात् करणकारकबुद्धिवत्, विमता मन्त्रार्थवादाः प्रतीयमानार्थे प्रमाणानि साधकबाधकागोचरार्थबोधकत्वात् विधिवाक्यवत्, विमत-शब्देन "आपो वै शान्ता आदित्यो यूप" इत्यादिव्यावृत्तिः, विमतानि पदानि मुख्यार्थसंसर्गे प्रमाणानि साधकबाधकागोचरार्थप्रतिपादकवाक्यस्थत्वात् विधिपदवत्, विमतानि पदानि परमार्थभूतप्रतीयमानार्थसंसर्गाणि साधकबाधकागोचरार्थप्रतिपादकवाक्यस्थत्वात् विधिपदवत्, न चार्थवादानां वाक्यत्वमसिद्धं प्रवर्त्तकार्थानवबोधकत्वात्, अतःपद-शब्दवाच्या अर्थवादा इति वाच्यम् अर्थवादाः न पद-शब्दवाच्याःतिङ्कारकपदसङ्घातरूपत्वात् विधिवाक्यवत्

भू० अन्यथा इन्द्रादिस्मृत्यनुपपत्तेः, न च निर्विशेषा देवता धियमाधिरोहन्ति, तच्च प्रमाणान्तराप्राप्तान् गुणान् स्वयमेव बोधयित्वा तैः कर्म्म प्ररोचयन्ति गुणविशिष्टं वा प्रकाशयन्ति देवतादिगतविग्रहादिगुणविशेषमभिदधत एव तच्च प्राप्तांश्चानूद्य तैः प्ररोचनप्रकाशनङ्कुर्व्वन्ति, विरुद्धत्वे तु तदाचिभिश्शब्दैरविरुद्धान् गुणान् लक्षयित्वा कुर्व्वन्ति कर्म्मविधेश्च देवतायाः प्रमाणान्तरप्राप्तम् ऐश्वर्य्यमपेक्षितमेव कामिनः कर्त्तव्यतया कर्म्म विधीयमानं स्वयं क्षणप्रध्वंसि कालान्तरभाविनः फलस्य स्वर्गादेस्साधकमपेक्षते, मन्त्रार्थवादयोश्च-

टी० ॥ अर्थवादाः प्रमाणभूतवाक्यरूपाः साधकबाधकागोचरसंसर्गप्रत्यायकतिङन्तकारकपदात्मकत्वात् विधिवाक्यवत्, विमता मन्त्रार्थवादाः प्रतीयमानार्थविवक्षाऽन्विताः साधकबाधकागोचरार्थत्वे सति विधिनैकवाक्यत्वात् प्रयाजादिवाक्यवत्, न च प्रवर्त्तकवाक्यत्वमुपाधिरिति वाच्यं साधिकारविधिवाक्यत्वेन तस्यापि सोपाधिकत्वप्रसङ्गात्, प्रयाजादिविधीनामविवक्षितार्थत्वेऽनुष्ठानविरोधात्साधिकारविधिवाक्यत्वं न विवक्षितार्थत्वे प्रयोजकमिति चेत् अनुष्ठानस्य प्रामाणिकतया हि तद्भङ्गस्यानिष्टता, एवमपवादाभावे सति स्वतस्सिद्धतः प्रमाणभावस्य भङ्गप्रसङ्गात् प्रवर्त्तकवाक्यत्वमप्रयोजकन्तस्मान्निरुपाधिको हेतुः, विगीता अर्थवादाः परमार्थस्वार्थोपस्थापकाः निरूपकपुरुषप्ररोचकत्वात् रसायनाऽऽयुष्यताप्रतिपादकवाक्यवत् कारणदोषबाधकप्रत्ययविरहितत्वाद्वा स्वर्गयागयोः साध्यसाधनभावप्रतिपादकवाक्यवत्, विमता मन्त्रार्थवादाः प्रतीयमानार्थे प्रमाणानि विध्यपेक्षितार्थसमर्पकत्वाच्छागस्य वपायाः इति मन्त्रवत् रात्रिसत्रार्थवादवच्च, विमता प्राशस्त्यबुद्धिः प्राशस्त्यहेतुभूतार्थपारमार्थ्यनिबन्धना निरूपकपुरुषाश्रयप्राशस्त्यबुद्धित्वात् औषधविषयप्राशस्त्यबुद्धिवत् इति च, "आपो वै शान्ता आदित्यो यूप इत्यादिषु प्रमाणान्तरसिद्धस्य तद्विरुद्धार्थस्य चाप्युच्यमानत्वान्न सर्वत्र प्रामाण्यमिति शङ्कायामाह "तत्र प्रमाणान्तरे"ति, बोधयित्वा–विधाय प्ररोचयन्ति अर्थवादाः प्ररोचयन्ति, मन्त्राः प्रकाशयन्ति, लक्षयित्वा कुर्वन्तीति प्ररोचनप्रकाशने कुर्वन्तीत्यर्थः । ननु विध्यपेक्षितार्थे हि तात्पर्यं देवताविग्रहादेर्विध्यपेक्षितत्वं कथमित्यत्राह "कर्मविधेश्चे"ति, फलमत उपपत्तेरित्यधिकरणार्थो बुद्धिसौकर्यार्थमत्र सङ्क्रमय्य कथ्यते, न चैतदधिकरणासाधारणार्थतया असाधारणस्तु स्तावकत्वानुष्ठेयप्रकाशकत्वसिध्यर्थं प्रतीयमानार्थे प्रामाण्यमस्तीत्ययमेवार्थस्स च पूर्वमेवोक्तः कृष्यादेरङ्कुरादिद्वारकत्वमिवाचेतनद्वारकत्वङ्कर्मणः स्यादित्यत्राह–

श्रु० "वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनम्भूतिं गमयति यदनेन हविषाऽऽऽशास्ते तदस्मै तद-

ष्ट्वा तदस्मै देवा राधन्तामि”त्यादिषु देवताया: कर्म्मणा-
ऽऽराधिताया: फलदायित्वन्तदनुगुणञ्चैश्वर्य्यं प्रतीयमानम-
पेक्षितत्वेन वाक्यार्थे समन्वीयते,

टी० “वायुर्वा”इति, श्रुतहानमश्रुतकल्पनञ्चानुपपन्नं रात्रिसत्रा-
दिष्विवेति भावः । वाक्यार्थे समन्वीयत इति, अर्थवादिकार्थानां श्रूयमा-
णत्वात् तद्विशिष्टे वाक्यतात्पर्यमिति निश्चिते सति रक्तः पटो भवतीति
तदुत्थापिताकाङ्क्षत्वेन विधिनैकवाक्यतयाऽन्वयोऽर्थवादानामिति भावः
यत्र वाक्यशेषवशादपेक्षितदेवताप्रीतिद्वारकत्वं न सिध्यति तत्रापि यजिसा-
मर्थ्यात्तत्सिध्यति । अर्थवादाभावेऽपि विधिसामर्थ्यात् स्तुतिरेवेत्याद “देव-
पूजाभिधायिन इति, न च यजिं देवपूजा सङ्गतिकरणदानेष्विति शाब्दिकानां
स्मरणम्भ्रान्तिमूलमिति वाच्यं विध्यपेक्षितार्थसमर्पकतया स्वार्थे प्रमाण-
भूतत्वान्मन्त्रार्थवादानामस्य स्मरणस्य तन्मूलत्वोपपत्तेः, विमतो विधिप्र-
त्ययः चेतनप्रीत्यतिरिक्तफलसाधनकल्पननिराकाङ्क्षः चेतनप्रीत्यतिरिक्तफल-
साधनवाचकत्वकल्पननिराकाङ्क्षश्च कृतिसाध्यचेतनप्रीत्यवगमकवाक्यस्थ-
त्वात् राजानं सेवेतेति वाक्यस्थविधिप्रत्ययवत्, विमत–शब्देन जुहुयादि-
त्यादिव्यावृत्तिः, जुहुयादित्यादिषु विधिप्रत्ययेषु विधिप्रत्ययत्वलिङ्गेन पूर्वो-
क्तसाध्यद्वयं समर्थनीयन्तदेवमिति कृत्स्न–शब्देन मन्त्रार्थवादविधयो विव-
क्षिताः,वाच्यापूर्ववादपक्षे अश्रुतकल्पनं नास्तीति चेन्न वाच्यत्वस्याऽपि कल्प्य-
मानत्वात्कल्प्यापूर्ववादे अपूर्वमेव कल्प्यं वाच्यपक्षे वाच्यत्वमपि कल्प्यमित्य-
भिप्रायेण व्युत्पत्तिसमयानवगतमित्युक्तं, तथेत्यादि ब्राह्मण-शब्देन विध्यु-
द्देशग्रहणं विध्यर्थवादमन्त्ररूपेण विभागवतामस्मादिभिरनधीतासु अधी-
तासु च शाखासु तत्राप्यन्यतरप्रकरणेषु प्रसङ्गादनुप्रविष्टानाम्भगवता
व्यासेन व्यस्तेष्वव्यस्तेषु च वेदभागेषु विप्रकीर्णानां वाक्यानामर्था इति-
हासादिषु सङ्कलय्य कथ्यन्त इति भावः । सङ्कीर्ण–शब्देन नित्यानुमेय-
श्रुतिमूलत्वोत्सन्नशाखामूलत्वव्युदासः,तदुभयं ह्यनुपपन्नं तत्र यस्तावन्नित्या-
नुमेयतयाऽभिमतो वर्णसमुद्रायः स किं वर्णमात्रसङ्घातः ? उतानुपूर्वीविशेष-

विशिष्टः? प्रथमे कचटतपादिवदर्थाबबोधकत्वाभावेन वाक्यत्वाभावाद्वा-क्यविशेषस्वरूपवेदत्वासिद्धेः स्मृतीनां वेदमूलत्वं न स्यात्, द्वितीये वित्यानुमेयत्वं व्याहतं स्वतःक्रमरहितानां वर्णानामुच्चारणेन विना आनुपूर्वीविशेषविशिष्टत्वायोगात्, उच्चारणयोग्यताऽस्तीति चेन्न उच्चारणयोग्यता नाम पटुतरवागिन्द्रियपुरुषबुद्धिस्थितिः,सा च योग्यता किं वर्णमात्रगता?उतानुपूर्वीविशेषविशिष्टवर्णगता?न प्रथमः, वर्णमात्रस्यार्थानवबोधकतया स्मृतेर्निर्मूलत्वप्रसङ्गात्सत्यामानुपूर्व्यां स्मृतिप्रतिपन्नार्थावबोधनक्षमत्वं वर्णेष्वस्तीति

भ० देवपूजाभिधायिनो यजिधातोश्च यागाख्यङ्कर्म्म स्वाराध्यदेवताप्रधानं प्रतीयते, तदेवं कृत्स्नवाक्यपर्यालोचनया वाक्यादेव विध्यपेक्षितं सर्वमवगतमिति नापूर्वादिकं व्युत्पत्तिसमयानवगतं कर्म्मविधिष्वभिधेयतया कल्प्यतया चा--

चेत् तेष्वेव वर्णेषु आनुपूर्व्यन्तरे सति चैत्यवन्दनकर्त्तव्यताद्यर्थबोधनक्षमत्वमप्यस्तीति बुद्धस्मृतेरपि वेदमूलत्वप्रसङ्गः,वेदबाह्यतया सम्प्रतिपन्नत्वाच्च तस्या वेदमूलत्वानुमानशङ्कोदय इति चेत् मेघसन्देशस्य वेदमूलत्वप्रसङ्गः, प्रवर्त्तकार्थपरत्वाभावाच्च वेदमूलत्वानुमितिरिति चेत् "कार्या सैकतलीनहंसमिथुनस्रोतोवहा मालिनी"ति वाक्यस्य वेदमूलत्वप्रसङ्गः आनुपूर्वीविशेषविशिष्टवर्णगता योग्यतेऽत्यप्ययुक्तं पूर्वं केनचिदुच्चारितत्वाभावादानुपूर्व्यसिद्धेः, ततश्चानाद्यानुपूर्वीविशिष्टतारूपवेदत्वं दूरोत्सारितम्, आनुपूर्वीविशेषेणोच्चारणयोग्यत्वं वर्णानामनादीति चेत् तच्चैत्यवन्दनप्रतिपादनानुगुणानुपूर्व्या अपि तुल्यम्, अतस्तत्रापि वेदमूलत्वं स्यात्, कर्तृसामान्याभावाच्च तत्र वेदमूलत्वानुमानं श्रुतिस्मृत्यर्थयोस्तुल्यतया कर्त्तृसामान्यात् स्मृतेर्वेदमूलत्वानुमानमिति चेन्मा भूत्, कर्तृसामान्यं तेन मन्वादिस्मृतीनां वेदमूलत्वेऽनुमिते तुल्यन्यायतयाऽऽपतितं वेदमूलत्वं को वारयेत् स्वावगतार्थप्रतिपादनानुगुणानुपूर्वीविशेषेणानादिसम्बन्धयोग्यवर्णाऽस्तित्वज्ञानं हि सर्वत्र समानन्तज्ज्ञाननियमो बुद्धादीनां ग्रन्थनिर्माणदशायां नास्तीति

चेत् न तज्ज्ञानपूर्वकमेवेदानीं रथ्यातृणानि गणयेत् स्वर्गकाम इत्युक्तस्य वाक्यस्य वेदमूलत्वप्रसङ्गः। ननु अनेनैव स्मृत्यवगतार्थविशेषेणावच्छिन्नानु-पूर्वीविशिष्टानां वर्णानां वेदत्वमिति चेन्न मन्वादिवाक्यस्यापि तदर्थाव-वच्छिन्नानुपूर्वीविशिष्टवर्णसमुदायात्मकतया वेदत्वप्रसङ्गेन अनुमेयान्तरा-भावात् नित्यानुमेयश्रुतिमूलत्वासिद्धेरतोऽनित्यानुमेयश्रुतिमूलत्वमनुपपन्नम् उत्सन्नशाखामूलत्वपक्षेऽपि अधीयमानशाखास्वेव प्रमादात्कतिपयवाक्यानां क्वचित् क्वचिद्देशे प्रलीनत्वात्तन्मूलाः स्मृतयः प्रणीता इत्यप्ययुक्तं पदवाक्य-सङ्ख्यानियमेन बहुभिरध्येतृभिरस्खलितमधीयमानत्वात्, कतिपयवाक्यानां प्रलीनत्वानुपपत्तेः स्मृतीनां मूलभूतशाखा कार्त्स्न्येन काचिदुत्सन्ना तन्मूलाः स्मृतय इत्यप्ययुक्तं, तथाहि शाखाया उत्सादो नाम किं कतिपयदेशेष्वि-दानीमध्येतृविरहः? उत सर्वदेशेष्वप्यध्येतृविरहः? प्रथमः कल्पोऽभ्युपगतः, न द्वितीयः, तपःप्रभावाधिगतसार्वज्ञ्यानां व्यासादीनां तत्तच्छाखाविशेषाभि-ज्ञानां तदध्ययनपरित्यागे कारणाभावात्स्वशिष्याध्यापनसम्भवाच्च न चेदा-नीन्तनशिष्यबुद्धिमान्द्यादधुना तदध्यापनासम्भवः, बहुशाखाध्ययनासाम-र्थ्येप्यस्मदादेरिव तत्तदेकशाखाध्ययनसमर्थशिष्यसम्भवात्, अतः प्राचीन एव पक्षः परिशिष्यते, ततश्च स्मृतीनां सङ्कीर्णवेदभागमूलत्वमेव युक्तं, स्मृतिमूल-भूतवेदभागसद्भावे स्मृतिप्रणयनवैयर्थ्यमिति चेन्न तच्छाखाऽध्येतृपुरुषविरहि-

सू० श्रयितव्यं, तथा सङ्कीर्णब्राह्मणमन्त्रार्थवादमूलेषु धर्मशा-
स्त्रेतिहासपुराणेषु ब्रह्मादीनान्देवासुरप्रभृतीनां च देहे—

तद्देशेषु तद्युक्तदेशेष्वपि बहुशाखाध्ययनधारणतदर्थनिरूपणनिर्णयासमर्थपु-रुषेषु च सफलत्वात्, अतः स्मृतीनां सङ्कीर्णवेदभागमूलत्वं युक्तं, कर्मविधेश्चे-त्यादौ भाष्ये इदमर्थसिद्धं, यदुक्तं यागादौ दानादौ च अर्थवैरूप्यान्नयणादर्थ-वैशसमिति तदसत् सर्वत्राप्यपूर्वकल्पनानभ्युपगमात्, न च फलसाधनताऽनु-पपत्तिः कर्मोपजनितप्रीतेः परमात्मन एव तत्सिद्धेः, "वासो ददाति सर्व-देवत्यं वै वासः सर्वा एव देवताः प्रीणाती"त्यादिभिर्दानादीनामपि देव-ताप्रीतिहेतुत्वावगमाच्च, न च परमात्मप्रीत्या फलसम्भवे देवतैश्वर्यानुप-

योगः प्रधानावान्तरापूर्वकल्पनान्यायस्य अत्रापीष्टत्वात् तथाहि पूर्वा-
परीभूतानामङ्गप्रधानरूपाणामनेकेषां कर्मणां यौगपद्यासम्भवादवान्तरापू-
र्वद्वारा परमापूर्वं निष्पत्तिरङ्गीक्रियते, एवमेव तत्तत्कर्मजनितप्रीत्यतिशयाभि
र्देवताभिः परमात्मन्यपरिच्छेकप्रीतिजननमातिष्ठामहे, इदमेव च देवतायाः
फलानुगुणमैश्वर्यं यत्फलप्रदे परमात्मनि स्वप्रीतिद्वारा स्वप्रीतिजननम्, उक्तं
हि भगवता "यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छती"त्यारभ्य "लभते च
ततः कामान्मयैव विहितान् हि तानि"ति तेन फलभोगस्यानियतकालत्वे-
ऽपि दोषः, न चैवं सति प्रतिमाप्रतिमेयन्यायेन देवताप्रीतिरनास्थेया "यस्यै
देवतायै हविर्गृहीतं स्यात्तान्ध्यायेद्वषट्करिष्यन् साक्षादेव देवताः प्रीणाति
तृप्ता एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति त एनं तृप्ता आयुषा तेजसा वर्चसा
श्रिया यशसा ब्रह्मवर्चसेन अन्नाद्येन च तर्पयन्ति येचैव देवास्सायं यावानो
ये च प्रातर्यावाणस्तानेवोभयांस्तर्पयति त एनं तृप्ताः प्रजया पशुभिस्तर्प-
येयु' रिति देवतातृप्तेः श्रुतत्वात्तन्महाणानुपपत्तेः, पितरि प्रीतिमापन्ने सर्वा
स्तुष्यन्ति देवताः—इति न्यायात् भृत्यप्रीणनेन भूभृत्प्रीणनन्यायाच्च देव-
ताप्रीतेः परमात्मप्रीतिहेतुत्वोपपत्तेश्चेति । सूत्रार्थमुपसंहरति "अत"-
इति, ननु कथन्देवानां ब्रह्मविद्याऽधिकारः, न ह्यत्रैवर्णिकानान्तेषामुपनय-
नाभावेनाध्ययनसिद्धस्वाध्यायलब्धविद्यत्वं, न च तेषां विद्याङ्गभूतकर्मा-
नुष्ठानयोग्यत्वम् अग्निनिष्पत्त्यनुपपत्तेः "वसन्ते ब्राह्मणोऽग्नीनादधीत
ग्रीष्मे राजन्य आदधीत शरदि वैश्य आदधीत इति त्रैवर्णिकविषया-
धानविधिः कथं देवतामधिकरोति अनार्षेयस्य चानधिकारोऽधिकरण-
सिद्धः, देवानां देवर्षीणाञ्च मूलभूतऋष्यन्तराभावादनार्षेयतया चान-
धिकारः, अग्नीन्द्रादीनाम नीन्द्रादिदेवताभावादन्यायुद्देशेन हविःप्रक्षेपा-

सू॰ न्द्रियादयः स्वभावभेदाः स्थानानि भोगाः कृत्यानि च
इत्येवमादयस्सुव्यक्ताः प्रतिपाद्यन्ते, अतो विग्रहादि-
मत्त्वाद् देवादीनामप्यधिकारोऽस्त्येव ॥

नुपपत्तिश्चेति, उच्यते न तावदुपनयाभावात् साङ्गविद्यानधिकारः, तस्या-

ध्ययनाङ्गत्वात् यज्ञादिकर्मब्रह्मोपासनयोरङ्गत्वाभावात् अध्ययनाभावेऽपि देवतानां सुकृतप्रकर्षेण पूर्वजन्मविशेषाधीतस्वाध्यायतदर्थस्मरणोपपत्तेश्च, पिशाचादयोऽपि हि पूर्वजातिं स्मरन्ति किं पुनर्देवा देवर्षयश्च न चोपनयनविरहाच्छूद्रादिवद्विद्याकर्मणोरनधिकारः शूद्रादीनामप्युपनयनविरहप्रयुक्तत्वाभावादनधिकारस्य, स खलु तेषां सामर्थ्याभावानुगृहीतशास्त्रनिषेधप्रयुक्त, देवतानां हि विद्याकर्मणी न क्वचित्प्रतिषिद्धे प्राक्तनज्ञानाप्रमोषात्,सामर्थ्यं च स्थितं, न चात्रैवर्णिकत्वादग्न्याधानाभावादच्यार्थयतया च विद्याङ्गकर्मानधिकारः, मनुष्यकर्तृकाधानस्यैव त्रैवर्णिकत्र्यार्षेयाधिकारित्वनियमात् किमत्र नियामकम्? इति चेत् "देवा वै सत्रमासत विश्वसृजः प्रथमास्सत्रमासते"त्यादिश्रुतिभिर्देवानां क्रत्वनुष्ठातृत्वदर्शनात्, विशेषत इन्द्रादीनां वृत्रवधादिजनितकल्मषक्षालनाय क्रत्वनुष्ठानस्मरणाच्चेति भ्रमः । यद्वा ब्राह्मण्यादिकन्देवानामप्यस्ति तत्खल्वदृष्टविशेषसंबन्धरूपत्र तु जातिरूपं ब्राह्मणादिभिर्ब्राह्मण्यादिषूत्पत्तिमात्रं वा अन्यथाऽऽदिकाले ब्रह्मणोमुखबाहूरुप्रभवानां पश्चाद्विश्वामित्रप्रभृतीनाञ्च ब्राह्मण्याद्यभावप्रसङ्गात् सन्तानविशेषप्रसूतत्वञ्च तादृगदृष्टवत्त्वसूचकं सन्तानविशेषोत्पत्तेः प्रकृष्टादृष्टकार्यत्वात् अलौकिकप्रकर्षविशेषकारणत्वाच्चईदृशं ब्राह्मण्यादिकं देवतासु सम्भवत्येव, अवगम्यते च तत्, वाजपेयं प्रकृत्य तं बृहस्पतिरुदजयत्तेनायजत तेनेन्द्रमयाजयत् इति बृहस्पतिना इन्द्रेण च वाजपेयस्यानुष्ठितत्वमुक्त्वा तत एव हेतोः स वा एष ब्राह्मणस्य चैव राजन्यस्य च यज्ञ इति वाजपेयस्य ब्रह्मक्षत्राधिकारत्वमुच्यमानं बृहस्पतेर्ब्राह्मण्यमिन्द्रस्य क्षत्रियत्वमपि ह्यवगमयति, ब्रह्मा बृहस्पतिः क्षत्रमिन्द्रः"इति च श्रूयते तथा "मरुतो वै देवानां विश"इति मरुतो विशः श्रूयन्ते, अतो देवताविशेषाणां ब्रह्मविट्क्षत्रविभागसिद्धेरग्निसम्बन्धो युक्तः, विद्यानुग्राहकं ब्रह्मचर्यादिकञ्च देवानां श्रूयते "एकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवासे"त्यादि, अतो विद्याङ्गकर्मगुणपौष्कल्यात् सामर्थ्यसिद्धिः, न च यष्टव्यदेवतान्तराभावाद्यजनाद्यनुपपत्तिः, अग्नीन्द्राशब्दप्रवृत्तिनिमित्तानां ज्ञानशक्त्यैश्वर्यविशेषाणां निरुपाधिकाश्रयतया

Digitized by Google

सू॰ विरोधः कर्म्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ २६ ॥

भा॰ देवादीनां विग्रहादिमत्त्वाभ्युपगमे कर्म्मणि विरोधः प्रसज्यते बहुषु यागेषु युगपदेकस्येन्द्रस्य विग्रहवत्त्वे "अग्निमग्न आवह इन्द्र आगच्छ हरिव आगच्छ इत्यादिनाऽऽहूतस्य तस्य सन्निधानानुपपत्तेः, दर्शयति चाग्न्यादीनां तत्र तत्रागमनं "कस्य वा ह देवा यज्ञमागच्छन्ति कस्य वा न बहूनां यजमानानां यो वै देवताः पूर्वं परिगृह्णाति स एनाश्वो भूते यजत" इति अतो विग्रहादिमत्त्वे कर्म्मणि विरोधः प्रसज्यत इति चेन्न, अनेकप्रतिपत्तेर्दर्शनात् ॥

टी॰ तच्छब्दवाच्यस्य परमात्मनोऽव्यवधानेन देवताभिराराध्यत्वादग्नीन्द्रादीनान्तु तत्तद् यज्ञभागभागित्वं स्वाराधनप्रीतेन भगवता दत्तं, न तु स्वाभाविकं यथोक्तम्भगवता व्यासेन कृष्णद्वैपायनेन मोक्षधर्मे यज्ञायहाराध्याये "ततस्ते विबुधास्सर्वे ब्रह्मा ते च महर्षयः । "वेददृष्टेन विधिना वैष्णवं क्रतुमाहरन् । तस्मिन् सत्रे तदा ब्रह्मा स्वयं भागमकल्पयत् ॥ देवा महर्षयश्चैव सर्वे भागानकल्पयन् । ते कार्त्तयुगधर्माणो भागाः परमसत्कृताः प्रापुरादित्यवर्णान्तम्पुरुषन्तमसः परम्" इत्यव्यवधानेन भगवतायष्टव्यत्वमुक्तन्तत्र भगवद्वचः "येन यः कल्पितो भागः स तथा समुपागतः प्रीतोऽहम्प्रदिशाम्यद्य फलमावृत्तिलक्षणं तत्र "यज्ञैर्ये चापि यक्ष्यन्ति सर्वलोकेषु वै सुराः कल्पयिष्यन्ति वो भागात् ते नरा वेदकल्पितान् यो मे यथा कल्पितवान् भागमस्मिन्महाक्रतौ स यथा यज्ञभागार्हो वेदसूत्रे मया कृतः" इति तत्र भगवता यज्ञभागभाक्त्वन्देवानान्दत्तमिति सुष्टुतरम्, अतो देवानां कर्मस्वनधिकाराभ्युपगमेन विद्यामात्रानधिकारवादोऽनुपपन्नः, अतस्माद्ब्रह्मविद्योपसंहारसामर्थ्यं देवानामस्तीति सिद्धं देवानां ब्रह्मविद्याधिकारि-

Digitized by Google

त्वम् सू० विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्, विग्रहाभ्युपगमे तद्युदार्थवादिके आह्वानागमने चाभ्युपेये तदा युगपदनेककर्मस्वाह्वाने विरोधः शरीराधीनत्वादागमनस्येत्यर्थः, आगमनमात्रे प्रामाणिके सति हि तद्यौगपद्ये विरोध इत्यागमने प्रमाणमाह "दर्शयति चे"ति, नेत्यादिकं व्याचष्टे "तन्ने"ति, दर्शनादित्येतद्व्याचष्टे–

सू० दृश्यते हि सौभरिप्रभृतीनां शक्तिमतां युगपदनेकशरीरप्रतिपत्तिः ॥

टी० "दृश्यते ही"ति, "आत्मनो वै शरीराणि बहूनि मनुजेश्वर योगी कुर्याद् बलं प्राप्य तैश्च सर्वां महीं चरेदि"ति भारतवचनादि द्रष्टव्यं, योग्यानुपलम्भस्तु मन्त्रौषधादिभिर्मनुष्याणामिव शक्तिविशेषैर्देवानामपि सम्भवतीति न विरोध इति भावः । ननु यदि देवा इहागत्य हविरदन्ति तर्ह्यन्यत्र मन्त्रार्थवादप्रतिपन्नमग्नेर्हव्यवाहत्वं भज्येत, अवगम्यते च तत् "हव्यवाडग्निरजरः पिता न" इति, "अवाड्ढव्यानि सुरभीणि कृत्वा प्रादाः पितृभ्यः स्वधया ते अक्षन्नि"ति "अग्नेस्त्रयो ज्यायांसो भ्रातर आसन् ते देवेभ्यो हव्यं वहन्तः प्रामीयन्ते"त्यादिषु इह प्रक्षिप्तस्य हविषो लोकान्तरप्राप्तिश्च श्रूयमाणाऽनुपपन्ना अग्निहोत्राहुती प्रकृत्य "ते वा एते आहुती हुते उत्क्रामतः ते अन्तरिक्षमाविशतस्ते अन्तरिक्षन्तर्पयतः ते दिवमाविशतस्ते दिवं तर्पयतस्ते तत आवर्तेते त इमामाविशत" इति, स्मर्यते च "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा" इति तत आवर्तेते इति इह हविषोरावृत्तिश्चानुपपन्ना कथं देवैर्भक्षितस्यावृत्तिः? प्रत्यक्षेण दग्धस्य हविषः कथन्देवैर्भक्ष्यमाणत्वञ्च युक्तमिति उच्यते "अवाड्ढव्यानि सुरभीणि कृत्वा प्रादाः" इति श्रवणात् अग्निना परिणाम्यमानस्य हविषस्सूक्ष्मरूपं किमप्यलौकिकं विद्यते इत्यभ्युपेत्यं श्रेयस्साधनत्ववत्, तच्च देवानामिच्छावशादतीव वर्धते तथा हि ब्राह्मणं "यद्वै देवा हविर्जुषन्ते अल्पमप्येकामाहुतिमपि तद्गिरिमात्रं वर्धयन्त" इति अतोऽपरिमितत्वेन किञ्चिद्भुज्यते किञ्चिच्चीयत इति सर्ववाक्यानुगुण्येन कल्प्यम्। यद्वा इह सन्निधायापि हविर्गृहीत्वा तत्स्वस्थानङ्गत्वा भुञ्जतां को बाधः, हविषोरिहावृत्तिर्नाम तत्फ-

Digitized by Google

त्भूतवृष्ट्यादेरिह सम्भव उपचाराद्युक्तः । यद्वा "इन्द्र आगच्छ हरिव आगच्छ मेधातिथे अग्निमावह सोममावहे"ति येष्विष्ट्यादिकर्मसु देवताह्वानतदागमने श्रुते तेष्वेव कर्मसु इहागत्य हविरदनमन्यत्र त्वग्निभिर्हविष उन्नयनमिति विभागः ते वा एते आहुती हुते उत्क्रामत इति वाक्यमपि ह्यग्निहोत्राहुतिविषयं न तत्र देवताह्वानागमने । ननु तत्रापि सायंयावप्रातर्यावसंज्ञानान्देवानामागमनं श्रूयते "सायं यावानश्च वै देवाः प्रातर्यावाणश्चाग्निहोत्रिणो गृहमागच्छन्ती"ति सत्यं, ते तु नाग्निहोत्राहुतिभोक्तारः सजूर्देवैस्सायं यावभिरिति सायं संमृशति सजूर्देवैः प्रातर्यावभिरिति प्रातः ये चैव देवाः सायंयावानो ये च प्रातर्यावाणस्तानेवोभयाँस्तर्पयती"ति संमर्शनमात्रतृप्तिश्रवणात्तेषां हुतहविर्भोक्तृत्वन्तु सूर्यादीनामेव, न च तत्र सूर्यादीनामाह्वानम् अतो देवताह्वानवत्सु कर्मसु इहागत्य हविरदनमन्यत्र हविष उन्नयनमिति विभाग उपपन्नः, अतोऽग्नेर्हव्यवाहत्वश्रुतिराहुत्योरुत्क्रमणश्रुतिरग्नौ प्रास्ताऽऽहुतिस्सम्यगादित्यमुपतिष्ठत इति स्मृतिश्च चरितार्था, अतोऽनेकशरीरप्रतिपत्त्या देवानां सन्निधानेन न कर्मणि विरोधः, इतरैस्तु "कति देवा" इत्युपक्रम्य "त्रयश्च त्रीणि च शता त्रयश्च त्रिसहस्रे"ति, निरुच्य कतमे त इत्यस्यां पृच्छायाम्महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति निर्ब्रुवन्ती श्रुतिरेकैकदेवताया अनेकरूपतायां प्रमाणत्वेन उपन्यस्ता अत्र त्रयस्त्रिंशतान्देवानाम्प्राधान्यमितरेषान्तद्गुणभावश्च प्रतीयते, महिमान एवैषामेत इति हि श्रूयते, महिम-शब्दस्य शरीरवाचित्वेन व्युत्पत्त्यभावात्, एत इति च न शरीरमात्रनिर्देशः अपि तु सशरीरचेतनव्यपदेशः, कति देवा इत्युपक्रमस्यदेव-शब्दसामानाधिकरण्यादेत इति पदस्य, न हि देवशब्दो देहमात्रपरः, न च देव-शब्दनिर्दिष्टा देवा जीवान्तराणां शरीरभूताः शरीरलक्षणस्य सर्वथाऽनुपपत्तेः, कतम एको देव इति पृष्ट्वा प्राण इति प्रतिवचनवाक्येऽपि प्राण-शब्दो न प्रसिद्धप्राणपरः अपि तु परमात्मपरः, अतोऽस्याः श्रुतेरेकैकदेवतायां अनेकरूपताप्रतिपादकत्वानुपपत्तिमभिप्रेत्य अत्र सैषा श्रुतिरनुदाहृता व्याख्यात्रन्तरैरनेकप्रतिपत्तेरिति पदस्य युगपदनेकार्थोपलम्भसामर्थ्यपरत्वेन व्याख्यातत्वेऽ-

Digitized by Google

प्यागच्छन्तीति श्रुत्यक्षरस्वारस्यानुगुणमनेकशरीरप्राप्तिपरतया व्याख्यातं सू० शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्, शब्द–शब्दं विशिनष्टि "वैदिक"इति, अभिप्रेतं हेतुमाह "अनित्यार्थसंयोगादि"ति, हेतुं विवृणोति–

सू० शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॥ २७ ॥

भू० विरोध इति वर्त्तते, मा भूत् कर्म्मणि विरोधोऽनेकशरीरप्रतिपत्तेः, शब्दे तु वैदिके विरोधः प्रसज्यते अनित्यार्थसंयोगात्, विग्रहवत्त्वे हि सावयवत्वेनेन्द्रादेरर्थस्यानित्यत्वमनिवार्यं ततो देवदत्तादिशब्दवदिन्द्राद्यर्थजन्मनः प्राग्विनाशादूर्द्ध्वञ्चेन्द्रादिशब्दानां वैदिकानामर्थशून्यत्वम् अनित्यत्वं वा वेदस्य स्यादिति चेत् न अतः प्रभवात्–अस्मादिन्द्रादिशब्दादेव पुनः पुनरिन्द्राद्यर्थस्य प्रभवात् ।

टी० "विग्रहवत्त्वे ही"ति, अर्थशून्यत्वमनित्यत्वं वेति देवदत्तादिविनाशे देवदत्तादिशब्दस्येवानर्थकत्वम् अनित्यत्वम् अनुच्चार्यमाणत्वम् नित्यत्वेऽर्थशून्यत्वं विग्रहादिमदिन्द्राद्यर्थस्य यावच्छब्दभावित्वाभावात् अर्थवत्त्वे अनित्यत्वं वा, शब्दस्य यावदर्थभावित्वादर्थानां चानित्यत्वादित्यर्थः । ननु कथमर्थशून्यत्वं शब्दानाम् अतीतानागतभूतभविष्यदादयशब्दा हि अर्थसमकालत्वाभावेऽप्यर्थवन्त एव न हि तेषां कदाचिदप्यर्थसमकालत्वसम्भवः, न च तेषामर्थशून्यत्वं यथा त्रिलोक्यस्थेनोच्चारितो मेरु–शब्दो देशविप्रकर्षेऽप्यर्थवानेवमिन्द्रादिशब्दाश्चेन्द्रादिव्यक्तीनां कालविप्रकर्षेऽप्यर्थवन्तः कस्माच्च भवन्ति, क्वचित् कदाचिदर्थस्य प्रामाणिकत्वं हि शब्दस्यार्थवत्त्वनिबन्धनमिति, उच्यते अनभिज्ञा भवन्तो भाष्यहृदयस्य ये एवं परिचोदयन्ति, एतदपाकरणाय हि शब्दे तु वैदिक इति विशेषितं सौत्रं पदम् इहापीन्द्रादिशब्दानां वैदिकानामित्युक्तम्, अयमभिप्रायः

इन्द्र आगच्छ हरिव आगच्छेत्यादिकं मन्त्रजातं वैदिककर्मसु विनियुज्यते तत्र पूर्वमेवेन्द्रव्यक्तौ विनष्टायामिन्द्रशब्दवाच्यव्यक्तेः पाश्चात्ययज्ञकर्मण्यागमनाभावादिन्द्र आगच्छेत्यादिशब्दानामुच्चार्यमाणानामर्थशून्यत्वमनुच्चार्यमाणत्वं वा स्यादिति, इन्द्रव्यक्त्यन्तरेणार्थवत्त्वमिति चेत् तद्व्यक्त्यन्तरम्पूर्वव्यक्तिसमानाकारायुधपराक्रमविभूतिकं न वा? प्रथममनुपपन्नं, स्रष्टुः स्वातन्त्र्यस्य अनिवार्यत्वात्सरूपसृष्टिनियमानुपपत्तेर्वैरूप्यसंभवात् ततश्चान्याकारशचिनामिन्द्रादिशब्दानां प्रवृत्तावाकारान्तरस्य निमित्तत्वायोगादर्थशून्यत्वमवर्जनीयं, द्वितीये तु या व्यक्तिरिन्द्र-शब्दविषयत्वेनाभिमता तस्यां व्यक्तौ तच्छब्दप्रवृत्तिनिमित्तस्य कस्यचिदभावादेव तदवाचकतयाऽर्थशून्यत्वन्तथाऽपि स्रष्टृपुरुषबुद्ध्यधीनसङ्केतवशात् प्रयोगश्चेत् शब्दसङ्केतगोचरस्यार्थस्सङ्केतयितृपुरुषबुद्धिगोचरत्वे सङ्केतानुपपत्तेर्देवदत्तादिशब्दानामिवेन्द्रादिशब्दानां पुरुषान्तरबुद्धिसापेक्षप्रवृत्तित्वाद्वेदस्यानपेक्षत्वलक्षणम्प्रामाण्यं न स्यात्, यदि प्रधानकालपरमात्म-शब्दवदेकैकव्यक्तिवाचित्वमिन्द्रादिशब्दानां स्यात्तदा सङ्केतनैरपेक्ष्येण निरपेक्षत्वलक्षणं प्रामाण्यं स्यात्, अतः इन्द्रादीनां प्रधानानामिव नित्यत्वाभावात्तन्नाशेऽर्थशून्यत्वाऽनुच्चार्यमाणत्वयोरन्यतरप्रसङ्गो दुर्वार इति, नातः प्रभवादित्येतद्व्याचष्टे "तत्त्वे"त्यादिना, शब्दादर्थस्योत्पत्तिः कथं, ततश्चार्थशून्यत्वानित्यत्वपरिहारः कथमित्यत्राह–

सू० एतदुक्तम्भवति–न हि देवदत्तादिशब्दवदिन्द्रादिशब्दाः वैदिकाः व्यक्तिविशेषमात्रे सङ्केतपूर्वकाः प्रवृत्ताः अपि तु स्वभावत एव गवादिशब्दवदाकृतिविशेषवाचित्वेन ततश्चैकस्यामिन्द्रव्यक्तौ विनष्टायामत एव वैदिकादिन्द्र–शब्दात्मनसि विपरिवर्त्तमानादवगततद्वाच्यभूतेन्द्राद्यर्थाकारो धाता तदाकारमेवापरमिन्द्रं सृजति, यथा कुलालो घट–शब्दान्मनसि विपरिवर्त्तमानात्तदाकारमेव घटमिति, कथ-

Digitized by Google

मिदमवगम्यते? प्रत्यक्षानुमानाभ्यां—श्रुतिस्मृतिभ्यामित्यर्थः श्रुतिस्तावत् "वेदेन नामरूपे व्याकरोत् सतासती प्रजापति"रिति तथा "स भूरिति व्याहरत् स भूमिमसृजत स भुव इति व्याहरत्

टी० "एतदुक्त"मिति, धाता तदाकारमेवेति पदे "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदि"ति श्रुतिः "यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानि तान्येव तथा भावा युगादिष्वि"त्यादिस्मृतिश्च स्मार्यते, धीस्थस्य शब्दस्य तत्तदाकृतिस्मारकतया हेतुत्वन्तदेव दृष्टान्तेन विशदयति "यथे"ति, मनसि विपरिवर्त्तमानत्वम्—ग्रलोच्यमानत्वं श्रुतिस्मृतिभ्यामिति प्रत्यक्षशब्दो वेदः प्रत्यक्ष—शब्दवाच्यः स्वानुरूपवेदानुमापिका स्मृतिरनुमानशब्दवाच्येत्यर्थः, सतासती इति चिदचिती रूपे व्याकरोत्—विविधमकरोदित्यर्थः। परेस्तु अनित्याच्छब्दाज्जगतः प्रभवानुपपत्तेरनित्यवर्णातिरिक्तो नित्यः शब्दः स्फोटः शब्द इत्येकदेशिमतेन उपन्यस्य तद्वादस्य वर्णानां नित्यत्वं प्रसाध्य वर्णानित्वेऽपि तद्गतजात्या सम्बन्धग्रहणादिकं जगतस्ततः प्रभवादिकं चोपपन्नमित्युक्तं, तदयुक्तम् इहानुपयोगाद्विरोधाच्च, तथा हि न तावच्छब्दो जगदुपादानं ब्रह्मोपादानत्वाभ्युपगमात्, निमित्तत्वञ्च न दण्डचक्रादिवत्कारकतया किन्तु बुद्धिस्थत्याऽर्थस्मारकतया, तत्र च धर्माधर्मयोरनित्ययोरपि विषमजगदुत्पत्तौ निमित्तत्वमभ्युपगतं दण्डचक्रादीनाञ्चानित्यानामपि निमित्तत्वं दृश्यते किं कर्ममात्रस्यानित्यादुत्पत्तिरनुपपन्ना? उत जगद्रूपकार्यविशेषस्य? न प्रथमः दण्डचक्रादीनां घटादिकारणत्वदर्शनात्, न द्वितीयः धर्माधर्मयोर्जगन्निमित्तत्वाभ्युपगमात्, एवं सत्तयोपकारकाणामप्यनित्यानाङ्कारणत्वं यदा सम्भवति तदा स्मर्यमाणतयोपकारकाणां शब्दानामनित्यत्वेऽपि कारणत्वसम्भवः किं पुनर्न्यायसिद्धः, अतो नित्यत्वस्यानुपयोगात् स्फोटवादो न प्रस्तोतव्यः, दूरे तस्य निरसनीयता, वर्णानाञ्च नित्यत्वसमर्थनमत एव निष्फलं किञ्च नित्यानामपि वर्णानां न वर्णत्वाकारेणार्थवाचित्वं किं त्वानुपूर्वीविशेषविशिष्टपदवाक्यरूपेण विभुतया नित्यतया च देशतः कालतश्च

क्रमरहितानामानुपूर्व्या उच्चारणनिबन्धनत्वात्, तस्य च क्षणभङ्गुरत्वात् अर्थावबोधं प्रयोजनमपेक्ष्य वर्णनित्यत्वसाधनन्तद्गतजात्यवस्थानवचनं च विफलम्, अर्थावबोधकरूपस्यानित्यत्वस्थितेः; यथोदकाहरणरूपंप्रयोजनमपेक्ष्य पृथिवीस्थिरत्वसमर्थनं, पृथिवीत्वजात्यवस्थानवचनं च नोपयुज्यते पृथिव्या घटरूपेणोदकाहरणसाधनत्वात् पार्थिवावयवरचनाविशेषलक्ष्यरूपस्य घटस्य चानित्यत्वात् तद्वत्। किञ्च वर्णानां नित्यत्वं नाम किमाप्रलयावस्थायित्वम्? उत उभयावधिरहितत्वं? प्रथमे पूर्वोक्तवैयर्थ्यं स्थितं पृथिव्या आप्रलयावस्थायित्वसमर्थनस्य घटेन उदकाहरणेऽनुपयोगात्, द्वितीये शब्दगुणकाकाशसृष्टिप्रलयश्रुतिविरोधः, वर्णानित्यत्वेऽभ्युपगम्यमानेऽपि तद्गतजात्यभ्युपगमश्च विरुद्धः, कृत्स्नव्यक्त्यनवस्थाने जात्यवस्थानाऽनु-

सू० सोऽन्तरिक्षमसृजते"त्यादि वाचकशब्दपूर्वकन्तत्तदर्थसंस्थानं स्मरन् तत्तत्संस्थानविशिष्टन्तन्तमर्थं सृष्टवानित्यर्थस्मृतिरपि "अनादिनिधना ह्येषा वागुत्सृष्टा स्वयम्भुवा आदौ वेदमयी दिव्या यतस्सर्वाः प्रसूतय"इति "सर्वेषान्तु स नामानि कर्म्माणि च पृथक् पृथक्। वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे" इति, संस्थाः संस्थानानि रूपाणीति यावत्, तथा "नामरूपञ्च भूतानां कृत्यानां च प्रपञ्चनं वेदशब्देभ्य एवादौ देवादीनां चकार सः" इति. अतो देवादीनां विग्रहवत्त्वेऽपि न वैदिकशब्दानामानर्थक्यं वेदस्यादिमत्त्वं च प्रसज्यते ॥

पपत्तेः, महाप्रलये कतिपयव्यक्त्यवस्थानन्तु कारणवाक्यविरुद्धं "सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमि"ति हि श्रुतिः, अवधारणाद्वितीयनिषेधौ कथं कतिपयव्यक्त्यवस्थानं जात्यवस्थानं च सहेते। किं च वर्णनित्यत्वादिकं किं बोधकत्वोपयोगितया समर्थ्यते? किं वा जगतः प्रभवोपयोगितया? प्रथमे वर्णनित्यत्वादिकं सर्वमपि अथातो ब्रह्मजिज्ञासेत्यत्रैव वक्त-

व्यम् अनवबोधकत्वस्य शास्त्रानारम्भहेतुत्वात्, द्वितीय च जन्मादिसूत्रे तत्सर्वं समर्थनीयं लक्षणासिद्ध्युपयोगित्वात् । किञ्च वर्णानित्यत्वादिकं सर्वाधिकरणेषु यथाकथञ्चित् घटयितुं शक्यते अत एतदधिकरणासाधारणार्थानुपयोगात् विरोधाच्चात्र वर्णनित्यत्वादि प्रपञ्चनमयुक्तं "प्रत्यक्षानुमानाभ्यामि"ति, सौत्रपदञ्च अन्यथा व्याख्यातं घटादिनिर्माणस्य शब्दपूर्वकत्वस्य प्रत्यक्षसिद्धत्वात् जगत्सृष्टावप्येवमनुनानादिति तथा सति न तयोस्समुच्चित्य हेतुत्वमेकपक्षे सिध्यति जगत्सृष्टेः शब्दपूर्वकत्वेऽनुमानस्यैव अव्यवधानेन प्रवृत्तेः प्रत्यक्षस्य व्याप्तिग्रहणोपयिकत्वेन तच्छेषभूतत्वात्, ततश्च प्रत्यक्षानुमानाभ्यामिति द्विवचनं क्लिष्टं स्यात्, न हि दण्डपरशुभ्यां वृक्षः छिद्यत इति व्यपदिश्यते दण्डस्य परशूपकरणत्वात्, अतः प्रत्यक्षमूलानुमानादिति निर्देष्टव्यं, तथा च निर्दिष्टं यदि क्वचिदेवमपि दृष्टं तद्वत्यभावात् स्यादिह च गत्यन्तरसम्भवादयुक्तं, कल्पादिकालीनायाः सृष्टेः शब्दपूर्वकत्वं सृष्टित्वादनुमातुं न शक्यमूकककर्तृकघटादिसृष्टौ हेतोरनैकान्त्यात् अतो यथोक्त एवार्थः, एवमर्थद्वारकमनित्यमाशङ्क्य परिहृतमथ

सू० अत एव च नित्यत्वम् ॥ २८ ॥

भू० यत एवेन्द्रवसिष्ठादिशब्दानां देवऋषिवाचिनान्तत्तदाकारवाचित्वं तत्तच्छब्देन तत्तदर्थस्मृतिपूर्विका च तत्तदर्थसृष्टिः, तत एव "मन्त्रकृतो वृणीते नम ऋषिभ्यो मन्त्रकृद्भ्योऽयं सोऽग्निरिति विश्वामित्रस्य सूक्तम्भवती"त्यादिभिर्वसिष्ठादीनां मन्त्रकृत्त्वकाण्डकृत्त्वऋषित्वादौ प्रतीयमानेऽपि वेदस्य नित्यत्वमुपपद्यते ।

टी० शब्दद्वारकमनित्यत्वं परिह्रियते सू० अत एव च नित्यत्वम् उक्तसङ्गतिर्मन्त्रकृतो वृणीते इत्यादिनाऽभिप्रेता यत एवेति अर्थवादानां प्रतीयमानार्थे तात्पर्यमस्तीति चेत् मन्त्रकृत इत्यादिवाक्येष्वपि मन्त्रकृत्त्वे तात्पर्यसम्भवात् अनित्यत्वमिति शङ्का इयमपीन्द्रादिशब्दानामाकृतिवाचित्वात्तत्तच्छब्देन तत्तदर्थस्मृतिपूर्वकतत्तदर्थसृष्ट्या परिहृतेत्यर्थः उक्तशङ्कापरिहारपरं सूत्रं ये न व्याचक्षते तेषाम्मते सूत्रवैयर्थ्यं स्फुटम् ॥ शङ्कायाः परिहृतत्वं स्पष्टयति–

Digitized by Google

तत्त्वबिन्दुः ।

अह्नये बुध्न्याय नमो ब्रध्नाय नमो नमो ऽस्तु गणपतये ।
आर्यायै भारत्यै नमो नमश्चास्तु विष्टरश्रवसे * ॥ १ ॥

इह खलु पदकदम्बश्रवणसमनन्तरमविवादं विदितपदतदर्थसङ्गतीनामनधिगतार्थगोचरा धीरुदयमासादयति पुंसाम् । तस्या निमित्तं प्रति विवदन्ते वादिनः ।

केचिदाहुरनवयवमेव वाक्यमनाद्यविद्योपदर्शितालीकवर्णपदविभागमस्या निमित्तमिति † ।

पारमार्थिकपूर्वपूर्ववर्णपदपदार्थानुभवजनितसंस्कारसहितान्त्यवर्णविज्ञानमित्येके ‡ ।

---

* अह्नये बुध्न्याय शिवाय । अष्टमूर्तिरहिर्बुध्न्य इति कोशः । नामान्तराण्यनुपादायैतस्यैवोपादानं तु अह्ने बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रयीविदा विदुः । ऋचः सामानि यजूंषि । साहि श्रीरमृता सताम् । तैत्तिरीयब्राह्मणे अ॰ १ प्र॰ २ खं २६ मन्त्र ३ इति मन्त्रानुसंधापनेन शिवस्य वेदत्रयगोप्तृत्वद्योतनायास्य मन्त्रस्य शाबरभाष्ये अ॰ २ पा॰ १ सू॰ ३५ उदाहृतत्वेन ऋक्त्वादिज्ञानोपयुक्तैक वाक्यत्वलक्षणे सू॰ ४६ बहुत्वात्पदार्थानामिति शाबरभाष्योक्तेरन्विते पदानां न शक्तिरिति व्यवस्थापयिष्यमाणसिद्धान्तस्य भाष्यकाराभिमतत्वस्फोरणाय चेति बोध्यम् । तथैवोपसंहरिष्यति । ब्रध्नः सूर्यः भास्कराहस्करब्रध्नेति कोशः । आर्यायै भारत्यै सरस्वत्यभिन्नायै गौर्यै । ग्रन्थारम्भे सरस्वतीनमनस्यौचित्यात्पञ्चायतने गौर्या एव शास्त्रेषूपदेशात्तथोक्तिः । सरस्वतीगौर्योरभेदश्च देवीमाहात्म्योत्तमचरिते स्पष्टः । आर्या दाक्षायणी चैवेति कोशः । विष्टरश्रवसे विष्णवे । वैकुण्ठो विष्टरश्रवा इति कोशः । अनेनादित्यमम्बिकां विष्णुं गणनाथं महेश्वरमिति स्मार्तैरवश्योपास्यदेवतापञ्चकनमस्काररूपं मङ्गलमनुष्ठितं भवति ।

† वैयाकरणाः । तथा च वाक्यपदीये काण्डे १ श्लो॰ ७३ पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च । वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चनेति । काण्डे २ श्लो॰ २३४ शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यत इति । उपपादयिष्यते चेदमग्रे । एवं मतान्तराण्यपि ।

‡ नैयायिकाः । वात्स्यायनभाष्ये अ॰ ३ आ॰ २ सू॰ ६२. वाक्यस्थेषु खलु वर्णेषूच्चरत्सु प्रतिवर्णं तावत् श्रवणं भवति श्रुतं वर्णमेकमनेकं वा पदभावेन स प्रतिसंधत्ते प्रतिसंधाय पदं व्यवस्यति पदव्यवसायेन स्मृत्या पदार्थं प्रतिपद्यते पदसमूहप्रतिसं-

Digitized by Google

प्रत्येकवर्णपदपदार्थानुभवभावितभावनानिचयजन्म*लब्धजन्मस्मृतिदर्पणारूढा वर्णमालेत्यन्ये† ।

पदान्येवाकाङ्क्षितयोग्यसन्निहितार्थान्तरान्वितस्वार्थाभिधायीनीत्यपरे‡ ।

पदैरेव समभिव्याहारवद्भिरभिहिताः स्वार्था आकाङ्क्षायोग्यतासन्निधिसध्रीचीना वाक्यार्थधीहेतव इत्याचार्याः§ । तत्र ।

मीयमानपरित्यागो बाधके नास्ति स्फुटे ।
दृष्टात्कार्योपपत्तौ च नादृष्टपरिकल्पना ॥

स खल्वयमेको वाक्यात्मा वाक्यार्थधीहेतुरनुभवाद्वा व्यवस्थाप्यते अर्थधीभेदाद्वा ऽन्यथा ऽनुपपद्यमानात् ।

अनुभवो ऽपि च वाक्यात्मानमेकमवयविनमनेकपदवर्णव्यासङ्गिनमङ्गमप्रत्यङ्गवर्तिनमिव देवदत्तमनुभवेत् प्रत्यस्तमितवर्णपदविभागं वा ।

वर्णाः पदानि चास्यावयवाः सत्तामात्रेणानुभूयमानतया वा भवेयुः ।

न तावत्पूर्वकल्पः । अवयविन्यूनपरिमाणत्वादवयवानां परममहतां च वर्णानां तदनुपपत्तेः । गगनगुणत्वे वा ऽद्रव्यतया समवायिकारणत्वाभावेनावयवभावानवकल्पनात् ।

वाक्यपदीयावयवारब्धवर्णवादिना||मप्याशुतरविनाशशीलतया वर्णा-

धानाच्च वाक्यं व्यवस्यति संबद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यत इति । सिद्धान्तमुक्तावल्यां शब्दखण्डे च प्रत्येकपदानुभवजन्यसंस्कारैश्चरमतावद्विषयकस्मरणस्याव्यवधानेनोत्पत्तेः—तावत्पदसंस्कारसहितचरमवर्णज्ञानस्योद्बोधकत्वात् इति । एवं पदवाक्यरत्नाकरादिष्वपि ।

* जन्मेति पदमधिकमपि पुस्तकत्रये सत्त्वात्स्थापितम् ।

† उपवर्षप्रभृतयो मीमांसकाः । ब्रह्मसूत्रशाङ्करभाष्ये अ॰ १ पा॰ ३ सू॰ २८ वर्णा एव तु शब्द इति भगवानुपवर्षः इति । शाबरभाष्येऽपि अ॰ १ पा॰ १ सू॰ ५ अथ गौरित्यत्र कः शब्दः गकारौकारविसर्जनीया इति भगवानुपवर्ष इति । योगभाष्ये व्यासदेवोऽपि पा॰ ३ सू॰ १७ गकारौकारविसर्जनीयाः सास्नादिमन्तमर्थं द्योतयन्तीति ।

‡ अन्विताभिधानवादिनः प्राभाकराः ।

§ भाट्टाः शबरस्वामिप्रभृतयश्च । तन्त्रवार्तिके अ॰ २ पा॰ १ सू॰ ४६ पदार्थैः पदविज्ञातैर्वाक्यार्थः प्रतिपाद्यते इति । शाबरभाष्ये अ॰ १ पा॰ १ सू॰ २५ पदार्थाः अवगताः सन्तो वाक्यार्थं गमयन्तीति ।

|| वाक्यपदीये काण्डे १ श्लो॰ १०९ लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।

Digitized by Google

नां परस्परमसहभुवामसंबद्धानामवयव्यारम्भासम्भवात् । नो खल्वेते क्रमभाविनो ऽवयविनं वा तदसमवायिकारणं वा व्यतिषङ्गं* बिभ्रति । अबिभ्राणाश्च कथमवयवा व्यतिषक्ता वा । एकद्रव्यस्य च कार्यद्रव्यस्यानुपपत्तेर्द्रव्यविनाशकारणद्वयाभावेन कृतकानित्यत्वप्रसङ्गात्† । असहभावित्वादेवानुभूयमानतया ऽप्यवयवभावः परास्तो वेदितव्यः । आशुतरविनाशित्वेनानुभवानां तत्कर्मतया ऽपि तथात्वेन‡ सहभावाभावात् ।

स्यादेतदनवयवमेव वाक्यं वाक्यार्थस्य च वाचकम् । न च वर्णा एवानुभूयन्ते न तु तदतिरिच्यमानशरीरमपि वस्त्विति वाच्यम् । पदमिति वाक्यमिति चानुसंहारबुद्धा§ऽभिन्नस्य वस्तुन उपारोहात् । न खल्वियं बुद्धिरभिन्नवस्तुनिर्भासा परस्परव्यतिरिच्यमानात्मनो वर्णानेव गोचरयितुमर्हति । एकत्वनानात्वयोरेकत्रासमवायात् । न च वर्णात्मनस्तत्समवायिनो वाक्यस्य कुतस्तदुपरागवती प्रख्येति वाच्यम् । तदतिरिच्यमानमूर्त्तीनां परमार्थसतां वर्णानामभावात् । तदेव|| हि सर्वजनीनमानसप्रत्यक्षप्रवेदनीयप्रयत्नभेदभिन्ननानाध्वनिप्रत्येकव्यञ्जनीयं तत्त्वं¶ ध्वनयस्तु तुल्यस्थानकरणलब्धजन्मतया परस्परविसदृशतत्तत्पदवाक्यव्य-

---

स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते । तस्य कारणसामर्थ्याद्वेगप्रचयधर्मिणः । संनिपाताद्विभज्यन्ते सारवत्यो ऽपि मूर्तय इति ।

* व्यतिषङ्गो ऽसमवायिकारणीभूतः संयोगः ।

† अवयवद्वयानारब्धस्य परमाणुगगनादेर्द्रव्यस्य कार्यताया अनङ्गीकारात् । द्रव्यनाशस्यासमवायिकारणनाशजन्यत्वनियमाद् द्रव्योत्पत्तावसमवायिकारणसंयोगस्यापेक्षितत्वेन चाद्यहेतुना ऽनीकत्वरूपकृतकत्वस्य द्वितीयहेतुना नित्यत्वस्य चेति विरुद्धयोर्द्वयोरापत्तेरित्यर्थः ।

‡ अनुभवकर्मत्वे ऽपि आशुतरविनाशित्वेनैककालिकत्वाभावेऽसमवायिकारणसंयोगाश्रयत्वानुपपत्तेः ।

§ साहित्यावगाहिज्ञाने ।

|| वाक्यमेव ।

¶ मानसज्ञानविषयप्रयत्नभेदेन जनितैर्भिन्नैर्नानाध्वनिभिः प्रत्येकमभिव्यङ्ग्यं स्फोटरूपं परमार्थसदित्यर्थः । तथा च वाक्यपदीये काण्डे १ श्लो॰ ७८ शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः । ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते । श्लो॰ ८६ प्रत्येकं व्यञ्जका भिन्ना वर्णा वाक्यपदेषु ये । तेषामत्यन्तभेदे ऽपि संकीर्णा इव शक्तयः इति ।

ञ्जकानेकविधध्वनिसादृश्येनान्योन्यविसदृशतत्पदवाक्यसादृश्यापादयन्तः* सादृश्योपधानभेदा†देकमप्यनवयवमपि नानावर्णात्मेव सावयवमिव चाभासयन्ति मुखमिव मणिकृपाणदर्पणादयो नियतस्थानवर्णपरिमाणसंस्थानमनुपप्लवमेकमनेकमिवानेकस्थानवर्णपरिमाणसंस्थानभेदोपप्लव‡मिवादर्शयन्ति । न च प्रत्येकमभिव्यञ्जकत्वे ध्वनीनां प्रथमादेव ध्वनेर्वाक्यस्य प्रतीतेरुत्पत्तेस्तन्मात्रनिबन्धनत्वाच्चार्थप्रत्ययोत्पादस्य द्वितीयादीनामानर्थक्यं ध्वनीनामिति युक्तम् । व्यञ्जयन्तो ऽपि हि प्रत्येकमिमे ध्वनयो न द्रागित्येव स्फुटतरं स्फोटात्मानमवभासयितुमीशते ऽपि त्वारूपमवभासयन्ति§ पूर्वपूर्वाभिव्यक्तिजनितसंस्कारसचिवोत्तराभिव्यक्तिक्रमेण त्वन्त्यो ध्वनिः स्फुटतरविनिविष्टस्फोटबिम्बज्ञानमाधत्त इति न वैयर्थ्यं द्वितीयादिध्वनीनाम् । नापि पूर्वेषां तदभावे तदभिव्यक्तिजनितसंस्काराभावेनान्त्यस्य ध्वनेरसहायतया व्यक्तावभासवाक्यधीहेतुभावाभावात् । तद्यथा रत्नपरीक्षिणः पुनः पुना रत्नस्वरूपं वीक्षमाणस्य रत्नदर्शनानि प्रत्येकं रत्नस्वरूपमवगाहमानान्यपि न सहसैव समानासमानजातीयव्यावृत्तं रत्नतत्त्वमवभासयन्ति किं तु पञ्चषदर्श-

* परस्परं विसदृशानामपि तेषां तेषां पदानां वाक्यानां वा व्यञ्जका ये ऽनेकविधा ध्वनयस्तेषां तुल्यस्थानकरणजत्वेन सादृश्यात्तदभिव्यञ्जनीयपदवाक्ययोरभेदेन भिन्नयोरपि सादृश्यप्रयोजका इत्यर्थः । अर्थभेदाच्छब्दभेदस्य नित्यस्फोटवादिनः शब्दार्थतादात्म्यवादिनश्चेष्टतया हर्यादिपदेषु श्वेतो धावतीत्यादिकेषु च द्व्यर्थकेषु पदेषु वाक्येषु चाभिव्यञ्जकध्वनिसादृश्यमूल एव तथा व्यवहार इति भावः ।

† ककाराद्यभिव्यङ्ग्यत्वेनैव सादृश्यस्य निरूपणीयतया ककारादिवैशिष्ट्यज्ञाने नानाध्वनिविषयकतया तद्गतनानात्वस्यापि प्रतिभासात् स्फोटस्य नानात्वसावयवत्वयोः प्रतिभास इति भावः ।

‡ अनेके स्थानं वर्णः परिमाणं संस्थानभेदः उपप्लवश्च यस्य तम् । मुखस्यैकत्वे ऽपि दर्पणाद्याधारभेदाद् यथा सामीप्यदूरस्थत्वादिस्थानस्य मालिन्यादेर्वर्णस्याल्पत्वमहत्त्वपरिमाणस्य वक्रत्ववर्तुलत्वादेः संस्थानभेदस्यावयवसंनिवेशविशेषरूपस्य दर्पणादिनाशेन नाशस्य चारोपस्तथा स्फोटेपीति ।

§ ईषद्रूपमस्फुटमिति यावत् । तथा च शास्त्रदीपिकायाम् । न कश्चिदपि नादो ऽस्य स्फुटाभिव्यक्तिं करोति किं तु सर्वे ते प्रत्येकं व्यञ्जकाः स तु न द्रागेव स्फुटमवभासते प्रथममस्फुटावभासितः सन् पुनः पुनः भूयमाणः स्फुटो भवतीति । अ० १ पा० १ सू० ५ प० ७१ ।

Digitized by Google

तज्जनितभावनासचिवचेतोलब्धजन्मनि चरमे चेतसि चकास्ति रजतत्त्वम् । न च वर्णावभासा मिथ्याप्रत्ययास्तत्संस्कारा वा कथं व्यक्ततया परिच्छित्तिहेतव इति सांप्रतम् । आराद्वनस्पतौ हरितप्रवाहस्य* व्यक्ततरं वनस्पतितत्त्वप्रतीतिहेतुत्वदर्शनात् । वर्णाश्च समारोपितदीर्घत्वादिधर्मभाजः पारमार्थिकार्थधीभेदोपलम्भात् । तथा हि लौकिका नग इति गिरिमुपदिशन्ति नाग इति हस्तिनम् । अजिनमिति चर्म अजीनमिति ज्यानिविहीनम् । शुन इति कर्मभूतान्सारमेयान् शून इति तु वृद्धिमापन्नम् । न चैते भ्रान्तयः व्यवहाराविसंवादात् ।

यस्तु स्वसिद्धान्ताभ्यासाहितव्यामोहापस्मारः† सर्वजनीनमपि पदमिति वाक्यमिति चैकविषयमनुभवमपजानीते स इत्थं शिक्षयितव्यः वत्स वेत्सि तावच्छब्दादर्थधीरुदयत‡ इति सेयं वर्णातिरिक्तैकपदवाक्यानुभवमन्तरेण नोदेतुमर्हति नो खल्विमां विधातुमुत्सहन्ते वर्णाः विकल्पासहत्वात् । ते हीमां प्रत्येकं वा विदधीरन् नागदन्ताइव शिक्यावलम्बनं मिलिता वा ग्रावाणइव पिठरधारणम् । न तावत्प्रत्येकमनुपलम्भविरोधात् । वर्णान्तरोच्चारणानर्थक्यप्रसङ्गाच्च । नापि मिलिताः तथाभावाभावात् । तथा हि । वास्तवो वा समूह एतेषामाश्रीयते अनुभवोपाधिको वा । तत्र सर्वेषामेव वर्णानां नित्यतया विभुतया च वास्तवी सङ्गतिरतिप्रसङ्गिनी केषांचिदेव पदवाक्यभावं नापादयितुमर्हति । अनुभूयमानानां त्वनुभवानुसारिणी तत्पर्यायेण पर्यायवती न समूहभाग्भवति । न खल्वेकदेशकालानवच्छिन्नाः समूहवन्तो भवन्ति भावाः अतिप्रसङ्गात् ।

पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितो ऽन्त्यो वर्णः प्रत्यायको ऽर्थस्य§ तेन तथैव एकानुभवकल्पनेति चेद् न । विचारासहत्वात् । को नु ख-

* दूरस्थवृक्षे हरिततृणसमूहज्ञानधाराया इत्यर्थः ।

† स्वसिद्धान्ताभ्यासाहितव्यामोहापस्मार इति ३ पुस्तके पाठः ।

‡ उदीयत इति ३ पु॰ पा॰ ।

§ तथा च वाक्यपदीये काण्डे १ श्लो॰ ८५ नादैराहितबीजायामन्त्येन ध्वनिना सह । आवृत्तपरिपाकायां बुद्धौ शब्दो ऽवधार्यत इति ।

ल्वयं संस्कारो* ऽभिमत आयुष्मतः किं स्मृतिबीजमन्यो वा प्रोक्षणादिभ्य इव व्रीह्यादेः । न तावदन्त्यः । न ह्यसावसहभुवां वर्णानां जन्य एकः संभवति उक्तादेव प्रकारात् । वर्णैर्यथास्वं क्रमविशेषशालिभिरन्ये ऽन्ये जन्यन्ते संस्काराः तेषां च स्थेम्ना संभवत्यन्त्यवर्णसाचिव्यमभिधेयप्रत्ययजननायेति चेद् अहो बतास्य स्वपक्षदृष्टिपक्षपातः† यद् बहुतरादृष्टसंभारकल्पनाक्लेशमपि न चेतयते संस्कार एव तावदनुपलब्धपूर्वस्तस्य च नानात्वमिति । आग्नेयादिवत्कल्पनागौरवं न कल्पकगर्हितता‡मावहतीति चेद् न इहान्यथासिद्धेः । आग्नेयादयो हि विशरारवो दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति चिरभाविने फलाय विहिताः समिदादयश्च प्रोक्षणादयश्च तदङ्गान्यसहभावीनि इति बहूपूर्वकल्पनां विना नोपपद्यन्त इति नासौ प्रमाणमार्गागतो दोषमावहति । इह पुनरेकगोचरानुभवमात्रादभिधेयप्रत्ययोत्पत्त्युपपत्तेरप्रामाणिकानेककल्पना न दोषमावहतीत्यचतुरस्रम् ।

वासनापरनामा संस्कारः स्मृतिबीजमन्त्यवर्णसहकारी तस्य च स्मरणफलप्रसवोन्नीतसद्भावस्यार्थधीजन्मनि सहकारितामात्रं कल्पनीयम् तच्च गौरवमिति चेद् न । स्वभावविपर्यासानुपपत्तेः अदृष्टान्तरकल्पनाप्रसङ्गाच्च । तथा हि । यो यद्गोचरानुभवयोनिः संस्कारः स तत्रैव धियमाधत्त इति तस्य स्वभावः यद्यन्यस्मिन्नप्यादधीत किं चिदेवैकमनुभूय सर्वः सर्वमर्थं विजानीयात्§ । अपि च संस्कार इति च वासनेति च भावनेति च प्राचीनानुभवजनितमात्मनः सामर्थ्यभेदमेव स्मृतिज्ञानप्रसवहेतुमाचक्षते न चास्यैवा‖र्थप्रत्ययप्रसवशक्तिः शक्या कल्पयितुम् । सा खल्वभिधेयधीप्रसवोन्नीतसद्भावा फलवत्यात्मन्येव युक्ता कल्पयितुं न पुनरतद्वृत्यामस्य स्मृतिजननशक्तौ¶ । यथा चेयं मानान्तरसिद्धैवमसावपि । न चात्मनि शक्तिक-

* अर्थसंस्कार इति ३ पु॰ पाठः । † स्वदृष्टिपक्षपात इति ३ पु॰ पा॰ ।

‡ लोकगर्हिततामिति ३ पु॰ पा॰ ।

§ तथा च वर्णस्मरणमेव स्यान्न त्वर्थस्मरणमिति भावः ।

‖ संस्कारस्यैव शक्तिरूपत्वेन तत्र शक्त्यन्तरकल्पनानवकाशादिति भावः ।

¶ स्मृतिजननमिति २ पु॰ पा॰ । बोधरूपफलरहितायां शक्तौ संस्कारस्य स्मृतिजनकत्वमनुपयोगात्कल्पयितुं न युक्तमित्यर्थः ।

Digitized by Google

ल्पनायां सत्यां तस्याश्चाशक्तायाः कार्यकरणाभावाच्छक्त्यन्तरकल्पना न तु स्मृतिप्रसवशक्ताविति सांप्रतम् । न हि कल्प्यमाना शक्तिः शक्त्यन्तरयुक्ता कल्प्यते तन्मात्रादेव फलसम्भवे शक्त्यन्तरकल्पनायामनवस्थापातात् स्मृतिप्रसवशक्तावपि च साम्यात् । यथा वा ऽदृष्टान्तरं मा नाम * कल्पनीयमिति तदेव† गौरवमापन्नम् ।

स्मृतिसमारोहिणो वर्णा वाचकास्तत्र गौरवमिति चेन्न । क्रमाक्रमविपरीतक्रमाणां तत्राविशेषेणार्थधीसमुत्पादनप्रसङ्गात् । यथापि स्यादयमास्तां वर्णानुभवैराहिताः संस्काराः संभूय निखिलवर्णविषयमेकमेव स्मरणं प्रसुवते तदुपारोहिणो वर्णा अव्यवधाना इत्यभिधेयधियमादधति । न चैकैकवर्णोपलब्धिप्रतिलब्धजन्मानः संस्काराः प्रतिवर्णगोचरास्तावतीरेव क्रमवतीः स्मृतीर्भावयितुमीशते तत्र तत्र निरपेक्षकारणभावोपलम्भात् ‡ न पुनरखिलवर्णगोचरं स्मरणमेकमिति रमणीयं तत्र तत्रानपेक्षाणां कारणत्वेपि मिलितानामप्यनेकगोचरैकविज्ञानजननदर्शनात् । तथा हि । यथा संस्कारश्चक्षुराद्यनपेक्षः स्मरणकारणं चक्षुरादयस्तन्निरपेक्षा आलोचनकारणम् । प्रत्यभिज्ञाने तु संस्कारसापेक्षाश्चक्षुरादयः । एवं तत्र तत्रोहनीयमिति न काचिददृष्टकल्पनेति तत्रास्ति§ । क्रमाभिव्यक्तेभ्यइव यौगपद्यविपरीतक्रमाभिव्यक्तेभ्यो ऽपि अभिधेयप्रत्ययप्रसङ्गात् । न खल्वेकोपलब्धिवर्तिनामस्ति कश्चिद्विशेषो वर्णानां न हि वास्तवः क्रमो नित्यानां विभूनां च तेषाम् । उपलब्धिनिमित्तस्त्वाश्रीयते सा चेदेका कुतस्तर्हि क्रम एतेषाम् । न च प्राचीनप्रत्येकवर्णानुभवनिचयमनुवर्तनीयं परापरताप्रतिभासत इति|| सांप्रतम् । वर्णस्वरूपमात्रगोचरतया स्मृति-

* तथा चादृष्टान्तरं नानेति ३ पु॰ पा॰ ।

† शक्तिरूपे संस्कारे शक्त्यन्तरकल्पनारूपम् ।

‡ निरपेक्षाणां कारणत्वेऽपि भावोपलम्भादिति २ पु॰ पा॰ । संस्कारान्तरनैरपेक्ष्येण प्रत्येकं संस्काराणां कारणत्वेन स्मृतिरूपफलदर्शनादित्यर्थः ।

§ तत्रास्तीति २ पु॰ पा॰ । तथा च सकलवर्णविषयकमेकं स्मरणं संभवतीति भावः । एतावत्पर्यन्तमाक्षेप. उत्तरस्तु परिहारः ।

|| पदज्ञाने वर्णपौर्वापर्यप्रतिभासादनुभवगतक्रमविषयकत्वं स्मृतावङ्गीकार्यमिति भावः ।

Digitized by Google

रियं न तत्तदनुभवानपि गोचरयितुमर्हति तत्परापरतां तु प्रागेवेति युगपद्विपरीतक्रमाभिव्यक्तानां क्रमाभिव्यक्तेभ्यो विशेषाभावादेकोपलब्धौ सर्वथामर्थप्रत्यायनप्रसङ्गः । तस्मात्स्वसिद्धान्ताभ्यासव्यामोहमपहायाभ्युपेयता * मनुसंहारबुद्धिरेकपदवाक्यगोचरा । न चास्या गोचरत्वेव प्रत्येकध्वनि† व्यञ्जनीयस्तदर्थोपि प्रतिवर्णव्यञ्जनीय इति सांप्रतम् । प्रथमादेव वर्णादभिधेयधीसमुत्पादादानर्थक्यं द्वितीयादीनामित्युक्तम् । न चैतत्पदेपि तुल्यं तस्यैव हि ‡ प्रत्यक्षस्य प्रतिध्वनिव्यञ्जनीयस्याभिव्यक्तितारतम्यं नानाध्वनिव्यायत्तदिति नानर्थक्यमुत्तरेषाम् । न चेयमप्रत्यक्षे ऽभिधेये विधा संभवति प्रत्यक्षगोचरो ह्यभिव्यक्तितारतम्यभाग्§ न मानान्तरगोचरः ‖ । स खलु गृह्यते वा न वा न पुनर्व्यक्तो ऽव्यक्तश्चेति ।

तदिदमसमञ्जसम् । तथा हि चक्षुषी निमील्य डिण्डिकमतरागं परित्यज्य निरूपयत्वत्रभवान्पूर्वबुद्धीरेकैकवर्णगोचरा उत्तरां च विशदपदवाक्यावगाहिनीं किमेता गादिबुद्धयो गकारादिमात्रनिर्भासा आहो स्विद् गकाराद्याकारं किंचिदेकमासु संप्लवते मुखमिव मणिकृपाण¶दर्पणादिषु भिन्नवर्णपरिमाणसंस्थानमेकमितरथा तत्र मुखमिति बुद्धिव्यपदेशावभिन्नवस्तुग्राहिणौ न स्याताम् । न संप्लवते चेद्गादय एव परस्परानात्मानः प्रकाशन्ते न पुनस्तदाकारं पदतत्त्वमेकं न जातु गजगवयहयरासभरवः परस्परव्यतिभिद्यमानमूर्तयो ऽवभासमाना रासभादिविवर्ता भवन्ति । संप्लवते चेद् अस्ति हि गकारादिषु भिन्नेषु अभिन्नवस्तुनिर्भासा शब्दःशब्द इति प्रख्या लौकिकपरीक्षकाणां तत्किं शब्दत्वमेव वाचकमभिधेयभेदानां तथा च तस्य सर्वत्राविशेषात्सर्वेर्थाः सर्वशब्देभ्यः प्रतीयेरन् । न खलु

---

* अभ्युपेयतामिति ३ पु॰ पा॰ ।

† ध्वनिशब्दो नास्ति ३ पु॰ पा॰ ।

‡ तस्य हीति ३ पु॰ पा॰ ।

§ भाग् मानान्तरगोचरः न खल्विति ३ पु॰ पा॰ ।

‖ प्रत्यक्षगोचरो ह्यभिव्यक्तितारतम्यभाग् न मानान्तरगोचरः स खल्विति ३ पु॰ पाठः क्लिष्टः । २ पु॰ भाग् मानान्तरगोचरः । न खल्विति पाठः ।

¶ मानकृपाणेति ३ पु॰ पा॰ ।

संस्कृतपुस्तकानां सूचीपत्रम् ।

		मूल्यम् रु०	आ०
१	काशिका पंडितवरवामनादित्यविरचिता पूर्वार्धम्		॥
	उत्तरार्धम्	१०	॥
२	बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२	॥
३	प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१	।)
४	लघुकौमुदी वरदराजकृता	१	=)
५	लघुकौमुदी श्रीयुतडाक्तरबालण्टैनाचार्य्येणाङ्गलण्डीयभाषायां कृता	८	॥
६	श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७	वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणाङ्गलण्डीयभाषायां कृतम्	४	॥
८	मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४	॥
९	शाश्वतधर्मदीपिका	१	॥
१०	अमरकोश सटीक	४	॥
११	योगवार्त्तिकम्	३	।)
१२	वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)	॥
१३	गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिनगा-देशाधिपति रचिता	४)	॥
१४	शीतपदार्थनिर्वचनम्	३	॥।)
१५	वाक्यार्थचन्द्रिकापरिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि संशोधिता	४)	॥
१६	श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराम-मिश्रशास्त्रिप्रणीत क्वाचित्क विषमपदटिप्पणीसमेतः	६)	॥।)
१७	खण्डनखण्डखाद्यं सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्त-टिप्पणीसहितम्	७)	॥)
१८	काव्यप्रदीपः काव्यप्रकाशस्य प्रतिच्छायाव्याख्या वाराणसेयसमाद्-प्रतिष्ठापितसंस्कृतपाठशालीयदर्शनशास्त्राध्यापकरामशास्त्रि-भागवताचार्येण परिशोधितः	३)	॥)
१९	वेदान्तसिद्धान्तमुक्तावली श्रीयुत आर्थर्विनिस महाशये-क्लैण्डीयभाषायां कृतम्	२)	॥)

Digitized by Google

CONTENTS.

Page.

GAṆAKATARAṄGIṆĪ, OR LIVES OF HINDU ASTRONOMERS, by Mahāmahopādhyāya Sudhākara Dvivedī, Professor, Sanskrit College, Benares. ... 1

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed: Dāmodara Sāstrī, Professor, Sanskrit College, Benares. ... 17

ŚRĪBHĀSHYA WITH ŚRUTAPRAKĀŚIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. ... 33

TATTVABINDŪ, of Vāchaspati Miśra, Ed: Mahāmahopādhyāya Gaṅgādhara Śāstrī, Professor, Sanskrit College, Benares. ... 49

Digitized by Google

MAR 22 1892
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 2.] FEBRUARY, 1892. [Vol. XIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1892.

Price, Rs. 9-0 per annum.] [All rights reserved.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

सारावल्यां द्विचत्वारिंशदध्यायाः सन्ति तत्र बृहज्जातकवत्सर्वे योगा विस्तरतो वर्णिताः । १८ अध्यायसमाप्तौ “फलमेवं मन्दिलः प्राह” इत्यनेन मन्दिलस्य, २९ अध्यायारम्भे “श्रीदेवकीर्त्तिराजः पञ्चमहापुरुष-संज्ञितान् नृपतीनाम्” इत्यनेन देवकीर्त्तिराजस्य, ४२ अध्यायारम्भे “कनकाचार्यस्य मताद्वियोनिसंज्ञं प्रवक्ष्यामि” इत्यनेन च कनकाचार्यस्य च नामानि वराहोक्तादपूर्वाणि लिखितानि सन्ति ।

होराध्यार्त्तानां शिष्याणां तापपापविनोदनाय शैलरूपादात्मनः शरीरात्सारावलीरूपा नदी कल्याणवर्म्मणोत्पादितेति रूपकं प्रथमाध्यायसमाप्तौ “होरात्युध्यार्त्तानां शिष्याणां स्फुटतरार्थशिशिरजला । कल्याणवर्म्मशैलादवीह सारावली प्रसृता” इत्यनेन कृतं ग्रन्थकृता ।

आयासेन प्राचीनज्योतिर्विदां गृहेषूपलभ्यत इयं मन्निकटेऽपि काश्मीरलिपिलिखिता चास्त्येका प्रतिरशुद्धा । सार्द्धसहस्रद्वयासन्ना श्लोकसंख्याऽत्र ।

मुजफ्फरपुरमण्डलान्तर्गतचिकनोटानामग्रामनिवासिनो वैयाकरणस्य झोपाख्यश्रीलालजीशर्म्मणो मैथिलब्राह्मणस्य गेहेऽपि प्राचीना शुद्धा चैका सारावली वर्त्तते यस्या अन्ते ।

> वाणाक्षिबाणशशि १५२५ संमितशाककाले
> तच्चैत्रकृष्णवनमालितिथौ सुरेज्ये ।
> राज्ञां स्थितेन कृतिना प्रतिहस्तकेन
> सारावली विलिखिता मधुसूदनेन ॥

मन्मतेऽयमेव कल्याणवर्म्मा नृपतिर्बघेलवंशीयानां रीवांनगराधिपतीनां मूलपुरुषः सारावल्यादिश्लोकेन “देवग्रामपयःप्रपोषणबला”दित्यादिना रीवांराजधानीतोऽग्निविदिशि योजनचतुष्टयान्तरे वर्त्तमानस्य संप्रति देवरानाम्ना प्रसिद्धस्य ग्रामस्य निवासी ।

हण्टरसाहिब (W. W. Hunter) लेखानुसारेण व्याघ्रदेवस्य पुत्रः करनदेवः (Kurun Deo) पञ्चेन्दुरस६१५मिते ख्रीष्टशके रीवांनगरे सिंहासनमध्यरोहत् (See W. W. Hunter's Imperial Gazetteer of India about Rewah) मन्मते व्याघ्रदेवस्य बैगदेवः (Biag Deo) कल्याणदेवस्य च करनदेवः (Kurun Deo) अपभ्रंशः ॥

Digitized by Google

ब्रह्मगुप्तः । ५२०

नखपञ्चशके समुद्भवो जिष्णुगुप्तसुतश्चापवंशावतंसस्य श्रीव्याघ्रमुखाख्यस्य नरेन्द्रस्य राज्यकाले खवाणबाणा ५५० शके विष्णुधर्म्मोत्तरपुराणान्तर्गतब्रह्मसिद्धान्तानुसारेण त्रिंशद्वर्षसमवयसि ब्राह्मं स्फुटसिद्धान्तं सप्ताष्टपञ्चमित ५८७ शके खण्डखाद्यनामकं करणं च समकरोत्। बहूनां मतेऽयं विष्णुगुप्तस्य पौत्रो गुप्तपदान्ताद्वैश्यकुलोद्भूतो रीवांनगराधिपतेर्व्याघ्रभटेश्वरस्य सेवकः।

अयं यद्यपि स्वसिद्धान्तेऽयनांशस्पष्टक्रान्त्यादीनां चर्चां न चकार तथापि सिद्धान्तीयविशेषान् आर्यभट·वराहमिहिर·श्रीसेन·विष्णुचन्द्रादिखण्डनपरान् परःशतान् वस्तुतो गोले गणिते चोपयुक्तानुत्पादितवान्। भास्कराचार्य्येणाप्यस्यैव गणकचक्रचूडामणेरागमः स्वीकृतः। ब्रह्माह्वयश्रीधरपद्मनाभवीजानीत्यादिभास्करीयवीजान्तिमलेखेन ब्रह्मगुप्तकृतं वीजं चास्ति यस्य तत्सिद्धान्ताष्टादशाध्यायरूपस्याङ्गलभाषायां कोलब्रूकसाहिबाभिधेन सप्तेन्दुवसुभूमिमिते १८१७ खीष्टशकेऽनुवादः कृतः। अत्र ब्राह्मस्फुटसिद्धान्तस्य द्वादशाध्यायरूपस्य ब्रह्मगुप्तव्यक्तगणितस्य भास्करीयलीलावतीवीजयोश्चानुवादोऽङ्गलभाषायां वर्त्तते।

ब्रह्मगुप्तसिद्धान्ते वासनाभाष्याख्या चतुर्वेदाचार्येण पृथूदकस्वामिना कृता टीकाऽस्ति यत्र ज्याशब्देनोत्क्रमज्यां गृहीत्वा वलनदृक्कर्म्मादिव्याख्या कृता टीकाकृता। अयं सिद्धान्तस्सटीका च बहुनाऽऽयासेन कुत्र चिल्लभ्यते। सिद्धान्तस्यैका प्रतिरशुद्धा लेखकलिखिता काशिकराजकीयपुस्तकालयेऽस्ति यत्र समाप्तौ।

श्रीचापवंशतिलके श्रीव्याघ्रमुखे नृपे शकनृपालात्।
पञ्चाशत्संयुक्तैर्वर्षशतैः पञ्चभिरतीतैः॥
ब्राह्मः स्फुटसिद्धान्तः सज्जनगणितज्ञगोलवित्प्रीत्यै।
त्रिंशद्वर्षेण कृतो जिष्णुसुतब्रह्मगुप्तेन॥ इति लेखः॥

अस्यैव सिद्धान्तस्य प्रतिविम्बरूपो भास्करकृतः सिद्धान्तशिरोमणिः।

ब्राह्मस्फुटसिद्धान्तस्यादौ

ब्रह्मोक्तं ग्रहगणितं महता कालेन यत्खिलीभूतम्।
अभिधीयते स्फुटं तज्जिष्णुसुतब्रह्मगुप्तेन॥

Digitized by Google

संसाध्य स्पष्टतरं बीजं नलिकादियन्त्रेण ।
तत्संस्कृतग्रहेभ्यः कर्त्तव्यौ निर्णयादेशौ ॥

इति लेखेन ब्रह्मगुप्तः स्वयं च वेधकर्त्तेति ज्ञायते ॥

एतत्कृतं खण्डखाद्याख्यं करणं च सटीकं मन्निकटे वर्त्तते (भट्टोत्पलवर्णनं विलोक्यम्) यत्रादौ ब्रह्मगुप्तेन मदीयं करणमार्यभटानुसारीति विलिख्य बहुत्रान्यथा प्रतिपादितम् ।

स्वसिद्धान्तस्य दूषणाध्याये

"युगमन्वन्तरकल्पाः कालपरिच्छेदकाः स्मृतावुक्ताः ।
यस्मान्न रोमके ते स्मृतिबाह्यो रोमकस्तस्मात्" ॥

इत्यनेन रोमकखण्डनं कृतम् ।

ब्रह्मगुप्तस्य गणिते सिद्धान्तकरणाकारं कृतिद्वयमपहायान्याः कृतयो नोपलभ्यन्ते न तन्नामानि च श्रूयन्ते तेनान्या कृतिः कापि नेति विज्ञायते ।

यथा ब्रह्मगुप्तेनाऽऽर्यभटादीनां खण्डनं कृतं तथैव वटेश्वरेण स्वसिद्धान्ते बहुत्र ब्रह्मगुप्तखण्डनं कृतमस्ति । अस्यैव "कजन्मनोऽष्टौ सदलाः समा ययुरि"त्यादिना वर्त्तमानस्य ब्रह्मण आयुः सार्द्धवर्षाष्टकं गतमिति मतम् । अस्य सिद्धान्तग्रन्थो मया संपूर्णो न दृष्टः । ग्वालियरमहाराजाश्रितस्य श्रीबालज्योतिर्विदो गेहेऽयमस्तीति श्रुत्वा तत्रास्मत्पत्रं प्रेषितं परन्त्वद्यावधि किमप्युत्तरं न प्राप्तम् ।

मुञ्जालः । (५८४)

एतन्निर्मितं लघुमानसाख्यं षष्ट्यनुष्टुप्श्लोकात्मकं करणमस्मद्दृष्टिगोचरं जातम् । अत्र वेदाष्टशरमिते ५८४ शके ग्रहाणां ध्रुवका लिखितास्तत इष्टदिनपर्यन्तं द्युगणसाधनं द्युगणाद्दिनगणोद्भवखेटसाधनं तत्र ध्रुवकसंस्कारेणेष्टदिने ग्रहाश्च संसाधिताः सन्ति । अत्र मूलश्लोकेषु मुञ्जालस्य न कुत्रापि नाम किन्तु समाप्तौ "इति मुञ्जालभट्टविरचिते लघुमानसाख्ये करणे शृङ्गोन्नत्यधिकारः" इति लेखानुसारेणेदं लघुमानसाख्यं करणं मुञ्जालनिर्मितमिति ज्ञायते ।

इदं लघुमानसाख्यं काशिकराजकीयपुस्तकालयेऽपि वर्त्तते तत्रान्त्यन्तिमो लेखः पूर्वोक्तसम एव । कोलब्रूकसाहिबलिखितोज्जयिनीस्थसि-

Digitized by Google

द्धान्तविदां समयावल्यामपि मुञ्जालस्य वेदाष्टबाणमित ५८४ एव शकः । अयं ५८४ शकश्च भास्कराचार्यप्रणीतसिद्धान्तशिरोमणिशककालतोऽल्पो मुञ्जालसमयसूचकः प्रायस्तथ्यो विभाति । भास्करतोऽपि मुञ्जालस्य प्राचीनत्वात् । "अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवाऽयम् । तत्पक्षे तद्भगणाः कल्पे गोऽङ्गर्तुनन्दगोचन्द्राः १९९६६९" । इति भास्करोक्तसिद्धान्तशिरोमणिगोलाध्यायगोलबन्धाधिकारेऽयनांशप्रतिपादने मुञ्जालमतोपादानाच्च । अथ मरीचौ * मुनीश्वरकृतसिद्धान्तशिरोमणिटीकायामत्र मुञ्जालस्यायनविषये यान्यार्याछन्दसा वचनानि लिखितानि तानि चास्मिन् लघुमानसे न कुत्रापि सन्ति । लघुपदोपादानात् लघुमानसस्यारम्भे "प्रकाशादित्यवत् ख्यातो भारद्वाजो द्विजोत्तमः । लघुपूर्वं स्फुटोपायं वक्ष्येऽन्यल्लघुमानसम्" इत्यत्र "अन्य"त्पदोपादानाच्चास्य मुञ्जालस्यान्यापि कृतिर्याधुना मद्दृष्टिगोचरानागताऽवश्यमेव वर्त्तत इत्यनुमीयते तत्र कदाचिन्मुनीश्वरलिखितवचनान्युपलभ्यानि स्युः ।

प्रथमश्लोकलेखतोऽयं भरद्वाजकुलोद्भूत इत्यवगम्यते । तृतीयश्लोकेन "शकः कृतेष्विभैरून" इत्यादिना द्वादशश्लोकेन "कृतेष्विभमिते शाके ८५४ मध्याह्ने रविवासरे चैत्रादौ ध्रुवकान् वक्ष्ये रविचन्द्रेन्दुतुङ्गजान्" इत्यनेन चास्य ग्रन्थकृतः समयः ५८४ शकः स्फुट एव ।

अत्र मध्यमाधिकारः । स्पष्टाधिकारः । तिथ्यधिकारः । त्रिप्रश्नाधिकारः । ग्रहयुत्यधिकारः । सूर्यग्रहणाधिकारः । चन्द्रग्रहणाधिकारः । शृङ्गोन्नत्यधिकारः । इति क्रमेणाऽष्टाधिकाराः सन्ति ।

स्पष्टाधिकारे प्रथमपदे कोटिर्धनं द्वितीये ऋणं तृतीये ऋणं चतुर्थे धनमिति विलक्षणं वर्णनं सम्प्रति प्रचलितयूरपदेशीयत्रिकोण-

---

* मरीचिस्थमुञ्जालश्लोकाश्च ।

उत्तरतो याम्यदिशं याम्यान्तात्तदनु सौम्यदिग्भागम् ।
परिसरतां गगनसदां चलनं किञ्चिद्भवेदपमे ॥
विषुवदपक्रममण्डलसंपाते प्राचि मेषादिः ।
पश्चात्तुलादिरनयोरपक्रमाऽसंभवः प्रोक्तः ॥
राशित्रयान्तरेऽस्मात्कर्कादिरनुक्रमान्मृगादिश्च ।
तत्र च परमा क्रान्तिर्जिनभागमिताथ तत्रैव ॥
निर्दिष्टोऽयनसंधिश्चलनं तत्रैव संभवति ।
तद्भगणाः कल्पे स्युर्गोरसरसगोऽङ्कचन्द्रमिताः ॥

मितिस्थधनर्णवदस्ति । तथा चन्द्रोच्चरव्यन्तरेण* रविचन्द्रान्तरेण च स्पष्टचन्द्रे तदीयगतौ चान्यः संस्कारश्च पूर्वाचार्यप्रणीतसंस्कारतो विलक्षणः प्रतिपादितः । वेदगुणाब्धि ४३४ शके ऽयनांशाभावः । अष्टांशाः ८ अष्टकलाः ८ जिज्या चात्र ।

अस्यान्ते ।

"मानसाख्यं ग्रहज्ञानं श्लोकषष्ट्या मया कृतम् ।
भवन्त्यत्रायशोभाजः प्रतिकञ्चुककारिणः" ॥ इति ।

काशिकराजकीयपुस्तकालये सदाहरणसहितं लघुमानसं खण्डितमशुद्धं चैकं वर्त्तते तत्र सर्वे श्लोका लघुमानसस्था एव । परन्तु ग्रहाणां ध्रुवकाश्च चतुर्दशशतसमे १४०० शके मकरन्दकालिके लिखितास्तथोदाहरणं च वेदनववेदधराशकीयं १४९४ सर्वं वर्णितमस्ति ।

केनेदमुदाहरणं ध्रुवकपरिवर्त्तनं च कृतमित्यत्र न लिखितम् । त्रिप्रश्नाध्याये स्वदेशोदयसाधनपर्यन्तमेवात्र खण्डितो ग्रन्थः । कदाचिदस्य समाप्तौ ग्रन्थकृद्ग्रामादिवर्णनं स्यात् । चरादिकं च काम्पिल्यनगरस्य लिखितमत्र ।

आर्यभटीयतन्त्रटीकाकृतः परमेश्वरस्य कदाचिदिदमुदाहरणं स्यादित्यनुमीयते तत्र "व्याख्यातं लघु चान्यच्च मानसमि"त्युल्लेखात् ।

उत्पलः । ८८८

यद्यप्ययं बृहत्संहितादिटीकारम्भे मङ्गलाचरणे "द्विजवरष्टीकां करोत्युत्पल"इति स्वनामोत्पल इत्येव लिखति तथाप्येतद्रचितप्रश्नज्ञानाम्नि प्रश्नग्रन्थे पूर्णं नाम भट्टोत्पल इति लिखितमस्ति तेनैव सर्वे गाणितिका अमुं भट्टोत्पलमेवादराद्वदन्ति । पञ्चसिद्धान्तिकां विहाय वराहमिहरकृतसर्वग्रन्थेष्वेतत्कृताष्टीका उपलभ्यन्ते । वराहमिहरपुत्रपृथुयशःकृतषट्पञ्चाशिकायां शुभाशुभप्रश्नकथनरूपायां ब्रह्मगुप्तकृतखण्डखाद्यकरणग्रन्थे चास्ति टीका भट्टोत्पलकृता ।

---

* अयं संस्कारश्च "इवेक्शन् वेरियेशन् नामकसंस्कारवत् प्रतिभाति ।
तत्र श्लोकौ च ।
इन्दूच्चोनार्ककोटिघ्ना गत्यंशा विभवा विधोः ।
गुणो व्यर्केन्दुदोःकोट्यो रूप१पञ्चा५प्तयोः क्रमात् ॥
फले शशाङ्कतद्गत्योर्लिप्ताद्ये स्वर्णयोर्वधे ।
ऋणं चन्द्रे धनं भुक्तौ स्वर्णसाम्यवधेऽन्यथा ॥
अत्र व्याख्याकारः "अयं संस्कारस्तिथिभयोगसाधने न क्रियते पूर्वैरुपेक्षितत्वात्" ॥

Digitized by Google

षट्पञ्चाशिकाषट्पञ्चाशच्छ्लोकटीकायां "तथा चास्मदीये प्रश्नज्ञाने" इत्यस्य लेखं दृष्ट्वा प्रश्नज्ञानान्वेषणतत्परोऽहं वाराणस्यां श्रीसेवारामसूनुसिद्धेश्वरज्योतिर्विदो गेहे दृष्टवानेतत्प्रश्नज्ञानम् ।

तत्रादौ ।

रविशशिकुजबुधगुरुसितरविजगणेशान् प्रणम्य भक्त्यादौ ।
वक्ष्येऽहं स्पष्टतरं प्रश्नज्ञानं हिताय दैवविदाम् ॥

अन्ते च ।

भट्टोत्पलेन शिष्यानुकम्पयावलोक्य सर्वशास्त्राणि ।
आर्यासप्तत्यैवं प्रश्नज्ञानं समासतो रचितम् ॥

अस्य समय एतत्कृतबृहज्जातकटीकान्तिमश्लोकेन "फाल्गुनस्य द्वितीयायामसितायां गुरोर्दिने । वस्वष्टाष्टमिते शाके कृतेयं विवृतिर्मये"त्यनेन वस्वष्टाष्टमितः ८८८ शाक इति ज्ञायते ।

एनेन बृहत्संहिताटीकायां बहूनां प्राचीनानां भट्टबलभद्रादीनां वचनानि लिखितानि तथापि टीकावलोकनेन गणितेऽस्य पाटवं प्रौढं न । भट्टोत्पलेन बृहत्संहिताटीकायां यानि सूर्यसिद्धान्तवचनानि लिखितानि तानि सम्प्रत्युपलभ्यसूर्यसिद्धान्ते नोपलभ्यन्ते । भट्टोत्पलो वराहमिहिरकुलोद्भूत एवेति केचिद्वदन्ति तच्च तथ्यं द्वयोर्नामसम्प्रदायभेदत्वात् ।

ब्रह्मगुप्तकरणग्रन्थखण्डखाद्यटीका भट्टोत्पलकृता श्रीहरिनाथद्विवेदितो मयाऽतिप्राचीना प्रायः शुद्धा लब्धा यत्प्रत्यन्तरं श्रीथिबोसाहबमहाशयनिकटे मच्छिष्यश्रीशशिपालशर्म्मणा लिखितं वर्त्तते । बृहज्जातकटीकायां सारावलीवचनानि बहूनि लिखितानि भट्टोत्पलेन । तेनैवायं सारावलीपूरक इति लोकैः कथ्यते (कल्याणवर्म्मणो वर्णनं विलोक्यम्) ॥

भट्टश्रीधरः श्रीधरो वा श्रीधराचार्यः । ९१३

अस्य पाटीगणिते त्रिशतिका कृतिर्जातके केशवपद्धतिवत्पद्धतिश्चोपलभ्यते बहुनाऽऽयासेन । त्रिशतिकाऽऽर्याशतत्रयात्मिका प्राचीना प्रायः शुद्धा च काशिकराजकीयपुस्तकालये तथा काश्यां मन्नित्रराजाजीज्योतिर्विद्गृहे चास्ति ।

यस्यादौ "नत्वा शिवं स्वविरचितपाट्या गणितस्य सारमुद्धृत्य । लोकव्यवहाराय प्रवक्ष्यति श्रीधराचार्य्यः" ॥ इति लेखेनैतत्कृता बृहती काचित् पाट्यस्ति यस्याः साररूपेयं त्रिशतिकेति ज्ञायते । भा-

स्वकीयबीजान्तिमलेखेन "ब्रह्माह्वयश्रीधरपद्मनाभबीजानि यस्मादति-विस्तृतानी"त्यनेन श्रीधरकृतं विपुलं बीजं चावगम्यते परन्तु पाटीबीजगणिते एतत्कृते न कुत्राप्युपलब्धे अद्यावधि ।

त्रिशतिकायां परिभाषाप्रकरणे "षोडशपणः पुराणः" इति भास्करकृतद्रम्मसंज्ञपर्यायः पुराणश्च लभ्यते । तथाऽऽदौ संख्यास्थानानि "एकदशशतमित्यादिना निरूप्य ततः सङ्कलनव्यवकलनविधिं हित्वा एकद्वित्र्यब्धिपञ्चाद्यङ्कानां योगार्थं सङ्कलितविधिः सङ्कलिताद्गच्छानयनविधिश्च वर्णितो ग्रन्थकृता । ततो गुणनभागहारवर्गवर्गमूलघनघनमूलादिविधयः क्रमानुसारेणैव सन्ति । अत्र गुणनस्य संज्ञा प्रत्युत्पन्न इति विलक्षणः स च सम्प्रति भास्करपाटीगणिते नोपलभ्यते । भास्करेण लीलावत्यां "गुण्यान्त्यमङ्कं गुणकेन हन्यादुत्सारितेनैवमुपान्तिमादी"नित्यादिना यो गुणनविधिः प्रदर्शितस्तस्य काचित्संज्ञा नोक्ता श्रीधरेण च "उत्सार्योत्सार्य ततः कपाटसन्धिर्भवेदिदं करणम् ।
तस्मिंस्तिष्ठति यस्मात्प्रत्युत्पन्नस्ततस्तस्य" ॥

इत्यादिना तस्य "कपाटसन्धि"रिति संज्ञाकृता ॥ एवं त्रिशतिकायां बहुत्र विलक्षणानि संज्ञानि सन्ति ।

अत्र, अभिन्नगुणन–भागहार–वर्ग–वर्गमूल–घन–घनमूल–भिन्नसमच्छेद–भागजाति–प्रभागजाति–भागानुबन्ध–भा*गमातृजातिव†ल्लीसवर्णन–स्तम्भो‡द्देशकरणसूत्र–त्रैराशिक–पञ्चराशिक–सप्तराशिक–नवराशिक–भाण्डप्रतिभाण्ड–मिश्रकव्यवहार–भा§व्यकव्यवहारसूत्र–ए||कपत्रीकरणसूत्र–सुवर्णगणित–प्रक्षेपकप्रकरण–¶समक्रयविक्रयसूत्र–श्रेढीव्यवहार–क्षेत्रव्यवहार–खातव्यवहार–चितिव्यवहार–का**ष्ठव्यवहार–राशिव्यवहार–छायाव्यवहाराः सन्ति ।

---

* स्वांशानुबन्धस्वांशापवाहयोर्भागमातृजातिसंज्ञा ।

† एकजातिकरणम् ।

‡ दृष्टकर्म्म ।

§ यथा लीलावत्यां प्रमाणकालेन हतं प्रमाणं विमिश्रकालेन हतं फलं च स्वयोगभक्ते चेत्यादिसूत्रम् ।

|| यथा लीलावत्यां अथ प्रमाणैर्गुणिताः स्वकाला इत्यादिसूत्रम् ।

¶ यथा लीलावत्यां पण्यैः स्वमूल्यानि भजेदित्यादिसूत्रम् ।

** यथा लीलावत्यां क्रकचव्यवहारः ।

Digitized by Google

क्षेत्रव्यवहारे चाद्ये जात्यत्रिभुजे भुजकोटिवर्गयोगः कर्णवर्गो भवतीत्यस्य सिद्धान्तस्य न चर्चा समानान्तरचतुर्भुजे यस्य ऋजुवदनचतुर्भुजमिति संज्ञा कृता लम्बाबाधानयने च स सिद्धान्तः कथितः। व्यासवर्गाद्दशगुणात्पदं परिधिः। ततो वृत्तक्षेत्रफलं परिधिव्यासघातचतुर्थांशसममेवानीतम्। वृत्तपृष्ठघनफलचर्चा न कुत्रापि। वृत्तचापक्षेत्रस्य फलं च "जीवाशरैक्यदलहृतशरस्य वर्गं दशाहतं नवभिः। विभजेदवाप्तमूलं प्रजायते कार्मुकस्य फलम्" इत्यनेन साधितम्। खातव्यवहारे च सूचीघनं साधितं वापीघनफलं च "मुखतलतद्योगानां वर्गैक्यकृतेः षडसंगुणायाः। वेधगुणं चतुरन्विर्ताविंशतिभक्तं फलं कूपे" इत्यनेन विलक्षणं साधितम्। छायाव्यवहारे द्वादशाङ्गुलशङ्कोश्छायात इष्टकालसाधनमात्रं प्रदर्शितम्। भास्करेणाऽस्यानेके प्रकारास्तस्करवदपहृताः।

अहो अस्य सुप्रसिद्धस्य भास्करादितोऽपि प्राचीनस्य विदुषोऽन्यकृतिदर्शनमन्तरा समये महान् संशयः।

प्राचीना एकशास्त्रमात्रैकवेदिनो नाऽऽसन् ते च बहुश्रुता बहुविषयवेत्तार आसंश्च न संशयः। (रामदेवज्ञवर्णनं विलोक्यम्) अतो यदि *न्यायकन्दलीकर्त्ता श्रीधरश्चायमेव। तदाऽस्य माता-अब्वोका नाम्नी पिता बलदेवशर्म्मा मूलस्थानं च वङ्गदेशान्तर्गते गङ्गायाः पश्चिमे तटे राढदेशे भूरिश्रेष्ठिक इति प्रसिद्धे भूरिसृष्टिग्रामे। भट्टाचार्यत्वाद्वङ्गदेशीयो, न दाक्षिणात्यः। श्रीधरेण पाण्डुदासप्रार्थनया न्यायकन्दली त्रीन्दुनवमिते ९१३ शके रचिताऽतः स एव शकोऽस्य समयो भास्करतोऽपि प्राचीनत्वोतको नाऽसम्भवः। न्यायकन्दलीसमाप्तौ "त्र्यधिकदशोत्तरनवशतशकाब्दे ९१३ न्यायकन्दली रचिता। श्रीपाण्डुदासयाचितभट्टश्रीश्रीधरेणेयम्" इति लेखस्य शुष्कनैयायिकानामसम्भवात् प्रायो ज्योतिषशास्त्रवेत्ता स एवायं श्रीधर इति मत्कल्पनं नाहो असम्भवम्।

न्यायकन्दलीसमाप्तौ।

आसीद् दक्षिणराढायां द्विजानां भूरिकर्म्मणाम्।
भूरिसृष्टिरितिग्रामो भूरिसृष्टिजनाश्रयः॥

---

* बनारससंस्कृतसीरिज़नाम्नि मुद्रितस्य प्रशस्तपादभाष्यवैशेषिकदर्शनस्य विज्ञापनं श्रीविन्ध्येश्वरीप्रसादद्विवेदिकृतं विलोक्यम्।

Digitized by Google

अम्भोराशेरिवैतस्मादुद्भूव क्षितिचन्द्रमाः ।
जगदानन्दनादुन्द्रो वृहस्पतिरिव द्विजः ॥
तस्माद्विशुद्धगुणरत्नमहासमुद्रो
विद्यालतासमवलम्बनभूरुहोऽभूत् ।
स्वच्छाशयो विविधकीर्त्तिनदीप्रवाह-
स्वान्त-सम्पद्भुलो ? बलदेवनामा ॥
तस्याऽभूद्भूरियशसो विशुद्धकुलसम्भवा ।
अव्वोकेत्यर्चितगुणा गुणिनी गृहमेधिनी ॥
सच्छायः स्थूलफलदो बहुशाखो द्विजाश्रयः ।
तस्याः श्रीधर इत्युच्चैर्रार्थकल्पद्रुमावभूत् ॥
असौ विद्याविदग्धानामसूत श्रवणोचिताम् ।
षट्पदार्थहितामेतां रुचिरां न्यायकन्दलीम् ॥
त्र्यधिकदशोत्तरनवशतशाकाब्दे ९१३ न्यायकन्दली रचिता ।
श्रीपाण्डुदासयाचितभट्टश्रीश्रीधरेणेयम् ॥

पद्मनाभमिश्रः ।

यमुनापुरनिवासी गङ्गादासपौत्रः कृष्णदेवतनयः संहितामुहूर्त्तरूपं व्यवहारप्रदीपं व्यधात् । इदं दुर्लभं पुस्तकं मया बहुनाऽऽयासेन काश्यां ज्योतिर्विच्छ्रीश्यामाचरणगेहे आसाद्य काशिकराजकीयपुस्तकालये स्थापनार्थं पञ्चाष्टाष्टभूमिते १८८५ खीष्टशके तदीया प्रतिः खण्डितान्ता लेखकद्वारोत्पादिता ।

अत्रादौ ।

अशेषजगदज्ञानतिमिरौघरविप्रभा ।
तनोतु शारदा सिद्धिमुद्यमे विदुषां सदा ॥
यमुनापुराभिधानं नगरं भूलोकविश्रुतं जयति ।
क्ष्मातलमिवावतीर्णः स्वर्गः साक्षाद्विलोक्यते मनुजैः ॥
तत्राऽभवद्द्विजवरः परमप्रतिष्ठापात्रं यशोनिधिरशेषगुणानुरागी ।
विद्यातपोविनयकीर्त्त्यतुलः पृथिव्यां सन्तोषकृद्गुणवतां शिवदासनामा॥
शिवदासात्मजः श्रीमान् गङ्गादासो गुणावधिः ।
आसीद् द्विजवरः पृथ्वीपालमालार्चितः सदा ॥

Digitized by Google

गङ्गादासः सुमतिरमितख्यातिवेदादिविद्या-
नित्याचारव्रतनियमवान् श्रीनृसिंहाङ्घ्रिभक्तः ।
पुत्रः पृथ्व्यामखिलगुणिना माननीयैः स्वपुण्यै-
राप्तो येन प्रथितयशसा कृष्णदेवाभिधानः ॥
कृष्णदेव इति नामसमेतं प्राप यस्तनयमेव निधानम् ।
वेदशास्त्रसुकृतोपकृतीनां यः सदास्ति हृदये सुकृतीनाम् ॥
ज्ञात्वाखिलं ब्रह्म विहाय मिथ्या यः केवलं ब्रह्मनिविष्टबुद्धिः ।
ज्ञात्वा स्वकायं जपयज्ञपूतं तत्याज काश्यामतुलप्रभावः ॥
तच्चरणाम्बुजरेणोः प्रसादमासाद्य तत्सुतो गुणवान् ।
किल पद्मनाभनामा कुरुते व्यवहारदीपाख्यम् ॥
मतान्यालोक्य पूर्वेषां मुनीनां शास्त्रचेतसाम् ।
व्यवहारप्रदीपाख्यो ग्रन्थोऽस्माभिर्विरच्यते ॥

१७ श्लोकः ।

तुष्यन्तु सुजना बुद्धा विशेषान् मदुदीरितान् ।
अबोधेन हसन्तो मां स्वतस्तुष्यन्तु दुर्ज्जनाः ॥

(सिद्धान्तशिरोमणिगणिताध्यायमध्यमाधिकारस्य ५ श्लोकस्त-न्त्रान्ते "तोषमेष्यन्ति दुर्जनाः" इति पाठभेदः)

१९ श्लोकस्याग्रे

तथा शौनकसंहितायाम् ।

दिव्यं ज्ञानमतीन्द्रियं यदृषिभिर्ब्राह्मं वसिष्ठादिभिः
पारंपर्यवशाद्रहस्यमवनौ नीतं प्रकाश्यं पुनः ।
नैतद्देयविकृतप्रदुर्जनदुराचाराचिरावासिने
स्यादायुःसुकृतक्षयो मुनिकृतां सीमामिमामुज्झतः ॥

(भास्करीयगोलाध्यायछेद्यकाधिकारस्य ९ श्लोकोऽयम्) ततोऽग्रे

"तथा च बार्हस्पत्ये ।

स्कन्धत्रयात्मकं शास्त्रमाद्यं सिद्धान्तसंज्ञितम् ।
द्वितीयं जातकं स्कन्धं तृतीयं संहिताह्वयम् ॥
शतन्यूने सहस्राणां चतुष्के तु कलौ युगे ।
विन्ध्यादुत्तरदेशे स्यान्मूलागमपरिक्षयः ॥

Digitized by Google

यस्य यस्य गृहे सन्ति ग्रन्थाः स्वल्पाश्च कृत्रिमाः ।
त एव पण्डितंमन्याः सम्प्रदायविवर्जिताः ॥
उदितेनास्तगेनापि चन्द्रेणैव भविष्यति ।
ज्ञानं प्रतिपदादीनां तिथीनामपि दुर्लभम् ॥

तथैवात्रिः ।

विन्ध्यस्योत्तरभागे तु सम्प्राप्ते तु कलौ युगे ।
सिद्धान्तादिपरं ज्ञानं न कस्यापि भविष्यति ॥

तथा च व्याससंहितायाम् ।

सम्प्राप्ते तु कलेः काले विन्ध्याद्रेरुत्तरे स्थिताः ।
ब्राह्मणा यज्ञरहिता ज्योतिःशास्त्रपराङ्मुखाः" ॥

ततोऽग्रे "तथा चोक्तं वसिष्ठेन ।

छान्दःपादौ शब्दशास्त्रं च वक्त्रं
कल्पः पाणी ज्योतिषं चक्षुषी च ।
शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं
वेदस्याङ्गान्याहुरेतानि षट् च" ॥

ततोऽग्रे "तथा चोक्तं वासिष्ठे ।

यो वेद वेदनयनं सदनं हि सम्यग्
ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम् ।
यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी" ॥

(भास्करीयगोलाध्यायस्य ८ श्लोकोऽयं तत्र वेदनयनमित्यत्र वेदवदनमिति पाठं कृत्वा भास्करेण व्याकरणप्रशंसा कृता) ।

ततोऽग्रे "तथा च चन्द्रिकायां ।

यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिःशास्त्रं शिरःस्थितम्" ॥

(ज्योतिषवेदाङ्गस्यायं श्लोकस्तत्र गणितं मूर्द्धनि स्थितम् इति पाठः) ।

एवमत्र भीमपराक्रमस्य, श्रीपतिरत्नमालायाः, वराहमिहिरस्य, दीपिकायाः, लल्लसंहितायाः, सूर्यसिद्धान्तस्य, खण्डखाद्यस्य, सारावल्याः, रूपनारायणस्य, राजमार्त्तण्डस्य, सारसागरस्य, देवलस्य, रत्ना-

Digitized by Google

वल्याः, ज्योतिस्तन्त्रस्य, व्यवहारचण्डेश्वरस्य, वामनपुराणस्य, स्कन्दपुराणस्य, ब्रह्मसिद्धान्तस्य, मुक्तावल्याः, व्याघ्रपादस्य, काठकगृह्यस्य, भारद्वाजसंहितायाः, कश्यपसंहितायाः, मणित्थस्य, जैमिनेः, विष्णुधर्म्मोत्तरस्य, मरीचिऋषेः, वायुपुराणस्य च वचनान्युपलभ्यन्ते ।

अत्र वराहादीनां यानि वचनानि लिखितानि तानि च वराहादिकृतसंहितादिग्रन्थेषु चोपलभ्यन्ते ।

तथात्र यानि सूर्यसिद्धान्तवचनानि तानि सम्प्रति प्रसिद्धसूर्यसिद्धान्तस्य । वराहवचनानि बृहत्संहितास्थानि प्रायः परन्तु विष्कम्भादियोगशुभाशुभकथने पाठशालीयपुस्तकस्य २२ पत्रे "यस्त्वविरुद्धसंज्ञस्यापि हर्षणस्य लल्लेन निषेधः कृतस्तन्महाव्यतिपातशङ्कया तथा च विवाहपटले वराहः ।

व्यतिपातहते दिनत्रयं व्यतिपातेन समं च वैधृतिम् ।
तदपि स्फुटपातदर्शनाद् द्विगुणं तद्यदि वा सुनिश्चितम्" ॥

इति वचनं च बृहत्संहितास्थविवाहपलटनाम्न्यध्याये नास्ति तेन विवाहपटलाख्यैव वराहस्य विवाहकालादिनिर्णयात्मिकाऽन्याकृतिः प्राचीनकालतः प्रसिद्धात्र न संशयः ।

एवमधिमासादिनिर्णये पाठशालीयपुस्तकस्य ७२ पत्रे "तदुक्तं ज्योतिस्तन्त्रे ।

असङ्क्रान्तिमासोऽधिमासः स्फुटः स्याद्
द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित् ।
क्षयः कार्त्तिकादित्रये नान्यतः स्या-
त्तदा वर्षमध्येऽधिमासद्वयं स्यात्" ॥

इत्ययं श्लोको विलिखितोऽस्ति स च भास्करीयगणिताध्यायमध्यमाधिकारस्य ६ श्लोकः ।

एवं चात्र भास्करीयसिद्धान्तशिरोमणिस्थवचनानि सर्वत्रान्यग्रन्थनाम्ना लिखितानीति महच्चित्रम् । भास्करेण तत्तद्ग्रन्थेभ्योऽपहृतानि तानि चेत्यवगम्यते । येषां ग्रन्थानां नामानि पद्मनाभेन लिखितानि तेषां मध्ये ये बृहत्संहितादिग्रन्थाः प्रसिद्धास्तत्रस्थपद्मनाभलिखितानि वचनानि सत्यान्येव तेनाप्रसिद्धानामपि वचनानि तथ्यान्यवश्यं भविष्यन्तीति

Digitized by Google

स्फुटमनुमीयते पद्मनाभनिभस्य बहुश्रुतस्य तथ्यलेखसमौचित्यात् । ततो भास्करेण तानि वचनानि तेभ्योऽपहृतान्यत्र * न संशयः ।

एवं वर्जनीयदिनप्रकरणे पाठशालीयपुस्तकस्य ७० पत्रे "ब्रह्म-सिद्धान्ते । वर्षान्ते वर्जयेत्पक्षं मासान्ते च दिनत्रयम् । घटिकाद्वयमृत्वान्ते ग्रहणे सप्तवासरम्" इति ब्रह्मसिद्धान्तीयं वचनं ज्ञाताद्विष्णुधर्मोत्तरा-न्तर्गतब्रह्मसिद्धान्तात्तथा शाकल्यसंहितान्तर्गतब्रह्मसिद्धान्ताद्भिन्नं फल-कीर्त्तनपरं विलक्षणम् ।

अहो बहुविशेषयुक्तस्य व्यवहारप्रदीपस्यान्तभागो न दृष्टो मया तद्दर्शनं विना ग्रन्थकृतः समयो न विज्ञायते । अस्य पद्मनाभस्य समय-ज्ञानं विना यस्य भास्करः स्वबीजान्ते "ब्रह्माह्वयश्रीधरपद्मनाभबीजा-नी"त्यादौ नाम लिखति स एवायं वाऽन्य इति वक्तुं न शक्यते । व्यवहारप्रदीपं प्रकाशयति चास्य पद्मनाभस्य ज्यौतिषस्कन्धत्रये काव्य-साहित्ययोश्च पूर्णं पाण्डित्यम् । भोजराजकृतराजमार्त्तण्डवचनोल्लेखादयं भोजराजतो न प्राचीन इति सिध्यति ॥

अध्यायसमाप्तौ नाम्नि मिश्रपदोल्लेखादयं मिश्र इति विज्ञा-यते । अयं च स्वकीर्त्तिविस्तारार्थं ग्रन्थं कृतवान् इति व्यवहारप्रदीपस्य १३ श्लोकेन ।

"कीर्त्तिवल्ली कथं लोकवेत्रे तस्याऽस्तु विस्तृता ।
योऽचरस्तम्भयोगेन मञ्चं बद्ध्वा न यच्छति"॥—इत्यनेन स्फुटम् ।

इतिहासरसिकैर्विद्वद्भिरस्य व्यवहारप्रदीपाख्या कृतिर्यत्नतः सम्पू-र्णान्वेषणीया ।

श्रीपतिः । ९२१

बहुभिरयं श्रीपतिभट्ट इति कथ्यते । अयं भारतवर्षे त्रिस्कन्ध-ज्योतिषशास्त्रेषु स्वसमयेऽद्वितीयः पण्डित आसीत् । मुनीश्वरेण भास्करीयलीलावतीटीकायां निसृष्टार्थदूत्यभिधायां "चापोननिघ्नपरिधिः प्रथमाह्वयः स्या"दित्यादिव्याख्यायां ।

* लग्नानयने पाठशालीयपुस्तकस्य ३६ पत्रे यानि भास्करीयकरणकुतूहलवच-नानि तानि च केनचित्प्रक्षिप्तानि तदर्थे खण्डखाद्यविधिना पुनर्लग्नानयनस्योल्ले-खात् ।

"दोःकोटिभागरहिताभिहताः खनाग-
चन्द्राश्चदीयचरणोनशरार्कदिग्भिः ।
ते व्यासखण्डगुणिता विहृताः फलं तु
ज्याभिर्विनापि भवतो भुजकोटिजीवे" इति ॥

तथा सर्वदोर्युतिदलं चतुःस्थितमित्यादिव्याख्यायां "भुजसमासदलं हि चतुःस्थितं निजभुजैः क्रमशः पृथगूनितम् । अथ परस्परमेव तदाहतेः कृतपदं चिचतुर्भुजयोः फलम्" इति तथाऽन्यत्र बहुत्र श्रीपतिवचनानि लिखितानि तेन पाटीबीजयोरपि कृतिरस्त्यस्या इति बुध्यते। ज्याखण्डैर्विना चापादेव ज्यानयनं श्रीपतिकृतं यत्पूर्वं प्रतिपादितं तदवलम्ब्यैव गणेशदैवज्ञेन ग्रहलाघवे सर्वे प्रकारा विलिखिताः । "इति कृतं लघु कार्म्मुकशिञ्जिनीग्रहणकर्म विना द्युतिसाधन" मिति भास्करीयकरणकुतूहलस्थच्छायासाधनाभिमानमूलहेतुश्चात्र श्रीपतिप्रकार एव । (मत्कृता करणकुतूहलोपपत्तिर्विलोक्या) एवं गणिताध्यायस्य पाताधिकारे "त्रिनवभवनजातेति स्वोक्तसिद्धान्तशेखरोक्तलक्षणेनापि पातो गत" इति भास्कराचार्योक्तेन ज्योतिषसिद्धान्तेऽपि पाटवमस्य ज्ञायते ।

अहो एतादृशस्य ज्योतिषशास्त्राद्वितीयविदुषः पाटीगणितं बीजगणितं सिद्धान्तशेखरनामको ज्योतिषसिद्धान्तश्चेति सर्वं विनष्टम् । न कुत्राप्युपलभ्यते । श्रीपतिपद्धतिर्जातके मुहूर्त्ते रत्नावली, रत्नसारः रत्नमाला चेति कृतिचतुष्टयं ज्योतिर्विदां गृहे गृहे सर्वत्रैव किमपि मुद्रितं चोपलभ्यते परन्तु तत्र समयादिकवर्णनं नास्ति । दैववशात् काश्यामेव चन्द्रसूर्यग्रहणसाधनरूपं धीकोटिसंज्ञं करणमस्माभिरुपलब्धमेतत्कृतम् । इदं धीकोटिसंज्ञं करणं यच्चास्माभिरुपलब्धं सं० १९१६ विक्रमाब्दे लिखितं तत्रादौ "चन्द्राङ्गनन्दो ९६१ नशकोऽर्कनिघ्नश्चैत्रादिमासैर्युगधो द्विनिघ्नः"। इत्यादि वाक्येन करणकालो रूपरसनन्दशकः ९६१ सिध्यति । तस्मिन् समये यदि श्रीपतिवयश्चत्वारिंशद्वर्षसमं कल्प्यते तदाऽस्य जन्मासन्नशकः ९२१ सिध्यति । इदं करणं श्लोकशतसंख्यमुदाहरणसहितमस्ति । उदाहरणं च रसाष्टपञ्चेन्दु १५८६ शकीयं तत्कृतनामरहितं वर्त्तते । प्रायः करणकालस्तथ्य एव विभाति भास्कराचार्यसमयादपि प्राचीनत्वात् । अयमतीव सज्जनो निष्पक्षपातरहितः काव्यसाहित्यादिषु निपुण आसीदिति तत्कृतरत्नमालाविलोकनेन ज्ञायते ।

रत्नमालान्ते ।

भ्रातरत्रनविप्रनिर्मितं शास्त्रमेतदिति मा वृथा त्यज ।
आगमोऽयमृषिभाषितोपमो नापरं किमपि भाषितं मया ॥

अत्र सप्तदशप्रकरणे वास्तुवर्णने योगेश्वराचार्यमतं लिखितं तथाऽऽदौ द्वितीयश्लोके "विलोक्य गर्गादिमुनिप्रणीतं वराहलल्लादिकृतं च शास्त्र"मित्यादि लिखितमस्ति । वराहादिभ्योऽनन्तरं पूर्वप्रतिपादितशकोऽस्य समयः समुचित एव ।

भोजराजः । ६६४

फलितेऽस्य कृती राजमार्त्तण्डाख्या योगशास्त्रे पातञ्जलयोगसूत्रवृत्तिश्च प्राप्यते परन्तु तत्र समयादिकं न । पातञ्जलयोगसूत्रवृत्तिसमाप्तौ "रणरङ्गमल्ल" इति राज्ञो विशेषणमुपलभ्यते । डाक्टरभोऊदाजीलेखानुसारेण भोजराजकृतं गणिते राजमृगाङ्ककरणं चास्ति यस्यैका प्रतिः जेस्सुलमेर-(Jessulmere) स्थानस्थपण्डितद्वारा तेन लब्धा च तत्रापि समाप्तौ योगसूत्रवृत्तिवद्राज्ञो विशेषणमहर्गणानयनं च वेदरसनवमितात् ९६४ शकात् । तेनैवास्य समयः स एव शकः कल्प्यते (See The Literary Remains of Dr. Bhau Daji, p. 246.)

कोलब्रूकसाहिबनिकटे डाक्टरविलियमहण्टरसाहबेनोज्जयिनीस्थज्योतिर्विदां समयावली या प्रेषिता तत्रापि भोजराजसमयः स एव शकः । (Colebrooke's Algebra, p. XXXIII.) अयं भोजो धारानगरीमलङ्कुर्व्वन् संस्कृतविद्याप्रधानरसिकः संस्कृतविद्वन्मण्डलीसंमानरतणोऽद्वितीयो महीमहेन्द्र आसीत् । यद्विषये च कवयो बहुधा विचित्ररचनाप्रपञ्चचातुरीभिरितिहासादिकं वर्णयामासुः । राजमृगाङ्ककरणपुस्तकमद्यावधि न मया दृष्टम् ।

ब्रह्मदेवः । (१०१४)

आसीच्चन्द्रदेवतनयो माथुरो ब्राह्मणोऽयम् । एनेनाऽऽर्य्यभटानुसारेण शक्रदिङ्मिते १०१४ शके करणप्रकाशनामकं करणं विरचितम् । अत्र मध्यमाधिकारः । तिथ्यधिकारः । स्पष्टाधिकारः । त्रिप्रश्नाधिकारः । चन्द्रग्रहणाधिकारः । सूर्यग्रहणाधिकारः । उदयास्ताधिकारः । शृङ्गोन्न-

Digitized by Google

त्यधिकारः । ग्रहयुत्यधिकारः । इति नवाधिकाराः संक्षेपतो विलिखिताः सन्ति २२५ श्लोकैः ।

माध्व*मतीया एतत्करणानुसारेणागतान् तिथ्यादीन् व्रतोपवासादिषु स्वीकुर्वन्ति । ब्रह्मदेवस्यान्या कृतिरस्माभिर्नोपलब्धा । करणप्रकाशकस्यातीव दुर्मिलं लिखितपुस्तकं शुद्धं प्राचीनं च काशिकराजकीयपाठशालासरस्वतीभवने वर्त्तते ।

तत्रादौ ।

“ब्रह्माच्युतत्रिनयनार्कशशाङ्कभौम-
सौम्येज्यशुक्रशनिवागधिपागणेशान् ।
नत्वाहमार्यभटशास्त्रसमं करोमि
श्रीब्रह्मदेवगणकः करणप्रकाशम्” ॥

इदं मङ्गलं “ब्रह्मकुशशिबुधे”त्याद्यार्यभटोक्तमङ्गलानुरूपमेवेति स्फुटम् ।

तदन्ते च ।

“आसीत्पार्थिववृन्दवन्दितपदाम्भोजद्वयो माथुरः
श्रीचन्द्राख्यबुधो गुणैकवसतिः ख्यातो द्विजेन्द्रः क्षितौ ।
नत्वा तस्य सुतोऽङ्घ्रिपङ्कजयुगं खण्डेन्दुचूडामणे-
र्वृत्तैः स्पष्टमिदं चकार करणं श्रीब्रह्मदेवः कृती” ॥

यद्यप्ययं ग्रन्थारम्भे स्वकीयं करणमार्य्यभटानुसारीति विलिलेख तथापि ग्रन्थस्य सूक्ष्मधियाऽवलोकनेन बहुत्रान्यथा प्रतिभाति बहुत्र लल्लोक्तसदृशमेव । अत्रायनभागचर्च्चा न कुत्रापि दृश्यते ।

राशिद्वयं स्वदेशीयाक्षभागहीनं शेषसमे भानावगस्त्योऽस्तमुपैति । भषट्कमस्तार्कहीनमवशेषसमे द्युमणौ चोदयं व्रजति कुम्भज इति रीतिर्वर्त्तत अगस्त्यास्तोदयसाधने ह्यत्र । अनेन विधिनाऽवन्तिकायां सार्द्धद्विद्विपलभागपुर्य्यां यदा रविः $= १^{\text{रा}} ।\ ७^{\circ} ।\ ३०'$ तदाऽगस्त्यास्तः ॥ यदा च रविः $= ६^{\text{रा}} - (१^{\text{रा}} ।\ ७^{\circ} ।\ ३०') = ४^{\text{रा}} ।\ २२^{\circ} ।\ ३०'$ तदाऽगस्त्योदयः । अयमुदयश्च बृहत्संहितोक्तेन “तत्त्वोज्जयिन्यामगतस्य

* माध्वसाम्प्रदायिककृष्णमतव्याख्यार्थं ।

“विष्णोश्च जन्मदिवसानि हरेर्दिनं च विष्णुव्रतानि विविधानि च विष्णुमं च । कार्याणि चार्यभटशास्त्रत एव सर्वे”रित्यादि तथा “आर्यभटसिद्धान्तसंमतकरणप्रकाशग्रंथः” इति ।

Digitized by Google

"नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च" ॥ 'अलमिति पर्याप्त्यर्थग्रहणमिति'। अलमित्यर्थग्रहणं तत्रापि पर्याप्तिग्रहणमित्यर्थः। तत्र तावदर्थग्रहणं तस्मै प्रभवतीति निर्द्देशात्, इह चालं कुरुते कन्यामित्युपपदविभक्तेः कारकविभक्तिर्बलीयसीति द्वितीया भविष्यति, एवमलमोदनेनेत्यत्रापि करणे तृतीया, ओदनेन न किं चित्साध्यमित्यर्थावगमात्, तेन भूषणप्रतिषेधयोरग्रहणात्पर्याप्तेरेव ग्रहणम्। 'चकारः पुनरित्यादि'। अन्यथा स्वस्तियोगे चतुर्थ्या अवकाशः स्वस्ति जाल्माय, जाल्मत्वादाशीरभावाद्भूतकथनमेतत्, कुशलार्थैराशिषि चतुर्थी चेत्यस्यावकाशोऽन्ये कुशलार्थाः, कुशलं देवदत्तस्य कुशलं देवदत्ताय, स्वस्ति गोभ्यो भूयादुभयप्रसङ्गे परत्वात्पक्षे षष्ठी स्यात् ॥

"मन्यकर्मण्यनादरे विभाषाप्राणिषु" ॥ 'मन्यतेः कर्म मन्यकर्मेति'। मन ज्ञानइत्यस्य दैवादिकस्य धातोः श्यना उपलक्षणं न तु प्रयोगस्थस्य श्यनन्तस्यानुकरणमित्यर्थः। तेन श्यनोभावेपि भवति तृणाय मत्वा रघुनन्दनोपि बाणेन रक्षः प्रधनान्निरास्थदिति। श्यना तु तानादिकस्य मनु अवबोधनइत्यस्यैव निरासः। 'अनादरस्तिरस्कार इति'। न त्वादराभावमात्रं, कथम्, अनृतादिवचसः प्रतिपक्षवाचित्वादिति भावः। मन्यकर्मणि प्रकृष्टकुत्सितग्रहणमिति वार्त्तिकं, यद्वाचिनश्चतुर्थी विधीयते ततः प्रकर्षेण यदि कुत्सा प्रतिपादयितुमिष्यते तदा चतुर्थी भवति न तु सामान्यविवक्षायां, तेन प्रतिषेधयुक्तायां कुत्सायां चतुर्थी विधानं संपद्यतइति मत्वाह। 'न त्वा तृणायेति'। मन्यकर्मण्यनादरउपमाने विभाषा प्राणिष्वित्यापिशलिरधीते स्म, न तत्र प्रतिषेधापेक्षा, तथा च भट्टिप्रयोगो निदर्शनीयः। 'अश्मानं दृषदमित्यादि'। तत्त्वाख्यानमेतत्। 'यस्य माता न पश्यतीति'। दर्शनयोग्यम्। 'व्यवस्थितविभाषा चेति'। ननु येषु प्राणिषु नेष्यते ते नावादयो भविष्यन्तीति किं व्यवस्थितविभाषया, वृत्तिकार एवात्र साक्षात्प्रयोजनं वक्ष्यति। 'न त्वा नावमिति'। नावा तार्यमुदकं नाव्यं तद्यदेव तीर्णं तदेव नावमपि सन्तीं त्वां नाहं नावं मन्ये प्रयोजनस्य निष्पन्नत्वादिति भावः, एवं यावच्च भुक्तं

Digitized by Google

श्रातुमित्यत्रापि द्रष्टव्यम् । 'प्राणिषु तूभयमिति' । विषयविभागेन । 'एतदपीति' । एतदेव साक्षात्प्रयोजनमन्यत्र नावाधित्वादेव सिद्धेरित्यवोचाम ॥

"कर्तृकरणयोस्तृतीया" ॥ 'प्रकृत्याभिरूप इति' । क्रियाया अश्रवणात्कर्तृकरणयोरभावात्षष्ठी प्राप्नोति । 'प्रायेण याज्ञिका इति' । प्रायशब्दो बह्वर्थः, बहवो यज्ञिका इत्यर्थः । 'गार्ग्योस्मीति' । प्रथमा षष्ठी वा प्राप्नोति । 'समेनेति' । अत्र द्वितीया प्राप्नोति । 'द्विद्रोणेनेति' । द्वयोर्द्रोणयोः समाहारो द्विद्रोणं पात्रादिः, द्वौ द्रोणौ इत्वेत्यर्थः, अत्रापि द्वितीया प्राप्नोति । 'पञ्चकेनेति' । पञ्चपरिमाणमस्य पञ्चकः सङ्घः, तत्र सङ्घसङ्घिनोरभेदविवक्षायां पशूनित्यनेनैतत्समानाधिकरणमित्यत्रापि द्वितीयैव प्राप्नोति । 'साहस्रेणेति' । सहस्रपरिमाणः सङ्घः साहस्रः, सर्वमन्यत्पूर्ववत्, इत्युपसंख्यानमारभमाणस्याभिप्रायः, प्रत्याख्यानं तु इह तावत्प्रकृत्याभिरूप इति गम्यमानापि क्रिया करणादिव्यपदेशस्य निमित्तम्, । इह च करोतिक्रिया गम्यते, करणान्तरव्युदासाय च प्रकृतेः करणत्वं विवक्षितं स्वभावेनायमभिरूपः कृतो न वस्त्रालङ्कारादिनेत्यर्थः । प्रायेणेत्ययमर्थो ऽस्मिन् ग्रामे ये विप्राः सन्ति ते बाहुल्येन यज्ञमधीयतइति तत्र याज्ञिकशब्दाभिधेयमध्ययनं प्रति बाहुल्यस्य करणत्वं सङ्घीभूय यज्ञमधीयतइत्यर्थः, इह तर्हि कथं विशिष्टवेषं कं चित् दृष्ट्वाध्यवस्यति प्रायेणायं याज्ञिक इति । अत्राप्ययमर्थो ऽस्मिंस्तावद्याज्ञिकानामाचारादिबाहुल्यमुपलभ्यते ऽतोनेनाचारादिबाहुल्येन याज्ञिकोयं जनैर्ज्ञायतइति, तत्र प्रतीयमानज्ञानं प्रति करणत्वं, के चित्प्रायेणशब्दो विभक्तिप्रतिरूपको निपातो ज्ञातमित्यस्यार्थे वर्ततइत्याहुः, दृश्यते च प्रायेण सामर्थ्यविधौ गुणानामिति, प्रायेण निष्क्रामति चक्रपाणाविति च । 'गोत्रेणेति' । अनेनाहं ज्ञाये इति ज्ञानक्रियायामस्मीति भवनक्रियायां वा गोत्रस्य करणत्वम् । 'समेनेति' । पथो गमने करणत्वं समेन पथेत्यर्थः । 'द्विद्रोणेनेति' । द्विद्रोणाद्यर्थे मूल्ये द्विद्रोणादिशब्दस्तस्य च

क्रयं प्रति करणत्वं द्विद्रोणादीनां च मूल्यं तेन द्विद्रोणाद्येव क्रीयतइत्यर्थभेदोऽपि नास्ति ॥

“सहयुक्तेऽप्रधाने” ॥ क्रियागुणद्रव्यैर्द्वयोः सम्बन्धे सति सहशब्दस्य प्रयोगो भवति, अतः पुत्रेण सहागतः पितेत्यादीनि क्रियादिसम्बन्धे यथाक्रममुदाहरणान्युपन्यस्तानि । नन्वत्र सर्वत्र सहार्थस्वभावादेव पितुः पुत्रस्य वा गमनादिना सम्बन्धः प्रतीयते तत्कुतः पितुः प्राधान्यं, केचिदाहुः । यस्य क्रियादिसम्बन्धो विशिष्टकालः प्रज्ञातः स यदान्यस्याप्रज्ञातविशिष्टकालक्रियासम्बन्धस्य तत्प्रतिपादनार्थमुपादीयते यथायं पुरुषः कदागत इत्यपेक्षायां राज्ञा सहागत इति पुरुषागमनं विशिष्टकालमुपपादयितुं वाक्यं प्रवर्त्ततइति पुरुषस्य प्राधान्यं राज्ञस्तूपलक्षणत्वेनोपात्तत्वादप्राधान्यमिति, एवं तु भृत्यैः सह राजागत इत्यत्र न स्याद् नहि भृत्यागमनं प्रसिद्धकालं येन तत्कालत्वं राजागमनस्य प्रतिपाद्येत, यत्र चोभयोरप्यज्ञातः क्रियादिसम्बन्धस्तत्रापि न स्यात् पुत्रेण सहागतः पितेति, तस्माद्युक्तमप्राधान्यमत आह । ‘पितुरत्रेत्यादि’ । एवं प्रज्ञातोऽप्रज्ञातो वा यस्य क्रियादिसम्बन्धः शब्देनोच्यते तस्य प्राधान्यं यस्य तु सहार्थोन्यथानुपपत्त्या प्रतीयते तस्याप्राधान्यं, कस्य पुनः शब्देनोच्यते कस्य वा प्रतीयते, यस्य विवक्ष्यते, एतदुक्तं भवति । द्वयोस्तावत्क्रियासम्बन्धे सति सहशब्दस्य प्रयोगः, तत्र यदा द्वयोरपि क्रियादिसम्बन्धः शब्देनोच्यते सहागतौ पितापुत्राविति तदा द्वयोरपि प्राधान्यमेव भवति, यदा त्वेकस्य क्रियादिसम्बन्धं शब्देन प्रतिपिपादयिषत्यपरस्य सहार्थान्यथानुपपत्त्या तदा तस्याप्राधान्यात्तद्वाचिनस्तृतीयेति, एवं च कृत्वा सह शाखया प्रस्तरं प्रहरतीति यद्यपि प्रस्तरस्य प्रहरणसम्बन्धः प्रज्ञातः सूक्तवाकेन प्रस्तरं प्रहरतीति शाखायास्त्वज्ञातः तथाप्युक्तेन न्यायेन शाखाशब्दात्तृतीया सिध्यतीति विभक्तिव्यत्यासो न वाच्यः । ननु पुत्रेण सहागत इत्यादौ पितुरेव कर्त्तुः क्तादिभिरभिधानं न त्वप्रधानस्य पुत्रादेस्तस्यापि तु सहार्थसामर्थ्यात्कर्तृत्वं प्रतीयतइत्यनभिहिते कर्त्तरि कर्तृकरणयोरिति तृतीया सिद्धा, इह तर्हि

पुत्रेण सहागमनं पितुरिति ‘कर्तृकर्मणोः कृती’ति षष्ठी प्राप्नोति, इह च तिलैः सह माषान्वपति तिलान्माषान्वपतीत्यर्थप्रतीतेर्द्वितीया प्राप्नोति, इह च पुत्रेण सह स्थूलः पुत्रेण सह गोमानिति द्रव्यगुणसम्बन्धप्रतिपादनएव तात्पर्यमिति क्रियागन्धस्यैवाभावात्कर्तृगन्धोपि नास्तीत्यारभ्यमेवावश्यं सूत्रम् । ‘सहार्थेन योगे विधानादिति’ । युक्तग्रहणादर्थग्रहणं लभ्यते ऽन्यथा सहे प्रधानइत्येव वाच्यं स्यात्, विनापि सहशब्देन वृद्धो यूनेति निपातनादिति क्व चित्पठ्यते, इहाप्रधानवचनं प्रधाननिवृत्त्यर्थं क्रियते पितुस्तृतीया मा भूदिति तत्र प्रातिपदिकमात्रापेक्षत्वादन्तरङ्गत्वात्प्रथमा भविष्यति नार्थोप्रधानवचनेनेति मन्यमानः पृच्छति । ‘अप्रधानइति किमिति’ । ‘शिष्येण सहोपाध्यायस्य गौरिति’ । यथात्राप्रधाने षष्ठीविषये तृतीया एवं प्रधानेपि स्यादिति मन्यते । अत्राहुः । यथा ग्रामं न गच्छतीत्यादौ ग्रामगमनयोः पूर्वमभिसम्बन्धः पश्चान्नञा प्रतिषिध्यते एवमुपाध्यायस्य पूर्वं गवा सम्बन्धः पश्चात्तत्सम्बन्धविशिष्टस्य गोः सहार्थेन योगः, अन्यथा कस्य सहत्वं प्रतिपाद्येत, अतो गवा सम्बन्धस्यान्तरङ्गत्वादुपाध्यायात् षष्ठी भविष्यतीति नार्थ एतेन ॥

“येनाङ्गविकारः” ॥ अङ्गशब्दोवयववाची प्रसिद्धस्ततश्चायं सूत्रार्थः स्याद् येन गुणेनाङ्गस्याक्ष्यादेर्विकारस्ततस्तृतीयेति ततश्चाक्षि काणमस्येत्यादावेव तु स्यात् काणादेर्गुणवचनादेव च स्याद् अक्ष्णा काण इत्यादावक्ष्यादेर्न स्यादित्यालोच्यान्यथा व्याचष्टे । ‘अङ्गशब्दोत्रेत्यादि’ । अर्शआद्यच् प्रत्ययान्तः शरीरवचनोङ्गशब्दः सूत्र उपात्त इत्यर्थः । येनेति च यदपेक्षमङ्गिनोङ्गित्वं स हेतुत्वेन निर्दिश्यते, हेतुत्वेनेतिवदन्येनेति हेतौ तृतीयेति दर्शयति । ‘विकृतेनेति’ । सामर्थ्यादेवैतल्लभ्यते नह्यविकृतमङ्गमङ्गिनो विकारं प्रति हेतुः । ‘अक्ष्णा काण इति’ । कथं पुनः पुरुषः काणो यावताक्षिधर्मः काणता तेनाक्ष्येव काणं भवति न पुरुष इत्याह । ‘अवयवधर्मेणेति’ । तदेवं यदङ्गगतो विकारोवयवधर्मः समुदायआरोपादङ्गिनः प्रतिपाद्यते तत्र यदङ्गगतो विकारस्ततस्तृतीया भवति । कथं पुनरक्षिशब्दः प्रयुज्यते यावता काणशब्दोक्षिगतमेव विकारमाचष्टे,

तत्र काणो देवदत्त इत्युक्ते नैव संदेहो भवति किं स्वयमेव काणः किं वान्यः काणतयेति, नाप्येवं संदेहः किमक्ष्णः काणतयासौ काणः किं वा पादस्येति, तदनर्थकोऽक्षिशब्दस्य प्रयोगः, एवं पादेन खञ्जः, पाणिना कुणिरित्यादौ पादादीनाम् । उच्यते । अक्ष्याद्युपक्रमे वाक्ये ऽक्ष्णेत्युक्ते न ज्ञायते किं निरूपयति किं वा काण इति, तत्र निरूपयत्यादिनिवृत्तये काणशब्दप्रयोगः, यथा द्वावानय कौ तौ द्वावित्युक्ते ब्राह्मणाविति । 'अङ्गविकार इति किमिति' । 'अङ्ग्रहणं प्रति प्रश्नः, क्व चित्तु तथैव पाठः । 'अक्षि काणमस्येति' । नन्वत्र परत्वात्प्रथमा भविष्यति । न । असत्यङ्ग्रहणेऽत्रैव स्याद् मुख्यो ह्यत्र विकारः, उदाहरणे तु गौणो ऽवयवधर्मस्यावयविन्यारोपात् ॥

"इत्थंभूतलक्षणे" ॥ इदंशब्दात्सन्निहितवाचिनः प्रकारवचने थाल्, 'इदमस्थमु' रिति थमुप्रत्यये कृते इत्थमिति भवति, न चात्र किञ्चित्सन्निहितमस्तीतीत्थंशब्दः सन्निहितपरित्यागेन प्रकारविशेषमाचष्टे, भू प्राप्तावात्मनेपदी च, आ धृषाद्वेति णिजभावपक्षे गत्यर्थत्वात्कर्त्तरि क्तप्रत्ययस्तदाह । 'कञ्चिदिति' । तस्येति कर्मणि षष्ठी, लक्ष्यते येनेति लक्षणं, येन श्वेतच्छत्रादिना राजत्वादिप्रकारविशेषापन्नतयान्यो लक्ष्यते तदित्थंभूतलक्षणम् । 'तत्रेति' । वर्त्तमानादित्यर्थः । 'कमण्डलुना छात्रमद्राक्षीदिति' । छात्रोपाध्यायेऽगच्छतोऽच्छात्रस्य हस्ते कमण्डलुर्भवति, कमण्डलुना छात्रोऽयमिति ज्ञातवानित्यर्थः । यद्येवमीदृशे ज्ञाने कमण्डलोः करणत्वादेव तृतीया सिद्ध्यति, एवं तर्हि यदायं प्रमाता प्रमितिदशायामेवात्मनः प्रमितिविशेषं प्रतिपादयितुं वाक्यं प्रयुङ्क्ते कमण्डलुनायं छात्र इति तदा ज्ञानक्रियाया अप्रतिभासादप्रतिपाद्यत्वाच्च करणत्वासम्भवः, उदाहरणं त्वेवं व्याख्येयं, कमण्डलुना छात्र इत्येवं रूपं ज्ञानमभूदिति, कोर्था, ऽद्राक्षीदिति निर्दिष्टस्य द्रष्टुर्ज्ञानविशेषोऽत्र कथ्यते न प्रयोक्तुरित्यर्थः, इह कमण्डलुपाणिश्छात्र इति बहुव्रीहौ कृते कमण्डलुशब्दात्तृतीया प्राप्नोति, न च प्रत्ययलक्षणेनाप्रत्यय इति प्रातिपदिकसंज्ञाप्रतिषेधः, 'न ङिसंबुद्ध्यो'रिति लिङ्गात्, न च 'सुपो धातुप्रातिपदिकयो' रिति

Digitized by Google

संप्रत्युत्पन्नायास्तृतीयाया लुग्लभ्यते, तस्याः समासप्रातिपदिकं प्रत्यनवयवत्वादित्यत आह। 'इह न भवतीति'। 'समासेन्तर्भूतत्वादिति'। समासार्थं प्रति गुणभूतत्वादित्यर्थः। इत्थंभूतस्य लक्षणं यत्प्रधानं तत्र तृतीया बहुव्रीहौ तु वर्त्तिपदानां स्वार्थोपसर्जनान्यपदार्थाभिधायित्वान्नास्ति प्राधान्यम् ॥

"संज्ञोन्यतरस्यां कर्मणि" ॥ 'संजानीतइति'। 'संप्रतिभ्यामनाध्याने' इत्यात्मनेपदं, 'ज्ञाजनोर्जेति' जादेशः। आध्याने तु अधीगर्थदयेशामिति षष्ठी भवति मातुः संजानातीति, कृत्प्रयोगे त्वनाध्यानेपि परत्वा'त्कर्तृकर्मणोः कृती'ति षष्ठी भवति मातुः संज्ञातेति ॥

"हेतौ"। 'तत्प्रयोजको हेतुश्चेति' शास्त्रीयस्य हेतोश्चकारेण कर्तृसंज्ञाविधानात्कर्तृकरणयोरित्येव तृतीयायाः सिद्धत्वाल्लौकिको हेतुर्गृह्यतइत्याह। 'फलसाधनयोग्य इत्यादि'। लोके ह्यङ्कुरादिकार्योत्पादने योग्यतामात्रप्रयुक्तोनाश्रितव्यापारो द्रव्यगुणक्रियाविषयो बीजादिर्हेतुः। उक्तं च।

द्रव्यादिविषयो हेतुः कारकं नियतक्रियम्।

इति। अनाश्रिते तु व्यापारे निमित्तं हेतुरुच्यते ॥

इति च, उदाहरणेषु क्रियाया अभावात्करणत्वमनाशङ्कनीयं, यूपाय दार्वित्यत्र तादर्थ्यं विवक्षितं न तु सदपि हेतुत्वमिति दारुशब्दात्प्रथमेव भवति ॥

"अकर्त्तर्यृणे पञ्चमी" ॥ 'बन्धित इति'। बन्धेर्ण्यन्तस्य निष्ठान्तस्य रूपम्। 'शतमृणं च भवतीति'। उत्तमर्णाय धार्यमाणत्वात्। 'प्रयोजकत्वाच्च कर्तृसंज्ञकमिति'। 'तत्प्रयोजको हेतुश्चे'ति चकारेण कर्तृसंज्ञाविधानात्। ननु च पूर्वसूत्रे लौकिकस्य हेतोर्ग्रहणमयं तु शास्त्रीयः, शास्त्रीयस्यापि लौकिकत्वमस्त्येव। अथ वा कस्य हेतोः पूर्वसूत्रे शास्त्रीयस्याग्रहणं कर्त्तरि सिद्धा तृतीयेति, न त्वेवं, पञ्चम्या असिद्धत्वादिहार्थमेव सामान्यग्रहणं स्यात् ॥

Digitized by Google

"विभाषागुणेऽस्त्रियाम्" ॥ सत्त्वे निविशतेऽपैतीति लक्षितस्य गुणस्य ग्रहणं तदनुरूपत्वादुदाहरणप्रत्युदाहरणयोरिति केचित् । अन्ये तु पर्वतो वह्निमान् धूमवत्त्वादित्यादावनेनैव पञ्चमीमिच्छन्तः परतन्त्रमात्रस्य ग्रहणं वर्णयन्ति यथा यस्य हि गुणस्य भावादिति, विभाषागुणइति योगविभागात् नास्तीह पटोऽनुपलब्धेरिति स्त्रियामपि क्व चिद्भवति, के चित्त्वपादानपञ्चमीमेतामिच्छन्ति, तथा च नास्तीह घटोऽनुपलब्धितइ 'त्यपादाने चाहीयरुहो' रिति तसिलपि भवति, योगविभागवादिनां त्वाद्यादित्वात्तसिः ॥

"षष्ठी हेतुप्रयोगे" ॥ 'हेतुशब्दस्येति' । प्रयोगस्य शब्दधर्मत्वादेवमुक्तं न त्वनेनार्थग्रहणं व्यावर्त्यते पर्यायप्रयोगेऽपि निमित्तकारणहेतुष्विति वक्ष्यमाणेन षष्ठ्या दृष्टत्वात्, हेतुशब्दस्य प्रयोगे सति हेतुहेतुमद्भावलक्षणस्यैव सम्बन्धविशेषस्य नियमेन प्रतीतौ 'हेतौ' विति तृतीयापवादो योगः ॥

"सर्वनाम्नः तृतीया च" ॥ सर्वनाम्न इति प्रयोगापेक्षा षष्ठी । 'सर्वनाम्नो हेतुशब्दस्य च प्रयोगइति'। पञ्चम्यां तु हेतुशब्दादयं विधिर्न स्यात्, कथं तर्हि सर्वनाम्नस्तृतीया भवतीति, अत्रापि सर्वनाम्नः प्रयोगइत्यर्थो द्रष्टव्यः । 'निमित्तकारणहेतुष्विति' । यद्यप्यस्मिन् सूत्रइदं वृत्तिकारेण पठितं भाष्यकारेण तु 'हेतौ' वित्यत्र पठितत्वादसर्वनाम्नोऽप्येतद्विभक्तिविधानं गम्यते, तत्र च प्रायग्रहणादेवासर्वनाम्नः प्रथमाद्वितीये न भवतोऽन्यास्तु यथादर्शनं भवन्ति अनेन कारणेन वसति अस्मै कारणाय वसति अस्मात्कारणाद् अस्य कारणस्य अस्मिन् कारणइति । 'पर्यायोपादानं त्विति' । ननु विपरीतमिदं स्वरूपविधौ पर्यायोपादानं कर्त्तव्यमर्थग्रहणे तु न कर्त्तव्यमिति, किं चार्थग्रहणे सत्येकशेषप्रसङ्गो विरूपाणामपि समानार्थानामेकशेषवचनात्। एवं मन्यते यथाकृतिगणेषु के चिदुपलक्षणार्थं पठ्यन्ते एवमिहापि स्वरूपपरा एव निमित्तादिशब्दा उपलक्षणार्था एवमर्थानां शब्दानामिति ॥

Digitized by Google

"अपादाने पञ्चमी" ॥ 'प्रासादादिति'। अत्र ल्यबन्तस्याप्रयोगे ऽप्यर्थो गम्यतइति द्वितीया प्राप्नोति। 'आसनादिति'। सप्तम्यत्र प्राप्नोति। प्रत्याख्यानं तु प्रेक्षणं चक्षुषा पदार्थानां ज्ञानं, तैजसं चक्षुर्बहिर्निःसृत्य विषयान् गृह्णाति निःसरणाङ्गके च प्रेक्षणे धातुर्वर्त्तते तत्राङ्गभूतनिःसरणं प्रति प्रासाद उपात्तविषयमपादानं भवति। प्रासादात्प्रेक्षतइति कोर्थः, प्रासादप्रदेशाच्चाक्षुषं तेजो निःसार्य पदार्थान् गृह्णातीति। 'प्रश्नाख्यानयोश्चेति'। विशिष्टे प्रश्नाख्याने गृह्येते यत्र लोके पञ्चमी प्रयुज्यते इह न भवति कस्यायमर्थो राज्ञोर्थ इति कुतो भवानिति क्रियाया अभावादनपादानत्वात् फलवद्वचनप्रत्यक्षादिप्रमाणसिद्धामागमनादिक्रियामपेक्ष्येदं प्रयुज्यते तत्र प्रयोक्तुराख्यातुश्च मनसि विपरिवर्त्तमानमागमनं प्रत्यपेक्षितक्रियमपादानं पाटलिपुत्रादीति। 'यतश्चेति'। यदवधित्वेनाश्रित्याध्वकालयोः परिच्छेदस्तत इत्यर्थः। गवीधुमन्नाम नगरं, सांकाश्यं तपोवनं, कृत्तिकायुक्ता पौर्णमासी कार्त्तिकी, पौर्णमास्यां 'लुबविशेष' इति लुप्न भवति 'सास्मिन्पौर्णमासी' त्यधिकारे विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्य, इति निर्द्देशात्, अग्रे हायनमस्या इत्याग्रहायणी, प्रज्ञादेराकृतिगणत्वात्स्वार्थिकोण्, आग्रहायण्यश्वत्थादिति निपातनाण्णत्वम्। 'तद्युक्तादिति'। तेन पञ्चम्यन्तार्थेनार्थद्वारेण युक्तात्काले वर्त्तमानान्मासादिशब्दादित्यर्थः। यद्वा तथा पञ्चम्या युक्तो योर्थः कार्त्तिक्यादिस्ततः परो यः कालो मासादिस्तत्र वर्त्तमानादित्यर्थः। अर्थतश्च परत्वं न शब्दत इति व्यवहितेपि भवति, कार्त्तिक्याग्रहायण्योर्मध्यवर्त्ती मासः कार्त्तिक्याः परो भवति। 'अध्वन इति'। तद्युक्तादित्यपेक्ष्यते, प्रत्याख्यानं तु वाक्यैकदेशस्यात्र प्रयोगः, तदयमर्थः। गवीधुमतो निःसृत्य यदा चत्वारि योजनानि गतानि भवन्ति ततः सांकाश्यं, चतुर्षु योजनेषु गतेषु सत्सु सांकाश्यमिति, गतानीति च कर्मणि निष्ठा यदा जनैर्योजनानि गतानि भवन्ति ततस्तैः सांकाश्यं प्राप्यतइत्यर्थः। यद्वा ऽध्ववर्त्तिनां निःसरणं गमनं वाध्वन्यारोप्य निःसृत्य गतानीति ल्यपः कर्त्तरि क्तस्य च प्रयोगः, तस्य प्रतीयमाननिःसरणक्रियापेक्षयापादानत्वं, गतानीति च प्रातिपदिकार्थस्याव्यतिरेकात्प्रथमा, गतेषु

सत्स्विति 'यस्य च भावेन भावलक्षण' मिति सप्तमी, आग्रहायणी मास इति कार्त्तिक्याः परत्र मासे गते सति आग्रहायणी भवतीत्यर्थः, तत्र दिग्योगलक्षणा पञ्चमी, सप्तमी पूर्ववत् ॥

"अन्याराद्दितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते" ॥ 'अन्य इत्यर्थग्रहणमिति'। व्याख्यानात्। 'निर्द्दिश्यमानप्रतियोगीति'। यथा देवदत्तयज्ञदत्तयोः प्रकृतयोराह देवदत्तः शूर इतरः कातर इति तस्यान्यार्थोन्तर्भावोस्तीति चिन्त्यम्। 'ऋते यज्ञदत्तादिति'। कथं यत्किञ्चिद्राजसूयमृते सोमःमिति, छान्दसत्वात्, कथं न मामृते राम रमेत बालीति, क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृतइति च। निरङ्कुशाः कवयः। 'शब्दग्रहणमिति'। सति हि तस्मिन् दिशि दृष्टः शब्दो दिक्शब्द इत्युत्तरपदलोपी समासो लभ्यते, तेन यदा कदा चिद्दिशि दृष्टेन संप्रति देशकालवर्त्तिनापि योगे भवति ग्रामात्पूर्वो देशश्चैत्रात्पूर्वः फाल्गुन इति, अवयववाचिभिस्तु योगे न भवति पूर्वं कायस्येति, 'तस्य परमाम्रेडित'मिति निर्द्देशात्। 'ननु चायमपीति'। सध्र्यङ् देवदत्तेनेत्यादावदिक्शब्दार्थमञ्चूत्तरपदग्रहणं न भवति दिक्शब्दे साहचर्यादस्यापि दिक्शब्दस्यैव ग्रहणादिति भावः। 'दक्षिणेति'। 'दक्षिणादाच्' 'आहि च दूरे' 'उत्तराच्चे' त्याजाही प्रत्ययौ ॥

"अष्टातसर्थप्रत्ययेन" ॥ अत्र तस्यतेर्नञ्पूर्वस्य क्विप्यतसिति-रूपसम्भवेपि प्रत्ययश्रुतत्वात्प्रत्ययाप्रत्ययपरिभाषया च प्रत्ययस्यैव ग्रहणमिति सिद्धं नार्थः प्रत्ययग्रहणेन। 'पुरस्तादिति'। 'पूर्वाधरावराणामसि पुरधवश्चैषा' 'अस्ताति चे' ति पूर्वशब्दस्य पुरादेशः। 'उपर्युपरिष्टादिति'। ऊर्ध्वशब्दस्योपशब्द आदेशो रिल्रिष्टातिलौ प्रत्ययौ भवतः, ततः पश्चाद्रुस्तीति भाष्यकारप्रयोगात्पञ्चमी ॥

"एनपा द्वितीया" ॥ तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं, स्त्र्यधिकारात्परेण वासरूपविधिनाऽवश्यं भवति, ततः परेण नायमनुवर्त्तत इत्यादीनां चिन्त्यं साधुत्वम् ॥

"पृथग्विनानानाभिस्तृतीयान्यतरस्याम्" ॥ अन्यतरस्यांग्रहणेन पक्षे यथाप्राप्तस्याभ्यनुज्ञानात् तृतीयया मुक्ते शेषत्वात्पक्षे षष्ठी प्राप्नोति, अथ स्यादनेकार्थत्वान्निपातानामन्यतरस्यांग्रहणं समुच्चयार्थं न विकल्पार्थमिति, एवमप्यनन्तरा द्वितीया समुच्चीयेत, अथापि योगविभागेनास्या अपि सिद्धिः, एवमपि तदनन्तरा षष्ठी समुच्चीयेत न कथं चन पञ्चमी सा चेष्यते तत्कथमित्याह । 'पञ्चमीग्रहणमिति' । 'इहेति' । न पूर्वयोर्योगयोः मण्डूकगतयोऽधिकारा भवन्ति, यद्यनुवृत्तिसामर्थ्यात्पञ्चमी, अन्यतरस्यांग्रहणं तर्हि किमर्थं समुच्चयार्थं तत्र किं समुच्चीयतइत्यपेक्षायां पञ्चमीग्रहणमिहानुवर्ततइत्युच्यते । 'योगविभागः कर्त्तव्य इति' । असत्यपि मुनित्रयवचने प्रयोगबाहुल्यादेवं व्याख्यातम् ॥

"करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य" ॥ 'यदा धर्ममात्रमिति' । यद्योगाद् द्रव्यं स्तोकादिव्यपदेशमासादयति ते गुणा धर्माः, उभयवचना ह्येते द्रव्यमाहुर्गुणं च शुक्लादिवत्, यदा गुणवचनास्तदा ऽसत्त्ववचनतेत्यर्थः । 'क्रियाविशेषणे कर्मणीति' । आख्यातेन हि क्रिया साध्यमानावस्थोच्यते चलति चलनं करोतीति अतस्तद्विशेषणं स्तोकादि कर्म भवति स्तोकं चलनं करोतीति, एवं तु विशेष्यवचनस्तोकशब्दो द्रव्यवचन इति नात्र प्रसङ्गः, यत्र च फलान्तरं साध्यं प्रति धात्वर्थः करणतया विवक्ष्यते तत्र विशेषणत्वं न स्यात् शोभनं ज्योतिष्टोमेन स्वर्गकामो यजेतेति, अत्र हि यथा फलभावनायां करणभूतस्य यागस्याभिधायकाद् ज्योतिष्टोमशब्दात् तृतीया भवति तथा तद्विशेषणाच्छोभनशब्दादपि स्यात् । अन्यस्त्वाह । संदर्शनप्रार्थनाध्यवसायैराप्यमानत्वात्क्रियायाः कर्मत्वात् तद्विशेषणस्य कर्मत्वं स्यादिति, तस्यापि संदर्शनादीनां क्रियायाश्चाभेदविवक्षायां कर्मत्वं न स्याद् नहि तत्र क्रियायाः कर्मत्वमस्ति ॥

"दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्" ॥ पक्षे पञ्चम्यर्थं वचनं षष्ठी तु शेषत्वादेव सिद्धा, यद्येवमन्यतरस्यांग्रहणमनर्थकं षष्ठीमात्रवचने वैयर्थ्यादेव प्रकृता पञ्चम्यपि विधायिष्यते तत्राह । 'अन्यतरस्यांग्रहण-

Digitized by Google

मिति’। वचनसामर्थ्याद्धि प्रकृतविधाने विज्ञायमाने तृतीयाया अपि विधिः स्यात्, ननु कृतमप्यन्यतरस्यांग्रहणं विकल्पार्थं समुच्चयार्थं वा, विकल्पार्थे तावत् षष्ठ्या मुक्ते स्वादिसूत्रेणाप्राप्ताः सर्वा एव विभक्तयः स्युः, समुच्चयार्थेपि प्रकृता तृतीया कस्मान्न समुच्चीयते, उच्यते। पृथग्विनानानाभिरित्यत्र तावदन्यतरस्यांग्रहणेन पञ्चमी समुच्चीयतइत्युक्तमत इहाप्येकप्रघट्टकत्वात्सैव समुच्चीयते, अत एतदपि न चोदनीयमन्यतरस्यांग्रहणे प्रकृते पुनरन्यतरस्यांग्रहणं किमर्थमिति, तत्रापि हि पक्षे तृतीया स्यात्॥

“दूरान्तिकार्थेभ्यो द्वितीया च”॥ ‘प्रातिपदिकार्थे विधानमिति’। अर्थान्तरस्यानिर्देशादिति भावः। नन्वनिर्देशेप्यर्थान्तरस्य शेषविषये पूर्वविभक्तिविषये च विधानमेतद्युक्तं प्रथमा विषये तु परत्वात्सैव प्राप्नोति। नैष दोषः। उत्तरत्राप्येतदनुवर्त्तते तेनोत्तरविभक्तिविषयेपि सर्वत्र यथाभिधानं भवति, तथा च दूरादावसथान्मूत्रमित्यधिकरणेपि भवति आवसथस्य दूर इत्यर्थः। प्रातिपदिकार्थे विधानमित्येतदुदाहृतविषयं द्रष्टव्यं, तथा च सत्त्ववचनेभ्यो यथायथं विभक्तयो भवन्तीति वक्ष्यति, प्रातिपदिकार्थएव तु विधाने यथायथमित्यनुपपन्नं प्रथमैव भवतीति वाच्यं स्यात्॥

“सप्तम्यधिकरणे च”॥ ‘क्तस्येन्विषयस्येति’। इनन्तः शब्दो विषयो वृत्तिभूमिर्यस्य क्तान्तस्य तस्येत्यर्थः। ‘अधीती व्याकरणइति’। अधीतमनेनेति विगृह्य श्राद्धमनेन भुक्तमित्यतोऽनेनेति वर्त्तमाने ‘इष्टादिभ्यश्चे’तीनिप्रत्यये कृते तद्धितार्थेन कर्त्रा सहैकीभूतस्याधीतस्य निष्कृष्य व्याकरणादिना सम्बन्धाभावात् क्तप्रत्ययेनानभिहिते व्याकरणादौ गुणभूतयापि प्रकृतिवाच्ययाध्ययनक्रिययाऽधीतवान् व्याकरणमितिवत् कर्मतया सम्बध्यमाने कृतपूर्वीकटमितिवद् द्वितीयायां प्राप्तायां सप्तमी विधीयते। इह मासमधीती व्याकरणइति कालकर्मणो बहिरङ्गत्वात्सप्तम्यभावः। ‘साधुर्देवदत्तो मातरीति’। अत्र साधुत्वासाधुत्वयोर्मातापितृविषयत्वेपि क्रियाया अभावादधिकरणत्वाभावाद्वचनं,

Digitized by Google

साधुनिपुणाभ्यामित्येव सिद्धेरर्चार्थमत्र साधुग्रहणं, तेन तत्त्वकथनेपि भवति, अर्चाग्रहणं तत्र निपुणार्थं, कथं तर्हि तत्र प्रत्युदाहरिष्यते अर्चायामिति किं साधुर्भृत्यो राज्ञ इति । उच्यते । राज्ञो भृत्येन सह शाब्दोऽन्वयो न साधुना राज्ञो भृत्यः स साधुरिति, तत्र राजनि वान्यत्र वेति नैतच्छब्देन स्पृश्यते प्रत्यासत्त्या तु राजविषयमेव साधुत्वं गम्यत-इत्येतावता तत्प्रत्युदाहरणं द्रष्टव्यम् । 'कारकार्हाणामिति' । कारक-शब्दो भावसाधनः, कारकत्वार्हाणामित्यर्थः । 'ऋद्धेष्विति' । ऋद्धा भोज-नक्रियामर्हन्तीति कारकार्हाः, लक्ष्यलक्षणभावाविवक्षायामपि यथा स्यादि-ति वचनम् । 'दरिद्रेष्वासीनेष्विति' । दरिद्रा भोक्तुं नार्हन्तीत्यकारकार्हाः । 'तद्विपर्यासे चेति' । कारकार्हाणामकारकत्वेऽकारकार्हाणां च कारकत्व-इत्यर्थः । 'निमित्तात्कर्मयोग इति' । यत् क्रियाप्रयोजनं यदर्थः क्रियारम्भ-स्तत्फलमिह निमित्तं, तद्वाचिनः सप्तमी भवति यदि तस्य निमित्तस्य क-र्मणा कर्तुरीप्सिततमेन सह समवायादिलक्षणः सम्बन्धो भवतीत्यर्थस्तत्र हेतुतृतीयायां प्राप्तायां वचनं, तत्र हन्तिकर्मणा द्वीप्यादिना चर्मादेर्नि-मित्तस्य समवायः सम्बन्धः । 'चमरीमिति' । चमरशब्दाज्जातिलक्षणो ङीष्, पुष्कलकः शङ्कुः स सीम्नि सीमाज्ञानार्थं हतो निखात इत्यर्थः, तेन च निहन्यमानेन शङ्कुना सीम्नः संयोगः सम्बन्धः, । कर्मसम्बन्धइति किं, वेतनेन धान्यं लुनाति ॥

"यस्य च भावेन भावलक्षणम्" ॥ इह भूयो दर्शनाश्रयो लक्ष्य-लक्षणभावो यथाग्निधूमयोः, ततश्चोदितआदित्ये तमो नष्टम्, उदिते चन्द्रमसि समुद्रः प्रवृद्ध इत्यादावेव स्यात् इह त्वग्निषु हूयमानेषु गत इत्यग्निहवनं यदा गमनेन सह पुनःपुनर्न दृष्टचरं तदा न तत्तस्य लक्षणमितीह न स्यादित्याशङ्क्याह । 'प्रसिद्धा च क्रियेति' । प्रसिद्धिरेव क्रियायाः क्रियां प्रति लक्षणत्वे उपयुज्यते न पुनर्दर्शनम्, एतदुक्तं भवति निर्ज्ञातकाला क्रियाऽनिर्ज्ञातायाः क्रियायाः सकृदपि कालपरिच्छेदहेतु-त्वेनोपात्ता भवत्येव लक्षणमिति ॥

Digitized by Google

“षष्ठी चानादरे” ॥ अनादरइति पूर्वेण सप्तमी, एतच्च भावलक्षणभावस्य विशेषणं यश्चानादरे सति भावलक्षणः सोनादराधिको भवतीत्याह । ‘अनादराधिकइति’ । अनादरविशिष्टेऽनाद्रियमाणइत्यर्थः । ‘रुदतः प्राव्राजीदिति’ । पित्रादिकस्य रोदनमनादृत्य प्रव्रज्यां कृतवानित्यर्थः ॥

“स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च” ॥ ‘गवां दायाद इति’ । दीयत इति दायो ऽंशः, दायमादत्त इति सोपसर्गादपि दायाद इति निपातनात्कः, गवामित्येतत्समुदायस्य विशेषणमवयवमपि दायांशं स्पृशतीति गवात्मकस्य दायस्यादातेत्ययमर्थो भवति । ‘गवां प्रसूत इति’ । गा एवानुभवितुं जात इत्यर्थः ॥

“आयुक्तकुशलाभ्यां चासेवायाम्” ॥ ‘आ युक्तो गौः शकट इति’ । आङीषदर्थे ईषद्युक्त इत्यर्थः ॥

“यतश्च निर्द्धारणम्” ॥ ‘जातिगुणक्रियाभिरिति’ । प्रदर्शनमेतत् । अमीषां छात्राणां देवदत्तः पटुरिति संज्ञयापि निर्द्धारणदर्शनात् ॥

“पञ्चमी विभक्ते” ॥ ‘विभक्तमस्यास्तीति’ । निर्द्धार्यमाणात्, एतदुक्तं भवति, निर्द्धार्यमाणस्य निर्द्धारणाश्रयस्य च विभागे सति निर्द्धारणं भवति ततश्च सर्वत्रैव निर्द्धारणाश्रये विभक्तमस्तीति सामर्थ्यादवधारणमाश्रीयते यस्मिन्निर्द्धारणाश्रये विभाग एव न केन चिदात्मभाव इति, तेन गवां कृष्णेत्यादौ यद्यपि गोमण्डलात्कृष्णा गौः पृथक् क्रियते तथापि गवात्मनान्तर्भावोस्तीति न भवति, उदाहरणे तु माथुराणां पाटलिपुत्रेषु प्राणित्वेनान्तर्भावेपि शब्दोपात्ताकारापेक्षयानन्तर्भावाद्विभाग एव भवति, प्रत्याख्यातं चैतत्सूत्रमपादानप्रकरणे बुद्ध्या समीहितैकत्वात्पञ्चालान् कुरुभिः पृथग् यदा विभजते वक्ता तदा ऽपायः प्रतीयतइति ॥

“साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः” ॥ साधुशब्दः कृवापाजिमीत्युणान्तः, पुण कर्मणि शुभइत्यस्मादिगुपधेति के निपुण इति

भवति, अर्च पूजायामित्यस्माच्चौरादिका 'गुरोश्च हल' इत्यकारः, चौरादिकास्तु युचा भाव्यम्। अप्रतेरित्यत्र प्रयोग इत्यध्याहार्यं तदाह 'न चेत्प्रतिः प्रयुज्यत इति'। 'साधुर्भृत्यो राज्ञ इति'। पूर्वमेवैतद् दूषितमुपपादितं च, निपुणः पुत्रो मातुरिति तु तत्त्वकथने न्याय्यं प्रत्युदाहरणम् ॥

"प्रसितोत्सुकाभ्यां तृतीया च" ॥ षिञ् बन्धने प्रकर्षेण बद्धः प्रसितस्तदाह। 'यस्तत्र नित्यमवबद्ध इति'। नित्यमित्यनेन प्रशब्दस्यार्थमाचष्टे, अत्रबद्ध इवावबद्धः, यो हि यत्र प्रसक्तः स तत्रावबद्ध इव भवतीति भावः। तेन प्रकर्षेण सितः शुक्लतर इत्यस्य ग्रहणं न भवतीति प्रदर्शितं भवति। 'केशेषु प्रसित इति'। तत्पर इत्यर्थः ॥

"नक्षत्रे च लुपि" ॥ नक्षत्रे प्रकृत्यर्थे सति यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्त्तमानादिति सूत्रार्थरान्वयः, यच्चोच्यते। नक्षत्रे लुपीति पञ्चम्यर्थे सप्तमी लुबन्तान्नक्षत्रवाचिन इत्यर्थ इति, तत्रोत्तराभ्यां फल्गुनीभ्यां नोत्तरा गच्छेदिति विशेषणाच्च स्यात्तस्यालुबन्तत्वात्, कथं तर्हि लुबन्तान्नक्षत्राभिधायिनः शब्दादिति वृत्तिः, प्रायोवृत्त्यैतदुक्तं लुबन्तार्थाभिधायी प्रायेण लुबन्तो भवति, लुबर्थाभिधायिनः शब्दमात्रादित्यर्थः। 'लुबन्तादिति'। लुबन्ते समाप्तावस्येति बहुव्रीहिः, स्थानिद्वारकं च लुपोन्त्यावयवत्वं द्रष्टव्यम्। 'अधिकरण इति वर्त्तत इति'। एवं च पुष्यं प्रतीक्षते पुष्याय स्पृहयति पुष्यस्य समीप इत्यादावपि न भवति ॥

"प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" ॥ 'प्रातिपदिकार्थः सत्तेति'। अत्र जिघृक्षितस्येदं लक्षणं न प्रातिपदिकार्थमात्रस्य, गौः शुक्लः पाचको डित्थ इत्यादावसम्भवात्। योर्थः सत्तैव केवलं न जात्यादिरूपो न लिङ्गसङ्ख्याकारकशक्तियोगी स इह प्रातिपदिकार्थत्वेन विवक्षितो यथाव्ययार्थ इत्यर्थः, अव्ययार्थो हि केवलमस्तीति शक्यते वक्तुं न पुनरीदृशस्तादृश इति गौः शुक्ल इत्यादौ तु सत्त्वरूपेर्थे लिङ्गग्रहणादेव सिद्ध्यतीति भावः। अन्ये त्वाहुः। अन्वयव्यतिरेकाभ्यां यस्य

योऽर्थः प्रतीतो यमर्थं प्रातिपदिकं न व्यभिचरति येन विना प्रातिपदिकस्याप्रयोगः स सर्वः प्रातिपदिकार्थः, सत्ताग्रहणं तूपलक्षणं तेन सत्ता गोत्वं शौक्ल्यं शुक्लो गुणः पाचको डित्थो गौः शुक्ल इत्यादिकमप्युदाहरणमिति। नन्वत्र सर्वत्र लिङ्गग्रहणादेव सिद्धं, न, मात्रग्रहणं क्रियते तच्चावधारणार्थं पयोमात्रं प्रतयतीतिवत्, ततश्च स्त्री पुमान्नपुंसकमित्यादावेव तु स्याद् यत्र लिङ्गमेवार्थः, सत्तेत्यादौ तु जात्यद्यधिकार्थसद्भावान्न स्यात्। अथ कन्यामात्रं वरयतीतिवन्मात्रशब्दस्य व्याप्तिवचनत्वाल्लिङ्गमात्रे प्रथमा लिङ्गमस्तीत्येव प्रथमा भवतीति व्याख्यानादधिकार्थसद्भावेऽपि प्रथमा भवतीत्युच्यते हन्त्वेवं वृक्षं पश्येत्यादौ कर्मादिसद्भावेऽपि लिङ्गमस्तीत्येव प्रथमा स्यात्, कर्मण्येव द्वितीयेत्यस्मिन्प्रत्ययनियमपक्षे कर्मादीनां द्वितीयादिष्वनियतत्वात्। 'वचनमेकत्वादीति'। पूर्वाचार्यप्रसिद्धेरिति भावः। 'उच्चैरिति'। अत्र प्रथमायां सत्यां ग्राम उच्चैस्तव स्वमित्यादौ 'सपूर्वायाः प्रथमाया विभाषे'ति तेमयादिविकल्पो भवति, पदत्वं तु षष्ठ्यापि सिद्धं, यस्मिन्नर्थे द्वितीयादयो न विहिताः स शेषः। नन्वसङ्ख्यत्वादव्ययार्थस्य कथं षष्ठी स्यात्, एकत्वाद्यर्थनियमे षष्ठ्याः सङ्ख्यायामनियतत्वात्, प्रत्ययनियमेऽपि तुल्यजातीयापेक्षत्वान्नियमस्यैकत्वादिभिः परस्परमेव व्यावर्त्तनात्, विधिवाक्यपेक्षे तु स्वादिसूत्रेण भिन्नवाक्यस्य 'बहुषु बहुवचन'मित्यादेः सङ्ख्यासम्भवे विध्यर्थत्वात्। ननु ङ्याप्प्रातिपदिकात्स्वादयो विधास्यन्ते तत्रार्थे प्रथमेत्युक्ते कस्यार्थ इत्यपेक्षायां यस्मात्स्वादिविधिस्तदर्थ इति विज्ञास्यते नार्थः प्रातिपदिकग्रहणेन, तत्रायमप्यर्थः। लिङ्गग्रहणं न कर्त्तव्यं भवति कुमारी सीमेत्यादावप्यत एव सिद्धं प्रातिपदिकग्रहणे तु क्रियमाणे सीमादिशब्दानां स्त्रीयुक्तार्थाव्यभिचारेऽपि प्रत्ययान्तत्वेनाप्रातिपदिकत्वात्तदर्थं प्रथमासिद्ध्यर्थं लिङ्गग्रहणं कर्त्तव्यं स्यात्। उच्यते। प्रातिपदिकग्रहणं तावदर्थपदेनासम्बद्धमित्यत्रैव वक्ष्यते, लिङ्गग्रहणमनेकलिङ्गार्थं, तटस्तटं तटी कुमारः कुमारी कुण्डं कुण्डः कुण्डिका, अन्यथा येनार्थेन विना प्रकृतेरप्रयोगस्तदर्थमात्रे विधीयमाना प्रथमा नानालिङ्गेभ्यस्तत्तद्विशेषमन्तरेण प्रयुज्यमानेभ्यो न स्यात्, अथ मात्रग्रह-

Digitized by Google

णामकृत्वा व्याप्तिवचनं वाङ्गीकृत्याधिकार्थमद्भावेपि प्रकृत्यर्थस्यान्वय इति स्यात्, यद्येवं वृक्षं पश्येत्यादौ कर्माद्याधिक्येपि स्यात्प्रत्ययार्थनियमपक्षे, तदिह वृक्षौ कुमारी कुण्डमित्युदाहरणं वृक्षशब्दस्त्वर्थादुदाहृतः। ननु माभून्मात्रग्रहणं मा च भूल्लिङ्गग्रहणं मा च कारि 'संबोधने चे'ति सूत्रं सर्वत्रार्थइत्येव प्रथमा भविष्यति, न चैवं कर्मादिष्वपि प्रसङ्गः, कर्मणि द्वितीयैवेत्येवमर्थनियमस्याश्रयणात्, एवमपि राज्ञः पुरुष इति षष्ठ्यर्थेपि स्यात्, शेषलक्षणा हि षष्ठी उपययुक्तादन्यश्च शेषस्तत्र यदि प्रकृत्यर्थस्याधिक्येपि प्रथमा स्यात् ततस्तस्यापि प्रथमा विधावुपयुक्तत्वात् षष्ठी न स्यात्। अथ वचनसामर्थ्यात्स्वस्वामिभावादौ षष्ठी भवन्ती लिङ्गाधिक्येपि स्याद् अतो मात्रग्रहणं तावत्कर्त्तव्यं तस्मिंश्च क्रियमाणे लिङ्गग्रहणं 'संबोधने चेति सूत्रं' च कर्त्तव्यं तदाधिक्येपि यथा स्यादिति। 'परिमाणग्रहणं किमिति'। अर्थइति वा लिङ्गइति वा सिद्धिं मन्यते। 'द्रोणःखारीति'। अयं भावः। येनार्थेन विना प्रकृतेरप्रयोगस्तस्मिन्नर्थे प्रथमा, द्रोणादयश्च लोहं दारुमयं परिमाणमेवार्थं न व्यभिचरन्ति, यदा तु द्रोणादिपरिमिते व्रीह्यादौ वर्त्तन्ते तदा तस्य व्यभिचारित्वान्न स्यात्। नच लिङ्गग्रहणादपि सिद्धिः, तदाधिक्यमात्रे हि तेन स्यादिति, परिमाणग्रहणं चोन्मानादीनामुपलक्षणं, तेन घृतं पलमित्यादावपि भवति। अथ लवणेन संसृष्टो लवणः सूपो लवणं शाकमित्यत्र कथं प्रथमा, लवणशब्दो हि लवणजातीयमेव द्रव्यं न व्यभिचरति व्यभिचरति तु संसृष्टम्। उच्यते। साधारणशब्दोयं लवणजातीयस्य संसृष्टस्य चाक्षादिशब्दवत्, एवं च 'लवणाल्लुगि'ति वचनाद्विज्ञायते तत्र यथा दधिदाधिकशब्दयोः प्रथमा भवत्येवमत्रापि भविष्यति, इह तर्हि कथं शुक्लः पट इति, शुक्लशब्दो गुणमेव न व्यभिचरति व्यभिचरति तु तद्गुणं पटस्य शुक्ल इति दर्शनात्, अत्रापि 'गुणवचनेभ्यो मतुपो लुग् वाच्य'इति वचनात्साधारणशब्दतैव, इह तर्हि कथं गौर्वाहीक इति, गोशब्दो हि सास्नादिमन्तमेव न व्यभिचरति व्यभिचरति तु वाहीकम्, अत्रापि वाहीके सास्नादिमद्रूपारोपाद्गोशब्दः प्रयुज्यते तत्र यथा सास्नादिमद्वृत्तेर्भवत्येवं वाहीकवृत्तेरपि भविष्यति।

सू० एभिरेव मन्त्रकृतो वृणीत इत्यादिभिर्वेदशब्दैः तत्तत्काण्डसूक्तमन्त्रकृतामृषीणामाकृतिशक्त्यादिकं परामृश्य तत्तदाकारास्तत्तच्छक्तियुताँश्च सृष्ट्वा प्रजापतिस्तानेव तत्तन्मन्त्रादिस्मरणे नियुङ्क्ते, ते च प्रजापतिनाऽऽचितशक्तयस्तत्तदनुगुणन्तपस्तप्त्वा वीर्य्यसिद्धान् पूर्वपूर्वेवनिष्ठादिसृष्टान्मन्त्रादीननधीत्यैव स्वरतो वर्णतश्चाऽस्खलितान् पश्यन्ति, अतश्च वेदानां नित्यत्वमेषाञ्च मन्त्रकृत्त्वमुपपद्यते ।

टी० "एभिरेवे"ति, मन्त्रकृत्त्वं नाम अनधीत्यैव मन्त्राणामस्खलितक्रमस्वरवर्णतया दर्शनं, तच्च तत्तन्मन्त्रस्मृतिपूर्वकं प्रजापतिना यथा पूर्वं सृष्टैस्तत्तन्नामरूपभाग्भिः प्रवाहपरम्परयाऽऽगतैर्वसिष्ठादिभिः क्रियत इति वेदनित्यत्वमन्त्रकृत्त्वाविरोध इत्यर्थः, नियुङ्क्ते—मन्त्रदर्शनानुगुणं तपश्चरतेति नियुङ्क्ते इत्यर्थः, अस्खलितान् पश्यन्ति पूर्वकल्पाधीतवेदमन्त्रत्वप्रत्यभिज्ञानपूर्वकं पश्यन्ति न त्विदम्प्रथमतयेत्यर्थः, श्रुतिरपि ऋषिज्ञानपूर्वकमेव मन्त्राणामनुष्ठानं दर्शयति "यो ह वा अविदितार्षेयच्छन्दोदैवतेन मन्त्रेण यजति याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यते प्रवामीयते पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति अथ यो मन्त्रे मन्त्रे वेद स सर्वमायुरेति, श्रेयाँश्च भवति अयातयामान्यस्य छन्दांसि भवन्ति तस्मादेतानि मन्त्रे मन्त्रे विद्यादि"ति, शौनकादिभिश्च स्मर्यते "दाशतय्योमधुच्छन्दप्रभृतिभिर्दृष्टा"इति, उक्तं च भगवता व्यासेनैव"युगान्तेऽन्तर्हितान्वेदान्सेतिहासान्महर्षयः । लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवे"ति,एवमादि चात्र प्रमाणं द्रष्टव्यम् । ननु इतिहासानामप्यपौरुषेयत्वम् वेदानां वा पौरुषेयत्वं प्रसजेदस्मिन् वचने वेदानामितिहाससहपाठेन तुल्ययोगक्षेमत्वादिति चेन्नेतिहास-शब्दे न वेद-शब्दान्तर्गतानां पुरावृत्तानां विवक्षितत्वात्, यथा वातरशना ह वा ऋषयः श्रमणा ऊर्ध्वमन्थिनो बभुवुः, पृथुर्वैन्योऽभिषिच्यत उशन्ह वै वाजश्रवसः सर्ववेदसन्ददावित्यादीनि पुरावृत्तानि हि

Digitized by Google

श्रूयन्ते, ततश्च सेतिहासानित्यनेन वेदानामर्थज्ञानेन सह लब्धत्वमुक्तं भवति अतो न प्रबन्धविशेषवाचकोऽयमितिहास-शब्दः, अङ्गेषु धर्मशास्त्रादिषु च सत्स्वपीतिहासमात्रोपादानस्य प्रयोजनाभावात्, तथाऽन्यत्र "ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः। शर्वर्यन्ते प्रसूतानां तान्येवैभ्यो ददात्यजः" इति वेददर्शनप्रदानं च स्मर्यते, काठकादिशब्दैश्च कल्पादावृषिभिस्तपसा लब्धवेदभागानां प्रवर्तितत्वाच्चभाति, न तावत्कठेनादौ प्रोक्तं काठकमिति वेदपौरुषेयत्ववादिनोऽप्यभीष्टम्, ईश्वरप्रणीतत्वविरोधात् । अथ काठकादिसमाख्याः प्रवचननिमित्ताः न इदानींन्तनप्रवक्तृसंज्ञाभिश्च व्यपदेशप्रसङ्गात्, कठादिभ्यः पूर्वेगुरुसंज्ञाभिश्च समाख्यानप्रसङ्गात्, पूर्वं त्वनेकशाखाध्यायिनः कठादयस्त्वेकैकशाखाऽध्यायिन इति तत्तन्नाम्ना समाख्यानमिति न वाच्यं, सर्वेषां तत्पूर्वपुरुषाणां बहुशाखाऽध्यायित्वनियमस्यामानकत्वात्, दृष्टविपर्ययेण कल्पनानुपपत्तेश्च । अथ कल्पादिषु प्रथमप्रवचननिबन्धनाः कठादिसमाख्याः तन्निबन्धनत्वं च जगन्नित्यत्ववादे ऽनुपपन्नं प्रथमप्रवचनासंभवात्, अतः काठकादिसमाख्याऽन्यथाऽनुपपत्तिश्च महर्षीणां तपसा दृष्टवेदभागत्वे प्रमाणम्, एवं "यो वै वेदांश्च प्रहिणोति" "ब्रह्मा स्वयंभ्वभ्यानर्षत्" इत्यारभ्य त एतं ब्रह्मयज्ञमपश्यन् वाचा विरूपनित्यया वेदेन रूपे व्याकरोत्" "अनादिनिधना ह्येषा याश्च देवेषु दृष्टयः वेदशब्देभ्य एवादौ युगान्तेऽन्तर्हितान्वेदानित्यादिवचनैराद्ये कल्पे प्रथमं वेदोच्चारणं यथापूर्वक्रमविशेषविशिष्टं वेदोच्चारणत्वादिदानीन्तनवदित्यादिभिरनुमानैरुपपत्तिभिश्च वेदनित्यत्वस्याप्रकम्प्यत्वात्, तदनुरोधाय मन्त्रकृत्त्वादिपदान्यस्वारस्येन व्याख्यातानि । उत्तरसूत्रशङ्कामवतारयति-

सू० अथ स्यान्नैमित्तिकप्रलयादिषिन्द्राद्युत्पत्तौ वेदशब्देभ्यः पूर्वपूर्वेन्द्रादिस्मरणेन प्रजापतिना देवादिसृष्टिरुपपद्यतां नाम प्राकृतप्रलये तु स्रष्टुः प्रजापतेः भूताद्यहङ्कारपरिणामशब्दस्य च नष्टत्वात् कथं प्रजापतेः शब्दपूर्विका सृष्टिरुपपद्यते कथन्तरां विनष्टस्य वेदस्य नित्यत्वम् अतो

वेदनित्यत्ववादिना देवादीनां विग्रहवत्त्वाभ्युपगमे लोकव्यवहारस्य प्रवाहानादिताऽऽश्रयणीयेति, अत उत्तरं पठति—

सू० समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॥ २९ ॥

कल्पोपसंहारे जगदुत्पत्त्यावृत्तावपि पूर्वोक्तात्समाननामरूपत्वादेव न कश्चिद्विरोधः ।

टी० "अथ स्यादि"ति महाप्रलये तत्तदर्थस्मृतिपूर्वकस्रष्टृसंप्रदायप्रवर्त्तकस्य प्रजापतेस्तत्प्रवर्त्यस्य शब्दस्य चाभावाच्च शब्दनित्यत्वमिति प्रपञ्चप्रवाहानादित्वमाश्रयणीयमिति चोद्यपरिहारार्थमिदं सूत्रमित्यर्थः, सू० समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च, पूर्वोक्तात्समाननामरूपत्वादेवेति पूर्वसूत्रद्वयोक्तया तत्तच्छब्देन तत्तदर्थस्मृतिपूर्विकया तत्तदाकृतिविशिष्टवस्तुसृष्ट्या समाननामरूपत्वमुक्तमिति फलितम्, अतः पूर्वोक्तादित्युक्तम्, एवकारेण सूत्रस्थश्च—शब्दोऽवधारणार्थे इति गम्यते, समाननामरूपत्वमनुपपन्नं तत्तच्छब्दस्मृतिपूर्वकतत्तदर्थस्र[1]ष्टुरभावादित्यत आह—

भा० तथा हि स भगवान् पुरुषोत्तमः प्रलयाऽवसानसमये पूर्वसंस्थानं जगत्स्मरन् बहु स्यामिति सङ्कल्प्य भोग्यभोक्तृजातं स्वस्मिन् शक्तिमात्रावशेषं प्रलीनं विभज्य महदादिब्रह्माण्डहिरण्यगर्भपर्य्यन्तं यथापूर्वं सृष्ट्वा वेदांश्च पूर्वानुपूर्वीविशेषसंस्थितानाविष्कृत्य हिरण्यगर्भायोपदिश्य पूर्ववदेव देवाद्याकारजगत्सर्गे तं नियुज्य स्वयमपि तदन्तरात्मतयाऽवतस्थे, अतो यथोक्तं सर्वमुपपन्नम्, एतदेव च

१ स्रष्टुरभावादिति पा० ।

Digitized by Google

वेदस्यापौरुषेयत्वं नित्यत्वञ्च यत्पूर्वपूर्वोच्चारणक्रमजनित-संस्कारेण तमेव क्रमविशेषं स्मृत्वा तेनैव क्रमेणोचार्य्यत्वम् ।

टी० "तथा ही"ति स इति, श्रुतिप्रसिद्धिं द्योतयति भगवानिति ज्ञानशक्त्यादिवैचित्र्यं, भगवत्पुरुषोत्तम–शब्दाभ्यां सर्वव्यापी च भगवान्महान् प्रभुर्वै पुरुष इत्यादिश्वेताश्वतरवाक्यं स्मारितं शक्तिमात्रावशेषमिति विद्यमानस्यैव भोग्यभोक्तृवर्गस्य भोग्यत्वाद्यनुगुणशक्तिरस्ति न तु तत्कार्यं भोक्तृत्वादिकमिति भावः । चतुर्मुखादेरेव स्वतन्त्रस्रष्टृत्वभ्रमनिरासायाह "स्वयमपी"ति, "तवान्तरात्मा मम ये ये चान्ये देहि संज्ञिताः । सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केन चित्क्वचि" दिति चतुर्मुखवचनं "सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते" इति भगवद्वचनं तदनुप्रविश्येति सामान्यविषयां श्रुतिञ्च प्रमाणमभिप्रेत्याह "तदन्तरात्मतये"ति, अनेन चतुर्मुखपरमात्मनोः कर्तृत्ववचसामैककण्ठ्यसिद्धिः सर्वमुपपन्नमिति सामाननामरूपत्वात्तत्कृतवेदनित्यत्वनस्सार्थकत्वान्युपपन्नानीत्यर्थः, शब्दस्य उत्पत्तिविनाशाभ्युपगमेऽपि कथं वेदनित्यत्वसिद्धिरित्यत्राह "एतदेव चे"ति, अक्षराणां पदानां वा नित्यत्वाद्वेदनित्यत्वं चेत् कालिदासादिवाक्यानामपि नित्यत्वप्रसङ्गः वर्णानुपूर्वीनित्यत्वं चेत् तदप्यनुपपन्नं, युगपत्सर्गप्रलयमनभ्युपगच्छद्भिर्वर्णानां विभुत्वाभ्युपगमात् न देशत आनुपूर्वी सम्भवति नित्यत्वाभ्युपगमाच्च न कालतः, तस्मात् उच्चारणगतः क्रम इति तैरभ्युपेयम् उच्चारणं तु उत्पत्तिविनाशवदेवेति क्रमनित्यत्वमप्यनुपपन्नन्तस्मात्पूर्वपूर्वोच्चारणक्रमविशेषो यादृशस्तादृशेनैव क्रमेणोत्तरोत्तरमुच्चार्यत्वं नित्यत्वमित्यस्मदभिमतमेव तैरपि स्वीकर्त्तव्यमित्यभिप्रायेण एतदेवेत्युक्तम् । ननु पूर्वान्ताभावः पुरुषकृतत्वाभावो वा स्यादपौरुषेयता उत्तरान्तभाव उभयान्ताभावो वा नित्यता, क्रमविशेषेणोच्चार्य्यत्वन्तु वेदस्य स्वरूपं कथमेषामेकत्वं, सत्यं, द्विविधावधिवैधुर्यरूपनित्यत्वमेव वेदे विवक्षितं तथाऽपि पूर्वावधिविधूननं प्राधान्येन सिषाधयिषितं स्वतन्त्रपुरुषविश्रान्तेर्निरसनीयत्वात् तन्निरसने च प्रतिकल्पं तथा भावे न उत्तरावधिवैधुर्यसिद्धेश्च अतो वेदस्य

नित्यत्वमपौरुषेयत्वं चैकमिति फलितं, तच्चापौरुषेयत्वं नित्यत्वं वा वेदे क्रमविशेषविशिष्टोच्चारणभाक्त्वे पर्यवसितम्, अपूर्वक्रमविशिष्टोच्चारयितृपुरुषसद्भावातिरेकेण अनित्यत्वपौरुषेयत्वयोरभावान्नित्यत्वापौरुषेयत्वयोस्तद्विपरीतरूपत्वाच्च । यद्वा तेनैव क्रमेण सर्वदोच्चार्यमाणत्वमपौरुषेयत्वनित्यत्वयोस्साधकमिति हेतुहेतुमद्भावादभेदव्यपदेशः, एवमेव भगवताऽप्युच्चार्यमाणत्वाद्युगपत्सर्वोत्पत्तिसंहारेऽपिनित्यत्वमुपपन्नमित्यभिप्रायेणाह "तदस्मास्वि"ति, सर्वेश्वरोऽपि पूर्वक्रमविशेषं स्मृत्वोच्चारयति चेत्तत्संस्कारोद्बोधात् पूर्वमज्ञत्वमन्याधीनज्ञानत्वञ्च स्यादित्यत्राह "इयांस्त्वि"-ति, अस्माकं स्वोच्चारणजनितसंस्कारानपेक्षोच्चारणमध्यापयितृसापेक्षम्

सू० तदस्मासु सर्वेश्वरेऽपि समानम्, इयांस्तु विशेषः संस्कारानपेक्षमेव स्वयमेवानुसन्धत्ते पुरुषोत्तमः, कुत इदं यथोक्तमवगम्यत इति चेत्तत्राह—

अध्यापयितृनिरपेक्षोच्चारणं स्वोच्चारणजनितसंस्कारसापेक्षम् एतदुभयं व्यावर्त्तयति "संस्कारानपेक्षं स्वयमेवे"ति, स्वयमेवेत्यध्यापकोच्चारणजनितसंस्कारापेक्षाव्यावृत्तिः । यद्वा संस्कारानपेक्षमध्यापकोच्चारणस्वोच्चारणजनितसंस्कारानपेक्षमित्यर्थः । स्वतन्त्रस्येश्वरस्य क्रमान्तरापरिकल्पनेन पूर्वक्रमेणोच्चारणे को नियामक ? इत्यत्राह "स्वयमेवे"ति, वेदाख्यं शब्दराशिं पूर्वपूर्वक्रमविशिष्टमेव उच्चा[1]रणीयं न तु क्रमान्तरकल्पनीयमिति बहु स्यामितिवत् स्वसङ्कल्पादेव क्रमान्तरमपरिकल्पयन् यथापूर्वमनुसन्धत्ते, नत्वन्यपरतन्त्रतयेत्यर्थः । अनुसन्धत्ते=जानातीत्यर्थः स्मरणार्थत्वे संस्कारानपेक्षत्वव्याघातात् । ननु संस्कारास्ते ऽभवन्वेदा इति स्मृत्या वेदानामीश्वरस्मृतिविषयत्वमवगम्यते, नैवं संस्कार-शब्दस्य स्मृतिविषयवाचित्वाभावात् स्मृतेःसंस्कारकार्यत्वात्तद्विषयोलक्षितलक्षणया प्रतिपाद्यत इति चेत्तर्हि प्रमाणविरुद्धलक्षणायाः प्रमाणानुसारिणी लक्षणा बलीयसीति, ईश्वरस्य च स्वतः सर्वदा सम्यक् सर्वार्थसाक्षात्कारित्वं यः सर्वज्ञस्सर्व-

१ उच्चारयेयम् इति पा० ।

वित् पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतिसिद्धं ज्ञानस्य स्वाभाविकत्वमिन्द्रियादिनैरपेक्ष्यं विविधत्वं विषयवैविध्यात्, परत्वं याथार्थ्यापरोक्षत्वरूपप्रकर्षः अतस्तदनुगुणाया लक्षणाया भवितव्यं, ततश्च संस्कारा इति संस्कारबोध्या यथापूर्वं बुद्धिस्था इत्यर्थः । यद्वा संस्कारवत्स्वस्मिन्नवस्थिता इत्यर्थः । नन्वीश्वरस्य सर्वज्ञतया शब्दानां सर्वा अप्यानुपूर्व्यः सदा बुद्धिस्था इति सर्ववाक्यानामनाद्यानुपूर्वीविशिष्टतया वेदत्वं स्यात्, पौरुषेयापौरुषेयविभागश्च न स्यात्, नैवम् ईश्वरस्य सार्वज्ञ्यादेव सर्वविभागसिद्धेः सर्वासामानुपूर्वीणां तद्बुद्धिस्थत्वेऽपि यादृशक्रमविशिष्टशब्दराशेर्याथार्थ्यं स्वरादिनियमवत्त्वं देशकालादिनियमवत्त्वयैव उच्चार्यत्वं च तमेव शब्दराशिं वेदाख्यं मन्यमानस्तादृशक्रमविशिष्टं तमेव प्रतिब्रह्माण्डसर्गं प्रमाणतया प्रवर्तयति न त्वन्यच्छब्दजातम्, अतो याथार्थ्यसनियमकोच्चार्य्यत्वाभ्यां वेदावेदविभागसिद्धिः, सर्वदा पूर्वपूर्वक्रमपरामर्शसापेक्षोच्चारयितृकत्वं तन्निरपेक्षवक्तृकत्वं चेति पौरुषेयापौरुषेयवैषम्यमिति न काचिदनुपपत्तिरिति ।

भा० दर्शनात् स्मृतेश्च, दर्शनं तावत्, "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा"इति, स्मृतिरपि मानवी "आसीदिदन्तमोभूतमित्यारभ्य" सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु वीर्यमपासृजत् । तदण्डमभवद्धैमं सहस्रांशुसमप्रभन्तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः"इति, तथा पौराणिकाः "तस्य सुप्तस्य देवस्य नाभौ पद्ममजायत ।

टी० दर्शनात् स्मृतेश्चेति सौत्रपदद्वयस्य शङ्कामाह "कुत"इति, युगपत्सर्वस्रष्टो भगवतो यथापूर्वं वेदसम्प्रदायप्रवर्तकत्वे च श्रुतिस्मृती दर्शयति "दर्शनन्तावदि"त्यादिना, उदाहृतश्रुतिस्मृतिवाक्येषु सर्वेषु चतुर्मुखस्य भगवता सृष्टत्वं दृश्यते, वेदोपदेशस्तु केषुचिच्च दृश्यते तत्रानु-

त्समन्यतो यात्यमिति न्यायाद् वेदोपदेशोऽपि सृष्ट्युपयोगित्वात्सिध्यतीति भावः। सम्प्रदायप्रवर्त्तकसद्भावमात्रे प्रमाणं वा स्यात्तद्वचनजातम् उदाहृतवचनजातं प्रदर्शनार्थमीदृशानि वचनान्तराण्यपि अस्मिन्नर्थे द्रष्टव्यानि यथा "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवञ्च पृथिवीं चान्तरिक्षमथो सुवः" यथर्त्तुष्वृतुलिङ्गानि नानारूपाणि पर्य्यये। दृश्यन्ते तानि तान्येव तथा भावायुगादिषु" इत्यादिश्रुतिस्मृत्योर्वेदान्तसारे दर्शितत्वात्, "हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते। तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते" इत्यनेन पूर्वसृष्टिसारूप्यं प्रतीयते। किञ्च तथाभिमानिनो नीतास्तुल्यास्ते साम्प्रतैरिह देवा देवैरतीतैर्हि रूपैर्नामभिरेव च। यस्मिन् योयः पुरा कल्पोयस्मिन् देशे यथा स्थितिः। तत्र तस्यानुरूप्येण प्रजासर्गः प्रवर्त्तते ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः। शर्व्वर्यन्ते प्रसूतानां तान्येवैभ्यो ददात्यज इत्यादि। किञ्च अग्निर्वा अकामयत अन्नादो देवानां स्या"मिति स एतमग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपत् ततो वै सोऽन्नादोदेवानामभवत् अग्निर्वै देवानामन्नादः तथा इन्द्रो वा अकामयत ज्यैष्ठ्यं देवानामभिजयेयमिति स एतमिन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालं निरवपत् महाव्रीहीणां ततो वै स ज्यैष्ठ्यं देवानामभ्यजयदित्यादिना पूर्वपूर्वाग्नीन्द्रादियजनेन पाश्चात्याग्नीन्द्रादीनामैश्वर्य्यप्राप्तिरित्यवगम्यते प्रथमान्ताग्न्यादिशब्दा यजमानं चेतनं सिषाधयिषितरूपेण निर्दिशन्ति इदानीमिन्द्रः पूर्वस्मा इन्द्राय निरवपदित्यर्थः अतः पूर्वपूर्वाग्नीन्द्रादिसरूपतयोत्तरोत्तराग्नीन्द्रादिसृष्टिरित्यवगम्यते। किञ्च कर्मविधानमिष्टप्राप्त्यनिष्टनिवृत्तिफलं पुरुषप्रवृत्तिश्च सुखलिप्सादुःखजिहासामूला रागद्वेषौ च दृष्टानुमितश्रुतसुखदुःखतत्साधनभूतभोग्यतदुपकरणात-

स्रू० तस्मिन्नण्डे महाभाग वेदवेदाङ्गपारगः। ब्रह्मोत्पन्नस्स तेनोक्तः प्रजाः सृज महामते ?॥ तथा परो नारायणो देवस्तस्माज्जातश्चतुर्मुख" इति तथा आदिसर्गमहं वक्ष्य इत्यारभ्योच्यते "सृष्ट्वा नारं तोयमन्तः स्थितोऽहं येन स्यान्मे नाम नारायणेति कल्पे कल्पे

त्साधनविषयो न त्वप्रतिपन्नविषयो अतः पूर्वकल्पावगतेन्द्रादिपदकामना-सञ्चितधर्मफलभोगानुगुणोत्तरोत्तरसृष्टिश्च पूर्वपूर्वसृष्टिसजातीया भवितु मर्हति, अतो वेदनित्यत्वं नाम प्रत्युच्चारणपूर्वपूर्वक्रमसुसदृशानुपूर्वीविशिष्टतयोच्चार्यमाणत्वम्, अर्थनित्यत्वं नाम प्रतिसर्गमिन्द्राद्यर्थानां पूर्वपूर्वार्थाकारसुसदृशसंस्थानविशिष्टत्वं, तथाविधार्थप्रतिपादकत्वमेव वेदस्य नित्यार्थसंयोगः । ननु प्रलयदशायामेकस्य प्रतिभातो वेदः कृतकादविशिष्टः स्यादेकस्य प्रतिभातः कुमारसम्भवो हि कृतक इति चेत् उच्यते कृतकादविशिष्टत्वं वदतः कोऽभिप्रायः एकस्य प्रतिभातत्वं कृतकत्वव्याप्तमिति वा कृतकत्वशङ्काजनकमिति वा न प्रथमः बहुषु सुप्तेषु जाग्रत एकस्य प्रतिपन्ने स्वात्मनि व्यभिचारात्, न ह्यात्मा कृतकः एकस्य प्रतिभातवाक्यत्वं वदतः कोऽभिप्रायः एकस्य प्रतिभातत्वं विवक्षितमिति चेत् किमेकस्य प्रतिभातत्वं नाम एकस्य प्रतिपन्नत्व? मुत एकस्य प्रथमप्रतिपन्नत्वं? न प्रथमः, दृष्टान्तस्य साधनविकलत्वात्, न हि कुमारसम्भवोऽस्माकमन्येषां च कदाचिदप्रतिपन्नः, द्वितीये हेत्वसिद्धिः, पक्षीभूतेषु वेदेषु ह्येकस्य प्रथमप्रतिपन्नत्वं नास्ति सर्गप्रवाहस्यानादित्वात्, यस्य कल्पस्यादौ प्रतिभानं प्रथममिति विवक्षितं ततः पूर्वकल्पेऽपि तेषामेव वेदानां प्रतिभातत्वात् प्राथम्यासिद्धिः, तेषामेव वेदानां तत्पूर्वकल्पेऽपि प्रतिभातत्वं वेदोच्चारणत्वेन लिङ्गेन सिद्धम् । विगीतं वेदोच्चारणं पूर्वोध्ययनसिद्धक्रमविषयं वेदोच्चारणत्वात् सम्प्रतिपन्नवदिति, न च वाच्यं वेदाः कृतकाः कल्पादावेकस्य प्रतिभातत्वात् चतुर्मुखवक्तृकप्रथमवाक्यवदिति दृष्टान्तस्य साधनविकलत्वात्, चतुर्मुखस्य प्रथमवाक्यं हि स्वतस्सर्वज्ञेन तदन्तरात्मनाऽपि ज्ञायते,कल्पादावेकत्वे ज्ञस्य प्रतिपन्नत्वं हेतुरिति चेत् न असिद्धेः, असिद्धिश्च यौगपद्येन प्रवाहतश्चाण्डबाहुल्येन चतुर्मुखतत्सृष्टमहर्षिबाहुल्यात् एकस्मिन् ब्रह्माण्ड इति हेतुर्विशेष्य इति चेत् तर्हि एकस्मिन् गृहे दिवसादावेकस्यप्रतिपन्नत्वादुपाध्यायवक्तृकप्रथमवाक्यवद् वेदस्य तदुक्तत्वं किं न स्याद् देशकालान्तरवर्त्तिपुरुषप्रतिपन्नत्वात्तेनाप्युपाध्यायेन पूर्वसिद्धतयैव प्रतिपन्नत्वाच्च तदुक्तृकत्वस्य बाधितत्वादिति चेत्तुल्यं, तथा हि एकस्मिन-

षड्कल्पदावेकवेत्त्वप्रतिपद्यत्वरूपहेतुसिद्धिः कुतः "यो वै वेदांश्च प्रहिणोति तस्मा" इत्यादिश्रुतेरिति चेत्तर्हि सैव श्रुतिर्वेदानां पूर्वसिद्धत्वमवगमयतीति हेतुग्राहकप्रमाणेन बाधितविषयता स्यात्, एकस्य प्रतिभातवाक्यत्वं कृतकत्वशङ्कावहमिति चेत् न आप्ततया परिज्ञातेन तेनैव पुरुषेण

स्मृ० तच स्मरामि भूयः । सुप्तस्य मे नाभिजं स्याद्यथाऽब्जम् एवं भूतस्य मे देवि नाभिपद्मे चतुर्मुखः उत्पन्नस्स मया प्रोक्तः प्रजाः सृज महामत" इति, अतो देवादीनामप्यर्थित्वसामर्थ्ययोगाद्ब्रह्मविद्यायां समधिकारोऽस्तीति सिद्धम् । देवताऽधिकरणं समाप्तम् ।

अनादिसिद्धतयोपदिष्टे वाक्ये कृतकत्वशङ्कानुदयादीश्वरेण प्रथमसृष्टाश्चतुर्मुखादयः प्राचीनसुकृतवशादीश्वराप्यवगमानुगुणज्ञानान्विता एव जायन्त इति न शङ्कादयः । नन्वीश्वरसिद्धौ वेदसम्प्रदायाविच्छेदसिद्धिः तत्सिद्धौ वेदनित्यत्वसिद्धिस्तत्सिद्धौ वेदप्रामाण्यसिद्धिस्तत्सिद्धावीश्वरसिद्धिरिति चक्रकमिति, एवं तर्हि पूर्वमीमांसायामपि वेदप्रामाण्यसमर्थनपरे प्रथमेऽध्याये प्रथमे पादे बाह्यहेतूत्थाप्रामाण्यं निराकृत्य त्रिपाद्याऽवान्तरहेतूत्थाप्रामाण्यनिरासे क्रियमाणे त्वदुक्तं चक्रकम्प्रसजेत् तथा हि "सन्दिग्धे तु वाक्यशेषा"दित्यादिषु अक्ताः शर्करा उपदधातीत्यादिवेदवाक्यानामञ्जनसाधनद्रवद्रव्यविशेषानुपस्थापनेन सन्देहलक्षणाप्रामाण्ये पूर्वपक्षिणोक्ते तेजो वै घृतमित्यादिवाक्यशेषावगतद्रव्यविशेषसिद्ध्या तन्निरासस्सिद्धान्तिना क्रियते, तत्र तेजो वै घृतमित्यादिवाक्यशेषप्रामाण्यसिद्धौ अक्ताश्शर्करा इत्यादिवाक्यविशेषस्य सन्देहलक्षणाप्रामाण्यनिराससिद्धिः, तत्सिद्धौ कृत्स्नवेदप्रामाण्यसिद्धिस्तत्सिद्धौ कृत्स्नवेदान्तर्गतवाक्यशेषप्रामाण्यसिद्धिरिति चक्रकं प्रसज्यत एवेति न प्रसज्यते प्रथमे पादे शब्दस्य स्वतःप्रामाण्यसमर्थनादपवादहेतोश्च अपूर्वक्रमविशेषविशिष्टोच्चारयितृविशेषस्वरूपकर्तुः स्मर्तव्यत्वे सति अस्मर्यमाणत्वलक्षणायोग्यानुपलम्भनिरस्तत्वात्

Digitized by Google

वेदप्रामाण्यसिद्धौ तदन्तर्गतवाक्यविशेषस्याभिधानवृत्तिः प्राक्सिद्धप्रामाण्यविरोधिनीव प्रतिभातीति शङ्कामात्रस्य वाक्यशेषादिकृत्स्नपदान्वितवाक्यपर्यालोचनयाऽभिधानवृत्तिस्तथा प्रतिभातीति परिहारमात्रस्य क्रियमाणत्वादिति चेत्, तदस्मत्पक्षेऽपि समानमिति परितुष्यतामायुष्मता, ये तु अक्ताश्शर्करा इत्यादिवाक्यमात्रस्याप्रामाण्यशङ्का न तु कृत्स्नवेदस्य तावन्मात्रस्य परिहारश्चेति वदन्ति, तन्मतेऽपि इयमेव प्रतिवन्दी, अक्ताः शर्कराः इत्यादिकतिपयवाक्याप्रामाण्येन कृत्स्नाप्रामाण्यशङ्का हि दुर्निवारा वेदत्वाविशेषात्, अक्ताः शर्करा इति वाक्याप्रामाण्यनिरासे कृत्स्नवेदाप्रामाण्यशङ्कानिवृत्तिः तन्निवृत्तौ तेजो वै घृतम् इत्यादिवाक्यशेषाप्रामाण्यशङ्कानिवृत्तिः तन्निवृत्तौ अक्ताश्शर्करा इति वाक्यस्य सन्देहलक्षणाप्रामाण्यनिवृत्तिरिति परिहारस्तुल्यः । अधिकरणार्थमुपसंहरति "अत" इति, ॥ देवताऽधिकरणं समाप्तम् ।

मध्वधिकरणम् ।

सू० मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॥ ३० ॥

भा० ब्रह्मविद्यायान्देवादीनामप्यधिकारोऽस्तीत्युक्तम्, इदमिदानीं चिन्त्यते, येषूपासनेषु देवता एवोपास्यास्तेषु तासामधिकारोऽस्ति नेति, किं प्राप्तं नास्त्यधिकारस्तेषु मध्वादिष्विति जैमिनिर्मन्यते, कुतः असम्भवात्, न ह्यादित्यवस्वादिभिरुपास्या आदित्यवस्वादयोऽन्ये सम्भवन्ति, न चादित्यवस्वादीनां सतां वस्वादित्वं प्राप्यं सम्भवति प्राप्तत्वात् ।

टी० सू० मध्वादिष्वसम्भवादनधिकारं जैमिनिः, पूर्वाधिकरणे उपासनसामान्ये देवतासामान्यस्याऽधिकारोऽस्तीत्युक्तम् । अथोपासनविशेषे देवताविशेषस्य अधिकारो निरूप्यत इति सङ्गतिः, इममर्थमाह "ब्रह्मविद्यायामि"त्यादिना, इदमधिकरणं न मधुविद्यामात्रविषयम् अपि तु इदृश-

Digitized by Google

सर्ववाक्यविषयम्, अत एव हि मध्वादिष्वित्यादि–शब्दप्रयोग इत्यभिप्रेत्योक्तम् "एषूपासनेष्वि"ति, किं मधुविद्यादिषु या देवतोपास्या तासु किं तस्या अधिकारोऽस्ति नेति विचारः, तदर्थम् य एतदेवममृतं वेदेति यच्छब्दः किं सङ्कोचेन वस्वादिव्यतिरिक्तविषयः? उतासङ्कुचितवृत्ति? रिति किं तस्या देवताया स्तद्विद्योपसंहारसामर्थ्यमस्ति ने? ति किं मधुविद्यायां वस्वादिदेवतामात्रमुपास्य? मुत तदवस्थं ब्रह्म? ति, किं वसुत्वमात्रं मधुविद्याफलम्? उत ब्रह्मप्राप्तिपर्यन्तवसुत्व? मिति यदा वसुत्वमात्रं फलं तदा वस्वादिदेवतामात्रस्योपास्यत्वेन तस्या देवतायास्तद्विद्योपसंहारसामर्थ्याभावात् यच्छब्दस्य तद्व्यतिरिक्तविषयत्वात्तत्रानधिकार इति, यदा ब्रह्मप्राप्तिपर्यन्तवसुत्वं फलं तदा तदवस्थब्रह्मण उपास्यत्वेन तद्विद्योपसंहारसामर्थ्यञ्च यच्छब्दस्य तद्व्यतिरिक्तविषयत्वाभावात्तस्या देवतायास्तस्यां विद्यायाम् अस्त्यधिकार इति । ननु तदवस्थब्रह्मण उपास्यतया सिद्धान्तश्चेत् प्रतर्दनविद्यान्यायेन चरितार्थत्वादारम्भवैयर्थ्यं, नैवं तत्र प्रतिपाद्यविशेषस्यैव निरूपितत्वात्, न हीन्द्रस्य तस्यां विद्यायामधिकारोऽस्ति इति निरूपितम्, अतोऽधिकारनिरूपणार्थमारम्भणीयत्वमिति, किं च तत्रोपक्रममात्रे जीवलिङ्गमवयविनो महावाक्यस्य परमात्मलिङ्गभूयस्त्वादवयवविरोधेऽवयवमात्रस्य दुर्बलत्वाद्राद्धान्त उक्तः, इह तूपसंहारमात्रे परमात्मलिङ्गदर्शनं न तु महावाक्यरूपेऽवयविनि अतो ऽधिकरणमारम्भणीयम् । नन्वेवं सति उपक्रमापेक्षया उपसंहारदौर्बल्याद्राद्धान्तानुपपत्तेरनारम्भ एव स्यात् नैवम् उपक्रमोपसंहारयोर्मिथोविरोधेन उपक्रमावगतार्थपरित्यागे प्राप्ते हि तत्प्राबल्येन उपसंहारबाधः, इह तूपक्रमावगतार्थपरित्यागहेत्वभावान्नोपसंहारबाधः, कथं तर्हि संशयोत्थानम् अर्थित्वाद्यसम्भवब्रह्मोपनिषत्त्वश्रवणाभ्यां संशयः । असम्भवादिति अर्थित्वसामर्थ्ययोरिति शेषः, कर्तृकर्मविरोधात् सामर्थ्याभाव इत्याह "न ही"ति, प्राप्तफलत्वादर्थित्वाभाव इत्याह "न चे"ति, आदित्यवस्वादय इत्यत्र आदि–शब्देन मरुद्रुद्रसाध्या साध्या विवक्षिताः, वस्वादित्यमरुद्रुद्रसाध्यगणा एकैकं प्रतिदिशमुपरि च स्थित्वा आदित्यं प्रधानमनुभवन्ति वस्वादीनामेवोपा-

स्यत्वं वस्वादित्वस्यैव प्राप्यत्वं च किं श्रूयत इत्यपेक्षायां कर्मकर्तृविरोधं प्राप्तफलत्वञ्च श्रुत्यर्थोपन्यासेन विशदयति–

सू० मधुविद्यायामृग्वेदादिप्रतिपाद्यकर्मनिष्पाद्यस्य रश्मिद्वारेणाप्राप्तस्य रसस्याश्रयतया लब्धमधुव्यपदेशस्यादित्यस्यांशानां वस्वादित्यादिभिर्भुज्यमानानामुपास्यत्वं वस्वादित्वञ्च प्राप्यं श्रूयते "असौ वा आदित्यो देवमध्वित्यु"पक्रम्य "तद्यत्प्रथममृतन्तद्वसव उपजीवन्ती"त्युक्त्वा "स य एतदमृतं वेद वसूनामेवैको भूत्वा अग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यती"त्यादिना, ॥

टी० मधुविद्यायामि"त्यादिना, ऋग्वेदादीति अग्नौ प्रास्ताऽऽहुतिस्सम्यगादित्यमुपतिष्ठत इति वचनार्थोऽभिप्रेतः आदित्यांशानां वस्वादिभिर्भुज्यमानानाम् उपास्यत्वमिति वस्वादिभिर्भोक्तृभिस्सह तद्भोग्यभूता आदित्यांशा उपास्या इत्यर्थः । ननु कथं कर्मकर्तृविरोधः स्वात्मविषयमपि ह्यनुसन्धानं सुकरं भूमविद्याधीतायां प्राणविद्यायाञ्च कर्मकर्तृविरोधाभावश्च भवदभिमतः, उच्यते न तावत्स्मृतिसन्ततिमात्रम् उपासनं पटादिस्मृतिसन्ततेरपि उपासन–शब्दवाच्यत्वप्रसङ्गात्, अतः प्रकृष्टवस्तुविषयस्मृतिसन्ततिरेवोपासनं नामाद्याशापर्यन्तोपासनेषु नामादीनामन्तवत्फलप्रदानामपि प्रकर्षवत्त्वं विवक्षितं, वस्वादीनान्तु स्वस्मात्प्रकृष्टत्वाभावात् स्वापेक्षया प्रकृष्टविषयमुपासनं स्वस्मिन् कर्त्तुं न शक्यते प्राणविद्यायामप्यवस्थाभेदेन उपास्यप्रकर्षस्सम्भवति, बद्धो ह्यस्य उपासकः निरतिशयभोग्यं मुक्तावस्थं स्वरूपमुपास्यं, तच्च बद्धादतीव प्रकृष्टमुभयविषयपरविद्यास्वपि स्वात्मांशे कर्मकर्तृविरोधोऽप्यवस्थाभेदेनैव प्रतिहृतः, मधुविद्यायान्तु वस्वादीनामेव उपास्यत्वं न तु परिशुद्धावस्थानाम्, अतोऽवस्थाभेदेनापि अविरोधस्य दुर्वचनत्वात्कर्मकर्तृविरोध इति । यद्वा स्वयमेव स्वाभीष्टसंप्रदानाशक्तेन फलार्थिना पुरुषेण उपास्यदेवता स्वोपासनप्रीता फला-

र्थिने फलं ददाति, वस्वादीनान्तु स्वोपासनजनितस्वप्रीत्या स्वस्य फलप्रदत्व-मयुक्तमित्युपासनप्रीणनीयत्वाकारेण कर्मकर्तृविरोधः । यद्वा एकस्यैव फल-प्रदत्वफलार्थित्वरूपप्रकर्षापकर्षरूपविरोधगर्भत्वात् कर्मकर्तृविरोध इति स्थिते सामर्थ्याभावः, अतः शक्तत्वाशक्तत्वविशेषप्रीणनीयत्वप्रीणयितृत्वफ-लप्रदत्वार्थित्वरूपविरोधगर्भत्वात् कर्मकर्तृविरोधः ईदृशविरोधः प्राणवि-द्यायामपि स्थित एवात्र वक्ष्यमाणन्यायोपजीवनेन परिहार्य इति प्राणवि-द्यायां ब्रह्मात्मकत्वेन उपासनस्याविवक्षितत्वेऽपि वस्तुतो जीवान्तर्यामिणः परस्य प्रीतिजननद्वारा स्वर्गार्थयज्ञादेरिव फलप्रदत्वमित्येतावद्वैषम्यं प्रक-र्षापकर्षगर्भकर्मकर्तृविरोधस्य ब्रह्मात्मकतया परिहारस्तु समानः, अतः प्राणविद्याऽप्येतन्न्यायसापेक्षेति तत्र विरोधस्यापरिहृतत्वात् तन्निबन्धनसा-मर्थ्याभावस्यात्र पूर्वपक्षहेतुतया उपन्यास इत्यादिना यथोक्तार्थः सूयत इत्यन्वयः ॥

सू० ज्योतिषि भावाच्च ॥ ३१ ॥

च्यू० "तं देवाः ज्योतिषां ज्योतिरायुर्होपासते अमृतमि"ति ज्योतिषि परस्मिन् ब्रह्मणि उपासनं देवानां श्रूयते देव-मनुष्योभयसाधारणे परब्रह्मोपासने देवानामुपासकत्वक-थनं देवादीनामितरोपासननिवृत्तिं द्योतयति अत एषु वस्वादीनामनधिकार इति प्राप्तेऽभिधीयते—

सू० भावन्तु वादरायणोऽस्ति हि ॥ ३२ ॥

आदित्यवस्वादीनामपि तेष्वधिकारभावं भगवान्वादरा-यणो मन्यते, अस्ति ह्यादित्यवस्वादीनामपि स्वावस्थ-ब्रह्मोपासनेन वस्वादित्यत्वप्राप्तिपूर्वकब्रह्मप्रेप्सासम्भवः, इदानीं वसूनां सतामपि कल्पान्तरे वस्वादित्वप्राप्ति-स्सापेक्षिता भवति, अत्र हि कार्य्यकारणोभयावस्थब्र-

Digitized by Google

ह्मोपासनं विधीयते "असौ वा आदित्यो देवमध्वि"त्यारभ्य "अथ तत ऊर्द्ध्वम् उदेतेत्यन्तः प्रागादित्यवस्वादिकार्य्यविशेषावस्थं ब्रह्मोपासनमित्युपदिश्यतेऽथात ऊर्द्ध्व उदेतीत्यादिनाऽऽदित्यान्तरात्मतयाऽवस्थितं कारणावस्थमेव ब्रह्मोपास्यमित्युपदिश्यते तदेवं कार्यकारणोभयावस्थं ब्रह्मोपासीनः कल्पान्तरे वस्वादित्वं प्राप्य तदन्ते कारणं परं ब्रह्मैवाप्नोति ।

टी० सू० ज्योतिषि भावाच्च, ततः किमित्यत्राह "देवमनुष्ये"ति, देवा एव ज्योतिरुपासते देवा ज्योतिरेवोपासत इति वा वाक्यभङ्गी स्यात् तत्र न प्रथमकल्पो युज्यते मनुष्याणामनधिकारप्रसङ्गात्, तस्मात् ज्योतिरेवोपास्यमित्यर्थः, अन्यथा विशेषवचनवैयर्थ्यं स्यादित्यभिप्राय । सू० भावन्तु वादरायणोऽस्ति हि, अक्षरार्थमाह "आदित्येत्यादिना अर्थित्वसामर्थ्याभावं परिहरति "अस्ति ही' ति, स्वावस्थब्रह्मोपासन–शब्देन कर्मकर्तृविरोधः परिहृतः, वस्वादित्वस्य प्राप्तत्वादर्थित्वमसम्भव इत्यत्राह "इदानी"मिति उपासनस्य ब्रह्मपर्यन्तत्वे फलस्य ब्रह्मप्राप्तिपर्यन्तत्वे च प्रतिपाद्ये सति हि कर्मकर्तृविरोधाभावः प्राप्तफलत्वाभावश्च, तत्कथमित्यत्राह "अत्र ही"ति, आदित्यादिनामतद्रूपविशिष्टजीवशरीरकं ब्रह्म कार्यावस्थन्तदुपासनं विहितमित्याह "असौ वा"इत्यादिना इदानीमित्यादिनामरूपभाजोऽपि सृष्टेः प्राक् आदित्यानामतद्रूपरहितजीवमात्रस्यान्तर्यामिब्रह्मकारणावस्थं तदुपासनं विधीयत इत्याह "अथ तत ऊर्द्धं उदेते"त्यादिनेति, ब्रह्मोपासनं विहितञ्चेत् कथन्तर्हि तद्विरुद्धफलश्रवणमित्यत्राह "तदेवमि"ति, उदाहृतवाक्ये कार्यकारणावस्थादित्यस्यैव उपासनं वस्वादित्यत्वमात्रफलप्राप्तिश्च प्रतीयते न त्वादित्यादिशरीरकब्रह्मोपासनन्तत्प्राप्तिश्चेत्यत्राह–

छा० "न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्य भवति य एतामेवं ब्रह्मोपनिषदं वेदेति कृत्स्नाया मधुवि-

Digitized by Google

विद्याया ब्रह्मोपनिषत्त्वश्रवणात् ब्रह्मप्राप्तिपर्य्यन्तवस्त्वादित्वफलश्रवणाच्च वस्वादिभोग्यभूतादित्यांशस्य विधीयमानमुपासनन्तद्वस्थस्यैव ब्रह्मण इत्यवगम्यते, अत एवंविधमुपासनमादित्यवस्वादीनामपि सम्भवति, एवं च ब्रह्मण एवोपास्यत्वात् तं देवा ज्योतिषां ज्योतिरित्युपपद्यते तदाह वृत्तिकारः "अस्ति हि मध्वादिषु सम्भवो ब्रह्मण एव सर्वत्र निचाय्यत्वा" दिति । मध्वधिकरणं समाप्तम् ॥

टी० "न ह वा"इति, ब्रह्मोपनिषदं वेद ब्रह्मविद्यां वेद ब्रह्मोपासनङ्करोतीत्यर्थः, ओदनपाकं पचतीति वत् । उपसंहरति "अत एवमि"ति, अब्रह्मोपासनपरत्वेन यैर्व्याख्यातं तन्मतादृष्यस्य प्रामाणिकत्वं दर्शयति "तदाह वृत्तिकार"इति, परे तु मध्वादिष्वसम्भवादित्यादिसूत्रत्रयन्तदुपर्य्यपीत्यादिभिः सूत्रैरेकाधिकरणं मन्वाना एवं व्याचक्षते ब्रह्मव्यतिरिक्तविषयेषु मध्वादिविद्याविशेषेषु अर्थित्वाद्यसम्भवात् सर्वासु विद्यासु अनधिकारं जैमिनिर्मन्यते कथं क्वचिदनधिकारादन्यत्राप्यनधिकारः । न हि राजसूयानधिकारिणो ब्राह्मणस्य बृहस्पतिसवानधिकार इति शङ्कायाम् आदित्यादिज्योतिषि मण्डलाद्याकारत्वादचेतने सवित्रादिशब्दप्रयोगसम्भवादग्न्यादीनां चाचेतनत्वात् मन्त्रार्थवादयोरन्यपरत्वेन विग्रहादिमत्त्वाभावेन च अर्थित्वसामर्थ्याभावाचाधिकार इति सूत्रद्वयं व्याख्याय भावन्त्विति तृतीयसूत्रेण मन्त्रार्थवादयोरपि प्रतीयमानार्थे प्रामाण्योपपादनमुखेन अर्थित्वादिसद्भावाद्विद्याधिकारोऽस्तीत्युच्यत इति, तदयुक्तं वृत्तिकारानभिमतत्वात् अध्याहारसापेक्षत्वात् अपेक्षितार्थापरित्यागात्कृतकरत्वप्रसङ्गादधिकरणान्तरवैरूप्याच्च तत्र वृत्तिकारानभिमतिर्भाष्ये कण्ठोक्त्या दर्शिता तत्र हेतुरितरहेतुजातम्, असम्भवान्मध्वादिष्वनधिकारं मन्यत इति अनध्याहारेण योजनासम्भवेऽपि मध्वादिष्वसम्भवात्कुत्रानधिकार इत्यपेक्षायां सर्वासु विद्यास्वपि अनधिकार इत्यध्याहारेण योजनाऽनुपपन्ना सकृद्विद्या हैवास्य भवति य एतामेवं ब्रह्मोपनिषदं वेदे"ति

ब्रह्मविद्यात्वं तदनुगुणफलं चावगम्यते, वस्वादीनामुपास्यत्वं च प्रतीयते कथमिदद्धटत इति व्युत्पन्नशब्दस्य संशयोभवति, भवति तस्मादियमब्रह्मविद्या ब्रह्मविद्या वेति निरूपणमपेक्षितं तस्यानिरूपितत्वात् बुभुत्सितापरीक्षणं स्यात् तदुपर्यपीति सूत्रेणैव मन्त्रार्थवादयोर्विग्रहादावप्रामाण्यस्य परिहृतत्वेन ज्योतिषीत्यादिसूत्रद्वयस्य अन्यपरत्वशङ्कापरिहारपरत्वेन व्याख्यानस्य कृतकरत्वं च स्यात्, सम्भवादित्युक्तस्यार्थित्वादिसम्भवरूपस्य हेतोरसम्भवव्युदासाधीनात्मलाभत्वादाद्यसूत्रेण परिहृतत्वमवगम्यते, अनन्तरमेव युगपदनेकत्र सन्निधिविरोधादिपरिहारश्च विग्रहादिसिद्धिनिबन्धनत्वादन्यपरत्वस्य परिहृतत्वमवगमयति । यद्याद्यसूत्रेणासम्भवं शङ्कापरिहारौ न विवक्षितौ तर्हि तच्छङ्कापरिहारेण ज्योतिषीत्यादिसूत्रद्वयेनाद्यसूत्रानन्तरेण भवितव्यं स्वपक्षसाधकोपन्यासानन्तरमेव तद्दोःस्थ्यशङ्कापरिहारस्याधिकरणान्तरेष्वपि दृश्यमानत्वात् यथा ईक्षतेर्नाशब्दङ्गौणश्चेन्नात्मशब्दादिति, यथा ज्योतिश्चरणाभिधानात्, छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगमादिति, आनुमानिकमप्येकेषामिति, चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च सूक्ष्मन्तु तदर्हत्वात्, इति च ततो भिन्नाधिकरणत्वं युक्तम् अधिकरणभेदमभ्युपगम्य वसुसमुदायस्योपास्यत्वम् एकैकस्य वसोरुपासकत्वं रुद्रादिष्वप्येवं समुदायप्रत्येकभेदादुपास्योपासकभावः, उपास्यत्वं च वस्वादिभोग्यादित्यांशमात्रस्य न तु ब्रह्मणः फलं च वस्वादित्वमात्रमित्यमात्रमिति केश्चिदुक्तन्तदपवर्गरूपवर्गरूपफलब्रह्मोपनिषत्त्वश्रवणविरुद्धत्वावृत्तिकारानभिमतमित्यनादरणीयम् ननु तदुपर्यपि मध्वादिष्वसम्भवादित्यधिकरणद्वयेन किं प्रयोजनं देवतानां देवताविशेषाणां च अर्थित्वसामर्थ्यसम्भवनिर्णयात्र मनुष्याणां प्रयोजनं तेन विनाऽप्यमीषामुपासनोपपत्तेः, न च देवतानां किमपि प्रयोजनं तेषां स्वकीयपटुतरदेहादिमत्त्वे अर्थित्वसद्भावे च अधिकरणस्य न्यायनिरपेक्षनिर्णायकत्वादिति उच्यते परं ब्रह्म सामान्येन देवानामप्युपास्यं फलप्रदञ्च देवताविशेषाणामप्युपासनविशेषैरुपास्यं फलविशेषप्रदञ्चेत्येव विद्यैश्वर्यविशिष्टत्वेन मनुष्यैरुपासकैर्ब्रह्मणोऽनुसन्धेयत्वात्तथाऽनुसन्धानमेव प्रयोजनमिति ॥ मध्वधिकरणं समाप्तम् ॥

Digitized by Google

कारणानियमे कार्य्यनियमो भवितुमर्हति तस्याकस्मिकत्वप्रसङ्गात् । गकाराद्याकारविवर्तभेदं शब्दत्व*मभिधेयभेदाभिधायकं तत्रातिप्रसङ्ग इति चेद् न । प्राप्ताप्राप्तविवेकेन गादीनामेवाभिधेयधीहेतुत्वात् । अन्यथा सत्त्वगुणत्वादीनामपि तत्प्रसङ्गात् । अत्यल्पमिदम् अखिलमेव कार्यसामान्य†जातं सत्त्वसामान्यनिर्मायं प्रसज्येत । अपि च शब्दत्वं चरमविज्ञानइव पूर्वेष्वपि विज्ञानेषु प्रथतइति नास्ति तिरोहितमिव किं चिदिति तेभ्यो ऽपि अर्थप्रत्ययप्रसङ्गः । एतेन वर्णत्वमपि परास्तमभिधेयधीहेतुभावेन वेदितव्यम् । तदिह कृतं कृतधियामप्रामाणिकेन शब्दत्वसामान्यनिराकरणप्रयासेन । न च शब्दत्वमेकं वस्तुसत्तद्वदगकारादिनानात्वभाविकत्वविरोधि येन तद्भाविकत्वाय ‡ शब्दत्वमपाक्रियते । शाबलेयादिभेदव्यवस्थापनाय गोत्वादिनोऽपि सामान्यस्यापाकरणप्रसङ्गात् । शाबलेयादिभेदेषु गौर्गौरित्येकाकारावभासादशक्यापह्नवं तदिति चेद् न । इहापि समानत्वात् । न खल्वचि § व्यञ्जनेषु च शब्दः शब्द इत्येकनिर्भासः प्रकाशो नास्ति लौकिकपरीक्षकाणाम् । न चैव श्रोत्रग्रहणोपाधिः विना ऽपि शब्दत्वमेकमिति सांप्रतम् । तद्ग्रहणानामपि नानात्वेनैकप्रत्ययाधानासामर्थ्यात् । श्रोत्रग्राह्यत्वोपाधेश्चा||त्यन्तपरोक्षतया तद्गृहीतिविरहे शब्दः शब्द इत्येकनिर्भासप्रकाशानुपपत्तेः । अगृहीतस्योपाधेरुपहितप्रत्ययाधानासामर्थ्यात् । न च गकारादिषु अनुस्यूतमश्वादिपदव्यावृत्तमेकैकवर्णावगाहिनीषु प्रख्यासु तिरोहितमिव प्रथते । कथं न प्रथते यदा विशदपदावगाहिनि गौरित्येकं पदमिति चरमे चेतसि पूर्वोपलब्धभागप्रतिसंधानमस्ति । न चास्यैते भागा इत्यायुष्मतैवोपपादितम् । अतस्तद्विवर्ताः । तथा च तदेव तेन तेनापरमार्थसता गकाराद्याकारेण प्रतिभासतइति प्रमाणमार्गागतम् ।

---

* भेदग्रस्तमिति २ पु॰ पा॰ । गकाराद्याकारैरारोपितैर्भिद्यमानः शब्दो यत्र तादृशं पदं वाक्यं वेति तस्यार्थः ।

† सामान्येति ३ पु॰ नास्ति ।

‡ गत्वादेर्वस्तुत्वसिद्धये ।

§ अर्चिष्विति ३ पु॰ पा॰ ।

|| श्रोत्रस्य चेति ३ पु॰ पा॰ ।

तत्किमिदानीमनुसंहारबुद्धिप्रतिसंधानापेक्षाः प्राञ्चः प्रत्यया यथास्वं गकारादिध्वनुविद्धमेकमवभासयन्ति । ओमिति चेत् हन्त तत्र तत्र चरमविज्ञानसमये प्राचां प्रत्ययानामतिवृत्तत्वात्तत्काले* चरमस्य चेतसोऽनागतत्वात् उपकरोति असतामसदिति चैवमापतितम् । अपि च जन्ममात्रव्यापारत्वेन विज्ञानस्य जातस्य† जन्माभावेन विरम्य व्यापारायोगस्तद्विपरीतं चाभ्युपेतं स्यात्‡ । अनपेक्षाश्च§ प्राञ्चः प्रत्ययाः स्तम्भकुम्भाम्भोरुहावगाहिनदवाभिधानुव्याधविरहिणः स्वानुभवाद्भासमाना न परस्परं स्वगोचरं भिन्दन्ति‖ । नाप्यनानुभविकः प्रत्ययेष्वेकानुव्याधः शक्यानुमानः नरविषाणवदनुपलब्धिविरोधात् । तथा च परस्परव्यावृत्तवर्णमात्रगोचरा अनुभूतयो भावनोपजननद्वारा नाना वैकं वा स्मृतिप्रत्ययं स्वगोचर एवादधते नान्यगोचरे नाप्यगोचर इति । अनुसंहारबुद्धिरपि¶ परस्परव्यावृत्तवर्णरूपावगाहिनी न तु वर्णानुव्याधवदेकगोचरेत्यनुभवमार्गागतम् ।

कथं गौरित्येकं पदमित्येकपदावभासिनी धीरस्ति लौकिकपरीक्षकाणाम् । न चेयमनालम्बना नापि वर्णालम्बना तेषां नानात्वात् । नापि सेनावनादिवदौपाधिकी । उपाधिः खल्वेकविज्ञानविषयता वा भवेद् एकाभिधेयप्रत्ययहेतुता वा । न तावत्पूर्वः पक्षः । अप्रतीतोपाधेरुपहितप्रत्ययायोगात् । स्वसंवेदनं संवेदनमनिच्छतामनुसंहारबुद्ध्या स्वरूपावग्रह-

* आद्यवर्णज्ञानकाले । चरमनादाभिव्यञ्जनीयस्य स्फोटस्याद्यवर्णप्रत्ययकालेऽसत्त्वादसत उपकार्यत्वं चरमवर्णकाले चाद्यानां नाशादसत उपकारकत्वं चापद्यत इत्यर्थः ।

† ज्ञातस्येति ३ पु॰ पा॰ ।

‡ ज्ञानानामुत्पत्त्यैवार्थप्रकाशकत्वात्तृतीयक्षणे नाशाच्च प्रथमवर्णज्ञानस्यास्फुटपदस्याभिव्यञ्जकत्वं चरमवर्णज्ञानसाचिव्येन तस्यैव स्फुटाभिव्यञ्जकत्वमिति न युक्तमिति भावः ।

§ अनपेक्षाः अनुसंहारबुद्धिप्रतिसंधाननिरपेक्षाः । समुदायबुद्ध्यसहकृता इति यावत् ।

‖ न भिन्दन्ति न व्यावर्तयन्ति । तथा च गौगवयगीतादिप्रत्ययेष्वाद्यप्रत्ययैरस्फुटत्वेनेष्टा अपि परस्परव्यावृत्तरूपगवादिपदस्फोटाभिव्यक्तयोऽनुपपन्ना इति भावः ।

¶ समुदायात्मकपदस्वरूपज्ञानमपि ।

णा * तदेकत्वाग्रहात् तदुपाध्येकपदप्रतिभासानुपपत्तेः । उत्तरस्मिन्नपि पक्षे परस्पराश्रयप्रसक्तिर्दुर्वारा । न खल्वविदितपदरूपावधिरर्थमवैति । अवध्यन्तरपरिग्रहे तत्त्वेऽपि वर्णानां तदर्थभेदानध्यवसायात् † । तच्चार्थप्रतिपत्त्या पदरूपविशेषमुपकल्पयतो दुरुत्तरमितरेतराश्रयं प्रसज्येत । न चैकार्थसम्बन्धाख्यानमेकपदत्वमापादयति । वर्णानामनाश्रितपदरूपाणामप्रत्यायकत्वेनासम्बद्धानां सम्बद्धाख्यानानुपपत्तेः ‡ । सम्बन्धाख्यानात्तु पदभावे तदेवेतरेतराश्रयत्वमापद्यते । पदत्वाद्धि सम्बन्धित्वे सत्याख्यानमाख्यानाच्च पदत्वे सति सम्बन्धितेति । व्यवस्थितं हि वाचकत्वमाख्यायते । अपि च एकावभासस्य प्रत्ययस्योपाधिकत्वमिच्छतो न किं चिदेकं भवेत्सर्वत्रैव कथं चित्कस्य चिदुपाधेः सम्भवात् । तथा च नाना ऽपि न स्याद् एकसमाहारात्मकत्वान्नानात्वस्य ।

अत्र ब्रूमहे । न वयमेकावभासप्रत्ययमेकवस्तुव्यवस्थितौ प्रमाणयामः किं तु व्यपदेशमात्रं भवति हि करितुरगादिष्वश्वत्थ § चम्पकाशोकखदिरधवकिंशुकादिषु नानात्वे ऽपि कथं चिदेकमुपाधिमाश्रित्य सेना वनमिति व्यपदेशमात्रं लौकिकानाम् । न चैतावता सेना वनं वा करिचम्पकाद्यवयवसमवाय्येकमवयवि प्रसिध्यति । तथैव गकारादयो ऽपि पूर्वापरलब्धिविपरिवर्तिनो रूपादन्यूनानधिका एकस्यां स्मृतौ प्रथमानाः सत्यपि पदमिति व्यपदेशभेदे नैकानुव्याधवन्तो भवितुमर्हन्ति उपाधिविरहात् । एकानुव्याधमुपकल्पयति व्यपदेश इति चेद् न इतरेतराश्रयापत्तेः । एकानुव्याधवती हि प्रख्या तादृशव्यपदेशोत्पादिनी बुद्धिनिबन्धनत्वा||द्व्यपदेशस्य । ततस्तु तामर्थयमानो व्यत्क्रमि-

* ज्ञानेन स्वस्याविषयीकरणात्तस्यानुव्यवसायग्राह्यत्वाद् ज्ञाततालिङ्गानुमेयत्वाद्वेति भावः ।

† पदत्वमनपेक्ष्य समुदायत्वादिधर्मान्तरपुरस्कारेण पदज्ञाने ऽपि वर्णानां व्यावृत्तानामनुपस्थितेः । सामान्यतः पदत्वज्ञानेनार्थत्वेनार्थोपस्थितिः स्यादपीति भावः ।

‡ असंबन्धानां संबन्धाख्यानानुपपत्तेरिति ३ पु॰ पा॰ ।

§ अश्वत्थेति ३ पु॰ नास्ति ।

|| बुद्धिनिमित्तत्वादिति ३ पु॰ पा॰ ।

Digitized by Google

तरेतराश्रयत्व * माविशति । न चात्रोपाधिविरहो ऽपि । अस्ति खल्वेका-
भिधेयधीहेतुभाव † स्वयाणामपि वर्णानामेकस्मरणसमारोहिणां श्रावणा-
मिवैकपिठरधारणे यस्मात्पदमिति व्यपदेशः प्रभवति । न चैवमन्योन्या-
श्रयं न हि पदावधारणाधीनः सम्बन्धबोधः किं तु तदधीनं पदविज्ञानम् ।
कारकभेदावधायि ‡ हि पदपदं पद्यते ऽनेनेति व्युत्पत्त्या । तच्छब्दाश्च
कार्य्यसम्बन्धबोधोपहितसीमानो § नासति तस्मिन्प्रवर्तितुमीशते । न च
स्वरूपभेदस्तावतां तादृशां वर्णानां वर्णान्तरेभ्यस्तेभ्य एव वा ऽताव-
द्भ्यस्तावद्भ्यो वा ऽतादृशेभ्यो || न्यविज्ञानोपारोहिणामर्थप्रत्ययात् प्राग्
न प्रथते येन सम्बन्धिभेदायत्ते सम्बन्धो न निरूप्येत । प्रकारान्तरवद्भ्यस्तु
तेभ्यस्तेषामेव चरमविज्ञाननिवेशिनां विशेषमये वक्ष्यामः ।

तथा सम्बन्धबोधनाख्यानमप्यमीषामीषत्करं समधिगतैकाभिधेय-
धीहेतुभावानां च तेषां पश्चात्पदमिति व्यपदेशो नानुपपन्नः । अपि चानं-
शस्य पदस्य वैशद्यावैशद्ये न युज्यते । सामान्यविशेषतत्त्वाभ्यामनुभूयमान-
ता हि वैशद्यं सामान्यमात्रस्य तद्भुन्मात्रस्य वा वेदनमवैशद्यं न च निखिल-
सामान्यविशेषविरहिणः स्फोटस्यास्फुटं दर्शनमुपपद्यते । स खलूपलभ्यते
नोपलभ्यते ¶ । न ह्यस्य दृश्यमानस्यास्ति किं चिददृश्यमानम् । न चास्ति
सम्भवः स एव * तेनैव तदेव दृश्यते न चेति । अत एव न समारोपः
सर्वथा ऽननुभूते तदयोगात् । कथं चिदनुभवे † निरंशत्वानुपपत्तेरपसिद्धा-
न्तप्रसङ्गात् । तस्मादनवयवमेवानुभूयते पदतत्त्वमिति रिक्तं वचः । अत

---

* इतरेतराश्रयमिति ३ पु॰ पा॰ । † हेत्वभाव इति ३ पु॰ प॰ ।

‡ कारकभेदाभिधायीति ३ पु॰ पा॰ । कारकविशेषाभिधायकम् ।

§ कार्यो यः संबन्धबोधः तेन प्रापिता पदभेदरूपा सीमा अवधिर्येषां ता-
दृशा इत्यर्थः ।

|| भिन्नानुपूर्वीकेभ्यः । अर्थज्ञाननैरपेक्ष्येणैव नदीदीनादिपदेषु स्वरूपभेदः प्रत्य-
क्षसिद्ध एवेति भावः ।

¶ न खलूपलभ्यते न वोपलभ्यतइति ३ पु॰ पा॰ । नोपलभ्यते वेति विकल्प्य
वक्ष्यमाणं दूषणद्वयं योजनीयम् ।

* अत एवेति ३ पु॰ पा॰ ।

† एकदेशावच्छेदेन प्रत्यक्षत्वाङ्गीकारे ।

Digitized by Google

एव शब्दादर्थं* प्रतिपद्यामहइति सपिशाचघटैतिह्यवदनुपपद्यमानार्थवचनमनुभवाभावात् । अनुभव एव हि प्रमाणमार्गागतो लोकस्वत्त्वावलोकनात् † । न पुनः पुरुषप्रवादमात्रं मृषावादो ऽपि हि सम्भवति घटयक्षवत् । यदि त्ववश्योपपादनीयं ततो वरं शब्दशब्दोपलक्षितानां वर्णव्यक्तीनामेकस्मृतिसमारूढानामेकाभिधेयप्रत्ययोपजननलब्धसहभावानामभिवकारकावस्थापादिताभेदानामेकत्वादेकवचनमुपपन्नार्थं‡ गोशब्दादिति § । न च धवखदिरपलाशा वृक्ष इति लोके न दृश्यते इति दृश्यमानमेतदपह्नवमर्हति ‖ दर्शनादर्शनयोर्लोकसिद्धत्वेन तुल्यबलतया बाध्यबाधकभावाभावेन¶ विषयव्यवस्थोपपत्तेः** । न चाप्रत्यक्षमपि अर्थधीकार्येण शक्यानुमानम् अन्योन्याश्रयात् । न खलु सत्तामात्रेण शब्दो ऽभिधेयधियमाधातुमर्हति । सत्तया ऽभिधायकत्वे तस्याः शाश्वतिकतया नित्यमाधानप्रसङ्गादिति । अतश्च स्वज्ञानं†† तद्धेतुरेषितव्यः । स्वज्ञानं चास्यार्थप्रत्ययलक्षणलिङ्गप्रसवमिति प्राप्तमन्योन्याश्रयम् । अपि च वर्णेभ्यो नाभिधेय(प्रत्ययो नोपपद्यते । ते हि गौरिति स्मृतिबुद्धावेकस्यां विपरिवर्तमाना अभिधेय)‡‡ प्रत्ययस्येशते §§ । न चास्यां‖‖ क्रमाक्रमविपरीतक्रमानुभूतानामविशेषो वर्णानाम् । तथा हि । प्राचीनानुभवभावितभावनानिचयलब्धजन्मा स्मृतिरनुभवानुसारिणी तद्गोचरानक्रमानपि तत्क्रमेण क्रमवदनुभवकर्मतापन्-

* शब्दार्थमिति ३ पु॰ पा॰ ।

† लोकैरविसंवादेन तत्र प्रामाण्याङ्गीकारात् ।

‡ उपपन्नमिति ३ पु॰ पा॰ ।

§ गोशब्दादित्येकवचनमुक्तक्रमेणैकत्वव्यवहारमात्रोपपत्तेरुपपन्नार्थकमित्यर्थः ।

‖ धवादिषु वनत्वं प्रत्येकं न पर्याप्नोति वृक्षत्वं तु पर्याप्नोतीति विशेषाद्वनमित्येकवचनमेव वृक्षा इति बहुवचनमेव यथा तथा प्रकृते शब्दत्वस्य प्रत्येकपर्याप्ततया शब्दा इति बहुवचनमेव युक्तं न त्वेकवचनमित्याक्षेपाशयः ।

¶ अविषयव्यवस्थोपपत्तेरिति ३ पु॰ पा॰ ।

** यथा तैलत्वस्य प्रतिबिन्दुपर्याप्तत्वे ऽपि कदा चित् प्रस्थमात्रे ऽपि तैलमित्येकत्वव्यवहारः कदा चित्तु तैलानि हेमन्ते सुखानीत्यादिव्यवहारश्च लोकसिद्धत्वेन न विरुद्धस्तथेहापीति भावः ।

†† स्वज्ञानेनेति ३ पु॰ पा॰ ।   ‡‡ एतन्मध्यस्थं २ पु॰ नास्ति ।

§§ २ पु॰ पाठे वर्णमात्रेणार्थोपस्थितौ न समर्था लोका इति शेषः ।

‖‖ अस्यां स्मृतौ ।

Digitized by Google

स्रष्टानपर्यायमपि समाकलयन्ती अक्रमविपरीतक्रमानुभूतेभ्यो भिनत्ति । दृश्यते हि नदीदीनेतिस्मृतिधियोरभेदे ऽपि वर्णरूपाणां विशदतरः पदभेदः । न चेदमनवयवपददर्शनमिति निवेदितम् । तदनुभवकर्मताक्रमः परमवशिष्यते * सो ऽपि न्यूनातिरेकादिवदेकपदभेदावधारणोपायः । यथा ऽऽहुरत्रभवन्तो वार्त्तिककाराः † ।

पदावधारणोपायान्बहूनिच्छन्ति सूरयः ।
क्रमन्यूनातिरिक्तत्वस्वरवर्ण ‡ श्रुतिस्मृतीरिति ॥

न च निरन्तरमतिसदृशस्वरबहुवक्तृप्रयुक्तेष्वानुपूर्व्यवत्सु समानस्मृतिबुद्धिसमारोहिष्वर्थप्रत्ययादर्शनाद्व्यभिचार इति सांप्रतम् । एकवक्तृप्रयुक्तत्वेन § विशेषणात् । यथा ऽऽहुः || ।

यावन्तो यादृशा ये च यदर्थप्रतिपादकाः ।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधका इति ॥

¶ न चैतत्कलकलश्रुतावशक्यज्ञानं किमिव हि दुष्करमभ्यासस्य यथा ऽऽहुर्बाह्या अपि ** ।

परेषामनुपाख्येयमभ्यासादेव जायते ।
मणिरूप्यादिषु ज्ञानं तद्विदामानुमानिकमिति ॥

न च संबन्धाख्यानसमयेवक्रैकताया अनाश्रया †† दनङ्गत्वं हेत्वसिद्धेः । स्फुटतरतया तदनाख्यानं न खलु नैरन्तर्यादयो ऽप्याख्यायन्ते तद्भावस्तु नैरन्तर्यादिष्विव वक्त्रेकत्वे ऽपि समानः । न च ज्ञापकहेतुर्विदितसमस्तज्ञापकाङ्गो ज्ञापयतीत्यप्यैकान्तिकम् । भवति हि मनो ऽनुमा-

* परिशिष्यतइति ३ पु॰ पा॰ ।
† श्लोकवार्तिके वाक्याधिकरणे अ॰ १ पा॰ १ श्लो १८० ।
‡ स्वरवाक्येति ३ पु॰ पा॰ । मुद्रिते श्लोकवार्तिकपुस्तके ऽप्येवमेव ।
§ एकवर्गप्रयुक्तत्वेनेति ३ पु॰ पा॰ ।
|| श्लोकवार्तिके संबन्धाक्षेपवार्तिके अ॰ १ पा॰ १ सू॰ ५ श्लो॰ ६९ ।
¶ तथा च तेषां गुणभूतानामर्थप्रत्यायनं प्रति साहित्यमेकवक्त्रादिक्रमश्चापि विवक्षितइतीत्यधिकम् ३ पु॰ ।
** वाक्यपदीये काण्डे १ श्लो ३५ । मुद्रितपुस्तके परेषामसमाख्येयमिति मणिरूप्यादिविज्ञानमिति च पाठः । †† न्यूनाश्रयादिति ३ पु॰ पा॰ ।

Digitized by Google

माङ्गम् । न चास्य वेदनमत्रोपयुज्यते । तदिह दृश्यमामेभ्य एव वर्णेभ्यो दृश्यमानप्रकारभेदानुयायिभ्यो ऽभिधेयप्रत्यय उपपद्यमानो नैतानवज्ञाया*नवयवमत्यन्तानुभूतं पदतत्त्वमुपकल्पयितुमर्हति । अतिप्रसङ्गात् । नापि समभिव्याहृतपदाभिहितपदार्थप्रत्ययाधीनोत्पत्तिर्वाक्यार्थधीरन्यथोपपद्यमाना ऽनुभूयमानपरस्परव्यावृत्तमूर्तीनि पदानि अपह्नुत्यात्यन्तापरिदृष्टं वाक्यमेकमनवयवमवगमयति । तत्सिद्धमेतदर्थापत्तेरनुमानस्य वा निवृत्तिस्तदेकगोचरपदवाक्यस्फोटावभासिनीति † नानवयवमेकं वाक्यार्थावबोधकमिति ।

नापि द्वितीयः कल्पः । तथा हि ।

नान्त्यवर्णश्रुतिः स्मृत्यानीता वाक्यार्थबोधिनी ।
न स्मृतिस्तदपेक्षत्वाद्यौगपद्यं न च नयोः ॥

स खल्वन्त्यो वर्णः पूर्वपूर्ववर्णपदपदार्थविज्ञानजनितवासनानिचयसचिवश्रवणेन्द्रियसमधिगतजन्मस्मरणग्रहणरूपावाप्तवैचित्र्यसदसद्वर्णनिर्भासप्रत्ययविपरिवर्ती ‡ वाक्यार्थधीहेतुरुपेयते स च चरमपदतदर्थसंबन्धस्मृतिमाधाय वाक्यार्थधियमादधीतानाधाय वा । आधाय चेत्तद्धेतुभावनोद्बोधसमये स्वजन्यसंस्कारकारणविनाशध्वस्तश्रुति § रश्रूयमाणः संबन्धिस्मृतिसमये कथं तत्सहकारी || वाक्यार्थप्रत्ययमादधीत । न च तदसहकारिणो वाक्यार्थधीहेतुभाव इति सांप्रतम् । अस्मरणे तदनुभववैयर्थ्येनागृहीतसङ्गतेरपि प्रथमश्राविणो भिन्धि पाशेन भिदुरमिति वाक्यार्थप्रत्ययप्रसङ्गात् । न चान्त्यवर्णोद्बोधितसंस्काराधीनजन्मा स्मृतिरनुभवेन

---

* नैवानवज्ञायेति ३ पु॰ पा॰ ।

† स्फोटाभावसाधनीति २ पु॰ पा॰ ।

‡ पूर्वपूर्ववर्णप्रत्यक्षजन्यानां संस्काराणां समूहः सहकारी यस्य तादृशेन श्रोत्रेण जनितः पूर्ववर्णांशे स्मरणरूपतया चरमवर्णविषये चानुभवरूपतया प्राप्तरूपद्वयः सतो-ऽन्त्यस्यासतां च पूर्ववर्णानां प्रकाशको यः प्रत्ययस्तद्विषय इत्यर्थः ।

§ संस्कारस्य स्मृतिनाश्यत्वात् स्मृतौ जातायां संस्कारनाशेन उत्तरज्ञानेन पूर्वज्ञाननाशात् वर्णप्रत्यक्षनाशेन चेति भावः ।

|| तत्सहकारिणामिति २ पु॰ पाठः ।

सह युगपदुत्पत्तुमर्हति । न च न्याय्यो युगपदुत्पादः प्रत्ययानां करणस्य * प्रत्ययपर्याये सामर्थ्यात् । अन्यथा समानविषयबुद्धिधाराऽनुपपत्तेः † । सहसैव यावत्कर्तव्यकरणात्समर्थस्य क्षेपायोगात् । न च तावन्तं कालमस्ति प्रथमोत्पन्नध्वनिजनितसंस्कारभेदो यतः पुनरपि वर्णविषयं विज्ञानं जनयेत् । यथाऽऽहुः ।

क्षणिकं साधनं चास्य बुद्धिरप्यनुवर्तते ।
मेघान्धकारशर्वर्यां विद्युज्जनितदृष्टिवत् ॥

न चाननुभूयमानस्य सत्तामात्रेण बोधकत्वमित्यसकृदावेदितम् ॥ अस्तु तर्हि स्मृतिदर्पणारूढा वर्णमालैव वाक्यार्थधीहेतुः । वृद्धप्रयोगाधीनावधारणो हि शब्दार्थसंबन्धः । न च पदमात्रं व्यवहाराङ्गं प्रयुञ्जते वृद्धाः । किं तु वाक्यं तच्चानवयवं न्यषेधीति ‡ स्मृतिसमारूढा वर्णमालाऽवशिष्यते सा च नैमित्तिकं वाक्यार्थबोधमाधत्ते पारमार्थिकस्तु § पदतदर्थबोधो निमित्तमात्रेणावतिष्ठते वर्णमालैव वाक्यार्थधीहेतुरिति । तदप्यसांप्रतम् । कुतः ।

गौरवाद्विषयाभावात्तद्बुद्धेरेव भावतः ।
वाक्यार्थधियमाधत्ते स्मृतिस्था नाक्षरावली ॥

यदि हि वर्णमालैव स्मृतिसमारूढा वाक्यार्थमवबोधयेत्ततोऽर्भक गामानयार्भक गां बधान शिशो गामानय शिशो गां बधान बालक गामानय बालक गां बधान डिम्भ गामानय डिम्भ गां बधानेत्यष्टानां || वाक्यानामष्टौ शक्तयः कल्पनीयास्तवेति कल्पनागौरवम् । पदवादिनस्तु सप्तैव सप्तानां

* मनसः । अत एव न्यायसूत्रं युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति । गोतमसू॰ अ॰ १ आ॰ १ सू॰ १६ ।

† प्रथमानुभवेन संस्कारोत्पादाद् द्वितीयादिज्ञानानां स्मृतित्वेन धारावाहिकप्रत्यक्षानुपपत्तेरित्यर्थः ।

‡ न्यषेधीदिति ३ पु॰ पा॰ ।

§ वाक्यघटकस्मर्यमाणसकलवर्णमालाया एवान्यथाऽनुपपत्त्या वाक्यार्थबोधे हेतुत्वं पदज्ञानपदार्थोपस्थित्योस्तु तत्र सहकारितामात्रमित्यर्थः ।

|| अन्तानामिति ५ पु॰ पा॰ ।

संस्कृतपुस्तकानां सूचीपत्रम् ।

		मूल्यम् रु०	आ०
१	काशिका पंडितवरवामनादित्यविरचिता पूर्वार्धम्		॥
	उत्तरार्धम्	१०	॥
२	बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२	॥
३	प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१	।)
४	लघुकौमुदी वरदराजकृता	१	=)
५	लघुकौमुदी श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्गलण्डीयभाषायां कृता	८	॥
६	श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७	वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायां कृतम्	४	॥
८	मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४	॥
९	श्रावकधर्मदीपिका	१	॥
१०	अमरकोश सटीक	४	॥
११	योगवार्तिकम्	३	।)
१२	वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)	॥
१३	गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्दुर्भङ्गा-देशाधिपति रचिता	४)	॥
१४	शीतपदार्थनिर्वचनम्	३	॥)
१५	वाक्यार्थचन्द्रिकापरिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि संशोधिता	४)	॥
१६	श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराम-मिश्रशास्त्रिप्रणीत क्वाचित्क विषमपदटिप्पणीसमेतः	६)	॥)
१७	खण्डनखण्डखाद्यं सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्त-टिप्पणीसहितम्	७)	॥)
१८	काव्यप्रदीपः काव्यप्रकाशस्य प्रतिच्छायाव्याख्या वाराणसेयसम्राट्-प्रतिष्ठापितसंस्कृतपाठशालीयदर्शनशास्त्राध्यापकरामशास्त्रि-भागवताचार्येण परिशोधितः	३)	॥)
१९	वेदान्तसिद्धान्तमुक्तावली श्रीयुत आर्थर्विनिस महाशये-ङ्गलेण्डीयभाषायां कृतम्	२)	॥)

Digitized by Google

CONTENTS.

Page.

GAṆAKATARAṄGIṆĪ, or LIVES of HINDU ASTRONOMERS, by Mahāmahopādhyāya Sudhākara Dvivedī, Professor, Sanskrit College, Benares. ... 57

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed: Dāmodara Sāstrī, Professor, Sanskrit College, Benares. ... 73

ŚRĪBHĀSHYA WITH ŚRUTAPRAKĀŚIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. ... 89

TATTVABINDU, of Vāchaspati Miśra, Ed: Mahāmahopādhāya Gaṅgādhara Śāstrī, Professor, Sanskrit College, Benares. ... 105

Digitized by Google

MAY 24 1892
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 3.] MARCH, 1892. [Vol. XIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1892.

Price, Rs. 9-0 per annum.]

[*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अर्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनग्रन्थाविन्यासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

MAY 24 1892
LIBRARY.

कन्यां भागैः स्वराख्यैः स्फुटभास्करस्थे''त्यादिना प्रायः सम एव । अगस्त्योदयसाधने तत्प्रकारश्च ।

यदा खरांशुर्भवनद्वयेन स्वाष्टांशहीनेन समस्तदानीम् ।
प्रयात्यगस्त्योऽस्तमयं भषट्कात्तेन च्युतेनोदयमेति तुल्यः ॥

अयं प्रकारश्च ब्रह्मगुप्तलिखितप्रकारसमः ।

शतानन्दः । १०२१

अस्य माता सरस्वती पिता च शङ्करनामाऽऽसीत् ।

अयं च पुरुषोत्तमपुरीनिवासी शशियुग्मखैकमिते १०२१ शके भास्वतीनामकं करणग्रन्थं वराहमिहिरस्वीकृतसूर्यसिद्धान्तसंमतं व्यलिखत् । अहं (शतेन—आनन्दः=शतानन्दः) शतानन्द इति बुद्ध्या संचारेणास्मिन् ग्रन्थे प्रायो गुणहाराः शतसंख्याका एव साधिताः शतानन्देन ।

भारतवर्षे चिरादयं ग्रन्थः प्रसिद्धः । हिन्दीभाषाकविः "मलिकमहम्मदनामकः" पद्मावतीवर्णनेऽस्य चर्चां चकार । यथा

"भावसती औ व्याकरन पिङ्गल पाठ पुरान ।
वेद भेद सों बात कहि जनु लागे हिय बान" ॥

इदं पद्मावतीनामकं हिन्दीभाषापुस्तकं सप्तविंशत्यधिकनवशततमे ९२७ फसलीनामकशके निर्मितमस्ति ।

भास्वत्या उदाहरणरूपा अनेकाष्टीकाः संस्कृते वर्त्तन्ते । भास्वतीरीत्या सूर्यचन्द्रग्रहणं सम्यक् घटत इति चिराज्जनश्रुतिः । "ग्रहणे भास्वती धन्ये"ति श्लोकः परम्परातो भास्वतीप्रशंसायां प्रसिद्धः । भास्वत्याः प्राचीनहिन्दीभाषायामेका टीका वनमालिपण्डितेन सार्द्धत्रयोदशशततमे १३५० शके विरचिता । काशिकसंस्कृतराजकीयप्रधानपाठशालासरस्वतीभवने चैका खण्डिता प्रतिरस्ति ह्यस्याः ।

तट्टीकारम्भे ।

"मुरारि यो (जो) हैं वासुदेउ तेहि के ये (जे) हहिं चरण कमल तेन्ह नमस्कार कै शिष्य निमित्त भास्वती संकृ (स्कृ) त शतानन्द कीन्हि । कौन काल शकु ऊन करव एक सहस्र एक्रैस १०२१ ग्रन्यादि वर्ष भुक्त आनवे । शास्त्र (स्त्रा) ब्द संज्ञा होइ । सो देखि कै बनमाली शिष्यार्थ भाषा टीका कीन्ह । संवत् १४८५ समय ॥

अस्मात्प्राचीनं हिन्दीगद्यं न प्राप्यते प्रायः ।
भास्वत्या लिखितं मुद्रितं च सटीकं पुस्तकं सुलभेन प्राप्यते ।
शतानन्देन कश्चिदन्यो ग्रन्थो विरचितो वा नेति न ज्ञायते ॥

भास्वतीं विहाय नान्याऽस्य कृतिरुपलभ्यते। भास्वती च सम्प्रति स्थूलतया क्वचिदेव पठ्यते पाठ्यते च लोकैरिति ॥

अस्या एका प्रतिः सप्तरसरसेन्दुप्रमिते १६६७ संवत्सरे लिखिता काशिकराजकीयपुस्तकालये वर्त्तते तदारम्भे ।

नत्वा मुरारेश्चरणारविन्दं श्रीमान् शतानन्द इति प्रसिद्धः ।
तां भास्वतीं शिष्यहितार्थमाह शाके विहीने शशिपक्षखेकैः ॥
शाको नवाद्रीन्दुकृशानु ३१७९ युक्तः कलेर्भवत्यब्दगणास्तु वृत्तः ।
वियच्चभोलोचनवेद ४२०० हीनः शास्त्राब्दपिण्डः कथितः स एव ॥

अथ प्रवक्ष्ये मिहिरोपदेशात् श्रीसूर्यसिद्धान्तसमं समासात्। इत्यादि।
तदन्ते च,
खखाश्विवेदैश्च गते युगाब्दे दिक्प्रोक्षितः श्रीपुरुषोत्तमस्थः ।
श्रीमान् शतानन्द इति प्रसिद्धः सरस्वतीशङ्करयोस्तनूजः ॥

इति श्रीपञ्चसिद्धान्तसमे भास्वतीकरणे परिलेखाधिकारोऽष्टमः ॥
भास्वत्यां ध्रुवाधिकारः । बीजाधिकारः । तिथ्यधिकारः । ग्रहसाधनाधिकारः । त्रिप्रश्नाधिकारः । चन्द्रग्रहणाधिकारः । सूर्यग्रहणाधिकारः । परिलेखाधिकारः ॥ इत्यष्टाधिकाराः सन्ति ।

शतानन्दमते ४५० शके ऽयनांशाभावः । अत्र यद्यपि पञ्चसिद्धान्तसममिति लिखितमस्ति तथापि प्रायः सर्वत्र बहवो भेदा वर्त्तन्ते ।

भास्करः । १०३६

सह्यकुलाचलाश्रितपुरे विज्जडविडनाम्नि सम्प्रति बीजापुरनामतः प्रसिद्धे शाण्डिल्यगोत्रोद्भूतान्महेश्वरोपाध्यायाद्रसरामदशमिते १०३६ शके भारतवर्षभूषणरूपः साक्षाद्भास्करावतार एवोदभवत् । "यस्मात् क्षुब्ध-प्रकृतिपुरुषाभ्यामित्यादि" श्लोकस्य गोलाध्यायभुवनकोशारम्भरूपस्य व्याख्यायां मिताक्षरायां "त एते वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धा इति मूर्त्ति-भेदा वैष्णवागमे विशेषतः प्रसिद्धाः" इत्यादिलेखतोऽयं कार्णाटक-ब्राह्मणो वैष्णवः प्रतिभाति सर्वत्र विष्णुपुराणीयवचनोपादानाच्च । अस्य

Digitized by Google

लीलावती । बीजम् । गोलाध्यायः । गणिताध्यायः । ब्रह्मतुल्यं करणकुतूहलमिति ग्रन्थाः सर्वत्र प्रसिद्धाः सन्ति । गोलाध्यायस्य यन्त्राध्याये नाडीवलययन्त्रनिरूपणे "स चाङ्कनप्रकारः सर्वतोभद्रयन्त्रे यथा मया पठितः" इत्याचार्यवाक्येनास्य सर्वतोभद्रयन्त्रनामिकापि कृतिः परन्तु साद्यावधि दृष्टिगोचरीभूता न ।

"आसीन्महेश्वर इति प्रथितः पृथिव्यामाचार्यवर्यपदवीं विदुषां प्रपन्नः । लब्ध्वावबोधकलिकां तत एव चक्रे तज्जेन बीजगणितं लघु भास्करेण" ॥ इति बीजगणितान्तिमलेखेनास्य गुरुरस्य जनको महेश्वर एवेति स्फुटम् । प्राचीनसिद्धान्तशिरोमणिपुस्तकेषु चाध्यायसमाप्तौ "महेश्वरोपाध्यायसुतभास्कराचार्यविरचिते" इति लेखो दृश्यते ।

वासनावार्त्तिककृतौ नृसिंहस्य गणिताध्यायप्रथमश्लोकव्याख्यायाः "अथ शाण्डिल्यमुनिवरगोत्रावतंसः कुम्भोद्भवालङ्कृतदिगङ्गनाभरणसर्वस्वं सह्यकुलाचलाश्रितविज्जडविडनगरनिवासी पवित्रितदण्डकारण्यो नानामखार्जितपुण्यो याज्ञिकानामग्रणीर्यजुःशाखिनामुपाध्यायः सांवत्सराणामाचार्यः काव्यनाटकालङ्कारविदामध्यापयिता धीवृद्धिदोपायकर्त्ता ब्रह्मतुल्यवसिष्ठतुल्यसर्वतोभद्रादियन्त्रनिर्माता महाराष्ट्राणामाश्रयो महेश्वराचार्यनन्दनः परमकारुणिकः श्रीभास्कराचार्यः श्रीधरब्रह्मगुप्तलल्लचतुर्वेदाचार्यनिर्मितापारगणितार्णवविचारवारिरिङ्गत्सन्देहसन्दोहग्राहगृहीतानुद्विधीर्षुः सिद्धान्तशिरोमणिं प्रणिनाये"त्यस्या वसिष्ठतुल्यस्य पूर्वादृष्टस्यापि कर्त्ता भास्करः सिध्यति ।

लीलावत्यां क्षेत्रव्यवहारे चतुर्भुजक्षेत्रानियतस्थितिवर्णनम् । वृत्तपृष्ठघनफलसाधनं श्रेढीगणिते गुणोत्तरश्रेढ्यां सर्वफलानयनम् । एकद्वित्र्यादिमूषावहनादिभेदाः । अङ्कपाशप्रकरणम् । इत्यादयः । बीजे करणीवर्गादौ नियमः । कुट्टकेऽनेकविशेषप्रतिपादनम् । वर्गप्रकृतौ योगान्तरभावनाभ्यां कनिष्ठज्येष्ठानयनम् । एकवर्णसमीकरणे पञ्चकशतदत्तधनादित्याद्युदाहरणेषु कल्पनालाघवेनाव्यक्तमानानयनम् । अनेकवर्णसमीकरणे "त्रिभिः पारावताः पञ्चे"त्याद्युदाहरणेषु कल्पनालाघवेन कपोतादीनां मानानयनम् । "को राशी वद पञ्चषट्कविहृतावि"त्याद्युदाहरणे क्रियासङ्कोचाय कल्पनाप्रदर्शनम् । वर्गसमीकरणे द्विविधमानप्रद-

Digitized by Google

र्शनम् । पद्मनाभबीजसूत्रे व्यभिचारप्रदर्शनम् । अनेकवर्णमध्यमाहरणे "यस्यात्सान्त्यवधादृतो घनपदमि"त्याद्याद्योदाहरणे राशिकल्पनेऽपूर्व-युक्तिप्रदर्शनम् । भाविते चाभिन्नराशिमानार्थं "भावितं पक्षतोऽभीष्टा"-दित्यादिसूत्रेणापूर्वक्रियाप्रतिपादनम्। गणिताध्याये भगणोपपत्तिकथनम् । चतुर्युगसहस्रेण ब्रह्मणो दिनं कथं भवतीत्यत्र युक्तिकथनम् । मध्यमाधि-कारेऽपूर्वोदयान्तरकर्म्मकथनम्। स्पष्टाधिकारे लघुज्याप्रकारेण ज्यानयने स्फुटभोग्यखण्डसाधनम् । तात्कालिकभोग्यखण्डसाधनम् तात्कालि-कगतिसाधनम्। त्रिप्रश्नाधिकारेऽसकृद्विधिना कोणशङ्कोरानयनम् । अक्ष-क्षेत्राणां सम्यगुत्पादनम्। दिगंशेभ्य एकेनैवाऽऽनयनेन सर्वदिक्छायानय-नम् । बहुत्रोदाहरणेषु विशिष्टकल्पनया तदुत्तरीकरणम् । चन्द्रग्रहणे सकृद्विधिना रविचन्द्रकलाकर्णसाधनम् । कलात्मकं भूभानयनम् । सूर्यग्र-हणे सकृत्प्रकारेण लम्बनानयनम्। इष्टकालाद्ग्रासानयनं ग्रासादिष्टानयनं च । ग्रहच्छायाधिकारे स्पष्टशरेण स्पष्टक्रान्तिसाधनम् । क्रमज्ययाऽऽयना-वजदृक्कर्म्मसाधनम् । शृङ्गोन्नत्यधिकारे शुक्लसाधनार्थं चन्द्रे संस्का*रवि-शेषसाधनम् । भग्रहयुत्यधिकारे नित्योदितभस्वरूपप्रकथनम्। पाताधि-कारे चन्द्रगोलायनसन्धिसाधनम्। क्रान्तिसाम्यस्य सम्यग्गतागतभावा-भावप्रतिपादनम्। गोलाध्याये भूपृष्ठफलसाधनोपपत्तिकथन तत्र लल्ल-मतखण्डनम् । जिनाल्पलम्बदेशेषु विशेषकथनम् । उत्क्रमज्यया वलना-नयनं न समीचीनमिति प्रतिपादनम् । यन्त्राणां वर्णनम् । महाप्रश्नानां प्रतिपादनमित्यादयो विशेषा अलौकिकं पाण्डित्यं प्रथयन्ति जगद्भास्क-रस्य श्रीभास्करस्य यत्र बहवः सम्प्रति प्रसिद्धरेखागणितत्रिकोणमितिचा-पीयत्रिकोणमितिचलनकलनादिप्रकारप्रकाशकाश्च राजन्ति ।

ते विशेषाश्चलनकलनादिप्रभूतास्तथापि भास्करश्चलनकलना-विज्ञ इति न सिध्यति तत्र तदुक्तोपपत्तीनामसमीचीनत्वात् ।

अहो गोलाध्याये भुवनकोशे "गोलस्य परिधिः कल्प्यो वेदघ्नज्या-मितेर्मित" इत्यादिव्याख्यायां "यत्पुनः क्षेत्रफलमूलेन क्षेत्रफलं गुणितं

* अयं संस्कारस्तथैवान्तरांशवशेनास्ति यथा सामोस (Samos) स्थानीयेन अरिस्टारकस (Aristarchus) नाम्ना रविचन्द्रकर्णयोः सम्बन्धज्ञानार्थं चन्द्रबिम्बार्द्ध-स्थिते रविचन्द्रान्तरांशा उपलब्धाः । तेन तेऽन्तरांशाः ८७° अंशा निश्चिता भास्करेण च ८५° । ४५′ एतेऽशाः । द्वयोर्युक्तिरेकैव केवलं मानयोर्भेदः । अरिस्टारकस्संज्ञकस्य जन्म खोष्टतः पूर्वं ३१० वर्षेषु निधनं च २५० वर्षेष्वासीत् ।

Digitized by Google

घनफलं स्यादिति तत्प्रायश्चतुर्वे*दाचार्यः परमतमुपन्यस्तवानि"त्याचार्योक्तेन भास्कर आर्यभटीयतन्त्रं न दृष्टवानिति सिध्यति तन्महद्वैचित्र्यम् । यतोऽयं प्रकार आर्यभटस्य ।

यथा सम्प्रति भास्करीयसिद्धान्तशिरोमणिमेवाऽऽदरात्पठन्ति लोकास्तथैव भास्करसमये लल्लसिद्धान्तस्य शिष्यधीवृद्धिदस्य विदुषां मध्ये समादरेण प्रचार आसीत् । भास्करश्च स्वयं लल्लसिद्धान्तमधीत्य जातबोधो लल्लमतमेव बहुधाखण्डयदित्यनुमीयते तत्खण्डनार्थमेव ब्रह्मगुप्तस्वीकृतागमं च स्वीचकार ।

सर्वेषां प्रकाराणां समीचीनाऽसमीचीना वैकल्पा वासना सर्वत्र भास्करेण लिखिता परन्तु गोलाध्यायान्ते ज्योत्पत्तिप्रकाराणां व्याख्यामेव कुर्वता कस्माच्चिद्यवनात्परदेशागतादुपपत्तिमन्तरा रीतिमात्रमेवाभ्यस्तमित्यनुमीयते गोलाध्यायस्य महाप्रश्नाध्यायसमाप्तौ

"प्रश्नानमून् प्रपठतो गणकस्य गोलकन्दोल्लसत्सरलयुक्तिशतप्रवालैः ।
प्रश्नोत्तरार्थपरिचिन्तनवारिसिक्तमूलामला मतिलता समुपैति वृद्धिम्" ॥

इत्यत्र गोलाध्यायादिश्लोकव्याख्यायां "मङ्गलादीनि मङ्गलान्तानि च शास्त्राण्यलङ्कारकृतां मतान्यतः सिद्धिवृद्धिशब्दावाद्यन्तयोर्निक्षिप्तावि"ति स्वीयप्रतिज्ञया वृद्धिपदेन ग्रन्थसमाप्तिं कुर्वतो भास्करस्य पुनस्तदग्रे वासनारहितज्योत्पत्तिकथनानौचित्यात् ।

लीलावत्यां गङ्गाधरस्य गणेशदैवज्ञस्य सूर्यदासस्य लक्ष्मीदासस्य मुनीश्वरस्य रामकृष्णस्य कृपानाथस्य च टीका वर्त्तते । सम्प्रति मत्कृतोपपत्तिरूपा मुद्रिता टिप्पणी तथा श्रीबापूदेवशास्त्रिकृता टिप्पणी च मुद्रिता वर्त्तते ।

बीजगणिते, कृष्णदैवज्ञस्य सूर्यदासस्य च टीका प्रसिद्धोपलभ्यते । मत्कृतोपपत्तिरूपा टिप्पणी च मुद्रिता वर्त्तते ।

सिद्धान्तशिरोमणौ नृसिंहदैवज्ञस्य मुनीश्वरस्य लक्ष्मीदासस्य गणेशदैवज्ञस्य, सूर्यदासस्य च टीका वर्त्तते ।

* अयमेव चतुर्वेदोपाख्यः पृथूदक आदरत्वाच्चतुर्वेदाचार्य इति कथ्यते लोकैः । चरमे वयसि संसारमसारं विज्ञाय कुटुम्बं विहाय कर्मन्यासमकरोत्तेनैव स्वामित्वं गतः । अत एव सम्प्रति पृथूदकस्वामीति प्रसिद्धः । एतत्कृता ब्रह्मगुप्तसिद्धान्तोपरि टीका प्राचीनैरादृता सम्प्रति दुरापा महताऽऽयासेन दक्षिणप्रान्ते राजकर्मचारिभिरुपलब्धा सा मयाऽद्यावधि न दृष्टा कदाचित्तत्रास्य समयादिकं स्पष्टं भवेत् ।

Digitized by Google

करणकुतूहलस्य विश्वनाथादिकृतोदाहरणरूपा टीकोपलभ्यते न सम्यगुपपत्तिरूपाऽतोऽस्माभिरुपपत्तिरूपा टीका नवीना स्वकृता मुद्रिता। अन्येषामनेकदेशस्थानामाचार्याणां बहूनां भास्करग्रन्थोपरि टीकाः सन्ति प्रसिद्धानां नामानि मया तु पूर्वं लिखितानि।

पारसीकभाषायां* नृपतीन्द्राऽकबरशाहाऽऽज्ञया फैज़ीनाम्ना सप्तवसुबाणेन्दुसमे १५८७ खीष्टशके लीलावत्यनुवादः कृतः। अतउल्लाह-रसीदीनाम्ना च शाहजहांनृपतिराज्यसमये वेदाग्निरसेन्दु-१६३४ खीष्टशके बीजगणितानुवादश्च तद्भाषायां कृतः। हेनरी टामस् कोलब्रूक (Henry Thomas Colebrooke) महाशयेन च सप्तेन्दुवसुभूमिते १८१७ खीष्टशके लीलावतीबीजयोरङ्गलभाषायामनुवादः कृतः। जे टेलर (J. Tayler). साहिबेनापि रसेन्दुधृति १८१६ मिते खीष्टशके लीलावत्यनुवादः कृतस्तथा ई· स्ट्रेची (E. Strachy). साहिबेनापि बीजगणितानुवादः कृतो विश्वधृति १८१३ मिते खीष्टशके। भास्करेण सिद्धान्तशिरोमणिर्युग्मसप्तदशमिते १०७२ शके करणकुतूहलं च पञ्चशून्यैकादशसमे ११०५ शके व्यरचि।

ग्रन्थग्रथनकालश्च गोलाध्यायस्य प्रश्नाध्याये

"रसगुणपूर्णमही१०३६समशकनृपसमयेऽभवन्ममोत्पत्तिः।
रसगुण ३६ वर्षेण मया सिद्धान्तशिरोमणी रचितः" ॥

इत्यनेन स्फुटीकृतो ग्रन्थकृता। तत्रैव स्वस्थानादिवर्णनं च। यथा

"आसीत्सह्यकुलाचलाश्रितपुरे त्रैविद्यविद्वज्जने
नानासज्जनधाम्नि विज्जडविडे शाण्डिल्यगोत्रो द्विजः।
श्रौतस्मार्तविचारसारचतुरो निःशेषविद्यानिधिः
साधूनामवधिर्महेश्वरकृती दैवज्ञचूडामणिः॥
तज्जस्तच्चरणारविन्दयुगलप्राप्तप्रसादः सुधी-
र्मुग्धोद्बोधकरं विदग्धगणकप्रीतिप्रदं प्रस्फुटम्।
एतद्व्यक्तसदुक्तियुक्तिबहुलं हेलावगम्यं विदां
सिद्धान्तग्रथनं कुबुद्धिमथनं चक्रे कविर्भास्करः॥

* वेपटलीसाहिबेन हठादितिहासतत्त्वमज्ञात्वैव भास्करसमयश्चाकबरराज्यानन्तरं कल्पितः।

अत्र केचन प्रथमश्लोके "विज्जडविडे" इत्यत्र विद्-जडविडे इति पदच्छेदं कृत्वा वित्पदं महेश्वरकृतिनो विशेषणमिति व्याख्याय जडविड इति भास्करग्रामनाम वदन्ति ।

भास्करेण स्वतनूजाया लीलावत्या जन्मकुण्डल्यां बालविधवा-योगमवलोक्य विवाहो न कृतो जगति तन्नाम प्रसिद्ध्यर्थं तन्नाम्ना पाटी-गणितमरचीत्येके वदन्ति । अन्ये च सन्तानं विना दुःखितायाः स्वभा-र्याया लीलावत्याश्चिरं जगति प्रसिद्ध्यर्थं तन्नाम्ना पाटीगणितं कृतं भास्क-रेणेति निगदन्ति ।

परन्तु डाकूरभाऊदाजीनाम्ना नासिकक्षेत्रनिकटे चासादितात् ताम्रपत्राद्भास्करपुत्रपौत्राश्चाऽऽसन्निति स्फुटम् । इदं ताम्रपत्रं सत्यं वाऽ-सत्यमित्यत्रास्माकं संशयस्तथापीतिहासरसिकानां विनोदाय तत्रत्यो लेखश्च प्रदर्श्यते ।

१ नमो गणाधिपतये सिद्धि——सुधाकरभूमि————————
स्य–दू–स्वसंरक्षणानि गगनेचरवास्तोतः ।

उद्भटबुद्धिर्भाट्टे सांख्ये संख्यः स्वतन्त्रधीस्तन्त्रे ।
वेदेऽनवद्यविद्योऽनल्पः शिल्पादिषु कलासु ॥ १ ॥
स्वच्छन्दोऽथच्छन्दसि शास्त्रे वैशेषिके विशेषज्ञः ।
यः श्रीप्रभाकरसमः प्राभाकरदर्शने कविः काव्ये ॥ २ ॥
बहुगुणगणितप्रभृतिस्कन्धत्रितये त्रिनेत्रसमः ।
विबुधाभिवन्दितपदो जयति श्रीभास्कराचार्य्यः ॥ ३ ॥
श्रीमद्यदुवंशाय स्वस्त्यस्तु समस्तवस्तुसहिताय ।
विश्वं यत्र त्रातुं जातो विष्णुः स्वतन्त्रस्तु ॥ ४ ॥
गर्जद्गुर्जरकुञ्जरोत्कटघटासंघट्टकण्ठीरवो
लाटोरस्ककपाटपाटनपटुः कर्णाटहृत्कण्टकः ।
श्रीमान् भिल्लमभूपतिः समभवद्भूपालचूडामणि-
स्तस्मात्तां भुपुरंध्रिकान्तसुखहृच्छ्रीजैत्रपालोऽभवत् ॥ ५ ॥
लक्ष्मीकान्तलवः प्रतारितभवः श्रीजैत्रपालोद्भवः
सङ्ग्रामाङ्गणलाञ्छितातिविभवः शास्ता भुवः सिंघणः ।
पृथ्वीशो मथुराधिपो रणमुखे काशीपतिः पातितो
येनासावपि यस्य भृत्यबटुना हम्मीरवीरो जितः ॥ ६ ॥

अवततार पुरा पुरुषोत्तमो यदुकुले जगतीहितहेतवे ।
जयति सोऽयमिमां सकलामिलामवति माम(पि)सिद्धमहीपतिः ॥ ७ ॥

अथ भृत्यान्वयवर्णनम् ।

श्रीमद्भास्करवंशाय भव्यं भूयात् स भूपतिः ।
निकुम्भो यत्र संभूतो रामो यस्यान्वयेऽभवत् ॥ ८ ॥

तत्रासीन्नृपतिर्जितक्षितिपतिर्ध्यातैकलक्ष्मीपति-
र्देवब्राह्मणवन्दने नतमतिः श्रीकृष्णराजाह्वयः ।
शौर्यौदार्यविवेकविक्रमगुणैस्तुल्यो न येनापरः
प्रीत्या पाण्डवपुङ्गवार्जितपदं तद्धर्मराजेति यत् ॥ ९ ॥

प्राप्ताङ्गप्रभवस्ततस्तनमतिः प्राप्तप्रतापोन्नति-
र्वीरो वैरिवधूविधूनितशिरा यः श्रीन्द्रराजाह्वयः ।
तस्यासीत्तनयः सतां सविनयः सामन्तसीमन्तिनी-
वैधव्यव्रतसद्गुरुर्गुरुगुणः सत्पुण्यपण्यापणः ॥ १० ॥

चतुरस्तुरगारूढो रेवन्त इव गोवनः ।
सौन्दर्यदर्पः कन्दर्पो यं दृष्ट्वाऽनङ्गतां गतः ॥ ११ ॥

श्रीगोवना*द्रत्नसिंधोरुद्भूतमूर्त्तिस्ततपुण्यकीर्त्तिः ।
जितारिचक्रः क्षितिपालशक्रः श्रीसोङ्गदेवः स्तुतवासुदेवः ॥ १२ ॥

शरणागतवज्रपञ्जरः परनारीषु सदा सहोदरः ।
व्रतसत्यपथे युधिष्ठिरः सततं वैरिवधूभयज्वरः ॥ १३ ॥

स षोडशशतग्रामदेशं दुर्गपुरान्वितम् ।
सोङ्गदेवे दिवं याते शास्ति तस्यानुसम्भवः ॥ १४ ॥

त्यागे सूर्यसुतोपमोऽर्जुनसमः शौर्ये निकुम्भान्वये
विख्यातः क्षितिपालभालतिलकः श्रीगोवनस्यात्मजः ।
श्रीमत्सिंघणदेववैरिकरटीकण्ठीरवो यत्करो
नन्द्यानन्दसुनन्दने नतमतिर्हेमाद्रिदेवश्चिरम् ॥ १५ ॥

शाण्डिल्यवंशे कविचक्रवर्त्ती त्रिविक्रमोऽभूत्तनयोऽस्य जातः ।
यो भोजराजेन कृताभिधानो विद्यापतिर्भास्कर†भट्टनामा ॥ १६ ॥

---

* श्रीगोवनात्सज्जनरत्नसिन्धोरिति पाठे न छन्दोभङ्गः ।

† भट्टभास्करस्य फलिते बहूनि वचनान्युपलभ्यन्ते यथा मुहूर्त्तचिन्तामणिशुभा-

Digitized by Google

तस्माद्गोविन्दसर्वज्ञो जातो गोविन्दसन्निभः ।
प्रभाकरः सुतस्तस्मात् प्रभाकर इवापरः ॥ १७ ॥
तस्मान्मनोरथो जातः सतां पूर्णमनोरथः ।
श्रीमान् महेश्वराचार्यस्ततोऽजनि कवीश्वरः ॥ १८ ॥
तत्सूनुः कविवृन्दवन्दितपदः सद्वेदविद्यालता-
कन्दः कंसरिपुप्रसादितपदः सर्वज्ञ (विद्यासदः) ।
यच्छिष्यैः सह कोऽपि नो विवदितुं दक्षो विवादी क्वचित् ।
श्रीमान् भास्करकोविदः समभवत् सत्कीर्त्तिपुण्यान्वितः ॥ १९ ॥
लक्ष्मीधराख्योऽखिलसूरिमुख्यो वेदार्थवित्तार्किकचक्रवर्त्ती ।
क्रतुक्रियाकाण्डविचारसारो विशारदो भास्करनन्दनोऽभूत् ॥ २० ॥
सर्वशास्त्रार्थदक्षोऽयमिति मत्वा पुरादतः ।
जैत्रपालेन यो नीतः कृतश्च विबुधाग्रणीः ॥ २१ ॥
तस्मात् सुतः सिंघणचक्रवर्त्तिदैवज्ञवर्योऽजनि चङ्गदेवः ।
श्रीभास्कराचार्यनिबद्धशास्त्रविस्तारहेतोः कुरुते मठं यः ॥ २२ ॥
भास्कररचितग्रन्थाः सिद्धान्तशिरोमणिप्रमुखाः ।
तद्वंश्यकृताश्चान्ये व्याख्येया मन्मठे नियतम् ॥ २३ ॥
श्रीसोइदेवेन मठाय दत्तं हेमादि(ना किञ्चिदिहापरैश्च) ।
भूम्यादि सर्वं परिपालनीयं भविष्यभूपैर्बहुपुण्यवृद्ध्यै ॥ २४ ॥

स्वस्ति श्रीशके ११२८ प्रभवसंवत्सरे श्रीश्रावणे मासे पौर्णमास्यां चन्द्रग्रहणसमये श्रीसोइदेवेन सर्वजनसन्निधौ हस्तोदकपूर्वकं निजगुरुरचितमठायायस्थानं दत्तम् ॥ तद्यथा

इयां पाटणीं जे कणे उघटे तेहाचा जो सिंदू जी राउला होता बोहका प्रासीं तो मठा दिधला ब्राह्मणा जें दिक हे ब्रह्मोत्तर तं ब्राह्मणीदिधले ॥ बाहकापासिं दामाचा वीसोवा असुपाठी गिधवणाहकापासि ॥ पञ्चपोफलीयाहकापासि पहिवहिले आधणे आदाणा चौलो मठा दिधला जेति घाणे वाहति तेतियां प्रतिपलि पलीतेला । जेमविजेने मठीचे नमाय—नवावे मापा उगठा अर्द्ध अर्द्ध मापाचे हारिभूपाचे

शुभप्रकरणस्य सप्तमश्लोकटीकायां पीयूषधारायां गोविन्दकृतायां "उक्तं च भट्टभास्करेण त्रयोदश्यां द्वितीयायां दशम्यां च विशेषतः । शूद्रविट्क्षत्रियाः स्नानं नाऽऽचरेयुः कथंचनेति" ॥ परन्त्वयं स एव भट्टभास्करो वाऽन्य इति तद्ग्रन्थमन्तरा न ज्ञायते ॥

Digitized by Google

स्तूक तथा भूमिः चतुराघाट विशुद्धः ३०६ ग्राम-बाले-कामतामध्यत्र-या-कल पंडिता-कालतु-मीचउरा धामोजीची सोठीश्रा ।

अत्र त्रयोविंशतिश्लोकेन यस्य मठमासीत्तदन्यवंशीयो भास्करः सिध्यति "तद्वंश्यकृताश्चान्ये" इति लेखात् ।

सर्वतोभद्रयन्त्रवसिष्ठतुल्ये विहायान्याः सर्वाः कृतयो लिखिता मुद्रिताश्चोपलभ्यन्तेऽस्य गणकचक्रचूडामणेर्भास्करस्य । तल्लसिद्धान्त-गणिताध्याये भास्करकृता टीका खण्डिता काशिकराजकीयपुस्तकालये मत्क्रीता नवीनात्यशुद्धा च वर्त्तते साऽस्यैव भास्करस्य कृतिर्यद्वाऽन्यस्येति सम्पूर्णग्रन्थप्राप्तिमन्तरा न ज्ञायते । पूर्वप्रदर्शिते नृसिंहलेखे "धीवृद्धि-दोपायकर्त्ता" इति वाक्येनास्यैव सा टीकेत्यनुमीयते ।

बल्लालसेनः । १०८२

अयं मिथिलामण्डलमहीमहेन्द्रस्य श्रीलक्ष्मणसेनाभिधस्य तनयो मिथिलामहाराजाधिराजः स्वयमेव खनवदशमिते १०९० शके निजरा-ज्याभिषेकतोऽष्टवर्षानन्तरं बहुविशेषसहितं संहितारूपं वस्तुतोऽद्भुत-रूपमद्भुतसागराख्यं ग्रन्थमकरोत् । अयं सम्पूर्णो ग्रन्थोऽस्माभिर्न दृष्टः किन्तु बहुत्रस्खलितोऽसंलग्नोऽशुद्धः प्राचीन एकोऽद्भुतसागरो वर्त्तते काशि-कराजकीयपुस्तकालये तदवलोकनेनायं बहुविशेषयुक्त इति सिध्यति ।

अत्रैकस्मिन्नेव स्थले गर्गस्य मतं ततो वृद्धगर्गस्य मतं च विलि-खितमित्यनेन गर्गादन्यो वृद्धगर्ग इति स्फुटम् ।

अत्र गर्गवृद्धगर्गपराशरकश्यपादीनां परःशतानि वचनान्युपल-भ्यन्ते ।

एवमत्र गर्गस्य वृद्धगर्गस्य वराहसंहितायाः पराशरस्य विष्णु-धर्म्मोत्तरस्य देवलस्य वसन्तराजस्य वटकणिकाया महाभारतस्य वाल्मी-किरामायणस्य कश्यपस्य यवनेश्वरस्य मत्स्यपुराणस्य भागवतस्य मयू-रचित्रस्य ऋषिपुत्रस्य राजपुत्रस्य पञ्चसिद्धान्तिकायां ब्रह्मगुप्तस्य भट्ट-बलभद्रस्य पुलिशाचार्य्यस्य सूर्यसिद्धान्तस्य विष्णुचन्द्रस्य प्रभाकरस्य वच-नान्युपलभ्यानि भवन्ति ।

यथा संहितायां चाराद्येऽध्यायाः सन्ति तथाऽस्मिन् सागरे चाऽऽवर्त्ताख्या अध्यायाः सन्ति ।

Digitized by Google

अत्र ग्रहाणामद्भुतावर्त्ते विडालश्वशृगालगृहगोधिकापिपीलिकापतङ्गादिमक्षिकामशकलूतभ्रमरभेकखञ्जरीटपोतकीकृष्णपक्षिकवायसाशनिपरिवेषेन्द्रचापनिर्घातगजाश्वादीनामावर्त्ताश्च वर्त्तन्ते । सर्वेष्वावर्त्तेषु तत्तत्पदार्थजन्यशुभाशुभफलानि प्राचीनाचार्यवचनतो वराहोक्तफलेभ्योऽप्यधिकानि लिखितानि सन्ति । सर्वैः प्राचीनेतिहासरसिकैरयं सम्पूर्णः सागरो यत्नतो विलोकनीयः । अत्रागस्त्यावर्त्ते ब्रह्मगुप्तस्य वचनं ।

"राशिचतुष्केण यदा स्वाष्टांशयुतेन भवति तुल्योऽर्कः ।

उदयोऽगस्त्यस्य मुनेश्चक्राद्धोच्छोधितेऽस्तमयः" इत्युपलभ्यते ॥

एतद्ब्रह्मगुप्तप्रकाररूपमेव ब्रह्मदेवप्रकारान्तरमगस्त्यास्तोदयसाधनेऽस्ति । (ब्रह्मदेववर्णनं द्रष्टव्यम्) ।

सप्तर्ष्यद्भुतावर्त्ते "भुजवसुदशमितशाके १०८२ श्रीमद्बल्लालसेनराज्यादौ" इत्यनेन स्वराज्यसमयः प्रदर्शितः । श्लोकोत्तरार्द्धमतिभग्नमस्ति तत्र स्वपितुर्लक्ष्मणसेनस्य वर्षप्रमाणमभिहितमिति ज्ञायते । राह्वद्भुतावर्त्ते

"अथाद्भुतसागरारम्भशकाब्दात्पर्वेश्वरगणनम् ।

खनवदशोनशकाब्दा द्विगुणाः सङ्कृता रवावुदग्गोले ।

सशरा याम्ये ज्ञेयाः पर्वेशाः सप्तभिः शिष्टाः" ॥

इत्यनेन पर्वेशज्ञानं लिखितमेनेनैव ग्रन्थारम्भशको निर्णीतोऽस्माभिः ।

एवमस्मिन्नावर्त्ते "अत्र कठश्रुतिः । यत्रापर्वणि राहुदर्शनं तत्र नरपतेर्वधमादिशेत्" इति तथा

"एवं वराहमिहिरश्री*षेणार्यभटविष्णुचन्द्राद्यैः ।

लोकविरुद्धमभिहितं वेदस्मृतिसंहिताबाह्यम् ॥

राहुकृतं ग्रहणद्वयमागोपालाङ्गनाप्रसिद्धमिदम्" ।

इत्यादिब्रह्मगुप्तवचनानि तथा

"तमोमयस्य तमसो रविरश्मिपलायिनः ।

भूछाया चन्द्रबिम्बश्च स्थाने द्वे परिकल्पिते" ॥

इति च सूर्यसिद्धान्तवचनं च सम्प्रतिप्रसिद्धसूर्यसिद्धान्ताद्भिन्नमुपलभ्यते । अस्मिन्नेवावर्त्ते भट्टबलभद्रोक्तं ग्रहणकारणमभिहितम् । तथा "बुध-

* मन्मते श्रीषेण इति पाठः साधुः ।

Digitized by Google

भार्गवाच्छादनं विना रविच्छिद्रे परचक्रागमः” इति–अनेन स्वकाले बुध-सूर्ययुतिःशुक्रसूर्ययुतिश्च प्रसिद्धाऽऽसीदिति च सूचितम्। ग्रहयुद्धावर्त्ते “सर्वे जयिन उदक्स्था दक्षिणदिक्स्थो जयी शुक्रः”। इति पुलिशाचार्य-वचनं प्रतिपादितम्।

बृहस्पत्यावर्त्तेऽपि ग्रन्थारम्भशकाब्दात् षष्ट्यब्दयुगगणनं कृतम्। रव्यावर्त्ते ऽयनविषये।

“सकलवसुधाधिनाथश्रीमद्बल्लालसेनदेवेन।
अयनद्वयं यथावत् परीक्ष्य संलिख्यते सवितुः॥
इदानीं दृष्टिसंवादादयनं दक्षिणं रवेः।
भवेत्पुनर्वसोरादौ विश्वादावुत्तरायणम्” ॥

इत्यनेनायनांशज्ञानं कृतम्। एवमत्र दशांशा अयनांशाः समायान्ति।

अद्भुतसागरस्यागस्त्याद्यावर्त्तसमाप्तौ।

“इति महाराजाधिराजनिःशङ्कशङ्करश्रीमद्बल्लालसेनदेवविरचिते श्रीअद्भुतसागरे अगस्त्यसप्तर्षिध्रुवाद्यद्भुतावर्त्तः”। एवं प्रत्यावर्त्तसमाप्तौ लेखः।

बल्लालसेनदेवविरचितो भोजप्रबन्धश्च बहुत्रोपलभ्यते। अद्भुत-सागरग्रन्थस्य सम्पूर्णश्लोकसंख्या न ज्ञायते सम्पूर्णग्रन्थदर्शनाभावात्। परन्तु सागरनामकरणेनायं विपुलो ग्रन्थ इत्यनुमीयत इति।

अद्भुतसागरेऽत्र बहुत्र वटकणिकायाः प्रमाणमभिहितमस्ति परन्तु वटकणिकासंज्ञो ग्रन्थः कश्चिदस्तीत्यस्मादेव ज्ञातोऽस्माभि-रतः पूर्वमस्य नामापि न श्रुतमिति।

केशवार्कः। ११६४

अयमौदीच्यब्राह्मणो भरद्वाजगोत्रो जनार्दनस्य प्रपौत्रो नर्मदात-टवासी श्रियादित्यस्य पौत्रो राणगस्य च पुत्रः। भारतवर्षे बधूवरयोर्वि-वाहविषयेऽशेषविचारविधौ विवाहवृन्दावनाख्याऽस्य कृतिरत्यादृता-ऽस्ति ज्योतिर्विदाम्।

यस्य केशवस्य ताजकपद्धतिः प्रसिद्धा विश्वनाथदैवज्ञकृतोदाहर-णसहिता स चास्मादन्यः प्रतिभाति द्वयोः काव्ययोर्महदन्तरत्वात्।

अहो यद्यपि विवाहवृन्दावनान्ते केशवार्केण विस्तरतो निजवंशवर्णनं कृतं परन्तु तत्र समयो न लिखितः । गणेशदैवज्ञकृतायां विवाहवृन्दावनटीकायामादौ प्रथमश्लोकटीकायां "श्रीकेशवार्कः करणकण्ठीरवाद्युक्त्वा" तथा प्रथमाध्यायचतुर्विंशतिश्लोकटीकायां "तदानयनं ग्रन्थकृता करणकण्ठीरवे प्रतिपादितं दिङ्मात्रमत्रोक्त"मित्यादिलेखेन करणोऽपि करणकण्ठीरवाख्योऽस्ति कृतिरस्य याऽद्यावधि न प्राप्ता मया । करणकण्ठीरवेणास्यावश्यमेव समयज्ञानं स्यात्तथाप्येतत्कृतविवाहवृन्दावनप्रथमाध्यायस्य चतुर्विंशतिश्लोकेन "त्रिभागशेषे ध्रुवनाम्नी"त्यादिनाऽऽसन्नसमयज्ञानं भवति । अत्र गणेशदैवज्ञकृतटीकायां "ग्रन्थनिर्माणकाले द्वादश अयनांशा आसन् तदभिप्रायेणेदमुक्तम्" इति लेखेन तदाऽयनांशा द्वादशसमास्तथा प्रतिवर्षेऽयनांशगतिरेका कला तथा वेदवेदवेदमिते ४४४ शके ऽयनांशाभावः कल्प्यते तदा केशवार्कसमयः समुद्ररसैकादशशकः ११*६४ सिध्यति । अयं समयश्च भास्कररचितकरणकुतूहलसमयादेकोनषष्टिवर्षानन्तरम् ।

विवाहवृन्दावनान्ते लग्नशुद्धिप्रकरणस्याष्टमश्लोके "वेदा ४ इभाब्धय ४८ इयं किल नार्मदी भे"त्यादिना नर्मदातटीयपलभापाठेनायं नर्मदातटवासीति ज्ञायते ।

विवाहवृन्दावनषोडशप्रकरणे स्ववंशवर्णने ।

"अभूद्भरद्वाजमहर्षिवंशे विश्वावतंसे श्रुतितत्त्ववेदी ।
औदीच्यचारित्रपथप्रवर्त्ती जनार्दनो याज्ञिकचक्रवर्त्ती ॥
अस्ति श्रियादित्य इति स्म तस्य सूनुः श्रियादित्य इव द्वितीयः ।
त्रिस्कन्धपारङ्गतरङ्गमल्लस्तत्रात्मजो राणग इत्युदीर्य्ये ॥
श्रीकेशवः सुकविरध्ययनाध्वनीनव्यूहान् प्रतर्पयितुमर्थपयःप्रवाहैः ।
दैवज्ञराणगसुतः सुतपःश्रयेऽस्मिन् वृन्दावने मुनिगवीनिवहं दुदोह" ॥

इदं विवाहवृन्दावनं मुद्रितं लिखितं च सर्वत्रैवोपलभ्यते ।

कालिदासगणकः । ११६४

एतत्कृतं ज्योतिर्विदाभरणं मुहूर्त्तविचाररूपं प्रायः सर्वत्र लिखितं मुद्रितं चोपलभ्यते यत्र महिमाप्रभसूरिशिष्यभावरत्नकृता नवषट्सप्तभू-

* अत्रायनांशाभावसमयादिभेदेन कदाचिद्दशद्वादशानामब्दानामन्तरं पतेत् ।

Digitized by Google

१७६९ विक्रमाब्दे वैशाखशुक्लतृतीयायां रवौ समाप्तिं गता सुखबोधिकाख्या टीका च प्रसिद्धा ।

अत्र द्वाविंशत्यध्यायाः सन्ति । आद्याध्यायेषु मुहूर्त्तोपयोगिनीनेत्रादिपरिभाषा उक्त्वा ततो मुहूर्त्तग्रन्थवत् गर्भाधानादिसंस्काराणां मुहूर्त्ता यात्रागृहप्रवेशादिमुहूर्त्ताश्च प्रतिपादिता ग्रन्थकृता । अन्तिमाध्याये नृपतिविक्रमार्कसभावर्णनं विस्तरतः कृतम् । यत्र कलेरष्टषट्खाग्नि ३०६८ मितगताब्देषु मया कालिदासेन ग्रन्थः कृत इति लिखितमस्ति । तद्यथा

"वर्षे सिंधुरदर्शनाम्बरगुणै ३०६८ र्याते कलेः संमिते
मासे माधवसंज्ञके च विहितो ग्रन्थक्रियोपक्रमः ।
नानाकालविधानशास्त्रगदितं ज्ञानं विलोक्यादरा-
दूर्जे ग्रन्थसमाप्तिरत्र विहिता ज्योतिर्विदां प्रीतये" ॥

अस्यान्तिमाध्यायस्याङ्गलभाषायामनुवादो डाक्तरभाऊदाजीनाम्ना कृतः कविकालिदाससमयनिरूपणे । (See the Literary Remains of Dr. Bhaú Dají, p. 10-13)

अयमन्तिमाध्यायो ग्रन्थकृता जगद्वञ्चनया स्वयं विरचितो वा केनचिदितिहासाऽनभिज्ञेन प्रक्षिप्त इति निःसंशयमयनांशक्रान्तिसाम्यादिसाधनैर्ग्रन्थस्थैर्विभाति । डाक्तरभाऊदाजीनाम्ना केवलमयनांशसाधनं प्रथमाध्यायस्याष्टादशश्लोकपूर्वार्द्धेन "शाकः शराम्भोधियुगो ४४५ नितो हृतो मानं खतर्कै ६० रयनांशकाः स्मृता" इत्यनेन दृष्ट्वाऽस्य समयः षट्शतविक्रमाब्दो भ्रमात् * स्थिरीकृतः । क्रान्तिसाम्यसंभवलक्षणं च चतुर्थाध्यायस्य त्रिंशच्छ्लोकेन ।

"ऐन्द्रे त्रिभागे च गते भवेत्तयोः शेषे ध्रुवेऽपक्रमसाम्यसंभवः ।
यद्येकरेखास्थितभेशचण्डगू स्यातां तदाऽपक्रमचक्रवालके" ॥

इत्यनेन निर्णीतं प्रकटयति कालिदासगणकस्य समयं केशवार्कसमयसमं निःसंशयम् । क्रान्तिसाम्ये तद्वत् केशवोक्तेः सिद्धान्तयुक्त्या द्वादशायनांशसमये क्रान्तिसाम्यसंभवस्य तादृक्स्थितेश्च । (केशवार्कवर्णनं विलोक्यम्) ।

* "It is clear that the author of the Jyotirvidábharaṇa is sufficiently modern to have confounded Harsha Vikramáditya of Ujjayani, in the 6th century, with the founder of the Samvat Era."

अधुना निर्णीतेन कालिदासगणकसमयेन रघुवंशकाव्यकर्त्ता कालिदासोऽस्मादन्य इति स्पष्टं सिध्यति ।

महादेवः (१२००) नृसिंहदैवज्ञश्च १४५०

पद्मनाभदैवज्ञपौत्रः परशुरामदैवज्ञपुत्रो गौतमगोत्रो गोदासरारासिणस्थानवासी लाघवेन ग्रहसिद्ध्यै गजाग्नियुग्मभूमिते १२३८ शके माहादेवीं सारणीमरचयत् । पैतामहाऽऽर्यभटजिष्णुजभास्करादिसिद्धान्तसमुद्रतरणायेयं सारणी नौकारूपा कृता महादेवेनेति ग्रन्थारम्भद्वितीयश्लोकेन

"पैतामहार्यभटजिष्णुजभास्करादिसिद्धान्तभेदकठिने नितरामगाधे ।
संख्यार्णवे खचरकर्म्मजले निमग्नज्योतिर्विदां प्रतरणाय कृतोऽस्तु नावम्" ॥

इत्यनेन स्फुटम् । अत्रैकवर्षस्य ग्रहाणां गुणकाः पठितास्ते ग्रन्थारम्भशकोनेष्टशकेन गुणिता ग्रन्थारम्भक्षेपसहिता इष्टशकीया ग्रहा भवन्ति । अत्र मूलश्लोकसंख्या द्विचत्वारिंशत् ४२ ।

अस्याश्छायारूपैव खनागशक १४८० शके रामदैवज्ञसुतनृसिंहेन नन्दिपुरस्थेन मध्यग्रहसिद्धिरुक्ता ततः स्फुटग्रहसिद्धिर्महादेवसारण्यनुसारिण्येव । माहादेव्यां

"नागाग्न्यर्कोन-१२३८ शाकघ्ना गुणकाः क्षेपसंयुताः ।
पलान्तावादिमौ कार्यौ विपलान्ताः परे ध्रुवाः" ॥ इति २१ श्लोकेन ग्रन्थारम्भशको ज्ञायते । तदा महादेववयोऽष्टत्रिंशद्वर्षमितं चेत्कल्प्यते तदाऽस्य जन्मशको द्वादशशतशकासन्नः समायाति ।

३८ श्लोकेन "त्र्यंघ्रिशक्रायने १३ । ४५ काले देशे चाब्धिदला ४ । ३० क्षभे" । इत्यादिना महादेवसमयेऽयनांशाः पादोनशक्राः १३ । ४५ तत्स्थानीया पलभा च सार्द्धाब्ध्यङ्गुला ४ । ३० ।

ग्रन्थसमाप्तौ ।

ईश्वरकौबेरजजोदासमसस्तज्जजोऽग्रजन्मासीत् ।
श्रीजोजदेवनामा गौतमगोत्रः स दैवज्ञः ॥

तत्पुत्रो माधव इति तत्पुत्रः पद्मनाभदैवज्ञः ।
तज्जो गोदासरे रासिणके परशुरामदैवज्ञः ॥

Digitized by Google

तज्ज्ञमहादेवेन ग्रहसिद्धेः सिद्धये यतितम् ।
तच्छ्रेयसा भवानी भवश्च भवतु द्विजप्रजावृद्धयै ॥

नृसिंहकृतमाहादेवीविवृतिरूपग्रन्थादौ ।

गजाननेशाच्युतकेन्द्रदेवान् सूर्यादिखेटांश्च गुरून् प्रणम्य ।
वक्ष्ये महादेवकृतादिखेटसिद्धिं चमत्कारकरीं स्फुटां च ॥

शके व्योमनागेन्द्र १४८० हीनः समौघ इत्यादि ।

अन्ते, "इति श्रीमाहादेव्यां नन्दिपुरस्थरामदैवज्ञात्मजेन नृसिंहदैवज्ञेन मध्यग्रहसिद्धिरुक्ता" इति लेखेन नृसिंहो नन्दिपुरवासिकेशवदैवज्ञसुतरामदैवज्ञस्य गणेशदैवज्ञानुजस्य पुत्रो विष्णुदैवज्ञगुरुरयमेव (कृष्णदैवज्ञवर्णनं तथा गणेशदैवज्ञवर्णने विश्वनाथोदाहरणस्थश्लोकादिकं च द्रष्टव्यम्) यद्येतत्कृतिरचनाकाले नृसिंहवयस्त्रिंशद्वर्षसमं कल्प्यते तदास्य जन्मशकः खबाणशक्रमितः १४५० ।

महेन्द्रसूरिः । १२४२

भृगुपुरनिवासी मदनसूरिशिष्यो मलयेन्दुसूरिगुरुः फीरोजशाहतुगलकनामयवननरपतिसभाप्रधानपण्डितो द्विनवद्वीन्दु १२९२ शके पारसीकभाषातो ध्रुवद्वयदृष्टिवशतो नाडीमण्डलधरातले गोलपृष्ठस्थानां सर्वेषां वृत्तानां रूपाणि परिणमय्य यन्त्रराजाख्यं यन्त्रमकरोत् । अत्र तदीयशिष्येण मलयेन्दुसूरिणोदाहरणरूपा टीका चाकारि । ग्रन्थस्य विलोकनेनास्य तदीयशिष्यस्य मलयेन्दुसूरेश्च गणिते प्रौढिर्न विभाति । इदं यन्त्रराजाख्यं पुस्तकं मलयेन्दुसूरिटीकोपेतं मयोपपत्त्या भूषितं वेदनभोऽष्टरूप १८०४ मिते शके काश्यां चन्द्रप्रभानाम्नि मुद्रायन्त्रालये मुद्रितं च।

अस्यादौ ।

श्रीसर्वज्ञपदाम्बुजं हृदि परामृश्य प्रभाव्यं परं
श्रीमन्तं मदनाख्यसूरिसुगुरुं कल्याणकल्पद्रुमम् ।
लोकानां हितकाम्यया प्रकुरुते सद्यन्त्रराजागमं
नानाभेदयुतं चमत्कृतिकरं सूरिर्महेन्द्राभिधः ॥

अन्ते,

अभूद्भृगुपुरे वरे गणकचक्रचूडामणिः
कृती नृपतिसंस्तुतो मदनसूरिनामा गुरुः ।

यद्येवं द्रोणः खारीत्यादावप्येवमेव भविष्यति लवणादिशब्दवत्साधारणशब्दाः स्युर्गार्गीवाहीक इत्यादिवद्गौणा वा गङ्गायां घोष इतिवल्लाक्षणिका वा नान्या गतिरस्ति सर्वथा सिद्धा प्रथमा । किं च परिमेयवृत्तिभ्यो द्वितीयादयो यथा भवन्ति तथा प्रथमापि भवति । अथ प्रस्थेन परिमिता व्रीहय इत्येवं प्रातिपदिकार्थव्यतिरेकेपि यथा स्यादिति परिमाणग्रहणं, यद्येवं प्रस्थेनेति तृतीया न स्यात्, शेषविवक्षायां च षष्ठी न स्यात्, प्रास्थिक इति तद्धितश्च न स्यात्, तदेतत्परिमाणग्रहणं चिन्त्यप्रयोजनम् । 'उक्तेष्वपीति' । अन्यथानभिहिताधिकारात् 'बहुषु बहुवचन' मित्यादिनास्यैकवाक्यत्वात् तिङ्कृत्तद्धितसमासैरिति परिगणनस्य प्रत्याख्यातत्वादेकादिशब्दैरेकत्वादीनामभिहितत्वादुक्तार्थत्वाद्वा न स्यादिति भावः । 'एको द्वौ बहव इति' । अथ कथमेकं पश्वेकेन कृतमित्यादौ द्वितीयादयो भवन्ति नहि तत्र कश्चिद्धर्मोस्ति । उच्यते । तत्रार्थद्वयमस्ति कर्मादय एकत्वादयश्च, तत्रैकत्वादीनामभिधानेपि कर्मादिप्रतिपादनाय द्वितीयादयो भविष्यन्ति, इह त्वनभिहितार्थान्तराभावान्न स्यात् । नन्वत्राप्येकादिभिः शब्दैरेकत्वादिविशिष्टं द्रव्यमभिधीयते तत्रैकत्वादिगुणस्य निष्कृष्याभिधानाय प्रथमा भविष्यति यथा गुणोपसर्जनद्रव्यवचनाच्छुक्लादिशब्दात्प्रवृत्तिनिमित्तभूतस्य गुणस्य निष्कृष्याभिधाने भावप्रत्ययः पटस्य शौक्ल्यमिति, तदेवं वचनग्रहणमपि शक्यमकर्तुम् । 'प्रातिपदिकग्रहणं किमिति' । उक्तोत्र प्रष्टुरभिप्रायः । 'निपातस्यानर्थकस्येति' । अन्यथार्थाभावान्न स्यादिति भावः । 'प्रलम्बतइति' । किं पुनरत्र प्रथमया प्रार्थ्यते, पदत्वं, षष्ठ्यामप्येतत्सिद्धं, तथाहि । कर्मादिषु द्वितीयादयो विहिताः प्रकृत्यर्थमात्रे प्रथमा तत्र प्रकृत्यर्थाभावे स्वस्वामिभावादिसंबन्धसद्भावे चोपयुक्तादन्यत्वात्सिद्धा षष्ठी । न च तस्या एकत्वादिषु नियमः, उक्तोत्तरत्वात्, तदेवमर्थलिङ्गमात्रे प्रथमेत्येतावदेवावश्यं कर्त्तव्यं, मात्रग्रहणमपि न कर्त्तव्यं, कर्माद्याधिक्ये कस्मान्न भवति, ज्ञापकात्, यदयं 'संबोधने च' त्याह, यदि ह्याधिक्येपि स्यात्तदनर्थकं स्यात्, उत्तरार्थं हि संबोधने सामन्त्रितमित्येव

Digitized by Google

वक्तव्यं किं योगविभागेन, इहावधारणार्थान्मात्रचइत्या 'त्संबोधने चे'ति ज्ञापकाद्वाऽऽधिक्ये प्रथमया न भवितव्यं ततश्च वीरः पुरुष इत्यादौ पदसामानाधिकरण्ये विशेषणविशेष्यभावस्याधिकार्थस्य प्रतीतेः प्रथमा न प्राप्नोति, न, वाक्यार्थत्वात्, यदत्राधिक्यं स वाक्यार्थः पूर्वं स्वार्थमात्रनिष्ठाभ्यामुभाभ्यां प्रथमा विधीयते पश्चात्त्वाकाङ्क्षावशेनान्योन्यान्वये विशेषावगतिरुपजायमाना बहिरङ्गत्वात्प्रथमप्रवृत्तं संस्कारं न बाधत इत्यर्थः । अपर आह । अभिहिते प्रथमेति लक्षणं कर्तव्यं तिङादिभिरभिहिते कर्त्रादौ वृक्षस्तिष्ठति कृतः कटः शत्यः प्राप्तोदको ग्राम इत्यादौ प्रथमा भवतीत्यर्थः, तत्र वीरः पुरुष इत्यादावाधिक्येप्यभिहितत्वात्सिद्धा प्रथमेति, अत्र को दोषः, यत्र क्रिया नास्ति तत्र न स्यात् वृक्षः प्लक्षः, तत्रापि क्रियाऽस्ति कथं वृक्षः प्लक्षः, अस्तीति गम्यते, इह तर्हि प्रासादआस्तइति सदि क्रियाया आसि क्रियायाश्चैकमधिकरणं प्रासादाख्यं तच्च सदिप्रत्ययेन घञाभिहितं प्रसीदत्यस्मिन्प्रासाद इति आसिप्रत्ययेन तिङानभिहितं तत्र सदिप्रत्ययेन यदभिधानं तदाश्रया प्रथमा प्राप्नोति, यत्र च विशेषणसंबन्धे तात्पर्यं नीलमुत्पलं न रक्तमिति तत्रापि न स्यात् क्रियाया अभावात् । अन्यस्त्वाह, तिङ्समानाधिकरणे प्रथमेति लक्षणं तिङन्तेन यत्समानाभिधेयं देवदत्तः पचतीति तत्र प्रथमा प्रासादआस्तइत्यत्र तु वैयधिकरण्यात्तदभावः, वीरः पुरुष इत्यादौ चाधिक्येपि तिङ्सामानाधिकरण्यं प्रति योग्यत्वाद्भवतीति, अत्र को दोषः, इह देवदत्तः पचतीति देवदत्तः पच् लट् इति स्थिते यावत्तिङामुत्पत्तिर्नास्ति तावत्तिङ्सामानाधिकरण्याभावात्प्रथमैवेति नियमस्याप्रवृत्तौ देवदत्तशब्दादविशेषेण विहिताः स्वादयः स्थिता इति शतृशानचोर्निमित्तस्याप्रथमासामानाधिकरण्यस्य विद्यमानत्वात्तावेव स्यातां तिङां त्वभावः स्यात्, न च तिङ्विधेरानर्थक्यं, लिङादिषु सावकाशत्वात्, प्रथमैवेति नियमस्यापि स एव विषयः स्यादिति दोषः । पक्षे चायं दोषः, कतरस्मिन् पक्षे, लटः शतृशानचावित्यत्र द्वौ पक्षौ अप्रथमेति पर्युदासः प्रसज्यप्रतिषेधो वेति, तथा 'कर्मणि द्वितीये'त्यादावपि प्रकरणे द्वैतं

Digitized by Google

भवति विभक्तिनियमः स्यादर्थनियमो वेति तत्रार्थनियमः पर्युदासश्चा-
श्रीयते तदा ऽयं दोषः, कथं, कर्मणि द्वितीयैवेत्यस्मिन् नियमे द्वितीया-
दीनामनियतत्वात् प्रातिपदिकार्थमात्रेपि भावात्तदाश्रयौ शतृशानचौ
प्राप्नुतः, प्रसज्यप्रतिषेधे तु प्रथमाया अपि तत्र भावात्तदाश्रयः प्रतिषेधः
प्रवर्त्ततइति न दोषः शतृशानचोरभावात्तिङ्क्षु सत्सु तत्सामानाधि-
करण्यात्प्रथमैवेति नियमेन द्वितीयादीनां व्यावर्त्तितत्वात्, यदा तु द्वि-
तीयादीनां कर्मादिषु नियमः कर्मण्येव द्वितीयेति तदा तदभावे तासा-
मभावादनियतायाश्च प्रथमायाः सन्निधानात्पर्युदासे प्रसज्यप्रतिषेधे च
नास्ति शतृशानचोः प्रसङ्गः, तदभावे च तिङ्क्षु सत्सु तत्सामानाधिक-
रण्यात्तत्रैव प्रथमा भवतीति नियमेन कर्मादिषु प्रथमाव्यावृत्तिरिति न
दोषः । ननु च विभक्तिनियमे कर्माद्यभावेन यद्यपि द्वितीयादीनां तत्रा-
भावस्तथापि शेषषष्ठी प्राप्नोति, तथाहि । यदि तिङ्सामानाधिकरण्य-
एव प्रथमेत्यस्मान्नियमात्प्रागेव द्वितीयादिवत् षष्ठ्यपि नियता स्यात्स्या-
त्तत्राप्रसङ्गस्तस्याः सा तु शेषलक्षणा यत्र च विभक्त्यन्तरस्य नियमो न
कृतः स शेषः ततश्च तिङ्सामानाधिकरण्यात्प्राक् शेषत्वात् षष्ठी प्रा-
प्नोतीति तत्सामानाधिकरण्याच्छतृशानचावेव स्यातां पर्युदासे प्रसज्य-
प्रतिषेधे तु न दोषः प्रथमाया अपि भावात् । सत्यं, द्वयोरपि पक्षयोः पर्यु-
दासे भवत्येव दोषः, भाष्ये तु विभक्तिनियमे पर्युदासेपि न दोष इत्य-
नास्थावादः पाक्षिक एष दोष इत्यत्रैव तात्पर्यं, क्षन्तव्यं च किंचिद्दुरुप-
न्याभिधानमित्युपरम्यते ॥

"संबोधने च" ॥ 'आभिमुख्यकरणमिति' । यद्वस्तु येनाकारेण
सिद्धं तस्य तेनाकारेणाभिमुखीकरणं सम्बोधनं न त्वेकश्रुतिविधाविव
कस्य चिदर्थस्यानुष्ठेयता प्रत्यायनं, वाक्यार्थो हि सः, अभिमुखीकरणं तु
न वाक्यार्थो येन वीरः पुरुष इत्यादिवद्यदत्राधिक्यं स वाक्यार्थ इति
प्रथमा सिद्ध्येत्, यस्य पदान्तरसंप्रयोगे सत्येव प्रतीतिः स वाक्यार्थः, इह
तु देवदत्तेत्येतावत्युक्ते आभिमुख्यकरणं गम्यते ऽतः पदार्थ एवात्राधि-
क्यमिति षष्ठ्यां प्राप्तायामिदं वचनं तदाह । 'तदधिके प्रातिकार्थे-

Digitized by Google

इति' । असिद्धेन वाक्यार्थाभिमुखीकरणं न संभवति राजा भव युध्यस्व स्वाहेन्द्रशत्रुर्वर्द्धस्वेति, हेपचन् हेपचमानेत्यादौ शतृशानचोः संबोधने विधानेपि विभक्तिरहितयोस्तयोः कर्त्राद्यभिधानएव सामर्थ्यं यथा लोटो द्विर्वचननिरपेक्षस्येत्यनेन प्रथमा भवति, यद्वाऽभिहितः सोर्थान्तर्भूतः प्रातिपदिकार्थः संपन्न इति पूर्वेण भविष्यति योगविभाग उत्तरार्थः ॥

"सामन्त्रितम्" ॥ 'तदन्तं यच्छब्दरूपमिति' । महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं, आमन्त्रणमामन्त्रितमिति । अभेदोपचारात्तत्साधने शब्दे वर्त्तते विभक्त्यन्तेन केवलया विभक्त्येति संज्ञाविधौ प्रत्ययग्रहणे तदन्तस्य ग्रहणमिति भावः, उदाहरणेष्वा 'मन्त्रितस्य च' त्याद्युदात्तत्वं भवति, सेति वचनं प्रातिपदिकार्थसूत्रेणापि संबोधने विहिता या प्रथमा तदन्तस्यापि संज्ञा यथा स्यात् हेपचन् हेपचमान, असति तु तस्मिन्ननन्तरस्य विधिर्वा प्रतिषेधो वेत्यनन्तरसूत्रविहिताया एव स्यात् ॥

"एकवचनं संबुद्धिः" ॥ 'हे पटो इति' । संबुद्धौ च 'ह्रस्वस्य गुण' इति गुणः, सुः संबुद्धिरिति वक्तव्ये एकवचनग्रहणमेकोर्थ उच्यते येन तावन्मात्रस्य प्रत्ययस्य संज्ञार्थम्, अन्यथा प्रक्रमाभेदाय तदन्तस्य स्यात् ॥

"षष्ठी शेषे" ॥ उपयुक्तादन्यः शेषः, कर्मादयश्च प्रातिपदिकार्थपर्यन्ता उपयुक्ता इत्याह । 'कर्मादिभ्योन्य इति' । ननु न कर्मादिभ्योन्यः प्रातिपदिकार्थस्य व्यतिरेकः संभवति कथं क्रियामन्तरेण संबन्धानुपपत्तेः, सर्वत्र तस्यास्तन्निमित्तानां कर्मादीनां चावश्यंभावात्, तथाहि । राज्ञः पुरुष इति राजा कर्त्ता राजा द्रव्यं पुरुषाय ददातीत्यर्थसंप्रत्ययात् । 'वृक्षस्य शाखेति' । लोकप्रसिद्ध्या वृक्षोधिकरणं, तार्किकप्रक्रियया तु शाखा, देवदत्तस्य गौरित्यादौ तु प्रतिग्रहणादौ कर्तृत्वं प्रतीयते देवदत्तः प्रतिग्रहीता क्रेता विनिमाताऽप हर्त्ता वेति, उच्यते, नटस्य शृणोतीत्यत्र तावत्क्रियाकारकसंबन्धरूप एव शेषः, कथम्, 'आख्यातोपयोग'-इत्युपयोगग्रहणान्नटस्यापादानसंज्ञा नास्ति दुह्यादिपरिगणनाच्चाकथितत्वेपि कर्मसंज्ञा नास्ति, तदयं नटः कारकमेव शेषः, यच्चोक्तं क्रियायास्त-

Digitized by Google

निमित्तानां च सर्वत्र भावाद्वान्यः प्रातिपदिकार्थस्य व्यतिरेक इति । तत्र, प्रतिबद्धक्रियादिजन्यस्य सर्वलोकप्रसिद्धस्य स्वस्वामिभावादिसंबन्धस्यापि दुरपलापत्वात् । यदि च परस्परमुपकार्योपकारकभावाभावे संबन्धानुपपत्तेः क्रियाकारकसंबन्धोऽपि सर्वत्र वस्तुस्थित्यास्तीत्युच्येत, अस्तु तथा न कश्चिद्दोषः, नहि यद्वस्तुस्थित्यास्ति तत्तदभिधातव्यं यदेव तु विवक्षितं तदेव स्वनिमित्तां विभक्तिं प्रसूते तत्र स्वस्वामिभावादिसंबन्धविवक्षायां सन्नपि क्रियाकारकसंबन्धो न विवक्ष्यत इति द्वितीयाद्यभावे षष्ठी भविष्यति एवं च मातुः स्मरति न माषाणामश्नीयादनुकरोति भगवतो नारायणस्येत्यादौ श्रूयमाणेऽपि क्रियाशब्दे मातृसंबद्धं स्मरणमिति संबन्धमात्रं विवक्षितं कर्मत्वं तु सदप्यविवक्षितमिति षष्ठी भवति । उक्तं च ।

संबन्धः कारकेभ्यो ऽन्यः क्रियाकारकपूर्वकः ।
श्रुतायामश्रुतायां च क्रियायां सोऽभिधीयते ॥

इति । 'षष्ठी शेष' इति चेद्विशेष्यस्य प्रतिषेधः स्वस्वामिभावादिसंबन्धः षष्ठ्यर्थः स च द्विष्ठस्तत्र यद्यप्येकस्मादप्युत्पन्नयापि षष्ठ्या द्विष्ठस्यापि संबन्धस्यावगमादुभाभ्यां षष्ठी न भवति तथापि कदा चिद्विशेष्यादपि प्राप्नोति प्रथमा च न प्राप्नोति संबन्धस्याधिकस्य भावात्, न वा वाक्यार्थत्वात्, यदत्र पुरुषस्याधिक्यं स वाक्यार्थः राज्ञ इत्येतत्पदसन्निधानात्पुरुषस्य संबन्धः प्रतीयते पुरुषप्रातिपदिकं तु स्वार्थमात्रे वर्तत इति तत्र प्रथमा च भविष्यति षष्ठी च न भविष्यतीति, एतदुक्तं भवति, राज्ञ इति केवलपद उच्चार्यमाणे संबन्धित्वमनियतप्रतियोगिकमवगम्यते पुरुषपदसन्निधौ तु सविशेषस्य प्रतीतिरित्येतावत्, ततश्चानियतं स्वमपेक्ष्य प्रथममेव संबन्धाश्रया षष्ठी भवति ननु च षष्ठ्युच्चारणानुच्चारणकृतो यो विशेषो ऽत्रभवान् पुरुषपदादपि षष्ठीमुच्चारयतु गंस्यते स विशेषः । नैतच्चुचूद्यते । नहि शब्दस्य भावाभावाभ्यामर्थस्य भावाभावौ क्रियेते किन्तर्हि विद्यमान एवार्थः प्रतिपिपादयिषितश्च वाचकपदप्रयोगे हेतुर्भवति तत्र गुणस्य परोपकारकत्वेन विवक्षितत्वात्तदन्ते षष्ठी भवति

पुरुषस्य तूपकार्यत्वात्स्वनिष्ठत्वेन विवक्षितत्वात्प्रथमा भवति, तत्र च संबन्धो गुणे पदं निधाय प्रधानमपि स्पृशति गुणश्च प्रधानोपकाराय प्रवृत्तोन्यथानुपपत्ते रूपान्तरमाश्रयति प्रधानं तु स्वनिष्ठत्वेन न रूपान्तरं भजते, उक्तं च ।

द्विष्ठोप्यसौ परार्थत्वाद्गुणेषु व्यतिरिच्यते ।
तत्राभिधीयमानः सन् प्रधानेप्युपयुज्यते ॥

इति । यदा तु पुरुषस्याप्राधान्यं राज्ञश्च प्राधान्यं विवक्ष्यते तदा पुरुषस्य राजेत्यपि भवत्येव, यदा च राज्ञः पुरुषस्य गृहमिति तत्पुरुषस्य गृहादिसंबन्धो विवक्ष्यते तदैकस्यापि वस्तुनो भिन्नविषयो गुणप्रधानभावो न विरुद्ध इतइति द्वाभ्यामपि षष्ठी भवति, राज्ञ इति हि षष्ठ्या राजपुरुषयोरेव संबन्धोभिहितो न पुरुषस्य गृहस्य च, इह पञ्चके प्रातिपदिकार्थे 'कर्मणि द्वितीये' त्यादौ चार्थनियमपक्षे शेषग्रहणं शक्यमकर्तुं कथं कर्मादयो नियताः शेषोनियतः, ततश्च स्वादिसूत्रेण द्वितीयादिषु षष्ठ्यां च शेषे प्राप्तेषु षष्ठीत्येतावदप्युच्यमानं नियमार्थं सम्पद्यते षष्ठ्येव भवतीति, यत्र च षष्ठी च प्रत्ययान्तरं च प्राप्नोति तत्रैवंविधो नियम इत्यर्थाच्छेष एव भविष्यतीति उत्तरार्थमेव तदवश्यं शेषग्रहणं कर्त्तव्यं, त्रिकपक्षे तु स्वार्थे षष्ठी मा भूदिति द्वितीयादीनामिव कर्मादिः शेषो वाच्यत्वेन विधातव्यः, तथा प्रत्ययनियमपक्षे कर्मादीनामनियतत्वात्तेष्वपि षष्ठ्यां प्राप्तायां शेषएव षष्ठी न कर्मादिष्विति षष्ठी नियमार्थं शेषग्रहणं कर्त्तव्यम् ॥

"ज्ञोविदर्थस्य करणे" ॥ असंदेहार्थं विदर्थस्य ज्ञः करणइत्येव वक्तव्ये तदकरणादविदर्थस्येति पदच्छेदः, लुग्विकरणाश्च विविदेस्तते तदर्थ एव जानातेर्वृत्तिसंभवात् तदाह । 'अविदर्थस्याज्ञानार्थस्येति' । 'सर्पिषो जानीतइति' 'अपह्नवे ज्ञः' 'अकर्मकाच्चे' त्यात्मनेपदम् । 'प्रवृत्तिवचन इति' । ज्ञानपूर्विकायां प्रवृत्तौ वर्त्तमानइत्यर्थः । 'सर्पिषि रक्त इति' । रागो मिथ्याज्ञानस्य हेतुः, द्रौपद्यां रक्तो हि कीचको रहसि भीमसेनमालिङ्ग्यावोचद् अहो उत्तमाङ्गनानामीदृशी सुस्पर्शतेति ।

'प्रतिहतो वेति'। प्रतिघातो द्वेषस्य हेतुः, द्वेषश्च मिथ्याज्ञानस्य हेतुः, यो हि परिहासशीलेन केन चित्पूयादिकमशुचि द्रव्यं निर्दिश्योक्तः सर्पिरेतत्पिबेति स तत्र प्रतिहतस्तत आरभ्य सर्पिर्द्वेष्टि, द्विषतश्चास्मिन्नपि तज्ज्ञानमुत्पद्यते यदि सर्वमेव ग्राह्यं, तदात्मना सर्पिः स्वभावतया प्रतिपद्यते, एवं सत्यविदर्थत्वं नोपपद्यते तत्राह। 'मिथ्याज्ञानमेवेति'। ज्ञानकायाकरणादितिभावः। अविप्लुतविषयपरिच्छेदो हि ज्ञानकार्यं तच्च मिथ्याज्ञानेन न क्रियते, अस्मिन्पक्षे उदकादिकर्मणा सकर्मकत्वाद् 'कर्मकाच्चे' त्यात्मनेपदानुपपत्तेः परस्मैपदमुदाहार्यं मन्यन्ते ॥

"अधीगर्थदयेशां कर्मणि" ॥ इक् स्मरणे ककारोऽत्रैव विशेषणार्थः, अधिपूर्वस्यैवोच्चारणमेवमेवायं प्रयोक्तव्य इति ज्ञापनार्थम्, 'शेषत्वेन विवक्षितइति'। ननु शेषत्वेन विवक्षिते पूर्वेणैव सिद्धा षष्ठी यथा न माषाणामश्नीयादनुकरोति भगवतो नारायणस्येति, सत्यं, प्रकरणं तु नियमार्थम्, अस्मिन्विषये षष्ठी भवत्येव श्रूयतएव न लुप्यतइति, किं कृतं भवति समासो निवर्त्तितो भवति मातुः स्मरणमिति, एवं पूर्वसूत्रे परत्र च प्रकरणे सर्वत्र द्रष्टव्यं, समासे सति 'सुपो धातुप्रातिपदिकयो'रिति षष्ठी लुप्येत, तेन प्रतिपदविधानषष्ठी न समस्यतइति सिद्धं भवति, कथं तर्हि विशेषस्मृतेः संशय इति समासः, उच्यते, शेषषष्ठ्या एव समासनिषेधः, इह तु 'कर्तृकर्मणोः कृतीति' कर्मरूपविवक्षायामेव षष्ठी समासो भविष्यति, कः पुनरत्र विशेषः शेषषष्ठ्याः समासः स्यात्कारकषष्ठ्या वा, अयमस्ति विशेषः कारकषष्ठ्याः समासे कृत्स्वरो भवति शेषषष्ठ्याः समासे तु समासान्तोदात्तत्वं स्यात्, अन्तोदात्तसमासनिवृत्त्यै प्रकरणं यत्र च कारकषष्ठी प्रतिषिध्यते यथा मातुः स्मृतमिति तत्र समासोऽपि मा भूत्, एवं चात्र प्रकरणे ये ऽनुपात्ताः यानि चात्र प्रत्युदाहरणानि तेषूभयेष्वपि निष्ठायोगे शेषषष्ठ्याः समासो ऽन्यत्र कारकषष्ठ्या अपीति वेदितव्यम्। 'गुणैरिति'। गुणेषु शेषत्वेन विवक्षितेषु अस्य नियमस्याभावात्समासो भवत्येवेत्यर्थः। इयमेवास्मिन्प्रकरणे प्रत्युदाहरणगतिरिति ॥

"कृञः प्रतियत्ने" ॥ 'एधोदकस्येति' । 'आशिषप्राणिना' मि- त्येकवद्भावः । 'उपस्कुरुतइति' । गन्धनादिसूत्रेणात्मनेपदम् । उपात्प्र- तियत्नेत्यादिना सुट् ॥

"रुजार्थानां भाववचनानामज्वरेः" ॥ रुजोभङ्गेभिदादिपाठाद- स्मादेव निपातनाद्वा ऽङ् 'भाववचनानामिति' । नायमर्थो भाववाचिना- मिति धातूनां भाववाचित्वाव्यभिचारात् किं तर्हि भावशब्देन घञादि- वाच्यः सिद्धरूपो भाव उच्यते । वचन इति कर्त्तरि ल्युट्, तत्र प्रकृत्यर्थो न विवक्ष्यते न हि रुजार्थानां भावो वक्ता प्रतिपादयितोच्चारयिता वोपप- द्यते तस्मात्प्रत्ययार्थ एव कर्त्ता विवक्षितः, भावो वचनः कर्त्ता येषामि- त्यर्थः, तदाह । 'भावकर्तृकाणामिति' । 'चौरस्यामयतीति' । अम रोगे चुरादिः 'नान्ये मितो ऽहेतौ विति' चुरादौ वचना 'ज्वलह्वलह्मलनमामनु- पसर्गाद्वा' ...

चुरादिः 'नान्ये मितो ऽहेतौ विति' चुरादौ वचना 'ज्वलनीजृषक्नसुरञ्जोम- न्ताश्चे' ति मित्त्वं न भवति 'ज्ञपमिच्चे' त्यारभ्य 'नान्ये मितोऽहेतौ' वितः प्राग्ये पठितास्तएव चुरादिषु मितो भवन्ति नान्य इत्यर्थः । 'आमय इति' आ- ङ्पूर्वस्य मीनातेरेच्, मीनातिर्मिनोतीत्यात्वस्य निमिमीलियां खलचो- रिति प्रतिषेधः । 'नदीकूलं रुजतीति' । अत्र नदी कर्त्री न भावः । ननु रुजा- शब्दो व्याधौ रूढ इति नात्र प्रसङ्गः एवं तर्हि प्रत्युदाहरणादिगियं दर्शि- ता इदं तु प्रत्युदाहरणं श्लेष्मा पुरुषं रुजतीति व्याधिना कासादिना पाडयतीत्यर्थः । 'ज्वरयतीति' । ज्वर रोगे घटादिः, 'सन्तापयतीति' । 'हेतुमति चे' ति णिच्, सन्तापोऽत्र भावः कर्त्ता च ॥

"आशिषि नाथः" ॥ 'नाथतइति' । 'आशिषि नाथ' इत्यु- पसंख्यानादात्मनेपदं, तच्चानुदात्तेत्त्वादेव सिद्धे नियमार्थम्, आशिष्येव नाथ इति, तेन प्रत्युदाहरणे परस्मैपदम् ॥

"जासिनिप्रहणनाटक्राथपिषां हिंसायाम्" ॥ 'न दैवादिकस्येति' । जासीति निर्देशाद् हिंसायामिति वचनाच्च निप्राभ्यां यथा संभवमुपसृष्टो हनो निप्रहणः, 'हन्तेरत्पूर्वस्येति' णत्वम्, 'प्रणिहन्तीति' । नेर्गदेत्या- दिना णत्वं, नट अवस्यन्दने चुरादिः, नट नृत्ताविव्यस्य तु घटादिपठि- तस्याग्रहणं विकृतनिर्देशात् । 'निपातनाद्वृद्धिरिति' । घटादिपाठस्तु

'घटादयः षित' इत्यातिदेशिकोऽङ् यथा स्यात् 'चिण्णमुलोर्दीर्घोऽन्यतरस्या'मिति दीर्घश्च यथा स्यादित्येवमर्थः ॥

"व्यवहृपणोः समर्थयोः" ॥ 'समर्थयोरिति'। संशब्दो दृष्टो समानार्थः समशब्दस्य वा निपातनात्सरूपमिति भावः, संबद्धार्थयोरिति तु न विज्ञायते, व्याख्यानात् संभवति हि व्यवहृपणोर्हेतुहेतुमद्भावः संबन्धः। 'शतस्य व्यवहरतीति'। शतं क्रयविक्रयरूपेण विनियुङ्क्ते दीव्यति वेत्यर्थः, शलाकां व्यवहरति गणयतीत्यर्थः ॥

"दिवस्तदर्थस्य"। अत्र शेषइति नानुवर्त्तते, उत्तरसूत्रद्वयारम्भसामर्थ्यात्, अथ पूर्वसूत्र एव दिविरपि कस्मान्न पठितः, एवं हि तदर्थस्येति न वक्तव्यं भवति तत्राह। 'योगविभाग इति' ॥

"विभाषोपसर्गे" ॥ 'शलाकां प्रतिदीव्यतीति'। अत्र विजिगीषाद्यो दिविर्वर्त्तते न व्यवहारे ॥

'द्वितीया ब्राह्मणे" ॥ मन्त्रव्यतिरिक्तो वेदभागो ब्राह्मणम्। 'ग्रामस्य तदहः सभायामिति'। ग्रामस्य सभायामित्यन्वयः, तदहरित्येतदुदाहरणं, 'स्वमोर्नपुंसका'दिति लुक्, 'अहनि'ति रुत्वम्। 'अनुपसर्गस्य नित्यं षष्ठ्यां प्राप्तायामिति'। दिवस्तदर्थस्येत्यनेन, अथ सोपसर्गस्यापि पूर्वेण षष्ठ्यामपि प्राप्तायां नित्यद्वितीयार्थं कस्मान्न भवतीत्याह। 'सोपसर्गस्येत्यादि' ॥

"प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने" ॥ 'इष्यतेर्दैवादिकस्येति'। इषु गतावित्यस्य श्यना निर्देश इच्छतीष्यत्योरिच्छाभीक्ष्ण्यार्थयोर्निवृत्त्यर्थः। 'तद्विषय एवेति'। लोण्मध्यमैकवचनान्तः। 'देवतासंप्रदानइति'। देवता संप्रदानं यस्यार्थस्य तत्र वर्तमानयोः कर्मणि कारकइत्यन्वयः, 'हविषो' हविर्विशेषवाचिन इत्यर्थः। 'प्रेष्येति'। ब्रूहिप्रेष्येत्यादिना प्लुतः। 'अग्नये गोमयानि प्रेष्येति'। गोमयं हविष्ट्वेन क्वापि न चोदितं, 'हविषः प्रस्थितस्येति'। प्रस्थितशब्देन यद्विशेष्यते तस्येत्यर्थः, इदं च भाषायामपि भवति उत्तरत्र छन्दोग्रहणात् ॥

Digitized by Google

"चतुर्थ्यर्थे बहुलं छन्दसि" ॥ 'या खर्वेणेति' । रजस्वलायाः खर्वपानादिप्रतिषेधार्थोऽयमर्थवादः, तर्हि वक्तव्यं षष्ठ्यर्थे चतुर्थीति, न वक्तव्यं, योगविभागात्सिद्धं, चतुर्थ्यर्थइति नायं समासः किं तर्हि चतुर्थी अर्थइति योगो विभक्तव्यः, षष्ठीत्यनुवर्त्तते, अर्थे षष्ठी भवति चतुर्थी चेति, तत्र स्वार्थएव षष्ठीचतुर्थ्योर्विधानमनर्थकमित्यन्योन्यसन्निधाना-दन्योन्यार्थे विभक्तिद्वयं विज्ञायते ॥

"कृत्वोर्थप्रयोगे कालेऽधिकरणे" ॥ कृत्वसुचोऽर्थो लक्ष्यते, कृत्वोऽर्थो येषां ते कृत्वोर्थाः, । 'पञ्चकृत्व इति' । 'संख्यायाः क्रियाभ्या-वृत्तिगणने कृत्वसुच्' । 'द्विरिति' । 'द्वित्रिचतुर्भ्यः सुच्' अर्थग्रहणमे-तदर्थम् ॥

"कर्तृकर्मणोः कृति" ॥ 'इह क्रियायाः साधनं भवतीति' । कर्तृकर्मभ्यां क्रिया सन्निधाप्यते, धातुरेव क्रियावाची, धातोश्च द्वये प्रत्ययाः कृतस्तिङश्च, तत्र तिङ्प्रयोगे नलोकाव्ययेति लप्रतिषेधेन भाव्यं, स चावश्यं लप्रतिषेधः कर्त्तव्यः, ये कृतो लादेशास्तदर्थम्, ओदनं पचन् ओदनं पचमानः, पपिः सोमं, ददिर्गा इति, इह तु नार्थः कृद्ग्रहणेनेति मत्वा पृच्छति । 'कृतीति किमिति' । 'कृतपूर्वी कटमिति' । ननु कृतः कटः पूर्वमनेनेत्यस्मिन्विग्रहे क्तस्य कर्मणि विधानात्तेनैव कर्मणोऽभिहितत्वान्नैव द्वितीयया भाव्यम्, एवं च तदपवादः षष्ठ्यपि न प्राप्नोति, इहाप्यनभिहिताधिकारात्, कृतशब्दस्य च कटापेक्षस्य समासो दुर्लभः, एतेन तद्धितो व्याख्यातः, तस्मादयमसाधुरेव प्रयोगः । सत्यम्, विशेषविवक्षायां नैव समासतद्धितौ भवतो, यदा तु कृतं पूर्वमनेनेति कर्मसामान्ये भावे वा क्त उत्पद्यते तदा सापेक्षत्वाभावात्समासः, केन 'सुप्सुपे' ति, ततः 'पूर्वादिनिः' 'सपूर्वाच्च' तीनिःप्रत्ययः, न च कटस्य क्तेनाभिधानं करोतेरुत्पद्यमानः क्तप्रत्ययः कर्मसामान्यमेवाह विशेषकर्म-सम्बन्धात्तु तस्याभिधानं, न चात्र तद्धितेनैकार्थीभूतस्य निष्कृष्य कटेन संबन्धः सम्भवति, क्रियया तु गुणभूतयापि कारकाणां सम्बन्धो भवति यथा कटं कृतवानिति, कृतपूर्वीशब्दश्चायं पूर्वं कृतमनेनेत्यस्मिन्नर्थे व्युत्पा-

Digitized by Google

दितः पूर्वं कृतवानित्यनेन समानार्थः संपद्यते, तत्र करोतिक्रियापेक्षमस्ति कटस्य कर्मत्वम्, अनभिहितं च तदिति कृद्ग्रहणे षष्ठी स्यात्, यत्र च निष्ठान्तेन शब्देन कर्तृकर्मणोः संबन्धस्तत्रैव निष्ठाश्रयः प्रतिषेधो यथा कटं कृतवान् कृतः कटो देवदत्तेनेति, इह तु कृतस्य कटेन संबन्धो न भवतीत्युक्तमेव, अथ तु वस्तुतो निष्ठान्ते पदे धातुवाच्यक्रियापेक्षे ये कर्तृकर्मणी तयोः प्रतिषेधस्तथा सति नेदं कृद्ग्रहणस्य प्रयोजनं तेनेतदपि निरस्तम्, असति कृद्ग्रहणे कटं कारयति पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति णिच्प्रकृतेः पचेरर्थं प्रति कर्तृकर्मणोः षष्ठीप्रसङ्गः सति तु कृद्ग्रहणे णिचोऽकृत्त्वान्न भवतीति कथमिव निरस्तं, न लोकेत्यत्र नैवं ज्ञायते लप्रकृतिभूतस्य धातोर्ये कर्तृकर्मणी इति किं तर्हि लान्ते पदे या क्रियोच्यते प्राधान्येन गुणभावेन वा तत्र ये कर्तृकर्मणी तयोः षष्ठी न भवतीति तेनेदमप्यप्रयोजनम्, अथ स्यात् न लोकाव्ययेत्यत्राव्ययविशेषणार्थं कृद्ग्रहणं तेनोच्चैः कटानां स्रष्टेत्यत्राकृतोऽप्यव्ययस्य प्रयोगे निषेधाभाव इति तदपि न, अव्ययेन कर्तृकर्मणी विशेषयिष्यामोऽव्ययस्य ये कर्तृकर्मणी तयोः षष्ठी नेति, न चाकृत उच्चैसः कर्तृकर्मणी सम्भवतः, इह तर्हि करोतीति कृदिति कृच्छब्देन कर्तोच्यते तत्र कर्तृकर्मणोरित्येव षष्ठ्यामपि सिद्धायां पुनर्विधानं गुणभूतेऽपि कर्तरि यथा स्याद्भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामिति, भिदेर्ण्यन्तात्पर्यायादिना ण्वुल्, अत्र ण्यर्थस्य प्राधान्यात्प्रयोजककर्ता प्रधानं प्रयोज्यकर्ता तु प्रकृत्यर्थस्य गुणभावाद्गुणभूत इति प्रधानेतरसन्निधौ प्रधानादेव स्यात् कृद्ग्रहणादप्रधानादपि भवति, एतदपि नास्ति प्रयोजनं, तृतीयावत् सिद्धं, तद्यथा पाचित ओदनो देवदत्तेन यज्ञदत्तेनेत्यादौ प्रधानाप्रधानयोर्द्वयोरपि कर्त्रोस्तृतीया भवति तत्कस्य हेतोः एकशब्दवाच्यत्वाभावेन विरोधाभावात् तथा षष्ठ्यपि भविष्यति, इह तर्हि प्रयोजनम्, ‘उभयप्राप्तौ कर्मणी’ति बहुव्रीहिर्यथा स्यात् अन्यथाऽन्यपदार्थस्यानुपात्तत्वात्तत्पुरुषः स्यात्तच्च चानिष्टं वक्ष्यते, यद्येवमुत्तरत्रैव कृद्ग्रहणं कर्तव्यम्, अथ वानुपात्तेऽप्यन्यपदार्थे व्याख्यानाद्बहुव्रीहिर्भवि-

ष्यति यथे 'कार्यो तु प्रथमस्ये' ति तदेतत्कृद्ग्रहणं चिन्त्यप्रयोजनम् । के चिदाहुः । इहैव तद्धितनिवृत्त्यर्थं कृद्ग्रहणमिति, प्रजानातीति प्रज्ञः प्रज्ञ एव प्राज्ञः 'प्रज्ञादिभ्यश्चे'ति स्वार्थिकेऽणि कृते व्याकरणं प्राज्ञ इत्यत्र षष्ठी न भवति, ननु क्रियमाणेपि कृद्ग्रहणे कस्मादेवात्र न भवति यावता भवत्येव कृतोऽत्र प्रयोगे। नह्येतच्छक्यं वक्तुं प्रत्ययार्थेनैकार्थीभूतस्य कृदन्तस्य निष्कृष्य व्याकरणेन संबन्धो न संभवतीति प्रत्ययस्य स्वार्थिकत्वेनार्थान्तराभावात् । नैष दोषः । कृद्ग्रहणसामर्थ्यात्कृदन्तेनैव योगे षष्ठी विज्ञास्यते इह तु कृता तद्धितेन चैकरूपः संबन्ध इति न भविष्यतीत्यलमतिवादेन । 'शेष इति निवृत्तमिति' । तेनाप्राप्ता षष्ठी विधीयतइत्यस्याः समासो भवतीति कृद्योगा च षष्ठी समस्यतइति न वक्तव्यं भवति ॥

"उभयप्राप्तौ कर्मणि" ॥ उभयशब्देन प्रकृतत्वात्कर्तृकर्मणी संबध्येते । 'उभयप्राप्ताविति बहुव्रीहिरिति' । न तत्पुरुषः । 'उभयोः कर्तृकर्मणोः षष्ठी प्राप्तौ सत्यामिति' । अत्र प्रयोजनं वक्ष्यति । 'कर्मण्येवेति' । विपरीतस्तु नियमो न भवति उभयप्राप्तावेव कर्मणीति एवं हि पूर्वसूत्रे कर्मग्रहणमनर्थकं स्याद् अनेनैव विशिष्टविधानमाश्रयणीयं स्यादिति भावः । 'आश्चर्य इति' । सकर्मकेभ्यो भावे कृति विहिते कर्मणि कर्तरि च षष्ठी प्राप्ता नियमेन कर्तुरपनीयते, प्राप्तिग्रहणाच्च प्राप्तिमात्रे नियम इति कर्तृकर्मणोः प्रयोगेपि कर्तरि तृतीया भवति, 'अन्तर्धौ येनादर्शनमिच्छती'ति अत्र ह्यात्मन इति गम्यमानत्वादस्त्युभयोः प्राप्तिः, अत्र चानन्तरस्य विधिर्वा प्रतिषेधो वेति कर्तृकर्मणोरिति प्राप्तिर्नियम्यते शेषषष्ठी तु कर्तर्यपि भवत्येव नियमस्य प्रयोजनं पक्षे तृतीयाश्रवणं कर्मापि यदा शेषत्वेन विवक्ष्यते तदा तत्रापि शेष षष्ठी भवत्येव तस्याश्च 'कर्मणि चे'ति निषेधाभावात्समासोपि भवति, निषेधस्य तु प्रयोजनं कृत्स्वरो मा भूदिति एतदपि सूचितं 'पूर्वेण षष्ठी प्राप्तौ नियम्यत इति' आश्चर्यमिदमित्येतावदेकं वाक्यं किं तदित्याह । 'ओदनस्येति' । अत्र पाके ओदनस्य कर्मत्वं प्रादुर्भावे च ब्राह्मणानां

कर्तृत्वमित्यनेकत्वात्कृदुभयप्राप्तिर्भवति । 'भेदिकेति' । पर्यायादिषु ल्युट् । 'चिकीर्षति'। 'अ प्रत्ययात्' । अत्रोभयत्रापि कर्त्तरि तृतीया न भवति षष्ठी तु शेषविवक्षयापि सिद्ध्यति समासोऽप्यत्र भवति धर्मजिज्ञासा देवदत्तस्य शिष्यस्याचार्यशुश्रूषेति शेषे विभाषेति तत्र यदा नियमेन कर्त्तरि तृतीया तदा 'कर्मणि चे'ति निषेधात्पाणिनिना सूत्रकृतिः आचार्येण शब्दानुशासनमित्यसाधुः समासः, पाणिनेः सूत्रकृतिराचार्यस्य शब्दानुशासनमिति तु साधुः ॥

"क्तस्य च वर्तमाने" ॥ 'राज्ञां मत इति' । 'मतिबुद्धिपूजार्थेभ्यश्चे'ति वर्तमाने क्तः, शेषविज्ञानादित्युपसंख्यानं प्रत्याचष्टे, सदप्यत्र क्तान्तस्य कर्मत्वमविवक्षाया तिरोधीयते संबन्धित्वमात्रमेव तु विवक्षिष्यते ततश्च न माषाणामश्नीयादितिवत्सिद्धा षष्ठीत्यर्थः । 'तथा चेति' । उपसंख्याने त्वेतच्च सिद्ध्यतीति भावः ॥

"अधिकरणवाचिनश्च" ॥ 'तस्य च प्रयोगे षष्ठी विभक्तिर्भवतीति' । यथा सम्भवं यत्र कर्त्तैव सम्भवति तत्र कर्त्तरि इदमेषामासितमिति, सकर्मकेभ्यस्त्वधिकरणे क्ते विहिते द्वयोरपि कर्तृकर्मणोरनभिहितत्वाद् द्वयोरपि षष्ठी भवति इदमेषां भुक्तमोदनस्येति, उभयप्राप्तौ कर्मणीत्ययं तु नियमः कर्तृकर्मणोः कृतीत्यस्या एव प्राप्तेः । वाचिग्रहणं किम् । अधिकरण इत्युच्यमाने क्तोपलक्षणं विज्ञायेत ततश्चार्थान्तरवृत्तेरपि ध्रौव्यादेरुत्पन्नस्य क्तस्य प्रयोगे षष्ठी स्यात् वाचिग्रहणे तु सति यदाधिकरणं वक्ति तदैव षष्ठी भवति पदार्थान्तरे तदा कर्त्तरि तृतीया कर्मणि द्वितीया भवति इहैभिरासितं ग्रामे गत इति इह गत्यर्थधातुश्चलब्धं भवति इदमेषां गतमित्यधिकरणे, इदमेते गता इति कर्त्तरि, इहैभिर्गतमिति नपुंसके भावे, कर्तृविवक्षायां इदमेषाङ्गतमिति, तत्रैव शेषविवक्षायाम् ॥

"न लोकाव्ययनिष्ठाखलर्थतृनाम्" ॥ जिघृक्षितरूपविनाशप्रसङ्गात् तृनामित्यत्र णत्वाभावः । 'उ उकेति' । अनेनोकारप्रश्लेषं दर्शयति तत्र तथ्वेति पूर्वद्वन्द्वे उकारस्य पूर्वनिपातः स्यात् परनिपातेऽपि

लवुकेति स्यात् तस्मात्परयोर्द्वन्द्वं कृत्वा पश्चाल्लशब्दस्य द्वन्द्वः कार्यः, उकारेण च कृतो विशेषणात्तदन्तविधिः, व्यपदेशिवद्भावात्केवलस्यापि ग्रहणम्। 'शतृशानचाविति'। तेन शानजर्थं तृषिति प्रत्याहारो नाश्रयणीय इति भावः। 'किकिनौ चेति'। ननु लग्रहणेन लकारास्तदादेशाश्च ग्रहीतुं युक्ताः कटं कारयां चकार ओदनं पाचयति किकिनो इत्ययुक्तं ग्रहणम् अलत्वादलादेशत्वाच्च। नैष दोषः, किकिनौ लिट् चेत्यनेन लिट्त्वातिदेशः क्रियते न लिट्संज्ञा तत्र कारयां पचान इत्यादौ लिटि तदादेशे च दृष्टः प्रतिषेधः किकिनोरपि भविष्यति। उदाहरणेषु सर्वत्र कारकषष्ठ्याः प्रतिषेधः शेषषष्ठी तु भवत्येव ब्राह्मणस्य कुर्वन् ओदनस्य पचन् अपां पेरुरसि नरकस्य जिष्णवो गुणैः तानि द्विषद्वीर्यनिराकरिष्णुरिति। 'आगामुकमिति'। लषपतपदेत्यादिनोकञ्, रक्षांसि वाराणसी प्रत्यागमनशीलानि भवन्ति, शापादिमोक्षार्थमित्यर्थः। 'दास्याः कामुक इति'। द्वितीयानिवृत्त्यर्थं वचनं षष्ठी तु शेषविज्ञानादेव सिद्धा। 'पुरा सूर्यस्येति'। भावलक्षण इत्यादिना तोसुन्। 'विसृप इति'। 'सृपितृदोः कसुन्' 'पूङ्यजोः शानन्' 'ताच्छील्यवयोवचनशक्तिषु चानश्' 'इङ्धार्योः शत्रकृच्छ्रिणी'त्येतेषु ल इति नानुवर्त्ततइति स्थापयिष्यते तेन लग्रहणादसिद्धिरिति मत्वाह। 'तृचिति'। 'प्रत्याहारग्रहणमिति'। 'द्विषः शतुर्वा वचनमिति'। 'द्विषोमित्र' इति योयं शतृप्रत्ययस्तत्प्रयोगे विकल्पेन प्रतिषेधो वक्तव्य इत्यर्थः। प्रत्याख्यानं तु शेषविवक्षायां षष्ठ्यन्यत्र द्वितीयेति सता च समासप्रतिषेधात्समासे कृत्स्वरार्थं कारकषष्ठी विधेयेत्यपि नास्ति॥

"अकेनोर्भविष्यदाधमर्ण्ययोः"॥ अकस्य भविष्यति काले इनस्तु आधमर्ण्ये चेति संख्यातानुदेशस्तु व्याख्यानान्न भवतीति भावः। 'ग्रामं गमीति'। 'भविष्यति गम्यादयः'। ननु च नात्र षष्ठ्याः प्रसंगः कथं गत्यर्थकर्मणीत्यत्रोक्तं द्वितीयाग्रहणं किं न चतुर्थ्येव विकल्प्येत अपवादविषयेपि यथा स्याद् ग्रामस्य गन्तेति, सत्यं, श्रोते तावत् प्रतिषेधे लभ्यमाने किं द्वितीयाग्रहणसामर्थ्याश्रयणेनेति मन्यते॥

"कृत्यानां कर्त्तरि वा" ॥ 'कर्त्तरीति किमिति'। 'तयोरेव कृत्य-क्तखलर्थाः' इति वचनादकर्मकेभ्यो भावे सकर्मकेभ्यश्च कर्मणि कृत्यानां विधानात्कर्त्तुरेव तैरनभिधानं सम्भवतीति कर्तृकर्मणोर्द्वयोरधिकारेऽपि कर्त्तर्येव षष्ठी भविष्यतीति प्रश्नः। 'गेय इति'। भव्यगेयेत्यादिना कर्त्तरि यत्प्रत्ययः। 'साम्नामिति'। कर्मणि नित्यमेव षष्ठी भवति। 'उभयप्राप्तौ कृत्यइति'। उभयोः कर्तृकर्मणोः प्राप्तिर्यस्मिन् कृत्ये तत्र द्वयोरपि कर्तृकर्मणोः षष्ठी न भवतीत्यर्थः। 'कृष्टव्येति'। कृषेर्द्विकर्मकत्वात्प्रधाने कर्मणि कृत्यप्रत्ययो न त्वप्रधानइति तस्मिन् कर्मणि कर्त्तरि च प्राप्ता षष्ठी न भवति, एतच्च योगविभागाल्लभ्यते, कथं, कृत्यानामित्येको योगः, अत्रोभयप्राप्तौ नेति च वर्त्तते, युगपदुभय-प्राप्तीनां कृत्यानां प्रयोगे षष्ठी न भवतीत्यर्थः। ततः कर्त्तरि वा, अत्र षष्ठीत्येवानुवर्त्तते ऽन्यत्सर्वं निवृत्तम् ॥

"तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्" ॥ 'शेषविषये वि-धानादिति'। शेषइत्यधिक्रियतइति भावः; बहुवचननिर्देशादेव स्वरू-पग्रहणाभावे सिद्धेऽर्थग्रहणं पदान्तरनिरपेक्षा ये तुल्यानाहुस्तत्परिग्रहार्थं तेन वसातका इवादयो निवर्त्तिता भवन्ति, गौरिव गवयो यथा गौस्तथा गवय इति। 'तुला देवदत्तस्येति'। तुलोपमाशब्दौ कर्मसाधनौ तुल्यार्थौ तत्र प्रतिषेध्या तृतीया षष्ठी तु भवत्येव, इह स्फुटोपमम्भूतिसितेन शम्भु-नेति शम्भुना स्फुटोपमा यस्येत्युपमाशब्देनापि योगे करणे तृतीया भवति भावसाधनत्वात्तस्य यथा उपमीयते ऽनेनेत्यादौ, इतरथा हि तृतीयानुकृष्येतेति तस्यानन्तरसूत्रे श्रुतत्वात् अन्यतरस्यांग्रहणे तु सति तस्य प्रयोजनान्तराभावात्तदेव चकारेणानुकृष्यते ॥

"चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः" ॥ आयुष्या-दीनां सुखपर्यन्तानां द्वन्द्वं कृत्वार्थशब्देन बहुव्रीहिविधानादर्थशब्देना-युष्यादिभिः प्रत्येकं संबन्धः, तत्र मद्रभद्रशब्दयोः पर्यायत्वात्सूत्रे भद्र-शब्दो न पठितव्य इति केचिदाहुः। अन्ये त्वर्थशब्दोऽपि पृथगेव निमित्तं व्याख्यानाच्च सर्वत्रार्थग्रहणं वर्णयन्ति, वृत्तावपि क्वचिदर्थशब्दोऽप्युदाहृ-

Digitized by Google

यते। 'हितं देवदत्तस्येति'। हितयोगे चतुर्थी वक्तव्येत्यस्याशिषि चरितार्थत्वादाशिषि हितयोगेप्यनेन विकल्पेन भाव्यम्, अन्यथा ऽत्र हितग्रहणमनर्थकमिति मन्यन्ते॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां द्वितीयस्याध्यायस्य तृतीयः पादः॥

"द्विगुरेकवचनम्"॥ अत्र यदि पारिभाषिकमेकवचनं गृह्येतानुप्रयोगत एकवचनं न स्यात् पञ्चपूलीयं शोभनेति, तस्याद्विगुत्वाद् 'द्विगो'-रिति पञ्चम्या च निर्देशः स्यात् अतोन्वर्थस्यैकवचनस्येदं ग्रहणमिति मत्वाह, 'एकस्य वचनमेकवचनमिति'। वक्तीति वचनं, 'कृत्यल्युटो बहुल'मिति कर्त्तरि ल्युट्, एक स्यार्थस्य वचनमेकवचनमिति कर्मणि षष्ठ्याः समासः, तत्र चैकस्यार्थस्य वाचकं भवतीति सामान्येनोपक्रमः पश्चात्किं तदित्यपेक्षायां द्विगुरित्यस्य पुल्लिङ्गस्य संबन्ध इत्येकवचनमिति नपुंसकोपपत्तिः, एतदेव व्यनक्ति। 'एकस्यार्थस्येति'। एवं च द्विगुरेकार्थस्य वाचको भवति यदि द्विग्वर्थ एको भवति, न च वस्तुतोनेकार्थस्य वचनशतेनाप्येकार्थत्वमापादयितुं शक्यमिति सामर्थ्यादतिदेशो विज्ञायते तदाह। 'तदनेन प्रकारेणेति'। तदिति वाक्योपन्यासे किमुक्तं भवतीत्याह। 'द्विग्वर्थएकवद्भवतीति'। 'समाहारद्विगोश्चेदं ग्रहणमिति'। तद्धितार्थे यो द्विगुस्तस्यैकवद्भावो माभूदित्येवमर्थं पञ्चभिर्गोभिः क्रीताः पञ्चगवः पटाइति, अथ क्रियमाणेपि समाहारग्रहणे इह कस्मान्न भवति पञ्चपूली च पञ्चपूली च पञ्चपूल्य इति, शिष्यमाणस्य द्विगुत्वात्तदर्थस्यैकवद्भावः प्राप्नोति, न वा बहिरङ्गत्वाद्, बहिरङ्गोयं द्विग्वर्थः सत्येव द्विगावेकशेषात्प्रागभावादेकशेषे सति पश्चादुपजायमानत्वा,दन्तरङ्गे प्राथमकल्पिके द्विग्वर्थे चरितार्थे एकवद्भावो ऽत्र न भविष्यति, यद्येवं पञ्चगवः पटा इत्यत्राप्येवमेव भविष्यति, सत्यं यदा पटाः प्रत्येकं पञ्चभिर्गोभिः क्रीताः, यदा तु बहवः पटाः संहताः पञ्चभिर्गोभिः क्रीयन्ते तदा ऽयमेकशेषस्याविषयः, यदि तर्हि समाहारद्विगोर्ग्रहणं नार्थानेन, कथं, समाहरणं समाहारः समूहस्तस्यैकत्वाद्रूपं वनमित्यादिवदेकवचनं भविष्यति,

अपशूद्राधिकरणम् । **सू० शुगस्य तदनादरश्रवणात्त-दाद्रवणात्सूच्यते हि ॥ ३३ ॥**

वृ० ब्रह्मविद्यायां शूद्रस्याप्यधिकारोऽस्ति न वेति विचार्यते, किं युक्तम् अस्तीति अर्थित्वसामर्थ्यप्रयुक्तत्वादधिकारस्य, शूद्रस्यापि तत्सम्भवात् ।

टी० सू० शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि, मनुष्यव्यतिरिक्तवस्वादिदेवताविशेषाणामर्थित्वसामर्थ्यसम्भवादधिकारोऽस्तीत्युक्तम्, अथार्थित्वसामर्थ्ययोः प्रयोजकत्वे मनुष्यविशेषाणां शूद्राणामप्यधिकारः स्यादिति शङ्कया सङ्गतिरित्याह "ब्रह्मविद्यायामि"ति, किं ब्रह्मविद्यायां शूद्रस्याधिकारोऽस्ति ने' ति,विचारः तदर्थं तस्य तदुपसंहारसामर्थ्यमस्ति नेति किं ब्रह्मविषयमनोवृत्तिरूपा ब्रह्मविद्याऽनधीतवेदस्याऽपि सम्भवति ने? ति किं वेदादेव ब्रह्मावगति? उत इतिहासपुराणाभ्यामपि? सम्भवतीति, किं तयोर्वेदोपबृंहणं कुर्वतोरेव ब्रह्मावगतिहेतुत्व? मुत स्वातन्त्र्येणे? ति किं जानश्रुतेः शूद्रेत्यामन्त्रणमितिहासपुराणयोर्निरपेक्षब्रह्माव-बोधकत्वमुपोद्बलयति नेति, किं तत्र शूद्र–शब्दो रूढ्या जातिपरः? उत यौगिकतया शोकवत्पर? इति,यदा रूढः तदा शूद्र–शब्दस्य इतिहासपुराणयोर्नैरपेक्ष्योत्तम्भकतया तयोः स्वातन्त्र्येण ब्रह्मावगतिहेतुत्वात् ब्रह्मविषय-स्मृतिसन्ततिरनधीतवेदस्याऽपि सम्भवति सामर्थ्यलाभाच्छूद्रस्याऽधिकार इति पूर्वः पक्षः, यदा शूद्रशब्दो यौगिकस्तदा शूद्रेत्यामन्त्रणस्य इतिहास-पुराणयोर्ब्रह्मावबोधनैरपेक्ष्यानवगमकतया स्वातन्त्र्येण ब्रह्मावबोधकत्वा-भावाद्वेदादेव ब्रह्मावगतिरित्यनधीतवेदस्य तदसम्भवेन सामर्थ्याभावाव ब्रह्मोपासनाऽधिकार इति राद्धान्तः । ननु कर्मकाण्डापशूद्राधिकरणे शूद्रस्य वैदिकसर्वकर्मस्वनधिकार उक्तः तत्कथमत्र तत्सम्भव? इत्यत्राह–

वृ० यद्यप्यग्निविद्यासाध्येषु कर्मस्वनग्निविद्यत्वाच्छूद्रस्याऽनधिकारः तथाऽपि मनोवृत्तिमात्रत्वाद् ब्रह्मोपासनस्य तथा-

धिकारोऽस्त्येव शास्त्रीयक्रियापेक्षत्वेऽप्युपासनस्य तत्तद्वर्णा-श्रमोचितक्रियाया एव अपेक्षितत्वाच्छूद्रस्याऽपि स्ववर्णोचि-तपूर्ववर्णशुश्रूषैव क्रिया भविष्यति "तस्माच्छूद्रो यज्ञेऽन-वक्लृप्त" इत्यप्यग्निविद्याध्ययनाद्यादिकर्मानधिकार एव न्यायसिद्धोऽनूद्यते । नन्वनधीतवेदस्याश्रुतवेदान्तस्य ब्रह्मस्व-रूपोपासनप्रकारानभिज्ञस्य कथं ब्रह्मोपासनं सम्भवति, उच्यते अनधीतवेदस्याश्रुतवेदान्तवाक्यस्याऽपीतिहासपुरा-णश्रवणेनाऽपि ब्रह्मस्वरूपतदुपासनज्ञानं सम्भवति, अस्ति-च शूद्रस्याऽपीतिहासपुराणश्रवणानुज्ञा ।

टी० "यद्यपी"ति, विद्या=वेदविद्या अध्ययनम्, अग्निराहितः परिहरति "तथापी"ति, ननु विद्यायः कर्माङ्गकत्वं वक्ष्यते तत् कथं साङ्ग-ब्रह्मविद्यायां सामर्थ्यमित्यत्राह "शास्त्रीये"ति, ननु "तस्माच्छूद्रो यज्ञे-ऽनवक्लृप्त" इत्यत्र यज्ञग्रहणस्य उपलक्षणार्थत्वात् विद्यायामप्यनधिकार-स्सिध्यति, न ह्यसावर्थः श्रुत्येकसमधिगम्यः येन यावद्वचनता स्यात् परि-संख्या वा किंतु न्यायसिद्धः, न्यायश्च अग्निविद्यासाध्येषु अनग्निविद्यस्या-ऽधिकारानुपपत्तिरूपः कर्मोपासनसाधारणः, अतोऽनधिकार इत्यत्राह "तस्माच्छूद्र" इति, सत्यमसावनुवादः, नैतावता ब्रह्मविद्याऽनधिकारः, अग्निविद्यासाध्यकर्मविषयत्वान्न्यायस्य, यज्ञादिकर्मणामेव अग्निविद्या-साध्यत्वात्, ब्रह्मविद्यायास्तदनपेक्षत्वाच्चेत्यर्थः । अत्रार्थाद् हेत्वन्तरं चोक्तं भवति, यज्ञाद्यधिकारो नास्तीत्यनेन उपासनाधिकारोऽनुमतो भवतीत्य-भिप्रायेण यज्ञादिकर्मानधिकार एवेत्युक्तं, न्यायसिद्धोऽनूद्यत इति कर्मका-ण्डापशूद्राधिकरणन्यायसिद्ध इत्यर्थः । मा भूदग्निविद्यासाध्ययज्ञापेक्षा ब्रह्मविद्यायाः तथाऽपि अध्ययनसाध्यवेदजन्यज्ञानापेक्षाऽस्तीति चोद-यति "नन्वि"ति,

सू० "श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रत" इत्यादौ, इ-

श्रूयन्ते चेतिहासपुराणेषु विदुरादयो ब्रह्मनिष्ठास्तथोपनिषत्स्वपि सम्वर्गविद्यायां शूद्रस्यापि ब्रह्मविद्याधिकारः प्रतीयते शुश्रूषुं हि जानश्रुतिमाचार्य्यो रैक्कः शूद्रेत्यामन्त्र्य तस्मै ब्रह्मविद्यामुपदिशति "आजहारेमाः शूद्र अनेनैव मुखेनालापयिष्यथा इत्यादिना, अतः शूद्रस्याऽप्यधिकारः सम्भवतीति प्राप्ते उच्यते, न शूद्रस्याधिकारः सम्भवति कुतः सामर्थ्याभावात्, न हि ब्रह्मस्वरूपतदुपासनप्रकारमजानतस्तदङ्गभूतवेदानुवचनयज्ञादिष्वनधिकृतस्योपासनोपसंहारसामर्थ्यं सम्भवति, असमर्थस्य चार्थित्वसद्भावेऽप्यधिकारो न सम्भवति ।

टी० ॥ श्रावयेदिति प्रायोज्याभावे प्रयोजकासिद्धेः प्रयोज्योपादानमर्थसिद्धमिति भावः । न चा"चायुष्कामं याजयेदि" ति वत् प्रयोज्यव्यापारविधिः अधिकारविशेषणाश्रवणात्, एतदभिप्रायेण इतिहासपुराणश्रवणानुज्ञेत्युक्तं, यदा चैवं सिद्धं श्रवणं तदा सामर्थ्या'दधिकारोऽपि सिद्धः इतिहासपुराणयोस्संशयविपर्ययवत्त्वेऽपि सम्यङ् निश्चयानुपपत्तेः, अतो निरपवादश्शूद्रस्याप्यधिकारो ब्रह्मविद्यायां, न च वाच्यं यज्ञादिकर्मणामपीतिहासपुराणेषु प्रस्तावात्तत्रा ऽपि शूद्राधिकारप्रसङ्ग इति कर्मणामितिहासपुराणेषु सामान्यतः कीर्तनेऽपि विशेषोपदेशाभावाद्वैदिकेषु विशेषोपदेशेषु शूद्रस्यानधिकारस्थितेरिति यदि ब्रूयाचेदमितिहासपुराणविषयं श्रवणानुज्ञानमर्थज्ञानावधिकं किन्तु "श्मशानवच्छूद्रपतितावि"ति प्रतिषिद्धस्य समीपपाठस्य प्रतिप्रसवमात्रमिति चेच "य इदं शृणुयादि" त्युपक्रम्य शूद्रस्सुखमवाप्नुयादिति, श्रवणफलनिर्देशात् श्रवणकीर्तने हि यथा योग्यमन्वीयेते "शूद्रयोनावहं जातोनातोऽन्यद्वक्तुमुत्सहे" इत्युक्तं हेत्वन्तरमाह "दृश्यन्ते" चेति, कर्मकाण्डेऽपशूद्राधिकरणेऽनधिकारोनिर्णीतश्चेत्किमत्र चिन्तनीय-

सामर्थ्याद्विचारोऽपि पा० ।

मिति शङ्कायां ब्रह्मोपासनेऽपशूद्राधिकरणन्यायप्रवृत्तौ तत्रापरिहृताम-धिकयुक्तिमाह "तथोपनिषत्स्वपि संवर्गे"ति, राद्धान्तमारभते "इति-प्राप्त" इति, संवर्गविद्यावाक्यगतशूद्र-शब्दनिर्वाह एव सौत्रः, अन्यत्पूर्व-पक्षहेतुजातं सूत्रकाराभिप्रेतं स्वयमुपन्यस्तं प्रथमं व्युदस्य पश्चात्सूत्रमव-तारयिष्यन् प्रथमम्पूर्वपक्षहेतून् प्रतिक्षिपति "न शूद्रस्ये"त्यादिना, सामर्थ्या-भावमुपपादयति "न ही"ति, अर्थित्वं ह्यस्तीत्यत्राह "असमर्थस्य चे"ति, उपासनोपायश्रवणधारणादिक्षमत्वलक्षणं सामर्थ्यन्तस्याऽपि लोकसिद्ध-मित्यत्राह–

सू॰ असामर्थ्यं च वेदाध्ययनाभावात्, यथैव हि त्रैवर्णिकवि-षयाध्ययनविधिसिद्धस्वाध्यायसम्पाद्यज्ञानलाभेन कर्मवि-धयोऽज्ञानतदुपायादीनपरान्न स्वीकुर्वन्ति तथा ब्रह्मो-पासनविधयोऽपि, अतोऽध्ययनविधिसिद्धस्वाध्यायाधिगत-ज्ञानस्यैव ब्रह्मोपासनोपायत्वाच्छूद्रस्य ब्रह्मोपासनसाम-र्थ्यासम्भवः ।

टी॰ "असामर्थ्यञ्चे"ति, अलौकिकसामर्थ्याभावादित्यर्थः, ब्रह्मो-पासनविधिना शूद्रस्याऽप्यधिकारः कल्प्यः, यथा रथकारादीनां विधिबलेन तत्तत्कर्माधिकारस्तदपेक्षितमन्त्राध्ययनाधिकारश्च सिध्यतीत्यत्राह "यथैव ही"ति, ज्ञानतदुपायादिनीत्यादि-शब्देन अध्ययनव्रतोपनयनादय उच्यन्ते अपरान् अत्रैवर्णिकगतान् ज्ञानतदुपायादीन्नापेक्षन्ते इत्यर्थः, विधयः स्ववैय-र्थ्यपरिहारायानुष्ठातृसापेक्षास्सन्तोऽनुष्ठानस्य ज्ञानपूर्वकतया ज्ञानतद्धेतु-भूताध्ययनव्रतोपनयनादीनपेक्षन्ते तज्ज्ञानन्यार्थं स्वयं क्लेशसाध्यतया प्रयो-जनसाकाङ्क्षं सन्निहितत्रैवर्णिकगतं ज्ञानं क्लृप्तत्वात् कर्मविधिभिस्संबध्यते तेन कर्मविधयोऽत्रैवर्णिकगतज्ञानादिनिराकाङ्क्षत्वात्तदधिकारं न कल्पयन्ति, एवं ब्रह्मोपासनविधयोऽपि त्रैवर्णिकगताध्ययनसिद्धज्ञानन्यार्थसाकाङ्क्षज्ञानतो लब्धानुष्ठानतयाऽन्यथासिद्धत्वात् न शूद्राधिकारं कल्पयन्ति, अनन्यथासिद्धं हि कल्पकं, किं चाध्ययनस्याऽपि प्रयोजकतया कल्पनागौरवं स्यात् "रथका-

रोऽग्नीनादधीते" त्यादिविधिरध्ययनसिद्धज्ञानचैवर्णिकैरनिर्वृत्तानुष्ठानत-याऽनन्यथासिद्धत्वात् अधिकारङ्कल्पयतीति वैषम्यं, किंच रथकारादीनां "र-थकारोऽग्नीनादधीते" ति विधिवाक्ये नैव अधिकारित्वेन विशेषतः श्रुतत्वा-त्तदपेक्षितमन्त्रभागाध्ययनाधिकारमात्रं कल्प्यम् इह तु विशेषतः शूद्राद्यु-द्देशेन उपासनविधानाभावादुपासनाधिकारस्तदोपयिकाध्ययनाधिकारश्च कल्प्य इति गौरवं स्यात्, अतोऽनधिकार इति, संवर्गविद्यायां शूद्र-शब्दश्च नोपासनाधिकारज्ञापकः रथकारादिशब्दवद्विधिवाक्यगतत्वाभावात् तथा सति ह्यधिकारः कण्ठोक्तः स्यात् शूद्रशब्दोऽह्यर्थवादगतः । नन्वर्थवाद-स्याऽपि स्वार्थे प्रमाण्यमुक्तं सत्यं, तत्तु बाधकाभावे सति भवति वैदि-कविधीनामध्ययनसिद्धस्वाध्यायजन्यज्ञानसापेक्षत्वं बाधकम् अध्ययनस्या-ऽपि प्रयोजकत्वे गौरवं स्यादित्युक्तं वक्ष्यमाणो रूढिप्रतिकूललिङ्गसद्भावो-ऽवयवार्थत्यनुकूललिङ्गसद्भावश्च बाधकः, रूढिप्राबल्यमर्थाविरोधाभावे-ऽनुकूललिङ्गसद्भावे च भवति न त्वर्थविरोधे, अत एव हि गङ्गायां घोष इत्यत्र गङ्गापदस्य लक्षणा, रथकारोऽग्नीनादधीतेत्यत्रापि सौधन्वान ऋ: भवः शूरचक्षस इति सौधन्वत्वमनुकूललिङ्गं दृश्यते, ब्राह्मणादेश्च शिल्पनिषेधोऽवगम्यते, अतोऽर्थविरोधाच्छूद्र-शब्दस्य रूढिर्दुर्बला अतो-ऽनधिकारः, अयमर्थः, शुगस्येत्यादिसूत्रेऽभिप्रेत इह प्रतिपत्तिसौकर्या-योक्तः । ननूक्तमितिहासपुराणद्वारा शूद्रस्याऽपि ब्रह्मज्ञानं सम्भवती-त्यत्राह—

स्व० इतिहासपुराणे अपि वेदोपबृंहणं कुर्वती एवोपायभावमनु-भवतो न स्वातन्त्र्येण, शूद्रस्येतिहासपुराणश्रवणानुज्ञानं पाप-क्षयादिफलार्थं नोपासनार्थं, विदुरादयस्तु भवान्तराधिग-तज्ञानाप्रमोषाज्ज्ञानवन्तः प्रारब्धकर्मवशाच्चेदृग्जन्म-योगिन इति तेषां ब्रह्मनिष्ठत्वम् । यत्तु सम्वर्गविद्यायां शुश्रू-षोः शूद्रेति सम्बोधनं शूद्रस्याधिकारं सूचयतीति तत्रेत्याह—

सू० शुगस्य तदनादरश्रवणात्तदा-द्रवणात्सूच्यते हि ॥ ३४ ॥

शुश्रूषोर्जानश्रुतेः पौत्रायणस्य ब्रह्मज्ञानवैकल्येन हंसोक्ताऽनादरवाक्यश्रवणात्तदैव ब्रह्मविदो रैक्वस्य सकाशं प्रत्याद्रवणाच्छुगस्य सञ्जातेति हि सूच्यते अतः स शूद्रेत्यामन्त्र्यते, न चतुर्थवर्णत्वेन, शोचतीति हि शूद्रः ।

टी० "इतिहासे"ति, उपबृंहणीयवेदज्ञानाधिकाराद्रुपबृंहमात्रेणोपासनोपयोगिज्ञानपौष्कल्यं न सम्भवति न हि व्याख्येयानधिकारिणो व्याख्यानमात्रेण पुष्कलज्ञानसम्भव इति दृष्टसामर्थ्यवैकल्यम्, "इतिहासपुराणाभ्यां वेद समुपबृंहये"दिति वेदार्थविशदीकारहेतुतयैव तदवगमविधानादङ्गतया विहितस्य स्वतन्त्रतयोपादाने तज्जन्यज्ञानस्य पुस्तकपाठादिलब्धवेदार्थज्ञानस्येव शास्त्रविरोधेनादृष्टसामर्थ्यवैकल्यञ्च, अतस्तदविरोधस्य न्याय्यत्वाच्छ्रावणविध्यवैयर्थ्याच्च शूद्रस्य श्रवणानुज्ञानं पुण्यकथावगतिद्वारेण पापक्षयार्थं न तूपासनार्थमित्यर्थः, यद्येवं वेदवाक्यार्थज्ञानमुपासनाङ्गं कथं तर्हि विदुरादीनामुपासनसम्भव इत्यत्राह "विदुरादयस्त्वि"ति, तेषामप्युपासने प्रथमप्रवृत्तिर्न शूद्रजन्मनि अपि तु पूर्वजन्मसिद्धैव, पाश्चात्ये तु जन्मनि प्राक्तनज्ञानप्रमोषाभावादवर्जनीयतदनुवृत्तिमात्रमेवेत्यर्थः, विदुरादीनामपि इतिहासपुराणश्रवणाद् ज्ञानसिद्धिरिति यदितरैरुच्यते तदयुक्तं "धर्मव्याधादयोऽप्यन्ये पूर्वाभ्यासाज्जुगुप्सिते वर्णावरत्वे सम्प्राप्ताः संसिद्धिं श्रमणी यथे"ति, शौनकवचनविरोधात्, एवमर्थसिद्धः सूत्रकाराभिप्रेतो हेत्वन्तरपरिहार उक्तः । अथ प्रधानयुक्तिपरिहारपरं सूत्रमवतारयितुमाह "यत्त्वि"ति, शोचितृत्वं शूद्र-शब्दार्थः, तत्र शोककारणं शोककार्यञ्च हेतुत्वेनाह "शुश्रूषोरि"त्यादिना, अनादरवाक्यश्रवणं शोककारणम् आद्रवणं शोककार्यं, शूद्र-शब्दस्य शोचितृत्ववाचकत्वं कथमित्यत्राह ।

सू० "शुचेर्दश्च" इति र प्रत्यये धातोश्च दीर्घे चकारस्य दकारे शूद्र इति भवति, अतः शोचितृत्वमेवास्य शूद्रशब्दप्रयोगेण सूच्यते, न जातियोगः, "जानश्रुतिः किल पौत्रायणो बहुद्रव्यप्रदो बह्वन्नप्रदश्च बभूव तस्य धार्मिकाग्रेसरस्य धर्म्मेण प्रीतयोः कयोश्चिन्महात्मनोरस्य ब्रह्मजिज्ञासामुत्पिपादयिषतोर्हंसरूपेण निशायामस्याविदूरे गच्छतोरन्यतर इतरमुवाच "भो भो भल्लाच भल्लाच जानश्रुतेः पौत्रायणस्य समन्दिवाज्योतिराततन्तन्मा प्रसाङ्क्षीस्तत्त्वा मा प्रधाक्षीदिति, एवं जानश्रुतिप्रशंसारूपं वाक्यमुपश्रुत्यापरो हंसः प्रत्युवाच "कं वर एनमेतत्सन्तं सयुग्वानमिव रैक्कमात्थेति कं सन्तमेनं जानश्रुतिं स युग्वानं रैक्कं ब्रह्मज-

टी० "शुचेर्दश्चेती"ति, रप्रत्ययः प्रकरणसिद्धश्चकाराकृष्टः "अमितम्योर्दीर्घश्चे"ति सूत्रे दीर्घश्चेत्यंशोऽनुवर्तत इति भावः। परैनैरुक्तप्रक्रियया श्रद्रवणमप्यन्तर्भाव्य शूद्र-शब्दनिर्वाहः कृतः, मुख्यनिर्वाहे सम्भवति सोऽनुपपन्न इति भावः । पाणिनीयनिर्वाहो मुख्यः, तदनन्तरमौणादिकः, ततो नैरुक्तः, तत्रौणादिकनिर्वाहस्य सम्भावितत्वात् स एवात्र कृतः अनादरवाक्यश्रवणस्येव श्रद्रवणस्यापि शूद्र-शब्दवाच्यत्वं न सूत्रविवक्षितम् उपपादकतयोपादानस्य द्वयोरपि तुल्यत्वात्, शुच एव ह्युपपाद्यत्वं प्रतीयते प्रथमान्तनिर्देशात्, श्रवणाद्रवण-शब्दौ हि पञ्चम्यन्तौ तस्माच्छोक एव शूद्रशब्दप्रवृत्तिनिमित्तम्, अनादरवाक्यश्रवणादीनां वैशद्यार्थमुपन्यस्यति "जानश्रुतिः किले"ति, भल्लाक्षो हंसः समन्दिवा स्वर्गेण समं स्वर्गेऽपि तत्तेजः प्रसृतमित्यर्थः । यद्वा दिवसेन सममित्यर्थः, निशायामित्युक्तत्वात्, मा प्रसाङ्क्षीः मा प्रसक्तः स्याः, मा प्रधाक्षीत्-त्वां मा दहेदित्यर्थः, परो हंस इति श्रुतौ पर-शब्दो हंसवाचीति भावः। हंसान्तर-

Digitized by Google

वाक्यस्य अनादरगर्भतां व्यनक्ति "कं सन्तमि"ति, स युक्त्वानमित्यस्यार्थमाह "गुणश्रेष्ठमि"ति, । यद्वा युक्त्वा शकटं तद्वन्तमित्यर्थः ।

मिव गुणश्रेष्ठमेतदात्थ स ब्रह्मज्ञो रैक्क एव लोके गुणवत्तरोमद्वता धर्मेण संयुक्तस्याप्यस्य जानश्रुतेरब्रह्मज्ञस्य को गुणः यद्गुणजनितं तेजो रैक्कतेज इव मां दहेदित्यर्थः, एवमुक्तेन परेण "कोऽसौ रैक्क" इति पृष्टो "लोके यत् किंचित्साध्वनुष्ठितङ्कर्म्म यच्च सर्वं चेत¹नाङ्गं विज्ञानन्तदुभयं यदीयज्ञानकर्म्मान्तर्भूतं स रैक्क इत्याह, तदेतद्धंसवाक्यं ब्रह्मज्ञानविधुरतयाऽऽत्मनिन्दागर्भन्तद्वत्तया च रैक्कप्रशंसारूपं जानश्रुतिरुपश्रुत्य तत्क्षणादेव क्षत्तारं रैक्कान्वेषणाय प्रेष्य तस्मिन् विदित्वा ऽऽगते स्वयमपि रैक्कमुपसद्य गवां षट्शतं निष्कमश्वतरीरथञ्च रैक्कायोपहृत्य रैक्कं प्रार्थयामास अनु म एतान्भगवो देवतां शाधि यान्देवतामुपास्स इति त्वदुपास्यां परां देवतामामनु शाधीत्यर्थः, स च रैक्कः स्वयोगमहिमविदितलोकवृत्तो जानश्रुतेर्ब्रह्मज्ञानविधुरतानिमित्ताऽनादरगर्भहंसवाक्यश्रवणेन शोकाविष्टतान्तदनन्तरमेव ब्रह्मजिज्ञासयोद्योगं च विदित्वाऽस्य ब्रह्मविद्यायोग्यतामभिज्ञाय चिरकालसेवां विनाऽर्थप्रदानेन शुश्रूषमाणस्यास्य यावच्छक्तिप्रदानेन ब्रह्मविद्या प्रतिष्ठिता भवतीति मत्वा तमनुग्रह्णन्नस्य शोकाविष्टतामुपदेशयोग्यताख्यापिकां शूद्र—शब्देनामन्त्रणेन ज्ञापयन्निदमाह अपाहर त्वं शूद्र तवैव सह गोभिरस्त्विति सह गोभिरयं

१ सर्वं चेतनगतं विज्ञानमिति पा० ।

रथस्तवैवास्तु नैतावता मह्यं दत्तेन ब्रह्मजिज्ञासया शोकाविष्टस्य तव ब्रह्मविद्या प्रतिष्ठिता भवतीत्यर्थः, स च जानश्रुतिर्भूयोऽपि स्वशक्त्यनुगुणमेव गवादिकं धनं कन्यां च प्रदाय उपससाद स रैक्वः पुनरपि तस्य योग्यतामेव ख्यापयन् शूद्र-शब्देनामन्त्र्याह-

टी० "गुणश्रेष्ठमि"ति, प्रकरणसिद्धार्थोक्तिः उपास्स्व इति मध्यमपुरुषनिर्देशाभिप्रायं व्यञ्जयन्नाह "त्वदुपास्त्या"मिति, यदुपासनया तवेदृशी प्रशस्तिर्जाता तन्मे ब्रूहीत्यभिप्राय इत्यर्थः । चिरकालेति चिरकालसेवा यावच्छक्तिप्रदानं वा ब्रह्मविद्याप्रतिष्ठाहेतुरित्यर्थः तमनुगृह्णन् न तु रागादित्यर्थः ।

भा० "आजहारेमाः शूद्रानेनैव मुखेनालापयिष्यथा" इति, इमानि धनानि शक्त्यनुगुणान्याजहर्थ अनेनैव द्वारेण चिरसेवया विनापि मां त्वभिलषितब्रह्मोपदेशरूपवाक्यमालापयिष्यसि इत्युक्त्वा तस्मा उपदिदेश, अतः शूद्र-शब्देन विद्योपदेशयोग्यताख्यापनार्थं शोक एवास्य सूचितो न चतुर्थवर्णत्वम् ॥

सू० क्षत्रियत्वाव[1]गतेश्च ॥ ३५ ॥

बहुदायीति दानपतित्वेन बहुपाक्य इत्यादिना सर्वत एवमेतदन्नमत्स्यन्तीत्यन्तेन बहुतरपक्वान्नप्रदायित्वप्रतीतेस्स ह संजिहान एव क्षत्तारमुवाचे"ति क्षत्तृप्रेषणाद्बहुग्रामप्रदानावगतजनपदाधिपत्याच्चाऽस्य जानश्रुतेः क्षत्रियत्वप्रतीतेश्च, न चतुर्थवर्णत्वं, तदेवमुपक्रमगताख्यायिकायां क्षत्रि-

१ क्षत्रियत्वगतेश्चेति पा० ।

यत्वप्रतीतिरुक्ताऽधुनोपसंहारगताख्यायिकायामपि क्षत्रि-
यत्वमस्य प्रतीयत इत्याह—

सू० उत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३६ ॥

अस्य जानश्रुतेरुपदिश्यमानायामस्यामेव संवर्गविद्या-
याम् उत्तरत्र कीर्त्यमानेनाभिप्रतारिनाम्ना चैत्ररथेन
क्षत्रियेणास्य क्षत्रियत्वङ्गम्यते, कथम्? ।

टी० "आजहर्थे"ति, आजहार भवानिति भवच्छब्दाध्याहारेण छान्दसव्यत्ययेन वा श्रुतियोजनेत्यभिप्रायः । यद्यपि दशाश्वमेधानांजहारेत्यादिष्वाङ्पूर्वस्य हरतेर्यौगान्तरदर्शनेन नानार्थकत्वसम्भवाद्धातूनां प्रतिगृहीतवानस्मीत्युत्तमपुरुषतया व्याख्यातुं शक्यते तथाऽपि अनयेसमिधमाहारेयम्, अथामेध्येन मध्यान्जहार इति दानार्थतया वैदिकप्रयोगप्राचुर्यदर्शनाद-नेनैव मुखेनालापयिष्यथा इत्यालापनहेतुतया प्रतिसन्धीयमानस्याहरणस्य स्वरसत आलापनसमानकर्तृकता प्रतीतेश्च मध्यमपुरुषत्वेन व्याख्यातम् । सू० क्षत्रियत्वगतेश्च शूद्र-शब्दस्य यौगिकार्थानुकूलहेतुरुक्तः । अथ रूढिसिद्धार्थविरुद्धहेतुरुच्यते सञ्जिहानः आसनमुज्झन् उत्तिष्ठन्नेवेत्यर्थः उत्तरसूत्रमवतारयति "तदेवाम"ति, सू० उत्तरत्र चैत्ररथेन लिङ्गात्, कथमिमिति चैत्ररथः क्षत्रियश्चेज्जानश्रुतिरपि क्षत्रियः स्यादिति न हि नियम इत्यर्थः उत्तरमाह ।

भा० "अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे" इत्यादिना, "ब्रह्मचारिन्नेदमुपास्महे इत्यन्तेन कापेयाभिप्रतारिणोर्भिक्षमाणस्य ब्रह्मचारिणश्च संवर्गविद्यासम्बन्धित्वं प्रतीयते, तेषु चाभिप्रतारी क्षत्रियः इतरौ ब्राह्मणौ, अतोऽस्यां विद्यायां ब्राह्मणस्य तदितरेषु च क्षत्रियस्यैवान्वयो दृश्यते न शूद्रस्य, अतोऽस्यां विद्यायामन्वितादैकाद्ब्राह्मणादन्यस्य जानश्रुते-

Digitized by Google

रपि क्षत्रियत्वमेव युक्तं न चतुर्थवर्णत्वम् । नन्वस्मिन् प्रकरणेऽभिप्रतारिणश्चैत्ररथत्वं क्षत्रियत्वं च न श्रुतन्तत्कथमस्याभिप्रतारिणश्चैत्ररथत्वङ्कथं वा क्षत्रियत्वम्? तत्राह "लिङ्गादि"ति, "अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिमित्यभिप्रतारिणः कापेयसाहचर्य्यं लिङ्गादस्याभिप्रतारिणः कायेयसम्बन्धः प्रतीयते, अन्यत्र च "एतेन वै चैत्ररथङ्कायेया अयाजयन्निति, कायेयसम्बन्धिनश्चैत्ररथत्वं श्रूयते तथा चैत्ररस्य क्षत्रियत्वन्तस्माच्चैत्ररथो नामैकः क्षत्रपतिरजायतेति अतोऽभिप्रतारिणश्चैत्ररथत्वं क्षत्रियत्वं च गम्यते, तदेवं न्यायविरोधिनि शूद्रस्याधिकारे लिङ्गं नोपलभ्यते इत्युक्तम्, इदानीं न्यायसिद्धः शूद्रस्याऽनधिकारः श्रुतिस्मृतिभिरनुगृह्यत इत्याह—

टी० "अथ ह"ति, परिविष्यमाणौ सूदेन भोज्यमानौ ब्रह्मचारिणा भिक्षं कायेयाभिप्रतारिणोश्चैत्ररथिकत्वलिङ्गमित्यर्थसिद्धम् एकत्र ब्राह्मणक्षत्रियजातिद्वयसम्बन्धितयाऽवगतायामन्यत्राऽपि ब्राह्मणसम्बन्धितया निर्णीतायान्तत्सम्बन्धिपुरुषान्तरविषयसन्देहे सति अभ्यपायन्यात् तस्य पुरुषस्य ब्राह्मणक्षत्रिययोरन्यतरत्वम्परिशेषेण क्षत्रियत्वं च निश्चीयत इत्यर्थः । सौत्रं लिङ्गादिति पदं व्याख्यातुञ्चोद्यमुखेन आकाङ्क्षान्दर्शयति "नन्वि"ति, अभिप्रतारिणः चैत्ररथत्वं तस्य क्षत्रियत्वं च नावगतमित्यर्थः । किमत्र लिङ्गं विवक्षित? मित्यत्राह "अथ हे"ति, कायेयसाहचर्यात्—कायेयसहपाठादित्यर्थः कायेयसहपाठबलेन कायेयसम्बन्धस्सिद्धः तेन तत्पुरोहितकस्य चैत्ररथत्वं सिद्धन्तेन क्षत्रियत्वमवगतमित्यर्थः । उत्तरसूत्रसङ्गतिमाह "तदेवमि"ति, शूद्र—शब्दस्य रूढिसिद्धार्थविरोधिलिङ्गं यौगिकार्थानुगुणलिङ्गं चेत्युभयविधं लिङ्गमपि शूद्रानधिकारज्ञापकमित्यर्थः । इदानीमिति अयमनधिकारः श्रुतिस्मृतिभिरनुगृहीत इत्याहेत्यर्थः ।

Digitized by Google

सू० संस्कारपरामर्शात्तदभावाभिलापाच्च ॥ ३७ ॥

भू० ब्रह्मविद्योपदेशप्रदेशेषूपनयनसंस्कारः परामृश्यते "उप त्वा नेष्ये तं होपनिन्ये" इत्यादिषु शूद्रस्य चोपनयनादिसंस्काराभावोऽभिलप्यते "न शूद्रे पातकं किंचिन्न च संस्कारमर्हती"ति, "चतुर्थो वर्ण एकजातिर्न च संस्कारमर्हतीत्यादि"षु ॥

सू० तदभावनिर्धारणे च प्रवृत्तेः ॥ ३८ ॥

"नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरे"ति शुश्रूषोर्जाबालस्य शूद्रत्वाभावनिर्धारणे सत्येव ब्रह्मविद्योपदेशप्रवृत्तेश्च न शूद्रस्याधिकारः ॥

सू० श्रवणाऽध्ययनाऽर्थप्रतिषेधात् ॥ ३९ ॥

शूद्रस्य वेदश्रवणतदध्ययनतदर्थानुष्ठानानि प्रतिषिध्यन्ते "पद्यु ह वा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्यन्त"स्माच्छूद्रो बहुपशुरऽयज्ञीय" इति बहुपशुः पशुसदृश इत्यर्थः ।

टी० सू· संस्कारपरामर्शात्तदभावाभिलापाच्च, संस्कारः परामृश्यमानस्ततः किमित्यत्राह "शूद्रस्ये"ति, "न शूद्रे पातकं किंचित्सन्ध्यावन्दनाद्यभावनिमित्तम्पापं नास्तीत्यर्थः चतुर्थोवर्ण एकजातिः न तु द्विजातिरित्यर्थः, सू· तदभावनिर्धारणे च प्रवृत्तेः, तच्छब्दस्य पूर्वसूत्रप्रकृतसंस्कारवाचितायामेतत्सूत्रविषयवाक्यानुगुण्याभावात्तच्छब्दः परमप्रकृतपरामर्शीत्याह "शूद्रत्वाभावे"ति, सू· श्रवणाध्ययनार्थप्रतिषेधात्,अर्थ—शब्देन तदनुष्ठानं विवक्षितम्। पद्यु—जङ्गमं, समीपोच्चारणप्रतिषेधादेव श्रवणाध्ययनप्रतिषेधोऽर्थसिद्धः। अर्थानुष्ठानप्रतिषेधन्दर्शयति "तस्माच्छूद्र" इति,ननुतत

एव अर्थानुष्ठाननिषेधोऽपि सिद्धः सत्यं, साक्षादेव त्वसौ श्रूयते तत्र किं अर्थादुपजीवनेनेति पृथगुच्यत इति पशुबाहुल्यवत्त्वं यज्ञाद्यर्हत्वौपयिकं कथमनेनायज्ञीयत्वसिद्धिरिति शङ्काव्यावृत्त्यर्थं बहुपशु-शब्दं व्याचष्टे "पशुसदृश इत्यर्थ"इति, ईषदसमाप्तपशुत्व इति वक्तव्ये सदृशशब्दग्रहणमीषदसमाप्तेः सादृश्यार्थपर्यवसानज्ञापनार्थं "विभाषा सुपो बहुच् पुरस्तात्त्वि"ति पाणिनीयसूत्रेण ईषदसमाप्तेऽर्थे बहुच्प्रत्ययस्तस्य पुरस्तात् प्रयोगश्च विहितः, अध्ययनादिनिषेधोऽर्थसिद्धोपीत्याह—

सू॰ अनुपशृण्वतोऽध्ययनतदर्थज्ञानतदर्थानुष्ठानानि न सम्भवन्ति, अतस्तान्यपि प्रतिषिद्धान्येव ।

सू॰ स्मृतेश्च ॥ ४० ॥

स्मर्यते च श्रवणादिनिषेधः ।

"अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम् उदाहरणे जिह्वाच्छेदो धारणे शरीरभेद" इति, "न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेदि"ति च, अतः शूद्रस्यानधिकार इति सिद्धम् ॥ ये तु निर्विशेषचिन्मात्रं ब्रह्मैव परमार्थः, अन्यत् सर्वं मिथ्याभूतं, बन्धश्चापारमार्थिकः, स च वाक्यजन्यवस्तुयाथात्म्यज्ञानमात्रनिवर्त्यः तन्निवृत्तिरेव मोक्ष इति वदन्ति, तैर्ब्रह्मज्ञाने शूद्रादेरनधिकारो वक्तुं न शक्यते, अनुपनीतस्यानधीतवेदस्य अश्रुतवेदान्तवाक्यस्याऽपि यस्मात्कस्माच्चिदपि निर्विशेषचिन्मात्रं ब्रह्मैव परमार्थः अन्यत्सर्वमात्मनि मिथ्याभूतम्परिकल्पितमिति वाक्याद्वस्तुयाथात्म्यज्ञानोत्पत्तेस्तावतैव बन्धनिवृत्तेश्च, न च तत्त्वमस्यादिवाक्येनैव ज्ञानोत्पत्तिः कार्या न वाक्यान्तरे-

ष्येति नियन्तुं शक्यं ज्ञानस्यापुरुषतन्त्रत्वात्, सत्यां साम-
ग्र्यामनिच्छतोऽपि ज्ञानोत्पत्तेः, न च वेदवाक्यादेव वस्तु-
याथात्म्यज्ञाने सति बन्धनिवृत्तिर्भवतीति वक्तुं शक्यं येन
केनापि वस्तुयाथात्म्यज्ञाने सति भ्रान्तिनिवृत्तेः ।

टी० "अनुपपन्नत्व"इति, "शूद्रो नाधीयीते"ति वाक्यमप्यनुसन्धे-
यम् अनेन यज्ञे विशेषनिषेधादन्यत्र वैदिके कर्मणि शूद्रस्याधिकारशङ्का च
निरस्ता भवति, सू० स्मृतेश्च, अथ हेत्यादि, अध्ययनादौ प्रायश्चित्तस्मरण-
मुपदेशनिषेधस्मरणं चानधिकारज्ञापकत्वात्तदुभयमपि स्मृति-शब्दविवक्षि-
तमिति भावः । रथकारोऽग्नीनादधीतेत्यादिषु "रूढिर्योगमपहरती"ति
न्यायेन रूढ्यर्थः स्वीकृतः, तदपवादोऽर्थविरोधः, अनुकूललिङ्गसद्भावे विरो-
धिलिङ्गाभावे च रूढेः प्राबल्यं, विरोधिलिङ्गसद्भावस्तदपवाद इत्युक्तं भवति,
रथकारोऽग्नीनादधीतेत्यत्रापि सौधन्वान ऋभवः इत्यनुकूलं लिङ्गं ह्युपल-
भ्यत इति, अस्मिन्नधिकरणे परेषामनवकाशत्वं दर्शयति "ये त्वि"त्यादिना,
अनुनीतस्यापीति, न हि नायं सर्पो रज्जुरेषेति वाक्यात् भ्रमनिवृत्तिरुपनय-
नादिसंस्कारापेक्षेति भावः । तत्त्वमस्यादिव्यतिरिक्तवाक्येन ज्ञानं नोत्पद्यत
इति शङ्कायामाह "न चे"ति, अपुरुषतन्त्रत्वे हेतुमाह "सत्यामि"ति,
व्यतिरिक्तवाक्येन उत्पन्नमपि ज्ञानं निवर्तकं न भवतीत्यत्राह "न च वेदा-
न्तवाक्यादि"ति, येन केनापीति सामान्येनार्थशरीरोक्तिः । पक्षमाह -

सू० पौरुषेयादपि निर्विशेषचिन्मात्रं ब्रह्म परमार्थोऽन्यत्सर्वं
मिथ्याभूतमिति वाक्यात् ज्ञानोत्पत्तेः, तावतैव भ्रमनिवृत्तेश्च,
यथा पौरुषेयादप्याप्तवाक्याच्छुक्तिकारजतादिभ्रान्तिर्ब्रा-
ह्मणस्येव शूद्रादेरपि निवर्तते, तद्वदेव शूद्रस्यापि वेदवित्सम्प्र-
दायावगतवाक्याद्वस्तुयाथात्म्यज्ञानेन जगद्भ्रमनिवृत्तिरपि
भविष्यति "न चास्योपदिशेद्धर्म"मित्यादिना वेदविदः शूद्रा-

Digitized by Google

दिभ्यो न वदन्तीति च न शक्यं वक्तुं तत्त्वमस्यादिवाक्यावगत-ब्रह्मात्मभावानां वेदशिरसि वर्त्तमानतया दग्धाखिलाधिकारत्वेन निषेधशास्त्र[1]स्याकिंचित्करत्वभावात्, अतिक्रान्तनिषेधैर्वा कैश्चिदुक्ताद्वाक्याच्छूद्रादेर्ज्ञानमुत्पद्यत एव, न च वाच्यं शुक्त्यादौ रजतादिभ्रमनिवृत्तिवत् पौरुषेयवाक्यजन्यतत्त्वज्ञानसमनन्तरं शूद्रस्य जगद्भ्रमो न निवर्त्तत इति तत्त्वमस्यादिवाक्यश्रवणसमनन्तरं ब्राह्मणस्यापि जगद्भ्रमानिवृत्तेः निदिध्यासनेन द्वैतवासनायां निरस्तायामेव तत्त्वमस्यादिवाक्यं निवर्त्तकज्ञानमुत्पादयतीति चेत् पौरुषेयवाक्यमपि शूद्रादेस्तथैवेति न कश्चिद्विशेषः, निदिध्यासनं हि नाम ब्रह्मात्मभावाभिधायिवाक्यं यदर्थप्रतिपादनयोग्यं तदर्थभावना सैव विपरीतवासनां निवर्त्तयतीति दृष्टार्थत्वं निदिध्यासनविधेर्ब्रूषे,

टी० "पौरुषेयादपी"ति, भ्रमनिवृत्तेः—भ्रमनिवृत्तेर्न्याय्यत्वादित्यर्थः, सपक्षमाह "यथे"ति, ततः किमित्यपेक्षायां दृष्टान्तोक्तमर्थं पक्षेऽतिदिशति "तद्वदि"ति, शङ्कान्तरमुक्त्वा परिहरति न चेत्यादिना, वेदशिरसि वेदान्ते निष्ठत्वात्। यद्वा वेदस्यापि शिरसि निहितचरणत्वादिति यावत् निषेधशास्त्रकिंकरत्वाभावादित्यनेन "दग्धाखिलाधिकारत्वाद् ब्रह्मज्ञानाग्निना मुनिः। वर्त्तमानः श्रुतेर्मूर्ध्नि नैव स्याद्वेदकिंकर" इति नैष्कर्म्यसिद्धिग्रन्थे स्मर्यते। मुखान्तरेण ज्ञानोदयसम्भवमाह "अतिक्रान्ते"ति, प्रत्यक्षविरोधमाशङ्क्य परिहरति न चेत्यादिना, शूद्रस्य निदिध्यासनानधिकाराच्च वाक्यार्थज्ञानोत्पत्त्या नः बन्धनिवृत्तिरित्यत्राह "निदिध्यासनं ही"ति, न हि निदिध्यासनमदृष्टद्वारा किंचित्करोति निवर्त्यसत्यत्वप्रसङ्गात्, अदृष्टद्वारा किंचित्क-

[1] निषेधशास्त्रकिंकरत्वाभावादिति पा० ।

रत्वे सति हि यज्ञादाविव शूद्रानधिकारः, न च तदस्ति, अतो नायं सर्प इति वाक्येन सर्पमिथ्यात्ववासनायामिव शूद्रादेरपि निदिध्यासनेऽधिकारो न निषेद्धुं शक्यत इति भावः । शूद्रस्य यज्ञादिकर्मानधिकारात्तत्सापेक्षं वाक्यार्थज्ञानं न जायत इत्यत्राह–

सू० वेदानुवचनादीन्यपि विविदिषोत्पत्तावेवोपयुज्यन्त इति शूद्रस्यापि विविदिषायां जातायां पौरुषेयवाक्यान्निदिध्यासनादिभिर्विपरीतवासनायां निरस्तायां ज्ञानमुत्पत्स्यते तेनैवापारमार्थिको बन्धो निवर्त्तिष्यते । अथवा तर्कानुगृहीतात् प्रत्यक्षादनुमानाच्च निर्विशेषस्वप्रकाशचिन्मात्र प्रत्यग्वस्तुन्यज्ञानसाक्षित्वं तत्कृतविविधविचित्रज्ञातृज्ञेयविकल्परूपं कृत्स्नं जगच्चाध्यस्तमिति निश्चित्य एवंभूतपरिशुद्धप्रत्यग्वस्तुन्यनवरतभावनया विपरीतवासनां निरस्य तदेव प्रत्यग्वस्तु साक्षात्कृत्य शूद्रादयोऽपि विमोक्ष्यन्त इति मिथ्याभूतविचित्रैश्वर्यविचित्रसृष्ट्याद्यलौकिकानन्तविशेषावलम्बिना वेदान्तवाक्येन न किंचित्प्रयोजनमिह दृश्यत इति शूद्रादीनामेव ब्रह्मविद्यायामधिकारः सुशोभनः, अनेनैव न्यायेन ब्राह्मणादीनामपि ब्रह्मवेदनसिद्धे रुपनिषच्च तपस्विनी दत्तजलाञ्जलिः स्यात्, न च वाच्यं नैसर्गिकलोकव्यवहारे भ्राम्यतोऽस्य केनचिदयं लोकव्यवहारो भ्रमः परमार्थस्त्वेवमिति स[१]मर्थिते सत्येव प्रत्यक्षानुमानदृष्टबुभुत्सा जायत इति तत्समर्पिका श्रुतिरप्यास्थेयेति यतो भवभयभीतानां साङ्ख्यादय एव प्रत्यक्षानुमानाभ्यां वस्तुनिरूपणं कुर्वन्तः

१ समर्पिते इति पा० ।

पदानां शक्तयः कल्पनीया इति लाघवम् * । एवं शुक्लामिति पदप्रक्षेपे पदवादिनो ऽष्टानां पदानामष्टौ शक्तयः कल्पनीया इति लाघवं तव तु षोडशानां वाक्यानां षोडशापराः शक्तयः कल्प्या इति महद्गौरवमापन्नम् । अपि चेयमक्षरमाला पदार्थावगमपूर्वकं वाक्यार्थविज्ञानं जनयेदतत्पूर्वा वा । न तावदतत्पूर्वा † संसृज्यमानपदार्थविषयविज्ञानाधीनो हि संसर्गः संसृज्यमानपदार्थनिरूपण ‡ मन्तरेण न शक्यनिरूपणः । तत्पूर्वं चेत्तथा हि § यथा यथा श्रूयन्ते पदानि तथा तथा पदार्था अपि प्रतीयन्ते । तदेताः पदतदर्थप्रतीतयो भावनानिचयद्वारेण स्वगोचरचारिणीमेकामेव स्मृतिधियमादधति तदारूढानि पदानि सपदार्थान्य || दूरवर्तीनि वाक्यार्थबुद्धेरीशत इति तदप्यचतुरस्रम् । एवं च सत्यवश्याश्रयणीयेभ्यः पदार्थज्ञानेभ्य एव सिद्धेः कृतमनया वर्णमालया । तेषां च सामर्थ्यं निवेदयिष्यामः । अपि च । त्रिचतुरपञ्चषपदवाक्यवर्तिनी ¶ नानापदार्थप्रत्ययव्यवहिता क्रमेण वर्णमाला स्मर्यतापि तदभ्यधिकपदवति तु वाक्ये ऽसावतिदुःस्मरा । तस्मादिदमपि मत** मविमृश्यमानसुन्दरमिति नाद्रियन्ते वृद्धाः ।

अस्तु तर्हि ।

पदान्याकाङ्क्षितासन्नयोग्यार्थान्तरसङ्गतान् ।
अर्थानभिदधन्तीह †† वाक्यं वाक्यार्थगोचरम् ‡‡ ॥

---

* लाघवमिति ३ पु॰ नास्ति ।

† अतत्पूर्वं वा । न तावदतत्पूर्वमिति ३ पु॰ पा॰ ।

‡ पदार्थावगममिति ३ पु॰ पा ।

§ यथा हीति २ पु॰ पा॰ ।

|| अपदार्थानीति ३ पु॰ पा॰ ।

¶ वर्तिनीनां पदार्थेति २ पु॰ पा॰ । तदा पदव्यक्तीनामिति विशेष्यमध्याहार्यम् ।

** दर्शनमिति ३ पु॰ पा॰ ।

†† अभिदधन्ति पदानि वाक्यम् । वाक्यपदेन पदसमूह एव व्यवह्रियतइति वाचस् ।

‡‡ वाक्यवाक्यार्थगोचरमिति २ पु॰ पा॰ ।

Digitized by Google

पदार्थमेव हि प्रधानमेकं गुणभूतार्थान्तरेण व्यतिषक्तं वाक्यार्थमाचक्षते वृद्धाः । तं च पदान्येवाकाङ्क्षाद्युपधानलब्धसुकरणोत्पत्तीनि प्रत्याययितुमीशत इति कृतमप्रामाणिकानुपपद्यमानानवयववाक्यार्थविकल्पनाभिः । ननु ।

पदान्तरस्य वैयर्थ्यमनुक्तान्वयबोधने* ।
उक्तान्विताभिधाने तु व्यक्तमन्योन्यसंश्रयम् ॥

अत्रापि स्यादनभिहितेनैकार्थान्तरेणान्वितमर्थमभिदधीत पदमभिहितेन वा । तत्रानभिहितस्वार्थान्तरा† न्वितस्वार्थाभिधाने‡ पदस्यैकस्मादेवोच्चारितादवगमितार्थप्रतीतेर्वैयर्थ्यमितरेषाम् । अभिहितान्विताभिधाने तु यावत्पचेदित्यनेनान्वितस्वार्थो नाभिधानीयस्तावदुखायामित्यनेनाधिकरणमुखा नाभिधीयते । एवमुखायामित्यनेनापि यावत्स्वार्थो नाभिधानीयस्तावत्पचेदित्यनेन स्वार्थो नाभिधीयत इति परस्पराश्रयप्रसङ्गः । पदार्थस्वरूपाभिधानपूर्वके तु तद्वदन्वितार्थाभिधाने द्विरभिधानमप्रामाणिकमनुपपद्यमानमापद्येत । न च पदजातं प्रथममर्थजातमनभिदधदेव यथास्वं स्वाभिधेयानि साहचर्यमात्रा§ दर्थरूपाणि स्मारयति अथैतान्यर्थान्तरान्वितान्यभिधत्त इति सांप्रतम् । यतः ।

पूर्वानुभवयोनित्वात्स्मृतिस्तदनुसारिणी ।
सा चान्वितस्वरूपेण मता ऽपेक्षानपेक्षणा || ॥

न खलु पदं पदार्थमात्रे क्वचिदपि दृष्टचरं¶ येन तत्साहचर्येण तन्मात्रं स्मारयेत्तन्मात्रेण व्यवहारायोगात्तत्प्रयुक्तत्वाच्च तदुच्चारणस्य ।

---

* कल्पने इति ३ पु॰ पा॰ ।

† अनभिहितार्थान्तरेति ३ पु॰ पा॰ ।

‡ अनभिहितं स्वेनानुपस्थापितं यत् स्वार्थान्तरं स्वबोध्यत्वाभिमतमर्थान्तरं तदन्वितस्वार्थस्याभिधाने इत्यर्थः ।

§ साहचर्यादिति ३ पु॰ पा॰ ।

|| सा चान्वितेन रूपेण ततोऽपेक्षाऽनपेक्षणमिति ३ पु॰ पा॰ । अपेक्ष्यमाणस्य आकाङ्क्ष्यमाणस्यार्थान्तरस्यानपेक्षणा जिज्ञासाऽभाव इत्यर्थः । तथैवोपपादयिष्यति ।

¶ दृष्टचरप्रयोगमिति ३ पु॰ पा॰ ।

अपि स्वान्वितस्वार्थे तथा च गामानयेत्यत्रानयनान्वितस्वार्थो गोशब्द-स्तेन सहोच्चरितो गां पश्येत्यत्रापि तदन्वितामेव गां स्मारयेच्च तन्मात्रं तथा च तन्निराकाङ्क्षो गोशब्दः पश्येत्यनेन नान्वियात् । एवं प्रासादं पश्येत्यत्र प्रासादान्वितं पश्येति पदं तन्निराकाङ्क्षं न गवा सम्बध्येतेति सर्वत्र वाक्यार्थो * दत्तजलाञ्जलिः प्रसज्येत । न चाव्यभिचाराद्गामिति पदं स्वार्थमेव स्मारयति न तु पदार्थान्तरं व्यभिचारादिति सांप्रतम् । पटुभ्यासादरप्रत्ययाहिता भावना प्रबोधवती स्मृतिहेतुः सङ्गीयते । तस्याश्च प्रबोधः प्रणिधानादिजन्मा ऽव्यभिचार एव नायतते † साहचर्य-मात्रमस्याप्यस्तीति ‡ पदार्थान्तरसहितमेव स्वार्थमनाकाङ्क्षं स्मारयेदिति हता बत वाक्यार्थधीस्तपस्विनीति पदानामर्थरूपमात्राभिधानमेषित-व्यम् । तथा च ते ते पदार्थाः क्रियादयः स्वसामर्थ्येन स्वरूपमात्रेण पदैरभिहिता विना कारणादिभिरपर्यवस्यन्तस्तदाकाङ्क्षायोग्यतासन्निधि-सहकारिणो वाक्यार्थधियमादधतीति युक्तम् । अत्रोच्यते ।

विधान्तरानुपगमात्स्मृतिलक्षणयोगतः ।
अभ्यासातिशयाद्रूपस्मृतेर्नान्योन्यसंश्रयम् ॥

इदं तावन्निरूपयतु भवान् प्रमाणसंशयविपर्ययस्मृतिषु कतमेयं पदात्पदार्थप्रतिपत्तिरिति । तत्र न तावत्प्रमाणमनधिगतार्थबोधनं तदुपे-यते । यथा ऽऽहुः । सर्वस्यानुपलब्धे ऽर्थे प्रामाण्यं स्मृतिरन्यथेति § । न च पदात्पदार्थधीरनधिगतार्थगोचरा । न खलु सम्बन्धसंवेदनसमये समधिगतो ऽर्थः पदैरभिधीयमानो देशकालावस्थाविशेषेणाप्यतिरिच्यते । अन-तिरिच्यमानश्च न स्वरूपे विज्ञानं प्रमाणयति । अत एवाहुः ।

---

* वाक्यार्थप्रत्यय इति ३ पु॰ पा॰ ।

† अव्यभिचारे सत्येव स्मृतिजनक इति नियमो नास्तीत्यर्थः ।

‡ साहचर्यमात्रस्यापि च संबन्धतया प्रणिधानादिगणे पाठादुपपत्तेश्च तदु-द्बोधहेतुभावो न विरुध्यते । तत्र स्वार्थस्येव पदार्थान्तरस्याप्यस्तीति ३ पु॰ अधिकः पाठः ।

§ श्लोकवार्त्तिके वृत्तिकारग्रन्थे श्लो॰ ११ ।

परोक्षस्यानुभूतस्य यस्तत्र स्मृतिरिष्यते ।
प्रमिते ऽनुप्रयुक्तत्वा * त्स्मृतेर्नास्ति प्रमाणता † ॥

पदमभ्यधिकाभावात्स्मारकान्न विशिष्यते इति च ‡ । न हि पदस्य प्रणिधानादिभ्यः संस्कारोद्बोधहेतुभ्यः कश्चिद्विशेषः । संशयविपर्ययानुभावस्तु पदस्येति स्वकीयः । न च पञ्चमी विधा समस्तीति स्मृतिः परिशिष्यते । सा चान्वितगोचरा न स्वरूपगोचरेति तुल्यो दोषः । अभिधानतः स्मारितं वाक्यार्थोन्वयि न साहचर्यादिति चेत्कुतस्तर्हि गङ्गायां घोषः प्रतिवसतीत्यादौ तीरादीनामनभिधेयानां प्रतिवासान्वयः । अपि चाभिधानतः स्मारितस्वरूपमात्रस्य साहचर्यस्मारितेनैवार्थान्तरेणाकाङ्क्षोपरतेरनाकाङ्क्षितस्य च चरमप्रतीतेर्नाभिधानतो § ऽर्थान्तरेण संगमायोगात्समुत्पन्नसंकटो वाक्यार्थः प्रसज्येतेति कुतस्तद्भावना कुतस्तरां तदुद्बोधः पदैः कुतस्तमां च तदन्वयस्मरणमित्यकामेनापि अन्वयिस्मरण ॥ मभ्युपेयम् । इतश्चैतदेवं यदभ्यासातिशयः संस्कारातिशयमाधत्ते स च द्रागित्येव प्रबुद्ध एकपदे स्फुटतरं स्मरणमुपजनयति । दर्शनमात्रजन्मा ¶ पुनर्मन्दो विप्रलम्बितप्रबोधो मन्दमेव कार्यमाधातुमुत्सहते । अभ्यासवती च पदस्य स्वार्थेन साहचर्यानुभूतिर्यथा न तथा ऽर्थान्तरेण । अन्वये ऽभ्यासवत्यप्यर्थान्तरेष्वनभ्यासात्तद्रूपणा**च्चान्वयस्यानभ्यास एव । तथा च स्मृतिसन्निहितस्वरूपमात्रेणार्थो अर्थान्तराकाङ्क्षः पदैरन्विता अभिधीयन्तइति न परस्पराश्रयम् । नाप्यनाकाङ्क्षता । आकाङ्क्षा च प्रतिपत्तुर्जिज्ञासा । सा च क्वचिदभिधानापर्यवसानाद्भवति यथा द्वारा इति । न ह्यत्र प्रकृत्यर्थादतिरिक्ते प्रत्ययार्थे प्रतीतिरस्ति येनान्वितः प्रकृत्या

---

* तु प्रयुक्तत्वादिति ३ पु॰ पा॰ ।
† श्लोकवार्तिके शब्दवादे श्लो॰ १०.२ ।
‡ श्लोकवार्तिकशब्दवादश्लो १० ५ ।
§ पदान्तरसमभिव्याहारोत्तरमुद्बुद्धया ऽभिधया पश्चादुपस्थितेनेत्यर्थः ।
|| अन्वितस्मरणमिति ३ पु॰ पा॰ ।
¶ तत्सहितार्थान्तरसाहचर्यदर्शनजन्य इत्यर्थः । स्वार्थेन संगतिपक्षो भूयानर्थान्तरेण तु प्रयोगभेदेनानियतत्वान्न तथेति भावः ।
** तद्रूपनिरूपणात्वादिति ३ पु॰ पा॰ ।

स्वार्थो ऽभिधीयेत प्रातिपदिकार्थमात्रे प्रथमोत्पत्तेः *। तदन्वयान्विताभिधानपर्यवसानाय प्रतिपत्ता पदार्थान्तरं स्मारितान्वययोग्यं जिज्ञासते । क्वचिच्चाभिहितार्थापर्यवसानाद् यथा विश्वजिता यजेतेति । इह हि कार्यस्य † विषयकरणान्वितस्याभिधानं पर्यवसितं न पर्यवस्यत्यभिहितं कार्यं नियोज्यभेदमन्तरेण । न खलु कार्यमनुष्ठानं विना व्यवतिष्ठते । न चाकर्तृकं तत् । न चानधिकृतः कर्ता । न चानियोज्यो ऽधिकृत इत्यानुपूर्व्या ‡ सिद्धं तेनात्रापि तत्पर्यवसानायास्ति तदन्वययोग्ये नियोज्ये जिज्ञासा । § न चानन्वितस्वार्थस्मरणमात्रावसितव्यापारेषु पदेषु तदर्था एवाकाङ्क्षादिसहकारिणः करिष्यन्ति वाक्यार्थधियमिति कृतमत्र पदानां सामर्थ्येनेति सांप्रतम् । पदानभिहितानां ‖ तेषां मानान्तरगोचराणां वाक्यार्थधीहेतुभावादर्शनात् ¶ । श्वेतमश्वं पश्यतो हेषारवं च शृण्वतः खुरनिक्षेपशब्दं च श्वेतो ऽश्वो धावतीत्यन्वयधियः पदश्रवणमन्तरेणोत्पादो दृष्ट इति चेद् नानुमानादर्थापत्तेर्वा तदवगमात् । अनवगमाद्वा ** । एवं वादी हि तावत्प्रष्टव्यो †† व्याचष्टां किं श्वित्क्वेतसमानाधिकरणो येन हेषाध्वनिखुरनिक्षेपशब्दाववसितो तस्य ज्ञानं निरूप्यते आहो श्वित्क्वेन सितिमा च पदनिक्षेपशब्दो हेषाध्वनिश्च स्वरूपमात्रेणावसितः । तत्र पूर्वस्मिन् कल्पे लिङ्गसामर्थ्यजमेतच्च पदार्थसामर्थ्यजम् । उत्तरस्मिन्नपि द्रव्यान्तराभावनिश्चये सत्यर्थापत्तिस्तदभावे च नावसाय एव । अपि च

---

* प्रत्ययोत्पत्तेरिति ३ पु॰ पा॰ ।

† कार्यस्येति ३ पु॰ नास्ति ।

‡ क्रियायाः सकर्तृकत्वनियमादिष्टसाधनताज्ञानं विना कर्तृत्वानुपपत्तेरनुष्ठानमन्तरेण फलासंभवात्स्वर्गकामः कर्तृत्वेनान्वेतीति भावः ।

§ विश्वजिता यजेतेति वाक्ये ऽश्रुतमपि स्वर्गकाममन्वितमालोच्य सर्वत्र तथैवास्त्वित्याक्षिपति ।

‖ पदानभिहितानामिति ३ पु॰ पा॰ ।

¶ तथा च तत्र पदाध्याहार इति भावः । अन्यत्रापि क्व चित्प्रविश पिण्डीमित्यादावध्याहारस्थले इष्टापत्तिः ।

** व्याप्तिज्ञानाद्यभावे इति शेषः । तत्सत्त्वे ऽपि तस्याः शाब्दत्वाभावाच्चेत्यपि वक्ष्यति ।

†† पृष्ट इति ३ पु॰ पा॰ ।

पदार्थसामर्थ्यजन्यत्वाभ्युपगमे शब्दमूलत्वाभावेनाशाब्दत्वान्मनसश्च का- क्षानपेक्षस्याप्रवृत्तेः षट्प्रमाणीव्यतिरिच्यमानसहकारिसापेक्षत्वे सप्तम- प्रमाणाभ्युपगमप्रसङ्गः*। तस्मिन्नुमेतव्यानभिहिता अर्था वाक्यार्थधीहेतव इति पदैरभिहितानामयं महिमा ऽभ्युपेतव्यस्तेषाम्। तथा च पदार्थानां वाक्यार्थप्रत्ययाधानसामर्थ्यं पदानां च तत्सामर्थ्याधानसामर्थ्यमिति शक्ति- द्वयं कल्पनीयम्। अन्विताभिधानवादिनस्तु प्रथमावगतानां पदाना- मभिधायकानां वाक्यार्थप्रत्ययोपजननपर्यवसिततात्पर्यवृत्तीनामेकमेवाका- ङ्क्षायोग्यतासत्तिरूपोपाध्युपगृहीतार्थान्तरान्वितस्वार्थाभिधानसामर्थ्य- मिति लाघवादतो ऽर्थाभिधायिनां पदानामेव वाक्यार्थधीहेतुभाव इति चतुरस्रम्।

अत्राभिधीयते। एष तावदौत्सर्गिको न्यायो यदसति बलवद्बाध- कोपनिपाते।

सहकारिणि कार्ये च प्रत्यासन्नं हि कारणम्।
सति तद्भावभावित्वे तथा चार्थस्मृतिः पदात्॥

भवति हि कुतश्चिन्मानसापराधाद्विदितपदार्थो विदितपदरूप- मात्रश्चेतनो न मनागपि वाक्यार्थमवगच्छति अवगच्छति तु समभि- व्याहृतपदकदम्बकोपजनितस्वार्थस्मृत्यनन्तरम्। तद् अमूषामेव स्वार्थ- स्मृतीनामाकाङ्क्षायोग्यतासत्तिसहकारिणीनां कारणत्वं वाक्यार्थप्रत्ययं प्रत्यध्यवस्यामः। यदपि मतं स्वार्थस्वरूपस्मृतयो ऽपि हि वस्तुतदर्थान्तर†- सङ्गतार्थगोचरा‡ न स्वगोचरमर्थान्तरेण घटयन्ति विभ्रमप्रसङ्गात्। न खलु प्रासादमात्रस्य स्मरतो ऽस्मरतश्च तादृशपाटलिपुत्रं स्वरूपमात्र- स्मृतयो माहिष्मत्येनं घटयितुमीशते ईशाना वा भवन्त्यभ्रान्ताः। तद्-

* अर्थसहकारिकान्मनसो ऽर्थस्य वा केवलस्य प्रमितिजनकताया अक्लृप्तत्वादिति भावः।

† वस्तुतस्तदर्थान्तरेति ३ पु॰ पा॰।

‡ वस्तुभूतेन ततो ऽर्थान्तरेण संगतो ऽर्थो गोचरो यासां तादृश्यः स्मृतय इत्यर्थः।

प्यसांप्रतम् । मा नाम भूदीदृशं स्मरणफलसंस्कारस्य सामर्थ्यं यदनुभूतानमुभूतस्वरूपतदर्थान्तरसम्बद्धद्वयविषयमाधत्ते स्मरणं समीचीन*मिति । सम्भवति तु समभिव्याहृतपदावलीलब्धजन्मनामर्थस्वरूपस्मृतीनामाकाङ्क्षादिरूपसहकारिभेदोपधानाहितदशान्तरोपपादितप्रमाणभावाना†मनन्तरपरिदृश्यमानमानान्तरानधिगतस्वार्थपरस्परसम्बन्धनिर्भासप्रकाशकत्वानाम् । अन्यथा प्रत्यभिज्ञानमपि न जायेत । तत्रापि देशकालोपहित‡-स्वरूपसंवेदनजन्मा संस्कारस्तदाहिता वा स्मृतिः कथं स्वार्थं देशान्तरेण वा कालान्तरेण वा घटयेत् । तत्र हीन्द्रियादिसहकारिसमवधानप्राप्तदशान्तरयोरेतयोः पूर्वापरदेशकालानुगतैकवस्तुगोचरप्रत्यभिज्ञानस्य प्रसवसहः§ को ऽपि महिमा तादृगभ्युपगन्तव्यः । स चेहापि समानो ऽन्यत्राभिनिवेशात् । न च देशकालावस्थानानात्वे वस्तुनो रूपं नानेत्युपपादितं न्यायकणिकायाम् । ननूक्तं न मानान्तरतो ऽनुभूतस्मृतानामर्थरूपाणां|| वाक्यार्थधीप्रसवसामर्थ्यमुपलब्धमुपलम्भे वा सप्तमप्रमाणाभ्युपगमप्रसङ्गः¶ । आगमस्य चात्रैवान्तर्भावे प्रत्यक्षादिभिस्तुल्यकक्ष्यतया तत्रैवोपन्यसनीयं न त्वागमस्तद्भेदः** । न हि लोका ब्राह्मणयुधिष्ठिराविति प्रयुञ्जते प्रयुञ्जते तु ब्राह्मणराजन्याविति वसिष्ठयुधिष्ठिराविति वा । न च भेदान्तरोपन्यासेन भेदान्तरमुपन्यस्तं भवति । तदयं समस्तमानलक्षणप्रवृत्तो

* संस्कारस्य स्वगोचरागोचरविषयकस्मृतिजनकत्वाभावे ऽपि स्मृतेर्वक्ष्यमाणानुपपत्त्या तादृशप्रमितिजनकत्वमङ्गीक्रियत इति यावत् । सामर्थ्यं कर्तृ समीचीनमबाधितं स्मरणं कर्म । आधत्ते जनयतीत्यर्थः ।

† दशान्तरापादितप्रमाणभावानामिति ३ पु॰ पा॰ ।

‡ देशकालभेदोपहितेति ३ पु॰ पा॰ ।

§ प्रत्यभिज्ञानप्रसवसह इति ३ पु॰ समस्तः पाठः ।

|| ननूक्तं च मानान्तरते ऽनुभूतस्मृतमर्थरूपाणामिति २ पु॰ पा॰ ।

¶ प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिव्यतिरिक्तस्यार्थस्वरूपस्यापि प्रमाणताऽऽपत्तिरित्यर्थः ।

** अर्थस्वरूपस्मारकत्वादागमस्यार्थस्यैव प्रमितिजनकत्वात् पूर्वोक्ताकूते भवेतिमत्यनुभवत्वचक्षुरमिथ्येव भवत्यत्र त्वदभायामशक्तो धावतीति धियोऽर्थमात्रप्रभवत्वस्वीकारे आगमस्य क्वचिदर्थसत्तानुपयोगे ऽपि तस्याव्यापकत्वादिति भावः ।

मानतुषस्यापि परित्यागे तेनैव सह स्वकौशलमपि परित्यजेदिति पदाहितानुभवानां वा* पदाहितस्मृतिरूपाणां वा ऽयमीदृशः† सामर्थ्यातिशयो यतो ऽन्वयधिय उदय इत्यकामेनाप्यभ्युपेयम् । तथा च तिस्रः शक्तयः कल्प्येरन्त्रं वा पदानां हि तावदर्थरूपानुभवजननशक्तिः अर्थरूपाणामन्योन्यान्वयप्रत्यायनशक्तिः तदाधानशक्तिश्चापरा पदानामेवेति । स्मारकत्वपक्षे तूक्तं शक्तिद्वयम् । अन्विताभिधाने तु पदानामेकैव शक्तिः तत्कल्पनालाघवादेतदेव न्याय्यमिति । अत्रोच्यते । सत्यम् ।

कल्पनालाघवं यत्र तं पक्षं रोचयामहे ।
तदेव कतरत्रेति निपुणं संप्रधार्यताम् ॥

एकैव किल शक्तिरन्विताभिधानवादिभिरन्वितस्वार्थगोचरा ऽभिप्रेयते पदानां न तु विशेषे‡ तदप्यभिधीयते§ । सेयं न तावदन्वयमात्रविषया । तन्मात्रविषयत्वे तस्याविशेषात्सर्वशब्दानां पर्यायताप्रसङ्गः । नापि व्यतिषक्ताभिधायि पदं न व्यतिषङ्गस्य वाचकं जात्यभिधायकमिव व्यक्तेः व्यतिषक्ततो ऽवगतेर्व्यतिषङ्गस्य व्यतिषक्तानां च स्वरूपतो भेदाचैकार्थ्यं पदानामिति सांप्रतम् । व्यतिषक्त इति स्वरूपमात्रं वोपलक्ष्येत व्यतिषङ्गवद्वोच्येत । तत्र रूपाभिधानजन्मा ख्यातिः|| जात्यभिधानजन्मेव व्यक्तिं न व्यतिषङ्गमपि गोचरयितुमर्हति । न हि यथाऽऽकारिणमन्तरेणाकारो ऽशक्यनिरूपण इति शब्दसामर्थ्यगोचरत्वमनापन्नो ऽप्याकार्याकाराभिधायिशब्दजनितविज्ञानविषयभावं नातिपतति¶ तथा ऽर्थस्वरूपमन्वयमन्तरेण दुरधिगमं येन स्वगोचरशब्दसामर्थ्यजन्मनि

* बौद्धपदार्थानामेव शाब्दधीविषयतापक्षे ।

† पदाभिहितानुभवानामिति यद्वदीदृश इति च २ पु॰ पा॰ ।

‡ अन्विते न तु विशिष्टइति ३ पु॰ पा॰ ।

§ स्ववाच्यप्रतियोगिताऽनुयोगिताकत्वविशिष्टे तत्त्वेन तात्पर्यविषये वा न तु सम्बन्धत्वव्याप्यतत्तद्रूपावच्छिन्ने नानार्थत्वप्रसङ्गात् ।

|| स्वरूपमात्रनिरूपितशक्तिज्ञानमित्यर्थः ।

¶ शुक्लादिशब्दगतशक्तिविषयो ऽप्याकारी गुणाश्रयो गुणमात्रवाचकपदजन्यबोधविषयतां न मुञ्चतीत्यर्थः । आकारीति पृथक् पदम् ।

संस्कृतपुस्तकानां सूचीपत्रम् ।

मूल्यम्

रु० आ०

१ काशिका पण्डितवरवामनादित्यविरचिता

पूर्वार्धम् .. .. ॥

उत्तरार्धम् .. .. १० .. ॥

२ बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम् .. .. २ .. ॥

३ प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम् .. .. १ .. ।)

४ लघुकौमुदी वरदराजकृता .. .. १ .. =)

५ लघुकौमुदी श्रीयुतडाक्तरबालण्टैनार्य्येणाङ्गलदेशीयभाषायां कृता ८ .. ॥

६ श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः ≡)

७ वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफार्य्येणाङ्गलदेशीयभाषायां कृतम् ४ .. ॥

८ मानवधर्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद ५ .. ॥

९ शाश्वतधर्मदीपिका .. .. १ .. ॥

१० अमरकोश सटीक .. .. ४ .. ॥

११ योगवार्त्तिकम् .. .. ३ .. ।)

१२ वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः १) .. ॥

१३ गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्विनगा-
देशाधिपति रचिता .. .. ४) .. ॥

१४ श्रौतपदार्थनिर्वचनम् .. .. ३ .. ।॥)

१५ वाक्यार्थचन्द्रिकापरिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूकशास्त्रि
संशोधिता .. .. ४) .. ॥

१६ श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराम-
मिश्रशास्त्रिप्रणीत क्वाचित्क विषमपदटिप्पणीसमेतः .. ६) .. ।॥)

१७ खण्डनखण्डखाद्यं सटीकं श्रीमन्मोहनलालवेदान्ताचार्यकृत-
टिप्पणीसहितम् .. .. ७) .. ॥)

१८ काव्यप्रदीपः काव्यप्रकाशस्य प्रतिज्ञायाव्याख्या वाराणसेयसमाद्-
प्रतिष्ठापितसंस्कृतपाठशालीयदर्शनशास्त्राध्यापकरामशास्त्रि-
भागवताचार्येण परिशोधितः .. .. ३) .. ॥)

१९ वेदान्तसिद्धान्तमुक्तावली श्रीयुत आर्थर्विनिस महाशये-
ङ्गलेण्डीयभाषायां कृतम् .. .. २) .. ॥)

Digitized by Google

CONTENTS.

Page.

GAṆAKATARAṄGIṆĪ, or LIVES of HINDU ASTRONOMERS, by Mahāmahopādhyāya Sudhākara Dvivedī, Professor, Sanskrit College, Benares. ... 113

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed: Dāmodara Śāstrī, Professor, Sanskrit College, Benares. ... 129

ŚRĪBHĀSHYA WITH ŚRUTAPRAKĀŚIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. ... 145

TATTVABINDU, of Vāchaspati Miśra, Ed: Mahāmahopādhāya Gaṅgādhara Śāstrī, Professor, Sanskrit College, Benares. ... 161

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 4.] APRIL, 1892. [Vol. XIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1892.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

तदीयपदशालिना विरचिते सुयन्त्रागमे
महेन्द्रगुरुणोदिताऽजनि विचारणा यन्त्रजा ॥

मलयेन्दुसूरिकृतटीकादौ ।

प्रणम्य सर्वज्ञपदारविन्दं सूरेर्महेन्द्रस्य पदाम्बुजं च ।
तनोति तद्गुम्फितयन्त्रराजग्रन्थस्य टीकां मलयेन्दुसूरिः ॥

तदन्ते ।

श्रीपेरोजमहेन्द्रसर्वगणकः पृष्टो महेन्द्रप्रभु-
र्जातः सूरिवरस्तदीयचरणाम्भोजैकभृङ्गस्तुता ।
सूरिश्रीमलयेन्दुना विरचितेऽस्मिन् यन्त्रराजागम-
व्याख्याने प्रविचारणादिकथनाध्यायोऽगमत्पञ्चमः ॥

अत्र परमा क्रान्तिः पञ्चविंशत्कलाधिकास्त्रयोविंशत्यंशाः २३ । ३५ । सायना द्वात्रिंशन्नक्षत्रध्रुवाश्च सशराः पठिताः प्रथमाध्यायस्य २१–३८ श्लोकैः ।

प्रथमाध्यायस्य ३९ श्लोकेन

"द्विनन्दसूर्यै १२९२ रहिताच्छकाब्दा-
न्नभोऽश्विशैलै ७२० गुणितात्खखेभैः ८०० ।
आप्तं कलाद्येन युतं त्वभीष्टे
वर्षे भवेत्सायननामकं तत्" ॥

इत्यनेन ग्रन्थारम्भशको द्विनवद्वीन्दु १२९२ मितः । प्रतिवर्षं चतुःपञ्चाशद्विकला अयनांशगतिश्च ज्ञायते । अत्र दृक्कर्मानयनं न समीचीनम् । तथात्र गणिताध्यायः । यन्त्रघटनाध्यायः । यन्त्ररचनाध्यायः । यन्त्रशोधनाध्यायः । यन्त्रविचारणाध्यायः । इति पञ्चाध्याया अनुष्टुप्सहस्रश्लोकैः सटीकैः सन्ति । मूलग्रन्थश्च नानाविधैः कराष्टेन्दु १८२ संख्यैर्वृत्तैर्निबद्धोऽस्ति । प्रथमाध्याये प्रतिसायनभागोत्थक्रान्त्यंशाः प्रतिभागज्यात्क्रमज्यामानानि नाडीमण्डलधरातले परिणतानां वृत्तानां व्यासकेन्द्रज्ञानार्थं प्रतिभागद्युज्याखण्डानि च षड्राशिसम्बन्धीनि खाष्टरूप-१८० मितानि साधितानि । अयं ग्रन्थः कस्यचित्पारसीग्रन्थस्य संस्कृतेऽनुवादो न स्वातन्त्र्येण महेन्द्रसूरिकृत इति प्रतीयते ॥

ग्रन्थारम्भसमये यद्यस्य वयः पञ्चाशत्कल्प्यते तदा जन्मशको द्विवेदद्वादश १२४२ समः समायाति ।

महादेवः । १२०६

अयं कौडिन्यगोत्रस्य बोपदेवस्य तनयो गोदातीरस्थत्र्यंबकाख्य-नृपसभायामग्रगण्यो ब्रह्मार्यभटमतद्वयानुसारेण पञ्चाङ्गसाधनार्थं काम-धेनुनाम करणं नवसप्तयुग्मकरमिते १२७९ शके व्यरचयत् । इदं करणं सारणीसहितं पञ्चत्रिंशच्छ्लोकात्मकमतिप्राचीनं दुर्लभं काश्यां मन्मित्र श्रीसिद्धेश्वरज्योतिर्विच्चिकटे वर्त्तते । अस्यैव कामधेनुगणितस्य टीका रामदेवज्ञपित्राऽनन्तदेवज्ञेन कृता । इयं टीका च नोपलब्धा मयाद्या-वधि ।

कामधेन्वादौ ।

प्रणम्य पुष्पदन्ताख्यं शारदां गणनायकम् ।
तिथिसिद्धिं कामदुघां करोम्यल्पामतिस्फुटाम् ॥
सिद्धिः पक्षद्वयस्यात्र न कर्मजडताऽस्ति च ।
तिथ्यादीनां भवत्यष्यापटे दुर्गविंशकोष्ठके ॥

नवाद्र्यर्कोन १२७९ शाकघ्ना गुणाः त्रेपयुता ध्रुवे ।

अन्ते ।

आसीत्कौडिन्यगोत्रो द्विजवरतिलको बोपदेवाभिधानः
श्रीतस्मार्त्तार्थनिष्ठो नृहरिपदयुगाराधकानामभीष्टः ।
तज्जश्चक्रे परेशे सुदृढधृतमतिः श्रीमहादेवनामा
गोदास्थे त्र्यम्बकाख्ये नृपसदसि मतः कामधेनुं सुबोधाम् ॥

अनन्तदेवज्ञादीनां समये कामधेनुगणितस्य महान् प्रचार आसी-दित्यनन्तदेवज्ञटीकाकरणेन तथा मुहूर्त्तचिन्तामणौ रामदेवज्ञवर्णनेनैव ज्ञायते ।

गङ्गाधरः । १३५६

अयं विन्ध्याचलदक्षिणप्रान्तस्थसगरनगरनिवासी चन्द्रभट्टतनूजः कलेः पञ्चत्रयपञ्चाब्धि ४५३५ वर्षगणे व्यतीते रसशराग्निभूमिते १३५६ शके सम्प्रति प्रचलितसूर्यसिद्धान्तानुसारं चान्द्रमानाभिधानतन्त्रं व्यरच-यत् । तत्र तद्वंशीयविश्वनाथेनोदाहरणादिना विवृतिश्च कृता । ग्रन्थादौ ग्रन्थकृता स्ववंशवर्णनं कृतं विस्तरतः । तद्यथा

श्रीसूर्याय नमो नित्यं ऋग्यजुःसाममूर्त्तये ।
सच्चिदानन्दरूपाय जगदेकाम्बकाय च ॥
अस्मिन् भूमण्डले जम्बूद्वीपे भारतवर्षके ।
खण्डे च भारते मेरोर्विन्ध्यसंज्ञाच्च दक्षिणे ॥
समभूमध्यरेखायां श्रीशैलात्पश्चिमाश्रिते ।
कृष्णावेणीभीमरथ्योर्मध्ये जगति पावने ॥
सगरं नाम नगरं जगत्यत्रापि विश्रुतम् ।
श्रीमत्सूर्यकुलोत्पन्नसगरेण विनिर्मितम् ॥
तस्मिंस्तु नगरे श्रीमज्जमदग्निकुलोद्भवः ।
लक्ष्मीनृसिंहभक्तोऽभूद्भूसुरो विट्ठलाह्वयः ॥
वेदवेदाङ्गशास्त्राणामागमानां च तत्त्ववित् ।
तस्यात्मजस्तु भट्टार्यो विद्वान् विष्णुपरायणः ॥
तत्पुत्रश्चन्द्रभट्टाख्यो ज्योतिःशास्त्रकलानिधिः ।
गङ्गाधरस्तु तत्पुत्रः सर्वशास्त्रविशारदः ॥
तेन संगृह्य रचितं सूर्यसिद्धान्तसंमतम् ।
चान्द्रमानाभिधं तन्त्रं कुशलानन्दकारकम् ॥

"वर्त्तमाने कलौ पञ्चत्रिपञ्चाब्धि ४५३५ समाः समाः" इति ३० श्लोकेन ग्रन्थारम्भशको ज्ञातोऽस्माभिः । अत्र मनुमानानन्तरमत्त-रासुकालविधिविनाडिकादिमानं सम्प्रति ज्ञातसूर्यसिद्धान्ताद्विशिष्टम् ।

चान्द्रमानस्य पुस्तकमेकमतिजीर्णं काशिकराजकीयपुस्तकालये वर्त्तते तत्र द्वितीयाध्यायस्य २-४ श्लोकाश्च

गङ्गाधराख्यस्य कुले प्रसूतो यथा सुधाब्धौ द्विजराज एषः ।
भूभास्करो भूमिसुराग्रगण्यो भूमण्डले दैवविदां वरिष्ठः ॥
श्रीचन्दलो लब्धवरो यशस्वी श्रीमान् कृती सौरमताभिमानी ।
विद्यापुरस्थो नृपतिप्रियोऽभूद्वेदान्तनामा जगति प्रतीतः ॥
तत्पुत्रो विश्वनाथस्तनुमतिरपि यच्चान्द्रमानाभिधानं
तन्त्रं गङ्गाधरोक्तं पदविषमतयात्यन्तगूढं विदित्वा ।
तच्चाम्बेवाङ्कितं तत्पुनरपि मृदुभिर्भिन्नपद्यैस्तदङ्कैः
स्पष्टं देवीप्रसादाद्गुरगणकमुदे कर्त्तुमस्म्युद्यतोऽहम् ॥

Digitized by Google

इमे सन्ति ।

एतेभ्यो विश्वनाथकृतं चापि चान्द्रमानाख्यमेवेति सिध्यति ।

काशिकराजकीयपुस्तकालयपुस्तके च

कालमीमांसाध्यायः । मासध्रुवमध्यग्रहाधिकारः । रवीन्दुस्फुटीकरणातिथ्यधिकारः । मासध्रुवाधिकारः । (अस्मिन् अधिकारे चान्द्रमासौघाद् रव्यादिध्रुवकाः साधिताः) सौरमानाध्यायः । प्रकारान्तरेण मध्यग्रहाधिकारः । (अत्र कल्यादिध्रुवतो मध्यग्रहानयनम्) स्पष्टाधिकारः (अत्र त्रिज्या भूनन्देन्दु १९१ मिता गृहीता) एतेऽध्यायाः सन्ति । सम्पूर्णग्रन्थसंख्या श्लोकशतद्वयासन्ना ।

मकरन्दः । १३६०

अनेन चतुर्दशशत १४०० शके सूर्यसिद्धान्तानुसारं तिथ्यादिसाधनार्थं सारणीरूपो निजनामप्रसिद्ध्यर्थं स्वनाम्नैव ग्रन्थो वाराणस्यां विरचितः । मकरन्दः पुष्परसस्तदुत्पत्तिश्च तरौस्तद्गणतदुत्पत्तिश्च कन्दादिना चातो मकरन्दनामकं ग्रन्थं कुर्वता मकरन्देन तत्र ध्रुवकादीनां संज्ञाः कन्दवल्लीलतागुच्छादयः कल्पिताः । सम्प्रति काशीमिथिलादिप्रदेशेषु मकरन्दत एव साधयन्ति सुधियस्तिथिपत्रम् ।

मकरन्दादौ ।

श्रीसूर्यसिद्धान्तमतेन सम्यग् विश्वोपकाराय गुरूपदेशात् ।
तिथ्यादिपत्रं वितनोति काश्यामानन्दकन्दो मकरन्दनामा ॥

ग्रन्थादिसारणीतो ग्रन्थारम्भशकश्चतुर्दशशत १४०० समो ज्ञायते । भारतवर्षे सम्प्रति मकरन्दमेवाधीत्याऽऽत्मानं कृतकृत्यं मन्यन्ते प्रायः फलितवेदिनो ज्योतिर्विदः । मकरन्दस्यान्याः कृतयो न कुत्रचिदुपलभ्यन्ते कुत्रापि तन्नामापि न दृष्टमतोऽस्यान्या कृतिः काचिन्नेत्यवबुध्यते । ग्रन्थारम्भसमयेऽस्य वयश्चेच्चत्वारिंशद्वर्षसमं कल्प्यते तदाऽस्य जन्मशकः खरसविश्वमितः १३६० समायाति ।

मकरन्दोपरि दिवाकरदैवज्ञकृतविवरणं (दिवाकरवर्णनं विलोक्यम्) विश्वनाथकृतमुदाहरणं च प्रायः सर्वत्रैव लिखितं मुद्रितं चोपलभ्यते । एका गोकुलनाथकृतोपपत्तिरूपा टीका चास्त्यस्य सा च वस्तुतः शुद्धा बहुनाऽऽयासेन प्राचीनज्योतिर्विदां गृहेषु प्राप्यते । अत्र ग्रहसाधनार्थं याः

सारण्यः सन्ति तासामेवानुवादोऽङ्गलभाषायां जान्बेण्टलीसाहिबेन कृतः (See "A Historical View of the Hindu Astronomy" by John Bentley, Appendix, No. I.) बेण्टलीसाहिबमुद्रिताः सारण्योऽत्यशुद्धाः सन्ति तासां पुनः संस्करणं समुचितम् ॥

केशवः । १३०८

अयं कमलाकरनन्दनो वैद्यनाथशिष्यः कौशिकगोत्रोद्भवो गणेशदैवज्ञजनक आसीत् । अस्य जन्मस्थानं पश्चिमसमुद्रतीरवर्त्तिनन्दिग्रामे ।

केशवेन ग्रहकौतुकम् । वर्षग्रहसिद्धिः । तिथिसिद्धिः । जातकपद्धतिः । जातकपद्धतिविवृतिः । ताजकपद्धतिः । सिद्धान्तवासनापाठः । मुहूर्त्ततत्त्वम् । कायस्थादिधर्म्मपद्धतिः । कुण्डाष्टकलक्षणम् । गणितदीपिका । इत्यादयो ग्रन्था विरचिता इति तत्तनयगणेशदैवज्ञकृतमुहूर्त्ततत्त्वटीकामुहूर्त्ततत्त्वदीपिकास्थवचनेन

"सोमाय ग्रहकौतुकं खगकृतिं तच्चालनाख्यं तिथेः
सिद्धिं जातकपद्धतिं सविवृतिं तत्ताजके पद्धतिम् ।
सिद्धान्तेऽप्युपपत्तिपाठनिचयं मौहूर्त्ततत्त्वाभिधं
कायस्थादिजधर्म्मपद्धतिमुखं श्रीकेशवार्योऽकरोत्" ॥

इत्यनेन तथा मुहूर्त्ततत्त्वदीपिकाप्रथमश्लोकटीकया ज्ञायते । ग्रहकौतुकजातकताजकपद्धतिमुहूर्त्ततत्त्वग्रन्थान् विहायान्ये न दृष्टा मयाद्यावधि । तत्र ग्रहकौतुके करणारम्भशकोऽष्टेन्दुशक१४१८समः परन्तु तत्तनूजगणेशदैवज्ञविरचितबृहत्तिथिचिन्तामणिस्थवचनानुसारतो ग्रहकौतुकानन्तरं षष्टिमितेऽब्दे गणेशेन ग्रहलाघवाख्यकरणमकारीति तद्वचनं वञ्चनापरं ज्ञायते । ग्रहलाघवस्यारम्भशको द्विवेदशक्र १४४२ मितो ग्रहकौतुकस्य चाष्टेन्दुशक्र १४१८ मितशकः समयस्तदन्तरे चतुर्विंशतिवर्षगणत्वात् । ग्रहकौतुकारम्भे यदि केशववयश्चत्वारिंशद्वर्षसमं कल्प्यते तदा केशवजन्मशकोऽष्टसप्तविश्वमितः

१३७८ समायाति ।

मुहूर्त्ततत्त्वान्ते

ज्योतिःशास्त्रमहार्णवाद्बुद्धरन्मौहूर्त्ततत्त्वं बहु-
व्याप्यल्पं गुरुवैद्यनाथचरणद्वन्द्वे रतः केशवः ।

नन्दिग्रामगतः सुतस्तु कमलज्योतिर्विदय्यस्य त-
स्मात्ऽधीते स विराजते सदसि चादेशी यशस्वी चितौ ॥

इत्यनेन श्लोकेन केशवस्य पितुर्गुरोश्च नाम स्फुटम् ।

मुहूर्त्ततत्त्वे पूर्वखण्डे गर्भाधानादिसंस्कारमुहूर्त्ता उत्तरखण्डे च संहितावत् चारवशेन शुभाशुभलक्षणानि सम्यग्वर्णितानि । अस्य सम्प्रति यद्यपि जातकताजकपद्धतिमुहूर्त्ततत्त्वग्रन्थाः प्रसिद्धास्तथापि तेषु जातकपद्धतिर्ज्योतिर्विद्भिः सर्वैरादृता वस्तुत आदरणीया बहुभिः प्रौढगणककृतटीकाभिर्भूषिता प्रकटयति पाण्डित्यं गणितप्रागल्भ्यं च निजनिर्मातुर्विशेषविधातुः केशवरूपस्य केशवस्य । एते त्रयो ग्रन्था लिखिता मुद्रिताश्चोपलभ्यन्ते । अस्यैव केशवस्य पौत्रो लक्ष्मीदास इति कोलब्रूकसाहिबस्य संशय "(* Probably the same with the father of Gaṇeśa before mentioned)." इच लक्ष्मीदासवर्णनविलोकनेन निवृत्तो भवति यतः स केशव उपमन्युगोत्रोद्भवोऽयं च कौशिकवंशीय इति ।

पट्टं † विनाऽन्यकरणग्रन्थैराशु गणितं न भवति केशवेन च लघुगुणनभजनकर्म्मणा लघुना गणितेन खेटकर्म्म कृतं तदर्थमेव ग्रहकौतुककरणकरणकारणं चावर्णि ।

ग्रहकौतुकारम्भे ।

नत्वाऽऽर्याजकशम्भुशम्भुजखगान् ज्योतिर्विदां प्रीतये
वक्ष्ये सद्ग्रहकौतुकं घटिकया सर्वग्रहज्ञानदम् ।
स्थूलं चेति न वाच्यमत्र खचरा दृष्टिप्रतीता यतो
ब्राह्माद्येषु महान्तरं त्र्यसितयोर्मन्दे च खे दृश्यते ॥

सूक्ष्माणि सन्ति करणान्यपि सान्तराणि
पट्टं विनाऽऽशु न भवन्ति खगा यतस्तैः ।
एतच्चमत्कृतिकरं कृतमल्पकृत्यं
खेटान् स्फुटान् वद सदस्यऽमुनाऽऽगतान् द्राक् ॥

* See Colebrooke's Algebra, p. XXVIII.

† गणितकरणार्थं काष्ठपट्टिकेष्टिकाचूर्णपूरिता प्राचीनैर्धार्यते सम्प्रति यूरपदेशीयरीतितो नव्याश्च शिलापट्टिकां धारयन्ति तत्र सुखेन स्वच्छतया च धूलीकर्म्म विनैव गणितं भवति ।

धृतिसुरपति १४१८ हीनोऽयं शकोऽब्दव्रजोऽसावित्यादि ।

अन्ते च ।

मध्यस्पष्टखगोदयास्तकुटिलावक्रत्वपञ्चाङ्गदिग्-

भार्कादिद्युतिकाललाननलिकायन्त्रोपरागादिकम् ।

शृङ्गोच्चं ग्रहयोगभग्रहयुती पातं सभायां वदेद्-

द्राग् ज्ञातग्रहकौतुकः स च लभेल्लक्ष्मीं यशो गौरवम् ॥

नन्दिग्राम इहापरोदधितटे श्रेष्ठे द्विजाग्र्योऽभवज्-

ज्योतिर्वित्कमलाकरो द्विजवरस्तस्यात्मजः केशवः ।

शिष्याणां सदसि ग्रहग्रहमुखं वक्तुं स्फुटं हेलया

हित्वा वर्त्तनपट्टिकां हि कृतवान् सत्खेटकौतूहलम् ॥

इदं ग्रहकौतुकं पञ्चशतश्लोकात्मकं मध्ये मध्ये ग्रहोपयोगिसारणीसहितमतिप्राचीनं प्रायः शुद्धं दर्शनार्हं काश्यां जङ्गम्युपाख्यश्रीरामचन्द्रदीक्षितसदने वर्त्तते । अत्र ये विषयास्ते तु ग्रन्थान्तादिश्लोकेनोपरिलिखितेन स्फुटा एव । अयमस्य सुतो गणेश उभौ निजवाक्यलेनैवाऽऽत्मग्रन्थप्रशंसिनौ ।

लक्ष्मीदासः । १४२२

अयमुपमन्युगोत्रोद्भवस्य केशवस्य पौत्रो वाचस्पतेः पुत्रः । नागनाथाज्ञया निजसुहृद्भुवनाथप्रार्थनया निजानुजोर्वीधरप्रीतये युग्मयुग्मशक्रमिते १४२२ शके भास्करीयसिद्धान्तशिरोमणिटीकामुदाहरणोपपत्तिसहितां गणिततत्त्वचिन्तामणिसमाख्यां व्यधात् । अत्र लेखः प्रौढो नोपपत्तयश्च चतुरजनमनश्चमत्कारकारिण्यो न । इयं लक्ष्मीदासी टीकाऽऽयासेन प्राचीनज्योतिर्विदां गृहेषूपलभ्यते ।

गणिताध्यायगणिततत्त्वचिन्तामणेरादौ मङ्गलानन्तरम् ।

श्रुतिस्मृतिविचारणाचरणचारुचित्तः शुचि-

र्विवेकविनयास्पदं सदुपमन्युगोत्रः कृती ।

मुकुन्दचरणार्चनाविरचनाप्रपञ्चः सुधी-

र्बभूव विभवार्चितार्थिजनसंचयः केशवः ॥

समुद्धृतवसुंधराविबुधमोहविध्वंसनोऽ-

त उद्धरण उद्धुरप्रथितवादिविद्रावणः ।

Digitized by Google

बभूव हुतभुक्त्रयप्रगुणहोमधूमोद्गत-
प्रधानकलिकल्मषः प्रियसखः प्रबोधोन्मुखः ॥
अस्मादासीदसीमप्रवरगुणगरिष्ठस्त्वपादोपरिष्ठः
प्रेमोल्लासिप्रमेयग्रथितविविधबंधो वितन्द्रः कवीन्द्रः ।
ख्यातो वाचस्पतिः स्वप्रचुरहचिरया कार्त्तिकेन्दूत्थकान्त्या
शुभ्रांशुज्ञोशनोऽङ्कारगुरुरविभकक्ष्या वलक्षाश्चकार ॥
तस्माज्ज्ञानविवेकतोषितजगन्माधुर्यधुर्यात्तथा
साध्वीनां धुरि सद्यशो भुवि वसावन्यां जनिं प्राप्तवान् ।
लक्ष्मीदास इति द्विजन्मचरणद्वन्द्वारविन्दोद्गत-
स्वामोदाकुलसङ्कुलालिविलसल्लालित्यलीलालयः ॥

एवं दशमद्वादशश्लोकौ ।

शिरोमणिविबोधने सुजननागनाथेरितः
सुहृद्गुणगणाकरप्रगुणदेवनाथार्थितः ।
हितैरनघराघवैरपि निजानुजोर्वीधर-
प्रियप्रतिविधेययाऽस्मि विविधप्रयत्नोन्मुखः ॥
सुधाविमलचेतसि स्वगुरुपादपद्मद्वयं
विधाय गणनायकं मुरविदारणं भारतीम् ।
उपास्य गुरुसद्गिरः सदुपयोगिसिद्ध्यै ब्रुवे
शिरोमणिविकाशनं गणिततत्त्वचिन्तामणिम् ॥

गणिताध्यायाष्टाविंशतिश्लोकटीकायां "वर्त्तमानकालीनशालिवाहनशकः १४२२ एभिरन्विता १९७२९४८६०१ एते वर्त्तमाने ब्रह्मणो दिने गताब्दा जाताः"। अनेनैव ग्रन्थारम्भशको ज्ञातः। अन्तिमग्रन्थोऽस्माभिर्नोपलब्ध इति।

बहूनां मते लक्ष्मीदासस्य लक्ष्मीनाथ इति नामान्तरम्। एतत्कृता भास्करीयलीलावतीटीका चोपलभ्यते यत्र सर्वा उपपत्तयो व्यक्तेनैव कृताः सन्ति।

ज्ञानराजः । १४२५

अयं नागनाथनन्दनः पञ्चकरशक्रमिते १४२५ शके सिद्धान्तसुन्दराभिधं ज्योतिषसिद्धान्तं व्यधात्। यत्र प्रथमं गोलाध्यायस्ततो गणिताध्यायः।

गोलाध्याये सृष्टिक्रमः । लोकसंस्था । गतिवासना । छेद्यकवर्णनम् । मण्डलवर्णनम् । यन्त्रमाला । (यन्त्रमालायां स्वबुद्ध्या च कल्पितं यन्त्रं ज्ञानराजेन) ऋतुकर्म्म । भग्रवादिमानम् । ग्रहयुत्यधिकारः । पाताधिकारः । सप्तर्षीणां ध्रुवकादि । एतेऽध्यायाः सन्ति । तत्र सृष्टिक्रमो लोकसंस्था चेतिद्वयं प्रथमाध्यायान्तर्गतम् ॥ एवं गणिताध्याये मध्यमाधिकारः । स्पष्टाधिकारः । त्रिप्रश्नाधिकारः । पर्वसम्भवाधिकारः । चन्द्रपर्वाधिकारः । सूर्यपर्वाधिकारः । शृङ्गोन्नत्यधिकारः । एतेऽध्यायाः सन्ति । अत्र सिद्धान्ते बहुत्र पुराणमतमण्डनं भास्कराचार्यमतखण्डनं कृतमस्ति । कुत्रचित्कल्पना युक्तियुक्ताऽपरत्र सर्वत्र "चन्द्रबिम्बं रविणा नोज्ज्वलमि"त्यादिकल्पना गोलयुक्तिबहिर्भूता जल्पनापूर्णा कवितापरा च ।

गोलाध्यायद्वितीयश्लोकेन ।

"यत्रामातररश्मिभिस्तनुगतैः किञ्चत् कलावान् भवेत्
भक्तः स्वान्तनिशाकरोन्नततमास्तत्रोच्चवृद्धिः क्रमात् ।
भक्तानां भुवनेश्वरीमपि गुरुं सिद्धान्तसत्सुन्दरं
सुज्ञानन्दकरं करोमि चतुरज्ञानाधिराजः स्फुटम्" ॥

इत्यनेन ग्रन्थकृन्नाम

लोकसंस्थावर्णनोपसंहारे

"इत्थं श्रीमन्नागनाथात्मजेन प्रोक्ते तन्त्रे ज्ञानराजेन रम्ये ।

ग्रन्थागाराधारभूते प्रभूते गोलाध्याये लोकसंस्था निरुक्तेत्य"नेन तत्पितुर्नाम च स्फुटम् ।

एवं प्रत्याध्यायसमाप्तौ श्लोकाः सन्ति ।

गणिताध्यायमध्यमाधिकारे लघ्वहर्गणानयने

"सांघ्रिशक्रशत १४२५ शोधितो भवेच्छालिवाहनशकोऽब्दसञ्चयः ।
सद्गुणः खगगुणेन योजितः क्षेपकेण शरदि ध्रुवो भवेत् ॥"

इत्यनेन श्लोकेन ग्रन्थारम्भशकः सांघ्रिशक्रशतसमः १४२५ स्फुटः ।

सिद्धान्तसुन्दरस्यैका प्रतिः संपूर्णा प्रायः शुद्धा प्राचीना काशिकराजकीयपुस्तकालये स्थापिताऽस्ति यत्र षड्वसुशरचन्द्रसम १५८६ शाको लिपिकालः ।

Digitized by Google

एतत्कृतं बीजगणितं च भास्करीयबीजच्छायानुरूपमुपलभ्यते "यत्र सरूपके वर्णकृती तु यत्रे"ति भास्करीयबीजगणितसूत्रस्य खण्डनं कृतं ज्ञानराजेन ।

गणेशः । १४२६

अस्य पिता गुरुश्च केशवो माता लक्ष्मीनाम्नी । भारतवर्षेऽयं गणेशो गणेशावतार इति कथ्यते । अयं त्रयोदशवर्षसमवयसि ग्रहलाघवाख्यं करणमकरोत् इति चिराज्जनश्रुतिः । ग्रहलाघवस्य समयश्च ग्रहलाघवीयाहर्गणानयनात् "द्व्यब्धीन्द्रोनितशक" इत्यस्माद्युग्मवेद-पुरन्दर १४४२ शकस्तेन गणेशजन्मशकश्च नवाक्षिशक्र १४२९ समः समायाति । अयं गणिते चात्यन्तप्रवीणः । कल्पादेरहर्गणस्य खण्डत्रयं कृत्वा ग्रहसाधनमित्यस्य ग्रहलाघवे कल्पना वस्तुत आदरणीया सर्वगणकमान्या पूर्वाचार्यास्पृष्टा प्रकटयति पाण्डित्यं ज्योतिर्विदुरस्य गणेशस्य ।

विश्वनाथकृतग्रहलाघवोदाहरणादौ विश्वनाथस्य

"गणेशदैवज्ञेन ये ग्रन्थाः कृतास्ते तद्भ्रातृपुत्रेण नृसिंहज्योतिर्विदा स्वकृतग्रहलाघवटीकायां श्लोकद्वयेन निबद्धास्तद्यथा

कृत्वादौ ग्रहलाघवं लघुबृहत्तिथ्यादिचिन्तामणिं
सत्सिद्धान्तशिरोमणेश्च विवृतिं लीलावतीव्याकृतिम् ।
श्रीवृन्दावनटीकिकां च विवृतिं मौहूर्त्ततत्त्वस्य वै
सच्छ्राद्धादिविनिर्णयं सुविवृतिं छन्दोऽर्णवाख्यस्य वै ॥
सुधीरञ्जनं तर्जनीयन्त्रकं च सुकृष्णाष्टमीनिर्णयं होलिकायाः ।
लघूपाययातांस्तथान्यानपूर्वान् गणेशो गुरुर्ब्रह्मनिर्वाणमापत्" ॥

इति लेखेन गणेशेन ग्रहलाघवम् । लघुतिथिचिन्तामणिः । बृहत्तिथिचिन्तामणिः । सिद्धान्तशिरोमणिटीका । लीलावतीटीका । विवाहवृन्दावनटीका । मुहूर्त्ततत्त्वटीका । श्राद्धादिनिर्णयः । छन्दोऽर्णवटीका । सुधीरञ्जनी । तर्जनीयन्त्रम् । कृष्णजन्माष्टमीनिर्णयः । होलिकानिर्णयः । इत्यादयो ग्रन्था विरचिताः । ग्रहलाघवलघुतिथिचिन्तामणिबृहत्तिथिचिन्तामणिलीलावतीविवाहवृन्दावनमुहूर्त्ततत्त्वटीका एते ग्रन्थाः प्रसिद्धास्तेषु ग्रहलाघवमेव सर्वज्योतिर्विद्भिरादृतं लिखितं मुद्रितं च प्रायः सर्वत्रैव शोभते यत्र बहूनां प्रगल्भगणकानां च चमत्कृतवासनामण्डिता विवृत-

यश्च राजन्ति । अन्ये ग्रन्था बहुनाऽऽयासेनोपलभ्यन्ते । एतत्कृता लीलावतीटीका बुद्धिविलासिनीति कथ्यते ।

ग्रहलाघवे सर्वे विधयो ज्याचापकर्म विनैव लिखिताः सन्ति । तदन्ते ।

पूर्वे प्रौढतराः क्वचित्किमपि यच्चक्रुर्धनुर्ज्ये विना
ते तेनैव महातिगर्वकुभृदुच्छृङ्गेऽधिरोहन्ति हि ।
सिद्धान्तोक्तमिहाखिलं लघु कृतं हित्वा धनुर्ज्ये मया
तद्गर्वो मयि मास्तु किं न यदहं तच्छास्त्रतो वृद्धधीः ॥
नन्दिग्राम इहापरान्तविषये शिष्यादिगीतस्तुति-
र्योऽभूत् कौशिकवंशजः सकलसच्छास्त्रार्थवित् केशवः ।
सूनुस्तस्य तदंघ्रिपद्मभजनाल्लब्धाऽवबोधांशकं
स्पष्टं वृत्तविचित्रमल्पकरणं चैतद्गणेशोऽकरोत् ॥

भास्कराचार्येण निजकृतकरणकुतूहले छायासाधनं ज्याचापकर्मान्तरा कृतं तदर्थमात्मप्रशंसा च "इति कृतं लघुकार्म्मुकशिञ्जिनीग्रहणकर्म्म विना द्युतिसाधनम्" इत्यनेन कृता तदर्थं "पूर्वे प्रौढतरा" इत्यादि विलिखति गणेशः । पूर्वश्लोके "तद्गर्वो मयि मास्तु" इत्यनेनायमतिसज्जनोऽभिमानशून्य इति प्रतिभाति । ग्रहलाघवादौ यद्यपि ग्रहलाघवाख्यस्वकृतकरणप्रशंसायां द्वितीयश्लोके ।

"परिभग्नसमेर्विकेशचापं दृढगुणहारलसत् सुवृत्तबाहु ।
सुफलप्रदमाशुनृप्रभं तत्स्मर रामं करणं च विष्णुरूपम्" ॥

इत्यस्मिन् स्वकरणं दृढगुणहारलसदित्यवोचद्गणेशः । अर्थादस्मिन् करणे गुणहारौ दृढावनपवर्त्त्यौ स्त इति प्रतिज्ञा कृता गणेशेन तथापि तस्या भङ्गश्च स्पष्टाधिकारस्याष्टादशश्लोके ।

"वक्रोदयादिगदितांशकतोऽधिकाल्पाः
केन्द्रांशकाः क्षितिसुताद् द्विगुणास्त्रिभक्ताः ।
साङ्कांशका दशहताङ्गहृताः कुभक्ता
वक्राग्रमाप्तदिवसैः क्रमशो गतेष्यम्" ॥

इत्यस्मिन् "दशहताङ्गहृता इत्यत्र भवति यतोऽत्र द्वाभ्यामपवर्त्तनप्रसङ्गः ।

Digitized by Google

मुहूर्त्ततत्त्वटीकादौ ।

श्रीमत्स्यध्वजताललक्ष्मसहितं विद्याधरैः सेवितं
लक्ष्मीसच्छयलालितं विधिपुरोगाराधितं सिद्धये ।
यद्भ्रष्टाम्बु सुदुर्लभं सुमनसामप्याशरवाकरं
वन्देऽभीप्सितकामदं निजगुरुश्रीकेशवाङ्घ्र्यम्बुजम् ॥

एवं ३-४ श्लोकौ

तत्रैतद्धि मुहूर्त्ततत्त्वममलं संक्षिप्तगूढाक्षरं
गूढार्थं निखिलार्थमर्थबहुलं हेलावगम्यं विदाम् ।
मन्दानां त्वतिदुर्गमं खलु ततस्तेषां सुबोधो यथा
नानाशास्त्रविशेषयुक्तिबहुलां तद्व्याकृतिं प्रारभे ॥

तत्सूनुर्निजपितृसद्गुरुप्रसादात्सम्प्राप्तस्मृतिमुखसर्वशास्त्रबोधः ।
गर्गाद्यागमचयदर्शनाद्गणेशः पश्यन्तु त्विह सुजनाः सुकौशलं मे ॥

अत्र प्रथमः श्लोकोऽर्थद्वयवाची विष्णुपक्षे गणेशदैवज्ञपितृकेशवपक्षे च । तदर्थद्वयं तत्रैव स्वयं टीकाकृता गणेशेन व्याख्यातम् ।

एवं विवाहवृन्दावनटीकादिश्लोकाः ।

तीर्थानामधिपः कुभृच्छ्रितपदोऽसंत्यक्तवेलास्थिति-
र्यत्पर्याप्तकलद्विजाधिपसमीचाप्तोरुमुत्प्रभृत् ।
लक्ष्मीशोऽखिलदानवारिसततप्रक्षिप्तसद्वृत्ति-
र्घोषध्वस्तमलो जयत्युरुकृपासिंधुर्गुरुः केशवः ॥
अयमर्थचतुष्टयवाची गुरुपक्षे विष्णुपक्षे समुद्रपक्षे सूर्यपक्षे च ।
अर्थचतुष्टयरूपं व्याख्यानं च तत्रैव कृतं स्वयं टीकाकृता ॥

तत्रैव पञ्चमश्लोके विवाहवृन्दावनटीकाप्राक्स्वकृतयश्च कथितास्तद्यथा ।

कृत्वादौ ग्रहलाघवाख्यकरणं तिथ्यादिसिद्धिद्वयं
श्लोकैः श्राद्धविधिं सवासनतया लीलावतीव्याकृतिम् ।
सप्रक्षेपमुहूर्त्ततत्त्वविवृतिं पर्वादिसन्निर्णयं
तस्मान्मङ्गलनिर्णयाद्यथ कृता वैवाहसद्दीपिका ॥

तदन्ते ।

पश्चात्सागरकूलवर्त्तितटगे ग्रामेऽत्र नन्द्यादिमे
रम्भापूगरसालशीर्षनिचुलच्छायावितानेवसन् ।

नानाशास्त्रकलाकलापचतुरः श्रीकेशवोऽस्यात्मज-
ष्टीकां युक्तिमतीं गणेशविबुधो वृन्दावनस्याऽकरोत् ॥
रसनगमनु १४७६ तुल्ये शाके आनन्दवर्षे
विवृतिमकृत शस्तां दीपिकाख्यां गणेशः ।
यदिह लिखितमल्पानल्पकं वा सदोषं
तदतिविमलधीभिः शोध्यमित्यर्थये तान् ॥

पूर्वश्लोकाः प्रकटयन्ति काव्यसाहित्यपाटवं ग्रन्थकृतोऽन्तिमश्च विवाहवृन्दावनटीकासमयं च रससप्तशक्र १४७६ समशकम् ।

बुद्धिविलासिनीसमयः सप्ताङ्गशक्र १४६७ शकस्तत्र प्रत्यध्यायसमाप्तौ चैकैकः श्लोकः ।

यथा परिकर्म्माष्टकसमाप्तौ ।

ज्योतिर्वित्कुलमण्डनो द्विजपतिः श्रीकेशवोऽजीजन-
द्यं लक्ष्मीश्च समस्तशास्त्रनिपुणं श्रीमद्गणेशाभिधम् ।
अस्यां बुद्धिविलासिनीसमभिधे लीलावतीव्याकृतौ
तत्कृत्यां परिकर्म्मणां निरगमत् प्रस्पष्टमत्राष्टकम् ॥

बुद्धिविलासिन्यां कमलतुरिकादिबन्धेन निजकाव्यसाहित्यपाटवं बहुत्र प्रकाशितं ग्रन्थकृता ।

यथाऽऽदौ द्वितीयश्लोकेनाष्टदलकमलबन्धरूपेण महादेववर्णनम् ।



शरजाव हरानीश
शनीरासुरधामश ।
शमधामाव पापाश
शपापाहृद्विजारश ॥

Digitized by Google

हे हर । भव । रक्ष । अस्मान् । इति शेष । किं भूत । शरजाव । शराज्जायते शरजः कार्त्तिकेयस्तं अवति रक्षतीति शरजावस्तत्सम्बोधने । अनीश । न ईशो यस्य तत्सम्बोधने । शनीर । शनिं शनिपीडामीरयति नाशयति यस्तत्सम्बोधने । असुरधामश । असुराणां धाम । असुरधाम । तत् श्यति नाशयति (शो तनूकरणे—इति धातोः) यस्तत्सम्बोधने । शमस्य शान्तेर्धाम गृहं यत् तत्सम्बोधने शमधाम । पापमश्नाति भक्षयति यस्तत्सम्बोधने पापाश । शपन्ति ये ते शपा दुष्टास्तान् न पाति यस्तत्सम्बोधने शपाप । आसमन्ताद्भावेन हृदिजायत असौ हृदिजः कामस्तं । अरमत्यर्थं श्यति नाशयति यस्तत्सम्बोधने आहृदिजारश ।

एवं परिकर्म्माष्टकसमाप्त्यनन्तरं छुरिकाबन्धेन रामवर्णनम् ।



चिन्तये तव तत्त्वाय राम रामपदं पदम् ।
यत्प्रकीर्णाघदलनं नन्तव्य जगदाश्रय ॥

नन्तव्य नमनयोग्य शेषं स्पष्टम् ।

अन्यकरणे कारणं बृहत्तिथिचिन्तामणौ लिखितं गणेशदैवज्ञेन तद्यथा

ब्रह्माचार्यवसिष्ठकश्यपमुखैर्यत् खेटकर्म्मोदितं
तत् तत्कालजमेव तथ्यमथ तद्दूरितणोऽभूच्छ्लयम् ।
प्राप्याऽतोऽथ मयासुरः कृतयुगान्तेऽर्कात् स्फुटं तोषितात् ।
तच्चास्ति स्म कलौ तु सान्तरमथाऽभूच्चाह पाराशरम् ॥

Digitized by Google

तज्ज्ञात्वार्यभटः खिलं बहुतिथे कालेऽकरोत् प्रस्फुटम् ।
तत् स्रस्तं किल दुर्गसिंहमिहिराद्यैस्तन्निबद्धं स्फुटम् ॥
तच्चाभूच्छिथिलं तु जिष्णुतनयेनाकारि वेधात् स्फुटम् ।
ब्रह्मेणाश्रयाश्रितमेतदप्यथ बहौ कालेऽभवत् सान्तरम् ॥

श्रीकेशवः स्फुटतरं कृतवान् हि सौरा-
र्यासवमेतदपि षष्टिमिते गतेऽब्दे ।
दृष्ट्वा श्लथं किमपि तत्तनयो गणेशः
स्पष्टं यथा ह्यकृत दृग्गणितैक्यमत्र ॥
कथमपि यदिदं चेद्दूरकाले श्लथं स्या-
न्मुहुरपि परिलक्ष्येन्दुग्रहाद्यूतियोगम् ।
सदमलगुरुतुल्यप्राप्तबुद्धिप्रकाशैः
कथितसदुपपत्त्या शुद्धिकेन्द्रे प्रचाल्ये ॥

वराहमिहिरेण पञ्चसिद्धान्तिकायां पौलिशरोमकवासिष्ठसौरपैतामहसिद्धान्तानां मतं प्रकाशितं तत्रापि सूर्यस्य मतं सर्वेभ्यः श्रेष्ठतममिति स्वीकृतं वेधेन किमपि नूतनं संस्कारान्तरं नाऽऽनीतमेतत्सर्वमज्ञात्वैव गणेशदैवज्ञेन यत्प्रपञ्चितं तदात्मप्रशंसारूपमिति स्फुटमेव निष्पक्षपातिनां तत्त्वग्राहिणां विदुषामये ।

अनन्तदैवज्ञः । (१४४७)

अयं श्रीकान्तस्यार्थात् हरेः पुत्रः सप्तवेदवेदचन्द्रमिते १४४७ शके सूर्यसिद्धान्तानुसारिणीं पञ्चाङ्गनिर्माणोपयोगिध्रुवाङ्कमण्डितामनन्तसुधारसनाम्नीं सारणीमकार्षीत् । प्राचीनज्योतिर्विद्गृहे काठिन्येनेयं सारणी प्राप्यते । काशिकराजकीयपुस्तकालयेऽपि चरमखण्डितास्या एका प्रतिरस्ति । अस्या आदौ ।

ढुण्ढिविनायकचरणद्वन्द्वं मुदमादधन् नत्वा ।
सूत्त्यानन्तरसाख्यं तनुते श्रीकान्तजोऽनन्तः ॥

अस्य मूलग्रामादिस्थितिर्नारायणदैवज्ञस्य मुहूर्त्तमार्त्तण्डरचयितुर्वर्णने विलोकनीया । अन्याऽस्यानन्तस्य कृतिरस्माभिर्न दृष्टा । मुहूर्त्तमार्त्तण्डस्थलेखानुसारेणानन्तस्य पिता हरिः । अत्र च श्रीकान्त इति लिखितस्तच्च छन्दोभङ्गभियाऽत्तरमैत्र्या च हरेर्नामान्तरं श्रीकान्त इति

ल्लिखितमनन्तेनेत्यनुमीयते पितापुत्रयोर्द्वयोः समुचितसमयप्रदर्शनात् ।

अनन्तदैवज्ञो द्वितीयः । १४५९

अयं विदर्भदेशान्तर्गतधर्म्मपुरनिवासी चिन्तामणिदैवज्ञतनूजो नीलकण्ठरामदैवज्ञयोः पिताऽऽसीत् । नीलकण्ठरामदैवज्ञयोर्लेखानुसारेणाऽस्यैका कृतिर्जातकपद्धतिरन्या कामधेनुगणितटीकेति कृतिद्वयं ज्ञायते परन्त्वेतत्कृतिद्वयमस्मद्दृष्टिगोचरीभूतमद्यावधि न जातम् । गोविन्ददैवज्ञेन पीयूषधाराख्यमुहूर्त्तचिन्तामणिटीकाकृता मुहूर्त्तचिन्तामणिग्रन्थान्तिमाध्यायाष्टमश्लोकटीकायां "उत्तमकामधेनुगणिते उत्तममल्पक्लेशेन ब्रह्मार्यभटपक्षीयपञ्चाङ्गानयनप्रतिपादकं यत्कामधेनुनामकं गणितशास्त्रं तत्र टीकां तदभिप्रायविवृतिमकार्षीदि"ति विलिखितम् । अनन्तदैवज्ञतनूजेन नीलकण्ठेन यदा नवखपञ्चेन्दु १५०९ शके नीलकण्ठी रचिता तदाऽनन्तो वर्त्तमान आसीत् (नीलकण्ठदैवज्ञवर्णनं विलोक्यम्) तस्मिन् समये यद्यस्यावस्था पञ्चाशद्वर्षमिता कल्प्या तदास्य जन्मशकः १४५९ एतन्मितः समायाति (अत्र रामदैवज्ञवर्णनं च विलोक्यम्) कामधेन्वर्थं बोपदेवसुतमहादेववर्णनं विलोक्यम् ।

विष्णुदैवज्ञः । १४७८

अयं दिवाकरस्य पुत्रः कृष्णदैवज्ञस्यानुजः सौरपक्षीयं करणं खरामपञ्चेन्दुशके १५३० कृतवान् । तदुदाहरणं च तद्भ्राता विश्वनाथसंज्ञकः पञ्चवेदशरभूमिते १५४५ शके समकरोत् ।

एतत् करणमस्मद्दृष्टिगोचरीभूतं न । तदुदाहरणं चास्माभिर्दृष्टं तदादौ ।

> यः समस्तजननित्यपूजितस्तं प्रणम्य गणनायकं मुदा ।
> सौरपक्षगणितं विरच्यते विश्वनाथविबुधेन सन्मतम् ॥

अन्ते च ।

> गोदातीरासन्नगोलग्रामवासी द्विजोत्तमः ।
> दिवाकराख्यगणकस्तत्पुत्रेण विनिर्मितम् ॥
> गणितं विश्वनाथेन दैवज्ञेन सुखप्रदे ।
> विष्णुभ्रातृकृतग्रन्थे सूर्यपक्षसहोदरे ॥

यदि तर्हि समाह्रियतइति समाहार इति कर्मसाधनः समाहारशब्द-स्तदाऽपेक्षितपरस्पराः पञ्चपूलाः समासार्थ इति बहुवचनप्रसङ्गेऽतिदेश आरभ्यते, तदाह, प्रत्यधिकरणं वचनोत्पत्तेः संख्यासामानाधिकरण्याच्च द्विगोरेकवचनविधानमिति, अधिकरणं द्रव्यं, संख्यावाची पञ्चादिशब्दः, यत्संख्याविशिष्टं द्रव्यमभिधीयते तदभिधानयोग्यं वचनमुत्पद्यते पञ्चपूलीशब्देन पञ्चपूलाः समाह्रियमाणा उच्यन्तेऽतः समासार्थस्य पञ्चादिभिः सामानाधिकरण्याद् द्विवचनबहुवचनप्रसङ्गे एकवचनं विधीयतइत्यर्थः, संख्यासामानाधिकरण्यादित्यनेन कर्मसाधनत्वं समाहारशब्दस्य दर्शयति, भावसाधने तु वैयधिकरण्यं पञ्चानां पूलानाम् । न वा समाहारैकत्वादिति, अयमर्थः, तिरोहितावयवभेदः समूहरूपः समाहारो द्विगवर्थस्तस्यैकत्वाद्वनादिवदेकवचनसिद्धेर्नात्र सूत्रेण प्रयोजनम्, अवश्यं च तद् भावसाधनः समाहार आश्रयणीयः, अन्यथा पञ्चानां खट्वानां समाहारः पञ्चखट्वीत्यत्र वा टाबन्त इति स्त्रीत्वपक्षे खट्वाशब्दस्यानुपसर्जनत्वाद् ह्रस्वो न स्यात्, अनुपसर्जनत्वं चाप्रथमानिर्दिष्टत्वादनेकविभक्तित्वाच्च, भावसाधने तु पञ्चानां खट्वानां समाहारः, समाहारं समाहारेणेति समासार्थस्य नानाविभक्तियोगेपि खट्वाशब्दस्य नित्यं षष्ठ्यन्तत्वादेकविभक्ति चेत्युपसर्जनत्वाद् ह्रस्वत्वं सिध्यति, एकवचनमित्येतत्तूत्तरार्थं कर्त्तव्यमेव । 'पञ्चपूलीति' । 'अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत' इति स्त्रीलिङ्गत्वाद् 'द्विगो' रिति ङीप् ॥

"द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" ॥ इह यस्य द्वन्द्वस्य कश्चिदवयवः प्राण्यङ्गवाची कश्चित्तूर्याङ्गवाची कश्चित्सेनाङ्गवाची यथा पाणिमार्दङ्गिकाश्वारोहा इति स व्यतिकीर्णावयवोपि प्राण्यङ्गादीनां द्वन्द्वो भवत्येवेत्येकवद्भावः प्राप्नोति तत्राह । 'अङ्गशब्दस्येत्यादि' । ननु पूर्वपक्षेपि प्रत्येकमेव परिसमाप्तिरङ्गशब्दस्य नहि प्राणितूर्यसेनानामेकमङ्गं सम्भवति, एवं तर्ह्यङ्गानामेव रूपस्य बहुवचनान्तस्य सतोऽङ्गशब्दस्य प्रत्येकं सम्बन्धो न तु प्रत्येकपरिसमाप्तस्य पश्चाद्बहुवचनसंबन्धः । 'त्रीणि वाक्यानि संपद्यन्तइति' । सूत्रं तु तेषामेव महदेकवाक्यमिति

भावः। तत्र प्रथमेन वाक्येन प्राण्यङ्गानां प्राण्यङ्गैरेव द्वन्द्वः कृतस्त- स्यैकवद्भावो विधीयते द्वितीयेन तूर्याङ्गानां तूर्याङ्गैरेव तृतीयेन सेना- ङ्गानां सेनाङ्गैरेवेति न संकरप्रसङ्गः, तथा तूर्याङ्गानामिति द्वन्द्व एकव- द्भवतीत्यपेक्षते, अत्राङ्गशब्द उपकारकवचनः पूर्वत्रोत्तरत्र चावयववचनः सेनाङ्गानां चेति पूर्ववदपेक्षा। 'पाणिपादमिति'। अत्र 'जातिरप्रा- णिना' मित्येव सिद्धे व्यतिकरनिरासार्थं वचनम्। 'मार्दङ्गिकपाणवि- कमिति'। 'शिल्प' मिति ठक्,। 'वीणावादकेति'। 'नित्यं क्रीडा- जीविकयो' रिति समासः, विपञ्ची परिवादिनी तज्जीविकः परिवा- दकः। पणवमृदङ्गमित्यादौ तु 'जातिरप्राणिना' मित्येव सिद्धम्। 'रथि- काश्वारोहमिति'। कथं रथवाजिपत्तिकरिणीसमाकुलमिति, यावतैक- वद्भावे सति नपुंसकह्रस्वत्वेन भाव्यं, निरङ्कुशाः कवयः, रथवाजिपत्ति- सहिताः करिण्यो रथवाजिपत्तिकरिण्यस्ताभिः समाकुलमिति वा सम- र्थनीयम्। द्वन्द्वश्चेत्यारभ्य 'विभाषा समीप' इत्यन्तस्य प्रकरणस्यानार- म्भणीयतां शङ्कते। 'इतरेतरयोगइत्यादि'। 'सिद्धमेवैकवचनमिति'। ततश्चानारम्भणीयं प्रकरणमिति भावः। परिहरति। 'इदं त्विति'। कः पुनरसौ विषयविभाग इत्याह। 'प्राण्यङ्गादीनामिति'। कथं पुनः प्राण्यङ्गादीनां द्वन्द्व एकवचनो भवतीत्यस्य वचनस्य प्राण्यङ्गादीनां समाहार एवेत्यर्थो भवतीति, वचनव्यक्तिभेदात्, एवं ह्यत्र वचनं व्यज्यते य एकवचनो द्वन्द्वः स एषां भवतीति न पुनः प्राण्यङ्गादीनां यो द्वन्द्व इत्य- नूद्य तस्यैकवचनता विधीयते, एकवचनान्तश्च द्वन्द्वः समाहारद्वन्द्वः स प्राण्यङ्गादीनामपि 'चार्थे द्वन्द्व' इत्येव सिद्ध इति स एवैषामिति नियमः संपद्यते, दधिपयआदिष्वपि येषां ब्रह्मप्रजापत्यादीनामनेन प्रकरणेन नियमस्याप्राप्तिस्तेषां ताव 'च्चार्थे द्वन्द्व' इत्यनेन प्राप्तो द्वन्द्वः प्रतिषिध्यते य एकवचनो द्वन्द्वः स एषां न भवतीति वचनव्यक्त्याश्रयेण येषामपि दधिपयसी इत्यादीनां 'जातिरप्राणिना' मिति नियमस्य प्राप्तिस्तेषाम- नन्तरस्य विधिर्वा भवति प्रतिषेधो वेति यद्यपि नियमस्य प्रतिषेधो युक्तस्तथापि ब्रह्मप्रजापत्यादिभिः साहचर्यादेकवचनो द्वन्द्व इत्येताव-

न्मात्रस्यापेक्षणात्समाहारद्वन्द्व एव प्रतिषिध्यते न नियमः, वृत्ताविवि-भाषाप्रयोजनं तु तत्रैव वक्ष्यामः । अथैवं कस्मान्न विज्ञायते इतरेतर-योगपक्षे ऽप्राप्त एकवद्भावो विधीयत इति । उच्यते । यदीतरेतरयोग-विहितद्वन्द्वस्यैकवद्भावो विधीयेत द्वन्द्वाच्चुदषहान्तेत्यादिना समाहार-निबन्धनं कार्यं न स्याद् दधिपयआदिषु तु यस्य द्वन्द्वस्यैकवचनप्राप्ति-स्तस्य प्रतिषिध्येतेति समाहारद्वन्द्वस्यैकवचनतायां प्रतिषिद्धायामपि द्वि-त्वबहुत्वाभावाद् द्विवचनबहुवचने न स्यातामतो नियम एवाङ्गीकर्त्तव्यः, अत्र च व्याख्यानमेव शरणम्, अथ नियमेऽपि भवन्नेवमेव कस्माद्भवति प्रा-ण्यङ्गादीनां समाहार एवेति न पुनः प्राण्यङ्गादीनामेव समाहार इति, उच्यते । एवं हि विज्ञायमाने दधिपयआदिषु येषामनेन प्रकरणेन नियमो न प्राप्नोति तेषु प्रतिषेधोनर्थकः स्यात्, तिष्यपुनर्वस्वोरिति बहुवचन-ग्रहणमनर्थकं स्यात् तद्धितसमाहारद्वन्द्वपक्षे तिष्यपुनर्वस्विदमित्यत्रैकव-चनस्य प्रसङ्गे द्विवचनं माभूदित्येवमर्थं, यदि च त्वदुक्तो नियमः स्यात्तिष्य-पुनर्वस्वोरत्र प्रकरणे ऽसङ्कीर्त्तितयोः समाहारद्वन्द्वाभावादनर्थकं तत्स्यात्, अतो वृत्तिकारोक्तमेव नियमस्वरूपमिति निरवद्यम् ॥

“अनुवादे चरणानाम्” ॥ चरणशब्दः कठकालापादिषु शाखा-भेदेषु मुख्यस्तदध्यायिषु पुरुषेषु गौण उभयेषां चैषां ‘गोत्रञ्च चरणैः सहे’ति जातिसञ्ज्ञा तत्र शाखाभेदवाचिनो ‘जातिरप्राणिना’मित्ये-कवद्भावस्य सिद्धत्वाद्गौणोऽपि पुरुषवृत्तिरेव गृह्यत इत्याह । ‘चरणशब्दः शाखानिमित्तक इति’ । शाखाध्ययननिमित्तक इत्यर्थः । गौण इति क्व चित्पठ्यते क्व चिन्न । ‘प्रमाणान्तरावगतस्येति’ । शब्दादन्यत्प्रमाणं प्रमा-णान्तरं प्रत्यक्षादि । ‘सङ्कीर्त्तनमात्रमिति’ । मात्रशब्दो ऽवगतिव्युदा-साय, नन्वर्थप्रतिपादनाय प्रयोगः स चेदर्थः प्रमाणान्तरेणावगतः किमिति शब्दः प्रयुज्यते, कार्यान्तरविधानार्थं, यदा हि कठकालापैरुदितेषु आवाभ्यां तत्र गन्तव्यमिति संवादः कृतो भवति स च विस्मृत्योदास्ते तदा तं प्रतीदमुच्यते नन्वदस्थात्कठकालापं किमास्यत इति । कठेन प्रोक्तमधीयते कठाः, वैशम्पायनान्तेवासित्वाण्णिनिः, ‘कठचरकाल्लुक्,’ कलापिशब्दा-

'स्कलापिनोण्' नान्तस्य टिलोपे सब्रह्मचारीत्यादिना टिलोपः, उभयत्राध्येतृणो लुक्, एतेन कौथुमो व्याख्यातः । 'यदा तु प्रथमत एव शब्दोपदेश इति'। प्रमाणान्तरेणानवगतस्य शब्देनाद्यं प्रत्यायनमित्यर्थः। 'उदगुरिति'। 'आत' इति झेर्जुस् 'उस्यपदान्ता' दिति पररूपत्वम्, अद्यतनीति लुङः पूर्वाचार्यसञ्ज्ञा। 'अनन्दिषुरिति'। टुनदि समृद्धौ, सिजभ्यस्तेति जुस् ।

"अध्वर्युक्रतुरनपुंसकम्" ॥ अध्वर्युशब्द ऋत्विग्विशेषे प्रसिद्धः, न च तेन क्रतोर्विशेषणमुपपद्यते नहि सोऽस्ति क्रतुर्यत्राध्वर्योरनन्वयः, नापि सोऽस्ति यत्राध्वर्योरेवान्वय इति मुख्यार्थासम्भवादौपचारिकग्रहणमित्याह। 'अध्वर्युवेद इति'। यजुर्वेद इत्यर्थः। तत्र ह्याध्वर्यवं विधीयते। 'कर्मस्वरूपस्येति'। कर्तव्यतायाः फलस्य चोपदेशे। विधानमध्वर्युक्रतुवाचिनां शब्दानामनपुंसकलिङ्गानामिति, कथं तर्हि सूत्रे सामानाधिकरण्यमित्याह । 'अध्वर्युक्रतुरिति'। तादृशावयवत्वाद् द्वन्द्व एव तथोक्त इत्यर्थः। यदि पुनरनपुंसकमित्यनेन मुख्यया वृत्त्या द्वन्द्व एवोच्येत तदा 'स नपुंसक' मित्यस्यायमपवादो विज्ञायेत न वाऽबाधेनोपपत्तौ सत्यां बाधो न्याय्यः, अर्कश्चाश्वमेधश्चार्काश्वमेधं, सायाह्नश्चातिरात्रश्च सायाह्नातिरात्रम्। 'इषुवज्रावित' । सामवेदे एषां विधानं, राजसूयवाजपेयशब्दावर्द्धर्चादिषु पठितौ ततस्तौ नपुंसकलिङ्गौ प्रत्युदाहरणम् ।

"अध्ययनतोऽविप्रकृष्टाख्यानाम्" ॥ 'आख्यायतेऽनेनेत्याख्येति'। शब्दमात्रमिहाख्याशब्देनोच्यते न रूढिशब्द एव, असंदेहार्थं विप्रकृष्टाख्यानामध्ययनत इत्यकरणादविप्रकृष्टेति पदच्छेदः, आख्यानञ्च न स्वरूपेणाविप्रकर्षः किं तु प्रवृत्तिनिमित्तद्वारेण तच्चेहाध्ययनं तदाह । 'अध्ययनत इति'। अधीतिरध्ययनम् अध्ययनेनाध्ययनतः, आद्यादित्वात्तसिः, प्रवृत्तिनिमित्तभूतस्याध्ययनस्याविप्रकृष्टत्वात्तद्द्वारेणाविप्रकृष्टा आख्या येषां तेऽध्ययनतोऽविप्रकृष्टाख्याः, एतदेवाह। 'अध्ययनेन निमित्तेनेत्यादि'। 'पदकक्रमकमिति'। पदान्यधीते पदकः, 'क्रमादिभ्यो वुन्,' एवं

Digitized by Google

क्रमकः, वृत्तिः संहिता तामधीते वार्त्तिकः, उक्थादित्वाट्ठक्, अत्र प्रवृत्तिनिमित्तस्याध्ययनस्याविप्रकर्षं दर्शयति । 'संपाठ इति' । संपठनं संपाठः, अध्ययनमित्यर्थः, । 'प्रत्यासन्न इति' । पदान्यधीत्य क्रमो ऽध्येतव्य इति कृत्वा, एवं क्रमकवार्त्तिकमित्यत्रापि, नानधीत्य संहितां क्रमोऽध्येतुं शक्य इति प्रत्यासत्तिर्विज्ञेया ॥

“जातिरप्राणिनाम्” ॥ जातिवाच्यवयवत्वाज्जातिद्वन्द्व इति गौणो निर्देशः । 'आराशस्त्रीति' । आरा प्रतोदः । 'धानाशष्कुलीति' । भक्ष्याणां रसानां कुलं शष्कुली गौरादिपाठाद्रूपसिद्धिः । 'नन्दकपाञ्चजन्याविति' । सञ्ज्ञाशब्दावेतौ, खड्गोऽस्य नन्दकः शङ्खः पाञ्चजन्यः प्रकीर्त्तितः । 'जातिपरत्वे चेति' । जातिप्राधान्य इत्यर्थः । 'न नियतद्रव्यविवक्षायामिति' । यदा क्व चिद्देशादौ नियतानां द्रव्यविशेषाणां विवक्षा तदा जातिशब्दत्वेऽप्येकवद्भावो न भवतीत्यर्थः । 'बदरामलकानीति' । फलजातिवाचिनावेतौ ॥

“विशिष्टलिङ्गो नदी देशोऽग्रामाः” ॥ विशिष्टलिङ्गानामित्यस्य विवरणं भिन्नलिङ्गानामिति, विपूर्वः शिषिर्भिदिना समानार्थः, तथा च भेदकं विशेषणं भेद्यं विशेष्यमित्युच्यते तेन नञ्विशिष्टेनेत्यत्रापि भेदद्वारेणैवाधिक्यमर्थो व्याख्यातः, यस्य हि नञ् भेदकः स नञाधिको भवति । 'नदीवाचिनामित्यादि' । कथं तर्हि सूत्रे विशिष्टलिङ्गादिशब्दानां द्वन्द्वेन समानाधिकरण्यमित्याह । 'नद्यवयव इत्यादिना' । अग्रामावयवोऽग्राम इत्यपि द्रष्टव्यम्, अग्राम इति चैकवचनस्थाने बहुवचनम् । 'असमासनिर्देश एवायमिति' । समासे हि व्यतिकीर्णावयवो द्वन्द्व एकवत्स्यात्, 'गङ्गाशुक्तेचे इति' । समासो हि भवन्नितरेतरयोगे चेद् द्विवचनप्रसङ्गः, समाहारे चेन्नपुंसकत्वप्रसङ्ग इति भावः । 'उध्येरावतीति' । उज्झ उत्सर्गे, 'भिद्योध्यौ नदे' । 'देशः खल्वपीति' । उदाह्रियत इति शेषः । 'जाम्बवशालूकिन्याविति' । जाम्बवं नगरं शालूकिनी ग्रामः, तत्रोभयतश्च ग्रामाग्रामाविति प्रतिषेध एव भवति ग्रामोभयावयवस्तु द्वन्द्वो नोदाहृतः । 'जनपदो हि देश इति' । जना यत्र सञ्चरन्ति स देश इत्यर्थः । अवश्यं

जनपदो देश इत्यङ्गीकर्तव्यमित्याह । 'तथा चेति'। ग्रामे नाऽन्येषम् । अभक्ष्या ग्रामकुक्कुटा इत्यादौ। ग्रामग्रहणेन नगरमपि गृह्यते तद्बुद्धिहापि नगरावयवस्यापि द्वन्द्वस्यात्र प्रतिषेधः स्यात्, ज्ञापकात्सिद्धं, यदयं 'प्राचां ग्रामनगराणा'मिति ग्रामग्रहणे नगरग्रहणं करोति तज्ज्ञापयति इह शास्त्रे ग्रामग्रहणे न नगरं गृह्यतइति, नैतत्सुष्ठूच्यते वक्ष्यति हि तत्र ग्रामत्वादेव सिद्धे नगरग्रहणं प्रवृत्तिभेदज्ञापनार्थं ग्रामग्रहणमङ्गविशेषणं पूर्वेषुकामशमी, नगरग्रहणं तूत्तरपदविशेषणं पूर्वपाटलिपुत्रक इति, वाहीकग्रामेभ्यश्च उदीच्यग्रामाच्चेत्यादौ ग्रामग्रहणेन नगरग्रहणं न स्यात्तस्मादाह । 'ग्राम इत्यत्र नगरप्रतिषेध इति'। ग्रामाश्रयस्य प्रतिषेधस्य प्रतिषेध इत्यर्थः । 'उभयतश्चेति'। ग्रामनगरात्मके उभयस्मिन्सति ग्रामाश्रयः प्रतिषेध एव वक्तव्यो न पुनर्नगराश्रयः प्रतिषेध इत्यर्थः ॥

"क्षुद्रजन्तवः" ॥ क्षुद्रशब्दोऽयमस्त्येव कृपणे क्षुद्रोऽयं पुरुष इति, अस्त्यङ्गहीने शीलहीने च 'क्षुद्राभ्यो वे'ति, अस्ति परिमाणापचये क्षुद्रास्तन्दुलाइति, इह तु जन्तुशब्दसमभिव्याहारादन्तिमस्य ग्रहणमित्याह । 'अपचितपरिमाणः क्षुद्र इति'। अल्पशरीर इत्यर्थः, अपचयस्यापेक्षिकत्वादनवस्था माभूदिति स्मृतिमुपन्यस्यति । 'क्षुद्रजन्तुरनस्थिः स्यादिति'। यस्यास्थीनि न विद्यन्ते सोऽनस्थिः, स्मृत्यन्तरमाह । 'अथ वेति'। क्षोत्तव्यः क्षुद्रः, अर्हार्थेपि स्फायितञ्चीत्यादिना रक् प्रत्ययः, यः क्षुद्यमानोऽपि न म्रियते यथा जलूका स क्षुद्रजन्तुः यस्तु म्रियते स पापनिमित्तत्वात्र क्षोदार्हः, क्षुद्र एव य इति व्युत्पत्तिवशादेवायं प्रसिद्ध इत्यर्थः। स्मृत्यन्तरमाह । 'शतं वेति'। प्रसृतिरञ्जलेरर्द्धं येषां शतं प्रसृतौ भवति शतेनार्द्धाञ्जलिः पूर्यतइत्यर्थः। स्मृत्यन्तरमाह । 'के चिदा नकुलादपीति'। नकुलपर्यन्ताः क्षुद्रजन्तव इत्यर्थः । 'इतरासान्तद्विरोधादिति'। अनन्त्यादिभिः स्मृतिभिर्ये प्रयोगा उपदर्शिता न ते सर्वे ताभिः संगृह्यन्तइत्ययमत्र विरोधः ॥

"येषां च विरोधः शाश्वतिकः" ॥ 'विरोधो वैरमिति'। न सहानवस्थानादिः, छायातपावित्यादावपि प्रसङ्गात्, पूर्वसूत्राच्चानु-

हृत्तेन जन्तुग्रहणेन विरोधस्य विशेषणात् जन्तूनां हि विरोधो वैरमेव भवति । ‘शाश्वतिको नित्य इति’ । शश्वदिति त्रैकाल्यमाह, ‘तत्र भव’ इति कालाट्ठञि तान्तादपि निपातनाट्टिकादेशः, अव्ययानां भमात्रे टिलोपाभावश्च, गोपालस्यापत्यानि गौपालयः, अत्र कादाचित्को विरोधः । ‘चकारः पुनरित्यादि’ । पशुशकुनिद्वन्द्वावकाशो महाजोरभ्रं महाजोरभ्राः हंसचक्रवाकं हंसचक्रवाकाः, विरोधिनामेकवद्भावस्यावकाशः अश्वमहिषं मार्जारमूषिकम् । अश्वमहिषं काकोलूकमित्यत्रोभयप्रसङ्गे परत्वात्पशुशकुनिविभाषा स्यात्, चकारादयमेव भवति ॥

“शूद्राणामनिरवसितानाम्” ॥ शूद्रशब्दोऽत्र त्रैवर्णिकव्यतिरिक्त-जातिमात्रवचनो न वृषलपर्यायः, निरवसितप्रतिषेधात् । ‘निरवसित-इति’ । निरवपूर्वात्स्यतेः कर्मणि क्तः, तत्र प्रकृत्यर्थमाह । ‘निरवसानं बहि-ष्करणमिति’ । अनेकार्थत्वाद्धातूनामुपसर्गवशाद्वेति भावः । पात्राद्बहिष्कर-णमिह विवक्षितमित्याह । ‘यैरिति’ ‘संस्कारेणापीति’ । भस्मना शुध्यते कांस्यमित्यादिना स्मृतिकारैरुक्तेन न शुध्यति तेन तत्र भोक्तुं न लभन्त इति ततो बहिष्कृता भवन्ति ॥

“गवाश्वप्रभृतीनि च” ॥ द्वन्द्वरूपाणीत्यन्वयात्प्रभृतीनीति नपुं-सकोपपत्तिः, गवाश्वप्रभृतीनि कृतैकवद्भावान्येव पठ्यन्ते तेषामनेन साधु-त्वमात्रं विधीयते न त्वेकवद्भाव इत्याह । ‘गवाश्वप्रभृतीनीति’ । गवाश्वादीनां चतुर्णां पशुद्वन्द्वे विभाषायां प्राप्तायां वचनम्, एवमुष्ट्रखरम् उष्ट्रशशमिति दर्भशरादीनां तृणोलपपर्यन्तानां तृणद्वन्द्वे विभाषायां प्राप्तायां दासीदासादीनां ‘पुमान्स्त्रिया’ इत्येकशेषाभावोऽपि निपातनात्, शाटीपटीकमित्यादीनामप्राणिजातिवचनानामबहुप्रकृत्यर्थः पाठः, अन्येषां कुब्जवामनादीनामप्राप्ते वचनम् । ‘यथोच्चारितं द्वन्द्ववृत्तमिति’ । गणे यादृशाः कृतावग्रहादेशाः पठितास्तादृशानामेव द्वन्द्ववृत्तं द्वन्द्वकार्यमेक-वद्भावलक्षणं भवति । ‘रूपान्तरेष्विति’ । ‘अवङ् स्फोटायनस्ये’ति विकल्पितत्वात्तदा नास्ति तदेत्यर्थः । एतेन गणपाठे रूपमेषां विवक्षितं न पूर्वोत्तरपदनिर्देशमात्रे तात्पर्यमित्युक्तं भवति ॥

Digitized by Google

"विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्" ॥ अत्र वृक्षादिभिः प्रत्येकं द्वन्द्वो विशेष्यते न चैको वृक्षशब्दो द्वन्द्वः, न च द्वयोः सहप्रयोगः, एकशेषात्, न च पर्यायाणामपि सहप्रयोगः, 'विरूपाणामपि समानार्थाना'मेकशेषवचनात्, नापि विशेषेण सहप्रयोगोऽश्वत्थश्च धवश्चेति, वृक्षशब्देनैवाशेषविशेषाक्षेपाद्द्वयादिशब्दप्रयोगस्य निष्फलत्वात्, कथं तर्हि गोबलीवर्दावित्यादौ सामान्यविशेषयोः सहप्रयोगः, बलीवर्दशब्दसंनिधौ गोशब्दस्य स्त्रीगवीष्वेव वृत्तेर्द्वयोरपि विशेषवचनत्वादिति चेद् इहापि तर्हि धवपदसंनिधौ वृक्षशब्दस्य तद्व्यतिरिक्तविषयतया द्वन्द्वप्रसंगः, किं च वाक्येपि कथं सहप्रयोगः ब्राह्मणा आगता वसिष्ठोऽप्यागत इति, प्राधान्यख्यापनार्थमुक्तार्थस्यापि प्रयोग इति चेद् द्वन्द्वेपि तर्हि प्राप्नोति, तस्मादनभिधानमेवाश्रयणीयं, नहि वृक्षधवमिति लोकेऽभिधानमस्ति, अतो वृक्षविशेषवाचिनां ग्रहणम्, एवं मृगादिष्वपि द्रष्टव्यम्। 'इत्येतेषां द्वन्द्व इति'। एतेषामित्येकापि षष्ठी विषयभेदाद्भिद्यते, वृक्षादीञ्शकुनिपर्यन्तान्प्रत्यवयवषष्ठी अश्ववडवादीन् प्रति निर्द्धारणषष्ठी, येचाप्राणिनस्तेषां 'जातिरप्राणिना'मिति नित्यं समाहारद्वन्द्वे प्राप्त उभयत्र विधीयते यो विभाषाप्राप्तैकवचनो द्वन्द्वः स एषां भवतीति वचनव्यक्त्याश्रयणेन तेषामेव वृक्षादीनामन्यैः सह द्वन्द्वे यथाप्राप्तं नित्यो विकल्पितो वा एकवद्भावो भवति व्रीहिकुशप्लवमिति, जातिरप्राणिनामिति नित्यः, प्लवशब्दस्याशो इत्यपाद्द्रव्यवाचित्वा 'ज्जातिरप्राणिना' मित्यस्याप्रवृत्तौ 'चार्थे द्वन्द्व' इत्युभयत्र प्राप्तो भवति, पशुग्रहणं हस्त्यश्वादिषु परत्वात् सेनाङ्गलक्षणस्य नित्यविधेर्बाधनार्थं, मृगशकुनिग्रहणं किमर्थं, नह्येतेषामनेन प्रकरणेन नित्य एकवद्भावः प्राप्तो यद्बाधनाय विकल्पोऽभ्यनुज्ञायते, अन्यत्र प्राप्त्यभावादेषामुभयत्रैव द्वन्द्व इति नियमो न सम्भवति, अथैषामेवोभयत्र द्वन्द्व इति नियमः स्यात्, क तर्ह्येषां स्यात्, न क्वचिदिति चेत्, यद्येवं 'चार्थे द्वन्द्व' इति सामान्यलक्षणमनवकाशं स्यात् विशिष्टविधानमेव तदानीमाश्रयणीयं स्यात् पाण्यङ्गादीनां समाहारे दधिपयआदीनामित-

इतरेतरयोगे वृक्षादीनामुभयत्रेति, अथैषामेवोभयत्रेत्यनेनान्येषामुभयत्रापि द्वन्द्वो वार्यते, अन्यतरत्र तु भवत्येव, एवमपि क्वान्यत्रेति न ज्ञायते ‘सर्वो द्वन्द्वो विभाषयैकवद्भवती’ति चानुपपन्नं स्यात् । उच्यते । यत्तुल्यजातीयानामेवायं विकल्पस्तत्रैव नियमः प्रवर्त्तते मृगविशेषवाचिनां मृगविशेषवाचिभिरेवोभयत्र द्वन्द्वः, अन्यैस्तु सहान्यतरत्रेति, नन्वेवमपि न ज्ञायते क्वान्यतरत्रेति, स्यादेतदेवं यद्युभयत्रैषां द्वन्द्व इति श्रुतं स्याद् इह तु विभाषैकवचनो द्वन्द्व इति श्रूयते ततश्च यो विभाषाप्राप्त एकवचनो द्वन्द्वः स मृगविशेषवाचिनां मृगविशेषवाचिभिरेव नान्यैरिति वचनव्यक्तौ व्यक्तमेव ज्ञायते ऽन्यैः सहेतरेतरयोगद्वन्द्व इति, अथास्यां वचनव्यक्तौ विभाषाग्रहणं किमर्थं यावता विभाषैवैकवचनान्तो द्वन्द्वः प्राप्तस्तत्रैतावदेवास्तु य एकवचनो द्वन्द्वः स एषामेभिरेवेति । उच्यते । असति विभाषाग्रहणे वचनव्यक्त्यन्तरमपि सम्भाव्येत एषामेभिः सहैक-वचन एव द्वन्द्व इति यथा प्राण्यङ्गादिषु सति तु तस्य नियमस्यासम्भ-वादभिमतो नियमः संपद्यते, एवं पूर्वापरमधरोत्तरमित्यत्रापि नियमस्व-रूपं विज्ञेयं, पशुद्वन्द्व इत्येव सिद्धेऽश्ववडवग्रहणं प्रतिपदविधानार्थं तत्र प्रतिपदविधानादश्ववडवमित्येकवद्भावपक्षे ‘पूर्ववदश्ववडवा’वित्येत-द्बाधित्वा ‘स नपुंसक’ मित्येतदेव भवति, तच्छब्देन ह्येकवद्भावभाजं परामृश्य विधीयमानं नपुंसकत्वमेकवद्भाववदेव प्रतिपदविहितं भवति पूर्ववदश्ववडवावित्येतत्तु एकवद्भावाभावपक्षे प्रवर्त्तते अश्ववडवौ अश्व-वडवान् इति, एतदेवाभिप्रेत्य वृत्तिकारस्तत्र वक्ष्यति अश्ववडवयोर्विभा-षैकवद्भाव उक्त इत्यादि । ‘बहुप्रकृतिरिति’ । बहवो बहुत्वसंख्यायुक्ता वार्त्तपदार्थाः प्रकृतिः कारणं यस्य द्वन्द्वार्थस्य स बहुप्रकृतिः, तदर्थाभि-धायित्वाद् द्वन्द्वोपि बहुप्रकृतिः, नेदं स्वतन्त्रं लक्षणं स्वातन्त्र्ये नित्यं चेद्वनस्पत्यादीनामपि एतत्सूत्रविहितं विकल्पं बाधित्वा बहुप्रकृतित्वे नित्य एकवद्भावः स्याद् विकल्पे फलादीनामपि जातिरप्राणिनामित्या-दिलक्षणान्तरेण प्राप्तं नित्यमेकवद्भावं बाधित्वा बहुप्रकृतित्वे विकल्पः स्यात्, अतो लक्षणान्तरस्य शेषोयन्तत्रापि यदि विभाषा वृक्षेत्यत्र पठित-

Digitized by Google

त्वादस्यैव शेषत्वं स्यात्ततो वनस्पत्यादिष्वबहुप्रकृतित्वे एतद्विकल्पाभावेपि जातिरप्राणिनामिति नित्यो विधिः स्यात्, फलादिषु तु न दोषः, एतद्विकल्पप्राप्त्यभावाल्लक्षणान्तरप्राप्तेरेव नियमनात्तस्मात्सर्वस्यैव प्रकरणस्यार्थशेषस्तदेतदाह। ‘एषां बहुप्रकृतिरेवेति’। एषां फलादीनां द्वन्द्वोनेन लक्षणान्तरेण वा एकवद्भवन् बहुप्रकृतिरेवैकवद्भवतीत्यर्थः। ‘बदरामलके इति’। अत्र ‘जातिरप्राणिना’मिति न भवति। ‘रथिकाश्वारोहाविति’। अत्र सेनाङ्गलक्षणः। ‘प्लक्षन्यग्रोधाविति’। अत्रायं विकल्पो ‘जातिरप्राणिना’-नित्यश्च न भवति, अवनस्पतीनां तु वृक्षविशेषाणामबहुप्रकृतित्वेप्ययं विकल्पो भवत्येव आम्रपलाशं आम्रपलाशौ, अन्ये तु वनस्पतिग्रहणं वृक्षमात्रोपलक्षणं मन्यन्ते। ‘रुरुपृषतौ हंसचक्रवाकाविति’। अत्राप्यस्य विकल्पस्याभावः। ‘यूकालिक्षे इति’। ‘क्षुद्रजन्तव’ इत्यस्याभावः, व्रीहियवौ कुशकाशावित्यत्र तूभयोः॥

“विप्रतिषिद्धं चानधिकरणवाचि”॥ ‘परस्परविरुद्धमिति’। सहानवस्थानादिलक्षणो विरोधः, विप्रतिषिद्धानामित्यादिसूत्रे तु तद्वाच्यवयवत्वाद् द्वन्द्वरूपमेव तथोक्तमिति भावः। ‘अद्रव्यवाचिनामिति’। एतेनाधिकरणशब्दो द्रव्ये वर्त्तते नाधारइति दर्शयति, नहि द्वन्द्वावयवानामाधारे वृत्तिः सम्भवति, विभक्त्यर्थत्वादाधारस्येति भावः। अयमपि नियमार्थः प्रारम्भः, नियमस्वरूपं च य एकवचनो द्वन्द्वो विभाषाप्राप्तः स यदि विप्रतिषिद्धवाचिनां भवत्यद्रव्यवाचिनामेव, द्रव्यवाचिनां त्वितरेतरयोग इति॥

“न दधिपयआदीनि”॥ ‘यथायथमिति’। व्यञ्जनत्वाद्विकल्पस्य प्राप्तिस्तत्रादितस्त्विषु, पूर्वसूत्रविकल्पस्य शुक्लकृष्णाविति न त्विह, यद्येवं प्रतिषिद्धेस्मिन्विकल्पे जातिलक्षणो नित्यः स्यादेकवद्भावः, परिहारोत्र वक्ष्यते स्त्रियां यदुक्तं तचेति यथा षट्स्वभिधास्यते तथात्राप्येकवद्भावमात्रमेव निषिध्यते। किं च ब्रह्मप्रजापत्यादिष्वत्र पठितेषु समाहारद्वन्द्वनिषेधमुखेनेतरेतरयोगद्वन्द्वो व्यवस्थाप्यते तत्साहचर्यादेतेष्वपि चतुर्षु तदेव युक्तम्॥

Digitized by Google

"अधिकरणैतावत्त्वे च" ॥ वृत्तिर्वर्त्तः समासः सोऽस्यास्तीति समासावयवभूतं वर्त्तिपदं तस्यार्थोऽधिकरणमित्युच्यते, कथं पुनस्तदधिकरणमित्याह । 'स हीति' । नियमस्य चात्र प्रतिषेधः प्राण्यङ्गादीनां समाहार एवेति नियमो वर्त्तिपदार्थस्येयत्तायां गम्यमानायां न भवतीति न पुनः पूर्वसूत्रवत्समाहारद्वन्द्वस्य प्रतिषेधः, यद्येवं प्रतिषिद्धेऽपि नियमे दशदन्तोष्ठा इत्यधिकरणैतावत्त्वेऽपि 'चार्थे द्वन्द्व' इत्यनेन समाहारेऽर्थे द्वन्द्वः स्यादेव, ये चात्र प्रकरणे ऽसङ्कीर्त्तितास्तेषु नियमस्याप्रसङ्गादसत्यस्मिन्प्रतिषेधे 'चार्थे द्वन्द्व' इत्यनेन समाहारे द्वन्द्वः स्यादेव दशग्राम्यश्वत्थिया इति, अतः प्रकृतानामन्येषां च सर्वेषामेकवचनो द्वन्द्वो न भवति, अधिकरणैतावत्त्व इति समाहारद्वन्द्व एव प्रतिषेध्यः । उच्यते । अधिकरणं वर्त्तिपदार्थ इत्युक्तं, न च समाहारद्वन्द्वे वर्त्तिपदार्थस्यैतावत्त्वं शक्यं प्रतिपादयितुं दशादिशब्दप्रयोगेऽपि हि तस्यैव द्वन्द्वार्थस्य समाहारस्य सङ्ख्याविशेषो ऽवगम्यते न वर्त्तिपदार्थस्य यथा द्विगौ दशपञ्चपूल्य इति, अतो वर्त्तिपदार्थस्य सङ्ख्याविशेषं प्रतिपिपादयिषता ऽवश्यमितरेतरयोगद्वन्द्वो विधेय इति दशग्राम्यश्वत्थिया इत्यादौ तावददोषः, यद्येवमनेनैव न्यायेन दशदन्तोष्ठा इत्यादावपि समाहारद्वन्द्वो न भविष्यतीति नार्थः प्रतिषेधेन, नैवम् । असत्यस्मिन्प्रतिषेधे प्राण्यङ्गादीनां समाहार एवेति नियमादितरेतरयोगद्वन्द्वो न स्यात्, न च समाहारद्वन्द्वे दशादिप्रयोगेऽपि वर्त्तिपदार्थस्य सङ्ख्याविशेषः प्रतिपादयितुं शक्य इति अधिकरणैतावत्त्वे प्रतिपिपादयिषिते द्वन्द्व एव न स्यादित्यारभ्यः प्रतिषेधः । 'दशदन्तोष्ठा इति' । अत्र दशशब्दस्य प्रत्येकं सम्बन्धाद्वर्त्तिपदार्थस्येयत्ता गम्यते, समुदायसम्बन्धेऽपि दन्तोष्ठात्मकवर्त्तिपदार्थगतैव सङ्ख्या ॥

"विभाषा सामीप्ये" ॥ अधिकरणैतावत्त्व इत्यधिकारात्समीपरूपएतस्मिन्निति गम्यते, वृत्तौ त्वर्थमात्रं दर्शितम् । 'अधिकरणैतावत्त्वस्य समीप इति' । अत्र च भावप्रधानः समीपशब्दः, अधिकरणैतावत्त्वस्य सामीप्येन परिच्छिन्नावित्यर्थः । अत्र विस्पष्ट एव नियमस्य प्रतिषेधः, नहि विभाषा समाहारद्वन्द्वः प्रतिषेध्यः । 'अव्ययीभावो विहित इति' ।

Digitized by Google

अव्ययं विभक्तीत्यादिना । यद्यप्यत्र सङ्ख्ययेति नास्ति, सङ्ख्ययापि तु भवत्येव । 'बहुव्रीहिरिति' । सङ्ख्ययाव्ययासन्नेत्यादिना । तत्रैकवद्भावपक्षे ऽव्ययीभावोऽनुप्रयुज्यतइति एकार्थस्यैकार्थे इति भावः, ऐकार्थ्यञ्च तस्य सामीप्यप्रधानत्वात्, यद्यव्ययीभावोऽव्ययत्वाच्चिःसङ्ख्यस्तथापि भेदाभावरूपमैकार्थ्यमस्त्येव सामानाधिकरण्यं च सामीप्यतद्वतोरभेदाश्रयेण प्रतिपाद्यम्, अधिकरणैतावत्त्वमपि समाहारसमाहारिणोर्भेदाविवक्षयैवोपपाद्यम् । 'इतरत्र बहुव्रीहिरिति' । बह्वर्थस्य बह्वर्थे इति भावः । बह्वर्थत्वं च तस्य समीपिप्रधानत्वात् । ननु द्वन्द्वार्थस्यैकवद्भावादनुप्रयोगस्याप्येकवचनता सिद्धा किमेतया क्लिष्टकल्पनया । उच्यते । अव्ययीभावस्यैवानुप्रयोगे तस्याव्ययत्वाद्बहुत्वाभावाद्बहुवचनं न स्यात्, सत्यपि वा तस्मिन्नम्भावे कृते उपदशा इति न स्यात्, बहुव्रीहेरेव चानुप्रयोगे उपदशस्य पाणिपादस्येति षष्ठी स्याद्, उपदशम्पाणिपादस्येति चेष्यते ऽतो यथोक्तमेव साधीयः ॥

"स नपुंसकम्" ॥ परवल्लिङ्गतापवादो योगः, सग्रहणं व्यवहितस्य द्विगोरपि यथा स्याद् अन्यथाऽव्यवहितस्य द्वन्द्वस्यैव स्यात्, नैतदस्ति । एकवचनमित्येतावन्मात्रमेवापेक्षिष्यामहे नैकवचनविशेषं द्वन्द्वम्, एवं तर्हि योऽत्र प्रकरणे ऽसङ्कीर्त्तितः समाहारद्वन्द्वस्तस्यापि यथा स्यात्, अन्यथा प्रकृतस्यैव द्वन्द्वस्य द्विगोश्च स्यात् । ननु प्रकरणमपि नापेक्षिष्यते, यद्येवमेकसङ्ख्य इत्यादावेकार्थस्य स्यात्, अतो ऽवश्यापेक्ष्यं प्रकरणं तस्मिंश्चापेक्ष्यमाणे प्राण्यङ्गादिसम्बन्धादिरूपेण द्वन्द्वः प्रकृत इति तस्यैव स्यात्, स इत्येतस्मिंस्तु सति अपेक्ष्यमाणेऽपि प्रकरणे प्राण्यङ्गादिसम्बन्धपरित्यागेन योऽत्र प्रकरणे सङ्कीर्त्तितो द्वन्द्वो द्विगुश्च स नपुंसकमिति सर्वस्य समाहारद्वन्द्वस्य नपुंसकत्वं लभ्यते, एकादौ चातिप्रसङ्गो न भवति। तथा च 'युवोरनाका' वित्यादावुच्यते युवोरिति समाहारद्वन्द्वे स नपुंसकप्रसङ्गः, अतो यावान्कश्च न समाहारद्वन्द्वः प्राण्यङ्गादिसम्बन्धी अन्यो वा सर्वस्यास्य नपुंसकत्वं विधियतइति सिद्धम् । 'अकारान्तोत्तरपद इति' । अजात इत्यधिकारे 'द्विगो' रिति ङीब्विधानं लिङ्गम् । 'पञ्च-

बह्वीति'। स्त्रीत्वपक्षे उपसर्जनह्रस्वत्वम्,। 'अनो नलोपश्चेति'। 'उत्तरपदत्वे चापदादिविधा'विति प्रत्ययलक्षणप्रतिषेधात्पदत्वाभावाच्चलोपवचनम्। 'पात्रादिभ्य इति'। तादर्थ्य एषा चतुर्थी पात्राद्यन्तानां द्विगूनां सिद्धय इत्यर्थः। पात्रादिराकृतिगणः॥

"अव्ययीभावश्च"॥ 'पूर्वपदार्थप्रधानस्येति'। अधिस्त्रीत्यादौ पूर्व्वपदार्थस्यालिङ्गत्वादलिङ्गतैव प्राप्नोति। 'अन्यपदार्थप्रधानस्येति'। उन्मत्तगङ्गमित्यादेः। 'पुण्याहमिति'। कर्म्मधारये 'राजाहःसखिभ्यष्टच्'। 'रात्राह्नाहाः पुंसी'त्यस्यापवादः। 'सुदिनमिति'। सुदिनशब्दः प्रशस्तवचनः। सुदिनासु समासु कार्यमेतदिति यथा। 'त्रिपथमिति'। षष्ठीसमासः। द्विगोः पात्रादित्वात्सिद्धम्, विरूपः पन्था विपथम्, प्रादिसमासः। 'क्रियाविशेषणानां चेति'। क्रियाद्वारेण स्त्रीलिङ्गत्वे प्राप्ते वचनम्॥

"तत्पुरुषोऽनञ्कर्मधारयः"॥ असन्देहार्थं नञ्कर्म्मधारयस्तत्पुरुष इत्यन्यासादनञ्कर्मधारय इति पदच्छेदः। अत्र कर्मधारयशब्दो भावप्रधानः, नञ्च कर्मधारयश्च नञ्कर्मधारयौ तौ न विद्येते यस्मिंस्तत्पुरुषे सोऽनञ्कर्म्मधारय इति बहुव्रीहिः। तत्पुरुषे त्वस्मिन्नञ्समासस्य तत्पुरुषस्याभावात्तद्युक्ततत्पुरुषो नञ्शब्देन लक्षणीयः स्यात्, लिङ्गवचनयोश्चान्यतरस्य व्यत्ययो वाच्यः स्यात्, अतो बहुव्रीहिरेव न्याय्यः, वृत्तौ वस्तुमात्रं दर्शितं 'नञ्समासं कर्म्मधारयं च वर्ज्जयित्वेति'। 'विभाषा सेनेति'। अनन्तरेषु सूत्रेष्वस्य नातीवोपयोगः, सञ्ज्ञायां कन्थेत्यत्र तावदनादिः सञ्ज्ञा गृह्यते न वा तत्पुरुषो नञ्समासः कर्म्मधारयो वा उशीनरेषु सञ्ज्ञास्ति, उपज्ञोपक्रममित्यत्रापि षष्ठीतत्पुरुषाद्विना तदादित्वासम्प्रत्ययः। 'छाया बाहुल्य' इत्यत्रापि पूर्वपदार्थधर्म्मो बाहुल्यं षष्ठीतत्पुरुषमन्तरेण न गम्यते। सभाराजेत्यत्र तु राजामनुष्यपूर्वेति वचनान्नञ्समासस्य कर्म्मधारयस्य च सभान्तस्याप्रसङ्गः। द्वन्द्वस्य तु प्राप्नोति ईश्वरश्च सभा च ईश्वरसभे इति, अतस्तत्रापि तत्पुरुष इत्यस्यांशस्योपयोगोस्त्येव, 'अशाला चे'त्यत्र समूहवचनः सभाशब्दः समूहस्य च समूह्यपेक्षा

Digitized by Google

स्फुटतरेति षष्ठीतत्पुरुषस्यैव भविष्यति नान्यस्य, ब्राह्मणश्च सभा च ब्राह्मणसभे अ सभा परमसभेति, अतो विभाषा सेनेत्यत्रैवास्य साक्षादुपयोग इति भावः ॥

"सञ्ज्ञायां कन्थोशीनरेषु" ॥ 'तत्पुरुषस्य कन्थया विशेषणात्तदन्तविधिरित्याह'। 'कन्थान्तस्तत्पुरुष इति'। 'सौशमिकन्थमिति'। सुशमस्यापत्यानि सौशमयः ॥

"उपज्ञोपक्रमं तदाद्याचिख्यासायाम्" ॥ 'उपज्ञायतइत्युपज्ञेति'। कर्म्मण्या 'तश्चोपसर्गे' इत्यङ् प्रत्ययः। उपक्रम्यतइत्युपक्रम इति कर्मण्येव घञ्। नोदात्तोपदेशस्येति वृद्धिप्रतिषेधः। उपज्ञा चोपक्रमश्चेति समाहारद्वन्द्वः। 'तदन्तस्तत्पुरुष इति'। सूत्रे तूपज्ञोपक्रमं तत्पुरुषरूपमित्येवं सामानाधिकरण्येन विशेषणं, तयोरुपज्ञोपक्रमयोरित्यादेर्विशेषणं, 'यदीति'। आदिः प्राथम्यम्। 'पाणिन्युपज्ञमिति'। कर्तरि षष्ठ्याः समासः। पूर्वाणि व्याकरणान्यवृतनादिकालपरिभाषायुक्तानि तद्रहितं तु व्याकरणं पाणिनिप्रभृतिप्रवृत्तमित्यस्ति तदादित्वस्याख्यानम्। 'व्याड्युपज्ञमिति'। अड्डा वृश्चिकलाङ्गूलं, तेन च तेन्वयं लक्ष्यते, विगताड्डा व्यड्, तस्यापत्यं व्याडिराचार्यः। स्वागतादिपाठाच्च ग्वाभावमित्येष विधिर्न भवति। दुर्ष्विति सङ्केतशब्दः, यथात्र कृत्करणं, नन्दो राजा। मानानि प्रस्यादीनि। वाल्मीकिश्लोका इति षष्ठीसमासः। अत्रत्यत्र तदादित्वस्याचिख्यासा, वाल्मीकिः प्रथमं श्लोकप्रबन्धं ददर्शेति प्रसिद्धिः। देवदत्तो यज्ञदत्तेनोपज्ञायते यज्ञदत्तेनोपक्रम्यतइति क्रियासम्बन्धमात्रमत्र विवक्षितम् ॥

"छाया बाहुल्ये" ॥ 'पूर्वपदार्थधर्म्मो बाहुल्यमिति'। कथम्, बाहुल्यइतिनिमित्तसप्तमी,। बाहुल्ये सति या छाया तद्वाची यश्छायाशब्दस्तदन्तस्तत्पुरुष इति सूत्रे पदान्वयः। तत्र कस्य बाहुल्यमित्यपेक्षायामावारकद्रव्यनिमित्तकत्वाच्छायायास्तद्बाहुल्यइति गम्यते। तेन यानि बहूनि सम्भूयोपलम्भयोग्यामुपजीव्यां वा छायामारभन्ते तेष्वयं विधिः ॥

"सभाराजामनुष्यपूर्वा" ॥ इह सभाशब्दः शालावचनः । 'इह कस्मान्न भवतीति' । स्वं रूपमिति वचनादिहैव भवितुं युक्तमिति प्रश्नः । 'पर्यायवचनस्यैवेति' । न स्वरूपस्य नापि विशेषाणां चन्द्रगुप्तादीनामित्यर्थः । एतदेवाप्तोक्तेन द्रढयति । 'तदुक्तमिति' । कथं पुनरेतल्लभ्यते । द्वावत्र नञौ अराजपूर्वा अमनुष्यपूर्वा चेति, तत्र नञिवयुक्तन्यायेन राजशब्दसदृशाः पर्याया एव गृह्यन्ते, अमनुष्यशब्दो रूढिरूपेणेति । कथं तर्ह्यमनुष्यकर्तृके चेत्यत्र पिशाचघ्नं घृतमित्युदाहरिष्यते । व्याख्यानादत्र मनुष्यादन्यमात्रस्य ग्रहणं न रूढिरित्यर्थः ॥

"अशाला च" ॥ सभाशब्दोयं शालावचनः सङ्घवचनश्च, तत्र शालाप्रतिषेधादितरस्य ग्रहणमित्याह । 'सङ्घातवचनइत्यादि' । तत्र पूर्वसूत्रेण राजामनुष्यपूर्वत्वे शालावचनस्यापि भविष्यति अशालावचनस्य त्वनेन राजामनुष्यपूर्वत्वाभावेपीति ॥

"विभाषा सेनासुराच्छायाशालानिशानाम्" ॥ तत्पुरुष इति प्रकृतं षष्ठीबहुवचनान्तं विपरिणम्यते, नपुंसकमिति च भावप्रधानं संपद्यते, सेनाद्यन्तानां तत्पुरुषाणां नपुंसकत्वमित्यत्रार्थः । वृत्तौ तु वस्तुमात्रं दर्शितम् । यद्वा प्रथमास्थाने षष्ठी । 'कुड्यच्छायमिति' । बाहुल्याभावेऽनेन विकल्पः, बाहुल्ये नित्यार्थं छायाबाहुल्यइत्युक्तम् । 'श्वनिशमिति' । यस्यां निशायां श्वान उपवसन्ति सा श्वनिशमित्युच्यते । सा पुनः कृष्णचतुर्दशी तस्यां हि श्वान उपवसन्तीति प्रसिद्धिः ॥

"परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" ॥ किमर्थमिदम्, इह द्वन्द्वे त्रीणि दर्शनानि । अवयवार्था एवापेक्षितपरस्परा द्वन्द्वार्थो न तु तद्व्यतिरिक्तः समुदायो नामेत्येकम् । अवयवार्थव्यतिरिक्त एव समुदायो द्वन्द्वार्थः, स चावयवलिङ्गेन लिङ्गवानिति द्वितीयं, स एव स्वयं लिङ्गशून्य इति तृतीयम् । तत्र पूर्वके दर्शनद्वये विभिन्नलिङ्गावयवद्वन्द्वे युगपदुभयलिङ्गतानुपपत्तेः पर्यायेण लिङ्गद्वयप्रसङ्गे परस्यैव लिङ्गं भवतीति नियमार्थं भवति । तृतीये तु समासार्थस्यालिङ्गस्य परवल्लिङ्गता भवतीति विध्यर्थः । तत्पुरुषोपि द्विविधः, पूर्वपदार्थप्रधानो ऽर्धपिप्पा-

Digitized by Google

स्यादिः, उत्तरपदार्थप्रधानो राजकुमार्यादिः, तत्रोत्तरपदार्थप्रधाने प्राधान्यादेव परवल्लिङ्गस्य सिद्धत्वात्पूर्वपदार्थप्रधाने विषये भवति, तत्र वृत्तिकारेण विधिपक्ष आश्रितस्तदाह। 'परस्य यल्लिङ्गं तद्भवतीति'। एवं हि सूत्रस्यैकरूपा वचनव्यक्तिर्भवति, इतरथा तत्पुरुषे विधिरूपा द्वन्द्वे नियमरूपेति वचनव्यक्तिभेदः स्यादिति भावः। 'द्वन्द्वस्य तत्पुरुषस्य चेति'। एतेन द्वन्द्वतत्पुरुषयोरिति षष्ठीयमिति दर्शयति। सप्तम्यां त्वयमर्थो भवति द्वन्द्वे तत्पुरुषे च यत्परं तद्वल्लिङ्गं भवतीति। तत्र कार्यिणोऽनुपादानात्परशब्दस्य च सम्बन्धिशब्दत्वात्तदाक्षिप्तस्य पूर्वपदस्य लिङ्गविधिर्भवति। यद्वा द्वन्द्वे तत्पुरुषे च विषये परस्यैव लिङ्गं भवतीत्यक्षरार्थः। तत्रापि पूर्वपदस्यैव लिङ्गविधिः। अत्र पक्षे मयूरीकुक्कुटादित्यत्रोत्तरपदार्थलिङ्गे पूर्वपदार्थस्यातिदिष्टे स्त्रीप्रत्ययस्य निवृत्तिः प्राप्नोति। कुक्कुटमयूर्यौ राजकुमारी अर्द्धपिप्पलीत्यादौ पूर्वपदे स्त्रीप्रत्ययप्रसङ्गः। किं पुनरस्मिन्पक्षे किं चिदिष्टं सिध्यति आहो स्विद्दोषान्तमेव, सिध्यतीत्याह। 'इह पूर्वकायः, अर्धद्रोण इति'। यत्र पूर्वपदं नपुंसकमुत्तरपदं च पुंलिङ्गं तत्र परस्य लिङ्गे पूर्वस्यातिदिष्टे समासस्यापि तदेव भवति, न च पूर्ववदिह किं चिदनिष्टमापद्यते। द्वन्द्वेऽपि पूर्वके दर्शनद्वये गुणकर्मणी द्रव्यगुणावित्यादौ यत्र पुंनपुंसकाभ्यां भिन्नलिङ्गे पूर्वोत्तरपदे यत्र वा ऽवर्णान्तं स्त्रीप्रत्ययान्तं वा पदं न भवति गतिस्थाने योषित्पुरुषौ तित्तिरिबलाके इति तत्रोत्तरपदार्थलिङ्गे पूर्वपदार्थस्यातिदिष्टे द्वन्द्वस्य पर्यायेण द्वयोरपि लिङ्गे प्रवृत्तेऽपि सर्वमिष्टं सिध्यति, पूर्ववदेव न किं चिदनिष्टमापद्यते। व्यतिरिक्तो द्वन्द्वार्थः स्वयं लिङ्गशून्य इत्यत्र तु पक्षे द्वन्द्वार्थस्यालिङ्गत्वं तदवस्थमेवेति दोषान्तमेव। 'द्वन्द्वस्य तत्पुरुषस्य चेति'। द्वन्द्वार्थस्य तत्पुरुषार्थस्य चेत्यर्थः। तेनानुप्रयोगेऽपि तदेव लिङ्गं भवति। यदि तर्हि षष्ठ्याश्रयणेन समासार्थस्य परवल्लिङ्गमतिदिश्यते 'पूर्ववदश्ववडवा'वित्यत्रापि पूर्वपदार्थलिङ्गं समासार्थेऽतिदिश्येत ततश्चोत्तरपदार्थस्य स्त्रीत्वं स्थितमेवेति टापः श्रवणप्रसङ्गः। सप्तमीपक्षे तु 'पूर्ववदश्ववडवा'वित्यत्रापि पूर्वपदार्थलिङ्गमुत्तरपदार्थस्यातिदिश्यत इति षष्ठ-

प्रत्यक्षानुमानहृतबुभुत्सां जनयन्ति, बुभुत्सायां जातायां प्रत्यक्षानुमानाभ्यामेव विविक्तस्वभावाभ्यां नित्यशुद्धस्वप्रकाशाद्वितीयकूटस्थचैतन्यमेव सत् अन्यत्सर्वं तस्मिन् अध्यस्तमिति सुविवेचम् ।

टी० "वेदानुवचनादीन्यपी"ति, शूद्रस्यापि जन्मान्तरानुष्ठितयज्ञादिकर्मणस्सञ्जातविविदिषस्य शूद्रजन्मनि निदिध्यासनमाप्तवाक्यावगताद्वैतविषयं कर्त्तुं शक्यमिति भावः। मुखान्तरेण ज्ञानसम्भवमाह "अथ वे"ति, तर्कानुगृहीतादिति, त्वदुक्तानां प्रमाणानुपपत्तिप्रमेयानुपपत्त्यादीनान्तर्काणामवगमो हि न श्रुत्यपेक्ष इति भावः। सुशोभन इति इतः पूर्वप्रसिद्धप्रमाणमीश्वरेशितव्यादिभेदज्ञानं जनयद्वेदान्तवाक्यं हित्वा केवलाद्वैतज्ञानजनकतर्कावलम्बिनामेव ब्रह्मविद्याऽधिकारः सुलभः इत्यर्थः। श्रुतिवैयर्थ्यमनुपपत्त्यन्तरमाह "अनेनैवे"ति, अप्राप्ते हि शास्त्रमर्थवदतः प्राप्तार्थत्वात् भेदज्ञानजनकत्वाच्च ब्राह्मणादेरपि श्रुतिरनादरणीयेत्यर्थः, तपस्विनी—शोचनीया देशकालव्रताद्यनेकनियमवतीति भावः। न चेति नैसर्गिक—शब्दोऽनादित्वपरः प्रत्यक्षकत्वेन श्रुतिरपेक्षितेति शङ्कायन्यस्यार्थं दूषयति "यत"इति,साङ्ख्यहैरण्यगर्भनैयायिकवैशेषिकबौद्धार्हतादिभिरेव प्रत्यक्षानुमानादिमुखेन वस्तुनिरूपणप्रसक्तमता न श्रुत्यपेक्षेत्यर्थः ।

भू० एवं भूते स्वप्रकाशे वस्तुनि श्रुतिसमधिगम्यविशेषान्तरं च नाभ्युपगम्यते अध्यस्तात्तद्रूपनिवर्त्तनी हि श्रुतिरपि त्वन्मते, न च सत आत्मन आनन्दरूपताज्ञानायोपनिषदास्थेया, चिद्रूपताया एव सकलेतरातद्रूपत्त्याहृततया तद्रूपत्वात्, यस्य तु मोक्षसाधनतया वेदान्तवाक्यैर्विहितं ज्ञानमुपासनरूपं तच्च परब्रह्मभूतपरमपुरुषप्रीणनं तच्च शास्त्रैकसमधिगम्यम्, उपासनाशास्त्रं चोपनयनादिसंस्कार

संस्कृताधीनस्वाध्यायजनितं ज्ञानं विवेकविमोकादिसाधनानुगृहीतमेव स्वोपायतया स्वीकरोति एवंरूपोपासनाप्रीतः पुरुषोत्तम उपासकं स्वाभाविकात्मयाथात्म्यज्ञानदानेन कर्मजनिताज्ञानं नाशयन् बन्धान्मोचयतीति पक्षः तस्य यथोक्तरीत्या शूद्रादेरनधिकार उपपद्यते ॥ अपशूद्राधिकरणं समाप्तम् ॥

टी० "सुविवेचमि"ति, त्वयैव हि युक्तय उपान्यस्ता इति भावः, तर्कागोचरविशेषान्तरसिद्ध्यर्थं श्रुत्यपेक्षेत्यत्राह "एवम्भूत"इति, श्रुतेस्तात्त्विकविशेषानवबोधकत्वमुपपादयति "अध्यस्ते"ति, आनन्दत्वज्ञानाय तदपेक्षेत्यत्राह "न चे"ति, असुखव्यावृत्तिह्यानन्दत्वन्तत्सकलेतरव्यावृत्तिसाधकयुक्त्यैव सिध्यतीत्यर्थः। स्वपक्षे एवमुपपन्नमित्याह "यस्य त्वि"ति॥ अपशूद्राधिकरणं समाप्तम् ॥

सू० तदेवं प्रसक्तानुप्रसक्ताऽधिकारकथाम्परिसमाप्य प्रकृतस्याङ्गुष्ठप्रमितस्य भूतभव्येशितृत्वावगतपरब्रह्मभावोपपादनं हेत्वन्तरमाह—

टी० तदेवमिति, देवादीनामधिकारनिरूपणं प्रसक्तमितराधिकरणादुयमनुप्रसक्तं, परब्रह्मभावोपपादनमिति "ईशानोभूतभव्यस्ये"ति अवगतस्य नियमनस्य जगत्सर्वमेजतीति सर्वविषयत्वतत्कार्यकम्पनज्ञापनादुपपादनमीशान-शब्दस्य

प्रमिताधिकरणम् । **सू० कम्पनात् ॥ ४१ ॥**

सू० अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मेत्यनयोर्वाक्ययोर्मध्ये यदिदं किञ्च जग-

त्सर्वम् प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चम" इति कृत्स्नस्य जगतोऽग्निसूर्यादीनां चास्मिन्नङ्गुष्ठमात्रे पुरुषे प्राणशब्दनिर्दिष्टे स्थितानां सर्वेषां ततो निःसृतानां तस्मात्संजातमहाभयनिमित्तमेजनम् ।

टी० अस्वरसनिर्वाहे चिकीर्षिते ऽपि तस्य विरोधीत्यर्थः । नन्वधिकारनिरूपकं तदुपर्यपीत्याद्यधिकरणत्रयं तृतीयस्य चतुर्थे पादे निवेश्यं, सत्यं, तथाऽपि सङ्गत्यतिशयात् समन्वयाध्याये निवेशितं, मनुष्याधिकारत्वप्रसङ्गेन तावत् सङ्गतिः स्थिता, कार्यभूतदेवादीनां प्रामाणिकत्वसमर्थनं ब्रह्मणः परमकारणत्वोपयोगि कार्यकारणावस्थादित्यादिचेतनान्तर्यामिण उपास्यत्वं मधुविद्यायामुक्तम् अपशूद्राधिकरणे च संवर्गविद्यायाः परमात्मविषयत्वं ज्ञापितम् अतः कारणानुबन्धिनो निरूपणस्य समन्वयलक्षणसङ्गतत्वात्तत्राप्यस्मिन् पादे मनुष्याधिकारप्रस्तावाच्चाधिकरणत्रयं निवेशितमिति । सू० कम्पनात्, इदं सूत्रं "प्राण एजती"ति वाक्यविषयमधिकरणान्तरं ये वर्णयन्ति तान् प्रतिक्षिपति "अनयोर्वाक्ययोर्मध्य" इति, परमात्मपरत्वेनोपपादितवाक्यद्वयमध्यगतत्वादस्य वाक्यस्य अस्मिन्नेव मन्त्रे "य एतद्विदुरमृतास्ते भवन्ति" इति अमृतत्वप्राप्तिहेतुत्वावगमात् प्राणशब्दस्य परमात्मवाचकत्वस्यानेकाधिकरणन्यायसिद्धत्वाच्च पूर्वपक्षानुदय इति भावः। प्राणः कम्पनादित्यश्रवणात् सूत्रास्वारस्यं च। ननु प्रकरणात् प्राणशब्दश्रुतिर्बलीयसी धूमतेजोजलमरुत्सन्निपातरूपमेघात्मना परिणतस्य वायोरशनिरूपेण विवर्त्तनाद्वज्र—शब्दश्रुतिश्च तत्साधिका वायुनिमित्तमेव च महद्भयानकं वज्रमुद्यम्यत इति ह्यर्थः, अमृतत्वहेतुता चोपपद्यते, "वायुरेव व्यष्टिर्वायुः समष्टिरपपुनर्मृत्युञ्जयति य एवं वेदे"ति श्रुतेः । अतोऽधि-

करणान्तरं कार्यमिति, उच्यते पूर्वापरपर्यालोचनेन परमात्मपरतया निर्णीतेषु प्रकरणेषु मुख्यप्राणलिङ्गे तद्वाचकशब्दे सत्यपि परमात्मन एव प्रतिपाद्यत्वम्प्राणस्तथाऽनुगमादित्यत्र निर्णीतम्, अचेतनरूपप्रधानस्याऽपि मोक्षहेतुत्वानुपपत्ति"स्तन्निष्ठस्य मोक्षोपदेशादि"त्यत्रोक्ता, तत्कथं तत्कार्यैकदेशप्राणज्ञानस्य मोक्षहेतुत्वशङ्कोदयः, वायोरशनिकारणत्वेऽपि प्राण-शब्दस्य वायुमात्रवाचित्वाभावात्तन्मुख्यार्थस्य मुख्यप्राणस्याशनिकारणत्वाभावाच्च वज्र-शब्देन न पञ्चवृत्तिप्राणशङ्का भवति, उद्यत-शब्दोऽप्यशनिशङ्काविरोधी, अशनिर्हि निपतति आयुधमेव ह्युद्यतम्भवति यथा तेनेन्द्रो वज्रमुद्यच्छदि"ति, अतोऽधिकरणान्तरत्वम् अयुक्तम् । नन्वेवम्परमात्मपरत्वनिश्चयास्त्वत्पत्तेऽपि सूत्रवैयर्थ्यमिति चेन्न उक्तहेतूत्तम्भनरूपप्रयोजनस्य दर्शितत्वात्, सूत्रे च-शब्दाभावोऽनन्तरपूर्वाधिकरणशेषत्वभ्रमानुदयार्थः न त्वधिकरणान्तरत्वात्, प्राण इति सप्तम्यन्तपदसामर्थ्यात्स्थितानामित्यध्याहारः कुतो निस्सृतमित्यपेक्षायाम्प्रकृतस्यैवापादानत्वमाह "तत"इति, कुत एजति इत्यपेक्षायाम्प्रकृतस्यैव भयनिमित्तत्वमाह "तस्मादि"ति, भयमागाम्यनिष्टापत्तिज्ञानरूपं दुःखम्, एजनन्तु तत्कार्यं श्रुतिसूत्रयोरभिन्नार्थत्वं ज्ञापयति "एजनं कम्पन"मिति, एजृ कम्पन इति हि धातुः

ऋ० कम्पनं श्रूयते तच्छासनातिवृत्तौ किं भविष्यतीति महतोभयाद्वज्रादिवोद्यतात्कृत्स्नं जगत्कम्पत इत्यर्थः, भयादस्याग्निस्तपतीत्यनेनैकार्थ्यात् महद्भयं वज्रमुद्यतमिति पञ्च-

प्रत्यवायभयात् स्वस्वकार्येषु प्रवृत्तिः कम्पनन्तथेहाप्यवगम्यते, भयादस्याग्निस्तपतीति तपनं ह्यग्न्यादित्ययोः कार्यं, धावति-शब्द इन्द्रादीनां स्वस्वव्यापारपरः । भयं विवृण्वन् वाक्यं योजयति "तच्छासने"ति, महतो भयादिति-भयशब्दो न भयानकपरो लक्षणाप्रसङ्गादिति भावः । वज्रादिवोद्यतादिति वज्र-शब्द आयुधपरः, न त्वशनिपरः उद्यत-शब्दविशेषितत्वादिति भावः । वज्रादिवेति इव-शब्देन श्रुतिवाक्ये वज्र-शब्द उपचाराद्वज्रतुल्ये वर्तते अध्याहारादपि गौणवृत्तेरुचितत्वादिति वज्र-शब्दस्य तत्तु-

Digitized by Google

स्यार्थपरत्वं फलतो दर्शितम् । कथं हेतुत्वावगम? इत्यत आह "भयादस्ये"ति,
कथम्प्रथमायाः पञ्चम्यर्थत्व? मित्यत आह "महद्भयं वज्रमुद्यतमिती"ति,
न वज्रं भयदृष्टान्तः दृष्टान्तदार्ष्टान्तिकवैधर्म्यात्, भयमव्यवधानेन कम्पन-
हेतुः, वज्रन्तु भयद्वारा तद्धेतुरतो वज्रम्भयहेतुदृष्टान्तः, उद्यताद्वज्रादिव पर-
मपुरुषात् सञ्जातेन भयेन कृत्स्नं जगत् कम्पत इत्यर्थः, तस्मात्संजातमहा-
भयनिमित्तमेजनमिति पूर्वग्रन्थैकार्थ्यात्, एवं तर्हि प्रथमान्तपदसामानाधि-
करण्यस्वारस्य भङ्ग इव-शब्दा इव-शब्दाध्याहारश्च स्यात्, ननु भयानाद-
रेणार्थवर्णनं किंनिबन्धनमित्यत्राह "भयादस्ये"ति, अनन्तरवाक्ये भया-
दस्येति भयतद्धेतुवाचिपदयोर्वैयधिकरण्यदर्शनात् भयपदस्य पञ्चम्यन्तत्व-
दर्शनात् पूर्वापरवाक्ययोरैकार्थ्यस्य न्याय्यत्वाद्दृष्टान्तदार्ष्टान्तिकसामञ्ज-
स्याच्चेत्यर्थः । ननु भय-शब्देन भयानकलक्षणा न्याय्या गङ्गापदादिषु प्रकृ-
त्यंशेन प्रकृत्यन्तरार्थलक्षणाया दृष्टत्वात् प्रथमाया हेत्वर्थलक्षणा त्वयुक्ता,
विभक्तीनां विभक्त्यन्तरार्थे लक्षणाया अदर्शनात्, तच्चानुशासनविरोधात्
पाशाधिकरणे ऽपि हि बहुत्वाविवक्षामात्रं न तु विभक्त्यन्तरार्थलक्षणा
अतो भयानकं वज्रमिव ब्रह्म यत्तस्मात्कृत्स्नं जगत्कम्पत इत्येव हि योजना
युक्ता, अत आह "महद्भयं वज्रमुद्यतमिती"ति, सुपां सुलुगित्यादिसूत्रेण
सर्वतो विभक्तिषु प्रथमाया विहितत्वादियम्प्रथमा पञ्चम्यर्थवाचिनीत्यर्थः,
वचनव्यत्ययो वा, अयमभिप्रायः योजनाद्वये ऽपि इव-शब्दाध्याहारो
वज्र-शब्दस्यामुख्यत्वं वाऽवश्यम्भवेत्, प्रथमाऽन्तयोजनायां प्रथमाविभ-
क्तिस्वारस्यं सामानाधिकरण्यस्वारस्यञ्चाभग्नं स्यात्, भय-शब्दस्य तद्धेतु-
लक्षणाश्रयणं यत्तच्छब्दाध्याहारः, पदैकवाक्यतायां सम्भवन्त्यां तत्परित्यागेन
वाक्यैकवाक्यभावाङ्गीकार इति त्रयो दोषाः । योजनान्तरे प्रथमायाः
पञ्चम्यर्थताश्रयणास्वारस्यं, सामानाधिकरण्यभङ्गश्च द्वौ दोषौ भयपद-
प्रातिपदिकमुख्यत्वं यत्तच्छब्दानध्याहारः पदैकवाक्यता भयादस्येत्यनन्तर-
वाक्यैकरूप्यञ्चेति चत्वारो गुणाः, अतो दोषभूयस्त्वगुणलाघवयुक्तनिर्वाहा-

१ वैधर्म्यादिति पा० ।

दपि दोषलाघवगुणभूयस्त्वयुक्तनिर्वाहो वरमिति कृत्स्नजगद्व्यापकत्वलक्ष-
णस्य प्रशासनस्य परमात्मधर्मत्वं श्रुत्यन्तरप्रसिद्ध्योपपादयति—

भा० ण्यर्थे प्रथमा, अयञ्च परस्य ब्रह्मणः स्वभावः "एतस्य वा
अक्षरस्य प्रशासने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठतः
भीषाऽस्माद्वातः पवते भीषोदेति सूर्य्यः भीषाऽस्मादग्निश्चे-
न्द्रश्च मृत्युर्धावति पञ्चम" इति परस्य ब्रह्मणः पुरुषो-
त्तमस्यैवंविधैश्वर्यावगतेः, इतश्चाङ्गुष्ठप्रमितः पुरुषोत्तमः—

सू० ज्योतिर्दर्शनात् ॥ ४२ ॥

तयोर्द्वयोरेवाङ्गुष्ठप्रमितविषययोर्वाक्ययोर्मध्ये परब्रह्मासा-
धारणं सर्वतेजसां छादकं सर्वतेजसां कारणभूतमनुभावकं
चाङ्गुष्ठप्रमितस्य ज्योतिर्दृश्यते "न तत्र सूर्यो भाति न चन्द्र-
तारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्त-
मनुभाति सर्वन्तस्य भासा सर्वमिदं विभाती"ति, अयमेव
श्लोक आथर्व्वणे परब्रह्माधिकृत्य श्रूयते, परञ्ज्योतिष्ट्वञ्च
सर्वत्र परस्य ब्रह्मणः श्रूयते यथा "परं ज्योतिरुपसम्पद्य
स्वेन रूपेणाभिनिष्पद्यते" तं देवा ज्योतिषां ज्योतिरायु-
र्होपासतेऽमृतमि"ति "अथ यदतः परो दिवो ज्योति-
र्दीप्यते" इत्यादिषु, अतः अङ्गुष्ठप्रमितः परं ब्रह्म॥ प्रमिता-
धिकरणं समाप्तम् ॥

टी० "अयञ्चे"ति, सू० ज्योतिर्दर्शनात्, एतस्मकारणहेतुत्वमेव युक्त-
मिति दर्शयति "वाक्ययोर्मध्य" इति, न तत्र सूर्य्य इत्यादिमन्त्रे पूर्वार्द्ध-
स्यार्थमाह "सर्वतेजसां छादकमि"ति, उत्तरार्द्धस्य पूर्वपादार्थमाह "सर्वते-
जसां कारणभूत"मिति, अनुभानं—पश्चाद्भानन्तेन कार्यकारणभावस्सिद्धः

Digitized by Google

पौर्वापर्यनियमे हि कार्यकारणभावः इति भावः। चतुर्थपादार्थमाह "अनुग्राहकमि"ति, यस्यादित्यो भामुपयुज्य भातीत्यादिश्रुतिश्चानुग्राहकत्वे प्रमाणं ज्योतिर्दृश्यत इति ज्योतिर्दीप्तिः ज्योतिष्मद् भ्राजमानं महस्वदिति प्रयोगात्। ननु कथङ्कारणत्वानुग्राहकत्वे सम्भवतः, तद्धि प्राकृततेजोविजातीयं सजातीयतेजो हि तेजसाङ्कारणमनुग्राहकं च दृष्टं, यथा दीपो दीपान्तरस्य, दीपादिप्रभा च चाक्षुषप्रभाया इति, उच्यते निमित्ततया कारणत्वोपपत्तिः उपादानस्यैव हि साजात्यापेक्षा आहङ्कारिकस्य विजातीयस्याऽपि चक्षुषस्तेजो द्रव्येणाप्यायनं च दृष्टं निमित्तकारणत्वन्तेजःकरणभूतवस्त्वनुग्राहकतया भवति, यथा कालस्य निमित्तत्वं कारणभूतवस्त्वनुग्राहकतया, यथा च सलिलदहनातपादीनाङ्घटोत्पत्तौ निमित्तत्वम्मृद्द्रव्यसंयोगेन तत्र किञ्चित्करतया भवति, एवमप्राकृततेजोऽपि प्राकृततेजस उत्पत्तौ तदुपादानद्रव्यानुग्राहकतया निमित्तम्भवतीत्यभ्युपगन्तव्यं प्रमाणबलादुत्पन्नस्याऽपि तेजसः स्वकार्यकारणसामर्थ्यस्य तत्सम्बन्धापेक्षत्वात्तदनुग्राहकं यथा चाक्षुषरश्मेश्चन्द्रातपादिः, यथा शुष्ककण्ठस्य ग्रासाभ्यवहारे पानीयास्वादनं, यथा मनसो धारणग्रहणस्मरणादिपाटवे सम्यगाहारः उक्तलक्षणकारणत्वानुग्राहकत्वाभिप्रायेण भगवता पराशरेण मूर्त्तब्रह्मशब्दवाच्यदिव्यविग्रहविशिष्टत्वमुक्त्वा "ततो जगज्जगत्तस्मिन् स जगच्चाखिलम्मुन इत्युच्यते, स जगदिति सामानाधिकरण्यन्धारकत्वनिबन्धनम् अस्य वाक्यस्य परोक्तार्थोऽनुपपन्नः, तथा हि सूर्यादिभिरप्रकाश्यत्वं न पूर्वार्द्धस्यार्थः भाति–शब्दस्य ज्ञानवाचित्वाभावात्स हि दीप्त्यर्थः, भा दीप्ताविति हि धातुः। किञ्च यदि भासयितृत्वं' निषिध्यते तदा ब्रह्मविषयज्ञानहेतुतानिषेध इति च वक्तुं शक्यते इह च भानमेव निषिध्यते न भासयितृत्वं, यदि णिजर्थान्तर्भावनमिष्टन्तदा तत्रेति सप्तमी न घटते कर्मत्वस्यैव प्राप्तत्वादतोऽऽर्थान्तरानुपपत्तेः। "दिवि सूर्य्यसहस्रस्य भवेद्युगपदुत्थिता यदि भास्सदृशी सा स्यात् भासस्तस्य महात्मनः" इति स्मृत्यानुगुण्याच्च तदीयदीप्तिसाक्षात्कारसम्भवे तेजोऽन्तराणामभिभूतत्वमेवात्र प्रतिपाद्यं, तृतीयपादे चाधिष्ठानस्फुरणाधीनमध्यस्तस्फुरणमुच्यत इति चायुक्तं तमिति पुँल्लिङ्गान्तस्य तच्छ-

Digitized by Google

ब्दस्य चिदचिद्भावर्तकानन्तगुणविशिष्टपरमपुरुषविषयत्वात्तस्मिन्भासमाने ऽध्यासानुपपत्तेरध्यस्तवस्तुस्फुरणायोगात्सर्वज्ञत्वादिगुणको निर्दोषः परमपुरुषो हि मुण्डके प्रकृतः कठवल्ल्याञ्चाक्षमेवश्योऽनन्तमहिमा सर्वनियन्ता सर्वाधारो विष्णु-शब्दवाच्यस्सर्वस्मात्परस्स एव पुरुषः प्रकृतः श्वेताश्वतरे च सहस्रशीर्षत्वसहस्राक्षत्वादिमान्स्वाभाविकपरज्ञानशक्त्यादिगुणकः सत्त्वप्रवर्तको महापुरुषः प्रकृतः सर्वज्ञत्वादयश्च गुणाः समस्तचिदचिद्भावर्तकाः, तैर्विशिष्ट एव तच्छब्देन परामृश्यते न वस्तुमात्रं तच्छब्दस्य प्रकृतपरामर्शित्वस्वारस्यभङ्गात् पुँल्लिङ्गनिर्देशस्य प्रकृतपुरुषविशेषताज्ञापकत्वाच्च अतस्तमेव भान्तमिति तद्दीप्तियोगस्य स्वाभाविकत्वं नित्यत्वमप्रतिहतत्वमितरतेजसान्तद्धेतुकत्वं चोक्तं तमेव भान्तं तं भान्तमेवेति ह्यन्वयः तमेवेत्यन्वये सति व्यवच्छेद्यतेजोऽन्तरासम्भवात्तथाऽन्वयेऽपि न विरोधः। यद्यधिष्ठानस्फुरणाधीनमध्यस्तस्फुरणमित्युच्येत तदा तस्य भासा सर्वमिदं विभातीति पुनरुक्तिश्च स्यात्, तस्य वृत्तिरूपज्ञानेन सर्वम्भातीत्यर्थ इति चेत् न भाशब्दस्य वृत्तिज्ञानवाचित्वाभावात्, अतो भगवत्तेजसस्सर्वतेजोऽनुग्राहकत्वमेव चतुर्थपादार्थः अतः प्रकरणस्यरुक्मवर्णश्रुतिपुरुष-शब्दप्रत्यभिज्ञापितादित्यवर्णश्रुतिप्रसिद्धदिव्यविग्राहद्वारकनिरवधिकदीप्तिविशिष्टोऽनेन मन्त्रेण प्रतिपाद्यते परमात्मपरतया निर्णीतप्रकरणस्थतया प्रत्यभिज्ञायमानत्वाच्च अस्य मन्त्रस्य परमात्मसाधकत्वमित्याह "अयमेव श्लोक" इति, एवं शब्दतः प्रत्यभिज्ञानं हेतुतयोक्तम्, अर्थतः श्रुत्यन्तरप्रत्यभिज्ञानञ्चास्य मन्त्रस्य परमात्मत्वसाधकत्वोपपादकमित्यभिप्रायेणाह "परं ज्योतिष्ट्वञ्चे"ति, आदि-शब्देन तच्छुभ्रं ज्योतिषां ज्योतिः नारायणपरो ज्योतिरित्याद्यभिप्रेतम्, एवं स्वपक्षसाधकतया श्रुत्यन्तरस्थवाक्यत्रयोपादानेनार्थात् परपक्षव्युदासश्च सिद्धः परैः खलु इदं सूत्रम् "एष सम्प्रसादोऽस्माच्छरीरात्समुत्थायेत्यादिवाक्यविषयमधिकरणान्तरं व्याख्यातन्तत्र ज्योतिश्शब्दस्यादित्यपरत्वम्पूर्वपक्षीकृत्य परब्रह्मपरत्वं सिद्धान्तितन्तदयुक्तम्पूर्वपक्षानुत्थानात् ज्योतिश्शब्दाच्छ्रुतिर्हि प्रकरणात् बलीयसी अत उत्थानमिति चेच्च किं ज्योतिःश्रुति-

Digitized by Google

रादित्यासाधारण्यात्तत्साधिका? उत साधारण्येऽपि प्रवृत्तिनिमित्तभूतप्रकाशकत्वपौष्कल्याद्वा, न प्रथमः "आपो ज्योतिश्च पञ्चमम्" "अग्निर्ज्योतिरहः शुक्ल" 'ज्योतींषि शुक्राणि च यानि लोके" "ज्योतींषि विष्णुर्भुवनानि विष्णु"रिति बह्वर्थसाधारणतया प्रयुज्यमानत्वात्, न द्वितीयः नारायणपरो ज्योतिः तच्चुभं ज्योतिषां ज्योतिस्तन्द्वेषा ज्योतिषां ज्योतिरिति नारायण एव प्रवृत्तिनिमित्तपौष्कल्यदर्शनादित्यभिप्रायेण तन्द्वेषा ज्योतिषामिति वाक्यम् उपात्तं ज्योतिषां ज्योतिरित्युक्त्वात् ज्योतिष्ट्वं तत्प्रकर्षश्च ह्यवगम्यते, अतो ज्योतिश्शब्दस्य साधारण्यं भगवत्येव प्रवृत्तिनिमित्तपौष्कल्यञ्च तेन सिद्धम्, आदित्यासाधारण्याभ्युपगमेऽपि ज्ञतकरत्वज्ञापनाय, अथ यदतः पर इति वाक्यमुदाहृतम् "अथ यदतः परो दिवो ज्योतिर्दीप्यत" इति, एतद्वाक्यविषयेण "ज्योतिश्चरणाभिधानादि"त्यधिकरणेन ज्योतिश्शब्दश्रुतेः परिहृतत्वात्, तत्र हि पादोऽस्य विश्वाभूतानीति प्रकरणं स्थितमपि तदनादृत्य ज्योतिश्शब्दस्य तमःप्रतिद्वन्द्विनि प्रसिद्धतयाऽऽदित्यविषयत्वं परैरेवोक्तम्परिहृतञ्चातः ज्ञतकरत्वं परशब्दविशेषितज्योतिश्शब्दोऽपि नादित्ये रूढः परत्वस्य निरतिशयस्य तस्मिन्नसम्भवादेव, गुणयोगादपि नादित्यप्रतीतिः, उत्थानश्रुतिः त्वा–श्रुतिश्च पूर्वपक्षहेतुरिति चेन्न परब्रह्मविषयत्व एव तयोरुपपत्तेर्वक्ष्यमाणत्वात्, माभूत्तयोः परब्रह्मविषयत्वसम्भवः तथाऽपि नारम्भणीयता "उत्तराच्चेदाविर्भूतस्वरूपस्त्वि"ति सूत्रेण अस्य वाक्यस्य परब्रह्मप्राप्तिप्रतिपादकत्वस्य समर्थितत्वात्, यत्तत्परं ज्योतिरुपसम्पत्तव्यं श्रुतं तत्परं ब्रह्म तच्चापहतपाप्मत्वादिधर्मकन्तदेव च जीवस्य पारमार्थिकं रूपमिति हि तैरुक्तं श्रुतिकृतं विवेकज्ञानं शरीरात्समुत्थानं विवेकज्ञानफलं स्वरूपेणाभिनिष्पत्तिरिति समुत्थानादिति श्रुतिनिर्वाहश्च तैरेव कृतः, अतः ज्ञतकरत्वम्, दह परब्रह्मोपसंपत्त्याऽऽविर्भूतस्वरूपाविषयत्वसमर्थनमुपजीव्य दहराकाशस्य परमात्मत्वन्तत्र समर्थितमिति चेत्तर्हि उत्तराच्चेति सूत्रानन्तरं ज्योतिर्दर्शनादिति सूत्रं निवेशयितव्यं हेतुप्रयोगानन्तरमेव हेत्वसिद्धेः परिहरणीयत्वात् अपहतपाप्मत्वादिगुणकस्यात्मनोवक्तव्यत्वेन अनुवृत्तिदर्शनेन हि तदसि-

Digitized by Google

द्धिरिह परिह्रियते, इदञ्च तत्रैवोक्तम् अपहतपाप्मत्वादिगुणकमात्मानं प्रस्तुत्य "एतं त्वेव ते भूयोऽनुव्याख्यास्यामी"ति तमाकृष्य तस्य स्वप्नसुषुप्त्याद्युपन्यासक्रमेण परमार्थस्वरूपाविर्भावोपदेशपरमिदं वाक्यमिति तत्रैव तेनैव प्रतिपादनात्तदप्रतिपादने चास्य वाक्यस्याविर्भूतस्वस्वरूपविषयत्वासिद्धेः, अतः कृतकरत्वमन्यथा तत्रैव एतत्सूत्रनिवेशनं वा प्रसजेत् अपरे त्वाहुः शरीरादुत्थानस्य स्वेन रूपेणाभिनिष्पत्तेश्च मध्ये श्रूयमाणा परंज्योतिःप्राप्तिर्नामादित्यप्राप्तिः अर्चिरादिमार्गप्रत्यभिज्ञानात् तत्र ह्यादित्यादिप्राप्तिर्मध्ये श्रूयते आदित्यस्य परत्वञ्च अर्चिराद्यपेक्षयेति पूर्वपक्षोत्थानमिति तदप्यत एव निरस्तम्, उत्तराच्चेति सूत्र एवास्य वाक्यस्य परब्रह्मोपसम्पत्त्याऽऽविर्भूतस्वरूपात्मविषयत्वस्य समर्थितत्वादिति । प्रमिताधिकरणं समाप्तम् ॥

सू० आकाशोऽर्थान्तरत्वादिव्यपदेशात्, पूर्वं दहराकाशस्य परब्रह्मत्वे

अर्थान्तरत्वादिव्यपदेशाधिकरणं ५ ।

सू० आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४३ ॥

भा० छान्दोग्ये श्रूयते "आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मे"ति, तत्र संशयः किमयमाकाश-शब्दनिर्दिष्टो मुक्तात्मा? उत परमात्मे? ति, किं युक्तं? मुक्तात्मेति, कुतः?

टी० सू० आकाशोऽर्थान्तरत्वादिव्यपदेशात्, पूर्वं दहराकाशस्य परब्रह्मत्वे साध्यमाने "अल्पश्रुतेरिति चेत्तदुक्तमि"ति सूत्रेणाल्पश्रुतिः परिहृता, अल्पश्रुतिप्रसङ्गेन अङ्गुष्ठप्रमितस्य परत्वं साधितं तत्प्रसङ्गेन अधिकरणत्रयमुक्तम् । अथ पूर्वप्रकृतदहरविद्याया बुद्धिस्थत्वेन तदनन्तरभूतस्य आकाशो ह वै नामेत्यादिप्रकरणस्य जीवपरत्वमाशङ्क्य परिह्रियत इति सङ्गतिः, मुक्तस्य प्रकृतत्वान्मुक्तात्मपरमात्मविषयसंशयमाह "किमयमि"ति, परैस्तु भूताकाशः पूर्वपक्षितः, तथा च सत्यनारम्भणीयतैव स्यादाकाशस्तल्लिङ्गादित्यनेनैव चरितार्थत्वात्, तत्र हि अस्य लोकस्य का गतिरित्याकाश इति होवाचेत्याद्याकाशश्रुत्या भूताकाशपरत्वमाशङ्क्य सर्वभूतकारणत्वज्यायस्त्वपरायणत्वादीनां भूताकाशेऽन्वयानर्हत्वात् ब्रह्म

आकाशशब्दाभ्यासे सत्यपि तद्बाधेन परमात्मपरत्वं निर्णीतम्, इहापि नामरूपयोर्निर्वोढृत्वब्रह्म-शब्दामृतत्वादिभिराकाशस्य ब्रह्मत्वं निश्चीयते इति न वैषम्यं दहराकाशस्य तदन्तर्वर्त्यन्वेष्टव्यान्तरप्रतीतेरन्वेष्टव्यस्यैव तत्रत्यं परमात्मलिङ्गं न तु दहराकाशस्येति शङ्काविशेषसम्भवाद्दहराधिकरणोत्थानं युक्तम्, इह तु न तथा शङ्का दृश्यते । नन्ववकाशप्रदानद्वारा नामरूपनिर्वहणहेतुत्वमाकाशस्य युज्यते, अतः स्ववाक्ये परमात्मलिङ्गाभावो वैषम्यमिति, उच्यते किमत्र स्ववाक्ये परमात्मलिङ्गाभावः स्वरसार्थस्वीकारेण वर्ण्यते? उत क्लिष्टार्थकल्पनया? न प्रथमः, स्वयमप्यन्येन निर्वोढव्यनामरूपस्याकाशस्य सर्वनामरूपनिर्वोढृत्वानुपपत्तेः तस्य च परमात्मलिङ्गभूतस्य स्ववाक्यस्थत्वेन सर्वाणि ह वा इत्यादिवाक्यादविशेषात्, नापि द्वितीयः, अवकाशप्रदानद्वारा सर्वभूतोत्पत्तिकारणत्वस्याप्याकाशे सम्भावितया स्ववाक्ये परमात्मासाधारणधर्माभावस्य तत्र चात्राविशेषात्·

मू० "अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामी"ति मुक्तस्यानन्तरप्रकृतत्वात् "ते यदन्तरे"ति च नामरूपविमुक्तस्य तस्याभिधानात्, नामरूपयोर्निर्वोढेति च स एव पूर्वावस्थायामुपलिलक्षयिषितः, स एव हि देवादिरूपाणि नामानि च पूर्वमबिभ्रत्

टी० अपरैस्तु ब्रह्म-शब्दस्य मुक्तात्मपरत्वं वदद्भिरेवाकाश-शब्दस्य भूताकाशपरत्वमुपपादितं तत्राप्याकाशविषयनिरूपणस्य कृतकरत्वन्तुल्यम्, अतः परपक्षे पूर्वपक्षानुदय एव, अतः परमात्मलिङ्गानां भूताकाशेऽन्वयानर्हतयाऽऽकाश-शब्दस्य यौगिकार्थे प्राप्ते सत्यनन्तरपूर्ववाक्ये मुक्तात्मनः प्रकृतत्वान्नामरूपनिर्वोढृत्वादिलिङ्गाच्च मुक्तात्मपरमात्मविषयत्वेन संशयोत्थानं युक्तमित्यभिप्रायेण मुक्तात्मपरमात्मविषयत्वेन संशयन्दर्शयति "तत्रे"ति किमाकाश-शब्दनिर्दिष्टो मुक्तः? उत पर-

Digitized by Google

मात्मे?ति संशयः, तदर्थं धूत्वा शरीरमिति मुक्तस्यानन्तरप्रकृतत्वमाकाश-शब्दस्य मुक्तपरतामवगमयति नेति?ति किं मुक्तस्य नामरूपनिर्वोढृत्वं सम्भवति ने?ति किमत्र नामरूपनिर्वोढृत्वं नामरूपभाक्तया? उत नामरूपव्याकर्तृतये?ति, किं ते यदन्तरेति निर्देशः कर्तृतया निर्वोढृत्वमुपपादयति ने?ति, यदा नोपपादयति तदा नामरूपभाक्त्वमेव तन्निर्वोढृत्वमिति तस्य बन्धदशायां जीवेऽपि बन्धदशायां सम्भवेन मुक्तात्मनः प्रकृतत्वमाकाश-शब्दस्य मुक्तपरत्वावगमकमित्याकाशो मुक्तात्मेति पूर्वः पक्षः, यदा ते यदन्तरेति निर्देशः कर्तृतया नामरूपनिर्वोढृत्वमुपपादयति तदा नामरूपनिर्वोढृत्वं नाम तत्कर्तृत्वरूपमिति तस्य मुक्तात्मन्यसम्भवान्मुक्तात्मनः पूर्वप्रकृतत्वेऽप्यस्मिन्वाक्ये मुक्तात्मनोऽवगत्यनुपपत्तेराकाश-शब्दनिर्दिष्टः परमात्मेति राद्धान्तः, ते यदन्तरेति उभयोर्मध्यस्थितत्वात्तदस्पृष्टत्वं फलितम्मध्यस्यस्यान्यतरपक्षपाताभावात्तेन पूर्वोक्तमुक्तप्रत्यभिज्ञानादित्यर्थः, मुक्तस्य नामरूपनिर्वोढृत्वङ्कथ?मित्यत्राह "नामरूपे"ति नामरूपयोर्निर्वहितेति श्रुत्यनुवादः न त्वर्थानुवादः, उपलक्षणतयाऽभिमतनिर्वोढृत्वम्पूर्वावस्थायामपि नास्तीत्यत्राह "स एव ही"ति, नामरूपनिर्वोढृत्वम् न नामरूपकर्तृत्वम् अपि तु नामरूपभाक्त्वं, वहनं हि धात्वर्थः उपसर्गाणां नानार्थत्वसम्भवाच्चितरां वोढृत्वं निर्वोढृ-शब्दार्थः स्यादिति पूर्वपक्षिणोऽभिप्रायः । तर्हि कथममृतत्वादिक?मित्यत्राह-

मू॰ तस्यैव नामरूपविनिर्मुक्ता साम्प्रतिक्यव्यवस्था तद्ब्रह्म तदमृतमित्युच्यते आकाश-शब्दस्य तस्मिन्नप्यसङ्कुचितप्रकाशयोगादुपपद्यते । ननु दहरवाक्यशेषत्वादस्य स एव दहराकाशोऽयमिति प्रतीयते तस्य च परमात्मत्वं निर्णीतं, नैवम्प्रजापतिवाक्यव्यवधानात्, प्रजापतिवाक्ये च प्रत्यगात्मनो मुक्त्यवस्थान्तं रूपमभिहितम्, अश्व इव रोमाणि विधूय पापमिति स एव मुक्तावस्थः प्रस्तुतः, अतोऽत्राकाशो मुक्ता-

Digitized by Google

त्येति प्राप्त उच्यते "आकाशोऽर्थान्तरत्वादिव्यपदेशात्, आकाशः परब्रह्म कुतः? अर्थान्तरत्वादिव्यपदेशात् अर्थान्तरत्वव्यपदेशस्तावत् "आकाशो ह वै नामरूपयोर्निर्वहिते"ति नामरूपयोर्निर्वोढृत्वं बद्धमुक्तोभयावस्थात्प्रत्यगात्मनोऽर्थान्तरत्वमाकाशस्योपपादयति बद्धावस्थस्त्वयं कर्म्मवश्यो नामरूपे भजमानो न नामरूपे निर्वोढुं शक्नुयात्, मुक्तावस्थस्य जगद्व्यापारासम्भवान्न नितरां नामरूपनिर्वोढृत्वम्, ईश्वरस्य तु निखिलजगन्निर्माणधुरन्धरस्य नामरूपयोर्निर्वोढृत्वं श्रुत्यैव प्रतिपन्नम् "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" "यस्सर्वज्ञस्सर्ववित् यस्य ज्ञानमयन्तपः तस्मादेतद् ब्रह्म नामरूपमन्नं च जायते" "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते" इत्यादिषु अतो निर्वोढ्यनामरूपात् प्रत्यगात्मनो नामरूपयोर्निर्वोढाऽयमाकाशोऽर्थान्तरभूतः परमेव ब्रह्म.

टी० "तस्यैवे"ति, साम्प्रतिकीति नामरूपविमोचनानन्तरकालभाविन्यवस्था तस्य कालस्य प्रकृतत्वात् साम्प्रतिकीत्युच्यते, राद्धान्ते व्यपदेशस्तावदिति प्रवर्त्यत इति शेषः । यद्वा नामरूपयोर्निर्वहितेति व्यपदेश इत्यन्वयः । अर्थान्तरत्व-शब्दस्तदुपपादकधर्मं लक्षयति अर्थान्तरत्वमाकाशस्योपपादयतीति ह्युक्तं भेदकधर्मव्यपदेशादित्यर्थः । नामरूपयोरित्यादि नामरूपनिर्वोढृत्वञ्च स्पष्टं भेदकधर्मः, अवयवशक्त्या निर्वोढृ-शब्दस्य वहनमात्रपरत्वादपि "रूढिर्योगमपहरती"ति न्यायात् कर्तृपरत्वं युक्तमिति भावः । नन्वेवं सति ते यदन्तरेति कथं मुक्तस्यानन्तरमभिधानमित्यत्राह-

सू० तदेवोपपादयति "ते यदन्तरे"ति, यस्मादेवायमाकाशो

नामरूपे अन्तरा—ताभ्याम् अस्पृष्टोऽर्थान्तरभूतः तस्मात्तयोर्निर्वोढाऽपहतपाप्मत्वात्सत्यसङ्कल्पत्वाच्च निर्वहितेत्यर्थः आदि–शब्देन ब्रह्मत्वाऽऽत्मत्वामृतत्वानि गृह्यन्ते निरुपाधिकवृहत्त्वादयो हि परमात्मन एव सम्भवन्ति, तेनाकाशः परमेव ब्रह्म, यत्पुनरुक्तम्भूत्वा शरीरमिति मुक्तोऽनन्तरः प्रकृत इति तत्र ब्रह्मलोकमभिसम्भवानीति परस्यैव ब्रह्मणोऽनन्तरप्रकृतत्वात्, यद्यपि अभिसम्भवितुर्मुक्तस्याभिसम्भाव्यतया परब्रह्म निर्दिष्टं तथाऽप्यभिसम्भवितुर्मुक्तस्य नामरूपनिर्वोढृत्वाद्यसम्भवादभिसम्भाव्यं परमेव ब्रह्माच प्रत्येतव्यं, किञ्च आकाश–शब्देन प्रकृतस्य दहराकाशस्य अत्र प्रत्यभिज्ञानात् प्रजापतिवाक्यस्याप्युपासकस्वरूपकथनार्थत्वाद्दहरस्य एव दहराकाशः प्राप्यतयेहोसंकीर्त्यत इति युक्तम्, आकाश–शब्दश्च प्रत्यगात्मनि न क्वचिद् दृष्टचरः, अतो ऽत्राकाशः परं ब्रह्म

टी० "तदेवोपपादयति ते यदन्तरेती"ति, कर्मकृतनामरूपभाक्त्वाभावात्तयोः स्वेच्छया निर्वोढा परमात्मा, न हि कर्मपराधीनचेष्टितस्य बद्धस्य जगद्व्यापारानुगुणसङ्कल्पादिरहितस्य मुक्तस्य च नामरूपनिर्वोढृत्वं सम्भवतीत्यर्थः, निर्वहितेति श्रुतिस्थपदानुकारः । आदि–शब्दार्थमाह 'आदि–शब्देने"ति, निरुपाधिक–शब्दोऽनवच्छिन्नत्वपरः, उपाधिरवच्छेदकः जीवस्य ज्ञानतो बृहत्त्वं तच्च परमात्मप्रसादायत्तं बृहत्त्वादय इति धर्मा इति शेषः, धूत्वेत्यादि ब्रह्मैव लोको ब्रह्मलोकः प्रथमानिर्दिष्टस्याभिसम्भवितुः प्राधान्येन प्राकरणिकत्वस्वारस्येऽपि लिङ्गबलात्प्राकरणिकत्वस्वारस्यभङ्गो युक्त इत्यभिप्रायेणाह "यद्यपी"ति प्रवान्तरप्रकारेण पूर्ववाक्यस्य जीवस्वरूपपरत्वमभ्युपेत्य परिहृतं, वस्तुतस्तु ब्रह्मलोक-

श्रुत्यनुगृहीतमहाप्रकरणबलात्पूर्ववाक्यमपि न जीवपरं किन्तु तस्य परमप्राप्यभूतपरब्रह्मपरत्वमेवेत्याह "किञ्चाकाशे"ति, प्रजापतिवाक्यस्य व्यवधायकत्वशङ्काव्यावृत्त्यर्थमाह "प्रजापतिवाक्यस्ये"ति, हेत्वन्तरमप्याह "आकाश-शब्दश्चे"ति, उत्तरसूत्रमवतारयितुं शङ्कामाह–

मू॰ अथ स्यात्प्रत्यगात्मनोऽर्थान्तरभूतमात्मान्तरमेव नास्ति ऐक्योपदेशात् द्वैतप्रतिषेधाच्च, शुद्धावस्थ एव हि प्रत्यगात्मा परमात्मा परं ब्रह्म परमेश्वर इति च व्यपदिश्यते, अतः प्रकृतान्मुक्तात्मनोऽभिसम्भवितुर्नार्थान्तरमभिसम्भाव्यो ब्रह्मलोकः, अतो नामरूपयोर्निर्वहिताऽऽकाशोऽपि स एव भवितुमर्हतीति, अत उत्तरम्पठति–

सू॰ सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४३ ॥

व्यपदेशादित्यनुवर्त्तत इति सुषुप्त्युत्क्रान्त्योः प्रत्यगात्मनोऽर्थान्तरत्वेन परमात्मनो व्यपदेशात्प्रत्यगात्म–

टी॰ "अथ स्यादि"ति, ननु कथमात्मान्तरमेव नास्तीत्युच्यते? त्रिपादी ह्यन्ययोगव्यवच्छेदपरा, प्रथमपाद एव चिदचिद्विलक्षणवस्तुसद्भावस्समर्थितः, उच्यते सिद्धिस्तावदुभयविधा साधकप्रमाणसम्भवाधीना बाधकप्रमाणव्युदासाधीना च बाधकप्रमाणव्युदासेन साधकसत्तायत्ता सिद्धिः स्थेयसी भवति, तदसम्भवे साधकमात्राधीना सिद्धिरस्थिरा, अस्थिरं चासत्कल्पम्, अत्र प्रथमेन पादेन साधकसद्भावायत्तसिद्धौ दर्शितायामप्यैक्योपदेशभेदनिषेधरूपबाधकव्युदसनस्य सूत्रकारैरितः पूर्वमकृतत्वात्साधकाधीनसिद्धेरस्थिरप्रायत्वान्नास्तीत्युक्तिः प्रत्यगात्मनोऽर्थान्तरभूतमात्मान्तरं दृढप्रमाणसिद्धं न भवतीत्यर्थः, चतुर्थपादेऽपि दृशव्यपदेश उक्ताभिप्रायो वेदितव्यः । यद्वा त्रिपाद्या अन्ययोगव्यवच्छेदपरत्वं प्राचुर्यनिबन्धनमिति नानुपपत्तिः, ऐक्योपदेशाद् द्वैतप्रतिषेधाच्चेति मुक्तप्राप्यतयोक्तस्य ब्रह्मलोक-शब्दनिर्वाच्यतया बृहदारण्यके "प्रत्यभिज्ञायमानस्य एकधैवानुद्रष्टव्यं

Digitized by Google

स वा एष महानज आत्मा योऽयं विज्ञानमयः नेह नानास्ति किञ्चनेति जीवैक्यप्रतिपादनाद् भेदनिषेधाच्चेत्यर्थः, तत्र "एष ब्रह्मलोकः सम्राडिति होवाचे"ति प्रकरणावसाने तस्य परमात्मनो ब्रह्मलोकशब्दनिर्देशोऽवगम्यते च शब्दः समुच्चये, ऐक्योपदेशभेदनिषेधयोः प्रत्येकं भेदविरोधित्वात् इतरेतरयोगे वा च-शब्दः, ऐक्यस्यामुख्यत्वशङ्कानिवारकत्वात् भेदनिषेधस्य नामरूपयोर्निर्वहितेति पूर्ववत् यथाश्रुत्यनुवादः, अत एव हि नामरूपयोर्निर्वाढृत्वमिति स्वयन्थे निर्दिष्टमापाततोऽर्थान्तरत्वे प्रतीतेऽपि न तत्सिद्धान्तीकर्त्तव्यमिति शङ्कायन्यस्यार्थः सू० सुषुप्त्युत्क्रान्त्योर्भेदेन, सूत्रस्याकाङ्क्षां पूरयति "व्यपदेशादिति वर्त्तत"इति, यथा "अथ शब्दानुशासन"मित्यत्र केषां शब्दानामित्युक्ते समस्तस्याप्यनुशासनपदस्य विभागेनानुषङ्गः तथेहापीति भावः । सूत्रे सुषुप्त्युत्क्रान्त्योरिति सप्तमी । कस्य कस्माद्भेद इत्यत्राह "प्रत्यगात्मन"इति, अर्थान्तरत्वव्यपदेशरूपहेत्वसिद्धिशङ्कापरिहारपरत्वादस्य सूत्रस्यार्थसिद्धं साध्यनिर्देशं दर्शयति-

सू० नोऽर्थान्तरभूतः परमात्मा अस्त्येव, तथा हि वाजसनेयके "कतम आत्मा योऽयं विज्ञानमयः प्राणेष्वि"ति प्रकृतस्य प्रत्यगात्मनः सुषुप्त्यवस्थायामकिञ्चिज्ज्ञस्य सर्वज्ञेन परमात्मना परिष्वङ्ग आम्नायते "प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमि"ति तथोत्क्रान्तावपि "प्राज्ञेनात्मनाऽन्वारूढ उत्सृजन् याती"ति, न च स्वपत उत्क्रामतो वाऽस्य किंचिज्ज्ञस्य तदानीमेव स्वेनैव सर्वज्ञेन सता परिष्वङ्गोऽन्वारोहो सम्भवतः, न च क्षेत्रज्ञान्तरेण तस्याऽपि सर्वज्ञत्वासम्भवात् । इतश्च प्रत्यगात्मनोऽर्थान्तरभूतः परमात्मेत्याह-

सू० पत्यादिशब्देभ्यः ॥ ४४ ॥

विज्ञाने ऽन्वयमपि समर्पयेत् । तद्रूपस्यान्वयमन्तरेणापि शक्यनिरूपणत्वात् । नान्वयं विना तद्रूपं क्वचिदपीति चेत् । तत्किं लिङ्गमपि न लिङ्गिनं विनेति तदपि तद्विरूपणाधीननिरूपणमस्तु तथा न लिङ्गत्वमपीति अनुमानमुत्पथसङ्कटमापद्येत* । तस्मादन्वितं शब्दसामर्थ्यगोचर इत्यभ्युपगच्छता ऽर्थस्वरूपं च तदन्वयश्च तद्विषयतया ऽभ्युपगते भवतः । तदिह यदि पदसामर्थ्यस्य स्वरूपमात्रगोचरतया ऽन्वयधिय उदयमुपपादयितुं शक्ष्यामः ततस्तावतैव परितोक्ष्यामः । तदन्वयविषयत्वकल्पनाच्च विरंस्यामो लाघवाय । अथ तु सहस्रेणाप्यनुसरणप्रकारैः प्रयत्नानामर्थस्वरूपमात्रोपक्षीणवृत्तिनि पदसामर्थ्ये वाक्यार्थबुद्ध्युदयासंभवः ततः परावृत्य शब्दसामर्थ्यस्यैवोभयविषयत्वं कल्पयिष्यामः । किं तावत्प्राप्तम् ।

वाच्यरूपाविनाभूतव्यतिषक्तदशापराः ।
समभिव्याहृतेः शब्दा भवन्त्यनुपपत्तितः ॥

सामर्थ्याधिगमो हि भावानां न मानान्तराधीनजन्मा किं तु कार्योत्पत्त्यन्यथाऽनुपपत्तावायतते । तदियमपि व्यतिषक्तप्रतीतिः कथमपि दृष्टादृष्टप्रकारभेदसहायादुपपद्यमानोत्पत्तिर्न पदसामर्थ्यमात्मनि प्रमाणयितुमर्हति । अनन्यलभ्यः शब्दार्थ इति हि त्रैविद्यवृद्धाः । अत एवाख्यातादौ कर्त्राद्यभिधायितां नाद्रियन्ते । लभ्यते च समभिव्याहारान्यथानुपपत्त्या पदानामन्वितार्थपराणां स्वाभिधेयार्थरूपसमवेतान्वितावस्थाप्रत्यायनं लक्षणया । न हि पदान्यसमभिव्याहृतानि स्वाभिधेयप्रत्ययमात्रेण पर्यवसातुमीशते । न हि लौकिकाः पदार्थमात्रप्रत्यायनाय प्रवर्तन्ते । प्रतिपित्सितं खल्वेतदिति प्रतिपादयिष्यन्तः पदान्युच्चारयन्ति । अबुभुत्सितावबोधने त्वनवधेयवचनतया नामी लौकिका नापि परीक्षका इत्युन्मत्तवदुपेक्ष्येरन् । न च भूयो भूयः समधिगतं परं पदार्थमात्रं बुभुत्सन्ते । तदनधिगतमर्थमवगमयितुमनसः समभिव्याहरन्ति वृद्धाः पदा-

* लिङ्गस्य लिङ्गित्वस्य वा व्यापकाधीननिरूपणत्वेन तज्ज्ञानकाल एव व्यापकज्ञानाभ्युपगमे पक्षधर्मताज्ञानोत्तरजायमानप्रमितिविषयताऽनुपपत्तेरिति भावः ।

Digitized by Google

नि । तदयं समभिव्याहारः पदानामनधिगतार्थप्रत्यायनप्रयुक्तस्तदन्तरेणानुपपद्यमानः स्वाभिधेयसमवेतामनधिगतचरीमन्वितावस्थां लक्षयति । तदुक्तम् । विशिष्टार्थप्रयुक्ता हि समभिव्याहृतिर्जनैरिति । तदेवमनुपपद्यमानसमभिव्याहारपदजातजातस्मरणस्वार्थप्रत्यासत्त्या* दृश्यमानया दृश्यमानार्थगताकाङ्क्षायोग्यतासन्निधिसध्रीचीनया लक्ष्यमाणा ऽन्वितावस्था नस्मनि पदसामर्थ्यं प्रमाणयति अन्यलभ्यत्वात्† ।

स्यादेतत् । अस्तु लौकिकानां पदसंघातानां प्रेक्षावत्पुरुषसंदृब्धानां संदर्भितुरभिप्रायमनुरुध्यमानानामनुपपत्त्या ऽनधिगतार्थलक्षणापरत्वं वैदिकानां तु पुरुषसंदृब्धानामबुद्धिपूर्वाणां नानुपपत्तिर्यया‡ ऽन्वितावस्थां लक्षयेयुः । यएव लौकिकाः शब्दास्तएव वैदिका अपीति चेत्तत्किं गङ्गायां घोष इति गङ्गाशब्दो लाक्षणिक इति गङ्गायां पयांसि यादांसि गङ्गायामित्यत्रापि स एव लाक्षणिको ऽस्तु । अनुपपत्तिविरहान्नैवमिति चेत्समानमेतदबुद्धिपूर्वकेषु वैदिकेष्वपि । §अथ परस्यापि वैदिकेषु पदसंदर्भेषु कुतो ऽनधिगतार्थबोधनम् । अर्थान्तरान्वितस्वार्थे पदसामर्थ्यावगमाल्लोके वैदिकानां च लौकिकेभ्यो ऽनन्यत्वादिति चेत्तन्न । लौकिकपदानि हि पुरुषाधीनरचनया तदभिप्रायानुरोधेनान्वितार्थपरतया तमवगमयितुमीशते इति किमर्थान्तरान्वितस्वार्थाभिधानकल्पनया‖ । तथा सति वैदिकार्थप्रतीतिरनुपपन्नेति चेद् मोपपादि किं नश्छिन्नं नैयायिकानाम् । मानानुसारि हि प्रयोजनं न तु तदनुसारि मानम् । तस्मात्स्वदृष्टिपक्षपातं परित्यज्यास्थायास्तिकपथमृजुमनुसरावो निमित्तमप्रत्यूहमस्या वैदिकार्थप्रतीतेः । तत्रानादिवृद्धव्यवहारपरंपरायां

* अनुपपद्यमानः संसृष्टतात्पर्यकत्वाभावे ऽनुपपन्नः पदान्तरसमभिव्याहारो यस्य तादृशेन पदजातेन पदसमूहेन जातं स्मरणं यस्य तादृशस्यार्थस्य प्रत्यासत्त्या संबन्धेनेत्यर्थः ।

† अनन्यलभ्यत्वादिति २ पु॰ पाठः ।

‡ तात्पर्यानुपपत्त्येत्यर्थः ।

§ अन्विताभिधानवादं दूषयति । अथेति । लोके ऽर्थान्तरान्वितस्वार्थे पदानां सामर्थ्यग्रहादगृहीतसङ्गतिकस्य स्वर्गापूर्वादेर्वैदिकबोधविषयत्वासंभवादिति भावः ।

‖ पदैरर्थस्वरूपमात्रोपस्थितौ वक्तृतात्पर्यज्ञानवशात्तत्संसर्गबोध इति भावः ।

Digitized by Google

पदतदर्थसंबन्धबोधोपाये सत्यसत्यपि संबन्धे† शब्दादर्थप्रतीतेरुपपत्तेरर्थभेदनिरूपणस्य च ज्ञानभेदनिबन्धनत्वाज्ज्ञानभेदस्यार्थाभेदात्तदनभिधाने ऽभिधानाभावादर्थभेदाभिधाने वा तत एव सिद्धेस्तदभिधानानुपपत्तेस्तद्धेतुतया तु तत्कल्पने ताल्वादिव्यापारस्यापि वाच्यत्वप्रसङ्गात्स्वाभाविकः शब्दार्थयोः संबन्ध इति स्थितिः* । स तु किमर्थान्तरान्वितस्यार्थस्यार्थरूपमात्रस्य वा । यद्यपि रूपमात्रमुच्यते पदैस्तदा ऽपि किं‡ तन्मात्रपरैराहो स्विदन्वितावस्थाप्रत्यायनपरैः । तत्र रूपमात्रप्रत्यायनपरत्वे पदानां वाक्यार्थप्रत्ययानुपपत्तेरप्रयोजनस्य प्रयोजनासंभवा§दत्यन्तान्धमूकं जगत्प्रसज्येत । तदुभयं|| परिशिष्यते लौकिकपदसंदर्भस्य विशिष्टार्थप्रत्यायनप्रयोजनपरस्य । तत्रार्थान्तरान्वयपरस्य स्वार्थमात्राभिधाने ऽप्यन्वितप्रतिपत्तेरुपपत्तेरर्थापत्तिपरीक्षया ऽत्रान्वयं यावत्पदस्य सामर्थ्यमनुवर्तनीयम्¶ । तथा हि । वृद्धप्रयुक्तवाक्यश्रवणसमनन्तरं प्रवृत्तिनिवृत्तिहर्षशोकभय-

* वृद्धव्यवहारपरंपरारूपे शब्दार्थसंबन्धज्ञानकारणे सति अनेन शब्देनायं बोध्य इत्युपदेष्टर्यसत्यपि बोधदर्शनात्तत्तदर्थगतभेदप्रतिपादनस्य तत्तद्विषयकज्ञानाकारभेदप्रयुक्तत्वात् ज्ञानगतवैलक्षण्यस्य विषयतासम्बन्धेन तत्तदर्थरूपतया ऽर्थाभेदाद् ज्ञानगतवैलक्षण्यस्य वस्तुतः सत्त्वे ऽपि तस्य बोधविषयत्वाभावेन पदेषु तत्तज्ज्ञानगतवैलक्षण्यनिरूपितशक्तेर्वक्तुमशक्यतया ऽर्थानामिव तत्तदर्थगतवैलक्षण्यस्यापि वाच्यत्वाङ्गीकारे तावन्मात्रेण शक्त्यैवेतरव्यावृत्ततत्तदर्थविषयकशाब्दधिय उपपादयितुं शक्यतया ऽन्वयांशे पदवाच्यताभ्युपगमवैयर्थ्यादर्थगतवैलक्षण्यबोधस्य त्वन्वयप्रयोज्यत्वमात्रेण स्वरूपतो ऽर्थाभेदात्तद्वैलक्षण्यनिर्वाहकान्वयांशस्यापि वाच्यत्वाभ्युपगमे भिन्नभिन्नार्थबोधकारणीभूतपदप्रत्यक्षकारणपदोच्चारणकुक्षिप्रविष्टताल्वादिव्यापारस्यापि परंपरयेतरव्यावृत्तार्थबोधं प्रत्युपयोगित्वेनानिष्टस्य वाच्यत्वस्यापत्तेः शब्दार्थसंबन्धः स्वाभाविक एवेति सिद्धान्त इत्यर्थः ।

† सम्बन्धः ।

‡ किमिति २ पु॰ नास्ति ।

§ स्वरूपमात्रतात्पर्यकैः पदैस्तात्पर्यविषयस्य संसर्गस्य बोधनीयत्वासंभवादित्यर्थः ।

|| उभयम् । अर्थान्तरान्वितस्वार्थाभिधायकत्वमन्वितावस्थाप्रत्यायनतात्पर्यकत्वं च ।

¶ स्वार्थमात्रनिरूपितशक्तिस्वीकारे ऽपि पदसमूहस्य विशिष्टार्थबोधतात्पर्यकत्वे ऽन्वयप्रतीतेः पदविशेष्यकतात्पर्यज्ञानेनैवोपपत्तेः यजेत स्वर्गकाम इत्यादावपूर्वे ऽर्थापत्तिलभ्ये पदानामशक्यार्थान्तर इवान्वयांशेऽपि सामर्थ्यमङ्गीकार्यमित्यर्थः ।

Digitized by Google

संप्रतिपत्तेर्व्युत्पन्नस्य व्युत्पित्सुस्तद्धेतुप्रत्ययमनुमिमीते तस्य सत्स्वप्यन्येष्वनुपजातस्य पदजातश्रवणसमनन्तरं संभवतस्तद्धेतुभाव*मवधारयति। न चैष प्रत्ययः पदार्थमात्रगोचरः प्रवृत्त्यादिभ्यः कल्प्यत†इति विशिष्टार्थगोचरो ऽभ्युपेयते तद्विशिष्टार्थपरता ऽवसिता वृद्धव्यवहारे पदानाम् । न चेयमविशिष्टार्थस्मरणमन्तरेणेत्यविशिष्टार्थस्मारकत्वं‡ तदुत्पत्त्यैव प्रत्युप्तम्§ । न चैतदेषां विशिष्टार्थतामुपहन्तुमर्हति । न जातु भावाः स्वनिमित्तमुपघ्नन्ति मोपघानिषत स्वमपीति । न चैतावता विशिष्टाभिधानमविशिष्टविषयेभ्यो ऽपि तत्परेभ्यस्तदुपपद्यते‖ । तस्माल्लोकानुसारेण वैदिकस्यापि पदसंदर्भस्य विशिष्टार्थप्रत्ययप्रयुक्तस्याविशिष्टार्थाभिधानमात्रेण लक्षणया¶ विशिष्टार्थपरकत्वम् । स्वार्थमात्रपरत्वे तु प्रयोजनाभावेन तस्याप्यनुपपत्तेः** । यथाहुरत्रभवन्तो वार्तिककारमिश्राः†† ।

---

* तत्कारणकत्वं वाक्यकारणकत्वमिति यावत् ।

† प्रवृत्त्यादीनां पदार्थमात्रप्रतीत्या ऽनुपपत्तेः प्रवृत्त्यादय एव विशिष्टार्थप्रतीत्यनुमापका इति भावः ।

‡ विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति विशेषणतावच्छेदकविशेष्यतावच्छेदकधर्मप्रकारकनिश्चयस्य च हेतुत्वात् ।

§ विशिष्टविषयकबोधोत्पत्त्यैव पदानामविशिष्टार्थस्मारकत्वमाक्षिप्तमित्यर्थः ।

‖ असंसृष्टस्वार्थमात्रनिरूपिताभिधाख्यवृत्तिविशिष्टेभ्यः पदेभ्यो विशिष्टार्थतात्पर्यकेभ्यस्तात्पर्येणैव संसृष्टार्थप्रतीत्युपपत्तेः संसृष्टनिरूपिता ऽभिधा न स्वीक्रियत इत्यर्थः ।

¶ लोके वक्त्रभिप्रायरूपतात्पर्यसंभवे ऽप्यपौरुषेयेषु वैदिकवाक्येषु तदसंभवात्तत्र पदार्थमात्रोपस्थितावपि लक्षणया संसृष्टार्थबोधजनकत्वमित्यर्थः ।

** तदन्यप्रतीतीच्छया ऽनुच्चरितत्वे सति तत्प्रतीतिजननयोग्यत्वरूपेण तात्पर्येण युक्तस्य वैदिकपदजातस्य स्वार्थमात्रे प्रदर्शिततात्पर्यस्वीकारे प्रयोजनभूतस्य प्रवृत्त्यादेः स्वरूपमात्रज्ञानेनासम्भवात् तत्र प्रदर्शितरीत्या ऽनुमितिकारणीभूतप्रवृत्त्याद्यभावेन स्वार्थमात्रबोधस्याप्यनुपपत्तेरिति भावः । एवं च स्वरूपमात्राभिधानेन प्रयोजनशून्येषु वैदिकपदेषु लक्षणाऽऽश्रयणेन संसृष्टबोधाङ्गीकारे ऽपि निर्विशेषात्मतत्त्वबोधनेन निखिलप्रपञ्चबाधरूपपरमप्रयोजनसंपादकेषु महावाक्येषु तत्त्वमस्यादिषु नान्वयांशे लक्षणेति भावः । अत्र भूमिका ऽनुसंधेया ।

†† श्लोकवार्तिके वाक्याधिकरणे श्लो० ३३६ ।

साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम् ।
वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले ॥
वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्* ।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् ॥

तथा च वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति नः स्थितिरिति । †अन्विते ऽर्थे तात्पर्याभ्युपगमात्तदभिधायित्वं पदानामिति चेत्तत्किं गङ्गायां घोष इत्यत्र गङ्गापदं तीराभिधायि भवेत् तत्र तात्पर्यात्‡स्मारितस्वार्थप्रत्यासत्त्या ऽपि तदवगतेर्न तत्परस्यापि तदभिधानमिति यद्युच्येत तदितरत्रापि समानमुक्तेन क्रमेण§ तस्मादनेकान्तं तात्पर्यं न बीजं सामर्थ्यसाधने|| । न जातु ज्वलन्ति काष्ठानि पाकपराण्यपि¶ पाके साक्षात्समर्थानि किं तु ज्वलनएव तया द्वारा तत्सिद्धेः । तेषामतुल्यकक्षाणां प्राथम्यं न विशेषायोपयुज्यते येन पदानां तदर्थेभ्यः प्राथम्येनान्वितार्थधियं प्रति सामर्थ्यं कल्प्येत** । दर्शिता त्वतुल्यकक्षता रूपमात्राभिधानादन्विताभिधाने गौरवात् । न च पदार्थानामुपलभ्यमानाकाङ्क्षादिसहकारिणां विशिष्टार्थधीजन्मनि सामर्थ्यमपरं कल्पनीयं†† तेभ्य एव‡‡ तादृग्भ्यस्तदुत्पत्तेरुपपत्तेः । न चैते मानान्तरदृष्टा अर्था न विशिष्टार्थबुद्धे§§-

* प्रवृत्ताविति फले निमित्ते सप्तमी । प्रवृत्त्यर्थमन्वितवाक्यार्थबोधार्थम् । नान्तरीयकं प्रदर्शितदिशा ऽवश्यकम् ।

† अतत्परविषयस्यापि तात्पर्यविषयत्वमात्रेण बोधाभ्युपगमे ऽतिप्रसङ्गं मन्यमानः शङ्कते ।

‡ न । अभिधायकत्वं तस्येष्टमिति शेषः ।

§ लक्षणयापि विशिष्टधीसंभवादिति भावः ।

|| शक्तिसाधने ।

¶ पाकसंपादकान्यपि । पाकोद्देशेनोपात्तान्यपीति यावत् ।

** अन्यथा ऽप्युपपद्यमानानां विशिष्टज्ञानानां प्रवृत्त्यादिहेतुकानुमितिप्राथमिकविषयत्वं शक्त्यनुमापने न पर्याप्तमित्यर्थः ।

†† प्रत्यक्षादिना ऽवगतानां [illegible] विशिष्टार्थबोधजनकत्वस्य प्रागुपपादितत्वात्तथैव पदैरुपस्थितानामप्यर्थानां विशिष्टानुभवजनकत्वाभ्युपगमे कारणान्तरकल्पना ऽऽधिक्यं नेति भावः ।

‡‡ येभ्य एवेति २ पु॰ पाठः ।

§§ मानान्तरदृष्टानर्थानविशिष्टार्थबुद्धेरिति २ पु॰ पा॰ ।

रीयते । तथा हि यत एवानुमानभावमर्थापत्तिभावं वा समापन्ना दृष्टा विशिष्टार्थधियमादधाना यथा तथा आधास्यन्ति तामेव तत्परैः* स्मारिताः सन्तः शब्दत्व†मापन्नाः । अनुपपत्तिसंबन्धमात्रप्रभावितं च तात्पर्यमुपपादके न शक्तिमपेक्षते‡ गङ्गादिपदानां च काष्ठादीनां च तीरादौ पाकादौ च कल्पनाप्रसङ्गादित्युक्तम्§ । न च सर्वत्र स्वार्थपरित्यागेनैव लक्षणेत्यैकान्तिकम् । लक्षणीयानुरोधेनैव हि सर्वत्र परिग्रहपरित्यागौ । तद्यथा गङ्गायां घोष इत्यत्र गङ्गापदेन घोषप्रतिवासार्हतीरलक्षणया स्वार्थस्य गङ्गायास्त्यागः । दण्डिनो गच्छन्तीत्यत्र तु दण्डवत्पिण्डेषु समूहेषु लक्ष्यमाणेषु तदन्तर्गतस्याविशेषाद्दण्डशब्दार्थस्य परिग्रहः । तथा वेदे सृष्टीरुपदधातीत्यत्र गणिकानां‖ लक्ष्यमाणत्वे तदन्तर्गतस्यापि सृष्ट्यर्थस्य परिग्रहः । एवमिहापि व्यतिषक्तावस्थायां लक्ष्यमाणायां तदन्तर्गतस्यार्थरूपस्यापि परिग्रहः तदग्रहे लक्ष्यमाणपरित्यागप्रसङ्गात्¶ । लक्षणालक्षणायोगादलक्षणेति चेद् न** । अलक्षणत्वात्†† । तत्रैतत् स्यात् । नेयं लक्षणा सा किलाभिधेयस्यार्थस्यायोग्यतयाऽनुपपद्यमाने वाक्यार्थसंबन्धे सति तत्संबन्धलब्धबुद्धिसंनिधौ वाक्यार्थसंबन्धार्हे भवत्यर्थान्तरे । तथाऽऽह कश्चित् ।

वाच्यस्यार्थस्य वाक्यार्थे संबन्धानुपपत्तितः ।
तत्संबन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते ॥

---

* तत्पदैरिति २ पु० पाठः ।

† शब्दोपस्थितत्वप्रकारकानुसंधानविषयत्वम् ।

‡ पदार्थस्वरूपमात्रेऽनुपपत्त्या सम्बन्धेन प्रतियोगित्वादिना च केवलमुपपादितं वाक्यार्थसंसर्गनिरूपितं तात्पर्यं पदे शक्तेर्गमकं न तामन्तराप्युपपत्तेरित्यर्थः ।

§ अन्वयांशे लक्षणामसहमानः शङ्कते ।

‖ तद्गुणपठितानां सृष्टिशब्दरहितानामपि । शाबरभाष्ये अ० १ पा० ४ सू २७ ।

¶ संसर्गिणः पदार्थस्य परित्यागे संसर्गमात्रप्रतीतेर्निष्प्रयोजनत्वेन संसर्गस्यापि परित्यागप्रसङ्गादित्यर्थः ।

** वक्ष्यमाणस्वार्थान्यपदार्थबोधकत्वघटितलक्षणालक्षणस्य स्वार्थसम्बन्धेऽभावादित्यर्थः ।

†† वक्ष्यमाणस्य लक्षणालक्षणस्य प्रदर्शयिष्यमाणदूषणेनाव्यापकत्वादिति भावः ।

Digitized by Google

न चोदनं पचति चैत्रः पिठर इत्यादौ चैत्रपिठरादीनामर्थानां वाक्यार्थे संबन्धानर्हत्वम् । न च तल्लक्षितया ऽन्विताबस्थाया अन्वयान्तरशालिता न चैवं लक्षणा तल्लक्षणाविरहादिति* । तत्किमिदानीं न लक्षणेयमित्यन्यलभ्यस्यापि शब्दार्थत्वमस्तु । न हि मासमग्निहोत्रं जुहोतीत्यत्राग्निहोत्रपदमलाक्षणिकमिति मुख्यं भवति । कर्मान्तरसादृश्येन गौण्या वृत्त्या तत्र प्रवृत्त्युपपत्तेर्न तदभिधानशक्तिकल्पनेति चेद् इहाप्युक्तया नीत्या ऽन्तरेणाप्यभिधानसामर्थ्यमन्विताबस्थाप्रतीत्युपपत्तेः कृतमभिधानशक्तितः । एवं च न चेदियं पदप्रवृत्तिर्लक्षणालक्षणमन्वेति भवतु तर्हि चतुर्थी दृष्टत्वाद् अस्तु वा लक्षणैव । नो खल्वेतल्लक्षणमप्रसिद्धवृत्त्यन्तरावतारप्रसङ्गात् । तस्मादेतदुक्तव्यम् । तदिदमुच्यते मृष्यामहे वाच्यानुपपत्तित इति संबन्धवशप्राप्तस्येति च† न पुनर्वाक्यार्थे संबन्धेति चान्वयादिति च । अस्ति चेहापि लोकानुसारतो विशिष्टार्थप्रत्यायनप्रयुक्तसमभिव्याहृतीनामर्थरूपमात्रपरत्वे पदानामनुपपत्तिः अर्थरूपसंबन्धवशप्राप्तता‡ चान्विताबस्थायाः । व्यापकं चैतल्लक्षणं लक्षणानामनवयवेन§ वैदिकीनां च लौकिकीनां चेति चतुरस्रम् । अभिधावृत्तित्वं च पदानां रूपमात्रप्रज्ञापने ऽपि न तेनोपपद्यते‖ । अपि नाम पदानि साक्षाद्व्यापारेण बोधयन्त्यर्थान्वाक्यार्थमितये तद्बोधनमिति वाक्यार्थं लक्षयिष्यन्ति । तदवस्थाभेदस्य तैः सहादृष्टचरत्वेन बुद्धावसन्निधानादलक्षणेति चेद् न । सामान्यतो¶ दर्शनात्पदार्थानां च तद्विशेषकत्वात् । नो खल्वन्वितेभ्यः पदार्थेभ्यो ऽन्यो ऽन्विताबस्थाविशेषः** । तथा चार्थस्वरूप-

* लक्षणयोपस्थिततीरादेः पश्चाद् बोधविषयत्वमिव प्रकृते लक्षितेन संसृष्टस्वार्थरूपेण प्रयोजनसिद्धेः पुनरन्वयान्तरस्यानुपयोगादनवस्थाप्रसङ्गाच्चेति भावः ।

† इति शब्दः २ पु॰ नास्ति ।

‡ अर्थसम्बन्धवत् प्राप्ततेति २ पु॰ पा॰ ।

§ साकल्येन ।

‖ स्वरूपमात्रोपस्थापनेन न परिसमाप्यते प्रयोजनवैकल्यादिति भावः ।

¶ अलक्षणानिवेशनसामान्यत इति २ पु॰ पा॰ ।

** तथा चेतरपदार्थान्वयेन विशेषरूपतामापन्नः संसृष्टोर्थः सामान्यविशेषभावसम्बन्धेन स्वरूपसम्बन्धीति तत्र लक्षणा युज्यत इति भावः । नो खल्वनन्वितेभ्यः पदार्थेभ्योन्यान्विताबस्थाविशेषेभ्यः इति २ पु॰ पा॰ ।

Digitized by Google

बोधनसामर्थ्याच्चाधिकं सामर्थ्यद्वयं* कल्पयिष्यति नाप्यभिधानशक्तेरेवान्वयविषयत्वम् अर्थस्वरूपमात्रगोचरत्वे ऽपि तत्प्रतीत्युपपत्तेः । यदि पुनः प्रमाणसंशयविपर्ययेभ्यो विधान्तरा†नुपगमाच्च पदार्थबोधः‡ शब्दव्यापारजन्मोपेयते तर्हि स्मृतिरस्तु । न ह्येषा संस्कारोन्मेषमात्रप्रभवेति क्षतमभिधातृभावेन पदानाम्§ । तदुन्मेषे तदुपयोग इति चेदुन्तार्थो ऽप्यालोचितः स्वपदगोचरसंस्कारोद्बोधहेतुरिति सो ऽपि पदस्याभिधाता स्यात् । तदिदमनभिधातृत्वमनधिगतान्वयबोधनएव कल्प्यते पदानां नान्यथा‖ । अथैवंवादी पृष्टो व्याचष्टां को नु खल्वयमभिधाव्यापारः शब्दानां येनामी तदुन्तो ऽन्वयस्याभिधातारः । न तावत्परिस्पन्दस्तस्य मूर्तानुविधायिनो द्रव्ये विभुनि विभुगुणे वा शब्दे मूर्त्यभावेनासंभवात् । असर्वगतद्रव्यपरिमाणं मूर्तिरिति हि पदार्थविदः¶ । नाप्यस्पन्दात्मा प्रयत्नादिरिवानुमीयमानः प्रमाणाभावात् । अन्वयधियश्च कार्यस्य सति संगतिसंवेदने शब्दनिश्चयज्ञानादेवोत्पत्तेः** । तस्मात्स्वगोचरं विज्ञानमेव शब्दानां व्यापारः स्वार्थबोधे । यथा ऽऽह भगवान्भाष्यकारः†† । शास्त्रं शब्दविज्ञानादसंनिकृष्टे ऽर्थे विज्ञानमिति । स एव‡‡ स्वाभाविकशक्तिशालिनः शब्दस्य स्वशक्त्या अर्थधीहेतुतया अभिधेति गीयते । शब्दाभासस्यैन्द्रियकत्वे ऽपि रूपतः सामर्थ्यापधानेनाभिधात्वात्तस्य चातीन्द्रियत्वाददतीन्द्रि-

* प्रागुक्तं पदानामन्वयानुभवसामर्थ्यमर्थस्वरूपाणामन्वयानुभवसामर्थ्यं च । आद्यस्यान्यथा ऽप्युपपद्यमानत्वादन्त्यस्य क्लृप्तत्वाच्चेति भावः ।

† विधानान्तरेति २ पु० पा० ।

‡ पदार्थानुभवः ।

§ पदानामभिधातृत्वेन पर्याप्तं तावन्मात्रेण प्रयोजनसिद्धेरिति भावः । युगपर्याप्तयोः कृतमित्यमरः ।

‖ अर्थवादादिवाक्येषु प्राशस्त्यादेरशक्यत्वे ऽपि संसर्गस्य प्राथमिकशक्तिग्रहकाले ऽवगतत्वात्संसर्गत्वेन संसर्गस्य शक्यतेति भावः ।

¶ वैशेषिकदर्शनप्रशस्तपादभाष्यटीकायामुदयनाचार्यकृतायां किरणावल्यां साधर्म्यप्रकरणे ।

** शब्दजन्यस्वार्थनिश्चयेनैवान्वयधिय उपपन्नत्वाद् व्यापारान्तरकल्पना ऽनुचितेति भावः ।

†† शाबरभाष्ये अ० १ पा० १ सू० ५ । ‡‡ स्वविषयकज्ञानरूपव्यापार एव ।

संस्कृतपुस्तकानां सूचीपत्रम् ।

		मूल्यम्	
		रु०	आ०
१	काशिका पण्डितवरवामनादित्यविरचिता		
	पूर्वार्धम्	..	॥
	उत्तरार्धम्	१०	॥
२	बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२	॥
३	प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१	।)
४	लघुकौमुदी वरदराजकृता	१	=)
५	लघुकौमुदी श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्गलण्डीयभाषायां कृता	८	॥
६	श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७	वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायां कृतम्	४	॥
८	मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४	॥
९	शाश्वतधर्मदीपिका	१	॥
१०	अमरकोश सटीक	४	॥
११	योगवार्तिकम्	३	।)
१२	वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)	॥
१३	गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीभिङ्गनगा-देशाधिपति रचिता	४)	॥
१४	शीतपदार्थनिर्वचनम्	३	॥।)
१५	वाक्यार्थचन्द्रिकापरिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि संशोधिता	४)	॥
१६	श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराम-मिश्रशास्त्रिप्रणीत क्वाचित्क विषमपदटिप्पणीसमेतः	६)	॥।)
१७	खण्डनखण्डखाद्यं सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्त-टिप्पणीसहितम्	७)	॥)
१८	काव्यप्रदीपः काव्यप्रकाशस्य प्रतिच्छायाव्याख्या वाराणसेयसमादृ-प्रतिष्ठापितसंस्कृतपाठशालीयदर्शनशास्त्राध्यापकरामशास्त्रि-भागवताचार्येण परिशोधितः	३)	॥)
१९	वेदान्तसिद्धान्तमुक्तावली श्रीयुत आर्थर्विनिस महाशये-ङ्गलण्डीयभाषायां कृतम्	२)	॥)

CONTENTS.

Page.

GAṆAKATARAṄGIṆĪ, OR LIVES OF HINDU ASTRONOMERS, by Mahāmahopādhyāya Sudhākara Dvivedī, Professor, Sanskrit College, Benares. ... 169

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed: Dāmodara Śāstrī, Professor, Sanskrit College, Benares. ... 185

ŚRĪBHĀSHYA WITH ŚRUTAPRAKĀŚIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. .. 201

TATTVABINDU, of Vāchaspati Miśra, Ed: Mahāmahopādhyāya Gaṅgādhara Śāstrī, Professor, Sanskrit College, Benares. ... 217

Digitized by Google

JUN 27 18..
LIBRARY.

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 5.] MAY, 1892. [Vol. XIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1892.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अक्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

सायकाब्धिशरभूमिते १५४५ शके चैत्रशुक्लगुरुवासरेन्दुभिः ।
षष्ठिसंज्ञकतिथौ हि समाप्तं सूर्यपक्षशरणं करणं तु ॥

विश्वनाथेन बहूनां भास्करीयसिद्धान्तशिरोमण्यादीनामुदाहरणानि विरचितानि ।

विष्णुकरणोदाहरणे करणादिशकः खरामपञ्चेन्दु १५३० मितो लिखितस्तेन करणारम्भो ज्ञायते ।

(शिवदैवज्ञवंशावली निरीक्ष्याऽत्र) अत्र करणारम्भसमये यदि विष्णुदैवज्ञावस्था द्विचत्वारिंशद्वर्षमिता कल्प्या तर्हि विष्णुदैवज्ञजन्मशकोऽष्टाष्टपुरन्दर १४८८ समः सिध्यति । ज्योत्पत्तौ पूर्वाचार्यैश्चतुर्विंशतिर्ज्यार्धानि यानि साधितानि तत्र ज्योतिर्न्यायशास्त्रयोः साम्यप्रकल्पनं विष्णुदैवज्ञकल्पनं चमत्कृतिकरम् । तत्पद्यं च

आचार्यैस्त्रिगुणादमी परगुणाः सर्वेऽपि संसाधिताः
प्राधान्यादिह तर्ककर्कशगिरा प्रायश्चतुर्विंशतिः ।
तत्कुत्रापि निजाकृतिप्रकृतितः सद्वासनाभ्यासतः
सद्बीजाक्षरमालिकाजपवशात् प्रायस्तदत्यद्भुतम् ॥

एवं पद्यं ज्योतिःपक्षेऽन्यपक्षे च घटते । ज्योतिःशास्त्रपक्षे पूर्वाचार्यैस्त्रिगुणात् त्रिज्यातः परगुणा अन्यज्याः संसाधिताः । अन्यत्र त्रिगुणात् सत्त्वरजस्तमोऽभिधादन्ये गुणा न्याये गौतमादिभिः संसाधिताः । अथैते गुणास्तैः कथं बुद्धा इत्याह । निजाकृतिप्रकृतितः । आकृतिराकारः प्रकृतिः स्वभावो वा वर्गप्रकृतिस्ताभ्यामन्यत्र निजाकृतिः पुरुषः प्रकृतिः प्रसिद्धा ताभ्यामित्यर्थः । अन्यत् स्पष्टम् ।

सूर्यः । १४६३

भारद्वाजगोत्रोऽयं ज्ञानराजपुत्रः काव्यसाहित्यादिनिपुणस्त्रिरसशक्र १४६३ मिते शके भास्करीयलीलावतीटीकां गणितामृतकूपिकां व्यरचयत् । अत्र श्लोकानामर्थः काव्यसाहित्यवद्बहुधा कृतोऽस्ति । परन्तु व्यक्तरीत्यैव सूत्राणामुपपत्तयोऽत्र यास्ता न चतुरचमत्कारकारिण्यः । गोदोत्तरतटवर्त्तिपार्थाभिधानपुरमस्य मूलपुरुषाणां स्थितिः । बहुभिरयं सूर्यदासश्च कथ्यते । एनेन भास्करीयलीलावतीबीजयोष्टीके । श्रीपतिपद्धतेर्गणितम् । बीजगणितम् । एकं ताजिकम् । अच्युतार्थबोधकं

काव्यद्वयम् । वेदान्ते बोधसुधाकराख्यो ग्रन्थोऽपि विरचित इति सर्वं लीलावतीटीकान्तश्लोकेन ज्ञायते । लीलावतीबीजयोष्टीके हित्वाऽन्याः कृतयोऽस्यास्मद्दृष्टिगता नाद्यावधि। एतत्कृता लीलावतीटीकाऽतिशुद्धा मन्निकटे, बीजगणितटीका चातिशुद्धा काशिकराजकीयपुस्तकालये वर्त्तते । प्रथमं सूर्येण बीजगणितटीका विनिर्मिता पश्चाल्लीलावती-टीका । एतट्टीकानिर्माणकाले सूर्यस्य वयश्चत्वारिंशद्वर्षसमं यदि कल्प्यते तदाऽस्य जन्मशकोऽग्नियुग्मशक्र १४२३ समः सिध्यति । अस्य सौजन्यं काव्यचातुर्यं कल्पनावैभवं वंशादिवर्णनं च टीकाद्यन्तश्लोकैः स्फुटम् ।

लीलावतीटीकादिकादि ३–४ श्लोकौ ।

अव्यक्तं गणितं सवासनतया व्याख्याय लीलावतीं
व्याख्यातुं विहितादरोऽस्म्यहमथ व्यक्तोपपत्तिक्रमैः ।
श्रीमत्सुज्ञविधिज्ञपण्डितवरज्ञानाधिराजात्मजः
स्वप्रज्ञापरिणामतः सुगणकः सूर्याभिधानः कविः ॥
निर्मथ्य बीजगणितार्णवमात्मयत्नात्सद्वासनामृतमवाप्तमिदं मया यत् ।
सत्संग्रहाय गणितार्णवकूपिकेयं टीका विरच्यत इहावनिदेवतुष्ट्यै ॥

अन्ते ।

आस्ते त्रस्तसमस्तदोषनिचयं गोदाविदर्भायुतेः
क्रोशेनोत्तरतस्तदुत्तरतटे पार्थाभिधानं पुरम् ।
तत्राभूद्गणकोत्तमः पृथुयशाः श्रीनागनाथाभिधो
भारद्वाजकुले सदैव परमाचारो द्विजन्माग्रणीः ॥
पुत्रस्तस्य कलाकलापकुशलः क्ष्मापालमालार्चितः
सौजन्यैकसुधाकरः क्षितितले सौभाग्यभाग्यास्पदम् ।
कीर्त्तिर्यस्य दिगन्तरेषु विविधैर्व्याख्यानसंख्यागमै-
र्विख्याता ननु सद्गवा विजयते श्रीज्ञानराजाभिधः ॥
तत्सूनुर्गणितार्णवप्रतरणे सत्कर्णधारः सुधीः
छन्दोऽलङ्कृतिगीतशास्त्रनिपुणो वेदाध्वपारं गतः ।
सूर्यो दैवविदां मुदे रचितवान् व्यक्तस्य टीकामिमा-
माचार्याः सदसद्विचारचतुराः पश्यन्तु तुष्यन्तु च ॥

दुर्ज्ञेया गणितोपपत्तिरथ च ज्ञाताऽपि नो शक्यते
वक्तुं सूक्ष्मतरप्रमेयगहना यस्मादतः कुत्रचित् ।
गूढार्था प्रमिताक्षरापि कुहचित्तद्बोधजातश्रमाः
क्षन्तव्यः सुजनास्तदुक्तिजनितः स्वल्पोऽपराधो मम ॥

आस्वादितापि विबुधैरुपयाति वृद्धिं व्यक्तादिपक्षयुगलेऽपि तनोति शोभाम् ।
पूर्णा कलाभिरत एव सुधांशुमूर्त्तेराधिक्यमेति गणितामृतकूपिकेयम् ॥
परोपकारार्थमुदाहृतेन मद्वाग्विलासेन रसोद्गतेन ।
शब्दाभिधं ब्रह्म यतः प्रवृत्तं स प्रीयतां यादवराजसंज्ञः ॥

सदला त्रिसहस्री ३५०० स्यादनुष्टुभां ग्रन्थसंमितः शाके ।
त्रिरसपुरन्दर १४६३ गणिते गणितामृतकूपिका रचिता ॥
व्याख्ये वासनयाऽन्विते गणितयोर्लीलावतीबीजयो-
स्तद्वच्छ्रीपतिपद्धतेश्च गणितं बीजं तथैकं व्यधात् ।
एकं ताजिकमच्युताख्यमपरं काव्यद्वयं प्रौढधीः
सूर्यो बोधसुधाकराख्यमकरोदध्यात्मशास्त्रेऽद्भुतम् ॥

इति श्रीमत्सकलानवद्यविद्याविद्योतमानमानसगणितोपनिषद्रहस्याभिज्ञदेवज्ञपण्डितज्ञानराजतनयपण्डितसूर्यदासविरचितायां गणितामृतकूपिकायां भास्करीयलीलावतीटीका सम्पूर्णा ।

एतत्काव्यं च यथा वाले मरालकुलमूलदलानि सप्तेत्यादि टीकायाम् ।

"पुरःपरिसरसमीरनिःसृतसीकरनिकरसंस्कृतविसलतावतंसहंसहंसीनिवहगतिविलासमवलोक्य विपुलजलं कल्लोलविलोलकलेवरं कलितकोमलकमलं विमलनालं कुरलकूजितकेलिकलहकोलाहलशीलं मरालयुगलमद्राक्षीदित्यर्थः" इत्येवमेतत्कृता टीका काव्यरसामृतभरा सदुपपत्त्यनुपेता प्राचीनज्योतिर्विदां गेहे शोभते ।

ढुण्ढिराजः । १४६३

गोदातीरवर्त्तिपार्थपुरनिवासिनृसिंहदैवज्ञस्य तनयः सूर्यदासजनकस्य ज्ञानराजस्य शिष्यः जन्मपत्रिकानिर्माणार्थं क्रमपूर्वकं जातकाभरणनाम जातकमकरोत् । सम्प्रति बहुधा फलवेदिनो ज्योतिर्विद एतद्ग्रन्थक्रमानुसारेण जन्मपत्रिकां रचयन्ति । अयं ग्रन्थश्च सर्वत्रैव लिखितो

Digitized by Google

मुद्रितश्चोपलभ्यते । अत्र यद्यपि ग्रन्थरचना कालो नाभिहितो ग्रन्थकृता तथापि ज्ञानराजस्य शिष्यत्वादस्य समयो ज्ञानराजपुत्रसूर्यपण्डितकृत-लीलावतीटीकागणितामृतकूपिकासमयासन्नो रामरसशक्र १४६३ शकोऽनुमीयते । ग्रन्थविलोकनेन फलितेऽस्य पाटवं सम्यग् विभाति । वस्तुतोऽस्य ग्रन्थेन ज्योतिर्विदां महानुपकारो भवति । ग्रन्थसंख्या च श्लोकसहस्रद्वयासन्ना ।

अस्यादौ ३ श्लोकः ।

ज्ञानराजगुरुपादपङ्कजं मानसे खलु विचिन्त्य भक्तितः ।
जातकाभरणनाम जातकं जातकज्ञसुखदं विधीयते ॥

तदन्ते च ।

गोदावरीतीरविराजमानं पार्थाभिधानं पुटभेदनं यत् ।
सद्गोलविद्यामलकीर्तिभाजां मत्पूर्वजानां वसतेः स्थलं तत् ॥
तत्रत्यदैवज्ञनृसिंहसूनुर्गजाननाऽऽराधनताभिमानः ।
श्रीढुण्ढिराजो रचयांबभूव होरागमेऽनुक्रममादरेण ॥

(सूर्यदासवर्णनं विलोक्यम्)

नीलकण्ठदैवज्ञः (१४७६)

अयमनन्तदैवज्ञेन पद्माख्ययाऽम्बया गर्गगोत्रे समुद्भूतः पारसीकारबीकशब्दमिश्रितां वर्षफलनिरूपिणीं ताजकमतीयां खण्डत्रयेण तन्त्रवाचिना नीलकण्ठीसमाख्यां कृतिमकार्षीत् । ग्रन्थविलोकनेनास्य पाटवं गणिते विभाति परन्तु तत्र काचित्कृतिर्नास्ति । फलमात्रैकजीविनां ज्योतिर्विदां गृहे गृहे तन्त्रत्रयरूपेयं नीलकण्ठी राजति । मुद्रिता चोपलभ्यते सर्वत्रैव । नवखपञ्चचन्द्रमिते १५०९ शके नीलकण्ठेन रचितेयं तेनेयं नीलकण्ठी कथ्यते । रचनाकाले नीलकण्ठस्य वयो यदि त्रिंशद्वर्षमितं कल्प्यते तदाऽस्य जन्मशको नवसप्तवेदचन्द्रमितः १४७९ समायाति । अत्र रसालादिटीका अनेकाः सन्ति । विश्वनाथदैवज्ञस्योदाहरणं चात्र । वर्षकुण्डलीनिर्माणार्थं पञ्चाङ्गस्थग्रहेभ्यः सुलभेन चालनेनेष्टदिनग्रहानयनाय ततः फलादिज्ञानार्थं फलवेदिनां जीवनरूपेयं संप्रति भारतवर्षे शोभते । अत्रेकबाल-इन्दुवार-इत्थशाल-इशराफ-नक्त-यमया-मणऊ-कबूल-गैरकबूल-खल्लासर-रद्द-दुफाली-कुत्थ-दुत्थोत्थदबीर-तुम्बी-

रकृत्य—दुष्कृति षोडशयोगेभ्यः पारसीकारबीकमतीयेभ्य एकस्मिन् वर्षे प्राणिनां शुभाशुभज्ञानार्थं विधयो विलिखिताः सन्ति । नीलकण्ठेनैका जातकपद्धतिश्च विरचिता सा च मिथिलाप्रान्तेषु प्रसिद्धा षष्टिश्लोकात्मिका ।

नीलकण्ठाः समाप्तौ ।

आसीदसीमगुणमण्डितपण्डिताग्र्यो
व्याख्यद्विजद्रुपमवीः श्रुतिवित्सुवृत्तः ।
साहित्यरीतिनिपुणो गणितागमज्ञ-
श्चिन्तामणिर्विपुलगर्गकुलावतंसः ॥ १ ॥

तदात्मजोऽनन्तगुणोऽस्त्यनन्तो योऽधोक् सदुक्तीः किल कामधेनुम् ।
सन्तुष्टये जातकपद्धतिं च व्यरूपयद्दुष्टमतं निरस्य ॥ २ ॥

पद्माऽम्बयाऽसावि ततो विपश्चित् श्रीनीलकण्ठः श्रुतिशास्त्रनिष्ठः ।
विद्वच्छिवप्रीतिकरं व्यधासीत् समाविवेकं मृगयावतंसम् ॥ ३ ॥

शाके नन्दाभ्रबाणेन्दु १५०९ मित आश्विनमासके ।
शुक्लेऽष्टम्यां समातन्त्रं नीलकण्ठबुधोऽकरोत् ॥ ४ ॥

द्वितीयश्लोके 'ऽस्त्यु'पादानात् नीलकण्ठीरचनाकालेऽनन्तो नीलकण्ठपिता वर्त्तमान आसीदित्यनुमीयते । तथा तृतीयश्लोके शिवपण्डितप्रीत्यर्थं ग्रन्थकरणं यल्लिखितं तत्र शिवनामा नृसिंहदैवज्ञसहोदरात् शिवदैवज्ञात् कश्चिदन्यो गणको ज्ञेयो द्वयोः कालयोर्भिन्नत्वात् ।

अयं नीलकण्ठोऽकबरमहीमहेन्द्रसभाप्रधानपण्डित आसीत् ॥
(अस्य पुत्रस्य गोविन्ददैवज्ञस्य वर्णनं विलोक्यम्) ।

कृष्णदैवज्ञः । १५८०

अस्य पिता बल्लालनामा माता च गोजिनाम्नी गुरुर्दिवाकरपुत्रः कृष्णानुजो गणेशदैवज्ञानुजतनुजनृसिंहदैवज्ञशिष्यो विष्णुनामा । यवननृपतीन्द्रजहांगीरभारतेन्द्रस्य प्रधानपण्डितोऽयमासीदित्येतदनुजेन मुनीश्वरपित्रा रङ्गनाथेनालेखि । (रङ्गनाथवर्णनं विलोक्यम्) एनेन भास्करीयबीजगणितटीका बहुविशेषसहिता नवाङ्कुराख्या विरचिता । "मया भास्करीयलीलावतीबीजगणितगोला व्याख्येयाः" इति कृतसङ्कल्पेन व्याख्या-

तलीलावतीमखिलगोलेन दुर्निवारभयङ्करकालवशीभूतेन गणेशदैवज्ञेन स्वनिधनसमये "नृसिंह त्वया भास्करीयबीजं व्याख्याय मत्सङ्कल्पः पूरणीयः" इति स्वभ्रातुष्पुत्राय नृसिंहायाज्ञा दत्ता । सोऽप्यव्याख्यातबीजः कालवशीभूतो बीजव्याख्यानाय स्वशिष्यं विष्णुमादिदेश । विष्णुरपि कालवेदनाऽसहिष्णुस्तदर्थं स्वशिष्यं कृष्णमाज्ञापितवान् । समवाप्य चेमां गुरोराज्ञां कृष्णदैवज्ञेन विरचितेयं टीका नवाङ्कुरेति जनश्रुतिः प्राचीनज्योतिर्विद्वदनात् श्रूयते ।

अस्यां टीकायां कृष्णदैवज्ञेन बहुत्र नवीना कल्पना स्वबुद्ध्या करण्यादिमूलसाधनाद्दौ विलिखिता । वस्तुतः प्राचीनटीकासु कृष्णदैवज्ञकृतेयं टीकैव संप्रति ज्योतिर्विद्भिरादृता भारतवर्षे प्रधानज्योतिर्विदां गेहे शोभते । अस्या एकाप्रतिर्मेऽनिकटेऽतीव शुद्धा वर्त्तते । टीकारम्भे ऽन्ते च यद्यपि निजवंशपरम्परा विस्तरतो वर्णिता कृष्णेन तथापि समयो न लिखितः । परन्तु अस्मात्तृतीयो रङ्गनाथस्तथाऽयं विष्णुदैवज्ञशिष्यश्चेत्यनेन ज्ञाताभ्यां विष्णुरङ्गनाथसमयाभ्यामस्य जन्मसमयोऽनुमानतः सप्ताष्टशक्रमित १४८७ शकः कल्प्यते । सूर्यसिद्धान्तटिप्पणगूढप्रकाशाख्ये रङ्गनाथलेखानुसारेण श्रीपतिपद्धतिटीकापि वर्त्तत एतत्कृता । काशिकराजकीयपुस्तकालये ग्रहणे छादकनिर्णयश्च दम्पतिसंलापरूप एतत्कृतोस्त्यऽधुना यश्च मया संशोध्य मुद्रितोऽपि । एवं बीजाङ्कुरा । श्रीपतिपद्धतिटीका । छादकनिर्णयः । इति कृतित्रयमस्यावगम्यते तत्र श्रीपतिपद्धतिटीका नास्मद्दृष्टिगोचरीभूताद्यावधि । वस्तुतः कृष्णदैवज्ञस्य पाण्डित्यं सत्यगिडतरञ्जनं गणितकलापूरितमस्ति ।

षडष्टशतकाः क्रीत्वेत्याद्युदाहरणे बीजाङ्कुरायां "उद्दिष्टः कुट्टके तज्ज्ञै ज्ञेयो निरपवर्त्तनः" इति भास्करोक्तगोलाध्यायस्थवचनाभिप्रायमज्ञात्वैव सर्वं कृष्णदैवज्ञेन यदुक्तं तद्बुद्धिमद्भिर्निपुणं विलोक्यम् । अत्र भावनोपपत्तिरतिगुहतरा तदर्थं कमलाकरेण सिद्धान्ततत्त्वविवेके लाघवेन प्रदर्शिता ।

बीजाङ्कुरारम्भे ६–१० श्लोकाः ।

आसीदसीमगुणरत्ननिधानकुम्भः कुम्भोद्भवाभरणदिग्ललनाललामः ।
आदेशगार्जितविशेषकलानुवर्त्ती श्रीकेशवः सुगणितागमचक्रवर्त्ती ॥

तस्मादभूद्भुवनभूषणभूतमूर्त्तिः श्रीमानगण्यगुणगौरवगेयकीर्त्तिः ।

ज्योतिर्विदागमगुरुर्गुरुसंप्रदायप्रज्ञातशास्त्रहृदयः सवयो गणेशः ॥
भ्रातुः सुतस्तस्य यथार्थनामा नृसिंह इत्यद्भुतरूपशोभः ।
अवर्द्धयद्यो जगतामभीष्टं प्रह्लादमाश्चर्यकरं सुराणाम् ॥
तच्छिष्यो विष्णुनामा स जयति जगतीजागरूकप्रतिष्ठः
शिष्टानामग्रगण्यः सुभणितगणिताम्नायविद्याशरण्यः ।
यद्वक्त्रोन्मुक्तमुक्ताफलविमलवचोवीचिमालागलन्तो
द्विज्ञाः सिद्धान्तलेशा जगति विदधतेऽज्ञोऽपि सर्वज्ञगर्वम् ॥
तस्मादधीत्य विधिवत् त्रिस्कन्धं ज्योतिषं गुरोः ।
कृष्णो दैवविदां श्रेष्ठस्तनुते बीजपल्लवम् ॥

अन्ते ।

अभूत् पृथिव्यां प्रथितो गुणौघैश्चिन्तामणिर्दैवविदां वरिष्ठः ।
संपूजनानेहसि यस्य गौरी स्मृता स्तुता प्रत्यहमाविरासीत् ॥
तत्सूनवः पञ्च बभूवुरेषां ज्येष्ठोऽभिरामः किल रामनामा ।
भविष्यदर्थज्ञतया हि यस्य विदर्भराजोऽपि निदेशवर्ती ॥
रामादभूतां सीतायां पुत्रौ कुशलवाविव ।
त्रिमल्लो गोपिराजश्च गुणैः सर्वैः समन्वितौ ॥

त्रिमल्लसूनुर्जयति द्विजेन्द्रो बल्लालसंज्ञः शितिकण्ठभक्तः ।
यः सन्ततं रुद्रजपातिसङ्गाद्ब्राह्म्यं महोमूर्त्तमिवावभाति ॥
दैवज्ञवर्यगणसन्ततसेव्यपार्श्वबल्लालसंज्ञगणकस्य सुतोऽस्ति कृष्णः ।
रामानुजः स परमेश्वरतुष्टिहेतोर्बीजक्रियाविवृतिकल्पलतामकार्षीत् ॥
यद्भास्करेण निजधामगुणातिरेकात्सम्पादितं सगुणवर्गघनं हि बीजम् ।
तत्कृष्णभूमिमधिगम्य विचारवारिसंसिक्तमङ्कुरजनुष्यभवत्समर्थम् ॥
यैर्यैः श्रमैर्विरचितोऽस्ति नवाङ्कुरोऽसौ
तेषामभिज्ञ इह कः परमात्मनोऽन्यः ।
इत्थं विचिन्त्य जगदीश तवैव तुष्ट्यै
सर्वज्ञ ते चरणयोर्निहितस्ततोऽयम् ॥

रघुनाथशर्म्मा । (१४८०)

अयं सोमभट्टात्मजः सप्तगजवेदभूमिते १४८७ शके भास्कराचार्यादिप्रणीतग्रन्थानुसारेण सूर्यमतेनापि मणिप्रदीपनामकं करणं समकरोत् । अस्यैकं पुस्तकं लिखितं प्राचीनं प्रायः शुद्धं त्रिप्रश्नाधिकारान्तं मन्निकटे वर्त्तते । आदावहर्गणानयनप्रकारतः करणारम्भसमयः १४८७ शको ज्ञायते । इदं खण्डितं लघु पुस्तकं श्लोकशतद्वयासन्नं रघुनाथेन करणकुतूहलादिकरणमार्गानुसारमेवालेखि न कश्चिदत्र विशेषः प्रतिभाति । अत्र प्रत्यध्यायसमाप्तौ "इति सोमभट्टात्मजरघुनाथभट्टविरचिते मणिप्रदीपे" इति लेखानुसारेणायं सोमभट्टसुत इति ज्ञायते ।

ग्रन्थादौ ।

यद्दलसचलितैः कृपाकटाक्षैर्द्रुहिणदिनेशवसिष्ठलोमशाद्याः ।
ग्रहगणितमहाब्धिपारमीयुस्तदहमुमाङ्घ्रिवपुर्महः श्रयामि ॥

आलोक्य भास्करकृतानखिलप्रबन्धान्
पूर्वैः कृतानपि च सूर्यमतेन खेटान् ।
वक्ष्ये ततः स्फुटतरान् रघुनाथशर्म्मा
संक्षेपतो ग्रहविदां श्रमनोदनाय ॥

रामदैवज्ञः । १४८०

अयमनन्तदैवज्ञसुतो नीलकण्ठानुजः काश्यां युग्मयुग्मशरधरामिते १५२२ शके मुहूर्त्तचिन्तामणिनामकं मुहूर्त्तग्रन्थं व्यरचयत् । सम्प्रति भारतवर्षे सर्वत्रैवास्य ग्रन्थस्य महती प्रसिद्धिः । एतदनुसारेणैव फलवेदिनो यात्राविवाहोत्सवादिमुहूर्त्तान् विचारयन्ति ।

मुहूर्त्तचिन्तामणिः श्रीपतिरचितरत्नमालाप्रतिबिम्बरूप एव । अत्र पद्यानां विलोकनेन ग्रन्थकृतः काव्यकोशव्याकरणज्योतिषेषु कौशलं स्फुटमेव ।

अस्यान्ते ।

आसीद्धर्मपुरे षडङ्गनिगमाध्येतृद्विजैर्मण्डिते
ज्योतिर्वित्तिलकः फणीन्द्ररचिते भाष्ये कृतातिश्रमः ।
तत्तज्जातकसंहितागणितकृन्मान्यो महाभूभुजां
तर्कालङ्कृतिवेदवाक्यविलसद्बुद्धिः स चिन्तामणिः ॥

Digitized by Google

ज्योतिर्विद्गणवन्दिताङ्घ्रिकमलस्तत्सूनुरासीत् कृती
नाम्नाऽनन्त इति प्रथामधिगतो भूमण्डलाहस्करः ।
यो रम्यां जनिपद्धतिं समकरोद्दुष्टाशयध्वंसिनीं
टीकां चोत्तमकामधेनुगणितेऽकार्षीत् सतां प्रीतये ॥

तदात्मज उदारधीर्विबुधनीलकण्ठानुजो
गणेशपदपङ्कजं हृदि निधाय रामाभिधः ।
गिरीशनगरे वरे भुजभुजेषुचन्द्रै १५२२ र्मिते
शके विनिरमादिमं खलु मुहूर्त्तचिन्तामणिम् ॥

रामदैवज्ञोऽयं पृथ्वीपति–अकब्बरनरेन्द्रराज्यप्राप्तिसमयात् सप्तसप्तवेदधराशक १४७७ समात् पञ्चाङ्गादिनिर्म्माणाय अकब्बरनृपतिकृपापात्रजयपुराधिपतिरामनृपतितुष्ट्यै तदीयाज्ञानुसारेण सप्तदशश्लोकैस्तिथ्याद्यानयनोपयोगिसारणीसहितं भुजचन्द्रबाणमहीसमशके १५१२ रामविनोदाख्यं करणमकरोत् । सारणीसहितमिदं करणं काशिकराजकीयपुस्तकालये स्थापनार्थं श्रीथिबोसाहिबमहाशयानुमत्या मत्क्रीतमस्ति पुस्तकालये । जयपुरादिप्रान्तेऽस्य करणस्य विशेषतः प्रचारोऽद्यावधि वरीवर्त्ति तत्रैतदनुसारेण पञ्चाङ्गं च रचयन्ति गणकाः । एवमस्य गणिते रामविनोदाख्यमिदं तन्त्रमुपलभ्यते । नृसिंहदैवज्ञोक्तानुसारेण सिद्धान्तोपयोगियन्त्ररचनाप्रकारमण्डितं यन्त्रप्रकाशनामकं तन्त्रं च रामकृतमिति ज्ञायते परन्तु तत्तन्त्रमस्मद्दृष्टिगोचरागतं नाद्यावधि । रामनृसिंहदैवज्ञयोः समयविलोकनेन मुहूर्त्तकृतोऽस्यैव रामस्य कृतिः सा यन्त्रप्रकाशाभिधेत्यनुमीयते । (नृसिंहदैवज्ञवर्णनं विलोक्यम्) अयं मीमांसाशास्त्ररसिकश्चासीत् कोलब्रूकसाहिबक्रीतस्य "इण्डिया–आफिस्‌नाम्नि स्थाने स्थापितस्यैतल्लिखितस्य तन्त्रवार्त्तिकाख्यस्य मीमांसापुस्तकस्य दर्शनात् ।

रामविनोदादौ ।

गणपतिमभिवन्द्य श्रीशपदारविन्द-
स्मरणविदिततत्त्वोऽनन्तजो रामचन्द्रः ।
अकबरनृपशाकाद्युक्ति पञ्चाङ्गपत्रं
ग्रहगतिसमवेतं रामभूपालतुष्ट्यै ॥

बाणरामविधु १३५ हीनिते शके विक्रमस्य किल शालिवाहनः ।
शैलशैलमनुभि १४७७ र्विवर्जितेऽस्मिन्नकब्बरशकाद्गताः समाः ॥

शाहाकब्बरराज्यतो गतसमाः पञ्चाग्निहीना इत्यादि ।

अन्ते ।

रामेण यत्नादिह रामदासप्रीत्यै कृते रामविनोदनाम्नि ।
जलालदीन्द्राकबरस्य शाकात्पञ्चाङ्कसिद्धिः परिपूर्त्तिमागात् ॥

अस्मिन् रामविनोदेऽपि दिवाकरतनूजेन कृष्णानुजेन विश्वनाथाभिधेन नागवेदशरभू १५४८ मिते शके ह्युदाहरणं चक्रे ।

तस्य रामविनोदोदाहरणस्यादौ च ।

रामो रामविनोदनामकमृजुं यं ग्रन्थमाबद्धवान्
तस्योदाहरणं परोपकृतये दैवार्करिर्दैववित् ।
ख्यातः प्रख्यगुणः करोति कुतुकात्तद्विश्वनाथः कृती
यद्राजन्यसभासु धन्यमनसां चेतः समारोहति ॥

टोडरमल्लप्रीत्यर्थं संहितारूपं टोडरानन्दनामकं ग्रन्थं च व्यरचयद्राम इत्यपि प्रसिद्धिरस्ति । टोडरानन्दश्च प्राचीनज्योतिर्विदां गेहे काठिन्येन पूर्णः प्राप्यते ।

गोविन्ददैवज्ञः । १४९१

अयं चन्द्राङ्कशक्र १४९१ मिते शके आश्विनशुक्लसप्तम्यां रविवासरे पुनर्वसुनक्षत्रे नीलकण्ठभार्यायाश्चन्द्रिकाख्यायाः कुक्षौ प्रादुरभूत् । अयं व्याकरणे कुशलो ज्योतिषे पटिष्ठः काव्यसाहित्यादिनिपुणो बहुविशेषगर्भितां प्राचीनाचार्यवचनमण्डितां स्वपितृव्यरामदैवज्ञकृतमुहूर्त्तचिन्तामणिटीकां पीयूषधाराख्यां तत्त्वतिथ्युन्मिते १५२५ शके वाराणस्यां व्यधात् । यद्यपीयं टीका मुहूर्त्तप्रपञ्चोपयोगिभिः प्राचीनवचनैर्ग्रन्थकृतो बहुविज्ञत्वं सूचयति तथापि सङ्क्रान्तिप्रकरणस्थनवमश्लोकटीकाऽस्य ज्योतिषसिद्धान्ताऽनभिज्ञत्वं सूचयति तद्यथा

"यात्रादिमुहूर्त्तेषु भरणीव्यतिपातादिदुष्टयोगानां गुरुपुष्यादिशुभयोगानां च व्यवहारो निरयणेनैवोपपद्यते न सायनेन सायनगणनया सर्वथा ग्रहणासंवादः । तद्यथा षोडशोत्तरपञ्चदशशत १५१६ मिते शालिवाहनशककाले वैशाखशुक्लपूर्णिमायां पञ्चत्रिंशद्घटीमितायामिन्दू-

पराग उपलब्धः । तत्र चन्द्रः = ६ । २६ । २८ राहुः = १३ । ५८ अत्र निरयगणनया शराङ्गुलानि १२ मानैक्यखण्डं २० ग्रासाङ्गुलानि ८ यद्यत्रायनांशांश्चन्द्रे योजयित्वा शर आनीयते तदा शराङ्गुलानि ३० अस्य मानैक्यखण्डाधिक्याद् ग्रहणं नायातीति सर्वजनप्रत्यक्षविसंवादः" इति ।

सायनगणनायां राहुरपि सायनः क्रियत इति सर्वमज्ञात्वैव गोविन्देन यत्सर्वं प्रलपितं तत्तस्यैव शोभते सायनराहुणा च तान्येव शराङ्गुलान्यायान्ति यानि निरयणेनोत्पद्यन्ते ।

पीयूषधारायां मङ्गलानन्तरमादौ ।

लसल्लक्ष्मीलीलावसतिरनिशं वेदविहित-
स्फुरद्धर्म्माधारः श्रितसुखपयोदः प्रतिदिनम् ।
अतीव प्रख्यातः स जयति गुणानां जननभू-
र्विदर्भाख्यो देशो हरिरिव सदानन्दजनकः ॥

तस्मिन् विदर्भविषये विषये वितृष्णा-
श्चिन्तामणिर्बुधमणिरिव बभूव मूर्त्तः ।
जाग्रच्चतुर्मुखचतुर्मुखशायिविद्या-
माद्यां प्रवर्त्तयितुमत्र पवित्रकीर्त्तिः ॥

वादैर्विजित्य धरणीतलमासमुद्र-
मुच्चिद्रतर्कशतकर्कशबुद्धिसिद्धैः ।
चत्वार ऊर्ज्जितसमर्ज्जितकीर्त्तिदम्भ-
स्तम्भा दिशासु रचिताः सकलासु येन ॥

ज्योतिर्विदुज्ज्वलयशोहरणाय किं वा
चन्द्रांशुनिर्मलकलाभरणाय किं वा ।
विद्यासरोरुहदृशः शरणाय किं वा
श्रीमाननन्त इति तत्तनयोऽजनिष्ट ॥

तस्मात्पद्माख्यपत्न्यामतिविमलमती वाक्पती दिक्पतीना-
माशाः कासारजाभस्फुरदधिकयशोरश्मिभिर्व्याप्य भान्तौ ।
प्राभूतां तौ तनूजौ श्रुतिगणगदिताचारधारापवित्रौ
ज्येष्ठः श्रीनीलकण्ठस्तदनु गुणगणाऽलङ्कृतो रामनामा ॥

Digitized by Google

सीमा मीमांसकानां कृतसुकृतचयः कर्कशस्तर्कशास्त्रे
ज्योतिःशास्त्रे च गर्गः फणिपतिभणितिव्याकृतौ शेषनागः ।
पृथ्वीशाकब्बरस्य स्फुरदतुलसभामण्डनं पण्डितेन्द्रः
साक्षाच्छ्रीनीलकण्ठः समजनि जगतीमण्डले नीलकण्ठः ॥

रामो हेरम्बभक्तेरधिगतविशदानेकविद्योऽनवद्यो
बुद्धिप्रद्योतमानो गणितगुणवतां मानवानां सुखाय ।
ग्रन्थैर्नानाप्रकारैरतिकठिनतरग्रन्थनक्रे विशाले
ज्योतिःशास्त्रार्णवे द्राग् दृढतरमतुलं सेतुबन्धं चकार ॥

श्रुतिस्मृतिप्रोक्तसमस्तकर्म्मोपयुक्तमानं हितशिष्टलोकम् ।
मुहूर्तचिन्तामणिनामकं स ग्रन्थं व्यधात्कश्विपुरे स्वपद्यैः ॥

श्रीनीलकण्ठस्य बभूव पत्नी सा चन्द्रिकाख्योभयवंशभूषा ।
नारायणस्येव समुद्रकन्या शर्वस्य गौरीव विराजते या ॥

तस्माद्वैवविदग्र्यगण्यतिलकाच्छ्रीनीलकण्ठात् तया
गोविन्दाख्यसुतोऽजनि स्वगुरुतः संप्राप्तविद्यागणः ।
यः शास्त्रामृतसिंधुबंधुरवचोवीचीषु नित्योदितां
सानन्दं समवाप्य भूरि कृतवान् ग्रन्थे श्रमं ज्योतिषे ॥

अनेकबुधमण्डलीविरचितां हि टीकाकृतौ
निधाय हृदयेऽर्थनामिह मुहूर्तचिन्तामणेः ।
निगूढतरतत्त्वतप्रचुरभावमात्मोक्तिभि-
र्बुधा विवरणे करामलकमाशु कर्तुं यते ॥

मुहूर्तचिन्तामणिदुग्धसिन्धुमामथ्य युक्तिव्रजमन्दरेण ।
गोविन्दसंज्ञस्तनुते सुखाय पीयूषधारां भुवि भूसुराणाम् ॥

अन्ते ।

श्रीमद्भूपतिशालिवाहनशके चन्द्राङ्कशक्रैर्मिते
मासीषेऽपरपक्षगे नगतिथौ तिग्मांशुवारेऽदितौ ।
धर्म्मज्योतिषशास्त्रपाणिनिमहाशास्त्रादिपारङ्गमात्
संभूतः खलु नीलकण्ठविदुषो गोविन्दनामा सुतः ॥
शाके तत्त्वतिथीमिते १५२५ युगगुणाब्दे ३४ नीलकण्ठात्मभू-
र्दुग्धाब्धिं निखिलार्थयुक्तममलं मौहूर्तचिन्तामणिम् ।

काश्यां वाक्यविचारमन्दरनगेनाऽऽमथ्य लेखप्रियां
गोविन्दो विधिविद्धुरोऽतिविमलां पीयूषधारां व्यधात् ॥

इयं टीका लिखिता मुद्रिता च प्रायः सर्वत्रैवोपलभ्यते । गोविन्दस्यान्या कृतिरस्मद्दृष्टिगोचरीभूता नाभूदिति ॥

मल्लारिः । १४९३

अयं दिवाकरनन्दनः कृष्णविष्णुभ्यां लघुस्तद्भ्राता पितुरधीतविद्यो नृसिंहदैवज्ञगुरुगणेशदैवज्ञकृतग्रहलाघवकरणस्योपरि सदर्थामुपपत्तिसहितां टीकामकार्षीत् । अस्यां यद्यपि स्वसमयो न लिखितस्तथापि नृसिंहसमयतोऽस्य समयो निर्णेतुं शक्यते । नृसिंहस्य जन्मशकः अष्टखपञ्चेन्दु १५०८ समः । अयं च कृष्णदैवज्ञस्य ज्येष्ठपुत्रः । तदुत्पत्तिसमये कृष्णस्य वयः पञ्चविंशतिमितं कल्प्यते तदा कृष्णस्य जन्मशकस्त्रिनागपुरन्दर १४८३ मितः । पञ्चवर्षैर्लघुस्तदनुजो यदि विष्णुः स्यात्तदा विष्णुजन्मशकोऽष्टाष्टपुरन्दरसमः १४८८ । एवमस्मादपि पञ्चवर्षैर्लघुस्तदनुजो मल्लारिश्चेत्कल्प्यते तदा मल्लारिजन्मशकोऽग्निनवपुरन्दर १४९३ मितः सिध्यति । अनया कल्पनया नृसिंहजन्मसमये मल्लारिवयः पञ्चदशवर्षसमं समायाति तेन नृसिंहस्य गुरुर्मल्लारिरपीति समुचित एव ।

मल्लारिकृता ग्रहलाघवटीकाऽस्य गोले गणिते काव्ये च सम्यक् पाटवं प्रकटयति । इयं लिखिता मुद्रिता च प्रायः सर्वत्रैवोपलभ्यते । ज्याखण्डैर्विना श्रीपतिज्यानयनमज्ञात्वैवात्र ग्रहलाघवप्रकाराणामुपपत्तयस्तथाऽऽसवमूलानयनमन्तरा केवलानुपातेन पलकर्णाद्यानयनोपपत्तयश्च न प्रौढगणकानन्दकारिण्यस्तथापीयं टीका भारतवर्षे सर्वैर्ज्योतिर्विद्भिरावृताऽन्यटीकाशिरोमणिरूपा सर्वत्र राजति ।

वक्रकेन्द्रांशानयनेऽत्र समीकरणकल्पना मल्लारिकृताऽतीवसुन्दरी पूर्वाचार्योक्तिभ्योऽपि विशिष्टा "फलांशखाङ्कान्तरशिञ्जिनीघ्नी"ति भास्करप्रकारमूलतः प्रादुर्भूता वस्तुतः प्रशंसार्हा । एतत्कल्पनाबलेनैव सिद्धान्तशिरोमणिस्पष्टाधिकारटिप्पण्यां श्रीबापूदेवश्च वक्रकेन्द्रांशानयनं चक्रे । अस्य सौजन्यं निष्पक्षपातरहितवर्णनं च टीकादिपञ्चमश्लोकेन

"तस्माद्व्युपपत्तिमस्य विमलां तन्मोहनाशाय तां
ज्ञात्वा मन्मतिकौशलं च गणकाः पश्यन्तु तुष्यन्तु ते ।

Digitized by Google

हे वर्या गणका विलोक्य यदिहाऽशुद्धं च संशोध्यतां
किं वा प्रार्थनया परोपकृतिषु स्वाभाविकस्तद्गुणः ॥

टीकान्ते च ।

देशे पार्थसमाह्वयेऽतिरुचिरे तीरे च गोदोत्तरे
गोलग्रामपुरे पुरारिचरणार्चासक्तविद्वद्युते ।
आसीत्तत्र दिवाकरोऽतिचतुरो दैवज्ञसङ्घाग्रणी-
र्विश्वेशे सततं यदीयहृदयं यस्तस्य पुत्रोऽकरोत् ॥

मल्लारिर्गणकाग्रणीर्गुरुपदद्वन्द्वाब्जभक्तौ रतो
लब्ध्वा बोधलवं ततो हि विवृतिं सार्थोपपत्तिं स्फुटाम् ।
वर्यस्य ग्रहलाघवस्य गणकश्रीमद्गणेशाभिध-
प्रोक्तस्याथ कृपालवो हि सुधियः पश्यन्तु तुष्ट्यास्त्विमाम् ॥

इत्यादिना स्फुटम् ।

नारायणः । १४९३

अयमनन्तनन्दनो देवगिरेर्नातिदूरप्रदेशे सौम्यदिशि घुसृणेश-नामप्रसिद्धमहादेवमन्दिरादुदक् टापरनामग्रामनिवासी त्रिनिधिवेदेन्दु-१४९३ शके विवाहादिमुहूर्त्तवर्णनरूपं मुहूर्त्तमार्त्तण्डनामकं ग्रन्थं वेदनि-धिसमुद्रशशाङ्कमिते १४९४ शके तट्टीकां च मार्त्तण्डवल्लभाख्यामका-र्षीत् । अस्य पूर्वप्रतिपादितं कृतिद्वयमेव दृश्यते । ग्रन्थस्यावलोकनेन ज्योतिषसिद्धान्तेऽस्य पाटवं स्फुटं परन्तु तत्राऽस्य काचित्कृतिर्नोपल-भ्यते । मुहूर्त्तमार्त्तण्डगृहप्रकरणेऽनेनोज्ज्यिन्या यम्यदिशि चित्रास्वात्यो-र्भयोर्वेधेन तदुत्तरे च कृत्तिकोदयवेधेन प्राचीसाधनं कृतम् । एतादृशं प्राचीसाधनं वेदे प्रसिद्धम् । एवमत्र मुहूर्त्तसम्बन्धिनो बहवो विशेषा वर्त्तन्ते । अयं ग्रन्थः शार्दूलविक्रीडितच्छन्दोभिः षष्ठ्यधिकशतसंख्याकै-र्निबद्धोऽस्ति ।

अस्यान्ते ।

श्रीमत्कौशिकपावनो हरिपदद्वन्द्वार्पितात्मा हरि-
स्तज्जोऽनन्त इलासु रोचितगुणो नारायणस्तत्सुतः ।
ख्यातं देवगिरेः शिवालयमुदक् तस्मादुदक् टापरे
ग्रामस्तद्वसतिर्मुहूर्त्तभुवनं मार्त्तण्डमत्राकरोत् ॥

व्यङ्केन्दुप्रमिते १४९३ वर्षे शालिवाहनजन्मतः।
कृतस्तपसि मार्त्तण्डोऽयमलं जयतूद्गतः॥

अयं मार्त्तण्डस्तपसि माघे कृतः। स चालमुद्गत उदयं गतो जयत्वित्यन्वयः कार्यः।

मार्त्तण्डवल्लभायाष्टीकाया अन्ते च।

आसीत् सासमणूरनामनगरे श्रीकौशिकस्यान्वयेऽ-
नन्तो वाजसनेयिपूज्यचरणो माध्यंदिनीयाग्रणीः।
कृष्णस्तत्तनयः श्रुतिस्मृतिविदामग्रेसरेज्यो हरि-
स्तत्पुत्रः श्रुतिवित्तदात्मजवरोऽनन्तोऽग्निहोत्री गुरुः॥
तत्पुत्रस्तदनुग्रहात्तधिषणो नारायणाष्टापर-
ग्रामे शिष्यगणेच्छया निजकृतग्रन्थस्य टीकां स्फुटाम्।
चक्रेऽस्यां कृपया परोपकृतये शोध्यं दुरुक्तं बुधै-
र्मोवृत्तस्य विलोक्य धार्ष्ट्यमपि ते कुप्यन्ति नो सज्जनाः॥
सुखनिधिपुरुषार्थैस्मासमाभिः १४९४ समाभिः
परिमितशककाले जातमार्त्तण्डटीकाम्।
लिखति पठति विप्रः सोऽत्र भूयाद्गरिष्ठां
सुखनिधिपुरुषार्थैस्मासमावान् समावान्॥

भारतवर्षे मुहूर्त्तमार्त्तण्डोऽतीवप्रसिद्धो मुहूर्त्तेऽतिप्रामाणिको लिखितो मुद्रितश्च प्रायः सर्वत्रैवोपलभ्यते।

रङ्गनाथः। (१४६५)

अस्य पिता बल्लालसंज्ञो माता च गोजिनाम्नी जन्मस्थानं काशी। अयं सिद्धान्तशिरोमणिटीकामरीचिरचयितुर्मुनीश्वरस्य पिता कृष्णदेवज्ञानुजः पञ्चयुग्मशरचन्द्र १५२५ मिते शके सूर्यसिद्धान्तस्य टिप्पणं गूढार्थप्रकाशकं नामाऽऽरभत। एतस्य समये यूरपदेशीयानां वाणिज्यार्थं भारत वर्षे चारप्रचार आसीत्। सूर्यसिद्धान्तस्य गोलाध्याये यन्त्राधिकारे

"पारदाराम्बुसूत्राणि शुल्बतैलजलानि च।
बीजानि पांसवस्तेषु प्रयोगास्तेऽपि दुर्लभाः"॥ इति

द्वाविंशतिश्लोकस्य टीकायां "इयं स्वयंवहविद्या समुद्रान्तर्निवासिजनैः फिरङ्गाख्यैः सम्यगभ्यस्तेती"ति विलेखनात् यूरपदेशीया-

Digitized by Google

नामागमनं स्फुटमवज्ञायते । अत्र सूर्यसिद्धान्तप्रकाशिकायामुपपत्तयो भास्करीयसिद्धान्तशिरोमण्यनुसारेण प्रायो लिखिताः सन्ति । तत्त्वतिथि-१५२५ मिते शके चैत्रशुक्लचतुर्दश्यां बुधे रात्रौ सूर्योदयात् सार्द्धद्विपञ्चाश-५२ । ३० द्दघटिकासु प्रसवदुःसहवेदनादुःखिताया आत्मप्रियाया दुःखेनोद्विग्नमनसस्तद्दुःखोपशान्त्यर्थं सूर्यसिद्धान्तटिप्पणं करिष्यामीति सङ्कल्पप्रवृत्तस्य रङ्गनाथस्य तत्क्षण एव मुनीश्वरस्य प्रादुर्भावो जातस्तेन रङ्गनाथेनेदं गूढप्रकाशकं मुनीश्वरस्य सहजमिति प्रोक्तम् । एतत्सर्वं स्ववंशवर्णनपूर्वकं ग्रन्थसमाप्तौ व्यलेखि चैनेन ।

टिप्पणादौ ।

यत्स्मृत्याऽभीष्टकार्यस्य निर्विघ्नां सिद्धिमेष्यति ।
नरस्तं बुद्धिदं वन्दे वक्रतुण्डं शिवोद्भवम् ॥
पितरौ गोजिबल्लालौ जयतोऽम्बाशिवात्मकौ ।
याभ्यां पञ्चसुता जाता ज्योतिःसंसारहेतवः ॥
सार्वभौमजहांगीरविश्वासास्पदभाजनम् ।
यस्य तं भ्रातरं कृष्णं बुधं वन्दे जगद्गुरुम् ॥
नानाग्रन्थान् समालोच्य सूर्यसिद्धान्तटिप्पणम् ।
करोमि रङ्गनाथोऽहं तद्गूढार्थप्रकाशकम् ॥

अन्ते

भागीरथीतीरसंस्थे शम्भोर्वाराणसीपुरे ।
बल्लालगणको रुद्रजपासक्तोऽभवद्बुधः ॥

तस्यात्मजाः पञ्च गुणाभिरामा ज्येष्ठः स रामः सकलागमज्ञः ।
येनोपपत्तिः स्वधिया नितान्तं प्रकाशिताऽनन्तसुधाकरस्य ॥
ततः स कृष्णो जहँगीरसार्वभौमस्य सर्वाधिगतप्रतिष्ठः ।
श्रीभास्करीयं विवृतं तु येन बीजं तथा श्रीपतिपद्धतिः सा ॥
गोविन्दसंज्ञस्तु ततस्तृतीयस्तस्यानुजोऽहं गुरुलब्धविद्यः ।
विश्वेशपत्पद्मनिविष्टचेताः काशीनिवासी सकलाभिमान्यः ॥
श्रीरङ्गनाथोऽर्कमुखोत्थशास्त्रे गूढप्रकाशाभिधटिप्पणं सः ।
कृत्वा महादेवबुधाग्रजोऽथ विश्वेश्वरायार्पितवान् सुबुद्ध्यै ॥
शके तत्त्वतिथ्युन्मिते चैत्रमासे सिते शम्भुतिथ्यां बुधेऽर्कोदयान्मे ।
दलाढ्यद्विनाराचनाडीषु जातौ मुनीशार्कसिद्धान्तगूढप्रकाशौ ॥

वाशब्दस्य पुंस्त्वातिदेशात् स्त्रीत्वाभावे टापो निवृत्तिः सिध्यति । निपातनात्सिद्धम् । किं निपातनं, न तावद् ‘ऋक्षवदश्ववडवा’ विति निपातनमाश्रयितुमुचितं, वचनान्तरे ऽनतिदेशप्रसङ्गाद् अश्ववडवान् अश्ववडवैरिति । एवं तर्ह्यश्ववडवपूर्वापराधरोत्तराणामित्यत्र टापोनुच्चारणाद्विपातनादश्ववडवयोर्द्वन्द्वे टाब्निवर्तिष्यते । अपर आह । ‘चार्थे द्वन्द्व’ इत्यत्रानेकमित्यधिकारात्सर्वेषामेव वर्तिपदार्थानां प्रथमानिर्दिष्टत्वेनोपसर्जनत्वा ‘द्गोस्त्रियोरुपसर्जनस्ये’ ति ह्रस्वत्वं भविष्यति, इहापि तर्हि प्राप्नोति कुक्कुटमयूर्याविति, अस्तु, का रूपसिद्धिः, परवल्लिङ्गमिति शब्दशब्दार्थौ, कोर्थः,– लिङ्गशब्देन लिङ्गाभिधायी प्रत्ययोर्थस्य तन्नैमित्तिकशेषश्च वोच्यते तद्द्वयमर्थो भवति द्वन्द्वार्थस्य तत्पुरुषार्थस्य परस्येव लिङ्गं भवति तदभिधायी प्रत्ययश्च परस्येव भवति ताभ्यामिति । तत्र च यत्र द्रव्यगुणो गुणकर्मणी यद्धृद्रोण इत्यादौ लिङ्गाभिधायी प्रत्ययो न संभवति तत्रार्थ एवातिदिश्यते उभयसम्भवे तूभयं यथा कुक्कुटमयूर्याविति, ततश्चौपदेशिकस्य ह्रस्वत्वे ऽप्यातिदेशिकस्य श्रवणं भविष्यति, अस्य चानुपसर्जनत्वात्तदन्तस्य चाप्रातिपदिकत्वात्पुनर्ह्रस्वत्वाभावः, इह तर्हि दत्तागार्ग्यायण्यौ दत्ताकारीषगन्ध्ये इति ह्रस्वत्वे कृते समासात्पुनः ष्फङ्ङी प्राप्नुतः, स्तां, ‘भस्याढे तद्धित’ इति पूर्वोत्पन्नयोर्निवृत्तिर्भविष्यति । यत्र तर्हि पुंवद्भावो नास्ति अभत्वाद् यथा दत्ता च युवतिश्च दत्तायुवती इति तत्र द्वयोः स्त्रीप्रत्यययोः श्रवणप्रसङ्गः, तस्मादनुपसर्जनह्रस्वत्वं द्वन्द्वे न भवति । अन्वर्था ह्युपसर्जनसंज्ञा ऽप्रधानस्य विधीयते, द्वन्द्वे चावयवार्थानामेव कार्यान्वयादप्राधान्याभावः । परवल्लिङ्गमिति चार्थ एवातिदिश्यते ऽश्ववडवाविति च निपातनादित्येतदेव सम्मतम् । ‘द्विगुप्राप्तापन्नेत्यादि’ । स तर्हि प्रतिषेधो वक्तव्यो न वक्तव्यस्तत्पुरुषग्रहणं न करिष्यते परवल्लिङ्गं द्वन्द्वस्येत्येव, कथं पूर्वकायः अर्धपिप्पलीति, एकदेशिसमासो नारप्स्यते, कर्मधारय एवात्र भविष्यति पूर्वश्चासौ कायश्च अर्धं चासौ पिप्पली चेति । पूर्वादयः शब्दा एकदेशे वर्तन्ते कायादयस्तु समुदाये कथमेषां सामानाधिकरण्यम्, अवयवेन समुदायोपचारात् । तदेवं

कर्मधारये कृते प्राधान्यादेवोत्तरपदार्थस्य लिङ्गं भविष्यति नार्थस्तत्पुरुषग्रहणेन नाप्येकदेशिसमासेन, षष्ठीसमासप्रसङ्ग इति चेदेष्टत्वादनभिधानाच्च । तच्चैतत्स्यात् । यद्यपि पूर्वकाय इत्यादीनि रूपाणि कर्मधारयेणापि सिध्यन्ति तथापि मुख्यार्थवृत्तिषु कायादिशब्देषु यथा पूर्वं कायस्येत्येवमादि वाक्यं भवति तथा कायपूर्व इत्यादि षष्ठीसमासोपि स्यात् अतस्तन्निवृत्तये एकदेशिसमास आरब्ध इति तच्च नैवम्, इष्टत्वादनभिधानाच्च । तत्र तावत् द्वितीयतृतीयेत्यत्रान्यतरस्यांग्रहणात्सूत्रकारस्य षष्ठीसमास इष्टो भिक्षाद्वितीयमिति, 'अर्द्धं नपुंसक' मित्यत्रापि भाष्यकार आह दृश्यतेच षष्ठी समासोपि तद्यथा ऽपूपार्धं मया भक्षितमिति, अस्ति च पैङ्गले सूत्रे प्रयोगः स्वराद्धं चार्याधमिति । पूर्वापरेत्यत्र त्वनभिधानात् षष्ठी समासो न भविष्यति ॥

"पूर्ववदश्ववडवौ" ॥ 'अश्ववडवयोरिति' । विभाषा वृक्षेत्यत्र पशुद्वन्द्व इत्येव सिद्धेऽश्ववडवग्रहणं प्रतिपदविधानार्थं, तत्र प्रतिपदविधानादश्ववडवमित्येकवद्भावपक्षे इमं विधिं बाधित्वा 'स नपुंसक' मित्येतदेव भवति, तच्छब्देन ह्येकवद्भावभाजं परामृश्य विधीयमानं नपुंसकत्वमप्येकवद्भाववदेव प्रतिपदविहितं भवति, यस्तु पूर्ववदित्यतिदेशः स एकवद्भावाभावपक्षे चरितार्थः, तदाह । 'तत्रैकवद्भावादन्यत्रेति' । 'न निपातनमिति' । निपातने हि पूर्ववदिति वचनमनर्थकम् अश्ववडवावित्येव ब्रूयात् तेन किं सिद्धं भवतीत्याह । 'तत्रेति' । 'अतन्त्र' मप्रधानमविवक्षितमित्यर्थः । निपातने तु तद्विवक्षितं स्यात् यथोच्चारितरूपविषयत्वान्निपातस्य ॥

"हेमन्तशिशिरावहोरात्रे चच्छन्दसि" ॥ 'हेमन्तशिशिराविति' । अत्र नपुंसकत्वं प्राप्तं शिशिरशब्दस्य नपुंसकत्वात् । के चित्तु हेमन्तः शिशिरोऽस्त्रियामित्युभयलिङ्गं मन्यन्ते तेषामत्र हेमन्तशिशिरावित्यनर्थकम् । 'अहोरात्रे इति' । अत्र 'रात्राह्नाहाः पुंसी' ति पुंस्त्वं प्राप्तम् । 'लिङ्गव्यत्यय उक्त इति' । 'व्यत्ययो बहुल' मित्यनेन ॥

"रात्राह्नाहाः पुंसि" ॥ 'इत्येते पुंसि भाष्यन्त इति'। के चि-दाहुः। रात्रादीनामेवानेन पुंस्त्वं विधीयते तदन्तस्य तु परवल्लिङ्गमि-त्येव सिद्धमिति, एवं तु समाहारे 'स नपुंसक' मित्येतदेव स्यात् परवल्लि-ङ्गापवादत्वात्तस्य, तस्माद्रात्राद्यन्तस्य समासस्यैवेदं लिङ्गविधानं युक्तम्, एवं हि समाहारेऽपि परत्वादिदमेव प्रवर्त्तते। इत्येते पुंसि भाष्यन्त इत्यत्र त्वेनदन्ता इत्यर्थो द्रष्टव्यः। 'त्रिरात्र इति'। समाहारे द्विगुः, अहः सर्वैकदेशेत्यच् समासान्तः। 'पूर्वाह्ण इति'। अह्नः पूर्वो भागः, एकदेशिस-मासः। 'राजाहःसखिभ्यष्टच्'। 'अह्नोह्न एतेभ्य' इत्यह्नादेशः 'अह्नो ऽदन्ता' दिति णत्वम्। 'द्व्यह इति'। 'न संख्याऽऽदेः समाहार' इत्यह्ना-देशाभावः, 'अह्नष्टखोरेवे' ति टिलोपः। 'अनुवाकादयः पुंसीति'। वाक्य-विशेषस्य ताः संज्ञाः कर्म्मणि घञन्ता इति नपुंसकत्वे प्राप्ते वचनम् ॥

"अपथं नपुंसकम्" ॥ 'पथः संख्याव्ययादे' रित्यस्यापरकालभा-वित्वादयमारम्भः। 'अपथमिति'। 'पथो विभाषे' ति यदा समासा-न्तप्रतिषेधो न भवति तदर्क्पूरब्धूरित्यकारः समासान्तः। समासान्तनिर्दे-शाच्च तदभावपक्षे पुंस्त्वमेव भवत्यपन्था इति। 'तत्पुरुष इति एतेन-इति'। एतदर्थमेव 'स नपुंसक' मित्यस्यानन्तरं न कृतम् ॥

"अर्धर्चाः पुंसि च" ॥ साहचर्याच्छत्रिन्यायेन कार्षापणादीना-मप्यर्धर्चशब्देन ग्रहणमित्याह। 'अर्धर्चादय इति'। बहुवचनमत्र प्रमा-णम्। 'शब्दरूपाश्रया चेयं द्विलिङ्गतेति'। अस्मिंश्छब्दरूपे लिङ्गद्वयं भव-तीत्येतावदत्र विवक्षितं न पुनरस्य शब्दस्य यावानर्थस्तत्र सर्वत्र लिङ्गद्वयं भवतीत्येवमपीत्यर्थः। किमेवं सति सिद्धं भवतीत्याह। 'क्व चिदिति'। अर्थभेदेन व्यवस्थयापि भवल्लिङ्गद्वयं तत्रैव शब्दे संप्रवृत्तमिति भावः। अत्रोदाहरणमाह। 'यथेति'। 'शङ्खः पद्मश्च विज्ञेयो धनदस्य महानिधी'। 'क्रियाशब्दस्येति'। तद्यथा, भूतं कार्यम्भूता शाला भूतो घट इति। 'यौगिकस्याभिधेयवल्लिङ्गमिति'। यद्यपि लवणाङ्कुरेऽपि सैन्धवशब्दस्य योगोऽपि निमित्तं तथापि रूढिशक्तिरपि तत्र निमित्तम्, अतो यौगिक-स्येति केवलयोगनिमित्तस्येत्यर्थः। 'अभिधेयवल्लिङ्गमिति'। यथा

Digitized by Google

सिन्धौ भवं सैन्धवं जलं सैन्धवो मत्स्यः सैन्धवी शफरीति । 'उत्तर्णे पुंल्लिङ्ग इति' । चन्दनसारः खदिरसार इति । 'धर्म्म इत्यपूर्वे पुंल्लिङ्ग इति' । यागादिक्रियाजन्यः स्वर्गादिफलानुगुणः कर्तर्युत्पन्नः संस्कारविशेषो ऽपूर्वम् । भाट्टास्त्वपूर्वसाधने यागादावेव धर्म्मशब्दं पुंल्लिङ्गमन्यन्ते । "चोदनालक्षणो धर्म्मः," द्रव्यक्रियागुणादीनां धर्म्मत्वं स्थापयिष्यते इति । शाबरेप्युक्तं यो यागमनुतिष्ठति तं धार्म्मिक इत्याचक्षत इति ॥

"इदमोऽन्वादेशे ऽशनुदात्तस्तृतीयादौ" ॥ 'अन्वादेशो ऽनुकथनमिति' । शब्दार्थकथनमेतत्, यादृशस्त्वत्राभिप्रेतस्तादृशं पश्चाद्वक्ष्यति । 'आभ्यां छात्राभ्यामिति' । आदेश एषः । 'अथो आभ्यामिति' । एषोऽन्वादेशः । अथोशब्देन चात्रान्वादेशो ऽभिव्यज्यते । ननु तृतीयादावयमादेशस्तत्र च टायामोसि चैनादेशो वक्ष्यते ऽन्याः सर्वा हलादयस्तत्र हलि लोपेनैवाभ्यामित्यादिरूपं सिद्धं नार्थ आदेशवचनेन, तत्राह । 'आदेशवचनमिति' । अज्ञाताद्यर्थविवक्षायामकचि कृते 'हलि लोप' इत्यत्र 'नाद्यक' इत्यतोऽक इत्यधिकारादिद्रूपलोपो न स्यात्, सत्यपि च तस्मिन्नाभ्यामित्यादि रूपं न सिध्येत्, तस्मात्साकच्कार्थमादेशवचनं, साकच्कार्थं चास्मिन् शित्करणं सर्वादेशार्थम् । न चान्त्यस्य विकारवचनानर्थक्यात् । यदि ह्ययमन्त्यस्य विकारः स्याद्वचनमिदमनर्थकं स्यात् त्यदाद्यत्वेनैव सिद्धेः । अर्थवद्वादेशप्रतिषेधार्थम् । अन्त्यस्यापि विकारवचनमर्थवदेव, येऽन्यआदेशा आभ्यामित्यादौ दीर्घादयस्ते माभूवन्नित्यकारस्याप्यकारवचनं स्याद्यथा 'मो राजि समः क्वौ' विति मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थम् । ननु च कृते ऽप्यकचि अनेनादेशे सत्याभ्यामित्यादिरूपस्य साधारण्यादज्ञाताद्यर्थगतिः प्रकरणाधीना, यद्येवमनुत्पत्तिरेवाकचोऽस्तु प्रकरणादिनैवाज्ञाताद्यर्थः प्रतिपत्स्यते ऽतो ऽनुदात्तत्वमेव विधेयं नादेशः, उच्यते । असत्यादेशे प्रकरणादिकमन्तरेणाकचैव कश्चिदज्ञातादिकं प्रतिपादयेत्, मैवं प्रतिपीपददित्यादेशवचनम् । उत्तरार्थं च । अनुदात्तवचनं किमर्थं, यावतोडिदम्पदादीति विभक्तेरुदात्तत्वं शेषनिघातेनैव सिद्धम्, अनुदात्तवचनं विभक्त्यन्तस्यानुदात्तार्थम्, शेषनिघातेन

हि प्रकृतेरेवानुदात्तत्वं सिद्ध्यति। कथं पुनरिदमस्तृतीयादावशादेशो भवति स चानुदात्त इत्यनेन विभक्त्यन्तस्यानुदात्तत्वं विधातुं शक्यम्। नानेन विभक्त्यन्तस्यानुदात्तत्वं विधीयते किं त्वनेन प्रकृतेरनुदात्तत्वे कृते ऊडिदमित्यन्तोदात्तादित्यधिकारादसति विभक्तेरुदात्तत्वेऽ'नुदात्तौ सुप्पितौ' इत्यनुदात्तत्वादाभ्यामित्यादि पदं कृत्स्नमेवानुदात्तं भवति। यद्यन्वादेशोऽनुकथनम् इहापि प्राप्नोति देवदत्तं भोजय इमं च यज्ञदत्तमिति, अस्ति ह्यत्रान्वादेशः, तत्र 'द्वितीया टौस्स्वेन' इत्येनादेशः प्राप्नोत्यत आह। 'नेहेति'। 'एकस्यैवाभिधेयस्येत्यादि'। तत्रैवान्वादेशशब्दः प्रसिद्धतर इति भावः॥

"एतदस्त्रतसोस्त्रतसौ चानुदात्तौ"॥ 'पुनर्वचनमनुदात्तार्थमिति'। प्राथमिको ऽशादेश उदात्तः स्यात् अनुदात्तश्चेष्यते इत्यनुदात्तार्थं पुनर्वचनं, त्रतसोरिति वचनं निमित्तभावार्थम् अन्यथा त्रतसौ चानुदात्तावित्यन्वाचयो विज्ञायेत, यत्र त्रतसौ पश्यसि तत्र तावनुदात्तौ विति। किमर्थं पुनस्त्रतसोरनुदात्तत्वमिष्यते यावता ऽशादेशः कृतयोः त्रतसोः कृतयोः प्रकृतेर्लित्स्वरे कृते शेषनिघातेन प्रत्ययानुदात्तत्वे सत्यप्यनुदात्तः करिष्यते। यद्येवं लभ्येत कृतं स्यात् तत्तु न लभ्यम्, इह हि त्रतसोः कृतयोर्लित्स्वरश्च प्राप्नोति अनेन चानुदात्तोऽशादेशस्तत्र येन नाप्राप्तिन्यायेनापवादत्वादित्यत्वाच्चानुदात्तेऽशादेशे कृते तद्विधानसामर्थ्यादपवादस्य लित्स्वरस्याप्रवृत्तावुत्सर्गः प्रत्ययस्वर एव त्रतसोः स्यात्, यथा गोः पदमित्यत्र चतुर्थ उलोपेन सह विधानात्लित्स्वराप्रवृत्तौ प्रत्ययाद्युदात्तत्वे सति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तं पदं भवति, तस्मात्त्रतसौ चानुदात्ताविति वक्तव्यम्॥

"द्वितीयाटौस्स्वेनः"॥ अनन्तरत्वादेतद एवैनादेशः प्राप्नोति, इदमोऽपीष्यते तदिदमो ग्रहणं कर्त्तव्यं, न कर्त्तव्यम्, इदमोऽन्वादेश इत्यत इदम इत्यनुवर्तिष्यते, एतदस्त्रतसोरित्यत्रापि संबन्धात्तस्यापि त्रतसोरादेशप्रसङ्ग इत्यत आह। 'इदमो मण्डूकप्लुतिन्यायेनानुवृत्तिरिति'। एतदप्यत्र कर्त्तव्यम्, इदमो हमत्वयेन बाधितत्वादतो ऽसम्भवात्तत्रानुवृत्तिरित्यत्राप्यनन्य

इति । यदि परमनुवृत्तिसामर्थ्यात्तस्याप्यादेशेन भाव्यं, न चासति चलि तद्विधानमुपपद्यतइति चलः सत्ता परिकल्प्यते, तदपि न । उत्तरार्थमप्यनुवृत्तिसम्भवादिति । ‘एनदिति नपुंसकैकवचने वक्तव्यमिति’ । एनादेशे कृते ‘ऽतोऽमि’ त्यम्भावे सत्येनमिति प्राप्नोत्यत एनदादेशो वक्तव्यः । यद्येवमयमेव सर्वत्रास्तु नार्थ एनादेशेन, कथम् एनं एनौ एनान् एनेन एनयो रिति, त्यदाद्यत्वे कृते भविष्यति, नपुंसकैकवचने तु नित्यत्वा ‘त्स्वमोर्नपुंसका-दि’ ति लुकि कृते एनदिति स्यादिति सिद्धम्, इह त्वेनं श्रित इति द्वितीयासमासे यद्यप्येनादेशोऽप्यत्येनदादेश उभाभ्यामपि न भाव्यं, कथम्, अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते तस्मादेतच्छ्रित इति भवति । ‘एकमेव विधानमिति’ । अयं दण्ड इत्यनेन दण्डस्य सत्तामात्रमुपलक्ष्यते न तु किं चिद्विधीयते, एवमीषदर्थइत्यादिना आकारस्य स्वरूपमात्रं निर्दिश्यते न तु किं चिद्विधीयते ॥

“आर्द्धधातुके” ॥ ‘वध्यादिति’ । आशिषि लिङ्, ‘लिङाशिषी’ त्यार्धधातुकसंज्ञा । ‘हन्यादिति’ । विध्यादिलिङ् । ‘विषयसप्तमी चेयमिति’ । सामान्यनिर्देशोऽयं तत्र व्यापित्वान्नित्यत्वाच्च न तेन सह देशकालकृतं सामीप्यं सम्भवति तस्माद्विषयसप्तमी । यदि तु व्यक्तिनिर्देशेन परसप्तमी स्याद्भव्यमित्यादि न स्यात् । तथा हि । हलन्तत्वाद्भस्त्यादीना ‘मृहलोर्ण्य’ दि ति ण्यति कृते तत्र परत आदेशेर्भाव्यं तत्र द्वयोर्वृद्धौ कृतायां तृतीयस्य च पुकि भाव्यं प्रवेयं आख्याव्यमिति प्रसज्येत । इह च ‘भुवो वचिः’ भुवोऽजन्तत्वाद्यति कृते वच्यादेशे च वच्यमिति प्राप्नोति विषयसप्तम्यां तु नैष दोष इत्याह । ‘तेनेति’ । ‘यथा प्राप्तमिति’ । यो यतः प्राप्नोति स ततो भवतीत्यर्थः । ‘असिद्धवदत्राभा’ दित्यस्य भावाभावव्यवस्थार्थम् । अत्र चाङ्गाधिकारे च द्विरार्धधातुकाधिकारः क्रियते । यदि ह्येतेऽप्यादेशास्तत्रैव विधीयेरन् जग्धतुरधिजगे ऽध्यगीष्ट बभूव विव्यतुरिति घसाद्यादेशानामसिद्धत्वादुपधालोपाल्लोपेत्वगुणयणो न स्युर्यदि त्वतोऽलोपाद्यपवादेव विधीयेरन् गतो गतवानित्यनुनासिकलोपस्यासिद्धत्वाभावादतो लोपः स्यादित्येषा दिक् ॥

"अदो जग्धिर्ल्यप्ति किति" ॥ ल्यबिति पृथक् पदं लुप्तसप्तमीकम् । इह पदद्वयापेक्षं समासमपेक्षमाणो ल्यब्बहिरङ्गः क्त्वाप्रत्ययमात्रापेक्षस्तु जग्ध्यादेशोऽन्तरङ्गः, तत्र क्त्वावस्थायामेव जग्धौ कृते प्रजग्ध्येति सिद्धं नार्थो ल्यब्ग्रहणेन । एवं तर्हि ल्यब्विषयेऽप्यन्तरङ्गत्वात्ति कितीत्येव सिद्धे जग्धौ ल्यबिति यदुच्यते तज्ज्ञापयत्यन्तरङ्गाणामपि विधीनां हिप्रभृतीनां ल्यपा भवति बाधनमिति । विधाय विहाय प्रदाय प्रखाय प्रखन्य प्रस्थाय प्रक्रम्य आपृच्छ्य प्रदीव्य प्रपत्येत्येतेषु विधिषु 'दधातेर्हिः' 'जहातेश्च क्ति' 'दो दद् घोः' 'जनसनखनां सञ्झलोः' 'द्यतिस्यतिमास्थामित्ति किति' 'अनुनासिकस्य क्विझलोः क्ङिति' 'च्छ्वोः शूडनुनासिके च' 'आर्धधातुकस्येड्वलादे'रित्येते विधयः क्त्वावस्थायामेव प्राप्ता बहिरङ्गेन ल्यपा बाध्यन्ते । एष एवार्थः श्लोकान्तरेण भाष्ये कथितः । 'जग्धिविधिर्ल्यपि यत्तदकरणम्,' । अकरणं निष्प्रयोजनमित्यर्थः । 'सिद्धमदोऽस्ति कितीति विधानात्' । अदो जग्धिविधानमित्यर्थः । ज्ञापकार्थं ल्यपि जग्धिविधानमित्याह । 'हिप्रभृतींस्तु सदा बहिरङ्गो ल्यब्भरतीति कृतं तदु विद्धि' । ल्यब्भरतीति, ल्यबादेशो हरति अपनयति बाधत इत्यर्थः । उ इति निपातोऽवधारणे । एतदेवास्य प्रयोजनमित्यर्थः ॥

"लुङ्सनोर्घस्लृ" ॥ ननु 'सृघस्यदः क्मरजि'ति वचनाद् घसिः प्रकृत्यन्तरमस्ति । सत्यम् । अदेरात्सीद् अत्सिषतीत्यनिष्टं रूपं माभूदिति योगारम्भः । 'प्रात्तीति प्रघस इति' । पचाद्यच् । अस्यापि सूत्रवदेव प्रयोजनम् ॥

"बहुलं छन्दसि" ॥ 'घस्तामिति' । लुङि मन्त्रे घसेत्यादिना च्लेर्लुक्, 'बहुलं छन्दस्यमाङ्योगेऽपी'त्यडभावः । 'सग्धिरिति' । घसिभसोरित्युपधालोपः, 'झलो झलि' समाना ग्धिरिति समानस्य छन्दसीति सभावः । 'अन्यतरस्यांग्रहणमेव कस्मान्न क्रियत इति' । कः पुनरेवं सति गुण इत्याह । 'तदेवेति' । प्रकृत्यन्तरस्य सद्भावादस्य प्रयोजनं मृग्यम् ॥

"लिट्यन्यतरस्याम्" ॥ प्रकृत्यन्तरस्यासर्वविषयत्वज्ञापनार्थमिदं, तेन यत्र लिङ्गं वचनं वा नास्ति तत्र तस्य प्रयोगो न भवति । तत्र

सविकरणं लुङि प्रयोगस्य सिद्धम्, यच्चेदं सर्वोऽप्यित्यनुदात्तपाठो वधादेशावार्द्धधातुके, 'सुपस्यदः कर्तरी'ति प्रथमं कर्तरि, भूवादिषु पर-स्मैपदिषु पाठात्परस्मैपदे प्रयोगः ॥

"हनो वध लिङि" ॥ 'अकारान्तश्चायमादेश इति'। कुत एतत्। शैलीयमाचार्यस्य यत्र व्यञ्जनान्त आदेशस्तत्रेकारमुच्चारयति यथा जग्ध्यादौ तस्मादिकाराकरणादकारान्तोऽयमादेशः। 'हलन्तलक्षणा वृद्धि-र्न भवतीति'। उत्तरसूत्रेण वधादेशे कृत इति भावः ॥

"आत्मनेपदेष्वन्यतरस्याम्" ॥ 'आहसतेति'। 'आङो यमहनः' इत्यात्मनेपदम्। 'आत्मनेपदेष्वनतः,' 'हनः सिच्' इति सिचः कित्त्वा-दनुदात्तोपदेशेत्यनुनासिकलोपः ॥

"इणो गा लुङि" ॥ 'अगुरिति'। गातिस्थेति सिचो लुक्, 'आतः' इति झेर्जुस्, 'उस्यपदान्तात्'। 'इणवदिक इति वक्तव्यमिति' अ-धस्यैवायं प्रकरणस्य शेषः स्यादिति कोऽमा लुङीति सूत्रन्यासः कार्य इत्यवक्ष्यत् यतस्तु खलु इणवदिक इत्याह, तेन मन्यामहे सर्वस्य शास्त्रस्य शेषोऽयमिति तेने 'णो यण्' एतिस्तु शास्त्वित्यादावपि भवति अधियन्ति अधीत्येति ॥

"गाङ् लिटि"। द्विलकारकोऽयं निर्देशः, लिटि लकारादाविति। तेन प्रागेवादेशेभ्यो लावस्थायामेवादेशो भवति। किं सिद्धं भवति अधि-जगे 'द्विर्वचनेऽची'ति स्थानिवद्भावो न भवति। ङित्करणमनर्थकं स्थानि-वद्भावादेव सिद्धमात्मनेपदमित्याशङ्क्याह। 'गाङ्यनुबन्धकरणमिति'। 'गाङिति ग्रहणं यथा स्यादिति'। ननु चैतदपि स्थानिवद्भावादेव सिद्धं, नेत्याह। 'अधीति'। गाङ्कुटादिभ्य इति उच्यमाने के गै रै शब्दे इणो वा लुङीत्येतयोरपि ग्रहणं प्राप्नोति ततश्चागासीन्नटः, अगासातां ग्रामौ देव-दत्तेनेत्यत्रापि घुमास्थादिति सूत्रेणेत्वं प्रसज्येत। अपर आह। यत्र सानुबन्धकास्यच्चार्यते तत्राकृतायामेवेत्संज्ञायामादेशः प्रवर्त्तते सत्या-मपि वा तस्यामनुबन्धकार्यमादेशे न भवतीत्यस्यार्थस्य ज्ञापनार्थं गाङ्-यनुबन्धकरणमिति, किं प्रयोजनं, 'चक्षिङः ख्याञ्' ङित इत्यात्मनेपदं

Digitized by Google

न भवति । अिवादेशकरणसामर्थ्यात्स्वरितञित इत्येतदेव भविष्यति । इह तर्हि लटः शतृशानचौ, लट इति सानुबन्धकात्षष्ठी, पचमानः, टित इत्येत्त्वं न भवतीति । प्रकृतानामात्मनेपदानामेत्त्वविधानादिह न भवति । इह तर्हि 'युवोरनाकौ' वित्यत्र भुज्युः शंयुरित्यत्र मा भूदिति, अनुनासिकोकारानुबन्धौ युवू सूत्रे निर्दिष्टौ ततश्च नन्दनः कारकः नन्दना कारिका स्थानिवद्भावादुगिल्लक्षणौ ङीन्नुमौ प्राप्नुतः, अस्माच्च ज्ञापकाच्च भवतः । अनुनासिकयणोस्तत्र ग्रहणं न त्वनुनासिकोकारानुबन्धयोरिति नाचोगित्कार्यप्रसङ्गः, इह हि 'सेर्ह्यपिच्च,' सिपो हिरिति वक्तव्यम् । अपिच्चेति न वक्तव्यम्, इह च तुह्योस्तातङ्ङिति तिप्सिपोस्तातङाशिषीति सानुबन्धकात्षष्ठीमुच्चार्यादेशो विधेयो ङित्करणं न कर्तव्यम् । इह च तस्थस्थमिपामिति पकारो नोच्चार्यस्तेनाचिनवमित्यादौ गुणसिद्धिः, अवि-ज्ञोरणार्थयोः स्को स्यञित्यादौ यत्र स्यान्यनुबन्धकार्यमिष्यते तत्रानुब-न्धकः स्यादुपादेयः । वाराह्या प्रकृत्येत्यादौ वृद्धिर्गुणप्रतिषेधश्च भवति तदेवमस्य पक्षस्य मन्दत्वादनुपन्यासः ॥

"णौ च संश्चङोः" ॥ 'अध्यापिपयिषतीति' । 'क्रीङ्जीनां णौ' वि-त्यात्वम् । 'अध्यजीगपदिति' । लुङि चङि णौ चङ्युपधाया ह्रस्वः । सन्वल्लघुनि, 'दीर्घो लघोः' ॥

"अस्तेर्भूः" ॥ भवतेरेव भवितेत्यादौ सिद्धेऽस्तेरसितेत्यादि निवृत्तये योगारम्भः । 'अनुप्रयोगे त्विति' । अनुप्रयोगे विषये भुवा भूभावे-नास्तेरनिवृत्तिं मनीषिणः स्मरन्ति । कर्तुः सूत्रकारस्य वचनात् मनीषिणः कर्तुरिति वा ॥

"ब्रुवो वचिः" ॥ ब्रुव आर्धधातुके प्रयोगनिवृत्त्यर्थं वचनम् । वक्ते-त्यादिकं तु वचेरेव सिद्धम् ॥

"चक्षिङः ख्याञ्" ॥ कर्त्रभिप्राये क्रियाफले आख्यास्यते आचख्ये इत्यात्मनेपदं यथा स्यात् तृजादौ चक्षितेत्यादि मा भूदिति च योगा-रम्भः । आख्यातेत्यादि ख्या प्रकथन इत्यस्यैव सिद्धम् । अत्र यथान्यासे

Digitized by Google

आख्यातारत्पूर्वो भागः खकारयकारात्मेति स्याद्वाख्यातेति, ककारशकारात्मापि त्विष्यते आक्शातेति, तदेतदाह । 'क्शादिरप्ययमिति' । ककारेऽकार उच्चारणार्थः । अपर आह खशादिरेवायमादेश इति, अत्राप्यकार उच्चारणार्थः । तत्र चर्त्वे कृते क्शातेत्यादि भवति । कथमाख्यातेति खकारयकारयोः श्रवणम् । असिद्धकाण्डे यत्वविधानानन्तरं खशाञः शस्य यो वेति शस्य यत्वं विभाषा वक्तव्यम् । तत्र चर्त्वे यत्वं सिद्धमित्याख्यातेत्यादि यत्वपक्षे रूपम्, अन्यदा क्शातेति रूपम् । अवश्यं च शस्य यत्वमित्याश्रयणीयम् । इह सुप्रचष्टे सुप्रख्यः आतश्चोपसर्गे इति कः, ततो यत्वस्यासिद्धत्वात्सुप्रख्यस्य भाव इति योपधाद्गुरूपोत्तमाद्विति वुञ् न भवति अयोपधत्वात्, तस्मिन्नसति ष्यञ् भवति सौप्रख्यमिति । तथा सुप्रख्येन निर्वृत्ते देशे भवः सौप्रख्यीयः, धन्वयोपधाद्विति वुञ् न भवति, 'वृद्धाच्छ' एव भवति । आख्यातः, यत्वस्यासिद्धत्वाद्व्यवधानस्याभावात्संयोगादेरिति नत्वं न भवति, 'न ध्याख्यापॄमूर्छिमदा' मित्यत्र ख्याग्रहणं न कर्तव्यं भवति । पुंसः ख्यानं पुंख्यानमित्यत्र यत्वस्यासिद्धत्वा 'त्पुमः खय्यम्परे' इति रुविधिर्न भवति; पर्याख्यानम्, यत्वस्यासिद्धत्वात्खकारेणानटा व्यवाया 'त्कृत्यच' इति णत्वाभावः । नटः ख्यातेत्यत्र यत्वस्यासिद्धत्वात् खरः शर्परत्वा 'त्खर्परे विसर्जनीय' इत्येव विधिर्भवति । नन्वसिद्धे शस्य यवचनेऽपि ख्या प्रकथन इत्यस्यौत्पत्तिक एव यकार इति तत्र वुञादिप्रसङ्गः, एवं तर्हि सोऽपि खशादिः शस्य यवचनमपि साधारणं द्रष्टव्यम् । 'नृचक्षा रक्ष इति' । छान्दसः प्रयोगः । भाषायां तु नृचक्षो रक्ष इति । 'विचक्षण इति' । 'अनुदात्तेतश्च हलादे' रिति युच् । 'वधक इति' । अतो लोपस्य स्थानिवत्त्वाद्वृद्ध्यभावः । 'गात्रमिति' । ष्ट्रनि गादेशः । 'अजिरमिति' । अजिरशिशिरेति निपातनमनादृत्योक्तम् ॥

"अजेर्व्यघञपोः" ॥ प्रवयणीयः प्रवायक इत्यादौ गुणवृद्धिविषये ह्रस्वदीर्घयोरविशेषं मन्वानः पृच्छति । 'दीर्घोच्चारणं किमिति' । दीर्घव्याख्यानमित्यर्थः । 'घञपोः प्रतिषेधे क्यप उपसङ्ख्यानमिति' । क्यपि यः प्रतिषेधस्तस्य क्यप्सम्बन्धी भवतीति क्यप इत्युक्तम् । यस्त्वाह क्यपो-

त्येव क्यपि सिद्धः प्रतिषेधः, कथम्, अबिति प्रत्याहारः, अपो ऽकाराद्वा-रभ्य क्यपः पकाराद् इति, तस्य संवीतिरिति क्तिन्यपि प्रतिषेधः प्राप्नोति, तस्मात्संज्ञाग्रहणात्समज्येत्यत्र वीभावाभावः । नह्यादेशेन संज्ञा गम्यते । 'वलादावार्धधातुके वेष्यत इति'। नार्थोऽनयेष्ट्या नापि घञपोः प्रतिषेधेन नापि क्यप उपसङ्ख्यानेन नापि वायौविति सूत्रेण, एतावदस्तु वा लिटि, अजेर्वीत्येव, व्यवस्थितविभाषेयं, तेन घञपोः क्यपि नैव भवति, वलादौ यो च विकल्पः, अन्यत्र नित्यम् ॥

“ण्यक्षत्रियार्षञितो यूनि लुगणिञोः”॥ 'ण्यादयो गोत्रप्रत्यया इति'। 'गोत्राद्यून्यस्त्रियामि'ति गोत्रप्रत्ययान्तादेव यूनि प्रत्ययविधानात् । क्षत्रि-यगोत्रस्य क्षत्रियादभेदोपचारात् क्षत्रियशब्देनाभिधानम् । चवेरपत्यमा-वेम्, 'इतश्चानिञ' इति ढकि प्राप्ते शिवादिपाठादण् । ढगपीष्यते आ-वेयं कृष्णीतवति । तस्मात्कुर्वादिष्वपि पठनीयः । एवं गोत्ररूपाभ्यां क्षत्रि-यार्षाभ्यां प्रत्ययस्योपलक्षणाद् ण्यादयो गोत्रप्रत्यया इत्युक्तम् । 'क्षत्रिया-दिति'। क्षत्रियगोत्रप्रत्ययान्तादित्यर्थः । 'आर्षादिति'। ऋष्यभिधायिनो गोत्रप्रत्ययान्तादित्यर्थः । प्रथमनिर्दिष्टाद् ण्यन्तादणोऽसम्भवाच्चरमनिर्दि-ष्टोऽपीञेव प्रथममुदाहृतः । 'क्षत्रियगोत्रस्य तत्र ग्रहणमिति'। औरसश-ब्देन साहचर्यात्, स हि 'जनपदशब्दात् क्षत्रियादञि'त्यञन्तत्वात्क्ष-त्रियशब्दः । उरसशब्दः सकारोपधो जनपदवाची, तस्माद्यूनि प्राग्दीव्य-तीयाविति । 'फेश्छ चे'ति च अच्छौ तु न भवतः, यमुन्दश्च सुयामा चेति परिगणनात् । 'कण्वादिभ्यो गोत्र इति शैषिकोऽणिति'। वामरथस्य कण्वादिषु स्वरवर्जमिति कुर्वादिषु पाठाविति भावः । 'अब्राह्मणगोत्र-मात्रादिति'। अत्र भाष्ये त्रीणि वाक्यान्युपन्यस्तानि, अणिञोर्लुकि तद्रा-जाद्युवप्रत्ययस्योपसंख्यानमिति प्रथमम् । अस्योदाहरणं बौधिः पिता बौधिः पुत्रः, औदुम्बरिः पिता औदुम्बरिः पुत्रः, बुधोदुम्बराभ्यां साल्वाव-यवलक्षण इञ्, 'यञिञोश्चे'ति फक्, तस्य लुक्, । अनर्थकमेतद्वचनम् । साल्वावयवेत्यत्रौदुम्बरास्तिलखला इत्यादि संभवोदाहरणं न परिगणन-मिति बुधशब्दादपीञ् भवति । क्षत्रियगोत्रमात्राद्युवप्रत्ययस्योपसंख्यान-

मिति द्वितीयम् । मात्रशब्दो व्याप्त्यर्थः, तद्राजादिति नियमो नास्ति । क्षत्रियगोत्रमात्रादिति । तेन जाबालशब्दादत इञोऽतद्राजादपि परस्य फको लुक् भवति, जाबालिः पिता जाबालिः पुत्रः, वृत्तिकारेणोपन्यस्तं तृतीयम् । अत्रापि मात्रशब्दो व्याप्त्यर्थः । क्षत्रियादित्यपि नियमो नास्ति ब्राह्मणगोत्रमात्रादिति । तेन वैश्यगोत्रादपि भवति । भाण्डिजङ्घि[illegible]खरकौ वैश्यौ, ताभ्यामत इञ्, तदन्तात्फको लुक्, व्यापकत्वाच्चैतदुपन्यस्तं वृत्तिकारेण ॥

"पैलादिभ्यश्च" ॥ पीडयतेः पचाद्यचि कपिलादित्वाद्वर्णमात्रस्य लत्वे पीला । 'अन्ये पैलादय इञन्ता इति' । तत्र बाह्वादिषु उदञ्चु इति पठ्यते । उकार उच्चारणार्थः, इञि नोपधत्वं निपात्यते । औदञ्जिः । 'अच' इत्यकारलोपः, 'उद ईदि'तीत्वं च न भवति, [illegible]कारस्य तत्र ग्रहणात् । भूलिङ्गशब्दः शाखावयवः । सात्य[illegible]के चित्पठन्ति । सोऽपि बाह्वादीञन्तः । सत्यकशब्दात्कृष्ण्यन्धकेत्यणा भाव्यं, शेषा अत इञन्ताः । 'शालङ्किरिति' । अस्मादेव निपातना[illegible] शलङ्कादेशश्च । 'तद्राजाच्चाण इति' । तद्राजसंज्ञकादणः परस्य युवप्रत्ययस्य लुग्भवति । व्रुञ्मगधेत्यणन्तादाङ्गशब्दात् 'द्व्यचः' इति [illegible] लुक् । आङ्गः पिता आङ्गः पुत्रः । तदेवं सर्ववाक्यमेतदेकं, पूर्वपक्षि[illegible]चीणीति चत्वारि यथोत्तरमधिकविषयाणि ॥

"इञः प्राचाम्" ॥ प्राचामवृद्धादित्यादौ प्राग्ग्रहणं [illegible], इह तु न तथेत्याह । 'गोत्रविशेषणमिति' । युवप्रत्ययस्य लुग्वि[illegible]क्षिप्तं गोत्रमिति भावः । पन्नं प्राप्तम् अगारं येन स पन्नागारः । मन्दा मन्दीभूता एषणा यस्य स मन्दैषणः ॥

"न तौल्वलिभ्यः" ॥ तुल उपमाने, चौरादिको वलच् । तुल्वलः । धारयतिपारयतिभ्यां नन्द्यादिल्युः । धारणः पारणः । देवा मित्रमस्येति देवमित्रः । देवेभ्यो यज्ञोऽस्य देवयज्ञः । पुष पुष्टौ, [illegible] पुष्यः । विलक्षणो कर्णोऽस्य विकर्णः । करेणुं पालयति [illegible] असु क्षेपणे, कुरच् । असुरः । हृञ् हरणे, अनुपूर्वोऽस्मात् [illegible]

अनुहरत्, पुष्करे सीदतीति पुष्करसत्, बाह्वादी अनुशतिकादी च । परिशिष्टाः पारायणे द्रष्टव्याः ॥

"तद्राजस्य बहुषु तेनैवास्त्रियाम्" ॥ इह बहुष्वित्यनेन जसादिबहुवचनं वा गृह्येत अर्थो वा, आद्ये पक्षेऽयमर्थो भवति जसादिषु बहुवचनेषु परतस्तद्राजस्यास्त्रीलिङ्गस्य लुगिति । द्वितीये बहुष्वर्थेषु वर्तमानस्येति । बहुवचनशब्दे हि जसादिषु विनियुक्ते तदेकदेशेन बहुशब्देनापि जसादि शक्यं लक्षयितुम् । संज्ञानामेकदेशस्यापि प्रयोगदर्शनाद् भीमो भीमसेनः सत्या सत्यभामेति । जसादीनां च बहुत्वाद्बहुष्विति बहुवचनोपपत्तिः । नन्वेवमपि मुख्यत्वादर्थग्रहणमेव युक्तम् । सत्यम् । तेनैव ग्रहणादस्य पक्षस्य सम्भवः । तर्हि प्रियवाङ्गा इत्यादौ बहुवचनं परमिति लुकः प्रसक्तस्य निवृत्तये कृतम् । अर्थग्रहणे चात्र तद्राजस्य बहुत्वे वृत्त्यभावादेव लुकोऽप्रसङ्गः । यद्येवमस्मादेव लिङ्गाद्बहुवचनस्यैव निश्चयादर्थग्रहणस्यासम्भवः । उच्यते । अस्त्रियामिति प्रतिषेधादस्य पक्षस्य सम्भवः । तद्राजाः स्त्रिय इत्यादौ तद्राजस्य बहुषु वर्तमानस्य लुङ् माभूदिति कृतम् । बहुवचनग्रहणे चात्र स्त्रीप्रत्ययेन व्यवधानादेव लुकोऽप्रसङ्गः । न चाम्बष्ठस्यापत्यानि बह्व्यः स्त्रियः 'वृद्धेत्कोसलाजादाञ् ञ्यङ्' 'यङश्चाप्' आम्बष्ठ्या इत्यत्रैकादेशस्यान्तवद्भावादव्यवधानाल्लुक्प्रसङ्गः, एकादेशस्य पूर्वविधौ स्थानिवद्भावादत्रापि चापा व्यवधानात् । तदेवं लिङ्गद्वयदर्शनात्पक्षद्वयसम्भवः । एवमुत्तरेष्वपि योगेषु द्रष्टव्यम् । तत्राद्ये पक्षे ऽतिक्रान्तोऽङ्गानत्यङ्गः, अतिगर्गः, अङ्गेभ्य आगतोऽङ्गरूप्यः, गर्गरूप्य इत्यादौ बहुवचनपरत्वाभावाल्लुङ् न स्यात् । न च वृत्त्यर्थे वाक्ये यज्जसादि बहुवचनं तत्रैव परतस्तस्यामेवावस्थायां लुग्लभ्यते ऽन्तरङ्गत्वादिति वाच्यम्, अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इति वचनात् । न च लुप्तेपि तस्मिन्प्रत्ययलक्षणेन लुग्लभ्यः, 'न लुमताङ्गस्ये'ति निषेधात् । ननु च न लुगङ्गस्य कार्यं किं तर्हि तदेकदेशस्य प्रत्ययमात्रस्य, गार्गरूप्य इत्यादौ च समर्थात्तद्धितोत्पत्तेः वृत्त्यर्थे वाक्ये यद्बहुवचनमङ्गेभ्य इत्यादि तत्रैव लुक् भविष्यति । एवं तर्हि अत्रेरपत्यानि बहूनि 'इतश्चा-

Digitized by Google

निञ' इति ठक्, तस्य 'कित' इत्यन्तोदात्तत्वं, तस्य जसि परतो ऽस्मि-
न्निति लुकि कृते उदात्तनिवृत्तिस्वरः प्राप्नोति, तस्माद् द्वितीयं पक्षमाश्रि-
त्याह । 'बहुषु वर्तमानस्येति'। नन्वत्रापि पक्षे आङ्गश्च वाङ्गश्च सौह्मश्च
अङ्गवङ्गसुह्माः, गार्ग्यश्च वात्स्यश्च वाज्यश्च गर्गवत्सवाजा इत्यादौ द्वन्द्वे
लुङ् न स्यात्, अत्र ह्येकैकस्मिन्नेवार्थे प्रत्यय उत्पन्नः, पूर्वेण तु पक्षेऽन्ति-
मस्यापि तावत्सिद्ध्यति बहुवचनपरत्वात् । नैष दोषः । युगपदधिकरण-
तायां द्वन्द्वः, तत्रैकैकस्य वर्त्तिपदस्य बह्वर्थकत्वाल्लुग्भविष्यति । नन्वेवमपि
तद्धित उत्पत्तिदशायामेकैकस्मिन्नेवार्थे उत्पन्न इति तद्राजो यो बहुषु यञ्
यो बहुषु अञ् यो बहुष्वित्युच्यमानो लुङ् न स्यादेव । नन्वत्र बहुष्वित्य-
नेन न प्रत्ययमात्रं विशेष्यते किं तर्हि प्रत्ययग्रहणपरिभाषया तदन्त-
ग्रहणे सति तदन्तं विशेष्यते तद्राजान्तं यद्बहुषु यञन्तं यद्बहुषु अञन्तं
यद्बहुष्विति, यद्येवं कश्यपस्यापत्यं काश्यपः बिदाद्यञ्, तस्य प्रतिकृतय
इति 'इवे प्रतिकृतावि'ति कन्, तस्य 'जीविकार्थे चापण्ये' इति देवपथा-
दिषु अर्चासु पूजनार्थास्विति पाठाद्वा लुपि कृते काश्यपा इत्यत्रान्तस्य
प्रतिकृतिबहुत्वे लुक् प्राप्नोति । नैष दोषः । 'यञञोश्च' इत्यत्र 'यस्कादिभ्यो
गोत्रे' इत्यतो गोत्र इत्यनुवर्तते, तेन गोत्रबहुत्वे लुक् प्रतिकृतिबहुत्वे न भवि-
ष्यति । नन्वेवमप्याङ्गस्यैकस्य प्रतिकृतयो बह्व्य इति तद्राजान्तस्य बहु-
वृत्तेर्लुक् प्रसङ्गः । न ह्यत्रेदमस्ति तद्राजान्तं यदपत्यं बहुत्वे वर्तत इति । यत्तु
तर्हि तेनैव ग्रहणमस्मिन्पक्षे न कर्तव्यमित्युक्तं तदत्रोपयोक्ष्यामहे, यस्मि-
न्नर्थे लुगभावी प्रत्यय उत्पन्नस्तेनैव चेत्कृतं बहुत्वमिति । इह त्वापत्ये
प्रत्यय उत्पन्नः प्रतिकृतिकृतं च बहुत्वम्, यद्येवम् आङ्गस्यापत्यानि
'अणो द्व्यचः' इति फिञ्, तस्याब्राह्मणगोत्रमात्रादिति वा 'तद्राजाच्चाणः'
इति वा लुक्, आङ्गाः । बैदस्यापत्यानि 'अत इञ्,' यञिञोश्चेति लुक्,
बिदाः । अत्र गोत्रे प्रत्यय उत्पन्नो युवकृतं चात्र बहुत्वमिति लुङ् न स्यात् ।
नैष दोषः, तेनैवेत्यस्य तज्जातीयेनैवेत्यर्थः, युवा चापत्यतया तज्जातीयो
न प्रतिकृतिः । एवं च कृत्वा द्वन्द्वो यदा लोपिनामलोपिनां च भवति
तदा न भवति आङ्गदेवदत्तयज्ञदत्ताः गार्ग्यदेवदत्तयज्ञदत्ताः । इह तु

Digitized by Google

र्भार्गवस्य वात्स्यस्याग्रायणस्य भृगुवत्साग्रायणा इति, यद्यपि नलोपिभिरेव कृतं बहुत्वम् । आग्रायणो नडादिफको लुगभावात्तथाप्यपत्यतया तज्जातीयत्वमस्तीति लुग्भवत्येव । यद्येवं गार्ग्यस्य काश्यपस्य गालवस्य च गार्ग्यकाश्यपगालवानामित्यत्र गालवे चाण्यणो लुगभावेप्यपत्यतया तज्जातीयत्वाद्यञञोर्लुक्प्रसङ्गः । एवं तर्हि भृगुवत्साग्रायणेष्वगार्ग्यकाश्यपगालवानामिति निर्देशद्वयाल्लोप्यलोपिभिरपत्यप्रत्ययैः कृते बहुत्वे विकल्पः । तदेवं तद्राजान्तस्य बहुत्वे वर्तमानस्येति स्थितम् । वृत्तौ तु तद्राजसञ्ज्ञकस्य प्रत्ययस्य बहुषु वर्तमानस्येति व्यधिकरणे षष्ठ्यौ, बहुषु वर्तमानस्यास्त्रीलिङ्गस्य तद्राजान्तस्य यो ऽवयवः प्रत्ययस्तस्येत्यर्थः । 'तेनैव चेत्तद्राजेनेति' । अत्रापि तद्राजान्तेनेत्यर्थः । तद्राजेत्यपि लोपिप्रत्ययोपलक्षणम् । बहुगर्गलोहध्वजा इत्यादावपि भवतीत्याहुः । इहाङ्गस्यापत्यानि बहून्यङ्गास्तेषामपत्यं युवा युवानो वा आङ्गः आङ्गाविति युवसङ्क्रान्तेः प्राग्गोत्रे ऽलुक्यचीति प्रतिषेधाल्लुगभावः, पश्चात्तु बहुत्वाभावात् । अचीति च विषयसप्तमी तेन युवप्रत्यये पश्चाल्लुमता लुप्तेपि विषयभूतएव तस्मिन्नागमकेव लुकः प्रतिषेधः, लुप्तेपि वा प्रत्ययलक्षणेन । नन्वचीति वचनाद्बुद्ध्याश्रयोयं, नेत्याह, अचीति प्राग्दीव्यतीयस्य प्रत्ययस्य विशेषणं प्रत्यय एव लुकि निमित्तम् । 'आङ्गः स्त्रिय इति' । इह च आङ्गी च वाङ्गस्य सौहास्येति द्वन्द्वे आङ्गीतिशब्देन स्त्रीत्वयुक्तानामभिधानात्तद्गणो लुङ्ग भवति आङ्गीवङ्गसुह्मा इति भवतीत्याहुः ॥

"यस्कादिभ्योगोत्रे" ॥ 'प्रत्ययविधेश्चान्यत्रेति' । गोत्रे यत्र प्रत्ययो विधीयते 'गोत्रे कुञ्जादिभ्यश्च्फञ्' इत्यतोन्यत्रेत्यर्थः, तत्र तावदपत्याधिकारे गोत्रग्रहणादेव पारिभाषिकस्य ग्रहणम्, अन्यत्र लौकिकस्येत्यत्र ज्ञापकं वक्ष्यामः । 'पुष्करसच्छब्दस्येति' । किमर्थं पुनरयमत्र पठ्यते यावता 'बह्वच इञः प्राच्यभरतेष्वि' त्येव सिद्धं पुष्करसदः प्राच्यत्वात् । तथा चेञः प्राचामिति प्राप्तस्य लुकः प्रतिषेधाय तौल्वल्यादिषु पठितः । एवं तर्हि गोपवनादिषु केचित्तौल्वल्यादयश्चेति पठन्ति । तौल्वल्यादिषु प्रकृतिभागा अपि गोपवनादिषु द्रष्टव्या इत्यर्थः । तेन 'न गोपवनादिभ्य'

इति निषेधे प्राप्ते ऽत्रास्य पाठः । अयमेव च पाठो ज्ञापयति गोपवनादिषु बिदादयो ऽपि पठिता इति ॥

"यञञोश्च" ॥ 'गोत्रप्रत्ययस्य बहुषु वर्तमानस्येति' । अत्रापि अधिकरणे षष्ठी । बहुषु वर्तमानस्य समुदायस्य सम्बन्धी यो गोत्रप्रत्ययो यञ् अञ् च तस्येत्यर्थः । तेन द्वन्द्वेऽपि भवति गर्गवत्सवाजा बिदौर्वभरद्वाजा इति । 'गार्ग्यं स्त्रिय इति' । 'यञश्चे'ति ङीप् 'हलस्तद्धितस्य' । 'वैद इति' । 'शार्ङ्गरवाद्यञो ङीन्' । 'एकद्वयोरिति' । एकत्वद्वित्वयोरित्यर्थः । 'संख्याया अल्पीयस्या' इत्येकशब्दस्य पूर्वनिपातः । द्व्येकयोरिति निर्देशाद् द्विशब्दस्यापि भवति । 'गार्ग्ययोः कुलं गार्ग्यकुलमिति' । प्रकरणादिवशाद् द्वित्वावगतौ द्विवचनान्तस्यापि विग्रहः समासः ॥

"बह्वच इञः प्राच्यभरतेषु" ॥ भरतापत्येषु भरतशब्दोऽभेदोपचाराद्वर्तते, यथा रघूणामन्वयं वक्ष्य इति । युधिष्ठिरार्जुनशब्दाभ्यां कुर्वादावपाठाद् बाह्वादिलक्षण इञ् । बलाकाशब्दोऽपि बाह्वादिः । 'भरताः प्राच्या एवेति' । प्राच्यभरतेष्विति द्वन्द्वस्तु सामान्यविशेषवाचिनोर्गोबलीवर्दन्यायेनेति भावः ॥

"न गोपवनादिभ्यः" ॥ 'परिशिष्टानां हरितादीनां प्रमादपाठ इति' । ननु चेह स्थाने न गोपवनादयः पठ्यन्ते किं तर्हि चतुर्थ एव बिदादिषु तदुपजीवमेवैतत्प्रवर्तते । अत्र चतुर्थे पाठः प्रमाद इत्युच्यते बिदाद्यञपि तर्हि न प्राप्नोति । अथ गोपवनादिभ्यः परः पाठः प्रमादजः पूर्वश्च पाठ्य इत्युच्येत, एवमपि हरितादिभ्योऽञ् इत्येष विधिर्गोपवनादीनामपि प्राप्नोति । तस्मादन्यथा व्यवस्थित एव पाठे गणे सूत्रकरणं कर्तव्यमिह वा प्राक् हरितादिभ्य इति वक्तव्यं, यथोक्तं गोपवनादिभ्यः प्रतिषेधः प्राग्घरितादिभ्य इति । वृत्तिकारस्तु चतुर्थेऽत्र च पृथक् पाठं मन्यते ॥

"तिककितवादिभ्यो द्वन्द्वे" ॥ द्वन्द्वरूपाण्येव गणे पठ्यन्ते । तिकादीनि पूर्वपदानि कितवादीन्युत्तरपदानि तत्र तिकादिभ्यो द्वन्द्व इत्युच्यमाने पूर्वपदेष्वेव लुगाशङ्क्येत उत्तरपदेष्वपि यथा स्यादिति तिककितवादिभ्य इत्युक्तम् । आदिशब्दः प्रत्येकमभिसम्बध्यते तदाह । 'तिकादिभ्यः कितवादिभ्यश्चेति' ॥

अयं परिष्वञ्जक: परमात्मोत्तरत्र पत्यादिशब्दैर्व्यपदिश्यते "सर्वस्याधिपति: सर्वस्य वशी सर्वस्येशानस्स न साधुना कर्म्मणा भूयान्नो एवासाधुकर्म्मणा कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाय

टी० "अर्थान्तरभूत" इति, अवान्तरार्थप्रतिज्ञात्वात्सूत्रे कण्ठोक्त्यभाव:, प्रधानार्थप्रतिज्ञानस्य हि प्रायेण कण्ठोक्तिरुपलभ्यते देहस्य प्राज्ञपरिष्वक्तत्वशङ्काव्यावृत्त्यर्थं विज्ञानमय: प्राणेष्विति प्रकृतस्येत्युक्तम्, उत्सर्जन् शरीरमिति शेष:, देहज्ञानान्तरेण परिष्वङ्गान्वारोहो चाशङ्क्याह "नवे"ति, मुक्तावस्थेनात्मनाऽन्वारोह इत्यत्राह "इतश्चे"ति, सू० पत्यादिशब्देभ्य:, सूत्रे पत्यादिशब्देभ्य इति निर्दिष्टत्वात्तदनुरोधाय श्रौतपाठक्रमानादरेण "सर्वस्याधिपतिरि"ति, वाक्यं प्रथममुदाहृतं, सूत्रे च तथा निर्देश: किमर्थं इति चेत्? उच्यते कर्मसंबन्धप्रतिषेधमुखेन सर्वेश्वरत्वादिगुणानां निरुपाधिकत्वज्ञापकस्य "स न साधुना कर्मणा भूयानि"त्यादिवाक्यस्य पूर्वं सर्वस्याधिपतिरिति वाक्यं "पश्चादेष भूताधिपतिरि"ति वाक्यं हेयसम्बन्धराहित्यपरवाक्यस्य तत्पूर्वापरवाक्यानां च तन्त्रेण क्रोडीकरणार्थमभ्यासरूपतात्पर्यलिङ्गज्ञापनार्थं च पत्यादिशब्देभ्य इति निर्देश:, अधिपत्यादिशब्देभ्य इत्यनुक्ति:, पतिं विश्वस्यात्मेश्वरमित्यादिभिरस्य प्रकरणस्य ऐकार्थ्येन विशेष्यस्य परमात्मनो नारायणत्वद्योतनार्था, अत एव अयं परिष्वञ्जक: परमात्मेति भाष्ये निर्देश:, स खलु पतिं विश्वस्येति प्रकरणस्थं "तस्या: शिखाया मध्ये परमात्मा व्यवस्थित" इति परमात्म-शब्दं स्मारयति मुमुक्षूपास्यत्वरूपमहागुणवाचिशब्दत्वात् पत्यादिशब्दैस्सह

भा० "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति एतमेव विदित्वा मुनिर्भवति एतमेव प्रव्राजिनो लोकमिच्छन्त: प्रव्र-

Digitized by Google

जन्ति स वा एष महानज आत्माऽन्नादो वसुदानोऽजरोऽमृतोऽभय आनन्दो ब्रह्म"ति एते च पतित्वजगद्विधरणत्वसर्वेश्वरत्वादयः प्रत्यगात्मनि मुक्तावस्थेऽपि न कथञ्चित्सम्भवन्ति, अतो मुक्तात्मनोऽर्थान्तरभूतो नामरूपयोर्निर्वहिताऽऽकाशः,

टी० तमेतमित्यादिवाक्यमुपात्तम् अत्रस्थः शब्दः, आधिपत्यादिशब्दोक्तानां धर्माणां मुक्तव्यावर्तकत्वं दर्शयति "एते चे"ति, मुक्तस्य जगद्व्यापाररहितत्वान्न सम्भवन्तीत्यर्थः । किं जीवमात्रादर्थान्तरत्वे विप्रतिपत्तिः? उत मुक्तादर्थान्तरत्वे? इति विकल्पे प्रथमशिरः पूर्वसूत्रेण प्रत्युक्तम्, अनेन तु द्वितीयं शिर इति विभागः । यद्वा सूत्रद्वयोक्तधर्मैर्मुक्तव्यावृत्तिसिद्धिः कथ?-मित्यत्राह "एते चे"ति, एतच्छब्दः सूत्रद्वयोदाहृतगुणपरः, अतः आदिशब्दे परिष्वाङ्गान्वारोहावन्तर्भूतौ सुषुप्त्युत्क्रमणयोः परिष्वङ्गस्यान्वारोहणस्य च जगद्व्यापारान्तर्भूतत्वान्मुक्तस्य तद्रहितत्वाच्च तौ च तस्मिन्न सम्भवतः, एते अकर्मसम्पाद्या इति चाभिप्रायः, "स न साधुना कर्मणा भूयान्"ति श्रुतत्वात्, तेन बद्धात्मन्यसम्भवः मुक्तैश्वर्यस्य जगद्व्यापारवर्जत्वान्मुक्तात्मन्यऽसम्भव इत्यर्थः । एवमनेन सूत्रद्वयेन परमात्मनश्चिदचिद्विलक्षणत्वे प्रमाणदार्ढ्यस्योपपादितत्वादैक्योपदेशभेदनिषेधौ तदनुरोधेन वर्णनीयाविति शङ्काबीजं परिहृतम्भवति, एतावदेवैतदधिकरणकृत्यम्, एवं प्रबलतमभेदश्रुत्यनुरोधेन निर्वाहे कर्तव्ये सति ऐक्योपदेशभेदनिषेधयोरमुख्यतयाऽपि निर्वाहे प्राप्ते सूत्रकारैरेव श्रुतितोऽर्थतश्च वक्ष्यमाणं श्रुतिसिद्धं मुख्यं निर्वाहन्तत्र तत्र प्रसङ्गे पूर्वमपि स्वेनोक्तमिह स्मारयति "ऐक्योपदेशस्त्वि"ति, कार्यकारणैक्यनिबन्धनः, न तु जीवेश्वरैक्यनिबन्धन इत्यर्थः तत एव-कार्यकारणैक्यादेव ऐक्योपदेशशेषत्वात्, भेदनिषेधश्रुतिश्च कुतर्कसिद्धकार्यकारणभेदप्रतिषेधपरेत्यर्थः, अत्र भेदनिषेधस्य प्रकार्यैक्यनिबन्धनत्वमप्यर्थसिद्धं प्रकारप्रकारिभावस्य जगत्कारणत्वनिर्वाहकत्वात्, तत्रारम्भणाधिकरणे कार्यकारणैकत्वसमर्थनं श्रौतं तेनैक्योपदेशस्य मुख्यत्व-

माये सामानाधिकरण्यस्य शरीरशरीरिभावनिबन्धनत्वम् "अवस्थितेरिति काशकृत्स्न" इत्यत्र वक्ष्यते, तत्राकृतिनयगोचरतया मुख्यत्वसमर्थनञ्चिद्विषयमचिद्विषयञ्च "अंशो नानाव्यपदेशात्" "उभयव्यपदेशादि"त्यधिकरणद्वयेन कृतम्, एवं वक्ष्यमाणो मुख्यनिर्वाह इह स्मारितः । पादद्वयोक्तमर्थमभिप्रेत्याह "इत्यनवद्यमि"ति, परैस्तु सुषुप्त्युत्क्रान्त्योरित्यादि सूत्रद्वयं बृहदारण्यके "कतम आत्मा योऽयं विज्ञानमय" इत्यादिप्रकरणविषयमधिकरणान्तरं व्याख्यातं, तत्र चोपक्रमे योऽयं विज्ञानमयः प्राणेष्विति शारीरलिङ्गदर्शनादुपसंहारे च स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेष्विति शारीरापरित्यागान्मध्ये च सुषुप्त्यादिसांसारिकतत्तदवस्थाप्रतिपादनादत्र संसारिस्वरूपं प्रतिपाद्यमिति पूर्वपक्षं कृत्वा सुषुप्त्युत्क्रान्त्योः प्राज्ञाद्भेदव्यपदेशेन पत्यादिशब्देभ्यश्चाऽसंसारिस्वरूपस्य प्रतिपाद्यत्वमिति सिद्धान्त उक्तः । उपक्रमादिषु शारीरलिङ्गकथनमनुवादरूपं तस्य परेण ब्रह्मणैक्योपदेशार्थं कृतं "योऽयं विज्ञानमयः" "स वा एष महानज आत्मे"ति परमेश्वरेणैकत्वमुपदिश्यते अत ऊर्ध्वं विमोक्षायैव ब्रूहीति पदे पदे प्रश्नादनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इति पदे पदे पुण्येनानन्वागतत्वादिकथनरूपप्रतिवचनाच्चासंसारिस्वरूपप्रतिपादनपरत्वसिद्धिरिति शारीरलिङ्गदर्शनपरिहारश्चोक्तः, एवमधिकरणभेदवर्णनमयुक्तं द्वितीयतृतीयपादान्तर्गताधिकरणान्तरसूत्रवैरूप्यात् निरूपणीयाभावाच्च, न ह्यत्र सूत्रद्वये प्रतिज्ञावाक्यं श्रूयते विवक्षिततत्प्रकरणस्य धर्मवाचकशब्दाभावात् प्रतिषेध्यव्युदासकशब्दाभावाच्च, "ईक्षतेर्नाशब्दम्" "आनन्दमयोऽभ्यासात्" "अन्तस्तद्धर्मोपदेशा"दिति हि सूत्रशैली वर्ततेऽत्र तथाभावाभावादध्याहारः स्यात्, स चानध्याहारेण निर्वाहे सत्य-

मू॰ ऐक्योपदेशस्तु सर्वस्य चिदचिदात्मकस्य ब्रह्मकार्यत्वेन तदात्मकत्वायत्त इति "सर्वं खल्विदं ब्रह्म तज्जलानि-त्यादिभिर्वाक्यैः प्रतिपाद्यत इति पूर्वमेवोक्तं, द्वैतप्रतिषेधश्च तत एवेत्यनवद्यम् ॥

अर्थान्तरत्वादिव्यपदेशाधिकरणं समाप्तम् ।

Digitized by Google

इति श्रीमद्भगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य तृतीयः पादः ॥ ३ ॥

नुपपद्यः, इह च पूर्वप्रकृतसाध्यहेतुसमर्थकत्वेऽध्याहारोऽनपेक्षितः, चतुर्थेऽपि पादेऽधिकरणान्तरारम्भेषु धर्मिवाचिपदाश्रवणं न दोषः तस्य प्रधानादेः प्रतिपाद्यत्वव्युदसनपरत्वाद्धर्मिवाचिपदेन नैरपेक्ष्यात्, सू० आनुमानिकमप्येकेषामिति चेन्नेति, तस्य न संख्योपसंग्रहादपि इति च व्युदसनप्रतिज्ञा श्रूयते नेति पदस्योत्तरत्रानुषङ्गेऽपि न दोषः प्रधानादिपरत्वव्युदासस्य परमात्मपरत्वोपपादनशेषत्वात् परमात्मपरत्वस्य प्राधान्येन प्रतिपिपादयिषिततया सर्वत्र तद्विवक्षायां प्रतिज्ञावाक्यश्रवणात् क्वचिदध्याहारदर्शनेऽपि मत्यन्तरे सम्भवे सति गत्यभाव एव निर्वाहोऽनुपपन्नः, अतः परमात्मपरत्वसमर्थनपराधिकरणवैरूप्यादयुक्तं निरूपणीयाभावाच्चाधिकरणान्तरत्वमयुक्तं, सन्दिग्धे हि न्यायप्रवृत्तिः, यत्रैकस्मिन्वाक्ये प्रकरणे वा परस्परविरुद्धार्थद्वयं प्रधानप्रतिपाद्यतया प्रतीयते तत्र सन्देहे सति न्यायावतारः, इह च तादृशस्संशयविषयो न विद्यते, तथा हि जाग्रत्स्वप्नाद्यवस्थाप्रतिपादकवाक्यानां जीवविषयत्वं न संशयपदं, न च तदपाकर्तुं शक्यम्, अतस्तन्निरूपणपरत्वमधिकरणस्यायुक्तम्, असङ्गो ह्ययमित्यादिवाक्यानां शुद्धस्वरूपपरत्वमपि न सन्देहपदं निरवधिकानन्दनिरङ्कुशैश्वर्यप्रतिपादकानां "स एको ब्रह्मण[1] आनन्दः सर्वस्य वशी सर्वस्येशान" इत्यादिवाक्यानां परमात्मपरत्वेऽपि न संदेहः, अतस्तत्समर्थनमनपेक्षितं समानाधिकरणवाक्यानां ब्रह्मात्मकत्वोपदेशपरत्वेऽपि न संशय इति न तत्समर्थनार्थमधिकरणारम्भो युक्तः, जीवस्वरूपकथनं ब्रह्मात्मकत्वविधानायानुवाद इत्ययमर्थो निरूपणीय इति चेत् न प्राप्तार्थानां वाक्यानामनुवादकत्वस्याप्राप्तार्थानां वाक्यानां विधायकत्वस्य च स्वत एव स्पष्टत्वात्, न खल्वग्निर्हिमस्य भेषजमिति वाक्यस्य अनुवादकत्वं स्वर्गकामो यजेतेति वाक्यस्य विधित्वं चात्र निरूपणीयम्, अतो जीवस्वरूपकथने प्राप्तविशेषणोक्तेरनुवादत्वं न समर्थनीयम्, अप्राप्त-

१ ब्रह्मलोक आनन्द इति पा० ।

Digitized by Google

धर्मप्रतिपादनस्य विधित्वं च न साध्यं विहितधर्मप्रतिषेधेन स्वरूपैक्यप्रतिपादनं चानुपपन्नं सूत्राक्षरप्रातिकूल्याच्च नेदं सूत्रद्वयं ब्रह्मात्मकत्वोपदेशसमर्थनपरं, भेदसमर्थनपरत्वं ह्यक्षरस्वारस्यादवगम्यते, न च मृषावाद्यभिमतं ब्रह्मात्मकत्वमस्मिन्प्रकरणे दृश्यते "स वा एष महानज आत्मा योऽयं विज्ञानमयः" "स एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिरितीश्वरतादात्म्यप्रतिपादनपरत्वावगमात्, तन्मतेऽधिष्ठान[1]याथात्म्यं ह्युपदेश्यं, न हीश्वरोऽशेषजगदध्याधिष्ठानमीश्वरस्याऽपि सन्मात्रवस्तुनि कल्पितत्वात्, न हि रज्जुकल्पितसर्पः तत्कल्पितभूदलानामम्बुधाराधिष्ठानम् । किञ्च ईश्वराध्यस्तजीवदर्शनं नेश्वरकर्तृकमीश्वरस्य सर्वज्ञतया स्वारोपिताकारविषयभ्रमानुपपत्तेः, न चान्यकर्तृकम् अधिष्ठानभूतेश्वरस्य संसार्यगोचरत्वात्त ह्यधिष्ठानानवभासेऽध्यस्तप्रतीतिरुपपद्यते घटस्सन् पटस्सन्निति सन्मात्रमेवाधिष्ठानतयाऽनुवृत्तमवभासत इति च तदीयप्रक्रिया । न त्वीश्वरोऽधिष्ठानतया प्रतीयत इत्यतस्सर्पभूदलनयोरन्योन्यतादात्म्योपदेशवज्जीवेश्वरतादात्म्योपदेशोऽनुपपन्नः, ईश्वरधर्माश्चाविवक्षिता इति चेत् पदनां लक्षणा । किञ्चाप्राप्तानां धर्माणामनूदितत्वासम्भवाद्विहितस्य निषेधायोगादेव "सर्वेश्वर एष भूताधिपतिः एष भूतपाल" इति तात्पर्यलिङ्गदर्शनाच्च तेषां धर्माणामविवक्षितत्वं दुर्वचं सिद्धान्त्यभिमततादात्म्यं तदुपासनञ्चोत्तरत्र निरूपयिष्यते, अतः सूत्राक्षरप्रातिकूल्यात्संशयविषयाभावात् स्वाभिमतार्थे शरीरस्यानुपपन्नत्वात्प्रामाणिकतादात्म्यनिरूपणस्यान्यत्र क्रियमाणत्वाच्चाकाश–शब्दनिर्दिष्टस्य परमात्मत्वोपपादकं सूत्रद्वयमिति सिद्धम् । यादवप्रकाशपक्षेऽपि निरूपणीयाभावादनारम्भणीयत्वदोषः स्थितः पूर्वपक्षसिद्धान्तवर्णनप्रकारश्चानुपपन्नः परिष्वङ्गान्वारोहाभ्यां प्राज्ञस्यात्मनश्शारीराद्भेदः स्थित इति विषयशोधकमाद्यं सूत्रं व्याख्याय स प्राज्ञः किं भोक्ता विद्याकर्मातिशयलब्धैश्वर्यो जीवः? उत परः? इति विषये भोक्तुर्विज्ञानमयस्य प्रकरणस्थतया वशित्वेशानत्वादीनां विद्याकर्मलब्धतया जीवत्वमुक्त्वा पत्यादिशब्दानां शाखान्तरे

१ अधिष्ठानतादात्म्यमिति तु युक्तं पाठान्तरम् ।

Digitized by Google

परमात्मविषयत्वदर्शनादन्यत्र सुषुप्तौ परमात्मनि सम्पत्तिश्रवणाच्च परमात्मत्वं साधितं, तत्र तावदाद्यसूत्रव्याख्यानमयुक्तं विषयबोधकत्वमात्रे सूत्रवैयर्थ्यात् पूर्वपक्षपरत्वे शाब्दस्य हेतोर्विरुद्धत्वात् भोक्तुः प्रकृततया कर्माधीनैश्वर्यत्वस्य पूर्वपक्षहेतोरशाब्दत्वाच्च तच्छङ्काव्युदसनासमर्थभेदानुभाषणे प्रयोजनाभावात् सूत्रवैयर्थ्यम् । किञ्च शारीराद्भेदकौ परिष्वङ्गान्वारोहौ प्राज्ञकर्तृकौ श्रूयेते, प्राज्ञत्वं च स्वाभाविकम्पतित्वादयश्च स्वाभाविका एवात्र प्रतिपाद्यन्ते उपाध्यनुक्तेः, तथैव "स न साधुना कर्मणा भूयान्"इत्युपाधिनिषेधाच्च, अतस्तदनादृत्य पत्यादिशब्दानां शास्त्रान्तरप्रसिद्ध्या परमात्मसाधकत्वोक्तिरचतुरा । सद्विद्यासंवादस्तु यद्यपि प्राज्ञस्य जगत्कारणत्वावगमकः तथाऽपि कारणस्य चिदचिद्विलक्षणत्वे तु संवादनिरपेक्षहेतुः प्राज्ञत्वं निरुपाधिकैश्वर्येश्वरत्वञ्च यद्यकर्महेतुकं निरङ्कुशैश्वर्यमपि श्रुत्यन्तरसंवादसापेक्षन्तर्हि श्रुत्यन्तरेषु कथमाश्वासः तत्राऽपि संवादान्तरापेक्षायामनवस्था स्यात् एतच्छ्रुत्यपेक्षायामन्योन्याश्रयः स्यात्, अतोऽधिकरणान्तरत्वकल्पनं तन्निर्वहणं चाऽनुपपन्नम् अतस्सूत्रत्रयम् एकाधिकरणम् ॥ अर्थान्तरत्वादिव्यपदेशाधिकरणं समाप्तम् ॥

इति श्रीहरितकुलतिलकवाग्विजयसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीमद्वरदाचार्यपादसेवासमधिगतभगवद्रामानुजविरचितशारीरकमीमांसाभाष्यहृदयेन श्रीसुदर्शनसूरिणा विलिखितायां श्रुतप्रकाशिकायां प्रथमस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

परगुरवे श्रीमते रामानुजाय नमः ।

अथ श्रीभाष्ये

प्रथमाऽध्याये चतुर्थः पाद आरभ्यते ।

आनुमानिकाधिकरणम् ।

सू० आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥

सू० आनुमानिकमप्येकेषामिति चेन्न, शरीररूपकविन्यस्तगृहीतेर्दर्शयति च, प्रथमपादः चिदचिद्विलक्षणकारणत्वायोगव्यवच्छेदपरः, अन्ययोगव्यवच्छेदपराणां त्रिपाद्यामस्पष्टस्पष्टजीवादि¹प्रतिपादकवाक्यविषयौ द्वितीयतृतीयौ, स्पष्टतरजीवादिप्रतिपादकवाक्यविषयश्चतुर्थ इति पादसङ्गतिर्द्वितीयपादारम्भे कथिता, सूत्रकारैस्तु अन्ययोगव्यवच्छेदस्य त्रिपादीकृत्यत्वाच्चतुर्थपादारम्भे कण्ठोक्तम् आनुमानिकमप्येकेषामिति ह्युक्तम्, अतो भाष्यकारश्चतुर्थपादारम्भे त्रिपाद्यर्थस्फुटीकरणमुखेन सङ्गतिं विवक्षन् प्रथमपादार्थानुभाषणपूर्वकं द्वितीयतृतीययोरप्यर्थं वृत्तं दर्शयति—

भा० उक्तं परमपुरुषार्थलक्षणमोक्षसाधनतया जिज्ञास्यं जगज्जन्मादिकारणं ब्रह्म अचिद्वस्तुनः प्रधानाच्चेतनाच्च बद्धमुक्तोभयावस्थाद्विलक्षणं निरस्तसमस्तहेयगन्धं सर्वज्ञं सर्वशक्ति सत्यसङ्कल्पं समस्तकल्याणगुणात्मकं सर्वान्तरात्मभूतं निरङ्कुशैश्वर्यमिति, इदानीं कापिलतन्त्रसिद्धाब्रह्मात्मकप्रधानपुरुषादिप्रतिपादनमुखेन प्रधानकारणत्वप्रतिपादनच्छायानुसारीण्यपि कानिचिद्वाक्यानि कासुचिच्छाखासु सन्तीत्याशङ्क्य ब्रह्मैककारणत्वस्थेम्ने तन्निराक्रियते

¹ जीवादिलिङ्गकवाक्यविषयाविति पा० ।

टी० "उक्तमि"ति, प्रधानादेरित्यादि-शब्देन प्राणाकाशादिग्रहणं विलक्षणमित्यन्तेन प्रथमपादार्थ उक्तः, वैलक्षण्यस्योभयलिङ्गतयेति दर्शयन् द्वितीयतृतीययोरर्थं दर्शयति निरस्तेत्यादिपदैः, समस्त-शब्देन चिद्गतमचिद्गतं च हेयं विवक्षितं, गन्ध-शब्देन मुक्तव्यावृत्तिः, समस्तकल्याणगुणात्मकमिति पदं धर्मिस्वरूपपरं सर्वज्ञमित्यादिपदैर्द्वितीयपादार्थः सूचितः "यस्सर्वज्ञः आप्तकामः सत्यसङ्कल्प" इत्यादिवाक्यजातं हि तद्विषयः, अन्तर्यामिवैश्वानरद्युभ्वाद्यधिकरणसिद्धमर्थमाह"सर्वान्तरात्मभूतमि"ति "एष सर्वभूतान्तरात्मे"ति, सुबालोपनिषदन्तर्यामिविषयतया अप्यमाणत्वात् "पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मे"ति, मुण्डकोपनिषद्वाक्यस्य सपक्षत्वेनोपन्यासात् तत्समर्थनाच्च निरङ्कुशैश्वर्यमिति तृतीयपादार्थसूचनम् "एतस्य वा अक्षरस्य प्रशासने गार्गि" "ईशानो भूतभव्यस्य सर्वस्य वशी सर्वस्येशान" इत्यादिवाक्यजातं हि तद्विषयः। वर्तिष्यमाणमाह "इदानीमि"ति, प्रधानकारणत्वप्रतिपादनच्छायानुसारीणीति, न केवलं लिङ्गप्रतिपादकानि किन्तु लिङ्गिनामेव, प्रधानादीनां जगत्कारणत्वप्रतिपादनशङ्कास्पदानीति, अतो जीवादिविषयतायाः स्पष्टतरत्वमिति भावः। प्रधानपुरुषादिप्रतिपादनमुखेन प्रधानकारणत्वप्रतिपादनच्छायानुसारीणीति प्रधानपुरुषादिस्वरूपप्रतिपादनप्रकारस्तन्त्रार्थप्रत्यभिज्ञापकः, तेन प्रधानकारणत्वप्रतिपादनं फलितमित्यर्थः। अस्मिन्नेककारणत्वस्थैर्ये इत्यत्र एक-शब्देन त्रिपाद्या अन्ययोगव्यवच्छेदपरत्वं सूचितं, स्थैर्य इत्यनेन चतुर्थपादार्थः सूचितः पूर्वपादत्रयप्रतिपन्नस्यान्ययोगव्यवच्छेदस्य स्थैर्यमस्मिन् पादे प्रधानादिकारणत्वप्रतिपादनव्युदसने हि कृते भवति, अत्रानन्तरपूर्वाधिकरणे मुक्तादपि वैलक्षण्यमुक्तं तदयुक्तं प्रत्यगात्मनः परस्य निषेधादिति शङ्काऽवान्तरसङ्गतिरिति चार्थसिद्धं बद्धमुक्तोभयावस्थाद्विलक्षणमिति ह्युक्तं विषयमाह-

भा० काठकेऽधीयते "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किञ्चित्सा काष्ठा

सा परा गतिरि"ति, तत्र सन्देहः किं कापिलतन्त्रसिद्ध-मब्रह्मात्मकं प्रधानमिहाव्यक्त-शब्देनोच्यते? उत ने? ति किं युक्तं प्रधानमिति, कुतः "महतः परमव्यक्तमव्यक्ता-त्पुरुषः परः" इति तन्त्रसिद्धतत्त्वप्रक्रियाप्रत्यभिज्ञा-नेन तस्यैव प्रतीतेः, "पुरुषान्न परं किञ्चित्साकाष्ठा सा परा गति"रिति पञ्चविंशकपुरुषातिरिक्ततत्त्वनिषेधाच्च अतोऽ-व्यक्तं कारणमिति, प्राप्तं, तदिदमुक्तमानुमानिकमप्ये-केषामिति चेदिति एकेषां शाखिनां शाखासु आनुमा-निकं प्रधानमपि कारणमाम्नायत इति चेत् अत्रोत्तरं नेति, नाव्यक्त-शब्देनाब्रह्मात्मकं प्रधानमिहाभिधीयते कुतः। शरीररूपकविन्यस्तगृहीतेः।

टी० "कठवल्लीष्वि"ति, तन्त्रसिद्धतत्त्वक्रमप्रत्यभिज्ञाभासजनकानि वाक्यानि विषयः, तन्त्रसिद्धक्रमतद्विपर्ययप्रतीतिभ्यां संशयः, सिद्धान्तेऽ-व्यक्त-शब्दस्य प्रधानवाचित्वाभावादुत ने? ति संशये शिरोऽन्तरं कृतम् अन्यथा उत ब्रह्मात्मकं प्रधानमिति हि शिरोऽन्तरं वक्तव्यं, कठव-ल्ल्याम् अब्रह्मात्मकप्रधानकारणत्वप्रतिपत्तिरस्ति न वेति प्रथमविचारो ऽभिप्रेतः, तदर्थमिन्द्रियेभ्यः परा इत्यत्राव्यक्त-शब्दः किमब्रह्मात्मकप्रधान-पर? उत नेति विचारः, तदर्थं किमस्मिन्मन्त्रे तन्त्रसिद्धतत्त्वगणनक्रमप्रत्यभि-ज्ञानमस्ति? नेति, तदर्थम् अव्यक्तात्पूर्वापरनिर्दिष्टमहत्पुरुष-शब्दाभ्याम्म-हज्जीवतत्त्वे निर्दिश्येते? उत जीवपरावि? ति किमिहेन्द्रियादि-शब्दैः पूर्ववाक्यस्थरूपकरूपितेन्द्रियादिप्रतिपत्तिरस्ति? नेति, किमत्र परत्वङ्कार-णभावेन? उत वशीकार्यतये? ति, यदा कारणभावेन तदा रूपितेन्द्रियादिप्र-तिपत्त्यभावेन महत्पुरुष-शब्दयोर्महज्जीवतत्त्वसमर्पकतया तान्त्रिकप्र-क्रिया प्रत्यभिज्ञानादव्यक्त-शब्देन अब्रह्मात्मकं प्रधानमुच्यत इति तस्यैव

Digitized by Google

कारणत्वं प्रतीयत इति पूर्वपक्षः । दृष्टान्ते तु यदा वशीकार्यतया परत्वं विवक्षितं तदा पूर्वरूपितेन्द्रियादिप्रतिपत्त्या महत्पुरुष-शब्दयोर्जीवपरमात्मपरत्वेन तन्त्रसिद्धप्रक्रियाप्रत्यभिज्ञानाभावादव्यक्त-शब्दो नाप्रस्तात्मकप्रधानपर इति न तस्मात्र कारणत्वप्रतीतिरिति फलफलिभावः । शङ्काया अनुत्सूत्रत्वमाह "तदिदमुक्तमि"ति, शङ्कानुवादिनं सूत्रखण्डं व्याचष्टे "एकेषामित्यादि"ना, परिहारखण्डं व्याचष्टे-

सू० शरीराख्यरूपकविन्यस्तस्याऽव्यक्तशब्देन गृहीतेः आत्मशरीरबुद्धिमन इन्द्रियविषयेषु रथिरथादिभावेन निरूपितेषु रथरूपकेण विन्यस्तस्य शरीरस्यात्राव्यक्त-शब्देन ग्रहणादित्यर्थः, एतदुक्तं भवति पूर्वत्र "आत्मानं रथिनं विद्धि शरीरं रथमेव च बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरा"नित्यादिना "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद"मित्यन्तेन संसाराध्वनः पारं वैष्णवं पदमुपेत्स्यन्तमुपासकं रथित्वेन तच्छरीरादीनि च रथरथाङ्गत्वेन रूपयित्वा यस्यैते रथादयो वशे तिष्ठन्ति स एवाध्वनः पारभूतं वैष्णवं पदमाप्नोतीत्युक्त्वा तेषु रथादिरूपितशरीरादिषु

टी० "शरीराख्ये"ति, शरीरमेव रूपकविन्यस्तं रूप्यते ऽनेनेति रूपकं दृष्टान्तः, रूपकत्वेन विन्यस्तं रूपितमित्यर्थः, शरीरं हि रथत्वेन रूपितं "शरीरं रथमेव चे"ति । ननु रूपकविन्यस्तशरीरगृहीतेरिति वक्तव्यं विशेषणस्य पूर्वनिपातित्वादिति शङ्कापरिहाराय शरीराख्येत्युक्तम्, अस्मिन् वाक्ये रूपकविन्यस्तं वस्तु प्राधान्येन विवक्षितं विशेषणापेक्षया विशेष्यं प्रधानं मतो रूपकविन्यस्तपदं विशेष्यसमर्पकम् । कीदृशन्तदित्यपेक्षायां शरीराख्यं

१ विक्रान्ते तु इति पा० ।

रूपकविन्यस्तमिति शरीर-शब्देन तद्विशेष्यते, यथा सास्ना-शब्देन गोः, अतो रूपकविन्यस्तप्राधान्याभिप्रायः शरीरशब्दपूर्वनिपात इत्यभिप्रायः। कानि कथं रूपितानीत्यत्राह "आत्मे"ति, रूपकाभिधायि वाक्यं किं रथिरथादिभावेन रूपितानामत्र ग्रहणन्तत्राव्यक्त-शब्देन शरीरस्य ग्रहणमिति च कथमवगम्यते? रथ्यादित्वेन रूपितानाम् अस्मिन् वाक्ये कीर्त्तनं किमर्थं? मित्यत्राह "एतदुक्तमि"ति, आत्मानमित्यादिकं रूपकाभिधायिवाक्यन्तेषामत्र ग्रहणं वशीकार्यतायां प्राधान्यज्ञापनार्थं स्व-शब्दैरेव प्रत्यभिज्ञानाद्रथिरथादिभावेन रूपितानामत्र ग्रहणमिति ज्ञातं, पारिशेष्यादव्यक्त-शब्देन शरीरग्रहणमितीदमर्थज्ञातमुच्यते पूर्वत्र हीत्यादिना, रूपणस्य प्रयोजनमाह "प्रस्येत"इति, वशीकार्यत्वज्ञापनाय रथिरथादिभावेन रूपणमित्यर्थः । रूपकरूपितानामिह ग्रहणं वशीकार्यतायां प्राधान्याप्राधान्यज्ञापनार्थमित्याह-

सू० यानि येभ्यो वशीकार्य्यतायाम्प्रधानानि तान्युच्यन्ते इन्द्रियेभ्यः परा ह्यर्था इत्यादिना, तत्र हयत्वेन रूपितेभ्य इन्द्रियेभ्यो गोचरत्वेन रूपिता विषया वशीकार्यत्वेन पराः, वश्येन्द्रियस्याऽपि विषयसन्निधानादिन्द्रियाणां दुर्निग्रहत्वात्तेभ्यः परम्प्रग्रहत्वरूपितम्मनः मनसि विषयप्रवणे विषयासन्निधानस्याप्यकिञ्चित्करत्वात् ।

टी० "यानि येभ्य इत्या"दिना, ननु वशीकार्यतायाम्प्राधान्यस्य विवक्षितत्वङ्कथमवगम्यते? उच्यते इन्द्रियेभ्यः परा इत्यादिमन्त्रे पर-शब्दस्तावत्प्राधान्यवचनः अर्थेभ्यः इन्द्रियादीनामभेदस्य लोकसिद्धत्वेन उपदेशवैयर्थ्यात् अतः परशब्दः प्रकर्षपरः प्रकर्षश्च न तावत्कारणत्वनिबन्धनः अर्थानामिन्द्रियकारणत्वाभावादिन्द्रियाणां विषयसिद्ध्यर्थतया तच्छेषत्वात् साध्यत्वलक्षणः प्रकर्ष इति च न वाच्यन्तथा सत्यर्थापेक्षया मनसः परत्वायोगात्, न चान्तरङ्गत्वलक्षणः प्रकर्षः इन्द्रियमनोबुद्धीनान्तत्सम्भवेऽपीन्द्रियापेक्षया बाह्यार्थानाम्परत्वायोगात्, अतः पारिशेष्याद्रथिरथादिभाव-

Digitized by Google

रूपणेन उपासनोपकरणत्वाऽवगमात् तत्रैव "यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सह। तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः। यस्तु विज्ञानवान् भवति युक्तेन मनसा सह। तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः यस्त्वविज्ञानवान् भवत्यमनस्कः सदा शुचिः। न स तत्पदमाप्नोति संसारञ्चाधिगच्छति। यस्तु विज्ञानवान् भवति समनस्कस्सदा शुचिः। स तु तत्पदमाप्नोति यस्माद्भूयो न जायते" इतीन्द्रियादिवशीकाराऽवशीकारयोरर्थानर्थदर्शनात् "यच्छेद्वाङ्मनसी प्राज्ञ इती"न्द्रियादीनां वशीकारप्रकारदर्शनादस्मिन्मन्त्रे वशीकार्यतायाम्प्राधान्यम्पर-शब्देन विवक्षितमित्यवगम्यते, तत्रार्थादीनामिन्द्रियादिभ्यः परत्वमुपपादयति "तत्रे"ति, । नन्वष्टौ ग्रहाः अष्टावतिग्रहा इति घ्राणजिह्वावाक्चक्षुःश्रोत्रमनोहस्तत्वगिन्द्रियाणां ग्रहत्वङ्गन्धरसनामरूपशब्दकामकर्मस्पर्शनाख्यानां विषयाणामतिग्रहत्वञ्च श्रुतन्तस्मात् ग्रहेभ्य इन्द्रियेभ्योऽतिग्रह-शब्दोक्तानामर्थानाम्परत्वं किं न स्यात्, उच्यते यदि ग्रहेभ्योऽतिग्रहाणाम्परत्वमिह विवक्षितन्तदाऽर्थेभ्यो मनसः परत्वकथनमयुक्तं मनसो ग्रहान्तर्गतत्वादर्थानामतिग्रह-शब्दोक्तत्वाच्च, अतः स्वसन्निधाविन्द्रियाणां दुर्निग्रहत्वापादनमेवार्थानां वशीकार्यत्वे परत्वं तद्वशीकरणं च असन्निधापनं हेयतया ज्ञापनञ्च तेभ्योऽपीति स्वावधानाभावे विषयासन्निधेरकिञ्चित्करत्वहेतुकं मनसः प्राधान्यं तस्य वशीकरणं नाम तस्य मुहुर्मुहुर्विषयदोषचिन्तनेन तेभ्यो निवर्तनं संशीलनम् "अभ्यासेन च कौन्तेय ? वैराग्येण च गृह्यते" इति स्मृतेः।

सू० तस्मादपि सारथित्वरूपिता बुद्धिः परा, अध्यवसायाभावे मनसोऽप्यकिञ्चित्करत्वात् तस्या अपि रथित्वरूपित आत्मा कर्तृत्वेन प्राधान्यात् परः, सर्व्वस्य चास्यात्मेच्छाधीनत्वादात्मैव महानिति च विशेष्यते, तस्मादपि रथरूपितं शरीरं परं तदायत्तत्वाज्जीवात्मनस्सकलपुरुषार्थसाधनप्रवृत्तीनान्तस्मादपि परः सर्व्वान्तरात्मभूतोऽन्तर्यामी भगवान्

पारभूतः परमपुरुषः, यथोक्तस्यात्मपर्यन्तस्य समस्तस्य तत्सङ्कल्पायत्तप्रवृत्तित्वात् ।

टी० तस्मादपीति, बुद्धि-शब्दोऽध्यवसायरूपज्ञानविशेषपरः। न त्वन्तःकरणपरः "यदा कर्मगुणापेता बुद्धिर्मनसि वर्त्तते व्यवसायगुणोपेता तदा सम्पद्यते मन" इत्यादिषु बुद्धि-शब्दस्यान्तःकरणपरत्वन्तत्कार्यभूतस्य व्यवसायस्य पृथग् निर्देशादिभिरवसीयते, इह तु बुद्धि-शब्दस्य भावार्थत्वस्वारस्यात्तदपवादाभावाच्च व्यवसायपरत्वमित्यध्यवसायाभाव-शब्दप्रयुक्तानस्याभिप्रायः। यद्वा बुद्धि-शब्दोऽन्तःकरणपरः, इदानीमध्यवसायाभाव इत्यनेन तत्कार्यभूताध्यवसायाभाव इत्युक्तं स्यात्, अल्पास्थिरत्वदुःसाधत्वदुःखमिश्रत्वादिदोषदर्शनेन विषयाणां हेयत्वाध्यवसायोऽध्यवसाय-शब्देन विवक्षितः, तदभावे ह्यन्यत्र व्यासङ्गादिना क्वचिद्विषये प्रावण्यरहितमपि मनः कदाचित्तत्प्रवणमपि स्यात्, अतो बुद्धेः परत्वन्तस्याश्च वशीकरणं नाम विषयदोषदर्शनसंशीलनेन तद्दृढीकरणरूपं मनोनिवर्त्तनपाटवापादनम्, आत्मा कर्तृत्वेन प्राधान्यात् पर इति कर्तृत्वेनवाध्यवसायाश्रयत्वे न बुद्धि-शब्दस्यान्तःकरणपरत्वपक्षे तु उपकरणित्वेनेत्यर्थः। यथोक्तात्मनः कथमहच्छब्दविशेष्यत्व? मित्यत्राह "सर्वस्य चे"ति, अस्य सर्वस्येन्द्रियादेरध्यवसायपर्यन्तस्य इन्द्रियाणि जेतव्यानि सम्यगर्थविषयोऽध्यवसायः सम्पाद्य इत्येवंरूपेच्छायत्तत्वादित्यर्थः, अनेनात्मनो वशीकरणं नामात्मरूपयाथात्म्याध्यवसायप्रावण्यरूपेच्छापादनमेवेति च फलितन्तस्मादपि रथरूपितं शरीरं परमिति, शरीरस्य परत्वं नाम स्वगतगुणोन्मेषानुगुणात्मगतज्ञानापादकत्वं रजस्तमोऽनुदयसत्त्वप्राचुर्यकरपरिशुद्धाहारेण सत्त्वोद्रिक्ततापादनं शरीरस्य वशीकरणमित्यर्थः। जीवभेदस्याऽविद्याकल्पितत्वादविद्यासंज्ञमव्यक्तं जीवात् परं तत्कार्यत्वाच्छरीरस्य परत्वमुपचर्यत इति केश्चिदुक्तन्तदयुक्तङ्कारणगतपरत्वस्य कार्ये उपचरणे स्वारस्याभावाज्जीवभेदस्याऽविद्याकल्पितत्वाभावाच्च, आत्मपर्यन्तस्य स्वाधिकस्य यद्वा जीवपर्यन्तस्येत्यर्थः, नास्मिन्वाक्ये वशीकार्यतया परत्वे निर्दिष्टः क्रमो

विवक्षितः किन्तूपकरणितया प्राधान्यम् अत एवात्मानं रथिनं विद्धीति शरी-
रात् पूर्वं निर्दिष्टः उपासनोपकरणकोटिनिवेशः परस्य कथम् अव्यक्तात्प-
रस्य पुरुषत्वमात्रं श्रुतं न परमत्वन्तत्कथमश्रुतपरमशब्दाङ्गीकार इत्यत्राह

सू० स खल्वन्तर्यामितयोपासनस्यापि निर्वर्तकः 'परात्तु तच्छ्रुतेरि'ति हि जीवात्मनः कर्तृत्वं परमपुरुषायत्तमिति वक्ष्यते वशीकार्योपासनानिर्वृत्त्युपायकाष्ठाभूतः परमप्राप्यश्च स एव, तदिदमुच्यते पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिरिति, तथा चान्तर्यामिब्राह्मणे "य आत्मनि तिष्ठन्नित्यादिभिस्सर्वं साक्षात्कुर्वन् सर्वं नियमयतीत्युक्त्वा नान्योऽतोऽस्ति द्रष्टेत्यादिना नियन्त्रन्तरं निषिध्यते, भगवद्गीतासु च "अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधम् । विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चममिति दैवमत्र पुरुषोत्तम एव "सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनञ्चेति वचनात्, तस्य च वशीकरणन्तच्छरणागतिरेव यथाह 'ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया तमेव शरणङ्गच्छेति ।

टी० स खल्वि"ति, उपासननिर्वाहकत्वाद्वशीकार्यत्वमित्यर्थः सा काष्ठेति श्रुतिवाक्यखण्डं व्याचष्टे "वशीकार्योपासने"ति, वशीकार्यशब्द उपायविशेष्यकः रूपितेष्वर्थेषु परत्वेन रूपितस्य पदस्याव्याकथनाद्वस्तु-मात्रपरिशेषासिद्धिशङ्कां परिहर्तुं सा परा गतिरित्यनेनैव पारत्वरूपितपदस्याऽपि प्रतिपादितत्वमाह "परमे"ति, पुरुषान्न परं किञ्चिदित्युपायकोटिकाष्ठाभूतमस्मात्परं न विद्यत इति व्यतिरेक उक्तः, सा काष्ठेत्यनेन अयमेवोपायकाष्ठाभूत इत्यन्वय उक्तः । इन्द्रियादीनामप्युपायभूतत्वमात्र-

मस्तीति तत्काष्ठात्वं परा गतिरिति प्राप्यत्वमुच्यत इत्यर्थः, "यस्मात्परं नापर"मित्यादि श्रुत्यैकार्थ्यावगमात् स्वस्मात् परान्तररहितस्य परमात्मत्वमर्थसिद्धमपि चाभिप्रायः सर्वनियामकादस्मात् परस्याभावेन उपायत्वाद्यात्मोपपादनार्थम् अन्तर्यामिब्राह्मणमुपादीयते "तथे"ति, दैवमिति कर्म वा कर्माराध्यमिन्द्रादिकं वा विवक्षितं तस्यादित्यत्राह "दैवमत्रे"ति, न दैवं केशवात्परं श्रूयतां परमं दैवं दुर्विज्ञेयं मयाऽपि च । नारायणस्तु पुरुषो विश्वरूपो महाद्युतिः। नारायणस्य चाङ्गानि सर्वदैवानि चाभवन् अन्यानि सर्वदैवानि तस्याङ्गानि महात्मन" इत्यादिप्रयोगादित्यभिप्रायः, परमपुरुषस्याप्युपासननिर्वर्तकत्वमस्तु कथं सर्वस्मात्परस्यानीश्वरेण संसारिणा वशीकर्त्तुं शक्यत्वं, शक्यश्चेत्तत्प्रकारोऽपि क्वचिच्छ्रूयेत न च श्रूयते यच्छेद्वाङ्मनसी प्राज्ञ इत्यादावनुपलब्धेरित्यत्राह "तस्य चे"ति, यच्छेद्वाङ्मनसीत्यादौ तस्य वशीकार्यत्वप्रकारं दर्शयिष्यते। कथमव्यक्त-शब्देन शरीराख्यरूपकविन्यस्ताभिधानं रूपकविन्यस्तान्तराभिधायित्वं किं न स्यादिति शङ्कायामव्यक्त-शब्देन शरीरस्याभिधानं पारिशेष्यादित्याह—

सू० तदेवमात्मानं रथिनं विद्धीत्यादिना रथ्यादिरूपकविन्यस्ता इन्द्रियादयः "इन्द्रियेभ्यः परा ह्यर्था" इत्यत्र स्व-शब्दैरेव प्रत्यभिज्ञायन्ते न रथरूपितं शरीरमिति परिशेषात्तदव्यक्त-शब्देनोच्यते इति निश्चीयते, अतः कापिलतन्त्रप्रसिद्धस्य प्रधानस्य प्रसङ्ग एवेह नास्ति, न चात्र तत्तन्त्रसिद्धप्रक्रियाप्रत्यभिज्ञा इन्द्रियेभ्यः परा ह्यर्था इतीन्द्रियेभ्योऽर्थानां शब्दादीनां परत्वकीर्त्तनात्, न हि शब्दादय इन्द्रियाणां कारणभूतास्तद्दर्शने अर्थेभ्यश्च परं मन इत्यपि न तत्तन्त्रे सङ्गतम्, अकारणत्वादेव तथा बुद्धेरात्मा महान्पर इत्यप्यसङ्गतं बुद्धि-शब्देन महत्तत्त्वाभ्यु-

पगमात्, न हि महतोमहान् पर इति सम्भवति महत आत्मशब्देन विशेषणं च न सङ्गच्छते, अतो

टी० "तदेवमात्मानमि"ति, प्रधानप्रतिपादकत्वमङ्गीकृत्य तस्य ब्रह्मात्मकत्वाब्रह्मात्मकत्वविवादोऽपि क्वचिदस्तीति तद्व्यावृत्त्यर्थं प्रसङ्ग एव नास्तीत्युक्तं, वशीकार्यतया परत्वमुपपादितं कारणत्वेन परत्वस्यानुपपत्तिमाह "न चात्रे"ति, प्रत्यभिज्ञानाभावमुपपादयति "इन्द्रियेभ्य"इति, तदेव विवृणोति "न ही"ति, अकारणत्वादेवेति, इन्द्रियेभ्यः परा ह्यर्था इत्यत्र तन्त्रप्रक्रियाप्रत्यभिज्ञानव्युदासहेतोरेवेत्यर्थः। अहङ्कारद्वारा बुद्धेर्मनःकारणत्वसम्भवात्, मनसस्तु परा बुद्धिरित्येतत्क्लिष्टगत्या निर्वोढुं शक्यमिति तदनादरेण बुद्धेरात्मेत्यत्रानुपपत्तिमाह "तथे"ति, बुद्धि–शब्देन महत्तत्त्वमभिधीयतान्ततः किमित्यत्राह "न ही"ति, समष्टिव्यष्टिविभागेन परत्वोपपत्तिरिति चेन्न तत्कल्पनेन निर्वाहस्यास्वरसत्वात् इन्द्रियादिषु चार्थान्तरेषु समष्टिव्यष्टिविभागादर्शनाद्रूपकवाक्यैकदेशाभावाच्चानुपपत्त्यन्तरमाह "महत आत्म–शब्देने"ति, आत्म–शब्दः स्वतश्चेतनैकान्तः अगत्या क्वचित्स्यात् तत्परत्वाश्रयणम् अवयवशक्त्या स्वकार्यव्याप्तिपरत्वेऽपि महत्तत्त्वादपि प्रधान एव अवयवार्थप्रकर्षात् महत आत्म–शब्दविशेष्यत्वमयुक्तमित्यर्थः। ननु "उद्ववर्हात्मनश्चैव मनस्सदसदात्मकं मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम्महान्तमेव चात्मानं सर्वाणि त्रिगुणानि चे"ति, स्मृतिसिद्धप्रक्रियाप्रत्यभिज्ञानान्महच्छब्दो महत्तत्त्वपरः, न त्वात्मविशेषक इति चेन्न श्रुताविन्द्रियार्थमनोबुद्धिमहतां परत्वस्य चोक्तत्वादहङ्कारस्यानुक्तत्वात् स्मृतौ मनोऽहङ्कारमहतामेवोक्तत्वादिन्द्रियार्थबुद्धीनां परत्वस्य चानुक्तत्वात् श्रुतौ स्मृत्यर्थप्रत्यभिज्ञानाभावान्मनसोऽहङ्कारमुद्ववर्हेत्यस्य तन्त्रप्रक्रियाविरोधप्रतीतेः पूर्वपक्षिणैवं परिचोदनस्यायुक्तत्वाच्च। ननु महच्छब्दस्यात्मविशेषणत्वे सति महतः परमिति निर्देष्टुमयुक्तम् अपि त्वात्मन इत्येवनिर्देष्टव्यमिति चेन्न विशेषणवाचिपदेनाऽपि प्रकृतविशेष्याभिधानदर्शनात् देवदत्तादु यज्ञदत्तः शीघ्रगतिर्योऽयमश्वारूढः।

शब्दमास्थितताभिधायाः* । न चेयं साक्षादर्थधियमाधत्ते येन न तत्साधिका स्यात् अपि तु संस्कारोद्बोधनक्रमेण । तथा च नार्थविषयविज्ञानं स्वपदगोचरसंस्कारोद्बोधनक्रमेण पदस्मरणमपि† विदधदभिधाशब्दगोचरः अपि तु शब्दविषयं विज्ञानं तस्य च तद्भावनियमात्‡ । लौकिकपरीक्षकाणां प्रयोगसंप्रतिपत्तेः । प्रणिधानादिष्वपाठाच्छब्दस्य न स्मारकत्वमितिचेन्न । तत्संबन्धात् । अथापि§ स्यान्परिगणिता हि स्मृतिहेतवः|| । प्रणिधाननिबन्धनाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्माः प्रामाणिकैर्न चैतेषु किं चित्पदं तत्रार्थस्य स्मारकमिति चेत्तत्रार्थसंबन्धेन तदुपपत्तेः । संबन्धो हि स्मृतिहेतुषु पठितः । यतो ऽन्तेवासिनो गुरुमृत्विजो याज्यं स्मरन्ति¶ । (स चास्ति शब्दार्थयोरौत्पत्तिको) वाच्यवाचकभाव इति तदनुभवाहितभावनासहितं शब्दविज्ञानमन्वितार्थप्रत्यायनप्रयुक्तं स्वार्थं स्मारयिष्यति । वाच्यवाचकत्वं च प्रत्याय्यप्रत्यायकत्वं तच्च विचार्यमाणं स्मार्यस्मारकत्वमेव । ननु संबन्धान्तरेणाध्यापकाध्यापनीयभावादिना ऽन्तेवासी स्मरति गुरुं न स्मारकत्वेनैव** तथैवेहापि संबन्धान्तरमनुसर्तव्यं न च तदस्ति तत्कथमस्य स्मारकत्वम् । अन्विताभिधाने त्वभिधेयसाहचर्यमेवास्यास्ति संबन्धान्तरमिति युज्यते

---

* शब्दगताभिधाया अर्थबोधानुकूलसामर्थ्यरूपायाः कुक्षौ प्रविष्टस्यार्थस्यातीन्द्रियत्वेन तद्विशेषितसामर्थ्यस्याप्यतीन्द्रियत्वमापद्यत इत्यर्थः ।

† पदस्मरणमपीति २ पु॰ पा॰ ।

‡ शब्दविषयकज्ञानेन नियमतो ऽर्थप्रत्ययस्येवार्थज्ञानेन पदस्मरणनियमाभावादर्थगतक्वाचित्कपदोपस्थापकव्यापारस्य नाभिधात्वं नियमेनोपस्थापकव्यापारस्यैवाभिधात्वादिति भावः ।

§ शब्दस्य तत्स्मारकत्वमिति चेन्न तत्संबन्धादिति २ पु॰ पा॰ । अथापीत्यत्र तथापीति च ।

|| गौतमसूत्रे अ॰ ३ आ॰ २ सू॰ ४४ ।

¶ स्मारयिष्यन्तीति ३ पु॰ पा॰ ( ) एतदभ्यन्तरस्थश्च पाठः ३ पु॰ नास्ति ।

** स्मार्यस्मारकत्वेनैवेति २ पु॰ पा॰ ।

स्मारकत्वं पदानाम् । अथान्विताभिधाने ऽप्यन्वितप्रत्यायनाय* किमस्ति संबन्धान्तरं पदानां दृष्टा हि चक्षुरादयो धूमादयश्चार्थसन्निकर्षलक्षणनियतसाहित्यादिलक्षणेन संबन्धान्तरेण प्रत्याययन्तो यथायथमर्थान् । यद्युच्येत विना ऽपि संबन्धान्तरमौत्पत्तिकार्थप्रत्यायनशक्त्या वृद्धव्यवहाराधीनतया प्रत्यायनमिति तदत्रापि समानम् । इहापि तादृशस्यैव स्मृतिजननशक्त्या वृद्धव्यवहाराधीनतया स्मारकत्वमस्तु पदानामर्थरूपे तच्च स्वज्ञानमेव तस्य चाभिधात्वमुपपादितमधस्तात् । तस्मादभिधातृत्वमपि नान्विताभिधानइति† कल्पनालाघवादाकाङ्क्षादिलक्षणसहकारिप्रत्यासत्तेश्च समभिव्याहृतपदस्मारितैः पदार्थैः प्रत्यासत्त्या गम्यमानो वाक्यार्थो लाक्षणिकः शाब्दश्चेति‡ रमणीयम् । तस्मात्सुष्ठूक्तं§ पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि अथेदानीं पदार्था अवगताः सन्तो वाक्यार्थमवगमयन्तीति ॥

तत्त्वबिन्दुपरामर्शपुष्टानां बुद्धिवीरुधः ।
वाक्यार्थधीसुमनसः पुरुषार्थफलप्रदाः ॥
वाक्यार्थमितये पुंसां भ्रमसंतमसच्छिदा ।
इन्दुनेवामुना मार्गो दर्शितस्तत्त्वबिन्दुना ॥

इति श्रीवाचस्पतिमिश्रविरचितस्तत्त्वबिन्दुः समाप्तः ॥

* अन्वितानुभवनिष्पत्तये । सामान्यतो ऽन्वितस्योपस्थितत्वेनानुभवविषयताया असम्भवाद्विशेषस्य च सामान्याविभक्तत्वेन सम्बन्धान्तरानुपपत्तेरिति भावः ।

† अन्विताभिधानवादे प्रदर्शितदिशा पदानामन्विताभिधातृत्वं न सिध्यतीत्यर्थः ।

‡ संसर्गो लक्षणागम्यः स्वज्ञानादिपरंपरया पदजनितत्वेन शाब्दश्चेत्यर्थः ।

§ शाबरभाष्ये अ० १ पा० १ सू० २५ ।

॥ श्रीः ॥

तत्त्वबिन्दोर्भूमिका ।

अथैष प्रकाश्यते तत्त्वबिन्दुर्नाम प्रबन्धः शास्त्ररसिकानां प्रमोदमाधातुम् । अस्य निर्माता किल सर्वतन्त्रस्वतन्त्रप्रतिभः श्रीवाचस्पतिमिश्रो यः प्राग्भवे शाङ्करब्रह्मसूत्रव्याख्यानप्रवृत्तोऽन्तरायतिरस्कृते तत्र महत्यनितरसंपादनीये निजावतारकार्ये भगवता श्रीशङ्कराचार्यपूज्यपादेन वाचस्पतिनाम्ना ऽवतीर्य संपादयितास्यभीप्सितमाकल्पं च सा टीका भुवमलंकुर्यादिति वरेणान्वगृह्यतेति वर्णयन्ति स्म शङ्करदिग्विजये माधवाचार्याः ।

अविसंवादितया नु भगवदादेशस्य षट्त्रिंशदुत्तरैकोनविंशतिशततमे १९३६ वैक्रमाब्दे काशिकराजकीयसंस्कृतपाठशालामलंकरिष्णुभिर्निखिलदर्शननदीष्णैर्मदीयगुरुवरश्रीढबालशास्त्रिचरणैर्मुद्रयित्वा प्रचारिता भामतीनाम्नी शाङ्करब्रह्मसूत्रभाष्यटीका । अस्यामेव शेषे यन्न्यायकणिकातत्त्वसमीक्षातत्त्वबिन्दुभिरिति पद्यं ग्रथितवता ऽन्तरा च तत्रावधारितेषु सिद्धान्तेषु विस्तरेण व्यवस्थापनमेतेष्वेव निबन्धेषु प्रतिज्ञातवता ग्रन्थकारेण चिरादेतदालोचनोत्कलिकाऽऽकुला अभाविषत परीक्षणविचक्षणाः । तेष्वयमेकस्यैव विषयस्य व्यवस्थापको निबन्धः ।

> स्फोटेऽथ वाक्यचरमाक्षरसर्ववर्ण-
> वल्योः पदेषु च निरस्य पथा नवेन ।
> संस्मारितेष्विह हि वस्तुषु सुप्रतिज्ञैः
> शाब्दप्रमाजनकता निरधारि मिश्रैः ॥

एतत्सिद्धान्तव्यवस्थापनं च मन्ये निगूढाभिसंधिना तटस्थेनेव वस्तुस्वभावप्रतिपादनमुखेन वेदान्तपरमसिद्धान्तमुपपन्नं

कर्तुकामेन ग्रन्थकर्त्रा कृतम् । तथा हि । तत्त्वमसि अहं ब्रह्मास्मीति महावाक्यार्थधियोर्गुरूपदेशशिष्यानुभवरूपयोश्चिरमुपदिष्टप्रकारेणावर्त्यमानयोरविद्यावरणनिरसनद्वारेण साक्षात्कारहेतुत्वमिति ह्यद्वैतवादिनां मुख्यतमः सिद्धान्तः । तस्य च चरमज्ञानस्य प्रत्यक्षत्वं शाब्दत्वं च दशमस्त्वमसीत्यादाविवेति न तिरोहितं वेदान्तचिन्तकानाम् । अत एव यत्साक्षादपरोक्षाद् ब्रह्म तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतिभ्यां ब्रह्मणः साक्षात्काररूपत्वमुपनिषन्मात्रगम्यत्वं च निरणायि । वस्तुतन्त्रत्वे एव च ज्ञानस्य प्रमात्वमिति समन्वयसूत्रे भाष्यकारः । योषा वाव गौतमाग्निः सिंहो माणवक इत्यादिवैदिकलौकिकवाक्यैः समानविभक्तिकपदद्वयसमभिव्याहारबलेन जायमानाऽपि तदर्थयोरभेदान्वयधीः कर्तुमकर्तुमन्यथा वा कर्तुं शक्यत्वेन वस्तुतोऽभेदाभावेन पुरुषतन्त्रतया क्रियारूपैव न तु ज्ञानम् । शुक्ले पटे तदभेदधीस्तु वस्तुमात्रनिबन्धना न व्यत्यासं सहत इति क्रियालक्षणविरहाज् ज्ञानम् । तथैव प्रकृते वस्तुमात्रप्रभवत्वे सत्येव जीवब्रह्माभेदधियो ज्ञानत्वमारोपात्मकत्वे तु क्रियैवेति । तथा च साक्षात्कारत्वेनेष्टायाश्चरमवृत्तेर्वस्तुनिबन्धनत्वमवश्यमाश्रयणीयम् । अङ्गीकृतं च परैरपि प्रत्यक्षं प्रति विषयस्य कारणत्वम् । तेन प्रमामात्रं प्रति विषयस्य कयाचिदपि प्रणाड्योपस्थितस्य कारणत्वस्वीकारे बाधकाभावः । न चैवमतीतानागतयोः प्रमाऽव्यवहितप्राक्कालिकस्थितिविधुरतया तद्विषयकानुमितिशाब्दधियोरप्रमात्वमापादनीयम् । प्रमां प्रति बोद्धृपदार्थानामेव कारणत्वाङ्गीकारेण सत्कार्यवादाङ्गीकारेण वा वस्तुनः प्रमाप्राक्कालिकतायाः सूपपादत्वात् । प्रकृतसाक्षात्कारशाब्दकारणतायाः अपि बुद्धिपरिकल्पिते सविशेषणत्वाभ्युपगमेन तस्यालीकत्वप्रसक्तेरिष्टापत्तिग्रस्तत्वात् । अत एव निर्विशेषमुपक्रम्य श्रुतिः । न तस्य कार्यं करणं च विद्यत इति । लौकिकप्रमात्वं तु व्यवहारदशायामबाध्यविषयत्वरूपमुभयत्रा-

Digitized by Google

पि तुल्यमित्यलमप्रस्तुतविचारप्रयासेन । एवं स्थिते उपनिषदेकगम्यत्वाद् निर्विशेषस्य प्रकृतमहावाक्यघटकपदवृत्त्योपस्थितिरावश्यकी सा च समभिव्याहृतपदान्तरार्थेन सहान्वयानुपपत्तिप्रतिसंधानसापेक्षेति भवति जघन्यवृत्त्याश्रयणसाहाय्यसमर्पणमुखेन वाक्यस्य निर्विशेषप्रतिपादकत्वं चरमधियो विशेषपरित्यागेन प्रागनधिगतविषयकतया प्रमात्वं चेति चतुरस्रम् । निर्विशेषत्वादेव च परमपुरुषार्थस्य पदार्थान्तरेणान्वयानवकाशः । तत्प्रतिपादकत्वं च श्रुतिशिरसां संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् । उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थतेत्यभिदधत्याचार्याः । सम्यक्त्वं चाघोक्तदिशा प्रागनधिगतनिर्विशेषप्रमात्वरूपम् । यदि पुनरन्वितएव पदानां शक्तिः स्यान्न स्यात्तदा प्रकृते कयापि विधया वेदान्तानां निर्विशेषावगमसाधनत्वं प्रमाणान्तरगम्यत्वं तु निर्विशेषस्य सुदूरपराहतमिति महदनिष्टमापद्येत । अतः प्राधान्येनात्र वृत्तिकारमतानुयायी प्रतिपक्ष एव शिक्षणीयो यः क्रियाशेषत्वं ब्रह्मणो विब्रुवन्नाकुलीकरोति चेतांसि ब्रह्मनिष्ठानाम् । जैमिनिसूत्रे भाष्यकारो वार्त्तिककारश्च नात्र प्रतिकूल इति तयोरेवात्र प्रबन्धे प्राधान्येन प्रमाणभावावलम्बनम् । अत एवौत्पत्तिकसूत्रे जै· सू· अ १ पा· १ सू· ५ भाष्यकारो वेदान्तवाक्यानि आत्मज्योतिः सम्राडिति होवाच स एष नेति नेत्यात्मेति होवाचेति निर्विशेषप्रतिपादकान्येवात्मस्वरूपनिरूपणावसर उदाजहार । वार्त्तिककारश्च इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या । दृढत्वमेतद्विषयश्च बोधः प्रयाति वेदान्तनिषेवणेनेत्युपसंजहार । स्फोटवादिनश्चरमवर्णं वाक्यघटकसकलवर्णसमुदाये च शाब्दधीहेतुत्ववादिनश्च निराकरणं तु ब्रह्मसूत्रे अ· १ पा· ३ सू· २८ देवादीनां शब्दप्रभवत्वप्रतिपादनावसरे पूर्वपक्षे स्फोटं निवेशितवता वर्णा एव तु पदमिति भगवानुपवर्ष इति वर्णानां शाब्दहेतुत्वमन्यमतत्वेन वदता ऽथापि नाम प्रत्यु-

न्नारणमन्येऽन्ये च वर्णाः स्युस्तथापि या वर्णेष्वर्थप्रतिपादनप्रक्रिया सा सामान्येषु संचारयितव्येत्यनास्थामाविष्कुर्वता भाष्यकारेण सूचितामरुचिं व्युत्पादयितुमिति तत्रैव भामत्यां दिङ्मात्रमिह दर्शितं विस्तरस्तु तत्त्वबिन्दाववगन्तव्य इत्यभिधानेदंपर्यपर्यालोचनया पर्यवस्यतीति विचारकुशला विदांकुर्वन्तु ।

तदेवमतिनिगूढाशयस्य प्रौढेः परां काष्ठामारूढस्यास्य प्रबन्धरत्नस्य मुद्रणे काशीराजकीयसंस्कृतपाठशालाप्रधानाध्यक्षेणानाविधदर्शननिष्णातधिषणैः श्रीमदार्थरवेनिससाहिबमहोदयैरादिष्टो ऽहं पाठशालापुस्तकालयस्थं देवाक्षरलिखितं पुस्तकद्वयं वङ्गाक्षरलिखितं च शुद्धतममेकं पुस्तकमिति त्रीणि पुस्तकानि समालम्ब्य प्रवृत्तः पर्यालोच्य बहुत्र क्लिष्टतां विषमस्थलानि संक्षिप्तया टिप्पण्या विशदयन् निवेशयंश्चाधः पाठभेदान् समापयं प्रस्तुतं कार्यम् । भृशमन्वगृह्ये च निखिलं सटिप्पणीकममुं मुद्रितात्प्राक् निध्याय महान्तं श्रममङ्गीकृतवद्भिः पाठशालायां प्रधानपण्डितैः श्रीकैलासचन्द्रशिरोमणिभट्टाचार्यमहाशयैः । अथापीदृशे दुर्घटे कार्ये मादृशाल्पज्ञजनसुलभेन मतिदोषेण जनितानि स्खलितानि सुविमृश्य प्रबोधयन्तु विपश्चिद्वरा येन कृतज्ञताप्रकाशनपुरःसरं यतेय द्वितीयसंस्करणे निर्दोषतासंपादनाय । सन्तारश्च गुणैकपक्षपातिनो दूषणवाचंयमाः सुधियः सीसकाक्षरयोजकदोषेण मदीयदृष्टिदोषेण चोपनता अशुद्धीरिति निश्चिन्वन् विरमामि निरर्थकाद्विस्तरादिति । शुभम् ।

फा॰ व॰ २ रवौ
सं॰ १९४८
१४ । २ । ९२

महामहोपाध्यायो मानवल्ल्युपाख्यो
गङ्गाधरशास्त्री ।

Digitized by Google

श्रीः

तत्त्वबिन्दुः

सर्वतन्त्रस्वतन्त्रश्रीवाचस्पतिमिश्रकृतः
शाब्दबोधकारणावधारणापरः

काशिकराजकीयसंस्कृतप्रधानपाठशालायाम्
साहित्यशास्त्राध्यापकेन महामहोपाध्याय-
श्रीगङ्गाधरशास्त्रिणा

विषमस्थलटिप्पणीनिवेशनपुरःसरं संशोधितः

काश्याम्
ई० जे० लाजरसकंपन्याख्येन मेडिकलहालनाम्नि
मुद्रालये मुद्रयित्वा प्रकाशितः ।

सं० १९४९ वै० व० ७ भौमे

Digitized by Google

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

		मूल्यम्	
		रु०	आ०
१	काशिका पंडितवरवामनादित्यविरचिता		
	पूर्वार्धम्	..	॥
	उत्तरार्धम्	१० ..	॥
२	बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२ ..	॥
३	प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१ ..	।)
४	लघुकौमुदी वरदराजकृता	१ ..	=)
५	लघुकौमुदी श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्गलण्डीयभाषायां कृता	८ ..	॥
६	श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७	वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायां कृतम्	४ ..	॥
८	मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४ ..	॥
९	शाश्वतधर्मदीपिका	१ ..	॥
१०	अमरकोश सटीक..	४ ..	॥
११	योगवार्त्तिकम्	३ ..	।)
१२	वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१) ..	॥
१३	गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिनगा-देशाधिपति रचिता	४) ..	॥
१४	श्रौतपदार्थनिर्वचनम्	४) ..	॥
१५	वाक्यार्थचन्द्रिकापरिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि संशोधिता	४) ..	॥
१६	श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराम-मिश्रशास्त्रिप्रणीत क्वाचित्क विषमपदटिप्पणीसमेतः ..	६) ..	॥।)
१७	खण्डनखण्डखाद्यं सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्त-टिप्पणीसहितम्	७) ..	॥)
१८	काव्यप्रदीपः काव्यप्रकाशस्य प्रतिच्छायाव्याख्या वाराणसेयसमाट्-प्रतिष्ठापितसंस्कृतपाठशालीयदर्शनशास्त्राध्यापकरामशास्त्रि-भागवताचार्येण परिशोधितः	३) ..	॥)
१९	वेदान्तसिद्धान्तमुक्तावली श्रीयुत आर्थर्विनिस महाशये-ङ्गलण्डीयभाषायां कृतम्	२) ..	॥)

Digitized by Google

CONTENTS.

Page.

GAṆAKATARAṄGIṆĪ, OR LIVES OF HINDU ASTRONOMERS, by Mahāmahopādhyāya Sudhākara Dvivedī, Professor, Sanskrit College, Benares. ... 225

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed: Dāmodara Sāstrī, Professor, Sanskrit College, Benares. ... 241

ŚRĪBHĀSHYA WITH ŚRUTAPRAKĀŚIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. ... 257

TATTVABINDU, of Vāchaspati Miśra, Ed: Mahāmahopādhāya Gaṅgādhara Śāstrī, Professor, Sanskrit College, Benares. ... 273

Digitized by Google

HARVARD COLLEGE
AUG 9 1892

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 6.] JUNE, 1892. [Vol. XIV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1892.

Price, Rs. 9-0 per annum.]

[*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अस्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

AUG 9 1892
LIBRARY

गूढप्रकाशकं दृष्ट्वा रङ्गनाथभवं भुवि ।
मुनीश्वरस्य सहजं लभन्तां गणकाः सुखम् ॥

एतट्टिप्पणसहितं सूर्यसिद्धान्तपुस्तकं एशियाटिक्समाजाख्ये मुद्रितमस्ति । ग्रन्थारम्भे यदि रङ्गनाथवयस्त्रिंशद्वर्षमितं तदा रङ्गनाथजन्मशकः पञ्चनवपुरन्दर १४९५ मितः सिध्यति ।

गणेशः । १५००

अयं गोपालात्मजः तापीतीरवर्त्तिसूर्यपुरनिवासी बाणरामबाणेन्दुमिते १५३५ शके शुकफक्किकामूलोद्धृतं होराख्यं जातकालङ्कारनामकं ग्रन्थं व्यरचयत् । भारतवर्षे फलादेशकथनार्थमयं ग्रन्थः स्रग्धरावृत्तैः खेशपरिमितै११०र्निबद्धो ऽतीव प्रसिद्धः । गणेशः शिवपण्डितशिष्यो गुर्ज्जरब्राह्मण आसीदस्यान्या गणिते कृतिर्नोपलभ्यते । ग्रन्थसमाप्तौ ।

अभूदवनिमण्डले गणकमण्डलाखण्डलः
श्रुतिस्मृतिविचारभूर्विबुधमण्डलामण्डनः ।
प्रचण्डगुणगुर्ज्जराधिपसभाप्रभातप्रभः
कवीन्द्रकुलभूषणं जयति कान्हजी कोविदः ॥
भारद्वाजकुले बभूव परमं तस्मात्सुतानां त्रयं
ज्यायांस्तेष्वभवद्द्विजन्मतिलकः श्रीसूर्यसूरिः सुधीः ।
श्रीमान् सर्वकलानिधिस्तदनुजो गोपालनामा ऽभवत्
श्रीमद्दैवविदां वरस्तदनुजः श्रीरामकृष्णो ऽभवत् ॥
शाके मार्गणरामसायकधरासंख्ये १५३५ नभस्ये तथा
मासे ब्रह्मपुरे सुजातकमिदं चक्रे गणेशः सुधीः ।
छन्दो ऽलङ्कृतिकाव्यनाटककलाभिज्ञः शिवाध्यापकः
तत्र श्रीशिवविन्मुदे गणितभूर्गोपालसूनुः स्वयम् ॥
तापीतीरे स्थिते ऽकारि ब्रह्माख्ये जातकं पुरे ।
बापजीतिद्वितीयेन नाम्नेदं गणकेन च ॥

अस्यैव गणेशस्य बापजीति नामान्तरमासीत् । अयं व्युत्पन्नः प्राचीनगद्यात्मकशुकमुनिप्रणीतफक्किकारूपजातकमवलम्ब्य पद्यैरिदं जातकालङ्काराख्यमकार्षीत् । अस्मिन् ग्रन्थे

Digitized by Google

संज्ञाध्यायः । भावफलाध्यायः । योगाध्यायः । विषकन्यायोगाध्यायः । आयुर्दायाध्यायः । व्यत्ययभावफलाध्यायः । वंशवर्णनाध्यायः । इति सप्ताध्यायाः सन्ति । ग्रन्थारम्भे यदि गणेशवयः पञ्चत्रिंशद्वर्षमितं तदा गणेशजन्मशकः पञ्चदशशत १५०० समः सिध्यति ।

विश्वनाथदैवज्ञः । १५००

दिवाकरनन्दनोऽयं कृष्णविष्णुमल्लारिकेशवेभ्यः सर्वेभ्यः कनिष्ठः । लोकोपकारार्थं सूर्यसिद्धान्तसिद्धान्तशिरोमणिनीलकण्ठीविष्णुकरणग्रहलाघवमकरन्दानन्तसुधारसादिग्रन्थोपरि गणितक्रमप्रदर्शनरूपमुचितमुदाहरणमेतत्कृतं दृश्यते । वस्तुतोऽस्य महान् परिश्रमः सर्वत्रैवोदाहरणक्रमप्रदर्शनोद्भूतः प्रशंसनीयः । विष्णुकरणोपरि धीवेदपञ्चेन्दु १५४५ शकीयमुदाहरणमुदाहरणकाल एव सिद्धान्तकौशलं प्रकटयत्यस्य तदाऽस्य वयश्चेत्पञ्चचत्वारिंशद्वर्षसमं कल्प्यते तदा तदीयजन्मशकः खखपञ्चेन्दु १५०० समः समायाति । उदाहरणानि विहाय स्वातन्त्र्येणास्य काचित्कृतिर्नोपलभ्यते (शिवदैवज्ञवंशावली विलोक्यात्र)

नृसिंहदैवज्ञः । १५०८

अयं कृष्णदैवज्ञनन्दनो दिवाकरदैवज्ञजनकः शिवाग्रजः स्वकीयतातानुजाभ्यां विष्णुदैवज्ञमल्लारिदैवज्ञाभ्यामधीतविद्यो वाराणस्यां पञ्चविंशतिवर्षवयःकाले सूर्यसिद्धान्तटीकां सौरभाष्याख्यां पञ्चत्रिंशन्मितवयःकाले भास्करसिद्धान्तशिरोमणिटीकां वासनावार्त्तिकाख्यां बहुविशेषगर्भां नवीनवासनाभूषितां च व्यरचयत् । अस्य वसुखपञ्चेन्दुसमे १५०८ शके जन्म । देवपञ्चेन्दुशके १५३३ सौरभाष्यस्य गुणवेदपञ्चचन्द्रमिते १५४३ शके शिरोमणिवार्त्तिकस्य च रचना कृतानेन । यद्यपि स्वकृतग्रन्थप्रशंसा विशेषतः कृतेनेन तथापि बहुज्ञान्यथैव प्रतिपादितम् । यथा गोलाध्यायन्योत्पत्तिवार्त्तिके योगान्तरज्योपपत्तौ ह्यनुपातयुक्त्या तदुपपत्तिवर्णनं सर्वं युक्तिरहितमेव । गोलाध्याययन्त्राधिकारे चक्रयन्त्रवर्णने यन्त्रराजस्य वर्णनं विस्तरतः कृतम् । यन्त्रराजस्यैव सुलभाख्यं नामान्तरमिति रामेणोक्तं तथा रामरचितयन्त्रप्रकाशस्थयन्त्रराजरचना चेति सर्वं विस्तरतो वर्णितं चात्र । एवमत्र वार्त्तिके तथा सौरभाष्ये बहवो विशेषा वर्त्तन्ते । सौरभाष्यं सम्पूर्णं वार्त्तिकं च काशिकराजकीयपुस्तकालये शुद्धं प्राचीनं

दर्शनार्थं वर्त्तते । गोलवार्त्तिकसमाप्तौ ग्रन्थरचनादिसमयश्च वर्णितस्तद्यथा ।

गुणवेदशरेन्दु १५४३ सम्मिते शककाले नगरे पुरेशितुः ।
वसता वरणासिमध्यगे नरसिंहेन विनिर्मितं त्विदम् ॥
निजे तत्त्वमिते वर्षे सौरभाष्यं मया कृतम् ।
पञ्चत्रिंशन्मिते वर्षे वासनावार्त्तिकं कृतम् ॥
नवीनयुक्तिप्रतिपादनेन पूर्वोक्ततन्त्रादपि सद्विशेषम् ।
नरप्रणीतान्नृहरिप्रणीतं स्वीकार्यमार्यैः स्वधिया विचार्य ॥
गोदावरीसौम्यतटोपकण्ठग्रामे च गोलाभिधया प्रसिद्धे ।
विप्रो महाराष्ट्रसुगीतकीर्त्तिर्बभूव रामो गणकार्यवन्द्यः ॥
ग्रयणीस्तैत्तरीयाणां भट्टाचार्यस्तु तत्सुतः ।
आसीन्मीमांसकश्रेष्ठः कुमारिल इवापरः ॥
गोत्रे भरद्वाजमुनेः पवित्रे दिवाकरस्तत्तनयो बभूव ।
वेदान्तशास्त्राभ्यसनेन काश्यां यः पुण्यराश्यां तनुमुत्ससर्ज ॥
सांवत्सरार्यस्य दिवाकरस्य श्रीकृष्णदैवज्ञ इति प्रसिद्धः ।
बभूव पुत्रः सुतरां पवित्रः सत्तीर्थकर्ताऽखिलशास्त्रवेत्ता ॥
तज्जस्तु तस्यैव कृपालवेन तातानुजावाप्तसमस्तविद्यः ।
सद्वासनावार्त्तिकनामधेयं ग्रन्थं नृसिंहो रचयांबभूव ॥

विस्तरतो वंशवर्णनमस्यानुजेन शिवदैवज्ञेन मुहूर्त्तचूडामणौ कृतं तदर्थं शिवदैवज्ञवर्णनं द्रष्टव्यम् ।

शताधिकसहस्रत्रयश्लोकसंख्या सौरभाष्ये सार्द्धपञ्चसहस्रश्लोकसंख्या शिरोमणिवार्त्तिके चास्ति ।

सौरभाष्यादौ सप्तमश्लोकेन ।

“श्रीविष्णुसञ्ज्ञकपितृव्यमुखारविन्दा-
न्मल्लारिसञ्ज्ञवदनादधिगम्य विद्याम् ।
सौरागमाब्धितरणाय नृणां करोमि
भाष्यप्लवं बहुविचारविशेषरम्यम्” ॥

अनेन स्वपितृव्याभ्यां विष्णुमल्लारिसञ्ज्ञाभ्यामस्य पठनं स्फुटमेव । गोलाध्यायग्रन्थाधिकारवासनावार्त्तिके बहूनां स्वयम्बहग्रन्थाणां नामानि लिखितानि । तद्यथा ।

"मयूरयन्त्र–ब्रह्मचारियन्त्र–शरवेधयन्त्र–वधूवरयोगयन्त्र–मेषाजयुद्धयन्त्र–शंखवादनयन्त्र–घण्टापटहादिवादनयन्त्र–वानरयन्त्र–घटीयन्त्र–हंसयन्त्राख्यानि स्वयंवहगोलयन्त्राख्यानि च बहुधा यन्त्राणि भवन्तीति" ।

विट्ठलदीक्षितः । १५०६

अस्य मुहूर्ते मुहूर्तकल्पद्रुमं तट्टीकां मुहूर्तकल्पद्रुममञ्जरीं च विहायान्याः कृतयो गणिते फलिते च नोपलभ्यन्ते । अनेन काश्यां तद्ग्रन्थद्वयमलेखि टीकान्तिमश्लोकेन

"नन्दाम्बुतिथ्युन्मितशाककाले काशीपुरे विट्ठलदीक्षितेन ।
मुहूर्तकल्पद्रुममञ्जरीयं समर्पिता श्रीशिवपादपद्मे" ॥

इत्यनेन टीकारचनाकालो नन्दसमुद्रतिथि १५४९ मितः शको ज्ञायते । अस्माभिष्टीकादिभागो न दृष्टः । टीकारचनाकालेऽस्य वयश्चेच्चत्वारिंशद्वर्षमितं कल्प्यते तदा जन्मशको नन्दाभ्रतिथिमितः १५०९ सिध्यति । एतदारम्भप्रकरणे कल्पितवत्सरायनाभ्यां पिण्डानयने न गणिते कश्चिद्विशेषस्तेन गणिते नास्य पाटवं सिध्यति । अस्य गुरुर्म्हालुगिद्देवज्ञस्तेनापि पिण्डानयनं कृतमित्येतदर्थं मत्कृतः पिण्डप्रभाकरो द्रष्टव्यः । मूलग्रन्थान्तिमश्लोकैरयं बूबशर्मणस्तनयः कृष्णात्रिगोत्रः फलितेऽत्यभिमानी च भाति । मुहूर्तकल्पद्रुमेऽध्यायाः कुसुमरूपाः सन्ति यथाऽन्तिमाध्यायस्य विचित्रसंज्ञस्य समाप्तौ

"ग्रन्थाननेकानवलोक्य सम्यक् संदर्भिते विट्ठलदीक्षितेन ।
मुहूर्तकल्पद्रुमनामधेये विचित्रसंज्ञं कुसुमं समाप्तम्" ॥

एवं प्रत्यध्यायसमाप्तौ श्लोकाः सन्ति । विचित्रसंज्ञाध्याये अश्विन्यादीनां चुचेचोलत्यवकहडाणां वर्णानां विचित्रश्लोकैः सुखेनाभ्यासार्थं विचित्रं कृतमस्ति ।

मुहूर्तकल्पद्रुमसमाप्तौ श्लोकाश्च ।
कृष्णात्रिगोत्रे नितरां पवित्रे पवित्रकर्माऽजनि बूबशर्मा ।
तत्सूनुना विट्ठलदीक्षितेन मुहूर्तकल्पद्रुम एष चक्रे ॥
कल्पद्रुमश्चेत्किमु रत्नमाला चिन्तामणिं कर्करमेव मन्ये ।
यदेकदेशे किल मञ्जरीयं सारं विचारं कुरु तत्त्ववेदिन् ॥

नानाफलाद्यैः कुसुमैः समेतः कल्पद्रुमः कल्पितवस्तुदायी ।
आकल्पमाकल्पविभूषितानां गृहेषु नित्यं विबुधाधिपानाम् ॥

"किमु रत्नमाला" "चिन्तामणिं कर्णदमि"त्यादिना निजग्रन्थमुहूर्तकल्पद्रुमसंमुखे श्रीपतिकृतरत्नमालारामकृतमुहूर्तचिन्तामणी व्यर्थावित्यभिमानपूर्णमस्य वाक्यम् । वस्तुतः प्राचीनसहृदयहृदपरोऽस्य ग्रन्थो न तादृशप्रशंसार्हः ।

नारायणः । १५१०

गोविन्दतनयो मुनीश्वरगुरुर्मुनीश्वरलेखानुसारतः केशवपद्धतिटीकाकार आसीत् । काशिकराजकीयपुस्तकालये चैतत्कृतं खण्डितं बीजगणितमप्यस्ति यत्र सर्वाणि सूत्राणि आर्याछन्दोभिर्लिखितानि सन्ति । अत्रादौ ग्रन्थकृन्नाम न प्रथमपत्रपूर्वपृष्ठे "नारायणबीजमि"ति लेखेनेदं नारायणकृतमवगम्यते । अत्र प्रकृतिरूपस्यावर्गाङ्कस्य रूपक्षेपीयकनिष्ठज्येष्ठाभ्यामासन्नपदानयनं वस्तुतो गणिते ग्रन्थकृत्पाटवं प्रकाशयति ।

तदानयनं च ।

"मूलं ग्राह्यं यस्य च तद्रूपक्षेपजे पदे तत्र ।
ज्येष्ठं ह्रस्वपदेनोद्धरेद्भवेन्मूलमासन्नम् ॥

अथ यद्यपि नारायणस्य तत्कृतग्रन्थसमाप्त्यवलोकनेन समयः स्फुटो भविष्यति तथापि मुनीश्वरलेखतोऽयं मुनीश्वरगुरु (मुनीश्वरवर्णनं विलोक्यम्) स्तेनास्य जन्मसमयो मुनीश्वरजन्मतः पञ्चदशवर्षपूर्वमिति कल्पनेन दशपञ्चदश १५१० समशाकः सिध्यति । काशिकराजकीयपुस्तकालये बीजगणितस्य वर्गप्रकृतिपर्यन्तं ग्रन्थोऽस्ति । गणेशदैवज्ञेन बुद्धिविलासिन्यां प्रथमश्लोकटीकायां "श्रीधरनारायणादिभिरपि भागजात्यादिकमन्यदप्युक्तं वास्तवं तु मिश्रादीनां त्रैराशिकैकगम्यत्वेन त्रैराशिकमेव पाटी"त्युक्तः । तत्र नारायणः कश्चिदन्यो गणेशतोऽपि पूर्वोऽयं च नवीन इति सर्वं गणेशसमयादेव स्फुटं भवति । गणेशो यस्य नारायणस्य चर्चां करोति स कदाचित्त्रिविक्रमजनको नारायणो भवेदिति त्रिविक्रमनिर्मितमुहूर्तरत्नस्य श्लोकशतात्मकस्यान्तिमश्लोकाभ्यां ।

"नारायणस्य तनयो ज्योतिर्विद्वानुगो द्विजः ।
त्रिविक्रमशतश्लोकं व्यवहारममुं व्यधात् ॥
किञ्चित्कलियुगे याते ऽभूत ब्रह्मा त्रिविक्रमम् ।
तत्र त्रिहायसंस्थेन शास्त्रमेतन्मया कृतम्" ॥
इत्याभ्यामनुमीयते ।

शिवदैवज्ञः । १५१२

अयं कृष्णदैवज्ञसुतो नृसिंहानुजो दिवाकरादीनां गुरुर्ज्योतिषशास्त्रैकप्रधानाध्यापकः सर्वं स्वकीयायुरध्यापनकर्म्मण्येव समापयत् । अतोऽस्य ज्योतिषसिद्धान्तरचनाचातुरीरूपा न विपुला कृतिः किन्तु एकाऽनन्तसुधारसग्रन्थस्य विवृतिर्गणिते फलिते च मुहूर्तचूडामणिरन्येति कृतिद्वयमस्मद्दृष्टिगोचरीभूतम् । अयं जगतो गुरुरासीत् स्वसमये इति दिवाकरेण स्वकृतजन्मपद्धत्यामलेखि ।

अनन्तसुधारसविवृत्यारम्भे ।
विघ्नध्वान्तनिवारणैकतरणिर्देवासुरैर्वन्दितः
सिद्ध्यै भक्तजनस्य वाञ्छितफलप्राप्त्यै सुराणां ततः ।
सिन्दूरारुणितः ससिन्धुरमुखो नागेन्द्रबुद्ध्या परि-
भ्रान्तानेकमधुव्रतोऽभिलषिता वाणी सदा पूर्यताम् ॥
अन्ते ।
मथितेऽनन्तसुधार्णवे संख्यावलयो बुद्धिगुणैर्बभूव योऽस्मात् ।
तमनन्तोत्यसुधारसं शिवोक्तं गणकाः पद्मनिभाक्षिभिः पिबन्तु ॥
मुहूर्तचूडामणेरादौ ।
सर्वसिद्धिसदनेऽखिलवन्द्ये दुःकृतौघविनिवारणदक्षे ।
विघ्नराजपदपङ्कजयुग्मे चञ्चरीकसममस्तु मनो मे ॥
अस्यान्ते शिवदैवज्ञेन विस्तरतः स्ववंशावली लिखिता ।
तद्यथा ।
गोलग्रामे व.कृपतीनां जनानां गोलज्ञानां वा निवासेन सार्थम् ।
गोदावर्याः सौम्यतीराधिवासशालिन्याढ्ये तद्विदर्भाख्यदेशे ॥
सांवत्सरार्यबुधकेशवसूनुवर्य-
श्रीमद्गणेशगुरुलब्धमतिप्रबोधः ।

वेदान्तवेदितिलको गणको बभूव
श्रीमान् दिवाकर इति प्रथितः पृथिव्याम् ॥
पञ्चास्य पञ्चास्यसमप्रभावाः सगर्वदैवज्ञगजेन्द्रवृन्दे ।
पुत्रा बभूवुः सुतरां पवित्राः श्रीमद्भरद्वाजमहर्षिगोत्राः ॥
ज्येष्ठस्तेषां धरित्रीपतिविविधसभालब्धभूरिप्रतिष्ठः
सर्वाधीशस्य पञ्चत्पदयुगसततासेविविद्वद्वरिष्ठः ।
नव्यान् वाचां प्रबन्धान् सपदि बहुविधान् यो विधत्ते च सार्थान्
दैवज्ञाख्यामभिख्यां वहति विजयते कृष्ण एष द्विजेन्द्रः ॥
सदा मुदा सेवितभर्गसूनुः संख्यागमप्रौढन एव गर्गः ।
वाचां विलासैर्वशमिवेशो जगद्गुर्विष्णुरिति द्वितीयः ॥
अनन्यसामान्यगुणातिरेकान्नरेन्द्रमौलिद्युतिरञ्जिताङ्घ्रिः ।
मल्लारिसंसेवनलब्धसंपन्मल्लारिनामा तनयस्तृतीयः ॥
तस्यानुजः केशवनामधेयः सुरूपधेयः शुभभागधेयः ।
श्रीविश्वनाथस्तदनुप्रसिद्धः संख्या न संख्यानमतो हि यस्य ॥
श्रीकृष्णतः श्रीनरसिंहसंज्ञः सिन्धोः सुधारश्मिरिवोदियाय ।
यद्वासनाकल्पकृतामवेक्ष्य श्रीभास्करं चेतसि न स्मरामः ॥
तस्यानुजः श्रीशिवनामधेयो मुहूर्तचूडामणिनामधेयम् ।
विनिर्ममे सारवदाप्तपद्यैः सच्छिष्यतोषाय पुरे पुरारेः ॥
ये पाठयन्ति च पठन्ति लिखन्ति चैनं
संवीक्ष्य येऽभिकथयन्ति जनाय वेलाम् ।
तेषां यशोविनयगौरवनैपुणानि
प्रज्ञेन्दिराप्रसहितानि भजन्ति वृद्धिम् ॥

अत्र चतुर्दशाध्यायाः सन्ति । अन्तिमाध्याये सामुद्रिकलक्षणं निरूपितम् । अयं प्रतिबिम्बरूपो रामदैवज्ञनिर्मितस्य मुहूर्तचिन्तामणेः ।

जन्मचिन्तामणिकृत्यः शिवदैवज्ञः स च रामदैवज्ञतनूजोऽस्माद्भिन्न इति । तदीयजन्मचिन्तामणिदशाध्यायसमाप्तौ ।

देवज्ञायिकमूर्द्धहीरकमणिः सत्संप्रदायाग्रणी-
र्विख्यातो भुवि रामदैवविदिति प्रत्यक्षवाचस्पतिः ।
तत्सूनोः कृतिनः शिवस्य हि कृतौ सज्जन्मचिन्तामणा-
वध्यायोऽपि दशाक्रमादिकथनः पूर्णो ह्यभूदष्टमः ॥

एवं प्रत्यध्यायसमाप्तौ श्लोकाः ।

अथ वंशपरम्परा ।

दिवाकरः ।

- कृष्णः
  - नृसिंहः
    - दिवाकरः
    - कमलाकरः
    - गोपीनाथः
    - रङ्गनाथः
  - शिवः
- विष्णुः
- मल्लारिः
- केशवः
- विश्वनाथः

शिवदैवज्ञो नृसिंहदैवज्ञानुजः । अतो नृसिंहतः पञ्चवर्षैर्लघुतरोऽयमिति कल्पनेन त्रयोदशाधिकपञ्चदशशतासन्नोऽस्य जन्मशकः समायातीति । यतोऽयं दिवाकरस्य वसुकरशरविधुशक १५२८ शकजन्मनो गुरुरतो मदीया कल्पना युक्तियुक्ता ।

बलभद्रमिश्रः । १५१४

अयं दामोदरस्य पुत्रो भरद्वाजगोत्रः कान्यकुब्जनगरनिवासी रामदैवज्ञशिष्यः पातिशाहसूजासमये राजमहलस्थाने हायनरत्ननामकं ताजकग्रन्थं वर्षफलविचारपरं प्राचीनमतसङ्ग्रहरूपं व्यरचयत् । फलग्रन्थविदितां मध्ये वर्षफलादिकथनेऽस्य ग्रन्थस्य महती प्रसिद्धिः । पूर्वार्द्धोत्तरार्द्धरूपमस्य खण्डद्वयं मुद्रितं लिखितं च सुलभेनोपलभ्यते हीदानीम् । सूजानामा शाहजहांसम्राजो द्वितीयः पुत्रः पित्रादेशेन बङ्गदेशे तत्रत्यप्रजागणशासनार्थमासीत् । तस्यैव प्रियपण्डितोऽयं बलभद्रस्तेन सह बङ्गदेशं गत इत्यनुमीयते । शाहजहांनिधनसमयश्च खनागपञ्चेन्दु-१५८० शकः प्रसिद्धः । बलभद्रस्य ग्रन्थसमयश्च वेदरसपञ्चभूमितः १५६४ शक इति सर्वं हायनरत्नान्तिमश्लोकाभ्यां

"पृथ्वीपतिमहावीरश्रीमत्साहिसुजान्तिके ।
श्रीराजमहलस्थेन मया ग्रन्थो विनिर्मितः ॥
योगो मासकृतेः समः करहतो योगस्तिथिः स्यात्तिथि-
स्त्रिघ्नी वारमितिस्तदर्धसदृशं भं सर्वयोगे युतः ।
भूवाणाग्निकुभिर्भवेच्छकमितिर्यन्यस्य तां वेत्ति य-
स्तं मन्ये गणितद्वयज्ञकमलप्रोद्बोधने भास्करम् ॥

इत्याभ्यां ज्ञायते । अत्र सर्वं तिथ्यादिकं माससंख्ययैकयैव घटते अन्यासु माससंख्यासु तिथ्यादिकानां मानमसम्भवमुत्पद्यते तेन मास-संख्या=१ । योगः=१ । तिथिः=२ । वारमितिः=६ । भम्=३ । सर्व-योगः=१३ । अयं भूवाणाग्निकुभि१५५१र्युतः=१५६४ जातः शकः ।

ग्रन्थस्यादौ वंशवर्णनं सम्यक् कृतम् ।

तद्यथा ।

गणाधिपं रामगुरोः पदाब्जं दामोदराख्यं पितरं च नत्वा ।
प्राचीनपद्यैर्बलभद्रनामा करोति सद्धायनरत्नसंज्ञम् ॥
भागीरथीतीरविराजमाने श्रीकान्यकुब्जे नगरेऽतिरम्ये ।
अभूद्द्विजाग्र्यो महर्षिवंशे श्रीलालनामा गणकोऽग्र्यधामा ॥
तस्यात्मजाः पञ्च बभूवुरेषां श्रीदेविदासः प्रथमो बभूव ।
व्यक्ते च यः श्रीपतिपद्धतौ च टीकां व्यधाद्विज्ञजनस्य तुष्ट्यै ॥
तस्माल्लघुः वेदविचारदक्षः प्रख्यातकीर्तिर्विजितारिपक्षः ।
श्रीक्षेमकर्णोऽथ ततः कनिष्ठो नारायणो व्याकरणे पटिष्ठः ॥
न्याये यः सुरराजपूजितनिभो वेदान्तिनामग्रणी-
र्मीमांसादिसमस्तशास्त्रकमलप्रोद्बोधने भास्करः ।
श्रीमद्भूपतिवृन्दवन्दितपदो भूदेवमूर्द्धामणिः
श्रीमान्मिश्रचतुर्भुजः समभवत्तस्माल्लघुर्धर्मवित् ॥
तस्माल्लघुः सकलशास्त्रकलापटिष्ठो
दामोदरः समभवत्कृतिनां वरिष्ठः ।
यो भास्करोद्गितपितामहकर्मतुल्यां
वृत्तिं व्यधात् निरुपमां कृतिनां हिताय ॥
दामोदरस्य तनयौ जातौ बलभद्रबलरामौ ।
बलभद्रेण च किञ्चित् प्रकाश्यते ताजिकं गुरोः कृपया ॥

ग्रन्थस्यादौ यवनभाषोक्तमपि ज्योतिषशास्त्रं पठनीयं पठने न दोष इत्यस्य मीमांसा विस्तरतः कृता ग्रन्थकृता । ग्रन्थरचनासमयेऽस्य वयः पञ्चाशद्वर्षसमं कल्प्यते तदा जन्मशको वेदेन्दुपञ्चेन्दु १५१४ समः सिध्यति ।

सोमदैवज्ञः । १५२४

रुद्रभट्टतनूजः पञ्चाङ्गे वर्षराजमन्त्रिधान्येशादिशुभाशुभफलकथनरूपां पञ्चशत ५०० श्लोकैः समुद्ररसबाणेन्दु १५६४ शके कल्पलतामकरोत् ।

इयं कल्पलता पञ्चाङ्गोपयोगिनी ललितपद्यपल्लवैरुपेता प्रायः सर्वत्र लिखिता मुद्रिता चोपलभ्यते । अस्या आदौ कृतयुगादीनां व्यवस्था तत्र "कलियुगमध्ये धर्मः ५ पापं १५ शककर्त्तारो युधिष्ठिरः ३०४४ । विक्रमः १३५ । शालिवाहनः १८००० । विजयाभिनन्दनः १०००० । तन्मध्येऽवतारश्चैकः । त्र्यम्बकेश्वरलिङ्गपूजनम् । मायापुरपीठम् । गौतमीतीर्थम् । तत्र राजानः पृथ्वीभोक्तारः । युधिष्ठिरः । शालिवाहनः । विक्रमः । नागार्जुनः । विजयाभिनन्दनः । कल्किः । एते राजानः । म्लेच्छोत्पत्तिः ॥ तिमिर्लिङ्गशाहो राज्यस्थित्यब्दः । व० २४ मा० ११ दि० २४ ॥ तदुपरि बाबर्लिङ्गशाहो राज्यस्थित्यब्दः । व० २० मा० ८ दि० २४ ॥ हुमाहुजाहुर्लिङ्गो राज्यस्थित्यब्दः । व० ११ मा० ६ दि० २९ ॥ अकबरशाहो राज्यस्थित्यब्दः । व० ५४ मा० ११ दि० २७ ॥ शाहजहांशाहो राज्यस्थित्यब्दः । व० १८ मा० ४ दि० १० ॥ अवरङ्गशाहो राज्यस्थित्यब्दः । व० २५ मा० ८ दि० २४ ॥ चिन्मीशाहो राज्यस्थित्यब्दः । व० २२ मा० ९ दि० ४ ॥ वृद्धनीजामल्लशाहो राज्यस्थित्यब्दः । व० ५० मा० ४ दि० २७ ॥ तदुपरि शूद्रराजानः । रामराजः । व० २० मा० ६ दि० २४ ॥ भोजराजः । राज्यस्थित्यब्दः । व० ४० मा० ९ दि० २७ ॥ दीनानाथराजः । व० ७० मा० ११ दि० २७ ॥ शिवाजीराजः । व० २० मा० ४ दि० २७ ॥ रामराजः । व० ४४ मा० ४ दि० २९ ॥ रामराजः । व० -२० मा० ९ दि० ११ ॥ शंभाजीराजः । व० ५८ मा० ८ दि० १ ॥ बलवन्तसिंहो राजा । व० ३३ मा० १० दि० १ ॥ एते राजानो राज्यमकुर्वन्" इत्यादि सर्वं परस्परमसङ्गतं लिखितमस्ति । एतल्लेखतोऽयं ग्रन्थ आधुनिकस्तत्कर्त्ता समाप्तौ

"वेदरसेन्द्रियभू१५६४मितशाके कार्त्तिकसंज्ञकमासि सितेऽह्नि ।
भाद्रतिथौ भृगुजेऽनलधिष्ण्ये कल्पलता परिपूर्त्तिमुपेता" ॥

इति श्लोकौ वञ्चनया लिखितौ वा केनचिदनभिज्ञेन तद्ग्रन्थमध्ये स राजराज्यकालप्रदर्शको लेखः प्रक्षिप्त इत्यनुमीयते । अन्तिमकल्पनाया विशेषसम्भवोऽस्ति ग्रन्थस्थश्लोकैः सोमभट्टस्य व्याकरणे काव्ये चातिव्युत्पन्नत्वात् तादृशस्य विदुषो मिथ्याकल्पनानौचित्याच्च । युगव्यवस्थानन्तरं मङ्गलरूपेण ।

"मत्स्येन्द्रनाथचरण-स्मरणप्रवीणः श्रीरुद्रभट्टतनयो विनयोपपन्नः ।
सोमाभिधानगणको गणकोरुतुष्ट्यै संवत्सरादिफलकल्पलतां तनोमि" ॥

इत्यनेन लेखेनायं गोरक्षनाथगुरोर्मत्स्येन्द्रनाथस्य मतानुयायीत्यनुमीयते । अथ चेद्ग्रन्थसमाप्तिशकस्तल्लिखित एव समीचीनः कल्प्यते तत्समये ग्रन्थकर्तुश्चत्वारिंशद्वर्षसमं च तदाऽस्य जन्मशको वेदकरपञ्चेन्दु १५२४ समः समायाति ।

मुनीश्वरः । १५२५

सूर्यसिद्धान्तटिप्पणगूढप्रकाशकृतो रङ्गनाथस्य तनयो विश्वरूपाऽपरनामकोऽयं तत्त्वतिथ्यु१५२५न्मिते शके समजनि (रङ्गनाथवर्णनं द्रष्टव्यम्) सूर्यसिद्धान्तोक्तान् भगणादीन् सङ्गृह्य वसुरसपञ्चदश १५६८ शके भाद्रपदशुक्लपञ्चम्यां सोमवासरे पुष्यनक्षत्रे ज्योतिषसिद्धान्तग्रन्थं सिद्धान्तसार्वभौमाख्यमकार्षीत् । अयं सिद्धान्तग्रन्थो यद्यपि काव्यकलाकलापमण्डितो ज्योतिषपण्डितमान्यस्तथापि चापीयक्षेत्रप्रपञ्चरहितः क्षेत्रसजातीयविचारविधुरः सम्प्रति गोलकलाकलापचतुरैरनादृतः । मुनीश्वरेणैतट्टीका च स्वाशयप्रकाशिनी द्विनगपञ्चदश १५७२ शके स्वयं रचिता ।

निसृष्टार्थदूत्यभिधा लीलावतीटीका मरीच्यभिधा सिद्धान्तशिरोमणिटीका पाटीसारश्चेत्येते ग्रन्थाश्च मुनीश्वरकृताः प्रसिद्धा उपलभ्यन्ते । मरीचौ प्राचीनवचनानां बहूनां सङ्ग्रहो वस्तुतो दर्शनार्हः । लीलावतीटीका च सम्प्रति सर्वत्र भारतवर्षेऽन्यटीकातः उत्तमोत्तमेति ज्योतिर्विद्भिर्मता । सिद्धान्तसार्वभौमस्य पञ्चमश्लोकेन

"गूढं स्थूलं स्वसिद्धान्तं मत्वा यस्तच्छिरोमणिम् ।
कृतवान्मनुजव्याजादसौ जयति भास्करः" ॥

इत्यनेनायं भास्करस्यातीव भक्त आसीदिति ज्ञायते । तेनैव* भास्करविरोधिना कमलाकरेण महान् विरोध उत्पन्नोऽस्य । यद्रहस्यटीकरणोपपत्त्यर्थं मुनीश्वरकृताया भङ्ग्याः खण्डनं भङ्गीविभङ्गीनाम्ना कमलाकराज्ञया कमलाकरानुजेन रङ्गनाथाभिधेनाकारि । तत्खण्डनखण्डनं च मुनीश्वरकृतमुपलभ्यते । एतत्खण्डनप्रतिखण्डनानां कतिपयानां सङ्ग्रहः काशिकराजकीयपुस्तकालये वर्त्तते । आसीन्मुनीश्वरः स्वसमयेऽतिप्रख्यातः काव्यकोशव्याकरणाभिज्ञो ज्यौतिषशास्त्रीयगोलतन्त्रविचारेष्वप्रौढ इति तत्कृतिविलोकनेन स्फुटमिति सुधीभिर्भृशं विचिन्त्यम् ।

सिद्धान्तसार्वभौमसमाप्तौ ।

भाद्रे मासे शुक्लपक्षेऽह्नितिथ्यामिन्दोर्वारे पुष्यभे योऽभवत्तम् ।
अष्टाङ्गात्त्मामिते १५६८ शाकयातवर्षेऽकार्षीत् सार्वभौमं मुनीशः ॥

अत्र महाप्रश्नाधिकारे प्रश्नरूपेण शाहजहांनृपतिगृहीतबलखसमयः षट्पञ्चदश १०५६ समः सनकालश्च लिखितः ।

"प्रतीपविषयाशया स नरवाहिनीतीरमा-
सभूमिकरतारिखागमविशङ्क ईज्यद्युतिः ।
पयोनिधिजमाद्विलावलिदिगीशपक्षाहते-
र्बलाद्बलखमग्रहीत् प्रवरशाहजाहां नृपः" ॥

लीलावत्या माधुर्यगुणसम्पन्नाया युवत्या दूतीमन्तरा चतुराणां समागमो हि दुरवगमस्तदर्थं टीकारूपा दूती रचिता मुनीश्वरेण । "लीलावतीचतुरसङ्गविधानहेतोः श्रीमन्मुनीश्वरविदा यतिता सुदूती । तस्यामितः समभवत् खलु सोऽङ्कपाठो यो मन्दबोधपुरुषैरपि सुप्रसन्नः" । इत्यन्तिमाध्यायश्लोकः । एवं प्रत्यध्यायसमाप्तौ श्लोका उपलभ्यन्ते ।

लीलावतीटीकान्ते ।

अयं लीलावत्याः पटुदुरवगाहोऽतिगहनो
मनोभावो भूयांस्तदधिगतयेमां व्यरचयत् ।
मुनीशस्तामेतां कृतिमकृतिदुष्प्राप्यविषमां
निसृष्टार्थां दूतीमिव भजत भावेन चतुराः ॥

* प्रयागे मकरस्नानसमये भास्करमतमण्डनतत्परस्य मुनीश्वरस्य तन्मतविरोधिना हठाद्वाकष्टमानसेन ज्योतिर्वित्सभायां कमलाकरेण विरोधः समुत्पन्न इति चिरात्जनश्रुतिः । (दुर्गाशङ्करपाठकवर्णनं विलोक्यम्) ।

मरीच्यादौ ।

श्रीरङ्गनाथाभिधतातपादाः कृष्णानुजाः श्रीकमलाधिपास्ते ।
त्रिस्कन्धपारङ्गमरङ्गमल्ला बल्लालजा भूमितले जयन्ति ॥

नारायणो गणितशास्त्रकलाकलापः
श्रीसेवितः सकल शास्त्रसरोजभृङ्गः ।
दैवज्ञकृष्णगुरुपादरतो गुरुर्मे
क्ष्मायां जयत्यखिलपण्डितवन्द्यपादः ॥
मुनीश्वरापराख्येन विश्वरूपेण गृष्यते ।
बुद्धिशाखे मरीच्यर्थं तत्सिद्धान्तशिरोमणिः ॥

बुद्धिशाखे शिरोमणिं संगृष्य मुनीश्वरेण मरीचिरित्यादितस्तेनैव मरीचिरिति संज्ञा लब्धा मुनीश्वरकृता शिरोमणिटीकेत्युपरिलिखितान्तिमश्लोकेन स्फुटम् ।

गोलाध्यायमरीच्यन्ते ।

एलचपुरसमदेशे तटे पयोष्ण्याः शुभे दधिग्रामे ॥
ज्योतिर्विद्याविद्भिः सकलैः शिरसा मुदा बुधैर्मान्यः ।
तस्मादभवद्रामः सकलैः सुगुणैर्नितान्तमभिरामः ।
शार्दूलद्विजदेशं मूर्द्धाऽधाद्भूमिपो यदादेशम् ॥
सोऽजनयत्सीतायां त्रिमल्लसंज्ञं सुतं विनीतायाम् ।
येन सदा विनयेन प्रकाशितं नाम भुवि नयेन ॥
बल्लालस्तत्तनयः सदैव यः कविवरेषु दत्तनयः ।
अपहाय स्वग्रामं काश्यामागाद्व्रजन् स विश्रामम् ॥
ज्योतिःशास्त्रवराम्भोजप्रकाशनदिनेश्वरात् ।
प्रासूत पञ्चतनयानयं गणकपुङ्गवः ॥

ज्यायानमीषां खलु रामनामा सदैव कामारिसमर्पितात्मा ।
विभूषयन् धूर्जटिराजधानीमसाविदानीमपि संचकास्ति ॥

तस्यानुजः सकलशास्त्रसरोजभृङ्गो
बीजक्रियाविवृतिकल्पलतानिदानम् ।
श्रीनूरदीनयवनप्रणयैकपात्रं
कृष्णो बभूव जनिमद्गुत्तिदृगपारः ॥

तस्यानुजस्तु गोविन्दगणको यत्सुतोऽकरोत् ।
नारायणः केशवोक्तपद्धत्याष्टिप्पणं सुधीः ॥

गौरीवल्लभपादपङ्कजमिलन्माध्वीरसास्वादन-
स्वच्छान्तःकरणः श्रुतिस्मृतिरतो गोविन्दविज्ञानुजः ।
ग्रन्थे योऽर्ककृतेऽकरोद्विवरणं गूढप्रकाशं महा-
देवस्यागजनिर्गृहस्यकमलः श्रीरङ्गनाथोऽभवत् ॥

तस्यात्मजो गुरुकृपार्जनिताबबोधः
शास्त्रं विभाव्य निखिलं महताऽऽदरेण ।
श्रीभास्करोदितशिरोमणिगूढभाव-
व्याख्यां मुनीश्वरकृती कृतवान् मरीचिम् ॥

शाको भूयुतो नन्दभूहृत् फलस्य निरेकस्य मूलं निरेकं भवेद्गम् ।
तदर्द्धं भवेन्मास इन्दूनितोऽयं तिथिर्दूनिता पक्षवारौ भवेताम् ॥

नक्षत्रवारतिथिपक्षयुतिश्च योगो
विश्वैर्युताखिलयुतेः पदमध्रवेदाः ।
अस्यादिमोऽत्र परिपूर्त्तिमितो मरीचिः
श्रीवासुदेवगणकात्मजनिर्मितोऽयम् ॥

खाङ्गबाणधरणीमितशाके चन्द्रवारसितपक्षशुचौ हि ।
लेखितं गणकदर्शनहेतोरुत्तरार्द्धमिदमात्ममरीचेः ॥

उपान्तिमश्लोकेन विपरीतक्रियया सप्तबाणबाणेन्दुशके १५५७ मरीचिपूर्वार्द्धसमाप्तिसमयोऽन्तिमेन च खाङ्गबाणेन्दु १५६० शक उत्तरार्द्धसमाप्तिसमयश्च सिध्यति । सिद्धान्तशिरोमणेरन्वयादिना पदार्थप्रकाशिन्या मरीच्याख्यटीकया समा नान्या टीका विलोक्यत अत इयमेव सर्वज्योतिर्विद्भिरादृता जागर्त्ति । अस्यां श्लोकसंख्या पञ्चविंशतिसहस्रसंख्यासमा लीलावतीटीकायां ६००० सिद्धान्तसार्वभौमे च ३००० ।

दिवाकरः । १५२८

अस्य नृसिंहपुत्रस्य भरद्वाजकुलोद्भूतस्य स्वपितृव्यशिवदैवज्ञतो लब्धविद्यस्य जन्मशकः वसुकरपञ्चेन्दु १५२८ मितः ।

अयं भारतवर्षेऽतीव प्रथितो ज्यौतिषेऽतीव निष्णातः काव्यकोशव्याकरणन्यायादिशास्त्रेषु कुशलोऽनेकग्रन्थरचयिता चासीत् । अस्या-

नेके शिष्याः कमलाकरादयो ज्योतिषशास्त्रे पटीयांसोऽभवन् । गोदावर्याः सौम्यतटे गोलनामग्रामेऽस्य स्थितिः । नगाम्भोधिशरचन्द्रमिते १५४७ शके नन्देन्दु १९ वर्षसमवयःकालेऽनेन ग्रहाणां भावादिबलसाधनार्थं फलादेशैकसहायिनी जातकमार्गपद्मरूपाऽष्टाधिकाररूपाष्टदलसहिता चतुरधिकैकशतपद्मांशुभिर्जातकपद्धतिः प्रकाशिता । इयं पद्धतिः केशवश्रीपतिदैवज्ञकृतपद्धत्यनुसारिणी-एव ।

तच्चादौ ।

श्रीमच्छिवाख्यं गणितज्ञचक्रचूडामणिं सज्जनवृन्दवन्द्यम् ।
विदुर्विदो यं धिषणेन तुल्यं तं नौमि नित्यं धिषणाप्तिहेतोः ॥
श्रीकेशवश्रीपतिसुन्दरादिप्रणीततन्त्रादधिगत्य सारम् ।
प्रकाश्यते सुज्ञदिवाकरेण पद्मांशुभिर्जातकमार्गपद्मम् ॥

अन्ते च ।

गोदावरीसौम्यतटस्थगोलग्रामे भरद्वाजकुलावतंसः ।
आसीद्द्विधिज्ञः सकलागमज्ञः कृष्णो महेशार्चनतत्परो यः ॥
बभूवतुस्तस्य सुतौ तदाद्यो मीमांसकाद्यो गणको नृसिंहः ।
शिरोमणेर्वार्तिकमुक्तियुक्तं येनाऽमलं भाष्यमकारि सौरम् ॥
विज्ञाततत्त्वज्ञनभोगकक्षो विचारदक्षो विजितारिपक्षः ।
शिवो द्वितीयो गणको वदान्यो नृपालमान्यो जगतो गुरुर्यः ॥
नृसिंहपुत्रेण पितृव्यलब्धप्रबोधलेशेन दिवाकरेण ।
प्रकाशितं जातकमार्गपद्ममध्यायरूपाष्टदलं सुबोधम् ॥

नन्देन्दु १९ वर्षेण मया कृतोऽयं
ग्रन्थो रवेः पादयुगप्रभावात् ।
शाके नगाम्भोधिशरेन्दु १५४७ तुल्ये
प्राचां निबन्धान् परिभाव्य सम्यक् ॥

इयं जातकपद्धतिर्मुद्रिता न । प्रधानगणकानां निकटेऽस्या लिखितपुस्तकं वर्त्तते । काशिकराजकीयपुस्तकालये चातिप्राचीना स्फुटा शुद्धा चैका प्रतिर्वर्त्ततेऽस्याः । अस्या एव पद्मजातकमिति नामान्तरम् ।

एतद्रचितमकरन्दविवरणस्यादौ

प्रज्ञां यतः प्राप्य कृतप्रतिज्ञं स्पर्द्धां विधत्ते प्रसभं प्रति ज्ञम् ।
पक्षोऽपि तं श्रीशिवनामधेयं गुरूपमं स्वीयगुरुं भजेयम् ॥

इदं मुद्रितमप्युपलभ्यते पुस्तकम् ।

अथैतद्रचितया केशवपद्धतिटीकया प्रौढमनोरमाख्यया स्पष्टमव-गम्यतेऽस्य पाण्डित्यं गोले व्याकरणे न्याये काव्यसाहित्ययोश्च । अत्र ग्रहयुद्धशबलानयनस्थले-११श्लोके । अतिव्याप्त्यव्याप्तिविधिना निरूपि-तलक्षणेन न्यायशास्त्रेऽस्य पाटवं स्फुटम् । इयं बहुविशेषवाक्यगर्भा गोल-प्रपञ्चमण्डिताऽस्य सर्वं पाण्डित्यं प्रकटयति । उपलभ्यते चेयं लिखिता मुद्रिता च सर्वत्रैव । नागाम्भोधिशरेन्दु १५४८ मिते शाके विरचिता दिवाकरेणेयम् ।

अस्या आदौ ।

आदित्यमज्ञानघनान्धकारच्छिदं मुदं सन्ततमादधानम् ।
जगत्प्रसूतिस्थितिनाशहेतुं श्रीभास्करं भास्वररूपमीडे ॥
विघ्ननिघ्नमहं वन्दे विघ्नपं विबुधार्चितम् ।
यस्य स्मरणतः साध्यं सिद्धिं प्राप्नोति सत्वरम् ॥

श्रीकेशवार्यवचनानि जयन्ति तानि निर्दूषणानि बहुलार्थसुपूरितानि ।
धन्यानि शिष्यजनबुद्धिविवृद्धिदानि स्वल्पाक्षराणि बुधतोषविधायकानि ॥

अपि स्फुरत्पण्डितमण्डनेन प्रचण्डपाण्डित्यमखण्डि येन ।
ज्ञानाधिराजस्य गुरुं नृसिंहं प्रचण्डचण्डांशुमतिं तमीडे ॥
श्रीमच्छिवाख्यं गणितज्ञचक्रचूडामणिं सज्जनवृन्दवन्द्यम् ।
विदुर्विदो यं धिषणेन तुल्यं तं नौमि नित्यं धिषणाप्तिहेतोः ॥
श्रीकेशवार्यैर्गगनाब्धि ४० वृत्तबद्धोदिता जातकपद्धतिर्या ।
तैरेव तस्या विवृतिः कृतास्ति परं न तत्रास्ति सुयुक्तिवक्ता ॥
संप्रार्थितः शिष्यगणेन युक्तिः कार्यातिवर्येति दिवाकरोऽहम् ।
सवासनां तद्विवृतिं करोमि यतो जनो मे सकलोऽपि रञ्ज्यः ॥
यद्यप्यशक्ता विवृतिर्विधातुं मया जडेनामलकेशवोक्तेः ।
तथापि कुर्वे शिवपादपद्मप्रसादतः प्रौढमनोरमाख्याम् ॥
अस्या अन्ते निजवंशवर्णनमप्यकारि दिवाकरेण तद्यथा ।

गौतम्युत्तरतीरवासिनगरे गोलज्ञविद्वद्युते
गोलग्रामसमाह्वये मुनिभरद्वाजान्वये दैववित् ।
योऽभूत्सुज्ञदिवाकरो बुधवरः श्रीकेशवस्यात्मजा-
द्विघ्नार्यगणेशसंज्ञकगुरोर्लब्धावबोधांशकः ॥

"उपकादिभ्योऽन्यतरस्यामद्वन्द्वे" ॥ 'द्वन्द्वे चाद्वन्द्वे चेति'। कथमद्वन्द्व इत्युच्यमाने द्वन्द्वे चाद्वन्द्वे च भवति, तदाह। 'अद्वन्द्वग्रहणं द्वन्द्वाधिकारनिवृत्त्यर्थमिति'। नात्र शास्त्रीयो ऽधिकारः स्वरितत्वनिबन्धनो विवक्षितः, नहि पूर्वसूत्रे द्वन्द्वशब्द आसक्तस्वरितः, तस्माल्लौकिकोऽधिकारो ऽपेक्षालक्षणः, तदिह द्वन्द्वशब्देन तद्विषया ऽपेक्षाभिधीयते तस्या नञा निषेधो ऽद्वन्द्वे इति। किमुक्तं भवति, द्वन्द्व इति नापेक्ष्यत इति, तदनपेक्षायां द्वन्द्वे चाद्वन्द्वे च भवति। अद्वन्द्व इत्यस्मिन्नसति लौकिको ऽधिकारो द्वन्द्वस्य शङ्क्येत, द्वन्द्वश्चैषामेव परस्परं गृह्यते, तेषां पूर्वेण नित्यं लुग्भवतीति। भाष्ये तु भ्राष्टकिकापिष्ठलय इत्युदाहरणात्तिककितवादिष्वस्य पाठोनार्थ इति निश्चयः ॥

"आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्" ॥ कुण्डिनीशब्दस्य यञि 'भस्याढे तद्धित' इति पुंवद्भावे 'नस्तद्धित' इति लोपे कौण्ड्य इति प्राप्नोति, अस्मादेव निपातनात्पुंवद्भावाभावः। असति च तस्मिन्नीकारस्य यस्येति लोपः, तस्य स्थानिवत्त्वादाभीयत्वेनासिद्धत्वाद्वा टिलोपाभावः। आगस्त्यकौण्डिन्येत्येतयोर्गोत्रप्रत्यययोरिति व्यधिकरणे षष्ठ्यौ, एतयोर्यावयवावित्यर्थः, तावेव स्वरूपेण दर्शयति। 'अणश्च यञश्चेति'। 'मध्योदात्तो हि कुण्डिनीशब्द इति'। कुण्डमस्यास्तीति 'अत इनिठनौ' प्रत्ययस्वरः, ङीबनुदात्तः। ननु मानुवृत्तल्लुग्ग्रहणं, प्रत्ययान्तयोरेवादेशौ स्तामत आह। 'तयोरित्यादि'। यदि हि प्रत्ययान्तयोरेवादेशौ स्यातां 'गोत्रेऽलुगची'ति प्रतिषेधो न स्याद् लुको ह्यसौ निषेधो नादेशस्य, ततश्चादेशे सत्यवृद्धत्वादणेव स्यात्, लुकि तु सति तस्य प्रतिषेधे तत्सन्नियोगशिष्टस्यादेशस्याप्यभावाद्वृद्धलक्षणश्छो भवति। तत्र विशेषो नास्तीति किमर्थं तर्हीदमुक्तम् अणश्च यञश्च बहुषु लुग्भवतीति। एवं मन्यते, यदि कुण्डिनजादेशः समुदायस्य स्याद् अगस्त्यादेशो ऽपि तथा स्याद् अतो ऽवश्यं लुगनुवर्त्यः, अनुवृत्तस्य च कौण्डिन्येनापि संबन्धो विरोधाभावादिति ॥

"सुपो धातुप्रातिपदिकयोः" ॥ अत्र सुप इति सप्तमीबहुवचनं न गृह्यते 'पञ्चम्याः स्तोकादिभ्य' इत्यादिना पञ्चम्यादीनामलुग्विधानात्।

नापि कपः पकारेण प्रत्याहारः, तद्धितानां विधानसमर्थ्यात्, अन्यथा तद्धितान्तस्य प्रातिपदिकत्वात्तदवयवस्य सर्वस्यैव तद्धितस्य लुक् स्यात्, 'द्विगोर्लुगनपत्ये' इत्येतच्चानर्थकं स्यात्, अतः सुशब्दादारभ्य सुपः पकारेण प्रत्याहार इत्याह। 'सुपो विभक्तेरिति'। धातुप्रातिपदिकयोरिति यदि सप्तमी स्याद् धातुप्रातिपदिकयोः परतः सुपो लुक् स्यात् काष्ठैः पचति शोभनैः काष्ठैरिति तस्मात्षष्ठीयमित्याह। 'सुपो विभक्तेर्धातु-संज्ञायाः प्रातिपदिकसंज्ञाया इति'। धातुः संज्ञा यस्यास्तस्या इत्यर्थः। कथं पुनर्विभक्तिर्धातुसंज्ञा प्रातिपदिकसंज्ञा वा भवति तत्राह। 'तदन्तर्गता इति'। एवमपि धातुप्रातिपदिकयोरवयवभूता विभक्तयः स्युर्न तत्संज्ञाः। नैष दोषः। समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते, धातुप्रातिप-दिकयोरवयवस्य सुप इत्यपि व्याख्याने न कश्चिद्दोषः। प्रत्युत सुप इत्यस्य द्विवचनान्तेन संबन्धो न दुरुपपादो भवति तथा तु न व्याख्यातमित्येव॥

"अदिप्रभृतिभ्यः शपः"॥ कथं न विश्वसेदविश्वस्ते विश्वस्तेपि न विश्वसेद् इति, तथा भट्टिकाव्ये आश्वसेयुर्निशाचरा इति, तथा न विश्वसेत्पूर्वविरोधितस्येति। निरङ्कुशाः कवयः। अपर आह, श्वस सहने घटादिः। तत्र 'घटादयः षित' इति सिद्धे षित्करणं ज्ञापकम् अनित्यं गणकार्यमिति, तेनैवमादिप्रयोगोपपत्तिरिति नात्र किंचिदपभाषितमस्ति॥

"यङोचि च"॥ 'अचि प्रत्यये परत इति'। पचाद्यचीत्यर्थः। एत-देव ज्ञापकं सर्वधातुभ्यः पचाद्यच् भवतीति, प्रत्याहारग्रहणं तु न भवति, तथा हि सत्यचीत्येव वक्तव्यमन्याजादेः प्रत्ययस्यासंभवात्। 'न तु छन्द-सीति'। 'हुश्नुवोः सार्वधातुक' इत्यत्र वार्तिकं, हुश्नुग्रहणमनर्थकम-न्यस्याभावात्। याति वातीत्यत्र क्ङितीत्यधिकाराच्च भविष्यति, यातः वातः, अचीत्यनुवर्तते। यान्ति वान्ति, ओरिति। युवन्ति रुवन्ति, अने-काच इति वर्तते। अयुवन्, अरुवन्, अडागमोऽसिद्धः। प्रोर्णुवन्ति, असं-योगपूर्वस्येति वर्तते। यङ्लुङ्निवृत्त्यर्थं तर्हि हुश्नुग्रहणं, योयुवति, रोरुवति। यङ्लुगर्थमिति चेदार्धधातुकत्वात्सिद्धं, छान्दसो यङ्लुक् तत्र 'छन्दस्युभयथे' त्यार्धधातुकत्वादेव न भविष्यति। तदेवं यङ्लुक-

यङ्छान्दसत्वमभ्युपगम्य कुश्नुग्रहणं प्रत्याख्यातं वार्त्तिककारेण, स मन्यते, चकारेणात्र 'बहुलं छन्दसी'ति सर्वमनुवर्त्तिष्यते, तेनाचि प्रत्यये परतः छन्दसि भाषायां यङो लुग् भवतीत्येकं वाक्यं, छन्दसि बहुलमनैमित्तिको लुगिति द्वितीयं, प्रसिद्धश्च तथा छान्दसो यङ्लुगिति, प्रयोगश्च चिरंतनः पद्ये गद्ये च काव्याख्यायिकादौ विकटपदोपन्यासप्रधानैरपि कविभिर्न क्वचो दृश्यते । भाष्यकारस्तु कुश्नुवोरिति वक्ष्यन्ति, एवं तर्हि तज्ज्ञापयति भाषायामपि यङ्लुगिति, तेन चेचिदीति चेच्छिदीति योयवीतीत्यादि सिद्धं भवति । वृत्तिकारस्तु मन्यते यदि ज्ञापकेनापि तावद्भाषायामपि यङ्लुक् प्रयोगो भवति हन्तैवमचैव छन्दो ग्रहणं मानुवृतत् प्रयोगस्तु ज्ञापकाश्रयेणैव यथाभिधानं व्यवस्थास्यत इति । अतो न भाष्यवार्त्तिकविरोधो वृत्तेः शङ्कनीयः ॥

“जुहोत्यादिभ्यः श्लुः” ॥ 'शबनुवर्त्तते न यङिति' । श्लाविति द्विर्वचनविधानात् । यङनुवृत्तौ हि श्लुना तत्र लुप्तेऽपि सन्यङोरिति षष्ठ्याश्रयत्वाद् द्विर्वचनसिद्धेरनर्थकं तत्स्यात् । 'बिभर्त्तीति' । 'भृञामिदि'त्यभ्यासस्येत्वम् । 'नेनेक्तीति' । णिजिर् शौचपोषणयोः । 'निजां त्रयाणां गुणः श्लौ' ॥

“गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु” ॥ 'अभूदिति' । 'भूसुवोस्तिङी'ति गुणप्रतिषेधः । 'लुगनुवर्त्तते न श्लुरिति' । व्याख्यानात् । 'इण्पिबत्योर्ग्रहणमिति' । इणादेशो गा इणित्युक्तः, तत्र गातीत्यादादिकस्यैवो य आदेशस्तदनुकरणो गा तिपि शब्लुका निर्दिष्टः, स्थानिवद्भावात्प्रकृतिवदनुकरणं भवतीति च । तेन गामादाग्रहणेष्वविशेष इति लाक्षणिकस्यापि गारूपस्य यद्यपि ग्रहणं प्राप्तं तथापि गातीति निर्देशादेव तस्य निवृत्तिः । तथा लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति पिबतेरेव ग्रहणम् । 'अगासीदपासीदिति' । कै गै रै शब्दे । पा रक्षणे । 'यमरमनमातां सक्चे'ति सगागमः सिचश्चेट् 'अस्ति सिचोऽपृक्त' इतीट्, 'इट ईटि' । पै ओवै शोषणे इत्यस्य लाक्षणिकं पारूपमिति ग्रहणाभावः । 'अगासातामिति' । कर्मण्यात्मनेपदमाताम् ॥

Digitized by Google

“विभाषा घ्राधेट्शाच्छासः”॥ धेटः सानुबन्धकस्य निर्देश आत्वपरिहारार्थः। धा इत्युच्यमाने प्रतिपदोक्तत्वाद्धाञ एव ग्रहणं स्यात्। ननु सत्यप्यनुबन्धोच्चारणेऽनुबन्धानामनेकान्तत्वादननुबन्धकत्वमनेजन्तत्वमित्युदीचां माङ इतिवदात्वं प्राप्नोति। सत्यम्। अयमेव निर्देशो ज्ञापयति सानुबन्धानुकरणे नावश्यकमात्वमिति। तेन सूत्राद्बहिरपि धेञो धेटो द्वेष इत्यादि प्रयोगोपपत्तिः। ‘अघ्रासातामिति’। कर्मण्यात्मनेपदमाताम्। ‘सुमनसामिति’। स्त्रियः सुमनसः पुष्पमित्यमरसिंहः। अप्सुमनःसमासिकतावर्षाणां बहुत्वं चेति पाणिनीयं सूत्रं, तद्बहुत्वं प्रायिकं मन्यते एका च सिकता तैलदाने समर्थेति भाष्ये प्रयोगात्॥

“तनादिभ्यस्तथासोः”॥ उदाहरणेषु स्वरितेत्त्वादात्मनेपदम्। ‘थासा साहचर्यादिति’। यद्यपि तावदयं तशब्दो दृष्टापचारोऽस्त्यात्मनेपदमस्ति च परस्मैपदम्, अस्ति चैकवचनमस्ति च बहुवचनम्। अयं तु खलु थाःशब्दोऽदृष्टापचार आत्मनेपदमेकवचनं च, तस्यास्य कोऽन्यः सहायो भवितुमर्हत्यन्यदत आत्मनेपदादेकवचनाच्चेति भावः। ‘आत्मनेपदस्येति’। उपलक्षणमेतत्। एकवचनस्येत्यपि द्रष्टव्यम्॥

“मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः”॥ च्लेरेवात्र ग्रहणमिष्यते न लिङादीनां, तदर्थं सिच इत्यनुवर्तयन्ति सिचो यो लिः स्थानिभूतस्तस्येति व्याचक्षते। सिचि प्रकृते लिग्रहणम् ‘आदिः सिचोऽन्यतरस्या’मित्यादिसिच्कार्यं मा भूदिति। पूर्वत्र हि मा हि दातामिति सिच्स्वरो भवत्येव। ह्वरेति विहितगुणस्यानुकरणम्, अकारश्चागन्तुक उच्चारणार्थः। ‘अक्षन्निति’। ‘लुङ्सनोर्घस्लृ,’ गमहनेत्युपधालोपः, शासिवसीति षत्वम्। ‘प्रणडिति’। व्रश्चादिना षत्वे जश्त्वचर्त्वे। प्रणगिति पाठे ‘नशेर्वे’ति कुत्वम्। ‘आधगिति’। आ पूर्वो आङ्पूर्वः। ‘अज्ञतेति’। जनी प्रादुर्भावे, अनुदात्तेत्। बहुवचनस्य ‘आत्मनेपदेष्वनतः’ इत्यदादेशः, पूर्ववदुपधालोपश्चुत्वम्। ‘ब्राह्मणे प्रयोगोऽयमिति’। मन्त्रव्यतिरिक्तो वेदभागो ब्राह्मणम्। यथाह भगवाञ्जैमिनिः “तच्चोदकेषु मन्त्राख्ये”ति मन्त्रलक्षणान्तरम् “शेषे ब्राह्मणशब्दः” इति। बह्वृचानां हरिश्चन्द्रब्राह्मणे

हरिश्चन्द्रं प्रति वरुणस्यैतद्वाक्यम् अजनि वा अस्य दन्ता इति । कथं पुनर्मन्त्रग्रहणे ब्राह्मणग्रहणं भवति तत्राह । 'मन्त्रपर्यन्त्विति' । मन्त्रस्य छन्दोरूपत्वात्तेन तदुपलक्ष्यते । बाहुल्येन तु मन्त्रे दर्शनान्मन्त्रग्रहणं कृतम् ॥

"आमः" ॥ 'आम उत्तरस्य लेर्लुग्भवतीति' । यद्यपि सिचा लिर्विशेषितस्तथापीह लेरित्येवानुवर्ततइति भावः । विदाङ्कुर्वन्त्वित्यत्र लुङ्लोटोर्निपातनाल्लुग्भवति । तरबादीनां चामन्तादनुत्पत्तिरेव, तस्यानभिव्यक्तपदार्थत्वात् । अयं च लुग्नप्राप्तेषु तिबादिषु विधीयमानत्वाल्लादेशानामपवादः । तेनामन्तस्यातिङन्तत्वाच्चक्षुःकामं याजयाञ्चकारेत्यत्र 'तिङ्ङतिङः' इति तस्य चानिघातस्तस्माच्च निघातः सिद्धो भवति । कथमामन्तस्य पदत्वं, सुबन्तत्वात् । लकारस्य कृत्त्वात्प्रातिपदिकत्वं, तिङ्भाविनो हि लकारस्यातिङिति प्रतिषेधो न चायन्तिङ्भावी । सुपः श्रवणं कस्मान्न भवति, आमः स्वरादिषु पाठादव्ययत्वात्, तद्धितेनामा साहचर्येपि तद्धित एव न गृह्यते ऽपि त्वव्याप्तेरतद्धितोपि । नञा तु समासप्रसङ्गः, न कारयां न हारयां 'नञ्' सुबन्तेन समस्यतइति समासः प्राप्नोति, नैष दोषः । अभिव्यक्तपदार्थेन हि याजयाञ्चकारेति नञः सामर्थ्यं न त्वनभिव्यक्तपदार्थेनामन्तमात्रेण । आमन्तेभ्यो णलः प्रतिषेधः अघाम तताम । वृद्धौ कृतायां स्थानिवद्भावेन णलो लिग्रहणेन ग्रहणे लुक् प्राप्नोति । अर्थवद्ग्रहणात्सिद्धम् । अर्थवत आमन्तस्य ग्रहणं न चैषोऽर्थवान् । एवमप्यम गत्यादिषु, तिपो णल्, आम अत्र प्राप्नोति, अर्थवत्त्वात् । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमित्यत्र न भविष्यति ॥

"अव्ययादाप्सुपः" ॥ 'तत्र शालायामिति' । शालाशब्दसन्निधौ स्त्रीत्वयुक्तद्रव्यगतकारकशक्त्यभिधानात्तस्यामितिवत्तत्रेत्यत्रापि यदि स्त्रीप्रत्ययः स्यात्तदावेव स्त्रीत्वं प्रतीयेतेति व्यामोहनिवृत्त्यर्थं टापो लुग्वक्तव्यो यथा षट्सञ्ज्ञकेभ्यः प्रतिषेध इति भावः । वार्त्तिककारस्त्वाह । 'अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावादि'ति । 'कृत्वा हृत्वेति' । यदा 'बहुषु बहुवचन'मित्यादेः स्वादिविधिवाक्येनैकवाक्यता तदा निःसङ्ख्येभ्यो निष्कारकेभ्यश्चाव्ययेभ्योऽस्मादेव लुग्विधानाल्लिङ्गात्स्वादयो भवन्ति, भिन्नवाक्यता-

Digitized by Google

यामपि नियमपक्षे तुल्यजातीयस्य नियमेन व्यावृत्तिः बहुष्वेव बहुवचनं न द्वयोर्नैकस्मिन्, द्वयोरेव द्विवचनं नैकस्मिन्न बहुषु, एकस्मिन्नेवैकवचनं न द्वयोर्न बहुषु इत्यव्ययेभ्यः स्वादीनां सम्भवः। विकल्पपक्षे तु यत्र सङ्ख्या सम्भवति तत्रैव सा वाच्यत्वेन विधीयते, अव्ययेभ्यस्तु निःसङ्ख्येभ्यः सामान्यविहिताः स्वादयो विधास्यन्त एवेति सर्वथाव्ययेभ्यः सुबुत्पत्तिरेषितव्या प्रत्ययलक्षणेन पदसञ्ज्ञा यथा स्यादिति। सुब्विति च सप्तमीबहुवचनस्य पकारेण प्रत्याहारो न कपः, आपः पृथगुपादानात् ॥

"नाव्ययीभावादतोऽम्त्वपञ्चम्याः" ॥ किमर्थः प्रतिषेधः पूर्वसूत्रेण लुङ् मा भूदिति। अमत्र विधीयते स नाप्राप्ते लुक्यारभ्यमाणस्तस्य बाधको भविष्यति, यत्र तर्हि प्रतिषिध्यते पञ्चम्यास्तत्र लुक् प्राप्नोति। प्रतिषेधे तु सति तत्सामर्थ्याद् द्वे वाक्ये भवतः। नाव्ययीभावादित्येकम्, अमत्वपञ्चम्या इति द्वितीयम्। अत्र चात इत्यपेक्ष्यते। तत्रापञ्चम्या इत्यनेनानन्तरस्य विधिर्वा भवति प्रतिषेधो वेति पञ्चम्या आदेशः प्रतिषिध्यते न पूर्ववाक्यविहितः प्रतिषेधः। इममेवार्थं तुशब्देन द्योतयति अविशेषेण प्रतिषेधः अम्त्वपञ्चम्या इति, तदेतदुक्तम्। 'तस्मिन्प्रतिषिद्धे पञ्चम्याः श्रवणमेव भवतीति'। वाक्यभेदस्तु वृत्तावेव स्पष्टः। 'उपकुम्भादिति'। समीपभूतात्कुम्भादित्यर्थः, कुम्भस्य समीपादित्यपरे। उन्मत्तगङ्गादिरन्यपदार्थप्रधानः सत्त्ववाच्यव्ययीभावः क्रियासम्बन्धसद्भावादपादानत्वात्पञ्चम्या मुख्यमुदाहरणम् ॥

"तृतीयासप्तम्योर्बहुलम्" ॥ 'सुमद्रमिति'। मद्राणां समृद्धिरित्यव्ययीभावः, ततः सप्तमी, तस्या नित्यमम्भावः। 'एकविंशतिभारद्वाजमिति'। एकविंशतिर्भारद्वाजा वंश्या इति 'सङ्ख्या वंश्येने'ति समासः। तत्र वर्तिपदार्थानां स्वार्थोपसर्जनार्थान्तराभिधायित्वाद्भारद्वाजशब्द एकत्वविशिष्टार्थान्तरे सङ्क्रान्त इत्यञो लुगभावः। नेति वयम्। गर्गाणां कुलं गर्गकुलमित्यादावपि प्रसङ्गात्। तस्माद्बाह्यकारप्रयोगादत्र लुगभावः ॥

"लुटः प्रथमस्य डारौरसः" ॥ 'परस्मैपदस्यात्मनेपदस्य चेति'। यद्येवं परस्मैपदे त्रयः, प्रथमपुरुषसंज्ञकास्तिबादयः, आत्मने पदेष्वपि त्रय-

स्त्रादय इति षट् स्थानिनस्त्रय आदेशा इति वैषम्यात्संख्यातानुदेशो न प्राप्नोति । मा भूत्संख्यातानुदेशः, आन्तर्यतो व्यवस्था भविष्यति, अर्थत आन्तर्यम्, एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थः । कथं पुनर्डादीनामेकार्थ्याध्यवसायः । यावता यस्तिपः स्थाने स एकार्थो यस्तसः स्थाने स द्व्यर्थो यो झेः स्थाने स बह्वर्थो, नेत्याह, प्रयोगदर्शनादप्यैकार्थ्यादिकमध्यवसातुं शक्यम् । अथ वादेशा अपि षडेव निर्दिश्यन्ते । कथम्, एकशेषनिर्देशात् । डारौरसश्च डारौरसश्चेति कृतद्वन्द्वानामेकशेषः । यदि तु डा च डा च डा । रौ च रौ च रौ । रस् च रस् च रस् । डा च रौ च रस् च डारौरस इति कृतैकशेषाणां द्वन्द्वः स्यादनिष्टः संख्यातानुदेशः प्राप्नोति । तिप्तसोर्डा । झितयो रौ । आतांझयो रसिति । 'कर्तेति' । लुट्, तिप्, तस्य डा इत्ययं सर्वादेशः । नानुबन्धकृतमनेकाल्त्वम् । अस्तु तर्ह्यन्त्यस्यैव, तिपस्तकारेण सह टिलोपो भवति । ननु तकारान्तमङ्गं न भवति । डित्करणसामर्थ्यादनङ्गस्यापि भविष्यति, यथा सिद्धान्तेऽभस्यापि । अथ वानुपूर्व्यात्सिद्धम् । कथम् । अन्त्यस्याप्ययं स्थाने भवन्प्रत्ययः स्यात्, असत्यां प्रत्ययसंज्ञायां डकारस्येत्संज्ञा नास्ति, असत्यां चेत्संज्ञायामनेकाल्, यदानेकाल् तदा सर्वादेशः, यदा सर्वादेशस्तदा प्रत्ययः, यदा प्रत्ययस्तदेत्संज्ञा, यदेत्संज्ञा तदा लोपस्तदैकाल्, न चेदानीं प्रत्यावृत्यान्त्यादेशो भवितुमर्हति, तदेतदानुपूर्व्यात्सिद्धम् । 'कर्तारौ कर्तार इति' । 'रि चे'ति तासस्त्योर्लोपः । 'अध्येतेति' । इङ् अध्ययने । अथात्र डारौरस्सु कृतेषु टेरेत्वं कस्मान्न भवति, पूर्वमेवास्मिन्योगे स्थानिषु प्रवृत्तत्वात् । इह हि तशब्दस्य टेरेत्वं च प्राप्नोति डादेशश्च । द्वयोरपि शब्दान्तरप्राप्तेरनित्यत्वात्परत्वाट्टेरेत्वे कृते पुनः प्रसङ्गविज्ञानाड्डादेशः, एवं रौरसोरपि द्रष्टव्यम् । अथ वा पूर्वमेव डारौरसो भवन्तु, थासः सेवचनं ज्ञापकं ये तिङादेशास्तेषां टेरेत्वं न भवतीति । अन्यथा थासः स इत्येव वाच्यं स्यात् । 'कर्तासीति' । तासस्त्योरिति सलोपः ॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां द्वितीयस्याध्यायस्य तुरीयश्चरणः ॥ * समाप्तश्चायमध्यायः * ॥

Digitized by Google

श्रीगणेशाय नमः ॥

काशिकाव्याख्या पदमञ्जरी ।

"प्रत्ययः" ॥ इह यदि सर्वानेव संज्ञिनः स्वरूपेण निर्दिश्य संज्ञा विधीयेत सन् प्रत्ययः क्यच् प्रत्ययः क्यङ् प्रत्यय इति ततो गौरवं स्यात् । अथ सप् प्रत्यय इति सनः सशब्दादारभ्य कपः पकारेण प्रत्याहाराश्रयेणात्र वा प्रदेशान्तरे वा संज्ञा विधीयेत तदानेकस्य पकारस्य सम्भवात्सन्देहः स्यात् । तथाहि । प्रत्यासत्तिन्यायआश्रीयमाणे सिपः पकारेण स्याद् व्याप्तौ तु तप् तनप् तनथनाश्चेति तनपः, । स्यादेतत्, व्याप्तिरेवाश्रयिष्यते, अथ च तनपः पकारेण प्रत्याहारो न भविष्यति ज्ञापकात्, यदय 'सिच एकाचोऽम्प्रत्ययवच्च' त्यमः प्रत्ययवद्भावं शास्ति, अन्यथा पक्षेऽपि प्रत्ययसंज्ञाव्यापारादमोऽपि स्वत एव प्रत्ययत्वात्तद्भावो नातिदेश्यः स्यादिति । तथ, तत्र इममिति द्विरावर्त्तते ततश्चाप्रत्ययप्रतिबद्ध 'मौतोऽम्शसो' रित्यादिविशिष्टं कार्यं यथा स्यादिति सोऽतिदेशः स्यात् । नन्वेवमपि प्रत्ययग्रहणमनर्थकम् अम्वदिति वक्तव्यम्, अतः प्रत्ययग्रहणात्प्रत्ययप्रयुक्तमपि कार्यमतिदेश्यमिति प्रतीयते तज्ज्ञापकमुक्तार्थस्य भविष्यति, एवमप्यम आगमत्वात्सुगादिवदप्राप्तेः प्रत्ययत्वातिदेशः स्यात्, अस्तु वा ज्ञापकमेवमपि कुत एतद्व्याप्तिराश्रीयते न पुनः प्रत्यासत्तिरिति । किञ्च यथान्यासाद्गौरवं स्थितमेव सवित्यस्याधिकस्य करणात्, अतो गौरवातिप्रसङ्गपरिहारायाधिकारेणेयं संज्ञा विधीयते तदाह । 'प्रत्ययशब्दः संज्ञात्वेनाधिक्रियतइति' । कारक इति तद्विशेषणमधिक्रियते स्वादिषु कप्पर्यन्तेषु प्रकृतिरियमधिक्रियतइतिवत्प्रत्ययशब्दः संज्ञाधिक्रियतइति वक्तव्ये संज्ञात्वेनेति वचनमनर्थभेदात् । तथा ह्ययमत्र कर्मकरत्वेनाधिकृतः, अयमत्र कर्मकरोऽधिकृतः, नार्थभेदोऽस्ति किन्तु कर्मकरोऽधिकृत इत्युक्ते यः कर्मकरः सोऽधिकृतो रूपान्तरेणेत्यपि गम्यते, कर्मकरत्वेनेति पुनरुच्यमाने तस्यैवाकारस्याधिकृतत्वं गम्यते, अधिक्रियते, विनियुज्यते सूत्रकारेण, 'यास्सनादीननुक्रमिष्यामः', 'अनुक्रमेण विधास्यामः, सूत्रकारायमाणस्य वृत्तिका-

रस्यैतद्वचनं, यदि तर्ह्यधिकारेण संज्ञा क्रियते प्रतियोगमुपस्थानात्प्रकृत्युपपदोपाधि[1]विकारागमानामपि प्राप्नोति 'हरतेर्दृतिनाथयोः पशौ' हरतेरिति प्रकृतिः दृतिनाथयोरित्युपपदं पशावित्युपाधिः, 'हनस्त च' त्यादिविकारः, 'त्रपुजतुनोः षुगि' त्यागमः, सत्यां च संज्ञायां प्रकृतिप्रत्यययोः पर्यायेण परस्परापेक्षं परत्वं स्यात् शब्दान्तरापेक्षं वा प्रकृतेः प्रकृत्यपेक्षं तु प्रत्ययस्य, उपपदस्यापि परत्वा'दुपसर्जनं पूर्व'मित्येतद्राजपुरुषादिषु सावकाशं बाधित्वा परत्वं स्यात्, यत्र समासाभावादुपसर्जनं पूर्वमित्यस्याप्रसक्तिस्तत्रोपपदस्य परत्वं स्यात्, एवं च सति भोक्तुं व्रजतीत्येवमेव नित्यं स्यान्न तु व्रजति भोक्तुमिति, उपाधेरप्यर्थस्य परत्वासम्भवेपि तद्वाचिनः प्रयोगानियमे प्राप्ते परश्चेति नियमः स्यात्, आद्युदात्तत्वं च यथायथं स्वरान्तरं बाधित्वा स्यात्, अङ्गसंज्ञा तु विधानप्रतिबद्धा न चेह प्रकृत्यादयः कुतश्चिद्विधीयन्त इति न सा प्रकृत्यादिषु परतः पूर्वस्य प्राप्नोति। ननु च प्रतियोगमुपस्थानेपि वाक्यभेदप्रसङ्गात्प्रकृत्यादीनां संज्ञा न भविष्यति। तथाहि। हरतेर्दृतिनाथयोः कर्मणोरुपपदयोः पशौ कर्त्तरीन् प्रत्ययो भवतीत्येकं वाक्यं, ते च हरत्यादयः प्रत्ययसंज्ञका इति द्वितीयं, सम्भवत्येकवाक्यत्वे वाक्यभेदस्तु नेष्यते। नैतदस्ति[2]। सनादीनामप्यसतां संज्ञानुपपत्तेर्वाक्यभेदेनैव संज्ञा विधेया ततश्च सनादीनामेकेन वाक्येन विधिरपरेण सज्ञाविधिः, एवं प्रकृत्यादीनामपि प्राप्नोति तत्राह। 'प्रकृत्युपपदेत्यादि'। अयमभिप्रायः। प्रकृत्यादीनां सनाद्युत्पत्तौ निमित्तत्वेनोपादानात्पारार्थ्यात्स्वसंस्कारं प्रति प्रयोजकत्वाभावो यथा यः पीठे स देवदत्त इति पीठस्य देवदत्तसंज्ञा न भवति। ननु सनाद्युत्पत्तिवाक्ये प्रथमे तेषां पारार्थ्यं[3] न द्वितीये संज्ञासंज्ञिसम्बन्धप्रतिपादनपरे वाक्ये, ततश्च संज्ञासंबन्धप्रतिपत्तौ सत्यां स्वार्थतापि सम्भवत्येव। तत्र, द्वितीयमपि वाक्यं संज्ञाविधानपरमेवंरूपमेव गुप्तिज्किद्भ्यः सन् प्रत्यय इति, ततश्च तत्रापि

(१) विकारागमानामिति नास्ति २ पुस्तके ।

(२) नैतदेवमिति पा० २ पु० ।

(३) तेषामाप्राधान्यमिति पा० २ पु० ।

Digitized by Google

भूतविभक्त्यानिर्दिष्टानामिसंस्त्वात्पारार्थ्यं स्थितमेव। किञ्च योग्यविभक्त्य-भावाच्च न प्रकृत्यादीनां संज्ञा, प्रथमान्तस्य षष्ठ्यन्तस्य वा संज्ञासंबन्धः 'वृद्धिरादैच्' स्वं रूपं शब्दस्येति, न च द्वितीये वाक्ये योग्यविभक्त्यध्या-रोपा संज्ञा भवितुमर्हति, योग्यविभक्तिनिर्दिष्टेषु सनादिषु चरितार्थत्वात्, उपपदसंज्ञा तु सप्तमीनिर्दिष्टस्य विधीयमाना युक्तं यद्वाक्यभेदेन योग्य-विभक्त्यध्याहारेण च भवतीति। किं च प्रधानेतरसंनिधौ प्रधाने कार्य-संप्रत्ययो भवति यस्य चापूर्वविधानं तत्प्रधानम् अतः प्रथमवाक्ये तात्र-त्सनादीनामेव प्राधान्यं द्वितीयेपि संज्ञा संज्ञिनमपेक्षमाणा यत्पूर्ववाक्ये प्रधानतयावगतं तदेवापेक्षते न तु पारतन्त्र्यादप्रधानमिति सिद्धमिष्टम्। एवमपि विकारागमानां प्राप्नोति, नैष दोषः, महती संज्ञा क्रियते ऽन्वर्थ-संज्ञा यथा विज्ञायेत प्रतियन्त्यनेनार्थमिति प्रत्यय इति, न च विकाराग-माभ्यामर्थं प्रतियन्ति। यद्येवमिवेः क इत्यादीनां समासान्तानां च न स्यात्, नह्येषामन्वयव्यतिरेकाभ्यां कश्चिदर्थो ऽवधार्यते तदभावेपि केवलाया एव प्रकृतेस्तदर्थावगमात्। यदप्युच्यते ऽनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति स्वार्थ एवैषामर्थ इति तदपि कल्पनामात्रम्, अन्वयव्यतिरेकगम्यत्वाद-र्थवत्त्वस्य। इतरेतराश्रयत्वं च भवति, सति प्रत्ययत्वे स्वार्थे विधानं स्वार्थे विधानाच्चार्थवत्त्वे सति प्रत्ययसंज्ञेति, एवं तर्हि प्रयोजनाभावान्न भवि-ष्यति। तथाहि। तेषां स्थानषष्ठ्या संबन्धस्यावयवसंबन्धस्य च प्रतिपाद-नात्परत्वं तावन्न सम्भवति, आगमानां चानुदात्तत्वविधानादाद्युदात्तत्व-स्यासम्भवः, सति तु प्रयोजने आगमस्यापि इनमः शकारस्येत्संज्ञार्थं भव-त्येव संज्ञा। अथ 'हनश्च वधः' 'नाभि नभञ्च' 'विराग विरङ्गञ्च' इत्यादे-वधादीनामनेकाला[1]मादेशानां संज्ञा कस्मान्न भवति, सम्भवति हि तेषु परत्वं प्रयोजनं, यद्यपि स्थानिन आदेशे न निवर्तितत्वान्न तदपेक्षं परत्वं श-ब्दान्तरापेक्षया स्यादेव परत्वं यथोक्तं प्राक् गुणादिषु अर्थवत्त्वं च तेषा-मस्ति विधेयत्वात्प्राधान्यं च योग्या च विभक्तिः, अतः सर्वथा वधादिषु

(१) अनेकालामिति नास्ति २ पु०।

सञ्ज्ञानिवृत्तये यत्नः कर्त्तव्यः । 'कर्त्तव्यं करणीयमिति' । अत्र प्रत्ययसञ्ज्ञायां धातोरङ्गसञ्ज्ञा, अङ्गस्य गुणः । अनन्तरमपि सनादिकमतिक्रम्य व्यवहितोऽपि तव्यदादिरुदाहृतः, तत्राद्युदात्तादेरपि प्रत्ययकार्यस्य सम्भवात् सनादौ तु नित्स्वरेण धातुस्वरेण च तद्बाध्यते ॥

"परश्च" ॥ 'अयमप्यधिकार इति' । न केवलं प्रत्यय इत्ययमेवेत्यपिशब्दार्थः । 'योगेयोगउपतिष्ठतइति' । अनेन परिभाषातोऽधिकारस्य भेदको धर्मो दर्शितः, परिभाषा हि न प्रतियोगमुपतिष्ठते किन्त्वेकदेशस्थितैव सर्वशास्त्रे व्याप्रियते । 'परश्च स भवतीत्यादि' । अनेनेहस्थाया एवास्याः परिभाषायाः प्रत्ययविधौ सर्वत्र व्यापारो दर्शितः, लिङ्गवती चेयं परिभाषा प्रत्ययसञ्ज्ञा च लिङ्गम् । 'धातोर्वेति' । क्रियावाचिन्याः प्रकृतेस्तिङन्तादेरप्युपलक्षणमेतत् । 'प्रातिपदिकाद्वेति' । अक्रियावाचिन्याः प्रकृतेरिदमुपलक्षणं, तेन ङ्याप्पोरपि ग्रहणम् । 'तैत्तिरीयमिति' । तित्तिरिणा प्रोक्तमधीते, 'तित्तिरिवरतन्तुखण्डिकोखाच्छण्' 'छन्दोब्राह्मणानि च तद्विषयाणि' 'तदधीते तद्वेद' 'प्रोक्ताल्लुक्' ब्राह्मणकुलस्याभिधेयत्वान्नपुंसकत्वम् । 'चकारः पुनरस्यैव समुच्चयार्थ इति' । अन्यस्य समुच्चेतव्यस्याभावात् । 'तेने(१)ति' । अन्यथा बहुलवचनस्य सर्वोपाधिव्यभिचारार्थत्वादुणादिषु परत्वस्यापि विकल्पः सम्भाव्येत, इह 'गुप्तिज्किद्भ्यः सन्' इत्यादौ दिग्योगलक्षणा पञ्चमी, तत्र पूर्वः पर इति वा दिक्शब्दस्याश्रवणादनियमेनाध्याहारे सत्यनियमेन प्रयोगप्रसङ्गे नियमार्थमिदं पर एव प्रत्ययो न पूर्व इति, 'गापोष्टक्' इत्यादौ षष्ठीनिर्देशेऽप्यानन्तर्यसंबन्धे षष्ठी विज्ञानादानन्तर्यस्य च पूर्वत्वेऽपि भावादनियमप्रसङ्ग एवेति तत्रापि नियमार्थमेव । नैतदस्ति प्रयोजनं, 'विभाषा सुपो बहुच् पुरस्तात्तु' इत्येतन्नियमार्थं भविष्यति, बहुजेव पुरस्ताद्भवति नान्यः प्रत्यय इति, ततश्च बहुचि पूर्वत्वस्य नियतत्वादन्यः प्रत्ययः पर एव भविष्यति, षष्ठीनिर्देशेषु मध्यशब्दाध्याहारेण मध्येऽपि प्रसङ्ग इति चेत्, 'अव्ययसर्वनाम्नामकच् प्राक् टे'रिति नियमादकजेव प्रकृतिमध्ये भवति नान्य इति, नैतदेवं,

(१) तेनेत्यादि इति पा० ३ पु० ।

यदि तावदेवं नियमः बहुजेव पुरस्तादकजेव मध्यइति ततो बहुजकचो-
र्नियमो न स्यात्, अथ बहुच् पुरस्तादेव अकजमध्य एवेति ततो देशस्यानि-
यतत्वात्तत्र प्रत्ययान्तरं स्यादेवेति सर्वथानिष्टप्रसङ्गः । किञ्च अकजेव प्राक्
टेरित्येवं नियमे प्राक् टेः प्रत्ययान्तरं मा भूत् मध्यान्तरे तु स्यादेव मध्य-
विशेषाश्रयत्वान्नियमस्य । न च 'तस्मादित्युत्तरस्य' त्यनया परिभाषयात्र
परत्वं सिध्यति, यत्र हि प्रागेव सतः कस्य चित् किञ्चिद्विधीयते यथा
पदात्परयोरपादादौ वर्त्तमानयोर्युष्मदस्मदोर्वांनावौ भवत इति स तस्या
विषयः, इह तु प्रागसन्त एव सनादयो विधीयन्ते न तेषां सम्बन्धि
किञ्चित्, प्रत्ययसञ्ज्ञैव तेषां कार्यमिति चेव,[1] एवमपि प्रागुत्पत्तिरनिवा-
रिता स्यात्, तथाहि । असतां सनादीनां सञ्ज्ञाविधिरनुपपन्न इत्येकेन
वाक्येन सनादीनां विधिर्द्वितीयेन च तेषामेव संज्ञाविधिरित्यङ्गीकर-
णीयं, ततश्च द्वितीये वाक्ये सतः कार्यमिति कृत्वा परिभाषोपस्थानेन
प्राक् प्रयुक्तानां सञ्ज्ञैव केवलं न स्यादुत्पत्तिस्त्वनियतदेशैव स्यात्, प्रथम-
वाक्ये परिभाषानुपस्थानात् । स्यादेतत्, । 'गुप्तिज्किद्भ्यः सन्' इत्यादावेकैव
पञ्चमी सा चैकमेव दिक्शब्दमध्याहरेत् तत्र पूर्वः परो वेति संशये
पूर्वशब्दाध्याहारे द्वितीयस्य वाक्यस्य स्वरसभङ्गः स्यात्, गुपादिभ्यः परः
सन् प्रत्ययसञ्ज्ञो भवतीति हि तस्य स्वरसतः प्राप्तोर्थः स च पूर्ववाक्ये
पूर्वशब्दाध्याहारे सति भंगः स्यात्, अतस्तत्परिरक्षणाय परशब्द एवाध्याह-
रिष्यते, भवतु चोत्पत्तिरनियतदेशा पश्चात्तु सत एव परस्य यत्कृत्यप्रत्यय-
सञ्ज्ञादिशास्त्रकार्यं तचान्यदेशस्य यदृशस्य च शास्त्रीयं कार्यं तदृशोन्य-
देशं निवर्त्तयिष्यति विशेषशास्त्रान्वितत्वेन तस्यैव साधुत्वादिति, अस्त्वे-
वमथ येषु प्रत्ययसञ्ज्ञैव न भवति 'शमेः खः' शङ्खः 'कणेष्ठः' कण्ठ इत्या-
दिषु तेषु कथं परत्वं द्वितीयवाक्यव्यापाराभावात्, भवतो वा कथं भवा-
नपि हि यः प्रत्ययः स पर इति प्रत्ययपूर्वकं परत्वं परिभाषते, सत्यं,
परिभाषापक्षे न स्यात्परत्वम् अधिकारपक्षे तु प्रत्ययत्वपूर्वकं परत्वं न
भवति किं तु परत्वविशिष्टस्यैवोत्पन्नस्य पश्चात्प्रत्ययसञ्ज्ञा, इह तु बहुल-

(१) चेदित्येव पा॰ ३ पु॰

वचनात्प्रत्ययत्वाभावेपि परत्वमविरुद्धम्, एवमपि नार्थ एतेन बहुलवच-नादेव परत्वमेवात्र व्यवस्थास्यते, एवं तर्हि प्रयोगनियमार्थमिदं पर एव प्रत्ययो न केवल इति, अन्यथा प्रत्ययार्थमात्रविवक्षायां केवलोपि प्रत्ययः प्रयुज्येत यथा किमस्य द्वयसं किमस्य मात्रमिति, यथा वा प्रकर्षविवक्षायां तरतमभावः तारतम्यमिति, ननु सर्वत्र प्रकृतिविशेषं निर्दिश्यैव प्रत्ययो विधीयते तत्र पूर्वोक्तया नीत्या[1] परत्वविशिष्टस्यैव विधानमिति नास्ति केवलस्य प्रयोगः, एवमपि प्रकृत्यर्थमात्रविवक्षायां केवलायाः प्रकृतेः प्रयोगः स्यादेव यथा पच् वृक्षेति, यत्र पुनरुभयं विवक्षितं प्रकृत्यर्थः प्रत्ययार्थश्च न तत्र केवलायाः प्रकृतेः प्रयोगप्रसङ्गः, न केवला प्रकृतिः प्रत्ययार्थमभि-धातुं समर्थेति, लक्षणया समर्थेति चेत्, नो,खल्वारभ्यमाणमप्येतल्लक्ष-णया प्रयोगं निवारयितुमर्हति, अतः केवलप्रकृत्यर्थविवक्षायां केवला प्रकृ-तिर्मा प्रयोजीति सूत्रारम्भः, चशब्दश्चावधारणे, प्रत्ययः परो भवत्येव न तु कदा चि न्न भवतीति वचनव्यक्तिः, आ पदत्वनिष्पत्तेश्चायं नियमः, निष्पन्ने तु पदे तावदेव प्रयुज्यते, प्रत्याय्यार्थान्तरविवक्षायां तु तस्मादपि प्रत्यया-न्तरं भवति[2] ॥

"आद्युदात्तश्च" ॥ इहास्वरकस्याच उच्चारणासम्भवात्सर्व एव स्वरविधिर्नियमार्थः, तत्र 'चित' एवान्त उदात्तः, रित्येव मध्य उदात्तः, तिदेव स्वरितः, सुप्पितावेवानुदात्तौ, दूरात्सम्बुद्धावेवैकश्रुत्यमिति, स्वरा-न्तराणामन्यत्र नियमात्पारिशेष्यादाद्युदात्त एव प्रत्ययो भविष्यति नास्वरको नाप्यन्यस्वरकस्तत्राह । 'अनियतस्वरप्रत्ययप्रसङ्ग इति' । अनि-यतः स्वरो यस्य सोनियतस्वरः, स चासौ प्रत्ययश्चानियतस्वरप्रत्ययः तस्य प्रसङ्गे प्रत्ययोऽनियतस्वरो मा भूदित्येवमर्थमित्यर्थः । अनियतस्वरप्रसङ्ग इति पाठे त्वनियतस्य स्वरस्य प्रसङ्ग इत्यर्थः । अयमभिप्रायः । आद्युदात्तत्व-मपि 'ञ्नित्यादिर्नित्य' मित्यादौ नियतत्वात्र स्याद् अन्यत्रानियमः स्यादेव यत्रायं नियमो नास्ति । किञ्च त्वदुक्ते नियमे चिदादीनामनियमः स्याद्

(१) रीत्येति पा० २ । ३ । पुस्तकयोः ।
(२) भवतीति नास्ति २ पुस्तके ।

अतश्चितोन्त एव तित्स्वरित एवेत्यादिकं तत्र तत्र नियमस्वरूपमाम्ना-
यीयं ततश्च प्रत्ययस्यानियतस्वरत्वमेव स्यात् । किञ्च रित्येवोपोत्तममु-
दात्तमित्यपि नियमे ऽन्यत्रोपोत्तममुदात्तं मा भूद् मध्यान्तरं तु स्यादेव
मध्यविशेषाश्रयत्वान्नियमस्य, तस्माद्ये एकाचः प्रत्ययास्तेष्वनियतस्वरप्र-
सङ्गे वचनमिदमुदात्तार्थं ये पुनरनेकाचः प्रत्ययास्तेषु देशस्याप्यनियमः प्रा-
प्नोति कदा चिदादेः कदा चिन्मध्यस्य कदा चिदन्त्यस्येति तेषु वचनमिद-
मुदात्तार्थं तत्राप्याद्युदात्तार्थमिति । किमर्थं पुनः प्रत्ययसंज्ञासन्नियोगेनायं
स्वर उच्यते, न ‘ञ्नित्यादिर्नित्यं’ प्रत्ययस्य च लसार्वधातुकमनुदात्तं सुप्पि-
तौ चेति स्वरप्रकरण एवोच्येत । एवं हि प्रकरणमभिन्नं भवति, किञ्च द्विरा-
द्युदात्तग्रहणं द्विश्चानुदात्तग्रहणं न कर्त्तव्यं भवति । स्यादेतत् । तत्र क्रिय-
माणे प्रत्ययग्रहणपरिभाषया तदन्तस्य स्वरः प्राप्नोति, इह तु क्रियमाणे
नायं दोषो भवेद् उत्पन्नो हि प्रत्ययस्तदाश्रयाणां तदन्तविध्यादीनां निमित्तं
भवति न तूत्पद्यमानः, न ह्युत्पद्यमानो घट उदकाहरणादीनां निमित्त-
मवकल्पते ततश्चाद्युदात्तश्चेत्यस्य प्रतियोगमुपस्थाने सति उत्पद्यमान
एव तव्यदादिराद्युदात्तो भवति, एवं तिबादिरनुदात्त इति दोषाभावः,
अतः प्रत्ययसंज्ञासन्नियोगेन स्वरो विधीयत इति । तत्र, ज्ञापकात्सिद्धं,
यदयं ञ्नित्यादिरुदात्तो भवतीत्याह, तज् ज्ञापयति प्रत्ययस्य चेत्यत्र न
तदन्तविधिर्भवतीत्यनुदात्तत्वमपि तदन्तस्य न भविष्यति, धातोरन्त
उदात्तो भवतीत्यादेः प्रकृतिस्वरस्य विधानसामर्थ्यात् । यत्र ह्यनुदात्तः
प्रत्ययो याति वृक्षाभ्यामित्यादौ तत्र प्रकृतिस्वरः श्रूयते यातो यान्ति वृक्ष-
त्वमित्यादौ सतिशिष्टेन प्रत्ययाद्युदात्तत्वेन बाध्यते, यदि च प्रत्यया-
न्तस्यानुदात्तत्वं स्याद् निर्विषयं धातुप्रातिपदिकान्तोदात्तत्वं[1] स्यात् । इदं
तर्हि प्रयोजनं लवितव्यमित्यादौ प्रत्ययोत्पत्तिकाल एवाद्युदात्तत्वे कृते
पश्चाद्भवन्निडनुदात्तो यथा स्यात्, अन्यथा लूतव्य इति स्थिते आद्युदात्तत्वं
शब्दान्तरप्राप्त्या ऽनित्यम् इट् तु स्वरभिन्नस्य प्राप्नोति उभयोरनित्ययोः
परत्वादिटि कृते तस्य प्रत्ययग्रहणेन ग्रहणे सति इट एवाद्युदात्तत्वं स्यात् ।

(१) कयोरन्तोदात्तत्वमिति ग॰ २ पुस्तके ।

एतदपि ज्ञापकात्सिद्धं, यदयं 'यासुट् परस्मैपदेषूदात्तो ङिच्च' त्याह तज्ज्ञापयति आगमा अनुदात्ता इति, अन्यथा चिनुयातामित्यादौ यासुटः प्रत्ययादित्वात्सिद्धमुदात्तत्वमित्यनर्थकं तत्स्यात्, ननु पिदर्थमेतत्स्यात्, अन्यथा चिनुयादित्यादौ पित्त्वात् यासुडनुदात्तः स्यात्, यद्येतावत्प्रयोजनं स्याद् यासुट् परस्मैपदेषु भवति अपिच्च लिङ् भवतीति पित्त्वमेव प्रतिषेधेत् । अवश्यं चैतज्ज्ञापकमाश्रयणीयम् अन्यथा प्रत्ययसञ्ज्ञासंनियोगेनाद्युदात्तत्वविधावपि लविषीयेत्यादौ लावस्थायामनच्कत्वादसति स्वरे विशेषविहितत्वात्परत्वाच्च सीयुटि कृते पश्चाल्लादेशे प्रत्ययाद्युदात्तत्वमित्यानुपूर्व्या सीयुट एव स्यात्, ज्ञापकाश्रयणे तु सीयुडनुदात्तः इटोदित्यकार उदात्तो भवति, कथं भवति, यावता सीयुटि कृते ऽकारस्य विच्छिन्नमादित्वं, नैष दोषः । यासुट उदात्तवचनं ज्ञापकं प्रत्ययाद्युदात्तत्वे कर्तव्ये आगमा अविद्यमानवद्भवन्तीति, अन्यथा चिनुयातामित्यादौ यासुटः प्रत्ययादित्वात्सिद्धमुदात्तत्वमित्यनर्थकं तत्स्यात् । किञ्च लवितव्यमित्यादौ पूर्वमाद्युदात्तत्वे सत्यपि पश्चाद्भवन्निट् किमित्यनुदात्तो भवति, शेषनिघातेन, नायं शेषनिघातस्य विषयः, स्वरविधिशेषत्वात्तस्य, यस्मिन्पदे यस्यामवस्थायां यस्याच उदात्तः स्वरितो वा विधीयते तस्मिन्पदे तस्यामवस्थायां संनिहितमजन्तरं निहन्यतइत्यर्थः, न चायं प्रकारोऽत्र सम्भवति । इह तर्हि स्रुघ्ने भवा स्रौघ्नी प्रत्ययसंनियोगेनाद्युदात्तत्वे सति ङीप उदात्तनिवृत्तिस्वरः सिद्धो भवति, अन्यथा स्रौघ्न ई इति स्थिते प्रत्ययस्य चेत्याद्युदात्तत्वं बाधित्वा परत्वाद्यस्येति लोपे कृते उदात्तनिवृत्त्यभावान्न स्यात्, न वा बहिरङ्गलक्षणत्वात् । लोपो हि ङीप उत्पत्तिमपेक्षते स्वरस्तु निरपेक्षः, अवश्यं चात्रान्तरङ्गत्व[1]मेवाश्रयणीयम् अन्यथा कंसेन क्रीता 'कंसाट्टिठन्' टित इति ङीप् कंसठईइति स्थिते ञ्नित्यादिर्नित्याद्युदात्तत्वं बाधित्वा परत्वाद्यस्येति लोपः स्यात् ततश्च नित्स्वरे लोपेन बाधिते प्रत्ययसञ्ज्ञासंनियोगेन विधीयमानमाद्युदात्तत्वमकारस्य स्थितमिति तस्य लोपे ङीप उदात्तनिवृत्तिस्वरः स्यात् । ननु च ठवश्च-

(१) अतश्चान्तरङ्गत्वमिति पा॰ २ पु॰ ।

Digitized by Google

स्करणात्पूर्वमिकादेशस्ततः प्रत्ययाद्युदात्तत्वमिति नास्त्युदात्तलोपः, इह तर्हि उत्से जाता ‘उत्सादिभ्योऽञ्’ ङीप्, उत्सअईइति स्थिते ञित्स्वरं बाधित्वा परत्वाद्यस्येति लोपे पूर्वोक्तया नीत्या ङीप उदात्तनिवृत्तिस्वरः स्यात् । नैष दोषः, ञिनत्स्वरो हि प्रत्ययस्वरस्यापवादः, न चापवादविषय उत्सर्गोभिनिविशते तत्र तावदत्र प्रत्ययाद्युदात्तत्वं भवति अपवादं ञित्स्वरं प्रतीक्ष्यतइति कुत उदात्तलोपः, इह तर्हि अत्रेरपत्यम् ‘इतश्चानिञ’ इति ढक्, आयन्नादिषूपदेशिवचनं[१] स्वरसिद्ध्यर्थमिति प्रत्ययस्वरात्पूर्वमेयादेशः, ङीप्, आत्रेयईइतिस्थिते तद्धितस्य कित इति स्वरं बाधित्वा परत्वाद्यस्येति लोपे कृते उदात्तनिवृत्तिस्वर ईकारस्य न प्राप्नोति तस्मादन्तरङ्गत्वमेवाश्रयणीयम्, एवं च सोप्नीत्यत्रापि अन्तरङ्गत्वादेव सिद्धमिष्टमिति नार्थ एतदर्थेन प्रत्ययसञ्ज्ञासन्नियोगेनाद्युदात्तवचनेन, इदं तर्हि प्रयोजनं गोपायति धूपायति उत्पत्तिसन्नियोगेनाद्युदात्तत्वे पश्चात् ‘सनाद्यन्ता धातव’ इति धातुसञ्ज्ञायां धातोरित्यन्तोदात्तत्वं भवति, यदि तु ञ्नित्यादिर्नित्यं प्रत्ययस्य चेत्युच्येत परत्वाद्धातुस्वरं प्रत्ययस्वरो बाधेत । स्यादेतत् । अनुदात्तस्य तर्ह्यत्र प्रदेशे करणे किं प्रयोजनं, स्यादेतत् । कार्यशब्दाट्टापि स्वरितत्वात्प्रागेकादेशे कृते तस्य पूर्वान्तवत्त्वाद्भावात्तित्स्वरितश्च प्राप्नोति, परं प्रत्यादिवद्भावात्पित्स्वरश्च, परत्वात्स्वरितो भवति । यदि तु लसार्वधातुकमनुदात्तं सुप्पितौ चेत्युच्येत परत्वादनुदात्तत्वं स्यादिति । तच्च । अत्र हि टाबुत्पत्तेरपि प्रागेव स्वरितो भवति सत्यपि वा टापि स्वरितैकादेशयोरुभयोरनित्ययोः परत्वात्स्वरितत्वे कृते आन्तर्यतः स्वरितानुदात्तयोरेकादेशः स्वरितो भविष्यति । इदं तर्हि आम्बष्ठ्या यङश्चाप्येकादेशे कृते पित्स्वरश्च प्राप्नोति चित्स्वरश्च परत्वाच्चित्स्वरो भवति अन्यत्र क्रियमाणे पित्स्वरः स्यात्, अत्रापि चापश्चित्करणसामर्थ्यादेव चित्स्वरो भविष्यति, सामान्यग्रहणाविघातार्थं हि चकारे टाप्प्रकरण एव यङश्चापं विदधीत, एवं तर्हि तदेव तस्मिन्प्रयोजनं तदन्तविधिर्माभूदिति । यदुक्तं प्रकृतिस्वरस्य विधानसामर्थ्यादिति, तत्र आस्ते श्रेत-

(१) उपदेशिवद्वचनमिति पा॰ २ पु॰ ।

मू० रूपकविन्यस्तानामेव ग्रहणं, दर्शयति च तदेव "एष सर्वेषु भूतेषु गूढोऽत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" "यच्छेद्वाङ्मनसी प्राज्ञस्त-द्यच्छेज्ज्ञानआत्मनि । ज्ञानमात्मनि महति नियच्छेत्त-द्यच्छेच्छान्तआत्मनी"ति अजितबाह्याभ्यान्तरकरणैरस्य परमपुरुषस्य दुर्दर्शत्वमभिधाय रथादिरूपितानामिन्द्रिया-णां वशीकरणप्रकारोऽयमुच्यते यच्छेद्वाङ्मनसी इति वाच मनसि नियच्छेत्=वाक्पूर्वकाणि कर्म्मेन्द्रियाणि ज्ञाने-न्द्रियाणि च मनसि नियच्छेदित्यर्थः, वाक्-शब्दे द्विती-यायाः "सुपां सुलुगिति" लुक् ।

टी० अश्वाकूठाद्विष्णुमित्र इति अघृष्णुसेवी पुरुषो मूढः मूढावमूढं आदरणीय इत्यादौ रूपकविन्यस्तानामेव ग्रहणमित्येतद् भाष्यमेतदुक्त-म्भवतीत्यनेनान्वितम्, इति-शब्दाप्रयोगोऽतिविप्रकर्षात् दर्शयति चेति सूत्रखण्डोपादानं तदेव-वशीकार्यत्वे परत्वमेव एष इत्यादि श्रुतिः न प्रका-शत इत्युक्ते केषामित्यपेक्षायां "यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सह । तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः । यस्त्वविज्ञानवान् भव-त्यमनस्कस्सदाऽशुचिः । न स तत्पदमाप्नोति संसारञ्चाधिगच्छती"ति, प्राकरणिकवाक्योपजीवनेन न प्रकाशत इत्यस्यार्थमाह "अजितबाह्ये"ति, वाक्छब्दस्सर्वेन्द्रियोपलक्षणार्थ इत्याह "वाक्पूर्वकाणी"ति, । नन्वेवमय-थाक्षरमिव व्याख्यातं न ह्यत्र वाक्छब्दो द्वितीयान्तो मनश्शब्दश्च सप्त-म्यन्तः श्रूयत इत्यत्राह "वाक्छब्द"इति, । ननु वाक्छब्दात् परस्या द्वितीयायास्सुपां सुलुगि"त्यनुशासनेन स्वादेशाश्रयणेन द्वितीयान्तत्वं किं न स्यात् न स्वादेशेऽपि "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल"इति, सूत्रेण वाक्छब्दस्य हलन्ततया सुलोपस्य प्राप्तत्वात् स्वादेशाङ्गीकारेऽपि

Digitized by Google

लुकि पर्यवसानं स्यात्, तत्र द्वितीयास्थाने स्वादेशमाश्रित्य लोपकल्पनादपि वरं द्वितीयाया एव लुगाश्रयणमिति सप्तम्येकवचनान्तस्य मनश्शब्दस्य दीर्घान्तत्वङ्कथमित्यत्राह—

सू० मनसीति सप्तम्याश्छान्दसो दीर्घः "यच्छेज् ज्ञान आत्मनि" तन्मनो बुद्धौ नियच्छेत् ज्ञान—शब्देनाऽत्र पूर्वोक्ता बुद्धिरभिधीयते ज्ञान आत्मनीति व्यधिकरणसप्तमी

टी० "मनसीइति सप्तम्याश्छान्दसो दीर्घ" इति, "ईदूतौ च सप्तम्यर्थे" इति प्रकृतिवद्भावस्मरणनिबन्धनो मनसी इति निर्देशः। नन्वियाडियाजीकाराणामुपसंख्यान" मित्युपसंख्यानवशादीकारान्तत्वसम्भवे कथं छान्दसत्वाश्रयणमिति चेत् उपसंख्यानेन निर्वाहासम्भवादिति ब्रूमः, न हि वाङ्मनसी इत्यत्र वाक् च मनश्चेत्यर्थस्सम्भवति, अचतुरविचतुरेत्यादिस्मरणेनाजन्ततया वाङ्मनसे इति प्राप्तत्वात् । अथ तत्राऽपि छान्दसत्वबलेन समासान्तो नाऽऽद्रियते तथा सति यथोक्तनिर्वाहे कः प्रद्वेषः, न च निर्वाहद्वयतुल्यता पूर्वोक्तस्य प्रकरणानुगुण्यादेकवचनोपपत्तेश्च यच्छेदित्युक्तस्य नियमनस्य सप्तम्यपेक्षा प्रकरणसिद्धा, तद् यच्छेज् ज्ञान आत्मनि ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनीत हि श्रूयते वाक् च मनश्चेत्यर्थोऽभिमतश्चेत्तदिति पुनः परामर्शश्च न घटते ते इति द्विवचनान्ततया हि निर्देष्टव्यम् अत उक्तनिर्वाह एवोपपन्नः, तद्यच्छेद् ज्ञान आत्मनीति वाक्यम्मनसोऽहङ्कारे नियमनपरं केचिद् व्याचक्षते तदनुपपन्नं मन्वान आह "तन्मनो बुद्धौ नियच्छेदि"ति, अहङ्कारपरत्वमस्वरसं बुद्धिपरत्वन्तु स्वरसमित्यभिप्रायेणाह "ज्ञान—शब्देने"ति, पूर्वोक्ता बुद्धिरनात्मात्मविषयहेयोपादेयपताऽध्यवसायः ज्ञानसामान्यवाचिशब्दस्य ज्ञानविशेषवाचित्वं मुख्यमिति भावः। आत्म—शब्दसमानाधिकरणज्ञान—शब्दस्य बुद्धिपरत्वमयुक्तमित्यत्राह "ज्ञान आत्मनी"ति, आत्म—शब्दस्य स्वतश्चेतनैकान्तत्वादनन्तरवाक्यस्यात्मशब्दस्यास्य चैकरूपार्थत्वे स्वारस्याच्च सामानाधिकरण्यमात्रस्वारस्यमुपेक्ष्यमिति भावः । वैयधिकरण्यफलितमाह—

सू० आत्मनि वर्त्तमाने ज्ञाने नियच्छेदित्यर्थः "ज्ञानमात्मनि महति नियच्छेत्" बुद्धिं कर्त्तरि महत्यात्मनि नियच्छेत् तद्यच्छेच्छान्त आत्मनि तं कर्त्तारं परस्मिन् ब्रह्मणि सर्वान्तर्य्यामिणि नियच्छेत्

टी० "आत्मनि वर्त्तमान"इति, सप्तम्यर्थस्य स्फुटीकरणाय वर्त्तमान-पदमध्याहृतं, ज्ञान-शब्दस्याहङ्कारपरत्वाश्रयणं किं शब्दस्वारस्या? वृत्तार्थ-वशात्? न प्रथमः, दत्तोत्तरत्वात्, नाऽपि द्वितीयः अर्थसामर्थ्यादर्शनात् मनोमहतोर्मध्यगतत्वम् अर्थसामर्थ्यमिति चेत् यदि शब्दतः प्रत्यभिज्ञाना-भावेऽपि ज्ञानशब्दोमनोमहतोर्मध्यगतत्वरूपार्थसामर्थ्यादहङ्कारपरः र्ताहे तुल्यन्यायत्वान्मनसस्तु परा बुद्धिरित्यत्रापि बुद्धि-शब्दस्याहङ्कारपरत्वं स्यात्, तदप्यस्त्विति न वाच्यं स्ववचनविरोधात्। अथ बुद्धि-शब्देनाहङ्कारं ब्रूयुः तथाऽपि तन्त्रसिद्धस्याहङ्कारस्य प्रत्यभिज्ञा नोपपद्यते बुद्धि-शब्देन व्यवहाराभावात्, महच्च न तन्त्रसिद्धमिह प्रत्यभिज्ञायते आत्म-शब्देन सामानाधिकरण्यादिति ह्यन्तिमसूत्रव्याख्याने तेरुक्तम् । अथोच्येत तत्र यद्यपि मनो महतोर्मध्यगतो बुद्धि-शब्दस्तथाऽपि नाहङ्कारपरः मह-च्छब्दस्यात्म-शब्दोपपदपीडितत्वेन महत्तत्त्वाभिधायकत्वाभावादिति तर्ह्यत्रापि सप्तम्यन्तमहच्छब्दस्याप्यात्म-शब्दोपपदपीडितत्वेन महत्त-त्वोपस्थापकत्वाभावान्मनोमहतोर्मध्यगततत्वरूपमर्थसामर्थ्यं न विद्यते, यद्यत्रोपपदं न पीडकन्तर्हि तत्राऽपि पीडनासामर्थ्यात् "मनसस्तु परा बुद्धिरित्यप्यहङ्कार उक्तः स्यात्, ततश्चाधिकरणप्रयासवैयर्थ्यमेव स्यात् तन्त्रप्रक्रियास्थिरत्वसिद्धेरित्यलमनेन । ज्ञानमात्मनीत्यस्यार्थमाह "बुद्धि-मि"ति,वाचोमनसि नियमनम्मनोऽननुगुणप्रवृत्तिवैमुख्यापादनं मनसो बुद्धौ नियमनमध्यवसायानुगुणप्रवृत्तताऽऽपादनं बुद्धिरर्थेषु हेयताध्यवसायरूपा तस्या बुद्धेरात्मनि नियमनं नाम स एवोपादेयतया साक्षात्कार्य इत्येतदर्थ-विषयत्वापादनं शान्ते-स्वतः ऊर्मिषट्कप्रतिभटे शान्तआत्मनि महत आ-त्मनो जीवस्य नियमनं नाम तच्छेषताप्रतिपत्तिः सैव परस्यापि वशीकर-

Digitized by Google

सम्भवति न तदिति निर्देष्टव्यम् आत्म-शब्दस्य पुँल्लिङ्गत्वात्तच्छब्दस्य चात्मपरामर्शित्वादित्यत्राह–

सू० व्यत्ययेन तदिति नपुंसकलिङ्गता, एवंभूतेन रथिना वैष्णवं पदं गन्तव्यमित्यर्थः, अव्यक्त-शब्देन कथं व्यक्तस्य शरीरस्याऽभिधानं तत्राह–

सू० सूक्ष्मन्तु तदर्हत्वात् ॥ २ ॥

भूतसूक्ष्ममव्याकृतं ह्यवस्थाविशेषमापन्नं शरीरम्भवति तदव्याकृतमिह शरीरावस्थमव्यक्त-शब्देनोच्यते तदर्हत्वात् तस्याव्याकृतस्याचिद्वस्तुन एव विकारापन्नस्य रथवत्

टी० "व्यत्ययेन तदि"ति, नपुंसकलिङ्गतेति अत्र तदिति व्याख्येयं पदं "सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च । व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन" इति शाब्दैरुक्तलिङ्गव्यत्ययेन तदिति नपुंसकलिङ्गतेत्यर्थः । नन्वस्मिन्मन्त्रे रूपकल्पितानां वशीकरणप्रकार उच्यत इत्युक्तं, तदयुक्तं विषयाणां शरीरस्य चात्र नियमनानुक्तेरिति चेत् न तन्नियमनस्यार्थसिद्धत्वात् विषयाणां नियमनं हि नाम तदसन्निधापनं शरीरस्य नियमनं नाम सात्त्विकाहारेण परिशोधनं, न हि दूरतोऽनुज्झितविषयस्य दुष्टाहारसेवामलिनमनसः इन्द्रियादिनियमनं सम्भवति, अतोऽर्थसिद्धस्येह कण्ठोक्त्यभावः तन्निमित्तमिदं विषयसन्निधिपरिवर्जनं सात्त्विकाहारसेवनञ्च योगाद्युत्पादनकाले सम्पाद्यं तदानीं वाक्चक्षुरादिकर्मज्ञानेन्द्रियाणां नात्यन्तव्यापारनिषेधः, अत्यन्तनिषेधस्तु योगकाल एव वक्तव्यः, अतो योगकाल एव कर्तव्यस्य[1] नियमनस्यास्मिन् मन्त्रे विधानात् इन्द्रियेभ्य इत्यस्मिन्मन्त्रेऽपि वशीकार्यत्वे परत्वं विवक्षितमिति तन्त्रसिद्धकार्यकारणतत्त्वप्रत्यभिज्ञानाभावात् रूपकल्पितेषु परिशिष्टं शरीरमव्यक्तशब्देनोच्यत इति स्थितम् । उत्तरसूत्रशङ्कामाह "अव्यक्ते"ति,

१ कर्तव्य इति पा० ।

Digitized by Google

पारिशेष्याच्छरीराव्यक्तशब्दयोरैकार्थ्येऽवश्यंभाविनि सति उपक्रमाधिकरण-न्यायादुपक्रमस्थशरीर-शब्दानुगुणमव्यक्तशब्दे नेये तत्राऽव्यक्तशब्दस्य वृत्तिः कथमित्यपेक्षायामाहेत्यभिप्रायः, सू॰ सूक्ष्मं तु तदर्हत्वात् द्रव्येष्ववस्थासम्बन्धात् कार्ये कारणशब्दोपचार इत्याह "भूतसूक्ष्ममि"ति, कारणभूताव्यक्ते कार्यवाचिशरीर-शब्दोपचारः किं न स्यादित्यत्राह "तदर्हत्वादि"ति, व्याख्येयस्यैवास्तच्छब्दस्तस्येति व्यस्य निर्दिष्टः, सूक्ष्मत्वं स्वशब्देनोपस्थापितं स्थूलावस्थं शरीरमव्यक्तशब्दविषयतया बुद्धिस्थम्, अतस्तथाविधाचिद्वस्तुपरामर्श इति भावः । अवस्थाद्वयानुगतवस्तुलक्षणा-निमित्तमाकारमाह "अचिद्वस्तुन"इति, ज्ञानसङ्कोचविकासरूपविकारापत्तिश्चिद्वस्तुनोऽप्यस्ति तद्व्यावृत्त्यर्थमचिद्वस्तुन एव विकारापत्त्येत्युक्तम्, अर्हत्वञ्च कार्यापेक्षं तद्विशेषं प्रकरणसिद्धमभिप्रेत्याह—

भा० पुरुषार्थसाधनप्रवृत्त्यर्हत्वात्, यदि भूतसूक्ष्ममव्याकृतमभ्युपगम्यते कापिलतन्त्रासिद्धोपादाने कः प्रद्वेषः तथाऽपि हि भूतकारणमेवाव्यक्तमित्युच्यते तत्राह—

सू० तदधीनत्वादर्थवत् ॥ ३ ॥

परमकारणभूतपरमपुरुषाधीनत्वात्प्रयोजनवद् भूतसूक्ष्मम् एतदुक्तम्भवति न हि वयमव्यक्तं तत्परिणामविशेषांश्च स्वरूपेण नाभ्युपगच्छामोऽपि तु परमपुरुषशरीरतया तदात्मकत्वविरहेण तदात्मकत्वेनैव हि प्रकृत्यादयस्तत्प्रयोजनं साधयन्ति

टी० "पुरुषार्थे"ति, औपचारिकत्वाविशेषेऽपि पुरुषार्थप्रवृत्त्यनर्हताद्रूपार्थविरोधात् तत एवाव्यक्तस्य वशीकार्य्यत्वायोगाच्च न कारणे कार्योपचाराच्छरीर-शब्दो भूतसूक्ष्मपरत्वेन व्याख्यात इत्यर्थः । यादवप्रकाशीयास्तु सूक्ष्मं शरीरमिह गृह्यते तस्याव्यक्तशब्दार्हत्वात् पूर्वत्राऽपि तदेव रथत्वेन

Digitized by Google

रूपितं, लोकान्तरप्राप्तेरपि विवक्षितत्वादिति व्याचक्षते तदयुक्तम्, उपक्रमस्थशरीरशब्दस्य स्वरसतः स्थूलशरीरप्रतिपत्तिहेतुत्वात् यच्छेद्वाङ्मनसी प्राज्ञइत्यादिना पुरुषार्थसाधनप्रवृत्तिविशेषप्रतिपादनेन पुरुषार्थसाधनप्रवृत्त्यर्हत्वविवक्षामूलं रथत्वेन रूपणमित्युपगमाच्च, पुरुषार्थसाधनप्रवृत्त्यर्हत्वं हि स्थूलशरीरस्य लोकान्तरप्राप्तिः फलानुभवार्थेति तत्साधनस्य सूक्ष्मदेहस्य नोपायानुष्ठानार्हता, अतोऽव्यक्तशब्दमात्रस्वारस्यादपि उपक्रमस्थशरीरशब्दस्वारस्यादुपायदशायामुपयोगप्रतीतिस्वारस्याच्च यथोक्त एव सूत्रार्थ इति तदभिप्रायेणाह "रथवत्पुरुषार्थसाधनप्रवृत्त्यर्हत्वा"दिति, उत्तरसूत्रशङ्कामाह "यदी"ति, भूतकारणमेवेति त्वयाऽपि यदभ्युपेतं भूतकारणत्वेन तदेवेति भावः। सू० तदधीनत्वादर्थवत्, न हि प्रयोजनवत्त्वाप्रयोजनवत्त्वे चोदिते प्रधानाङ्गीकारः प्रधानवाददूषणाञ्च व्याहतमिति ह्युक्तन्तत् कथम्परिहृतं भवतीत्यत्राह "एतदुक्तमि"ति, तदात्मकत्वविरहेणेति, नाभ्युपगच्छाम इत्यन्वयः। तदधीन-शब्दस्य प्रवृत्तिमात्रे तादधीन्यपरत्वशङ्काव्यावृत्त्यर्थम्परमपुरुषशरीरतया तदात्मकत्वेनेत्युक्तन्तेन प्रवृत्तौ पराधीनत्वेऽपि सत्तास्थित्योः कुलालानपेक्षदण्डचक्रादिव्यावृत्तिः स्वातन्त्र्येण किं नाभ्युपगम्यत इत्यपेक्षायाम् अर्थस्थितिमाह "तदात्मकत्वेनैव ही"ति, हि-शब्दः प्रमाणप्रसिद्धिद्योतकः स्वप्रयोजनं-स्वकार्यं, प्रकृतेः कार्यं हि महानेव महदादीनामपि तत्तत्कार्यमेव प्रयोजनं पुरुषस्य भोगापवर्गरूपं वा। उक्तमर्थमुपपादयति-

सू० अन्यथा स्वरूपस्थितिप्रवृत्तिभेदास्तेषां न स्युः, तथाऽनभ्युपगमादेव हि तन्त्रसिद्धप्रक्रियानिरसनमिति, श्रुतिस्मृत्येतिहासपुराणेषु ... हि जगदुत्पत्तिप्रलयवादेषु परमपुरुषमहिमवादेषु च प्रकृतिविकृतिपुरुषास्तदात्मकास्सङ्कीर्त्यन्ते, यथा पृथिव्यप्सु प्रलीयते इत्यारभ्य तन्मात्राणि भूतादौ लीयन्ते भूतादिर्महति लीयते महानव्यक्ते लीयते अव्यक्तमक्षरे लीयते,

टी० "अन्यथे"ति, अन्यथा—तदात्मकत्वविरहे, स्वरूपस्थितिप्रवृत्तिभेदास्तेषां न स्युरिति "न तदस्ति विना यत्स्यात्। मयि सर्वमिदं प्रोतं, मत्तः सर्वं प्रवर्त्तत इत्यादिभिः स्वरूपस्थितिप्रवृत्तितादधीन्यसिद्धिः, स्वरूपं व्यवहारार्हत्वम्मानसम्बन्धार्हत्वं्वा, तस्य कालान्तरावच्छिन्नाकारविरहःस्थितिः प्रवृत्तिः कार्योत्पत्त्यनुगुणव्यापारः, स्वरूपस्थितौ न स्यातान्ततश्च प्रवृत्त्यभावः कैमुत्यन्यायसिद्धः यथा शरीरस्यात्मविश्लेष इत्यर्थः, सूत्रेऽर्थवच्छब्दस्तदुपयुक्तार्थतादधीन्यस्याऽपि प्रदर्शनार्थः। अर्थोपयोगित्वात्प्रवृत्तेः प्रवृत्त्युपयोगित्वाच्च स्वरूपस्थित्योरित्यभिप्रायः। पूर्वोक्तव्याघातस्य परिहृतत्वन्दर्शयति "तथाऽनभ्युपगमादेवे"ति, अब्रह्मात्मकप्रधानवाद एव दूष्यः ब्रह्मात्मकं प्रधानं स्वीकृतमिति न व्याहतिरित्यभिप्रायेण प्रक्रियानिरसनमित्युक्तं, हि—शब्दाभिप्रेतन्तदात्मकत्वे प्रमाणन्दर्शयति "श्रुतिस्मृत्योर्ही"ति, प्रलयश्रुतिः "पृथिव्यप्सु प्रलीयत इत्यादिः, मद्धिमप्रवादश्रुतिर्यस्य पृथिवी शरीरमित्यादिः, प्रलयपरत्वं श्रुतेरपि तमः परे देवे एकीभवतीत्येतदन्तत्वात्तदात्मकत्वसिद्धिः तस्मात्तमः संजायत इत्युत्पत्तिवाक्यं द्रष्टव्यम्, अप्ययपूर्वकत्वात्सृष्टेः प्रलयश्रुत्युपादानं सृष्टिवाक्यप्रदर्शनार्थं शरीरस्य जीवात्मापेक्षया परत्वङ्कथमिति शङ्कायां जीवस्य शरीराधीनप्रवृत्तित्वात् जीवापेक्षया शरीरस्य परत्वं यथेन्द्रियेभ्योऽर्थानां परत्वमिति परिहारपरं सूत्रमितरैर्व्याख्यातं तदयुक्तम्, अपेक्षितविधेरनपेक्षितविधानदौर्बल्यात्, न हि वेदान्तिभिः प्रकृतिः स्वरूपेण नाऽभ्युपगम्यते, अतस्तदभ्युपगमतन्निरासयोर्व्याघातः परिहर्त्तव्य इति तत्परिहारापेक्षणमपेक्षिताकरणं स्यात्। ननु शरीरस्य जीवात् परत्वानुपपत्तिशङ्का च परिहर्त्तव्या अतोनानपेक्षितविधानं स्यादिति चेत्, एवन्तर्हीन्द्रियेभ्यः कथमर्थानां परत्व? मिति शङ्कायाश्च परिहर्त्तव्यत्वात्तत्परिहाराय सूत्रान्तरं प्रणेयं स्यात्, सा चार्थवदित्यनेन परिजिहीर्षितेति चेत्तर्हि अर्थवदिति दृष्टान्ततयोक्ति र्न घटते अर्थेभ्यो मनसः परत्वङ्कथमिति शङ्कापरिहाराय सूत्रान्तरं वक्तव्यञ्च स्यात्, अर्थमनोबुद्ध्यादीनां परत्वं यथाकथञ्चिद् व्यवहारे प्राधान्यादिविवक्षया निरूह्यत इति न तत्र परिहर्त्तव्यमिति चेत्।

Digitized by Google

सू० अक्षरन्तमसि लीयते तमः परे देव एकीभवति" तथा "यस्य पृथिवी शरीरं यस्यापश्शरीरं यस्य तेजःशरीरं यस्य वायुश्शरीरं यस्याकाशः शरीरं यस्याहङ्कारः शरीरं यस्य बुद्धिश्शरीरं यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यस्य मृत्युः शरीरम् एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः" तथा "भूमिरापोऽनलो वायुः खम्मनोबुद्धिरेव च । अहङ्कार इतीयम्मे भिन्ना प्रकृतिरष्टधा । अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्य्यते जगत् । एतद्योनीनि भूतानि सर्वाणीत्युपधारय । अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जयमयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवे"ति "व्यक्तं विष्णुस्तथाऽव्यक्तं पुरुषः काल एव चे"ति प्रकृतिर्य्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि परमात्मा च सर्वेषामाधारः पुरुषोत्तमः विष्णुनामा स वेदेषु वेदान्तेषु च गीयते" इति च ।

सू० ज्ञेयत्वाऽवचनाच्च ॥ ४ ॥

यदि तन्त्रसिद्धमिहाव्यक्तमविवक्षिष्यत् तदाऽस्य ज्ञेयत्वमविवक्षिष्यत् व्यक्ताव्यक्तविज्ञानान्मोक्षवादिभिस्तान्त्रिकैस्तेषां सर्वेषां ज्ञेयत्वाऽभ्युपगमात्, न चास्य ज्ञेयत्वमुच्यते इति, अतो न तन्त्रसिद्धस्येह ग्रहणम्,

सू० वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥

"अशब्दमस्पर्शमरूपमव्ययन्तथाऽरसं नित्यमगन्धवच्च यत् । अनाद्यनन्तम्महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यत" इत्यऽव्यक्तस्य ज्ञेयत्वमनन्तरमेव वदतीयं श्रुतिरिति चेत्तन्न प्राज्ञः परमपुरुष एव ह्यत्र श्लोके निचाय्यत्वेन प्रतिपाद्यते "विज्ञानसारथिर्य्यस्तु मनः प्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ।

टी० अव्यक्तस्य परत्वमपि यथाकथञ्चिदुच्यत इति न सूत्रापेक्षा, केन युक्तिबलेन यथाकथञ्चिन्निर्वाह इति चेत् अर्थमनोबुद्ध्यादीनां यथाकथञ्चित्परत्वनिर्वाहः, केन युक्तिबलेन प्रकरणपारिशेष्याभ्यामाद्यसूत्रविवक्षिताभ्यामव्यक्त-शब्दस्य रूपकविन्यस्तशरीरविषयत्वनिश्चयबलेनेति चेत् तेनैवायमपि निर्वाह आद्यसूत्रेणैव सिद्ध इत्यनपेक्षितविधानं स्यादेव, अतः उक्तार्थपरमेवेदं सूत्रम् । सू० ज्ञेयत्वावचनाच्च, "व्यक्ताव्यक्तज्ञविज्ञानादि"ति सांख्यग्रन्थ एव स्ववाक्ये निवेशितः, सू० वदतीति चेन्न प्राज्ञो हि प्रकरणात्, अव्यक्तस्य ज्ञेयत्वमिति व्यक्तधर्मभूतशब्दादिनिषेधानामव्यक्तपर्यवसानस्य न्याय्यत्वान्महतः परत्वोक्तेश्च सामान्येन यत्तच्छब्दनिर्दिष्टमपि कारणमव्यक्तमिति भावः । विज्ञानसारथिरिति, अनेन ज्ञेयस्य प्राज्ञस्य परमपुरुषासाधारणविष्णु-शब्देन प्रकृतत्वं दर्शितम्-

सू० "एष सर्वेषु भूतेषु गूढोऽत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुध्या सूक्ष्मया सूक्ष्मदर्शिभिरि"ति प्राज्ञस्यैव प्रकृतत्वात् अत एव पुरुषान्न परं किञ्चिदिति न पञ्चविंशकपुरुषातिरिक्ततत्त्वनिषेधस्तस्य च परमपुरुषस्याशब्दत्वादयोधर्माः यत्तदद्रेश्यमग्राह्यमित्यादिश्रुतिप्रसिद्धा महतः परमित्यपि बुद्धेरात्मा महान् पर इति पूर्वप्रकृताज्जीवात्मनः परत्वमेवोच्यते ।

सू० त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ५ ॥

अस्मिन् प्रकरणे ह्युपायोपेयोपेतॄणां त्रयाणामेव चैवमुपन्यासो ज्ञेयत्वेनोपन्यासस्तद्विषयश्च प्रश्नो दृश्यते नान्यस्याव्यक्तादेः, तथाहि नचिकेता मुमुक्षुस्सन् मृत्युप्रदत्ते वरत्रये प्रथमेन वरेणात्मनः पुरुषार्थयोग्यताऽऽपादनीमात्मनि पितुस्सुमनस्कतां प्रतिलभ्य

टी० एष सर्वेष्विति, निचाय्येत्युक्तज्ञानस्य दृश्यत इति पदेन प्राज्ञविषयतया प्रकृतत्वं दर्शितम्, अवान्तरचोद्यपरिहारपरेऽस्मिन् सूत्रे परमप्रकृतपूर्वपक्षयुक्तिनिरासश्च अर्थसिद्ध इत्याह "अत एवे"ति, व्यक्तधर्मनिषेधानामव्यक्तपर्यवसानचोद्यस्य अदृश्यत्वाधिकरणे परिहृतत्वमाह "तस्य चे"ति, महतःपरत्वादव्यक्तमिह विवक्षितमित्यत्राह "महत"इति, इन्द्रियादिपरिकरवत्त्वलक्षणप्राधान्यविवक्षातिशयान्महच्छब्देनात्मनिर्देशः प्रकरणस्य प्राज्ञैकपरत्वं नास्ति प्रधानस्याऽपि प्रतिपाद्यमानत्वात्तस्मात् प्राज्ञपरत्वं न प्रधानपरत्वविरोधीत्यत्राह सूत्रकारः, सू० त्रयाणामेव चैवमुपन्यासः प्रश्नश्च, प्रथमश्च–शब्दो हेतुमुच्चये, द्वितीयश्च–शब्दः प्रश्नोपन्यासयोः समुच्चये, कथमत्र त्रयाणामुपन्यासः? प्रश्नवाक्यं हि मुक्तमात्रविषयमिति शङ्कायां प्रतिवचनप्रकारेण प्रश्नार्थस्य विज्ञेयत्वात् प्रश्नवाक्येऽपि त्रयमपि पृष्टम्भवतीत्यभिप्रायेण प्रश्नस्य पश्चादुक्तिः, अस्मिंश्चेत्यादित्रयाणामिति पदमभिन्नजीवपरमात्मपरं परैर्व्याख्यातमिति तद्व्यावृत्त्यर्थमाह "उपाये"ति, एवमुपन्यास इति व्याख्येयं पदम् । एवं–पदं व्याचष्टे "ज्ञेयत्वेने"ति, ज्ञेयत्वावचनाच्चेति पूर्वसूत्रस्थज्ञेयत्वमेवं–शब्देन परामृश्यत इत्यर्थः तदुपपादयति "तथा ही"ति, नचिकेता इत्यादि प्रथमवरवरणं, द्वितीयपादेऽपि अत्ता चराचरग्रहणादित्यधिकरणे विस्तृतत्वादिह प्रतिलभ्येत्यन्तेन सङ्क्षिप्तन्तच सङ्क्षिप्तत्वाद् द्वितीयवरवरणं विस्तरेण दर्शयति–

सू० द्वितीयेन वरेण मोक्षसाधनभूतां नाचिकेताऽग्निविद्यां वव्रे, "स त्वमग्निस्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यं स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेणे"ति, स्वर्ग—शब्दनाच परमपुरुषार्थलक्षणमोक्षोऽभिधीयते अमृतत्वम्भजन्त इति तत्रस्थस्य जन्ममरणाभावश्रवणात् उपरच क्षयिफलकर्मनिन्दादर्शनाच्च

टी० "द्वितीयेने"ति, मोक्षोपायभूतामिति नाचिकेताग्निविद्याया मोक्षोपायत्वमङ्गद्वारा भवति, तच्च तस्याः परमात्मात्मकस्वात्मानुसन्धानगर्भत्वात्, तथा हि तदुभयं श्रूयते "लोकादिमग्निन्तमुवाच तस्मा"-इत्युपक्रम्य "ब्रह्मजज्ञन्देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमे"ति, त्रिना[1]चिकेतस्त्रयमेतद्विदित्वा "य एवं विद्वांश्चिनुते नाचिकेतम्। स मृत्युपाशान् पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके" इति वाक्येन परमात्मतदात्मकस्वात्मतदनुसन्धानगर्भाग्निविद्याज्ञानपूर्वकं चिन्वानस्य शोकातिगत्वमुक्तं, यो वा एतां ब्रह्मजज्ञात्मभूतां चितिं विदित्वा चिनुते नाचिकेतं स एव भूत्वा ब्रह्मजज्ञात्मभूतः करोति तद्येन पुनर्न जायत"-इति वाक्येन ब्रह्मात्मकचेतनदृष्ट्या वा तादृशदेवताधिष्ठितत्वेन वाऽनुसन्धानपूर्वकमग्निं चिन्वानस्यापुनर्भवहेतुभूतब्रह्मोपासनद्वारा मोक्षप्राप्तिर्युक्ता, तृतीयवरवरणस्लोकार्थेनिष्कर्षापयिकतया द्वितीयवरवरणश्लोकमुपादाय तत्र व्याख्येयस्य स्वर्ग्यपदस्य प्रकृत्यंशं व्याचष्टे "स्वर्गे"ति, मोक्ष—शब्दो मोक्षस्थानपरः लोक—शब्दसामानाधिकरण्यात्, भाष्ये तत्रस्थस्येति वक्ष्यमाणत्वाच्च, स्वर्ग—शब्दस्य मोक्षवाचित्वोपपादकः परमपुरुषार्थलक्षण—शब्दः स्वर्ग—शब्दस्य प्रकृष्टसुखोपलक्षणत्वान्मोक्षस्य निरवधिकानन्दरूपत्वाच्च स्वर्ग—शब्दवाच्यत्वमिति भावः । प्रसिद्धस्वर्गपरत्वं किं न स्यात्? इत्यत्राह "अमृतत्वमि"ति, तत्रस्थस्येतिस्वर्गलोका इति हि बहुव्रीहिः, निरतिशयसुखरूपपरमव्योमस्था इति

१ त्रिणाचिकेत इति पा० ।

Digitized by Google

भावः । मोक्षवाचित्वे हेत्वन्तरमाह "उत्तरत्रे"ति, तृतीयवरवरणप्रश्ने श्वोभावामर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः । अपि सर्वं जीवितमल्पमेवेति, तथा जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एवे"ति तत्र नचिकेतसैव क्षयिफलस्य निन्दितत्वदर्शनात्, क्षयिफलविमुखेन नचिकेतसा क्षयिफलसाधनप्रश्नानुपपत्तेरित्यर्थः । द्वितीयवरवरणप्रतिवचनावगतं हेत्वन्तरमाह—

सू० त्रि[1]णाचिकेतस्त्रिभिरेत्य संधिं "त्रिकर्मकृत्तरति जन्ममृत्यू इति च प्रतिवचनात्तृतीयेन वरेण मोक्षस्वरूपप्रश्नद्वारेणोपेयस्वरूपमुपेतृस्वरूपमुपायभूतानुष्ठितकर्मानुगृहीतोपासनस्वरूपञ्च पृष्टं, "येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके । एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीय" इत्येवम्मोक्षे पृष्टे तदुपदेशयोग्यतां परीक्ष्योपदिदेश, "तन्दुर्दर्शं गूढमनुप्रविष्टङ्गुहाहितं गह्वरेष्ठं पुराणम् अध्यात्मयोगाधिगमेन देवम्मत्वा धीरो हर्षशोकौ जहाती"ति, तदेवं सामान्येनोपदिष्टे नचिकेताः प्रीतः सन् देवम्मत्वेत्युपास्यतया निर्दिष्टस्य प्राप्यभूतस्य देवस्याध्यात्मयोगाधिगमेनेति

टी० "त्रिणाचिकेत"इति "त्रिणाचिकेतः अयं वाव यः पवत" इत्याद्यनुवाकत्रयाध्यायी त्रिकर्मकृत्—यजनाध्ययनदानकृत् पाकयज्ञहविर्यज्ञसोमयज्ञकृद्वा । त्रिभिरग्निभिर्हेतुभिः संधिं परमात्मोपासनेन सम्बन्धं प्राप्य जन्ममृत्यू तरतीत्यर्थः । करोति तद्येन पुनर्न जायन्त इत्यनेनैकार्थ्यात् तृतीयेनेति येयं प्रेत इति मन्त्रस्य देहातिरिक्तजीवस्वरूपमात्रप्रश्नपरत्वव्युदासायाह "मोक्षे"ति, अत्रोपायोपेयप्रश्नो गर्भित इति भावः । प्रतिवचनप्रकारेण प्रश्नार्थस्यावगन्तव्यत्वात्, प्रेते—परित्यक्तचरमशरीर इत्यर्थः

[1] त्रिणाचिकेतस्त्रिभिरिति पुस्तकान्तर पा० ।

Digitized by Google

"न प्रेत्य संज्ञाऽस्ती"ति प्रयोगात्, अन्यथा पूर्वप्रश्नस्य प्रश्नानुपपत्तिर्हेतुः पूर्वमुक्तत्वादिह न कण्ठोक्तः, इदं च विस्तरेणोपपादयिष्यामः । अस्मिंश्च प्रकरणे नचिकेतोमरणमस्मानुप्राक्षीरिति मरण-शब्दश्चरमदेहवियोगपरः उक्तहेतोरेव "पञ्चविंशतितत्त्वज्ञः परमात्मा भवेन्मृतः । स मुक्तस्तत्त्वसन्तानात् परेण समतां व्रजेदि"ति परमात्मसाम्यापत्ते मुक्तोऽमृत-शब्दस्य कपिलासुरिसंवादे प्रयुक्तत्वात्, "देवैरत्रापि विचिकित्सितं पुरे"त्यारभ्य "धृत्या धीरो नचिकेतोऽत्यप्राक्षी"रित्यन्तेनोच्यमानं दुरवगमत्वविविधप्रलोभनप्रश्नप्रतिषेधादिकमभिप्रेत्याह "तदुपदेशयोग्यतां परीक्ष्ये"ति, दुर्दर्शं द्रष्टुमनर्हं, कुतः गूढं-गुणत्रयतिरोहितत्वात्, अनुप्रविष्टं-शरीरमनुप्रविष्टं तत्राऽपि गुहाहितं-हृदयगुहागतं-गह्वरेष्ठं तदन्तर्गते वस्तुनि स्थितं जीवान्तस्थमित्यर्थः "जहातीत्युपदिदेशे"त्यन्वयः,येयं प्रेत इत्यादिवाक्यस्य जीवमात्रप्रश्नपरत्वे परमात्मविषयतया प्रतिवचनवैघट्यं स्यादित्यभिप्रायः । अस्मिन्वाक्ये स्वोक्तम् अर्थत्रितयमपि विशदयति "तदेवमि"ति, अध्यात्मयोग-शब्दः प्राप्तृस्वरूपविषययोगपर इत्यभिप्रयन्नाह-

सू० वेदितव्यतया निर्दिष्टस्य प्राप्तः प्रत्यगात्मनश्च मत्वा धीरो हर्षशोकौ जहाति इति निर्दिष्टस्य प्राप्यब्रह्मोपासनस्य च स्वरूपविशोधनाय पुनः पप्रच्छ "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतादन्यत्र भूताद्भव्याच्च यत्तत्पश्यसि तद्वदे"ति, एवं सकलेतरातीतानागतवर्त्तमानसाध्यसाधनसाधकविलक्षणे त्रये क्रमेण पृष्टे प्रथमं

टी० "वेदितव्यतये"ति, तन्दुर्दर्शमिति मन्त्रेण त्रितयमप्युक्तं चेच्छ्रोतव्याभावात् पुनः प्रश्नानुपपत्तिरिति शङ्काऽपनोदनाय प्रश्नाकाङ्क्षाप्रयोजने दर्शिते,सामान्येनेति स्वरूपविशोधनाय पुनः पप्रच्छेति च, पुनः पप्रच्छेति

१ भवेत्स्मृतः" इति पा० ।

पाठः उपायोपेयोपेतॄणां त्रयाणामपि सामान्येनोपदिष्टत्वात् स्वरूपशोधनाकाङ्क्षाऽपि सर्वसाधारणी, तत्कथमन्यत्र धर्मादिति मन्त्रेण परमात्ममात्रविषयप्रश्न इति शङ्कायां प्रश्नस्य[1] तृतीयविषयत्वमनुभाषणव्याजेन दर्शयंस्तदनन्तरमन्त्रस्याऽपि त्रितयविषयत्वमाह "एवं सकलेतरे"ति, कालत्रयसंबन्धित्वं हि वक्ष्यमाणत्रितयस्याप्यस्ति तत्कथं विलक्षणत्वमिति शङ्काव्युदासार्थम् इतर-शब्दः, वर्त्तमान-शब्देन कृताकृतशब्दो व्याख्यातः, प्रारब्धमसमाप्तं हि वर्त्तमानमुच्यते अन्यत्रेति वैलक्षण्यं विवक्षितं, धर्म-उपायः, धर्मादन्यत्र प्रसिद्धोपायविलक्षण उपाय इत्यर्थः। अधर्मः-धर्मेतर, उपेयः अधर्मादन्यत्र प्रसिद्धसाध्यविलक्षणं फलमित्यर्थः। अस्मादिति बुद्धिस्थस्तत्साधको विवक्षितः, स एव उपेता, स हि प्रसिद्धोपेतृसाधकविलक्षणः साधकावस्थायामितरफलविरक्तत्वात्फलदशायामाविर्भूतगुणाष्टकविशिष्टस्वरूपत्वाच्च कृताकृतादिति धर्मादीनां विशेषणं, कृताकृताद्धर्मादेर्विलक्षणं यद्भूताच्च भव्याच्च धर्मादेर्विलक्षणं यदित्यर्थः। यद्वा धर्मादधर्माच्चान्यत्र यदित्युपासनप्रश्नः पुण्यपापरूपसाधनविलक्षणत्वात् उपासनस्य कृताकृताद् भूताद् भव्याच्चान्यत्र यदिति कालापरिच्छिन्नमुपेयं पृष्टमुपेतुरपि चेतनस्य नित्यत्वात् प्राप्यान्तर्भावाच्च, तत एव तस्याऽपि तन्त्रेण प्रश्नः, तदन्तर्गतञ्च प्राप्तृस्वरूपमिति हि वक्ष्यते, त्रय इति यत्तच्छब्दौ त्रितयपराविति भावः। ननु धर्माधर्मासाध्य त्रिकालवर्त्तिवस्तुविलक्षणपरमात्मविषयोऽयं मन्त्रः किं न स्यात्?—उच्यते धर्मादन्यत्रेत्युक्ते तदसाध्यत्वं न प्रतीयते, न ह्यदृष्टादन्यद् दृष्टमित्युक्ते सत्यदृष्टासाध्यत्वं दृष्टस्य प्रतीयते, धर्माधर्मादिविलक्षणब्रह्मविषयप्रश्नः स्यादिति चेन्न, प्रयोजनाभावात् कृताकृतात् भूताद् भव्यादन्यत्रेत्यनेन कालपरिच्छिन्नार्थविलक्षणं वस्तु पृष्टं स्यात्, ततश्च धर्माधर्मवैलक्षण्यप्रश्नो विफल एव धर्माधर्मयोरपि कालपरिच्छिन्नवस्त्वन्तर्गतत्वात्, अतः इतरोपायोपेयोपेतृविलक्षणत्रयप्रश्नपरत्वमुपपन्नम् ॥

स्तु० प्रणवं प्रश्नस्य तद्वाच्यं प्राप्यस्वरूपन्तदन्तर्गतञ्च प्राप्तृस्वरूपं वाचकरूपं चोपायं पुनरपि सामान्येन ख्यापयन्

१ त्रितयविषयत्वमिति पा० ।

प्रणवन्तावदुपदिदेश, "सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्य्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतदि"त्येवमुपदिश्य पुनरपि प्रणवं प्रशस्य प्रथमन्तावत् प्राप्तुः प्रत्यगात्मनः स्वरूपमाह "न जायते म्रियते वा विपश्चिदि"त्यादिना

टी० प्रणवं प्रशस्येति सर्वे वेदा इत्यादिपादत्रयोक्तपरब्रह्मप्रतिपादकतया प्रशस्येत्यर्थः, तत्ते पदं संग्रहेण ब्रवीम्योमितीति प्रणवेन ब्रह्मप्रतिपादनं ह्युच्यते, प्राप्यस्वरूपमिति, पद-शब्दः पद्यत इति व्युत्पत्त्या प्राप्यवाचीति भावः । तदन्तर्गतं-प्रणववाच्यान्तर्गतं प्रणववाच्यैकदेशं प्रणवैकदेशवाच्यो ह्युपेता जीवः । यद्वा प्राप्ये प्रणववाच्ये परमात्मनि प्रकारतयान्तर्गतमित्यर्थः परिशुद्धजीवस्य प्राप्यान्तर्भावात्, पद-शब्दवाच्यान्तर्भूतत्वमितिभावः । वाचकरूपं चोपायमिति उपायोपायतया प्रणवस्योपायत्वं उपायो हि ध्यानं वाचकशब्दश्च वाच्यस्मरणोपायः "ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्" "ओमित्यात्मानं ध्यायथ" "ओमित्येनेनैवाक्षरेण परं पुरुषमभिध्यायीते"ति, ध्यानोपायत्वं हि प्रणवस्यावगम्यते, तपांसि ज्ञानप्रधाना उपरि भागाः । ननु तत्ते पदं सङ्ग्रहेण ब्रवीमीति प्राप्यस्वरूपपरत्वं हि प्रतीयते, तत्कथं त्रितयख्यापने तात्पर्यं कथं ब्रह्मणो जिज्ञास्यत्वे प्रतिज्ञाते तदनुबन्धिनां जिज्ञास्यत्वसिद्धिः, तदुपयुक्तत्वादुत्तरत्र निरूप्यमाणत्वाच्च अर्थतः प्रतिज्ञातत्वसिद्धेरिति चेदिहाऽपि ब्रह्मवेदनोपयुक्तत्वादुत्तरत्र प्रतिपाद्यमानत्वाच्च उपायोपेयोरपि प्रतिपाद्यत्वं न केवलमुपयोगादिमात्रात् किन्तु पद-शब्दवाच्यान्तर्भावश्च दर्शितः एतद्ध्येवाक्षरं ब्रह्मेत्यादिवाक्याभिप्रायेणाह "पुनरपि प्रणवं प्रशस्ये"ति, न जायते म्रियते वा इत्यादिमन्त्रद्वयस्य परमात्मपरत्वानुपपत्तिं मन्यमान आह "प्राप्तुः प्रत्यगात्मन" इति, का पुनरनुपपत्तिः ? उच्यते इदं मन्त्रद्वयन्तावदेकविषयं "न हन्यते हन्यमाने शरीरे इत्येतद्विवरणरूपत्वाद् द्वितीयमन्त्रस्य हन्ता चेदिति मन्त्रश्च जीवविषय एव लोकस्य परमात्मनि हन्तृहन्तव्यभावप्रतिपत्त्यभावात्तत्प्रतिषेधानुपपत्तेः, परमात्मा हि प्रत्यक्षागोचरः कथं तस्मिन् वध्य-

तादिप्रतिपत्तिः, अहमेनं हन्मि अयं मां हन्तुम् आगच्छतीति वध्यघातुक-भावाभिमानो हि जीवविषय एव देहिनाम्भवति। ननु नास्य जरयैतज्जी-र्यते न वधेनास्य हन्यत इतिवत् परमात्मन्यपि हननप्रतिषेध उपपद्यते सत्यं, तत्र दहराकाशस्य देहान्तःस्थित्या शङ्कितविकारादिप्रतिषेध उपप-द्यते, इह तु लोकसिद्धभ्रान्तिरनूद्य प्रतिषिध्यते "हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् । उभौ तौ न विजानीत" इति, परमात्मनि वध्यघा-तुकभ्रान्तिर्न कस्य चिदप्यस्ति, अतोऽनुवादनिषेधावनुपपन्नौ न जायत इति मन्त्रश्च तेनैकार्थः,

सू० प्राप्यस्य परस्य ब्रह्मणो विष्णोः स्वरूपम् अणोरणीया-नित्यादिना क इत्था वेद यत्र स इत्यन्तेनोपदिशन्मध्ये "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेने"त्यादिनोपायभूतस्योपासनस्य भक्तिरूपतामप्याह "ऋतम्पिबन्तौ विति" चोपास्योपासकेन

टी० अतो मन्त्रद्वयमपि जीवविषयम् अणोरणीयानित्यादेरर्थ-माह "प्राप्यस्ये"ति, "न जायते म्रियत इत्यादिना अणोरणीयानित्या-दिना, च जीवपरयोः स्वरूपे कथिते ऋतम्पिबन्ताविति मन्त्रेण तयोः प्रतिपादनवैयर्थ्यशङ्कापरिहारायाह "सूपासतामुक्त्वे"ति, एतद्वाक्यस्योपा-दानं परकृतव्याख्याननिरासफलकतयेति वक्ष्यामः, उपसंहृतमिति प्रकृतो-पसंहारस्यापेक्षितत्वादर्थान्तरपत्वस्यासङ्गतत्वाच्चेति भावः । सूत्रार्थं नि-गमयति "अतस्त्रयाणामि"ति, सूत्रार्थं परमप्रकृतार्थेन घटयति "तस्माच्चे-द्दे"ति, ननु त्रयाणामिति पदमग्निजीवपरमात्मपरं किं न स्यात्? तेषां हि प्रश्नोपन्यासौ दृश्येते "सत्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि" "येयं प्रेते" "अन्यत्र धर्मादि"ति त्रयाणां क्रमेण प्रश्नः "लोकादिमग्निं तमु-वाच तस्मै या इष्टकाः" "हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनं यथा हि मरणं प्राप्यात्मा भवति गौतम"? "न जायते वा म्रियते वा विप-श्चिदि"ति प्रतिवचनञ्च न च जीवविषयप्रश्नस्य परमात्मविषयप्रतिवचनं

Digitized by Google

वैयर्थ्यम् ऐक्यस्य विवक्षितत्वादुपपत्तेरिति—उच्यते यद्यानतिविरोधेऽपि भाव्यकारोक्तार्थ एव युक्ततरः, तथाहि—जीवस्तावदुपेता परमात्मा चोपेयः अग्निविद्या च प्रश्नोपासनाङ्गत्वेनोपायान्तर्भूता तदन्तर्भावश्च प्राकरणिकवाक्यैर्दर्शितः, अग्नेरपि पृथगेव विवक्षितत्वेऽग्निजीवपरमात्मनदुपासनानां चतुर्णां प्रतिपाद्यत्वं दर्शनात् त्रयाणामेवेत्यवधारणमयुक्तम्, अतोऽग्नेरप्युपायान्तर्भावविवक्षाऽङ्गीकार्या, तथासति उपायोपेयोपेतॄणामेव व्याख्याने युक्ततरम् उपासनोपदेशश्च अत्र स्फुटतरमुपलभ्यते "नायमात्मा प्रवचनेन लभ्यः" "नाविरतो दुश्चरितादित्यादिना केवलश्रवणादिविलक्षण परमात्मवरणीयताहेतुभूतः प्रकृष्टज्ञानविशेषो ह्युपायतयाऽभिधीयते, अवधारणं प्राधान्यव्याशृत्तिपरम् उपायस्योपेयप्राप्त्यर्थतया परमात्मन्यन्तर्भावात् चित्त्वाविरोध इति चेत्तर्हि त्रयाणामुपन्यासः प्रधानस्याऽप्रतिपाद्यत्वे हेतुरेव न भवितुमर्हति अर्थान्तरान्तर्भावसहत्वात्, प्रश्नोपन्याससमुच्चयस्तु त्रयाणामेव, न ह्युपायस्य प्रश्नो दृश्यते, अतोऽवधारणोपपत्तिरिति चेन्न अस्मिन् प्रकरणे प्रश्नोपन्याससमुच्चयस्य प्रतिपाद्यत्वे हेतुत्वाभावात्तदभावेन प्रतिपाद्यत्वाभावस्य दुर्वचत्वात्, उपायो ह्यपृष्ट एवोपन्यस्तः सोऽप्यर्थतः पृष्ट इति प्रश्नोपन्याससमुच्चयोऽस्मिन् प्रकरणे प्रतिपाद्यत्वे हेतुरिति चेत्तर्हि चतुर्णामिति वक्तव्यं शब्दादर्थतश्चतुर्णां प्रश्नोपन्याससम्भवात् ।

सू० सर्वावस्थानां सूपास्यतामुक्त्वा "आत्मानं रथिनं विद्धी"-त्यादिना "दुर्गं पथस्तत्कवयो वदन्ती"त्यन्तेनोपासनप्रकारमुपासीनस्य च वैष्णवपरमपदप्राप्तिमभिधाय "अशब्दमस्पर्शमि"त्यादिनोपसंहृतम्, अतस्त्रयाणामेवात्र प्रश्नत्वेनोपन्यासः प्रश्नश्च, तस्मान्नेह नान्तिकस्याऽव्यक्तस्य ग्रहणम् ॥

टी० यदि कण्ठोक्त्यैव प्रश्नोपन्याससमुच्चयो विवक्षितः तस्य प्रतिपाद्यत्वे प्रयोजकत्वाभावस्य प्रतिपाद्यमानोपासन एव दृष्टतया समुच्चयाभावस्याऽप्रतिपाद्यत्वे हेतुत्वायोगात् । किञ्च येयं प्रेत

इत्यस्य देहातिरिक्तजीवसद्भावासद्भावप्रश्नविषयत्वं चानुपपन्नं देहातिरिक्तात्मसद्भावनिश्चयरहितस्य पितृसोमनस्याग्निविद्यावरणयोरनुपपत्तेः, अग्निप्रश्नवाक्य एव स्वर्गलोका अमृतत्वं भजन्त इति देहातिरिक्तात्मज्ञानवत्त्वमवगम्यते, तत्प्रतिवचन एव "त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू करोति तद्येन पुनर्न जायत" इत्यपवर्गरूपपुरुषार्थोपयोगित्वमग्निविद्यायामवगतं कुतो देहातिरिक्तात्मसन्देहसम्भवस्तस्मादपवर्गप्रकारविशेष एव सन्देहसम्भवः, अतस्तत्प्रकारविशेषप्रश्नपरत्वं येयं प्रेत इत्यादिवाक्यस्य युक्तं, यदीदं देहातिरिक्तात्मसद्भावासद्भावप्रश्नपरत्वमस्य "तं दुर्दर्शमिति परमात्मविषयप्रतिवचनं च न घटते, जीवपरयोरैक्यज्ञापनार्थं तथा प्रतिवचनमिति चेन्न परमात्मविषयप्रतिवचन एव "ऋतम्पिबन्तौ सुकृतस्य लोक" इति जीवपरयोर्भेदप्रतिपादनेन तद्विरुद्धार्थाभिप्रायकल्पनाऽनुपपत्तेः, न च भेदानुवादसर्वज्ञताद्याकारेण जीववैलक्षण्यस्य लौकिकप्रमाणागोचरत्वात्, विहितस्य निषेधायोगाच्च। न च बुद्धिजीवपरोऽयं मन्त्रः गुहां प्रविष्टाविन्यत्रास्य मन्त्रस्य बुद्धिजीवपरत्वं पूर्वपक्षीकृत्य जीवपरमात्मपरत्वस्य भवद्भिरेवास्य गो[1]बलीवर्दन्याय इति न्यायेन सिद्धान्तितत्वात् "यदेवेह तदमुत्र यदमुत्र [2]तदन्विहे"ति हृदयायतन उपास्यतया स्थितस्य परमपुरुषस्यादित्यमण्डलान्तर्वर्तित्वमुच्यत इति न जीवपरयोरैक्यप्रतीतिः, मृत्योस्स मृत्युमाप्नोतीति वाक्यमुपसंहारगतमेतदपेक्षया दुर्बलं भेदसामान्यनिषेधरूपत्वाद्विहितभेदः विशेषव्यतिरिक्तविषयं चातः श्रुतभेदविरुद्धाभिप्रायकल्पनायोगात् प्रतिवचनवैघट्यमेव। किञ्च येयं प्रेत इति प्रथमखण्डस्थं प्रश्नं प्रतिप्रश्नान्तरवचनान्तरव्यवहितस्य पञ्चमखण्डस्थस्य हन्त त इदं प्रवक्ष्यामीति वाक्यस्य प्रतिवचनत्वं चायुक्तम्, अर्थक्रमः पाठक्रमात्प्रबल इति तेन तद्बाध इति चेन्न मध्ये जीवपरवाक्यस्य सद्भावात् तच्च दर्शितम्। किञ्च यन्मयञ्च जगद्ब्रह्मेत्यादाविव यदा प्रतिवचनाव्यवहिताः प्रश्नाः प्रश्नाव्यवहितानि च प्रतिवचनानि स्युः तदा क्रमको उपपद्यते को देवदत्तः दण्डी, को यज्ञदत्तः कुण्डी, को विष्णुमित्रः, कमण्डलुमानित्यादिवदेकैकप्रश्नान्तरं तत्प्रतिवचनदर्श-

१ गोबलीवर्दन्याय इति न्यायेन इति पा० ।
२ तदन्विहेति पा० ।

नाश्वज्ञदत्तप्रश्नोत्तरस्य देवदत्तप्रश्नोत्तरत्वकल्पनवत् क्रमकोपकल्पनमत्यन्तानुपपन्नं, येयं प्रेत इति च न जीवसद्भावासद्भावमात्रप्रश्न इत्युक्तमतो येयं प्रेत इति श्लोकः शब्दोऽर्थतश्च मोक्षानुबन्धितया ज्ञातव्यार्थत्रयविषयः, तथा च सति तं दुर्दर्शमित्यादि प्रतिवचनमतीव घटते, अन्यत्र धर्मादिति पुनः प्रश्नाकाङ्क्षा तस्यार्थश्च दर्शितौ, अर्थत्रयस्य चैकश्लोकेन पृष्टत्वस्य विवक्षितत्वात्प्रतिवचनाच्च त्रयाणामेवेत्यवधारणं च युक्तमत एव न जायत इति जीवविषयवाक्यस्याणोरणीयानिति परमविषयवाक्यस्य नायमात्मेत्युपायविशेषवाक्यस्य च प्रतिवचनत्वं सुघटितं प्रश्नप्रतिवचनान्तराव्यवहितत्वं च सिध्यति, एकप्रश्नेनैवार्थत्रयस्य पृष्टत्वे सूत्रस्थप्रश्नोपन्यास-शब्दगतैकवचनस्वारस्यं च भवति, न ह्युपन्यासाः प्रश्नाश्चेत्युक्तं यतो येयं प्रेत इति प्रश्नोऽर्थत्रयविषयः, अत एवेह प्रशंसाप्रलोभनविद्याऽविद्याविभागकथनादिकमञ्जसोपपद्यते, अतो यथोक्त एव सूत्रार्थः ॥

सू० महद्वच्च ॥ ६ ॥

मू० यथा "बुद्धेरात्मा महान् पर इ"त्यत्रात्म-शब्देनसामानाधिकरण्यान्न तन्त्रसिद्धमहत्तत्त्वं गृह्यते, एवमव्यक्तमप्यात्मनः परत्वेनाभिधानान्न कापिलतन्त्रसिद्धं गृह्यत इति स्थितम् । आनुमानिकाधिकरणं समाप्तम् ॥

टी० सू० महद्वच्च, तन्त्रसिद्धमहत्तत्त्वाग्रहणे सूत्राभिप्रेतं हेतुमाह "आत्म-शब्दसामानाधिकरण्यादि"ति, आनुमानिकाधिकरणं समाप्तम् ॥

चमसाधिकरणम् । **सू० चमसवदविशेषात् ॥ ७ ॥**

अत्राऽपि तन्त्रसिद्धप्रक्रिया निरस्यते, न ब्रह्मात्मकानां प्रकृतिमहदहङ्कारादीनां स्वरूपं श्रुतिस्मृतिभ्यां ब्रह्मात्मकानां तेषां प्रतिपादनात्, यथा आथर्वणिका अधीयते "विकारजननीमज्ञामष्टरूपामजां ध्रुवाम्ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः सूयते पुरुषार्थं च ।

Digitized by Google

टी० सू० चमसवदविशेषात्, कार्यशरीरवाचिपदस्य रूपके श्रवणा-त्तदव्यक्त-शब्देनोच्यत इत्युक्तम्, अत्र तु कार्यशरीरवाचिशब्दाश्रवणात् कारणं प्रधानमेवोच्यत इति शङ्कया सङ्गतिः, व्याख्यान्तरे गौणवृत्त्या तेजोऽबन्नपरत्वेन व्याख्यातं, किमिदं वाक्यं प्रधानपरम्? उत तेजोऽबन्नपर-मिति विचारश्च कृतः एतद्दूषयितुं किं श्रुत्यन्तरस्वारस्यार्थमेवं व्याख्यातम् उत? स्ववाक्यस्वारस्यार्थमिति विकल्पमभिप्रेत्य स्ववाक्यस्वारस्याभावमुत्तरत्र वक्ष्यन् प्रथमं प्रधानस्य प्रामाणिकतया तन्निरासे श्रुत्यन्तरास्वारस्यज्ञा-पनाय प्रधानविषयवाक्यजातमुदाहर्तुमाह "अत्रापी"ति, विकारजननी-मित्यादि अष्टरूपत्वं भूमिराप इत्याद्युक्तप्रकारेण अजाम्-उत्पत्तिरहितां ध्रुवां-नाशरहितां ध्यायते परमात्मनासङ्कल्परूपज्ञानेन ज्ञायते अध्यासिता अधिष्ठिता तन्यते-विस्तार्यते स्थूलत्वावस्थं क्रियते समष्टिभूतरूपेण क्रियते प्रेर्यते-व्यष्टिसृष्ट्यर्थं प्रेर्यते ।

भा० तेनैवाधिष्ठिता जगत् । गौरनाद्यन्तवती सा जनित्री भूत-भाविनी । सितासिता च रक्ता सर्वकामदुघा विभोः पिबन्त्येनामविषमामविज्ञाताः कुमारकाः । एकस्तु पिबते देवस्स्वच्छन्दोऽत्र वशानुगाम्ध्यानक्रियाभ्यां भगवान् भुङ्क्तेऽसौ प्रसभं विभुः । सर्वसाधारणीं दोग्ध्रीं पीड्यमानान्तु यज्वभिः । चतुर्विंशतिसङ्ख्याकमव्यक्तं व्यक्तमुच्यत" इत्यत्र प्रकृत्यादीनां स्वरूपमभिहितम् ।

टी० पुरुषार्थं पुरुषाणामर्थनीयं भोगोपकरणभोगस्थानरूपं जगत् सूयते, गौरित्यादि जनित्री भूतभाविनीति समष्टिव्यष्टिसृष्टिरुच्यते, सिता-सिता च रक्ता च गौणया वृत्त्या सत्त्वरजस्तमोमयी । यद्वा तेजोऽबन्नद्वारा सितासिता रक्ता विभोरीश्वरस्य सर्वकामदुघा, लीला रसदोग्ध्री अविषमां भोक्तृकर्मानुगुणपरिणामित्वादपक्षपातिनीम् अविज्ञाताः-स्वात्मभिदं देहेभ्यो विविच्यापरिज्ञाताः एकस्त्विति कर्मवश्यबहुभोक्तृव्यावृत्त्यर्थमेकः स्वच्छन्द

Digitized by Google

इत्युक्तं, ध्यानक्रियाभ्यां सङ्कल्पसर्गौ द्विव्यापाराभ्याम् ऐक्षतासृजतेति द्वयमपि हि श्रूयते, पीड्यमानान्तु यज्वभिरिति वत्सा हि मातरं क्षीरक्षरणाय पीडयित्वा भुञ्जते तद्वत्कर्मवश्यैरात्मभिर्भोक्तव्यफलानुरूपं परिणाम्यमानामित्यर्थः, अत्रेति प्रकृत्यादीनां प्रकृतिपुरुषमहदादीनां स्वरूपमभिहितं एषु वाक्येषु ईश्वरप्रतिपादनं प्रधानादीनामीश्वरतादधीन्यविशिष्टत्वपरमिति भावः । एवं ब्रह्मात्मकप्रधानपरवाक्यान्युक्तानि अथ तदन्तदन्तर्यामिभगवत्प्रतिपादकं वाक्यं दर्शयितुमाह—

सू० यदात्मकास्त्वेते प्रकृत्यादयः स परमपुरुषोऽपि तं षड्विंशकमित्याहुः । सप्तविंशमथापरे पुरुषं निर्गुणं सांख्यमथर्वशिरसो विदुरिति प्रतिपाद्यते, अपरे चाथर्वणिका अष्टौ प्रकृतयः षोडश विकारा इत्यधीयते, श्वेताश्वतराश्चैवं प्रकृतिपुरुषेश्वरस्वरूपमामनन्ति, संयुक्तमेतत् क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः अनीशश्चा[1]ऽन्यो बध्यते भोक्तृभावात् । ज्ञात्वा देवं मुच्यते सर्वपा[2]शैः । ज्ञाज्ञौ द्वावजावीशनीशाव ह्येका भोक्तृभोगार्थयुक्ताऽनन्तश्चात्मा विश्वरूपो ह्यकर्ता । त्रयं यदा विन्दते ब्रह्मचैतत् क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः । तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरिति, तथा "छन्दांसि यज्ञाः क्रतवो व्रतानि । भूतं भव्यं यच्च दे[3]वा वदन्ति" "अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः "मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरन्तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जग-

१ अनीशश्चात्मा बध्यते इति पा० ।
२ सर्वपाशैरिति पा० ।
३ वेदा इति पा० ।

Digitized by Google

दि”ति, तथोत्तरत्राऽपि “प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुरि”ति

टी० “यदात्मका”इति, चतुर्विंशकत्वं कालस्य विशेषणत्वेन प्रकृतितद्विकारेष्वन्तर्भावात्, सप्तविंशकत्वं कालस्य पृथग्विव[1]क्षया पञ्चविंशकेष्वेव लब्धैश्वर्यः कश्चिदुक्तः पञ्चविंशकस्तुत्यर्थमित्यन्यथासिद्धिरीश्वरप्रतिपादनस्य वक्तुमशक्या, संख्यातः पृथङ् निर्देशादित्यभिप्रायः प्रकृतेः प्रामाणिकत्वमात्रदर्शनार्थमुक्तम् अष्टौ प्रकृतय इति, अत्रापि वाक्यान्तरैकार्थ्याद् ब्रह्मात्मकत्वं सिद्धमिति भावः । एतत् त्रयं यदा विन्दते तदा ब्रह्म भवति मुक्तो भवतीत्यर्थः । अभिध्यानम्–आरम्भणं संशीलनं, योजनं योगः तत्त्वभावः । तत्त्वाविर्भावः साक्षात्कारः अवयवभूतैरंशभूतैश्शरीरभूतैरित्यर्थः । स्मृतिं दर्शयति—

भा० स्मृतिरपि “प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । विकारांश्च गुणांश्चैव । विद्धि प्रकृतिसम्भवान् कार्य्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते । पुरुषस्सुखदुःखानाम्भोक्तृत्वे हेतुरुच्यते । पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु । सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः । निबध्नन्ति महाबाहो देहे देहिनमव्ययम् । तथा “सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम । कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् । प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः । भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् । मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् । हेतुनाऽनेन कौन्तेय ? जगद्विपरिवर्त्तते”इति, तस्माद्ब्रह्मात्मकत्वेन कापिलतन्त्रासिद्धाः

[1] तदन्तर्भावविवक्षया इति पा० ।

सू० प्रकृत्यादयो निरस्यन्ते, श्वेताश्वतरोपनिषदि श्रूयते "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य" इति, तत्र सन्देहः किमस्मिन्मन्त्रे केवला तन्त्रसिद्धा प्रकृतिरभिधीयते? उत ब्रह्मात्मिके? ति, किं युक्तं केवलेति, कुतः अजामेकामित्यस्याः प्रकृतेरकार्य्यत्वश्रवणाद् बह्वीः प्रजाः सृजमानां सरूपाः इति

टी० "स्मृतिरपी"ति, एवं प्रधानस्य प्रामाणिकत्वादतत्परत्वेन व्याख्यानमनुपपन्नम् इत्युक्तन्ततः किमित्यत्राह "तस्मादि"ति, प्रकृत्यादय इत्यादि-शब्देन महदादिरभिप्रेतः। विषयादिकं दर्शयति "श्वेते"ति प्रकृतेरेव कर्तृत्वप्रतीतिजनकवाक्यजातं विषयः अचेतनत्वसृजमानपदस्वारस्याभ्यां संशयः, श्वेताश्वतरे अजामेकामिति मन्त्रे अजा-शब्दो यौगिकः किमब्रह्मात्मकप्रकृतिपर? उत ब्रह्मात्मकप्रकृतिपर? इति विचारः अजा-शब्दसृजमानशब्दौ किमजायाः स्वातन्त्र्येण स्रष्टृत्वमवगमयतो? नेति तैत्तिरीयके अजामेकामिति मन्त्रे प्रतिपन्नाया अजायाः किं ज्योतिरुपक्रमत्वमस्ति नेति किमजात्वज्योतिरुपक्रमत्वे विरुध्येते ने? ति यदा विरुध्येते तदा तैत्तिरीयकमन्त्रसिद्धाया अजाया ज्योतिरुपक्रमत्वाभावेन तदैकार्थ्यादजां सृजमानामिति पदयोः स्वातन्त्र्येण स्रष्टृत्वावगमकत्वात् श्वेताश्वतरमन्त्रस्थोऽजा-शब्दो ब्रह्मात्मकत्वशून्यप्रकृतिपरः। यदा न विरुध्येते तदा तैत्तिरीयकमन्त्रसिद्धाया ज्योतिरुपक्रमत्वेन तदैकार्थ्यात् अजां सृजमानामिति पदयोः स्वतन्त्रस्रष्टृत्वावगमकत्वाभावात् श्वेताश्वतरमन्त्रस्थोऽजा-शब्दोऽपि ब्रह्मात्मकप्रधानपर इति अजामिति ब्रह्मात्मकत्व पक्षे अजात्वं न संभवति तत्कार्यत्वाभ्युपगमादित्यर्थः,

सू० स्वातन्त्र्येण सरूपाणां बह्वीनां प्रजानां स्रष्टृत्वश्रवणात्त्वेत्येवम्प्राप्तेऽभिधीयते सू· चमसवदविशेषात्, इति, नाऽ-

Digitized by Google

ऽत्र तन्त्रसिद्धा प्रकृतिरभिधीयते कुतः न जायते इत्यजेत्यजात्वमात्रप्रतिपादनात् तन्त्रसिद्धा ब्रह्मात्मकाऽजाग्रहणे विशेषाप्रतीतेः, चमसवत् यथा "अर्वाग्बिलश्चमस ऊर्द्ध्वबुध्न इत्यस्मिन्मन्त्रे चमसस्य भक्षणसाधनत्वमात्रं चमसशब्देन प्रतीयते इति न तावन्मात्रेण चमसविशेषप्रतीतिः यौगिकशब्दानामर्थप्रकरणादिभिर्विनाऽर्थविशेषनिश्चयाऽयोगात् तत्र च "यथेदन्तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्द्ध्वबुध्न" इत्यादिना वाक्यशेषेण शिरसश्चमसत्वनिश्चयः

टी० स्वातन्त्र्येणेति सृजमानामिति कर्त्तरि शानच् स्वतन्त्रः कर्त्ता अतो न ब्रह्मपरतन्त्रत्वमित्यर्थः। एवं प्राप्त इति अत्राऽपि कापिलतन्त्रसिद्धप्रक्रिया निरस्यत इत्युपक्रमस्थं प्रतिज्ञावाक्यमनुषज्यते इति मत्वा हेतुमाह "न जायत इती"ति, अथवा न जायत इतीत्यादिना हेतुपदं विवृण्वन् चमसवदिति सोत्रं पदं प्रतिज्ञापरम्मत्वा तेन हेतुपदस्यान्वयं दर्शयति "चमसवदि"ति, विशेषाप्रतीतेरित्यन्तं हेतुपदव्याख्यानम्, अवयवशक्त्याऽजात्वमात्रप्रतिपादनेन विशेषाप्रतीतिश्चमसवद्भवति वाक्यान्तरमेन्तरेण विशेषतोनिर्णेतुमशक्या भवतीत्यर्थः। तदेव विवृणोति "यथाऽर्वागि"ति, अस्य यथा-शब्दस्य तथाऽत्रापीति भाष्येणान्वयः, चमसशब्दार्थं विशदयति "भक्षणसाधनत्वमात्र"मिति, चम्यतेऽनेनेति चमस-शब्दव्युत्पत्तिरिति भावः। मात्र-शब्देन विशेषव्यावृत्तिः, इति-शब्दो हेतुपरः विशेषप्रतीत्यभावादित्यर्थः, विशेषप्रतीत्यभावे चमसः साधर्म्यदृष्टान्ततया व्याख्यातः, चमसवदित्यनेनार्थसिद्धान्तदार्ष्टान्तिकसाधारणाकारहेतुं दृष्टान्तोपपादकत्वेन दर्शयति "यौगिकशब्दानामि"ति, साधारणमवयवार्थं बोधयतां यौगिकशब्दानामित्यभिप्रायः, तेनासाधारणावयवार्थबोधकबलभिदादिशब्दव्यावृत्तिः अर्थो वस्तुसामर्थ्यम् आदि-शब्दः

Digitized by Google

Digitized by Google

॥ श्रीः ॥

श्रियै नमः ।

श्रीपतये नमः ।

श्रीमते रामानुजाय नमः ।

शास्त्रदीपिकाया भूमिका ।

वेदा हि ऋग्यजुःसामाथर्वभेदैर्मन्त्रब्राह्मणारण्यकोपनिषदादिभेदैरवान्तरैर्मण्डलप्रपाठकसूक्तानुवाककाण्डाध्यायादिलक्षणैरपरैश्च विशेषैः सन्ति बहुधा प्रविभक्ताः । तेऽमी बुभुत्सूनामर्थनिरूपणसौकर्याय कर्मकाण्डोपासनाकाण्ड—ज्ञानकाण्डरूपेण पूर्वाचार्यैर्व्यभाजिषत । तत्र मन्त्रभागस्य संक्षेपतः सर्वविद्यास्थानभूतस्यापि प्रायो[1] यागोपयोगिद्रव्यदेवतादिस्मारकतया कर्मकाण्डतां, ब्राह्मणानां च मन्त्रोदितार्थेतिकर्तव्यताप्रतिपादनबहुलानां तच्छेषतां, प्रायो ब्राह्मणैकदेशस्वरूपाणामुपनिषदां नीरक्षीरन्यायेन उपासना—ज्ञाननिरूपणपराणामुपासना—ज्ञानमूलतां चाचक्षते । तत्रापि च षोडशाध्यायीरूपेण कर्ममीमांसाशास्त्रेण अनादिनिधनाविच्छिन्नवैदिकसंप्रदायस्थेम्ना याथातथ्येन प्रतिनियतक्रमाणामनुन्मिषितस्वरवर्णविपर्ययाणामैहिकामुष्मिकार्थसंदोहदोग्ध्रीणां तत्रभवतीनां श्रुतीनामर्थनिर्णयाय भगवान् जैमिनिर्बादरिबादरायणादिपूर्वाचार्यपरम्परापरिप्राप्ता एव वेदार्थनिर्णयोपायिकीस्सव्युक्तीः सूत्रयाञ्चकार । तत्रादिमा द्वादशाध्यायी कर्मकाण्ड—पदेन प्रसिध्यति । शेषा चतुरध्यायी तु द्वादशाध्याय्युक्तार्थावशिष्टार्थनिरूपणपरा संकर्ष—काण्डपदेन व्यवह्रियते । अस्ति चेषा विप्रकीर्णवेद-

---

१ ईशावास्योपनिषदः संहितान्तर्गतत्वात्प्रायः पदम् ।

वाक्यार्थनिरूपणपरा । अत एवैनां संकर्षकाण्ड—पदेन व्यवहरन्ति, सम्यक्—निःशेषतया स्फुटतया च कृष्ट्वा—आकृष्य विप्रकीर्णवेदवाक्येभ्यः संगृह्य निर्णीयन्ते अर्था यत्रेति संकर्ष इति व्युत्पत्त्या "अकर्तरि च कारके संज्ञायां"मित्यधिकारस्थेन "हलश्चे"ति घञा तथार्थावगतेः । यच्चामुष्याः संकर्षण—काण्डपदेन व्यवहारः सोऽपि अधिकरणल्युटा तथा ऽर्थाभिधानायैव । विप्रकीर्णार्थनिरूपणपरतयैव तु द्वादशाध्याय्यामिव शेषचतुरध्याय्यां प्रत्यधिकरणं न संगतिः ॥ द्वादशाध्याय्या सह तु शेषचतुरध्याय्या अस्त्येव संगतिमदर्थप्रतिपादकतयैकग्रन्थत्वं, वेदान्तचतुरध्याय्या तु न संगता षोडशाध्यायी तस्या ज्ञानकाण्डरूपायाः पृथगर्थनिरूपणपरतयाऽत्यन्तभिन्नत्वात् । अत एव तु अथातो ब्रह्मजिज्ञासेति सूत्रस्याथ—शब्दस्य महत्याऽऽरभट्या वृत्तिकाराभिमतकर्माधिगमानन्तर्यार्थकतां व्युदस्य साधनचतुष्टयसंपत्त्यानन्तर्यार्थकतामास्थिषत श्रीदशङ्कराचार्याः ॥

श्रीभाष्याचार्यास्तु अथातो ब्रह्मजिज्ञासेतिसूत्रस्याथ—शब्दस्य कर्माधिगमानन्तर्यार्थत्वमास्थाय विंशत्यध्यायीस्वरूपयोः पूर्वोत्तरमीमांसयोरेकशास्त्रतामाहुः "संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिरिति" इति, "वृत्तात्कर्माधिगमादनन्तरं ब्रह्मविविदिषेति" इति च, पूर्वा[1] चार्यवचनं प्रमाणतयोपदर्शयन्तः ।

युक्तं चैतत् वेदाविरोधितर्कोपन्यासपुरःसरं वेदार्थविचाररूपत्वादुभयोर्मीमांसयोः । अतएव तु ज्योतिष्टोमदर्शपौर्णमासबृहस्पतिसवादिज्ञानमात्रेणापवर्गतत्साधनयोरविदितत्वात्पुरुषार्थतदुपायज्ञानं कार्त्स्न्येन नपर्यवस्यतीति कर्मकाण्डे तत्तदर्थबोधकश्रुतिषु तत्तत्प्र-

१ भगवद्बोधायनवचनम् ।

करणावसाने नाभ्यासो ऽर्थपरिसमाप्तिबोधको दृश्यते, वेदान्तेषु तु न स पुनरावर्त्तते न स पुनरावर्त्तते । नावर्त्तन्ते नावर्त्तन्ते । वेदानुशासनं वेदानुशासनम् । तस्माद् ब्राह्मणो महिमानमाप्नोति तस्माद् ब्राह्मणो महिमानमाप्नोति । अमृतः समभवदमृतः समभवदित्यभ्यासो भवति ।

वेदान्तेषु प्रतिविद्यमवसानेऽभ्यासप्रयोजनं तु इतरविद्यानैरपेक्ष्येण एकैकस्याः परमपुरुषार्थब्रह्मावाप्तिलक्षणफलप्राप्तिहेतुत्वबोधनम्, एकैकयैव विद्यया तत्र पुरुषार्थपर्यवसानेन विद्यान्तरस्य ज्ञातव्यत्वनियमाभावेनानपेक्षणीयत्वात् ।

अत एव तु श्रुतिदृष्टरीतिमनुकुर्वता वेदविदग्रेसरेण कृष्णद्वैपायनशिष्येण जैमिनिना पूर्वकाण्डस्योत्तरकाण्डसापेक्षपरमपुरुषार्थावाप्तिहेतुतासूचनाय अथातो धर्मजिज्ञासेत्यारभ्य अन्वाहार्ये च दर्शनादित्यन्ते द्वादशाध्यायीग्रन्थे, चतुरध्यायीस्वरूपे संकर्ष-काण्डे वा अध्यायान्ते "एवं मुक्तिफलानियमस्तदवस्थाऽवधृतेस्तदवस्थावधृते"रित्यादिव्याससूत्रेष्विव पदावृत्तिरर्थपरिसमाप्तिबोधिका नादृता । संकर्षणकाण्डे तु सर्वशेषे काण्डसमाप्तिसुसूचयिषया वाक्यावृत्तिरादृता न तु समस्तसूत्रावृत्तिः शास्त्रपरिसमाप्तिद्योतिका, यथोत्तरकाण्डे अनावृत्तिः शब्दादनावृत्तिःशब्दादिति परमर्षिः सूत्रमभ्यस्यन् पूर्वोत्तरमीमांसयोः समाप्तिं स्पष्टमवबोधयतीति श्रुत्यर्थनित्यनिरीक्षणनीतनिजजनुषां मादृशामनवरतपरिशीलितो भगवद्बोधायनमतोपपादनप्रकारः ।

अतएव तु "द्वादशाहवदुभयविधं बादरायणो ऽतः" अ. ४. पा. ४. सू. १२ । इत्युत्तरकाण्डे पूर्वकाण्डोदितार्थमुपजीव्यत्वेनावल-

लम्बे भगवान् कृष्णद्वैपायनः, तद्यथा "द्वादशाहमृद्धिकामा उपेयुः" । "द्वादशाहेन प्रजाकामं याजयेदित्युपैतियजतिचोदनाभ्यां सङ्कल्पभेदेन सत्रमहीनं च भवति तथा सङ्कल्पभेदादुभयविधं शरीरमशरीरञ्च मुक्तमाचार्यो मन्यते इति,

एवमेव तु "दर्शयतश्चैवं प्रत्यक्षानुमाने" अ. ४ पा. ४. सू. २. । इति सूत्रे श्रुतिं परानपेक्षतया प्रत्यक्षपदेन, स्मृतिं च स्वप्रामाण्ये श्रुतिमुखनिरीक्षणापेक्षतयाऽनुमानपदेन सिद्धवद् व्यवजहार, यतोऽयमर्थः पूर्वकाण्डे प्रमाणलक्षणे मुनिरूपितः, ततश्च तादृशार्थानां समानतन्त्रसिद्धार्थतया तथाऽभिधानमिति तद्विदां न संशयः ॥

न च कर्तृस्मर्तृभेदः शास्त्रानैक्यसाधनायालं, मुनिचयप्रणीतत्वेऽपि व्याकरणस्यैकत्वात्, स्मर्तृणां मधुच्छन्दःप्रभृतीनां बहुत्वेऽपि तत्स्मृतिविषयर्ग्यजुःसामसंहितादिभागानामेकत्वाच्च आधुनिकैरपि च संभूय ग्रन्थाः प्रणायिषत, यथा धूर्तस्वामिकपर्दिभ्यामापस्तम्बसूत्रव्याख्यानं, यथा वा पाणिनीयसूत्रव्याख्यानं वामनजयादित्याभ्यामेवमादि ॥

न च कर्मब्रह्ममीमांसयोरैकशास्त्र्ये कर्मिणामेव ब्रह्मविद्याधिकारे च पूर्वकाण्डोदितापशूद्राधिकरणेनैव निर्विद्यानां ब्रह्मविद्याऽनधिकारबोधसिद्धौ वेदान्तचतुरध्याय्यां पुनस्तद्वारणायापशूद्राधिकरणारम्भे कृतकरत्वप्रसङ्ग इति न तयोरैकशास्त्र्यमित्यनुमिमीमहे इति सांप्रतं, महणधारणादिलक्षणलौकिकसामर्थ्यमात्रस्याधिकारकारणतां भ्रान्त्या प्रतिपद्यमानान् प्रति, दुरुपदेशवशात् साधनचतुष्टयमात्रस्य पूर्ववृत्तितां प्रतिपद्य ब्रह्मविद्यासु प्रवर्तमानान् प्रति

वा, मध्वादिविद्यास्विवानुपनीतानामपि ब्रह्मविद्यास्वधिकारं अज्ञा-
नान् प्रति वा, भ्रान्तोपदेशवशाद्वैदिकाचारस्य तत्त्वज्ञानेऽनपेक्षाभ्र-
मवतः प्रति वा, पूर्वकाण्डविचारे इवोत्तरकाण्डविचारेऽपि वर्णाश्रम-
धर्मानुपालनावश्यम्भावद्भिन्नं वा तस्य सार्थक्येन कृतकरत्वप्रसङ्ग-
रूपचोद्यानवतारात् । यथा च परस्यैवापशूद्राधिकरणं न सङ्गतं
तथा वयमिहैवाग्रे पराक्रम्य समर्थयिष्यामहे इत्यकिञ्चिदिदम् ।

न च अथातो धर्मजिज्ञासेति प्रतिज्ञायाऽऽरब्धे शास्त्रे ब्रह्म-
निरूपणमसाम्प्रतमिति शङ्क्यम् । सिद्धसाध्यरूपेण धर्मद्वैध्यस्य शास्त्र-
सिद्धतया द्विविधधर्मनिरूपणप्रतिज्ञानेन षोडशाध्याय्या साध्यरूपं धर्मं
निरूप्य सिद्धरूपस्य तस्याभिधानेन क्रमेणार्थप्रतिपादनपरयोः कर्मब्र-
ह्ममीमांसयोः संगतत्वात् । धर्मद्वैविध्ये प्रमाणं तु, "इज्याचारदमाहिं-
सादानस्वाध्यायकर्मणाम् । अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्"
इति याज्ञवल्क्यस्मृतिः, इयं हि आत्मदर्शनस्य परमधर्मतां ब्रुवाणा
सिद्धसाध्योभयधर्मबोधिकेति स्पष्टमेव । एषा हि परमर्षीणां शैली यत्
स्थलविशेषे प्रसिद्धार्थप्रसिद्धिबहुलेन धर्म-शब्देनात्मानं, क्वचित्तु तादृ-
शेन यज्ञ-शब्देन, सिद्धधर्मस्वरूपमात्मानमुपादित्सन्ते, यथा गीतासु
"श्रेयान् द्रव्यमयाद्यज्ञाज् ज्ञानयज्ञः परन्तप" इत्यादिषु, तदुभय-
साधारणधर्मत्वं चालौकिकश्रेयस्साधनत्वश्रेयस्स्वरूपत्वान्यतरत्वमि-
त्यन्यत्र कृतविस्तरा वयमिहोपेक्षामहे । नाप्यवान्तरो विशेषः
शास्त्रानैक्यसाधकस्तस्य पादाध्यायाधिकरणपूर्वोत्तरषट्कादिभेदेन
भिन्नस्य शास्त्रानैक्यसाधकतायाः सर्वसंप्रतिपन्नत्वात् । न चैवं
कल्पसूत्रगृह्यसूत्रादीनामपि वेदार्थविचाररूपतया सर्वस्याप्यास्तिक-
शास्त्रस्यैक्यमेवं ब्रुवाणस्य स्यादिति फल्गु शङ्क्यम् ॥

तेषां वेदार्थविचारत्वाविशेषेऽपि युक्तिमात्ररूपताविरहेण भेद-

साधकविशेषस्यात्यन्तसुखदत्वात् । न चैवं पूर्वोत्तरमीमांसयोरेकशास्त्रत्वे तर्कादिपदेन षण्णामवगमः शास्त्रषट्कादिव्यवहारश्च विलुप्येतेति वाच्यम् अवान्तरविशेषमादाय तादृशव्यवहारस्याञ्जस्येनैव समर्थनात् । मा चैवमवान्तरं षट्काध्यायपादादिलक्षणं भेदमादाय शास्त्रसप्तकादिव्यवहारोऽप्यतिप्रसजेदिति शङ्क्यः नैमित्तिके सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इति न्यायेन यादृशो व्यवहार आधुनिकस्तन्निर्वाहाय निमित्तगवेषणेऽपि निमित्तमस्तीत्येतावन्मात्रेणासतो व्यवहारस्यापादयितुमशक्यत्वात् ।

यच्च फल—जिज्ञास्यभेदेन पूर्वोत्तरकाण्डयोर्भेदाभिधानं तदपि बालसंमोहनमात्रम् "अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासेत्यादिजैमिनीये जिज्ञास्यभेदेऽपि शास्त्रैक्यस्य सर्व्वसंप्रतिपन्नत्वात्, फलभेदोऽपि न शास्त्रभेदे तन्त्रं तस्यासिद्धत्वात् । तथा हि "अग्निहोत्रादि तु तत्कार्य्यायैव तद्दर्शनात्" "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इत्यादिव्याससूत्रपरम्परया "यज्ञो दानं तपः कर्म न त्याज्यं कार्य्यमेव तत् । यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् । एतान्यपि तु कर्म्माणि सङ्गं त्यक्त्वा फलानि च । कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते इत्यादिभगवद्गीतावाक्यैः, "यज्ञेन दानेन तपसा ऽनाशकेन इत्यादिश्रुतिभिश्च निष्कामकर्म्मणो ज्ञानेन सहैककार्य्यकारणतायाः शतधा प्रसाधितत्वात् । अस्तु वा निष्कामकर्म्मणामपि ज्ञानद्वाराप्रयोजकत्वं न साक्षादपवर्गहेतुत्वं तावताऽपि सिद्धसाध्योभयभेदभिन्नं धर्ममथातो धर्म्मजिज्ञासेति निरूप्यत्वेन प्रतिज्ञाय षोडशाध्याय्या साध्यरूपं तमभिधाय वेदान्तचतुरध्याय्या सिद्धरूपस्योपजीवकस्य परमधर्म्मस्यात्मनिरूपणस्य समुचितत्वात् उपजी-

ध्यनिरूपणानन्तरमुपजीवकनिरूपणस्य यौक्तिकत्वेन ज्ञानकर्म्मस-मुच्चयोपेक्षापक्षेऽपि मीमांसयोरेकशास्त्रतायाः सुदृढत्वात् ।

यदपि जिज्ञास्ये भूतत्वभव्यत्वलक्षणवैलक्षण्यं पुरस्कृत्य क्रमो-पक्रान्तयोः पूर्वोत्तरमीमांसयोः क्रमविवक्षाऽसंभवाभिधानं तदप्यापा-ततरमणीयं यतो भव्याया अप्युपासनाया अस्तीह भूतब्रह्मनिरूपणपरे शास्त्रे क्रियासमभिहारेणाभिधानं यथोपकोसलोपासनप्रतीकोपासना-न्नोपासनप्राणोपासनदहरविद्याशाण्डिल्यविद्यादीनां, न च तत्प्रासङ्गि-कमिति शक्यं शङ्कितुमपि उपासकस्यार्चिरादिमार्गेण मूर्द्धानमभिभिद्य निष्क्रामतो ब्रह्मलोकावाप्तिलक्षणफलपर्यन्तस्यार्थजातस्य इहैव शास्त्रे निरूपणप्रक्रमात्, न हि चयीचि[१]काण्डीसमाम्नातस्योपासनस्य वेदा-न्तशास्त्रमपहायापरत्र मीमांसनम् ॥

अत एव स्वयमपि तु आनन्दमयाधिकरणोपक्रमे "एवमेक-मपि ब्रह्मापेक्षितोपाधिसंबन्धं निरस्तोपाधिसंबन्धं चोपास्यत्वेन ज्ञेय-त्वेन च वेदान्तेषूपदिश्यत इति प्रदर्शयितुं परो ग्रन्थ आरभ्यते" इति स्पष्टमुपासनापरत्वं वेदान्तानामभिहितम्, एवमेव तु क्रममु-क्त्यर्थोपासनानामिव तत्र तत्र कर्मसमृद्ध्यर्थोपासनानामभ्युदयफला-र्थानां चोपासनानामिहैव निरूपणमिति न बहु निरूपणीयं निरूपकेषु । एवं च कर्मसमृद्ध्यर्थोपासनानामपीहैव निरूपणीयत्वे कर्मावबोधान-न्तर्यपक्षाक्षेपोऽनवधानेन स्वपक्षाक्षेप इति सिद्धमस्खलितं कर्मावबो-धानन्तर्यम् ॥

अत एव तूपसंहारेऽपि "अनावृत्तिः शब्दादनावृत्तिः शब्दा-दि"ति भगवान् कृष्णद्वैपायनोऽनावृत्तिलक्षणं शास्त्रफलमुपासकस्यैव

१ कर्मज्ञानोपासनालक्षणार्थप्रतिपादनपरो वैदिकसन्दर्भः ।

Digitized by Google

प्रामाण्यमूचे । ततश्च भूतब्रह्मनिरूपणपरेऽपि शास्त्रे भव्यया अप्युपासनायाः अधिकारीतिकर्तव्यताफलपर्य्यन्तं विवेचनात् फलनिष्ठो भूतत्वभव्यत्वलक्षणो विशेषोऽकिञ्चित्कर इति साधु प्रसाधितम्, अत एव तु भव्यस्य धर्मस्य ज्ञानकालेऽसत्त्वात् भूतस्य च ब्रह्मणो नित्यनिर्वृत्तत्वादिति प्रतिपाद्यवैलक्षण्यसमर्थनमपि नोऽप्यकिंचित्करः, न ह्युदासीनस्य प्रतिपाद्यनिष्ठतादृशावान्तरविशेषस्य प्रतिपाद्यनिरूपणक्रमभङ्गप्रयोजकतासंभवः इतरथा तु "अथातः शेषलक्षण"मिति तृतीयाध्याये जैमिनीयद्वितीयलक्षणेन कर्मभेदमभिधाय शेषशेषित्वचिन्तनपरतया प्रवृत्ते शेषशेषित्वविचारोऽप्यसंगतः स्यात् कर्मभेदतच्छेषशेषित्वादेरर्थस्य क्रमनिरूपणीयस्यापि विलक्षणत्वात्, न हि कर्मब्रह्मनिष्ठो विशेष एव पौर्वापर्य्यभङ्गप्रयोजको नापर इति शक्यते वक्तुम् ॥

एतेन "एवं च सत्यथातो ब्रह्मजिज्ञासेति तद्विषयः पृथक् शास्त्रारम्भ उपपद्यते प्रतिपत्तिविधिपरत्वे हि अथातो धर्मजिज्ञासेत्येवारब्धत्वान्न पृथक्शास्त्रमारभ्येत, आरभ्यमाणं चैवमारभ्येत—अथातः परिशिष्टधर्मजिज्ञासेति, अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासेतिवत्" इत्यपि प्रत्युक्तमथातोधर्मजिज्ञासेति सामान्यतोधर्मनिरूपणं प्रतिज्ञाय कर्मरूपं तमभिधाय सिद्धरूपस्य तस्याभिधाने शिष्यावधानाय अथातो ब्रह्मजिज्ञासेत्येव सूचयितुमुचितत्वात्, शिष्यावधानफलं हि प्रतिज्ञाशास्त्रं, न च शिष्यावधानोपधानं यथा ब्रह्मजिज्ञासेत्युक्त्या तथा परिशिष्टधर्मजिज्ञासेति सूत्रणेऽपि । किं च पूर्वं कर्मब्रह्मसाधारणधर्मनिरूपणं प्रतिज्ञायापि चोदनालक्षणोऽर्थो धर्म इति सूत्रेण लिलक्षयिषितः क्रियारूपोधर्म एव निरूपयितुमुपक्रान्त-

स्तथा च परिशिष्टधर्मजिज्ञासेत्युक्तौ चोदनालक्षण एव कश्चित् परिशिष्टोधर्म इह जिज्ञास्यते? आहोस्विज्जगज्जन्मादिलक्षणोऽपर इति शिष्याः संशयीरन् जन्माद्यस्य यत इति ब्रह्मलक्षणवाक्यार्थावगमात् प्राक्, यथास्थितसूत्रकरणे तु कर्मब्रह्मणोर्वेदार्थत्वलक्षणसामान्येऽपि इदमप्रथमः कश्चिदयमपूर्वो धर्मो निरूप्यते यो लक्षयिष्यते जन्माद्यस्य यत इति भ्रान्तशङ्काः शिष्याः स्पष्टमवबुध्यन्त इति युज्यते तथा सूत्रसंदर्भो महर्षेर्व्यासस्य, किं च अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासेति दृष्टान्तावष्टम्भोऽपि परस्य न शोभनः, यतः सूत्रकृन्महर्षिरिह विशिष्याभिधेयमुपादत्ते क्रत्वर्थपुरुषार्थयोरिति न तु परार्थयोरिति एवं चेह न परिशिष्टधर्मजिज्ञासेति वक्तव्यं किन्तु ब्रह्मजिज्ञासेत्येवेति न किंचिदेतत्। किं च क्रमनिरूपणीययोरत्यन्तसाजात्यनिर्बन्धे गन्धवत्याः पृथिव्या निरूपणानन्तरं निर्गन्धानामपां निरूपणं, विशेषगुणशून्ययोः कालदिशोर्निरूपणसमनन्तरं च ज्ञानेच्छाद्यनेकविशेषगुणयोगिन आत्मनो निरूपणमसंगतमित्यप्यापद्येतेति बहु व्याकुलीस्यात्॥

यदपि केचन ब्रह्मजिज्ञासायां कर्मावगमानन्तर्यमसहमानाः "सति चानन्तर्यार्थत्वे यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षते, एवं ब्रह्मजिज्ञासाऽपि यत्पूर्ववृत्तं नियमेनापेक्षते तद्वक्तव्यं, स्वाध्यायानन्तर्यं तु समानं, नन्विह कर्मावबोधानन्तर्यं विशेषः, न, धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः," इति साटोपमूचुस्तत्प्रतिब्रूमहे—अत्र स्वाध्यायानन्तर्यं तु समानमित्युक्त्या ब्रह्मजिज्ञासायां स्वाध्यायानन्तर्यस्यौदासीन्येन विवक्षितुमशक्यत्वेऽपि धर्मजिज्ञासायां स्वाध्यायानन्तर्यमङ्गीकृतमिति

स्पष्टं सिध्यति, तथैवं वादी प्रष्टव्यः, किं यत्किंचित्स्वाध्यायाध्ययनानन्तर्यं सर्वस्वाध्यायाध्ययनानन्तर्यं वा विवक्षसि, तत्र सर्वस्वाध्यायाध्ययनासम्भवेन प्रथम एवावलम्बनीयः पक्षस्तथा च यथा यत्किंचित्स्वाध्यायाध्ययनानन्तर्यं धर्मजिज्ञासायामेवं नित्यनैमित्तिकादियत्किंचित्कर्मावगमानन्तर्यं ब्रह्मजिज्ञासायामपि सुवचं, यतो भवत्पक्षेऽपि संन्यासिनामेव ज्ञानाधिकारिताया व्यवस्थापनेन संन्यासप्रतिनियतकर्मावगमानन्तर्यस्य भवतोऽप्यापतितत्वात् ब्रह्मचर्यस्य च सर्वाश्रमप्रकृतित्वेन तदनन्तरमेव संन्यासाधिकारिताया वक्तव्यत्वेन तदवगमानन्तर्यस्यावश्याभ्युपेयत्वाच्च । न च ब्रह्मचर्यसंन्यासयोरुपलक्षणत्वमेव ब्रह्मजिज्ञासायां न विशेषणत्वमिति वक्तुं पारयसि, तथा सति संसारस्यानादित्वेन यदा कदाचिद्विद्यमानयोस्तयोरव्यावर्तकत्वेन तत्कारणताया एव दुर्निर्वहत्वप्रसङ्गादित्यादि मदीयब्रह्मसूत्रवृत्तावनुसन्धेयम् ।

अथेदमवदधीमहि कर्मावगमानन्तर्यं प्रद्विषतामपि स्वाध्यायानन्तर्यं कर्मब्रह्मसाधारणं बोढव्यमत एव इहैव "स्वाध्यायानन्तर्यं तु समान"मित्युक्तं, ततश्च स्वाध्यायानन्तर्यस्याथ–शब्दार्थत्वासंभवेऽपि स्वाध्यायाध्ययनाव्यभिचारित्वं ब्रह्मजिज्ञासायां प्रयत्नयतेनापि व्यवस्थापनीयं, न च तत्संभवति वेदाध्ययनानधिकारिणामपि ब्रह्मावगमसम्पत्तिसिद्धेरसकृत्पुराणेतिहासेषु प्रसिद्धेः । एवं च यथा स्वाध्यायानन्तर्यं ब्रह्मजिज्ञासायां भवता समर्थनीयं तथैव कर्मावगमानन्तर्यं ममापि सुसमर्थमिति न कश्चिद्विशेषोऽभिनिवेशं विना ।

एतेन धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरिति विभीषिकाप्रदर्शनमपि मन्देष्वेव स्वभावभीरुषु न तु

युक्तितनुषेषु कुशलेषु पूर्वोक्तरीत्या ब्रह्मजिज्ञासायां कर्मावगमानन्तर्यस्य कर्मब्रह्मजिज्ञासयोः स्वाध्यायानन्तर्यस्येव सुनिर्वहत्वात् ।

यदपि परे कर्मब्रह्मजिज्ञासयोरधिकृताधिकारं शेषशेषिभावं चामृष्यमाणा भगवद्बोधायनपक्षं प्रतिक्षेप्तुमुद्यच्छन्तो कुशकाशमवलम्बमानाः तदेतदपि प्रमाणपरतन्त्राणामरुन्तुदम्, यतः, "अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः । इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्" इति स्मृतिः कर्मस्वधिकृतस्यैव स्पष्टं मोक्षाधिकारमाह, अतथाऽऽचरतश्चाह सपातं पुनरनधिकारमपरा स्मृतिः "अनधीत्य द्विजो वेदाननुत्पाद्य तथा सुतान् । अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ॥ इति, एवं च यथा ऽऽहिताग्नेरेवाग्निसाध्येषु कर्मस्वधिकारो यथा वा चातुर्मास्येनेष्टवत एव सोमेऽधिकारो यथा वा विधिवदधीतवेदस्यैव कर्मस्वधिकारस्तथाऽवगतकर्मण एवोत्तरमीमांसास्वधिकार इति सिध्यत्यधिकृताधिकारः कर्मब्रह्ममीमांसयोः, अननुष्ठितकर्मणामपि ब्रह्मजिज्ञासोदयेन कर्मणामयथाभावस्तु अनधीतस्वाध्यायानामपि ब्रह्मजिज्ञासोदयेन समानयोगक्षेम इति न ममैव बहु प्रयतनीयमित्यत्रूमहि ।

अस्ति च शेषशेषिभावोऽपि कर्मब्रह्ममीमांसयोः, कर्मणां ब्रह्मजिज्ञासोद्देशेनानुष्ठितानां ब्रह्मजिज्ञासाफलकत्वेन परोद्देशप्रवृत्तत्वरूपपारार्थ्यस्याञ्जस्येनैव समर्थनात् । न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति श्रुतिस्तु भगवदनर्पितानां कर्मणां मोक्षहेतुत्वाभावमाह न तु कर्मणामेवाथयथाभावं, त्यागेनैके अमृतत्वमानशुरिति इहैव त्यागस्य मोक्षहेतुत्वाभिधानात् त्यागश्चेह "यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते" इति स्मार्तो ग्राह्यो न पराभिमतः कर्मस्वरूपत्यागस्तथा च सकामकर्मणां

ज्ञानोत्पादविरोधित्वेऽपि भगवदर्पितानां निष्कामकर्मणां ज्ञानहेतुतया शेषशेषिभाव: साधु समर्थितो भवति ।

अत एव तु संक्षिप्याखिलवेदान्तार्थनिरूपणव्याजेन अष्टादशाध्यायीस्वरूपगीतार्थोपसंजिहीर्षया च प्रवृत्तेऽष्टादशाध्याये सन्न्यासस्य त्यागस्य च तत्त्वं पृष्टवतेऽर्जुनाय "काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदु: । सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणा:" इति भगवता पूर्वमज्ञानावस्थायामनुष्ठितानां काम्यकर्मणां संसारस्यानादितया भोग्यकर्मप्रचयस्य चानन्ततया भोगेन क्षपणासंभवाद् भगवति भरन्यास: सन्न्यास:, सर्वकर्मफलत्यागश्च त्याग इत्युपदिष्टो न तु कर्मणां स्वरूपत्याग: । एवमेव तु त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिण: । यज्ञदानतप: कर्म न त्याज्यमिति चापरे ॥ इति परमतमुपन्यस्य अतिस्निग्धाय शिष्यायार्जुनाय शास्त्रतत्त्वमुपदिदिक्षु: श्रीभगवान् ।

"निश्चयं शृणु मे तत्र त्यागे भरतसत्तम! ।
त्यागो हि पुरुषव्याघ्र! त्रिविध: परिकीर्तित: ॥
यज्ञो दानं तप: कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ ! निश्चितं मतमुत्तमम् ॥
नियतस्य तु सन्न्यास: कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामस: परिकीर्तित: ॥
दु:खमित्येव यत् कर्म कायक्लेशभयात् त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥

Digitized by Google

कार्य्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥

इत्यभिदधौ,

ततश्च सात्त्विकराजसतामसभेदभिन्नं त्यागमुपदिशता पावनानि मनीषिणामिति कर्मणां ज्ञानवतामप्युपादेयतामभिदधानेन भगवता कर्मफलत्याग एव त्यागो न तु कर्मणां स्वरूपत्याग इति स्पष्टमाख्यायते इति न किञ्चिच्चोद्यमवशिष्यते ॥

तदेवं सति यो वेदान्तवाक्यानां सहकारितयाऽपि कर्मानपेक्षाप्रतिपादनपरः " न च वाक्यं सहकारितया कर्म्माण्यपेक्षत इति युक्तम् । अकृतकर्म्मणामपि विदितपदतदर्थसङ्गतीनां समधिगतशाब्दन्यायतत्त्वानां गुणप्रधानभूतपूर्वापरपदार्थाकाङ्क्षासन्निधियोग्यतानुसन्धानवतामप्रत्यूहं वाक्यार्थप्रत्ययोत्पत्तेः । अनुत्पत्तौ वा विधिनिषेधवाक्यार्थप्रत्ययाभावेन तदर्थानुष्ठानपरिवर्जनाभावप्रसङ्गः । तद्बोधतस्तु तदर्थानुष्ठानपरिवर्जने परस्पराश्रयः । तस्मिन् सति तदर्थानुष्ठानपरिवर्जनं, ततश्च तद्बोध इति । न च वेदान्तवाक्यानामेव स्वार्थप्रत्यायने कर्म्मापेक्षा, न वाक्यान्तराणामिति साम्प्रतम् । विशेषहेतोरभावात् " इति भामतीनिबन्धः सोऽपि अल्पसुधिषणाधर्षणायित एव, ज्ञानिनोऽपि कर्मणामनुष्ठेयत्वप्रतिपादकनिरुक्तभगवद्गीतावाक्यविरोधाद् वक्ष्यमाणयुक्तिविरोधाच्च ।

अथैवं पराक्रम्यते—इह वाक्याद्वाक्यार्थावगमः निष्कम्पप्रवृत्तिनिवृत्तिलक्षणफलपरिपाकपर्य्यन्तं विवक्षितोऽथवा जरद्गवादिवाक्यसाधारण्येन पदार्थोपस्थितितत्संसर्गाग्रहपर्य्यवसन्नोऽथवा खपुष्पनरशृङ्गादिप्रतिपादकवाक्यसाधारण्येन वैकल्पिकप्रत्ययरूपोऽत्यन्तासदर्थसाधारण इति विवेचनीयं, तत्र द्वितीयतृतीयपक्षयोरुत्पन्नोऽपि

बोधो न निष्कम्पप्रवृत्तिलक्षणफलपाकपर्य्यवसायीति प्रथम एव पक्षः क्रोडीकरणीयस्तत्सामग्री च नाकाङ्क्षासन्निधियोग्यत्वानुसन्धानमात्रं पौष्कल्येन तद्वतामपि अननुष्ठितकर्म्मणामदृष्टविशेषशून्यानां दशकृत्वः शाब्दबोधयतामपि लौकिकवैदिकवाक्येभ्यः प्रवृत्तिनिवृत्त्योरदर्शनात्, अधीष्व वत्सेति प्रत्ययितत्तरपित्रादिवाक्यं शृण्वतां तदर्थं सम्यगाकलयतामपि अदृष्टविशेषप्रतिबन्धेऽधिजिगांसानुदयदर्शनाददृष्टविशेषेषु तथाप्रवृत्तिदर्शनात्तत्कारणीभूतकर्म्मणां कारणत्वसिद्धेरवर्जनीयत्वात्, अदृष्टस्य साधारणकारणत्वेन तद्धेतुतासिद्धेरनुल्लङ्घनीयत्वाच्च । यदि तु साधारणकारणत्वाभ्युपगमेऽपि असाधारण्येनादृष्टतत्कारणकर्म्मादेः कारणत्वं निषिषेधयिषितमिति मन्यसे तर्हि अदृष्टादेः सामान्यतः साधारणकारणत्वेऽपि तत्तत्कार्य्यविशेषे तत्तदसाधारणरूपेणैव कारणताया वक्तव्यत्वादसाधारकारणत्वमप्यावश्यकमिति रूपविशेषेण साधारणासाधारणकारणतायाः सुवचतया न तदपि चोद्यमवतरति, अस्तु वा साधारणकारणमेवादृष्टतज्जनककर्म्मादिकं तथापि न नो द्वेषस्ततोऽप्यस्मदभिप्रेतादृष्टादिकारणत्वसिद्धेरप्रत्यूहत्वात् ।

यच्च अकृतकर्म्मणां वाक्याद्वाक्यार्थावगमानुत्पत्तौ विधिनिषेधशास्त्रैर्वाक्यार्थावगमासंभवेन तदनुष्ठानवर्जनाभावोद्भावनं तत्तु शिष्यधीव्यामिश्रणमात्रं भवन्मते पूर्वपूर्वाध्यासव्यक्तीनामुत्तरोत्तराध्यासहेतुताया इव पूर्वपूर्वादृष्टव्यक्तीनामुत्तरोत्तरभाविकार्य्यहेतुतायाः सिद्धान्तसिद्धतया प्राचीनकर्म्मजन्यादृष्टविशेषेण विधिनिषेधशास्त्रेभ्यो निष्कम्पप्रवृत्तिनिवृत्तिरूपफलपर्य्यवसायिबोधसम्भवेन तादृशशङ्कायाः सुदूरपराहतत्वात्, ।

एतेन "तद्बोधतस्तु तदर्थानुष्ठानवर्जने परस्पराश्रयः तस्मिन् सति तदर्थानुष्ठानवर्जनं ततश्च तद्बोध" इति भामतीनिबन्धोऽप्यपास्तः, विधिनिषेधशास्त्रवाक्यार्थे जननीये पूर्वोपार्जितकर्मजन्यादृष्टव्यक्तेरपेक्षणीयतया तादृशादृष्टव्यक्तया च पूर्वोत्पन्नया स्वोत्पत्तौ स्थितौ ज्ञप्तौ वा जनिष्यमाणायास्तादृशविधिनिषेधशास्त्रबुद्धेरनपेक्षणीयतयाऽपेक्षितुमशक्यत्वाच्च परस्पराश्रयदोषशङ्काया अवतरितुमप्यशक्यत्वात्, ।

न हि ययाऽदृष्टव्यक्त्या विधिनिषेधशास्त्रार्थावगमः सैव व्यक्तिस्तयैव विधिनिषेधशास्त्रार्थावगत्या तदानीन्तन्या जन्येत्यातिष्ठामहे यतो दोषसम्भावना स्यात् ।

यदपि "तत्त्वमसीति वाक्यात् त्वंपदार्थस्य कर्तृभोक्तृस्वरूपस्य जीवात्मनो नित्यशुद्धबुद्धोदासीनस्वभावेन तत्पदार्थेन परमात्मनैक्यमशक्यं द्रागित्येव प्रतिपत्तुम् आपाततोऽशुद्धसत्त्वैर्योग्यताविरहनिश्चयात् । यज्ञतपोदानतनूकृतान्तर्मलास्तु विशुद्धसत्त्वाः श्रद्दधाना योग्यतावगमपुरःसरं तादात्म्यमवगमिष्यन्तीति चेत् । तत्किमिदानीं प्रमाणकारणं योग्यतावधारणमप्रमाणात्कर्म्मणो वक्तुमध्यवसितोऽसि प्रत्यक्षाद्यतिरिक्तं वा कर्म्मापि प्रमाणम् । वेदान्ताविरुद्धतन्मूलन्यायबलेन तु योग्यतावधारणे कृतं कर्म्मभिः" ॥

इति भामत्यामुक्तं तदपि यथाश्रुतप्रतिपत्तृशिष्यप्रज्ञाप्रतारणमात्रम्, अथ तत्किमिदानीं प्रमाणकारणं योग्यत्वावधारणमप्रमाणात्कर्मणो वक्तुमध्यवसितोऽसि प्रत्यक्षाद्यतिरिक्तं वा कर्मापि प्रमाणमिति वदता प्रमाणस्य स्वरूपतोऽनन्यापेक्षस्य प्रमाकारणत्वमभिमन्यसे? उत प्रमाणस्यैव प्रमाणसहकारित्वं नाप्रमाणस्येत्यभिप्रेयते ? अथवा

Digitized by Google

प्रमाणसहकारितामात्रेण प्रमाणत्वमापाद्यते? नाद्यः स्वरूपसतश्च-क्षुरादेः प्रमाकारणत्वाङ्गीकारे साततिककार्योत्पादप्रसङ्गात्, तदेक-मात्रकार्योत्पादे च कार्यान्तरानुत्पादप्रसङ्गात्, न ह्येकं किंचित्पर्याप्तं स्वकार्ये किंतु संभूयेति सिद्धान्तव्याघाताच्च, तथा सति चक्षुःपिधा-नभित्तिव्यवधानादिसत्त्वेऽपि स्वरूपसता चक्षुषा ज्ञानोत्पादावश्यं-भावप्रसङ्गाच्च। द्वितीये तु प्रमाणस्य चक्षुरादेर्व्याप्तिज्ञानादिस्वरूपा-नुमानप्रमाणसहकारित्वेऽपि नैष नियमो यत्प्रमाणमेव प्रमाणसह-कारीति अप्रमाणस्यापि कामलादिदोषाभावस्य चक्षुरादिसहकारि-त्वादप्रमाणस्यापि वा बाधाद्यभावस्यानुमानादिसहकारित्वात्, अतादृशस्यैव शक्तिज्ञानस्य गवये सादृश्यज्ञानादेश्च शब्दोपमान-सहकारितायाः सर्वसंप्रतिपन्नत्वाच्च, तृतीयस्तु पक्षोऽप्रमाणस्यापि शक्तिज्ञानादेः प्रमाणं सहकुर्वतोऽप्यप्रमाणत्वस्य सर्वसंप्रतिपत्त्यैव परास्तः।

यदि तु योग्यत्वावधारणं कृपासामग्र्येव भवति न तु कर्मादृष्टादिद्वारेत्यभिप्रैषि तर्हि कर्मादृष्टादिकं न कृपासामग्र्यामन्त-र्भवतीति कुतोऽवधारितमायुष्मता, यदि वेदान्ताविरुद्धतन्मूलन्या-यबलेन योग्यत्वावधारणे तद्भिन्नस्य कर्मादेरन्यथासिद्धिं समर्थयसे तर्हि सहस्रशो वेदान्ताविरुद्धतन्मूलन्यायाभियोगभाजामपि तत्त्व-मस्यादिवाक्येभ्योनाखण्डार्थधीसमुत्पत्तिरिति तस्यैवान्यथासिद्ध्या कुतो न संतुष्यसि, यदि तु कर्मादृष्टादेरन्तःकरणशुद्धावेवोपयोगो न तु वाक्यार्थज्ञानेऽपीत्यभिसंधत्से, तत्किमदृष्टं न कार्यमात्रे हेतुः, वेदान्तवाक्योत्था धीर्वा न[1] कार्यमात्रान्तर्गता, केनचिद्रूपेण साधारण-

१ वेदान्तवाक्योत्थधियमवष्टभ्य पराक्रान्तमस्माभिर्वृत्तिषु।

कारणस्यैव वा सतो रूपान्तरेण नानाधारणकारणत्वमेकस्य वा कारणस्य नानाकार्यजनकत्वं न निरीक्षितवानसि न जातु दैवं चेवाच पञ्चममिति पारमेश्वरवचसि वा श्रवणमपि श्रद्धां व्यधाः, यद्देवं कर्मजन्यादृष्टस्यान्तःकरणशुद्धावेवोपयोगमतिप्रयासेन समर्थ्य वाक्यार्थबुद्धौ तस्यान्यथासिद्धिसमर्थने कृतपरिकरो गृहीतदीक्ष इवाभासि ।

यदि त्वदृष्टस्य कारणत्वेऽपि कर्माणि तेनान्यथासिद्धानीति ब्रूषे, एवं तर्हि पाणिव्यापारव्यवहितत्वात्कुलालस्य घटहेतुत्वं स्वव्यापारव्यवहितत्वाद्दण्डस्यैव वा तद्धेतुत्वं दुःसमर्थं स्यात्, न स्याच्च रवेरर्थप्रकाशकत्वं किरणव्यवहितत्वात्, वृष्टेर्वा सुभिक्षहेतुत्वं कृषिनदीपूरभेदादिव्यवहितत्वात्, वेदेऽप्याहरण्यादीनां द्रव्यद्वारकक्रयसाधनत्वममुख्यं स्यादिति त्वयापि "न हि व्यापारेण व्यापारिणोऽन्यथासिद्धि" रित्यङ्गीकरणीयं, तत एव च ममापि कर्मणां कारणत्वनिर्वाह इति किन्ते चोद्यमवशिष्यते । अत एव तु नापूर्वेण यागोऽन्यथासिद्ध इति वेदविदामुद्घोषोऽन्यथा तु अपूर्वेण यागोऽन्यथासिद्ध इति सर्वैवोन्मूलिता मीमांसेत्यतिकष्टम्, एवमेव तु भगवान् कृष्णद्वैपायनोऽपि कर्मजन्यस्य भगवत्प्रसादलक्षणापूर्वस्य सर्वफलहेतुतामाह "फलमत उपपत्ते"रिति, एवं च तत्त्वमस्यादिवाक्यार्थबुद्धौ तद्धेतुषु योग्यतादिज्ञानेषु च प्रत्येकमेव कार्येषु कर्मणां कारणत्वसिद्धेरवर्जनीयतया ज्ञानेऽपि कर्मणां कारणत्वमित्यविचाल्योऽयं बृहस्पतेरपि बोधायनीयो वैदिकः पक्ष इति कृतधियां सुधियां परामर्शः ॥

यदपि प्रवर्तकमानमेयत्वोदासीनमानमेयत्वलक्षणवैलक्षण्यवता प्रमाणेन बोधितत्वात्कर्मब्रह्मणोर्न तत्प्रतिपादकशास्त्रस्य क्रमनियमः, धर्मो हि यागादिलक्षणः प्रवर्तकमानेन यजेतेत्यादिना मी-

यते, ब्रह्म तूदासीनेन तत्त्वमस्यादिवाक्येनेति, तदिदमप्यविचारसारं यतो मानभेदो न मेयवैजात्यं प्रयोजयति एकस्मिन्नेव घटादौ प्रत्यक्षानुमानादिप्रमाणसंप्लवस्य, धर्माधर्मयोर्वा अनुमानागमादिलक्षणप्रमाणस्य संप्लवेऽपि प्रमेयस्यैकजातीयत्वात्, यदि तु नियोगविषयत्वतदविषयत्वलक्षणवैलक्षण्यं कर्मब्रह्मनिष्ठं विवक्ष्यते तदा तादृशवान्तरविशेषस्य सर्वेषाम्प्यावश्यकत्वेन कुत्रापि क्रमो विवक्षितुं न शक्यः स्यात्तस्य द्वादशाध्याय्या अपि प्रतिपाद्यार्थभेदेन क्रमाविवक्षणेऽसंगतत्वापत्तिरिति वृद्धिमिच्छतोमूलहानिरित्यतिकष्टम् ॥

किंचाथ—शब्दस्य कर्माधिगमनैरपेक्ष्येण साधनचतुष्टयसंपत्त्यानन्तर्यार्थकत्वे शूद्राणामपि ब्रह्मविद्याऽधिकारप्रसङ्गो दुर्वारः कर्मिणां तु ब्रह्मविद्याऽधिकारे विधिवदधीतवेदानामेव कर्मस्वधिकृतत्वेन शूद्रादेश्च तदसंभवान्नापत्तिः । किंच वर्णाश्रमधर्मनिरपेक्षस्य ज्ञानमात्रस्य मोक्षमुख्योपायत्वे अपशूद्राधिकरणमपि कदर्थितं स्यात् ।

केचित्तु अनुपनीतानां वरुणबृहस्पतीन्द्रादीनां ब्रह्मविद्यावत्त्वाधिगमादनुपनीताः शूद्रा अपि विषयदोषदर्शनाकृष्टा लौकिकसामर्थ्यभाजश्च प्रवर्तेरन् विद्यास्विति ते मात्र प्रवर्तिषत भ्रान्त्येति बोधनमपशूद्राधिकरणफलं, देवास्तु देवविग्रहग्राहकपुण्यपुञ्जेन स्वतःप्रतिभातवेदा इति तेषामुपनयनं नावश्यकमित्यातस्थिरे, तदिदमसमीक्ष्याभिधानमिति न मृष्यामहे देवेष्वपि ब्रह्मक्षत्त्वादिलक्षणवर्णविवेकविभागसद्भावेन तत एव तेषामुपनयनकल्पनेनानुपनीतत्वविरहात्, तथा हि श्रुतिः “ब्रह्मा बृहस्पतिः क्षत्रमिन्द्रो मरुतो वै देवानां विश” इति,

न च आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रुत्या श्रुतिमननसन्तानातिशयस्यैव साक्षात्कारहेतुतया प्रतिप-

त्त्वादकृततथाश्रवणस्य नाधिकारो ब्रह्मविद्यास्विति न दोष इति, वाच्यम्, तथा सति मुमुक्षुत्वादीनामिव श्रवणजन्यातिशयस्यापि ब्रह्मज्ञानात्पूर्वमपेक्षणीयत्वे साधनपञ्चकस्य पूर्ववृत्तत्वं प्राप्तमिति साधनचतुष्टयपूर्ववृत्तित्वोक्तिर्भृशं क्षुभ्येत, तदेष्टापत्तौ च कर्मावबोधपूर्वभावे एव भगवद्बोधायनाभिमते किमित्यकारणः प्रद्वेषः, न चानवगतकर्मणामप्यधीतवेदान्तानां ब्रह्मजिज्ञासोदयादवगतकर्मणामपि च साधनचतुष्टयशून्यानां जिज्ञासाऽनुदयान्न तथेति युक्तं, "कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते" "ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः" इत्यादिप्रमाणशतेन कर्मणां ज्ञानहेतुतासिद्धौ कर्माधिगमपूर्ववृत्तित्वोक्तेरावश्यकतया कर्मावगमे* वैजात्यमभ्युपेत्य जन्मान्तरसाधारणकर्मावगमस्य ब्रह्मज्ञानहेतुतां चाङ्गीकृत्य व्यभिचारयोः सुपरिहरत्वेन कर्मब्रह्मावगत्योः शास्त्रावगतकार्यकारणभावस्याबाध्यमानत्वात् । एवमेव तु अत्यन्तान्तरङ्गं चित्यमुपलभ्य भगवानपि गीतासु "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमित्यादिना कर्मणामुपादेयत्वमसकृदुपदिदेशेत्यलमतिह इह चापरञ्च चेति ॥

अथेदमालोचयामः—साधनचतुष्टयसंपन्नाः शूद्रादयोऽपशूद्राधिकरणेन ब्रह्मविद्यायामनधिकारं बोध्यन्ते ? उतासंपन्नाः ? आहोस्विदुभयसाधारणाः, न तावदाद्यः साधनसंपन्नानां शूद्राणामपि पुराणेतिहासप्रमाणिकाया विशिष्टज्ञानवत्ताया दुरपह्नवत्वेन उपायो हि वार्यते न फलमिति न्यायेन फलपरिपाकवतां तादृशां धर्मव्याधप्रभृतीनां ब्रह्मविद्याऽनधिकारितायाः बाधितमर्थं वेदोऽपि न बोध-

* यावता ज्ञानोत्पादप्रतिबन्धककल्मषापनयसम्भवस्तावत्त्वलक्षणवैजात्यमिहाभिमतम् ॥

यतीति न्यायेन श्रुतिसहस्रेणापि बोधयितुमशक्यत्वात् । व्याधस्य हि विद्यासु विनयेन स्वानधिकारं ख्यापयतोऽतिनिर्बन्धेन गुरुकरणं स्मर्यते, ततश्च यं महर्षयोऽपि ब्रह्मविद्यासु उपदेष्टारं चक्रिरे तस्य स्वयं विद्यायां कः संशयोऽवशिष्यते, न द्वितीयः साधनशून्यानामनधिकारितायाः स्वतः परिप्राप्तत्वात्, न ह्यनधिकारादनधिकार इत्यपि क्षमाय, तथा सत्यनधिकारिणां साधनचतुष्टयशून्यानामैहिकामुष्मिकार्थानुरागवतां श्रोत्रियाणामप्यनधिकारबोधनाय पृथगधिकरणारम्भस्यावश्यकत्वापातात् । न हि साधनशून्यैः शूद्रैरेवाधिकमपराद्धं, यदि तु अध्ययनगृहीतस्वाध्यायजन्यतदर्थज्ञानवत एव वैदिकेष्वधिकार इत्यपशूद्राधिकरणे अध्ययनवेदवाक्यश्रवणादिविधुरस्य शूद्रस्य विद्याऽधिकारनिषेधात्, न शूद्राय मतिं दद्यादिति स्मृतेरापाततोऽपि तस्य विद्यामहिम्नाऽवगत्युपायासंभवेन तदर्थित्वानुपपत्तेश्च शूद्रस्य विद्यायामनधिकार इति ब्रूषे हन्त तर्हि अर्थित्वसामर्थ्यशून्यशूद्रस्य विद्याऽनधिकारबोधने अपशूद्राधिकरणवैयर्थ्यशङ्कां नोत्तीर्णोऽसीति घट्टकुट्यां प्रभातं, न च विषयसौष्ठवेनार्थिताया लौकिकसामर्थ्यसत्त्वेन च प्रवर्तमानाः शूद्राः प्रत्याचिख्यासिता विद्यायामिति तदधिकरणसङ्गतिरिति वाच्यम्, एवं सति हि साधनचतुष्टयसंपन्नानधिकारिणोनिर्विशेषमात्मतत्त्वं चाधिकृत्य प्रवृत्तासु ब्रह्मविद्यासु मुधैव चेच्छूद्रा निराक्रियन्ते तर्हि नटान् विटान् गणिका गायकांश्चापि प्रत्याख्यातुमधिकरणान्तरमारम्भणीयं स्यान्न हि एतेऽप्यधिकुर्वते, कश्च तथा सति कामहतं श्रोत्रियमपेक्ष्य शूद्रादेर्विशेष उक्तः स्यादनधिकारादेवानधिकारसमर्थने इति पूर्वमेव समगरिष्महि ।

यदि तु वेदाध्यायनरागोरर्थतः स्वरूपतश्च ग्रहणानधि-

कारो बोध्यत इत्युच्यते तर्हि अविद्यैकप्रत्युपस्थापितस्वरूपस्य ग्रहीतृग्राह्यग्रहणस्वरूपप्रपञ्चस्य वस्तुयाथात्म्यज्ञानैकनिवर्त्यस्य तेनैव निवर्हणे किं वेदग्रहणेन । न हि भवन्मते कर्मकाण्डस्येव ज्ञानकाण्डस्य प्रवृत्तिरविद्यावत्पुरुषमवष्टभ्य यतो वर्णाभिमानिनस्तस्य निषेधः सफल इति वक्तव्यं स्यात् । यदि तु व्यवहारप्रवृत्तं पुरुषमभिप्रेत्य निषेधसाफल्यं समर्थयसे तदाऽप्यपेतब्रह्मक्षत्रादिभेदमात्मानमवगच्छन्तमुपक्रम्य प्रवृत्तेषु वेदान्तेषु तादृशार्थाभिधाने कामचिकित्सातन्त्रयोरपीहेव मीमांसनप्रसङ्गः, अपशूद्राधिकरणविचारस्येव तयोरप्युपयोगानुपयोगयोः साक्षात्पारम्पर्येण च समानत्वात् । किं च कथमपि शिष्यस्य वर्णाश्रमकर्मवयोऽभिमानसंबन्धोभवेदपि परं गुरोर्ज्ञानस्य परां काष्ठामुपेयुषस्तदसंभवेन "संस्कारपरामर्शात्तदभावाभिलापाच्चे"त्यादिसूत्रेषु शरीरमात्राधेयातिशयानां तदभिमानवत्पुरुषाधेयातिशयानां वा संस्काराणामतिदूरोपकारकाणामिहापेक्षितत्वाभिधानमसंगतमित्यतिस्फुटमेव, क्षत्रियत्वगते श्चोत्तरत्र चैत्ररथेन लिङ्गादित्यनेनापि च पौत्रायणस्य क्षत्रियत्वसमर्थनं व्यर्थं विद्यायाः सर्वाभिमानविप्रतीपस्वभावायाः क्षत्रियत्वाद्यनपेक्षत्वात्तद्विरोधिस्वरूपत्वाच्चेत्यसकृदवोचाम । यदि तु अधीतवेदो हि विदितवेदार्थो वेदार्थेष्वधिक्रियते, न च शूद्रस्य वेदाध्ययनमस्ति उपनयनपूर्वकत्वाद्वेदाध्ययनस्य, उपनयनस्य च वर्णत्रयविषयत्वादिति ब्रूषे तर्हि स्वस्ति भवते आयातोऽसि मार्गेण इदमभिधापयितुमेवायमस्मदीयो भगीरथरथपथाश्रयः, तद्यथा अध्ययनेन विदितवेदार्थस्य वेदार्थेषु कर्मोपासनाज्ञानेष्वधिकारः, तच्चाध्ययनमुपनयनपूर्वकमिति व्यापकोपनयननिवृत्त्या अध्ययननिवृत्तौ तद्व्याप्यानां कर्मोपासनाज्ञानानां निवृत्तिरिति फलति । ततश्चोपनयननिवृत्तिद्वार-

काध्ययनाख्यकर्मनिवृत्त्या शूद्रस्य ब्रह्मविद्यानिवृत्तिसाधने कठोक्तं विद्यायाः कर्मावगमानन्तर्यं, यदि तु साधनचतुष्टयस्यैव कर्मावगमस्य नाधिकारिविशेषणत्वमिति तत्पक्षाक्षेप इत्यभिसंधत्से तर्हि तदपि नातिशङ्कनीयमिति ब्रूमः, यतः स्वविषयानुष्ठानजन्यापूर्वसंबन्धेन कर्मावगमस्य यागस्येवापूर्वसंबन्धेन कारणतायाः सुघटत्वादधिकं तु अस्मदीय[१]वृत्तावनुसंधेयमित्युदास्महे ॥

साधनचतुष्टयसदसद्भावनिरपेक्षाः शूद्राः प्रत्याचिख्यासिता विद्यास्विति तृतीयस्त्ववशिष्टपक्षः पूर्वपराकृतपक्षद्वयसमानयोगक्षेम इति तदपाकरणाय न पृथग् यतनीयमवशिष्यते ॥

न चार्थितायाः सामर्थ्योपबृंहिताया एवाधिकारकारणत्वात्, केवललौकिकसामर्थ्यस्य चादृष्टे कर्मणि अपर्याप्ततया शास्त्रीयेऽर्थे शास्त्रीयं सामर्थ्यमप्यपेक्षितमिति तस्य शूद्रेष्वध्ययनविरहेण निराकृतत्वान्नावकल्पन्ते शूद्रा उपनिषद्भ्योऽधिगन्तुं ब्रह्मविद्यामिति वाच्यम् ॥

यतोऽपशूद्राधिकरणेन साधनचतुष्टयसंपन्ना वार्यन्ते? उतासंपन्ना इति जिज्ञासायामुक्तमेवावर्तते, इति समशङ्कोत्तरमिदं नाशङ्कनीयं, यदि तु साधनचतुष्टयसंपत्तावपि शूद्रा नाधिकृता विद्यायामिति बोधनमपशूद्राधिकरणकृत्यमित्युच्यते तर्हि किंमुद्रया तत्तस्य कृत्यमित्युच्यताम्, तच्च यदि वेदप्रयुक्त्यभावाच्छूद्राणामनधिकारबोधकं तदिति ब्रूषे तर्हि अस्तु शूद्रत्वाभिमानिनो द्विजत्वप्रयोज्येष्वाधानादिष्वनधिकारो यथा राजजातीयाभिमानकर्तृके राजसूये ब्राह्मणवैश्ययोस्तथाऽभिमन्यमानयोः, परं तु अयनायाद्यतीतमपेतब्रह्म-

१ ब्रह्मसूत्राणामक्षरस्वारस्यसंरक्षणेन ग्रर्थकथनरूपा व्याससूत्राणां वृत्तिर्मत्प्रणीता सामचिरान्मुद्रयितुमिच्छामः ।

मच शूद्रत्वादिभेदमसंसार्यात्मतत्त्वमधिकृत्य प्रवृत्तासु ब्रह्मविद्यासु साधनचतुष्टयसंपन्नस्य जात्या शूद्रस्य शूद्रत्वाभिमानरहितस्यानधिकारे कारणं किमिति तावतापि नोक्तं भवति, न हि ब्राह्मणत्वाभिमाननिबन्धना द्विजत्वाभिमाननिबन्धना ब्रह्मविद्या इत्युत्प्रेक्षितुमपि शक्यं, तस्याः सर्वाभिमानविप्रतीपभूमित्वात्, यदि तु साधनचतुष्टयवतामपि चिरसंभृताऽविद्यासंस्कारानुवृत्त्या मनागपि शूद्रत्वाभिमानोऽनुवर्त्तते इति तादृशा एव प्रत्याचिख्यासिता ब्रह्मविद्यासु अत एव तु "शूद्रयोनावहं जातो नातोऽन्यद्वक्तुमुत्सहे" इति वदतां ज्ञानकाष्ठामुपागतानामपि महात्मनां विदुरप्रभृतीनां वेदप्रयुक्त्यनधिकारनिबन्धनं नातोऽन्यद्वक्तुमुत्सहे इत्यभिधानमित्युच्यते तर्हि साधनचतुष्टयमुत्कीर्त्य "तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्द्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये" इति साधनचतुष्टयस्यानन्यापेक्षकारणत्वाभिधानमुपरुध्येत, विरुध्येत च "तस्मात्तस्याथानन्तर्यं वक्तव्यं यद्विना ब्रह्मजिज्ञासा न भवति यस्मिन् सति तु भवन्ती भवत्येवे"ति भामतीनिबन्धोऽपि॥

किंच विद्यासु विदुरप्रभृतीनामनधिकारबोधनमपशूद्राधिकरणफलमित्यत्यन्तं दुर्भाषितं भवान्तराधिगतज्ञानानां कृतकार्याणां तेषां प्रत्याख्यातुमशक्यत्वात्, अतएव तु "विदुरप्रभृतयस्तु शूद्रयोनिप्रभवा अपि विशिष्टज्ञानसंपन्नाः स्मर्य्यन्ते" इति स्वयमप्युक्तम्, एवमेव तु इहैव भारतवचने नातोऽन्यद्वक्तुमुत्सहे इति वेदानभिधातृत्वमेव बोध्यते न तु वैदिकार्थानभिज्ञत्वमितरथा तु नातोऽन्यज्ज्ञातुमीहमहे इत्युक्तं स्यादिति॥ तस्मादुपासनानात्मकस्य वाक्याद्वाक्यार्थावगमरूपस्य कर्म्मादृष्टाद्य[१]किंचित्करपदार्थमुख-

१ कर्मादृष्टादीनामकिंचित्करत्वाभिधानं परमतेन।

Digitized by Google

निरीक्षणनिरपेक्षस्य ज्ञानस्य वैदिककर्म्मसु व्यापृतानां त्रैवर्णिकानां दुरासदत्वेऽपि तदनधिकारिणां परेषामेव श्रौतस्मार्त्तानपेक्षसमीचीनन्यायाभियोगभाजां तज्ज्ञानं सुसम्पादमिति साधु मीमांसाद्वयार्थनिरूपणमिति कृतं वाचां विसर्गः ॥

भवतु किमप्येतत् संहितमसंहितं वा मीमांसाद्वयमिति सर्वथाऽपि तु जैमिनीयषोडशाध्यायी कर्म्ममीमांसाशास्त्रं, चतुरध्यायीस्वरूपं च व्यासमुनिप्रणीतं वेदान्तशास्त्रमित्यविवादपदं व्याससूत्राणां व्याख्यानं, शिष्टसमादृतत्वेनार्षत्वेन युक्तिसिद्धार्थाभिधायित्वेन विश्वासभूमिर्बौधायनवृत्तिरिवास्य चादिमं व्याख्यानमुपवर्षमहर्षिप्रणीता वृत्तिः, यां शबरस्वामिभृतयोऽत्यन्तप्राचीनमीमांसकाः क्वचित्प्रमाणतया क्वचिच्च निराकरणीयतयोद्धृतवन्तः । आधुनिका अपि मीमांसकाः वृत्तिग्रन्थं स्थलविशेषे संवादितया क्वचिच्च विसंवादितयोपन्यास्थन् ॥

योऽपि ब्रह्मसूत्राणां जैमिनिप्रणीतत्वव्यामोहहेतुरिवं नैष्कर्म्यसिद्धिग्रन्थः, तद्यथा "यदपि जैमिनीयं वचनमुद्घाटयसि तदपि तद्विषयाऽपरिज्ञानादेवोद्गाव्यते किं कारणम् । यतो न जैमिनेरयमभिप्राय आम्नायः सर्व्व एव क्रियार्थ इति, यदि ह्ययमभिप्रायोऽभविष्य "दथातो ब्रह्मजिज्ञासा जन्माद्यस्य यत" इत्येवमादिब्रह्मवस्तुस्वरूपमात्रयाथात्म्यप्रकाशनपरं गम्भीरन्यायसन्दृब्धं सर्व्ववेदान्तार्थमीमांसनं श्रीमच्छारीरकं नासूत्रयिष्यत् । असूत्रयच्च ! तस्माज्जैमिनेरेवायमभिप्रायो यथैव विधिवाक्यानां स्वार्थमात्र प्रामाण्यमेवमैकात्म्यवाक्यानामप्यनधिगतवस्तुपरिच्छेदसाम्यादिति" । इति, सोऽपि न तदर्थावगमकः, यतो न जैमिनेरययभिप्राय आम्नायः सर्व्व एव क्रियार्थ इति, यदि ह्ययमभिप्रायोऽभविष्यत् "अथातो ब्रह्मजि-

ख्यासा जन्माद्यस्य यत इत्येवमादिब्रह्मवस्तुस्वरूपमात्रयाथात्म्यप्र-काशनपरं गम्भीरन्यायसंदृब्धं सर्ववेदान्तार्थमीमांसनं श्रीमच्छारी-रकं नासूत्रयिष्यत् । असूत्रयच्च । भगवान् बादरायणो ब्रह्मस्वरूप-निर्दिदिक्षया तथा, ततश्च जैमिनेरेवाम्नायस्य क्रियार्थतामात्रत्वाख्यस्य अक्रियार्थवेदभागस्य च वैयर्थ्यमभिदधानस्य न तात्पर्यं यदुपनिषद्वा-क्यानामानर्थक्यमिति किन्तु विधिवाक्यसहपठितानामर्थवादादिवा-क्यानां विधिवाक्यैकवाक्यतापन्नानामेवार्थानुष्ठापकत्वलक्षणं प्रामाण्यं, न हि अर्थवादवाक्यानि कञ्चिदर्थं स्तुत्वा निन्दित्वा वा तावता कृतार्थानि, तेषां स्तुतिनिन्दापरत्वे पदस्थानीयतया शाब्दबोधानु-पधायकत्वात्, अत एव "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्यु"रिति स्पष्टं जैमिनिस्तेषामेवैकवाक्यतां प्राह—अयमयं भावो नैष्क-र्म्यसिद्धिकारस्य जैमिनिव्यासौ गुरुशिष्यौ सन्तौ वेदार्थमीमांसने प्रवृत्तौ परस्परं विप्रवदेयातामितरजनानामिवेति न कथञ्चित्सम्भवि उभयोरेवोभयमतानुगन्तृतायाः स्वसूत्रेष्वेव स्फुटमुपलम्भात्, तद्यथा औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेक-श्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ॥ अ० १ पा० १०५ इति, एवं भगवान् बादरायणोऽपि परं जैमिनिर्मुख्यत्वात्, ब्राह्मेण जैमिनिरुपन्यासादिभ्यः इत्यसकृदेव जैमिनिमतमुपन्यास्यत् अत एव पराशरोपपुराणादिषु जैमिनिव्यासयोः समं श्रुतिपारदृश्वत्वमु-त्कीर्त्यते—अक्षपादप्रणीते च काणादे सांख्ययोगयोः । त्याज्यः श्रुतिविरुद्धोंऽशः श्रुत्येकशरणैर्नृभिः ॥ जैमिनीये च वैयासे विरु-द्धांशोन कश्चन । श्रुत्या वेदार्थविज्ञाने श्रुतिपारं गतौ हि तौ ॥ इति, एवं च गुरोर्व्यासस्य मतानुरोधेन जैमिनेरर्थनिरूपणस्यावश्य-म्भावे अक्रियार्थाम्नायवैयर्थ्याम्नानं नोपनिषद्वैयर्थ्यसमर्थनाय किन्त्व-

र्थवादादिवाक्यानां विधिवाक्यैकवाक्यतापन्नानां सार्थकत्वाख्याना-येति न तयोर्विसंवादिता । एवं च नैष्कर्म्यसिद्धिग्रन्थे ब्रह्मसूत्राणि जैमिनिमुनिप्रणीतानीत्युक्तमिति भ्रमो निराकृतः ।

बोधायनवृत्तेरनादरमूलं विषस्य विषमौषधमित्यवधार्य दत्ता-भयं शून्यवादिमतनिराचिकीर्षया लम्भितपदं निर्विशेषाद्वैतमतमिवे-तस्या आर्षवृत्तेरनादरमूलन्तु प्राभाकरादिमतप्रचारः, उभयोर्हि कर्म-काण्डस्योपासनाकाण्डस्येव भगवदाराधनरूपतामसंमत व्यवस्थि-तत्व च ॥

प्राभाकरप्रभृतयस्तु कर्मस्वेव भोगापवर्गप्रदशक्तिमुपयन्तः का-र्यपरवाक्येभ्य एव शाब्दबोधोपधानमाद्रियमाणा उपनिषदोऽप्यर्था-र्थकयन्ति, सोऽयं तेषां वरविघाताय वधूद्वाहः, यस्माद्धि वेदपुरुषा-दाराधनप्रीतात् "फलमत उपपत्ते"रित्यादिप्रमाणैः फलमुदीयन्ते वि-चक्षणाः स एव चेदवधारितः पुराणपुरुषः कृतं तर्हि विनश्वरै-र्यागैः । "वेदैश्च सर्वैरहमेव वेद्यः" "तं त्वौपनिषदं पुरुषं पृच्छा-मीत्यादिप्रमाणशतैर्याश्च चौपनिषत्सु निभृतमराः श्रुतमतनिदिध्या-सतात्मतत्त्वा आत्मानमन्विच्छन्तस्तितीर्षन्ति संसारसागरं ता एव ब्रह्मचारिण्योऽसंभावितपुंसंपर्का भ्रमप्रमादादिदोषसंसर्गासहिष्णव उप-निषद्भ्यो नोपदधते धियं कृतं तर्हि वराकैर्व्यभिचारादिदोषप-ङ्काकलङ्कितैरलब्धपदैरनुमादिप्रमाणैः । न हि कामधेनोरनादरे करभः कार्यकारक इति कल्पते संकल्पयितुमपि ॥

तथैवं सति जगद्व्यवहारोपप्लव एव कृतः स्यादिति न परोक्षं प्रेक्षावताम् ॥

तस्मादसदावेशैरेतैरेव मीमांसाया आर्षवृत्तिरुत्सादितेति सुनिश्चितं परीक्षकाणाम् । बोधायनवृत्तिर्वा उपवर्षवृत्तिर्वा अपरे

वा आर्षा ग्रन्था: परैरुत्सादिता उपसादिताश्च तत्स्थाने निजनिर्मिता ग्रन्था इति इदानीं शोकनाटनमस्थाने क्रियमाणम् "अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे" इति भगवदुक्तरीत्या हास्यास्पदतां गोचरयति, पुरुषाधमत्वं चावेदयतीति उपयुक्तेषु वेशद्यमित्याभाणकोक्तन्यायेन प्रसभमस्माभिरिदानीं निजमतिवैभवेन प्रचलितैरेव ब्रह्मसूत्रजैमिनिसूत्रगीतोपनिषद्वाक्यैरर्था निरूपणीया: पूरणीयाश्चार्था यथामति, रक्षणीयश्चायमनन्यशरणो ऽनुदिनं ह्रासमुपेयवान् पितृपितामहक्रमागतो महानिधिरिव, चिन्तामणिरिव, कल्पपादप इव, निजाभिजन इव, वेदशास्त्रसार्थ: ।

तत्राधीतिबोधाचरणप्रचारणरूपेषु रक्षापादेष्वेक: पुस्तकमुद्रणेनापि कथञ्चित् प्रचारणपाद: सबलो भवति स्थैर्यविधये इत्यनुध्याय सर्वथा निरभिसन्धि: कथमपि यज्ञपुरुषमाराधयितुकाम: शास्त्रदीपिकामुद्रणमुद्रया शब्दमूर्तिधरस्य श्रीविष्णो: प्रचारणपादसंवाहने प्रवृत्त: ।

शास्त्रदीपिकाकारश्चायं सुगृहीतनामा पार्थसारथिमिश्रो यं कर्णाकर्णिकया संचिप्राचरार्थबहुललेखप्रणाल्या च मैथिलं प्रतिपद्यामहे, अस्ति चापरस्तन्त्ररत्नग्रन्थोऽपि व्यासेन मीमांसार्थप्रतिपादनपर: पार्थसारथिमिश्रप्रणीत:, न्यायरत्नाकराभिधा श्लोक[१]वार्त्तिकटीकाऽपि तेनैव निर्मिता, एषा च दीपिका परिपक्ववयसा पार्थसारथिमिश्रेण निरमायीत्युपपादनकौशलेन "अन्यानि तु दूषणानि तन्त्ररत्नएव दर्शितानीति नेह प्रपञ्च्यन्ते" एवंविधेन दीपिकायां तत्र तत्रोपन्यासेन चावधारयाम: । यद्यपि सन्ति न्यायसुधा—भाट्टदीपिका—पञ्जिका—कणिका—विधिनिर्णय—विधिरसायन—भाट्टरहस्य—मी-

[१] पण्डितचिन्ताश्वरीप्रसादेन सा टीका मया दृष्टेति मां प्रत्युक्तम् ।

मांसाकुतूहल–मीमांसाकौस्तुभ–मीमांसाऽधिकरणमालाप्रभृतीनि मीमांसाग्रन्थरत्नानि तथाऽपि यादृशः परितोषः समादरश्च विदुषां दीपिकायां न तथा ग्रन्थान्तर इत्यवधार्यादौ तस्या एव प्रकाशने प्रावर्तिष्महि, यद्यपीह कथोपकथया शाबरमतं, भाट्टमतं, प्राभाकरमतमित्यनेकमीमांसकमतसंदर्शनं तथाऽपि कुमारिलमतेन शास्त्रदीपिकानिर्माणमिति सुप्रसिद्धमेव । अत्र च ग्रन्थे दशमाध्याये ५९६ पृष्ठे प्रसङ्गतो हरिमतमप्युत्थापितं, यमतिप्राचीनं वेदान्तिकमपि प्रतिपद्यामहे यदीयोपनिषद्भाष्यतात्पर्येण बृहदारण्य[1]कभाष्यादौ शङ्कराचार्याः स्वप्रणीतव्याख्यानस्य संक्षिप्ततां मेनिरेऽभिदधिरे च । यं च बृहदारण्यकशाङ्करभाष्यटीकाकारा भर्तृ–शब्देन कथयन्ति सोऽयमतिप्राचीनो मीमांसाद्वयाचार्यः प्रसिद्धभर्तृहरिर्वा (यमभिप्रेत्य महाभाष्यव्याख्यानावसरे आदावेव कैयटः “तथाऽपि हरिबद्धेन सारेण ग्रन्थसेतुने”त्यभिदधौ) अन्य एव वा कश्चित्ततोऽपि प्राचीनतमस्ततोऽप्यभ्यर्हिततमश्च पुरुषश्रेष्ठ इति नेश्महे विशिष्यावधारयितुं गमकानुपलम्भात् ।

एतस्य च ग्रन्थस्य मुद्रणावसरे अशुद्धिबहुलानि खण्डितानि जीर्णान्यतिजीर्णानि च पुस्तकान्यापमवापं च कथं चिद्विश्वासभूमितां प्राप्तमेकं बालसरस्वतीभवनस्थपुस्तकमपरं च ब्रह्मामृतवर्षिणीसभापुस्तकालयस्थं पुस्तकं, मुद्रणानन्तरं च शोधनपत्रावसरे काशीस्थराजकीयप्रधानविद्यामन्दिरस्थमतिप्राचीनं तथाऽप्यनतिशुद्धं, नवीनमपरं तथाऽपि शुद्धं पुस्तकं संवाद्य तत्र तत्र पाठोपपाठापपाठादिकं शुद्धिपत्रे न्यवीविशं, मुद्रणावसरे च प्रायोनव्येष्वेव

१ एतेन चिकीर्षिताया वृत्तेर्भर्तृप्रपञ्चभाष्येणागतार्थत्वमुक्तमिति ॥ (भर्तृप्रपञ्चभाष्याद्विशेषान्तरमाह) (अल्पग्रन्थेति)

शिष्येषु निभृतशोधनभरेण मया बहुपराद्धमिह दीपिकाग्रन्थ इति साह-जिकगुणचतुषेगुणिन: क्षमन्तामिति साञ्जलिबन्धमभ्यर्थये, प्रार्थ-ये च शास्त्रदीपिकामधीयाना अध्यापयन्तश्च सन्तस्तत्र तत्र शुद्धि-पत्रतोऽप्यधिका अशुद्धीरुपलभमानास्ता: संकलय्य यदि मामनुगृह्णी-युस्तद्दानेन तर्हि निष्कारणदयाभाजनमात्मानं मंस्ये इति,

ज्येष्ठकृष्णचतुर्थी सोमदिने, सं० १६४६ ।	काशीस्थब्रह्मामृतवर्षिणीसभायाम्, राममिश्रशास्त्री ।

ब्रह्मार्पणं ब्रह्मार्पणं ब्रह्मार्पणम्, इत: परं ब्रह्मसूत्राण्य-
नुक्रम्य बोधायनीयव्याख्यानमुज्जीवयिष्याम: ।
स्मृतिसंशोधनाय दत्तकविजयवैजयन्तीं
च प्रस्तोष्याम: । श्री: ।

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
काशिका पण्डितवरवामनादित्यविरचिता पूर्वार्धम् ५ रु॰ उत्तरार्धम् ५ रु॰ ..	१०)
बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	३)
प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी वरदराजकृता	१=)
लघुकौमुदी श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्गलण्डीयभाषायां कृता	८)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफाचार्य्येणेङ्गलण्डीयभाषायां कृतम्	४)
मानवधर्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	३।)
वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्विजनगा-देशाधिपतिरचिता	४)
श्रौतपदार्थनिर्वचनम्	४)
वाक्यार्थचन्द्रिका परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि-संशोधिता	४)
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	६।।।)
तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम्	८।)
तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम्	४।।)
शास्त्रदीपिका	८।)
खण्डनखण्डखाद्यं सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्पणीसहितम्	७।।)
काव्यप्रदीपः काव्यप्रकाशस्य प्रतिकायाव्याख्या वाराणसेयसमाट्प्रतिष्ठापितसंस्कृतपाठशालीयदर्शनशास्त्राध्यापकरामशास्त्रिभागवताचार्येण परिशोधितः	३।।)
वेदान्तसिद्धान्तमुक्तावली श्रीयुत आर्थर्विनिस महाशयेनेङ्गलण्डीय-भाषायामवतारिता	२।।)
चित्रमीमांसा अप्पयदीक्षितकृता, श्री तै॰ रामशास्त्रिणा संशोधिता	१।)
तत्त्वबिन्दुः वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।≡)।।

Digitized by Google

CONTENTS.

Page.

GAṆAKATARAṄGIṆĪ, OR LIVES OF HINDU ASTRONOMERS, by Mahāmahopādhyāya Sudhākara Dvivedī, Professor, Sanskrit College, Benares. ... 275

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed: Dāmodara Śāstrī, Professor, Sanskrit College, Benares. ... 291

ŚRĪBHĀSHYA WITH ŚRUTAPRAKĀŚIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. .. 307

PREFACE TO ŚĀSTRADĪPIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. ...

Digitized by Google

SEP 14 1892
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 7.] JULY, 1892. [Vol. XIV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1892.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अर्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनग्रन्थाब्जालसकुमुदोत्करान् ॥ २ ॥

SEP 14 1892 LIBRARY

तस्मान्महेशार्चनलब्धसौख्यः श्रीकृष्णनामाऽजनि विप्रमुख्यः ।
कालत्रयज्ञानवता हि येन दैवज्ञशब्दो भुवि सार्थकोऽभूत् ॥
तस्मादभूतां तनयौ तदाद्यो मीमांसकाद्यो गणको नृसिंहः ।
शिरोमणेर्वार्त्तिकयुक्तियुक्तं सौरं च भाष्यं समकारि येन ॥
सद्विद्याराजमानः सुखदलितपरोत्कृष्टचण्डाभिमानः
सिद्धान्ताभिज्ञसुज्ञद्विजवरनिवहोद्गीतकीर्त्तिः सुमूर्त्तिः ।
विद्यामासाद्य सद्यो विदधति विबुधाचार्यकस्पर्द्धिभावं
कृष्यन्तो यस्य शिष्याः स जयति जगति श्रीशिवाख्यो द्वितीयः ॥
श्रीमन्नृसिंहसुतवर्यदिवाकराख्यः सत्पद्धतेर्गणककेशवनिर्मितायाः ।
टीकामिमां विविधयुक्तिविशेषरम्यामाज्ञां शिवस्य सुगुरोः कृतवानवाप्य ॥
एवमेवान्तिमश्लोकः ।
शाके गजाम्भोधिशरेन्दु १५४८ तुल्ये सिद्धान्तवित्प्रौढमनोरमाख्या ।
दिवाकरोक्ता बुधकेशवोक्तेर्वृत्तिः सयुक्तिः समगात् समाप्तिम् ॥

एवं पद्धतिप्रकाशः । मकरन्दविवरणम् । केशवीयपद्धतिटीकाप्रौढमनोरमा । इति ग्रन्थत्रयमेतत्कृतमुपलभ्यते सुलभेन । एतत्कृता स्वपद्धतिप्रकाशोपरि सोदाहरणा टीका च गणिततत्त्वचिन्तामणिनाम्ना प्रसिद्धाऽऽयासेन प्राप्यते श्लोकषट्शताऽऽसन्ना । काश्यां मन्मित्रराजाजीज्योतिर्विद्गृहे शुद्धा प्राचीना च मयोपलब्धा ।

यत्रादौ,
कान्तं नितान्तं शिवपादयुग्मं चित्ते निधायाथ दिवाकराख्यः ।
सच्छिष्यतोषाय निजप्रणीतं ग्रन्थं वरेण्यं विवरीवरीति ॥
अन्ते,
दिवाकराऽऽराधनलब्धबुद्धिर्दिवाकराख्यो नरसिंहसूनुः ।
रम्यं निजोक्तेर्गणितस्य तत्त्वचिन्तामणिं संरचयांबभूव ॥
यत्तमयात्र समकारि कुचचित् त्वेकदेशिमतखण्डनं परम् ।
सच्छिवस्य सुगुरोर्दयाभरालोकनप्रभववैभवं किल ॥
योगो रूपयुतोऽर्द्धितो भवति भं सैकं यमाभ्यां हृतं
मासः स्याच्छशिहीनितोऽग्निविहृतो वारो भवेत्तद्दलम् ।
स्यात्पक्षः सतिथिर्युतिर्वसु*गुणैः२८रेषा हृताद्गाशिवर२९युक्

* पुस्तके वसुगुणैरिति पाठः प्रामादिकस्तस्मादालापो न घटते ।

शाकः सर्वयुतिर्यदा नृपशती रामैर्विहीना१५९७ तदा ॥
सिद्धान्तसिद्धान्तविदग्रगण्यो दिवाकरो ग्रन्थमिमं लिलेख ।
यः शाकमत्राऽऽनयति द्विजेन्द्रो मन्यामहे बीजविदां वरं तम् ॥

आक्रान्ता तनुवटुना जगत्त्रयीयं निर्वीर्या मणिशकलेन जायतेऽग्निः ।
आचान्तः कलशभुवा सवाडवोऽब्धिर्दुर्ज्ञाना खलु विदुषां जनेन शक्तिः ॥

अत्र पद्यस्य मानं यदि रूपं तदाऽऽलापो घटते । ततः यो=२५ । भं=१३ । मा=७ । वा=२ । प=१ । शाकः=(यो+१५)३८+२९=(२५+१५)३८+२९=४०+३८+२९=१५२०+२९=१५४९ । सर्वयुतिः=१५९७ ॥

कमलाकरः । १५३८

महाराष्ट्रविप्रो नृसिंहदैवज्ञतनूजो दिवाकरदैवज्ञस्यानुजः शिष्यश्च खवसुतिथिमिते १५८० शके काश्यां सम्प्रति प्रचलितसूर्यसिद्धान्तानुसारं सौरतत्त्वविवेकरूपं सिद्धान्ततत्त्वविवेकं व्यरचयत् । अत्र यावच्छक्यं सूर्यसिद्धान्तमतमण्डनं भास्करमुनीश्वरादीनां खण्डनं च कृतं ग्रन्थकृता । बहुत्र परदूषणाभिलाषेणान्यथैव भास्करकृतोदयान्तरकर्मादिखण्डनमस्य गोले गणिते चाद्वितीयपण्डितस्यानेककल्पनाकुशलस्य न शोभते ।

परं मुनीश्वरविरोधतः कमलाकरेण हठात् पक्षपातधिया बहुत्र भास्करादीनां खण्डनं चक्रे इति वदन्ति । यद्यस्य कृतिर्निष्पक्षपातबुद्ध्याऽभविष्यत्तर्हि वस्तुतो रमणीया गोलयुक्तिप्रपञ्चमण्डिता पारसीकनवीनमतभूषिता सर्वजनमान्याऽभविष्यत् । अस्य सिद्धान्ततत्त्वविवेकरूपैकैव कृतिर्यत्र बहवो विशेषा नवीनयुक्तिपूर्णाः शोभन्ते । सिद्धान्ततत्त्वविवेके पूर्वाचार्यप्रकारतो ये विशेषास्ते बनारससंस्कृतसीरिजनाम्नि प्रबन्धे मच्छोधितमुद्रितसिद्धान्ततत्त्वविवेकभूमिकायां द्रष्टव्यास्तत्र भ्रमादस्माभिर्बल्लालगणकात्मजकृष्णदैवज्ञस्य पौत्रः कमलाकरो लिखितो वस्तुतः कमलाकरस्य मूलपुरुषाणां ज्ञानार्थं शिवदैवज्ञवर्णनं विलोक्यम् ।

गोदावर्या उत्तरे देवगिरिनामकं दुर्गमस्ति यत्राक्षांशाः सार्द्धविंशत्यंशाः २०।३०। अस्माद्दुर्गादाग्नेयदिशि षोडशयोजनान्तरे विदर्भदेशान्तर्गता पाथरी नगरी यस्याः पश्चिमभागे सार्द्धद्वि२।३० योजनान्तरे गोदा सरित् संशोभते । अस्याः सौम्यतटे गोलाभिधग्रामोऽस्य मूलपुरुषाणां ग्राम इति सर्वं ग्रन्थोपसंहारे कमलाकरेण सम्यग् वर्णितम् ।

Digitized by Google

ग्रन्थोपसंहारे ७-१४ श्लोकाः ।

गोदावरीसौम्यतटोपकण्ठगोलाख्यसद्ग्रामसुसिद्धभूमौ ।
विप्रो महाराष्ट्र इति प्रसिद्धो रामो भरद्वाजकुलावतंसः ॥
बभूव तज्जोऽखिलमान्यभट्टाचार्योऽतिशास्त्रे निपुणः पवित्रः ।
सदा मुदा सेवितभर्गसूनुर्दिवाकरस्तत्तनयो बभूव ॥
वेदान्तशास्त्राभ्यसनेन काश्यां यः पुण्यराश्यां तनुमुत्ससर्ज ।
अस्यार्यवर्यस्य दिवाकरस्य श्रीकृष्णदैवज्ञ इति प्रसिद्धः ॥
बभूव पुत्रः सुतरां पवित्रः सत्तीर्थकर्ताऽखिलशास्त्रवेत्ता ।
तज्जस्तु सद्गोलविदां वरिष्ठो नृसिंहनामा गणकार्यवन्द्यः ॥
बभूव येनात्र च सौरभाष्यं शिरोमणेर्वार्त्तिकमुत्तमं हि ।
स्वार्थं परार्थं च कृतं त्वपूर्वसद्युक्तियुक्तं ग्रहगोलतत्त्वम् ॥
तज्जस्तु तस्यैव कृपालवेन स्वज्येष्ठसद्बन्धुदिवाकराख्यात् ।
सांवत्सरार्याद्गुरुतः प्रलब्धशास्त्रावबोधो गणकार्यतुष्ट्यै ॥
दृग्गोलजक्षेत्रनवीनयुक्त्या पूर्वोक्तितः श्रीकमलाकराख्यः ।
समस्तसिद्धान्तसुगोलतत्त्वविवेकसंज्ञं किल सारतत्त्वम् ॥
खनागपञ्चेन्दुशके १५८० व्यतीते सिद्धान्तमार्याभिमतं समग्रम् ।
भागीरथीसौम्यतटोपकण्ठवाराणसीस्थो रचयाम्बभूव ॥

स्वज्येष्ठबन्धोर्गुरोश्च दिवाकरात्कमलाकरो दशवर्षैर्लघुः कल्प्यते तदाऽस्य जन्मशको वसुरामपञ्चेन्दुसमः १५३८ सिध्यति । भारतवर्षे यस्मिन् समयेऽयं गणितज्ञः सिद्धान्ततत्त्वविवेकं व्यरचयत्तदैव यूरपदेशे न्यूटननाम्नो गणकस्य वयः षोडशवर्षसममासीत् ।

सम्प्रति भारतवर्षे सिद्धान्ततत्त्वविवेकग्रन्थ एव सिद्धान्तेषु सर्वोत्तमोत्तमो ज्योतिर्विद्भिरादृियते पठ्यते पाठ्यते च । मुनीश्वरकमलाकरयोर्विरोधकारणं मुनीश्वरवर्णने विलोक्यम् ।

रङ्गनाथः । १५६२

अयं नृसिंहदैवज्ञतनूजो निजसहोदराद्दिवाकरात्कमलाकराच्चाधिगतज्योतिषविद्यो बाहुरसपञ्चेन्दुमिते १५६२ शके सिद्धान्तचूडामणिनामकं करणाकारं ग्रन्थं व्यरचयत् । अत्र गतिफलानयने पूर्णान्तसाधने च ज्ञानराजदैवज्ञमतखण्डनं कृतमस्ति । तथा परिलेखादौ दिवाकरप्रकारप्रशंसा विशेषतो निरूपिता । अयं ग्रन्थः शतचतुष्कश्लोक-

Digitized by Google

निबद्धो मध्यमाधिकारादिपाताधिकारान्तद्वादशाधिकारात्मकोऽप्रसिद्धो मन्निकटे वर्त्तते प्रायः शुद्धः । मन्निकटस्थेयं प्रतिरस्य पञ्चपञ्चनगेन्दुशककाले हरदत्तत्रिपाठिना लिखिताऽस्ति । सार्वभौमकारमुनीश्वरकृतस्पष्टीकरणभङ्गीखण्डनरूपो लघुभङ्गीविभङ्गीनामकश्चैनेन विनिर्मितोऽन्यो ग्रन्थश्चास्माभिः काशिकराजकीयपुस्तकालये दृष्टः । एवमस्य कृतिद्वयमस्मद्दृष्टिगोचरीभूतम् । सिद्धान्तचूडामणिः साम्प्रतकालिकप्रचलितसूर्यसिद्धान्तानुसार एव ।

अस्य समाप्तौ ।

गोलज्ञविद्वच्छुतगोलनाम्नि ग्रामे गुणौघैः प्रथितो बभूव ।
यथार्थनामा शिवलब्धधामा श्रीकृष्णनामा गणकोच्चधामा ॥
तस्मादभूतां तनयौ तदाद्यः श्रीमन्नृसिंहो बुधसेविताङ्घ्रिः ।
ज्योतिर्विदाचार्यपदं प्रयातः स्वधामसंतोषितसद्द्विजौघः ॥
क्व वज्ञमार्गादुपरि स्फुरण्यः कविज्ञसंसेवितपार्श्वभागः ।
ज्योतिर्विदां सूर्य इवाग्रगण्यः श्रीमच्छिवाख्यस्तनयो द्वितीयः ॥
श्रीमन्नृसिंहस्य यशोवरिष्ठाः श्रीसूर्यनिष्ठा गुणिनां वरिष्ठाः ।
श्रीमद्भरद्वाजकुलावतंसास्ते सूनवो भूमितले जयन्ति ॥

ज्येष्ठस्तेषु दिवाकरो विजयते सत्संप्रदायाग्रणीः
सिद्धान्ताम्बुजबोधनैकमिहिरो दैवज्ञवाचस्पतिः ।
तक्रेऽनल्पमतिः कवित्वकरणे साक्षात्पुराणो मुनि-
र्यस्यात्यन्तमरातिदन्तिदलने शार्दूलविक्रीडितम् ॥

श्रीमानसीमगुणमण्डितपण्डितार्य-
चूडामणिः सुगणितागमचक्रवर्त्ती ।
चण्डांशुचण्डधिषणः कमलाकरोऽन्यः
क्ष्मायां जयत्यखिलपण्डितवन्द्यपादः ॥

कुशाग्रबुद्धिर्गणितागमज्ञगणाग्रणीर्यो गुणिनां वरिष्ठः ।
दिवाकराराधनलब्धतेजाः श्रीगोपिनाथस्तनयस्तृतीयः ॥
तस्यानुजः पण्डितरङ्गनाथः सिद्धान्तचूडामणिनामधेयम् ।
सौरानुसारं सुगमप्रकारं विनिर्ममे दैवविदां हिताय ॥
मासानां कृतिरब्धिहृच्छ्रुतिरसौ खाङ्गैर्विहीना तिथि-
र्वाणैर्हृद्द्विहतोडुवासरमितिर्वाराङ्कभागात्स्वम् ।

पत्रः सर्वयुतिः शको द्विखदिनैर्युक्तोऽत्र जानाति य-
स्तस्याव्यक्तविदो नितान्तमपरा दैवाकरी भारती ॥

अत्र दशमाससंख्यायां सर्व आलापो घटते तदा मा = १० । यु = २५ । ति = १५ । न = ३ । वा = ६ । प = १ सर्वयुतिः = ६० द्विख-दिनै १५०२ युक्ता १५६२ जातः शकः ॥

नित्यानन्दः । (१५६१)

अयं कुरुक्षेत्रनिकटवर्त्ति-इन्द्रपुरी (इन्द्रप्रस्थपुर) निवासी गौडब्रा-ह्मणो देवदत्ततनूजो भूरसबाणचन्द्र१५६१मिते शाके सिद्धान्तराजं व्यरच-यत् । सायनगणनैव मुख्या, न निरयणगणनेत्येवास्य मतम् । साम्प्रत-कालिकं प्रचलितं सूर्यसिद्धान्तं वास्तवं नेत्यस्य मीमांसा तथा सायन-गणनैव सर्वदेवर्षिसंमतेत्यस्य च मीमांसा प्रथमाध्याये विस्तरतो वर्णि-ताऽनेन । मदीया कृती रोमकमतीया रोमकस्तु भगवान् सूर्य एव तदर्थं सूर्यारुणसंवादस्थकथा चेति सर्वं निःशङ्कमुवाचायम् । ग्रन्थस्यावलो-कनेन च ग्रन्थरचनाकालिकेन्द्रपुरीस्थयवननृपतिदेशीयपारसीकमतानुसा-रिणी सायनमानेन सर्वा गणना स्फुटैव ।

अत्र मन्दफलातिरिक्तः पाक्षिकनामकसंस्कारश्च मध्यमरविच-न्द्रान्तरवशतश्चन्द्रे देयस्तथाऽनेन विधिना जातश्चन्द्रो विमण्डलस्थो भवति ततः शरसंस्कारेण क्रान्तिवृत्तीयस्फुटचन्द्रः साधनीय इति सर्वं वर्णितमस्ति ।

अत्र मीमांसाध्यायः । मध्यमाधिकारः । स्पष्टाधिकारः । त्रिप्र-श्नाधिकारः । चन्द्रग्रहणाधिकारः । सूर्यग्रहणाधिकारः । शृङ्गोन्नत्यधि-कारः । भग्रहयुत्यधिकारः । भग्रहाणामुन्नतांशादिसाधनाधिकारः । इति गणिताध्याये नवाधिकाराः सन्ति । स्पष्टाधिकारे रेखागणित-प्रथमाध्यायसम्बन्धिन्यो रेखादिपरिभाषाश्च सन्ति । भग्रहयुत्यधिकारे चतुरशीति ८४ तारकाणां ध्रुवकाः शराश्च पठिताः ।

गोलाध्याये । भुवनकोशः । गोलबन्धाधिकारः । यन्त्राधिकारः । यन्त्राधिकारे यन्त्रराजस्य । तुरीययन्त्रस्य । चूडामणियन्त्रस्य । तथा चाबकयन्त्रस्य (चाबुकयन्त्रस्य) वर्णनं कृतम् ।

ग्रन्थस्य समाप्तौ स्वकुलवर्णनं विस्तरतः कृतम् ।

Digitized by Google

तत्रस्थश्लोकाश्च ।

श्रुतिस्मृतिव्याकरणप्रवीणैर्विशिष्टशिष्टाचरणैकदक्षैः ।
श्रीमत्कुरुक्षेत्रसमीपसंस्था द्विजोत्तमैरिन्द्रपुरी विभाति ॥
तस्यां वसन् गौडकुलप्रसूतो ऽनुशासनेनापि कुलीनहट्टः ।
रच्छाभिधो मुद्गलगोत्रजन्मा बभूव पूर्वं सतपा मनीषी ॥
तस्यात्मजः स्मार्तविधिप्रयुक्तो वेदान्तशास्त्राब्धिकपारगामी ।
तपोधनो ज्योतिषशास्त्रदक्षो विचक्षणो लक्ष्मणसंज्ञको ऽभूत् ॥
तदीयपुत्रस्तपसा वरिष्ठः सदा गरिष्ठो द्विजमण्डलीषु ।
सदा सदाचारयुतो मनीषी नारायणो धर्मपरायणो ऽभूत् ॥
तस्यात्मजो ज्योतिषशास्त्रदक्षो विद्याविनोदेषु विलग्नचेताः ।
जितेन्द्रियः सत्यतपःसमेतः श्रीदेवदत्तो ऽस्ति नरेन्द्रमान्यः ॥
नित्यानन्दस्तस्य पुत्रो द्विजानामाज्ञाकारी सूर्यलब्धप्रसादः ।
षड्गोभूपे १६९६ विक्रमार्कस्य शाके याते चक्रे सर्वसिद्धान्तराजम् ॥

अस्य पुस्तकस्यैका प्रतिः काशिकराजकीयपुस्तकालये वर्त्तते ।

अस्य परम्परात आगतं मूलस्थानं कुलीनहट्टसंज्ञमासीत् यच्च गौडानां मध्ये शासननाम्ना प्रसिद्धम् ।

जगन्नाथो जगन्नाथसम्राट् वा । १६०४

तैलङ्गब्राह्मणो जयपुरनरपतीन्द्रजयसिंहप्रधानपण्डितो जयसिंहमहाराजतो लब्धपण्डितराजोपाधिर्गोलगणितागमानन्योपमधीर्महाराजजयसिंहाज्ञया अरबीभाषीयमिजास्तीनामकज्यौतिषसिद्धान्तग्रन्थस्यानुवादं संस्कृतभाषायां सिद्धान्तसम्राजं कृतवान् ।

अत्र त्रयोदशाध्याया एकचत्वारिंशदधिकशतं १४१ प्रकरणानि षण्णवत्युत्तरशतं १९६ क्षेत्राणि सन्ति । अस्मिन् सिद्धान्तसम्राजि बहूनामरबदेशीयगणितविदां मिर्जा–उलूकबेगादीनां यवनानां ज्योत्पत्तौ वेधादिविषये च प्रकारान्तराणि लिखितानि बहुत्र प्रकारान्तराणां महाराजजयसिंहकृतोपपत्तयश्च सन्ति । अस्यादिमो भागो मया काशिकराजकीयपाठशालापुस्तकालये दृष्टस्तत्रादौ मङ्गलानन्तरं ग्रन्थस्याध्यायादिप्रमाणं लिखितमस्ति ।

अस्यादौ ।

गणाधिपं सुरार्चितं समस्तकामदं नृणाम् ।

प्रशस्तभूतिभूषितं स्मरामि विघ्नवारणम् ॥
लक्ष्मीनृसिंहचरणाम्बुरुहं सुरेशै-
र्वन्द्यं समस्तजनसेवितरेणुवन्द्यम् ।
वाग्देवतां निखिलमोहतमोपहन्त्रीं
वन्दे गुरुं गणितशास्त्रविशारदं च ॥
श्रीगोविन्दसमाह्वयादिविबुधान् वृन्दाटवीनिर्गतान्
यस्त्वत्रैव निराकुले शुचिमनोभावः स्वभक्त्याऽऽनयत् ।
म्लेच्छान् मानसमुन्नतान् स्वतरसा निर्जित्य भूमण्डले
जीयात् श्रीजयसिंहदेवनृपतिः श्रीराजराजेश्वरः ॥

राजाधिराजो जयसिंहदेवः श्रीमत्स्यदेशाधिपतिश्च सम्राट् ।
श्रीरामपादाम्बुजदत्तचित्तो यज्वा सदा दानरतः सुशीलः ॥
गोलादियन्त्रेषु नवीनयुक्तिप्रचारदक्षो गणितागमज्ञः ।
सत्यप्रियः सत्यरतः कृपालुस्तिग्मप्रतापो जयति क्षमायाम् ॥
स धर्मपालो गणितप्रवीणान् ज्योतिर्विदो गोलविचारदक्षान् ।
कारुंस्तथाऽऽहूय चकार वेधं गोलादियन्त्रैर्युसदां च भानाम् ॥

यन्त्रं सिद्धान्तसम्राजं सम्राट् रचयति स्फुटम् ।
तुष्ट्यै श्रीजयसिंहस्य जगन्नाथाह्वयः कृती ॥
अरबीभाषया ग्रन्थो मिजास्तीनामकः स्थितः ।
गणकानां सुबोधाय गीर्वाण्या प्रकटीकृतः ॥

अरबीभाषातः संस्कृते जगन्नाथकृतो युक्लेदाख्यग्रन्थस्याप्यनुवादो रेखागणितनाम्ना प्रसिद्धोऽस्ति यत्र पञ्चदशाध्यायाः सन्ति । अस्य गणितस्य रेखागणितमिति नामकरणं प्रथमं जगन्नाथसम्राजैवाकारि । इदं काशिकराजकीयपुस्तकालये सम्पूर्णं प्रायोऽशुद्धं वर्त्तते । जयपुरप्रान्तेऽस्य प्रतयः सुलभेन प्राप्यन्ते । प्रथमाध्यायस्यैकोनत्रिंशप्रतिज्ञोपपत्त्यर्थमत्र नूतनानि ८ प्रतिज्ञान्तराणि सन्ति यानि सम्प्रति प्रचलितयूरपदेशीयरेखागणिते न लिखितानि । एवमत्र प्रथमाध्यायस्य ४७ प्रतिज्ञा १६ प्रकारान्तरैरुपपादिता । अस्य पञ्चदशाध्यायस्य हीन्दीभाषायामनुवादो मदीयच्छात्रेण झोपाख्यश्रीशशिपालशर्म्मणा कृतो मुद्रितश्च वर्त्तते ।

यथेदानीं रेखागणिते साध्यं, या प्रतिज्ञा लिख्यते तथाऽत्र तत्स्थाने क्षेत्रमिति लिखितमस्ति । रेखागणितमपि जगन्नाथेन जयसिंहम-

Digitized by Google

द्वाराजाज्ञयैवाऽकारि । रेखागणितानुवादेन सिद्धान्तसम्राजा च तुष्टो जयसिंहनृपतिरस्मै पण्डितराजाय जगन्नाथसम्राजे बहून् ग्रामान् ददौ । तद्वंशीया अद्यावधि तल्लब्धग्रामादिना सुखं भुञ्जन्ते ।

इदं रेखागणितं जगन्नाथेन खवेदनृप १६४० शके विरचितम् । अत्र प्रत्यध्यायसमाप्तौ जयसिंहाज्ञयाजगन्नाथेनाकारीति वर्णनं कृतं ग्रन्थकृता यथा पञ्चदशाध्यायसमाप्तौ ।

श्रीमद्राजाधिराजप्रभुवरजयसिंहस्य तुष्ट्यै द्विजेन्द्रः
श्रीमत्सम्राट् जगन्नाथ इति समभिधारूढितेन प्रणीते ।
ग्रन्थेऽस्मिन् नाम्नि रेखागणित इति सुकोणावबोधप्रदात-
र्यध्यायोऽध्येतृमोहापह इह विरतिं पक्षसंख्यो गतोऽभूत् ॥

अस्य रेखागणितस्य या प्रतिर्जगन्नाथसम्राज आज्ञया नववेदनृपशके १६४९ वा वेदभसप्तेन्दु १७८४ विक्रमाब्दे लोकमणिनाम्ना लेखकेन लिखिता सैव काशिकराजकीयपुस्तकालये वर्त्तते तत्रान्तिमश्लोकश्च ।

युगवसुनगभूवर्षे शुचिशुक्ले युगतिथौ रवेर्वारे ।
व्यलिखल्लोकमणिः किल सम्राजामाज्ञया पुस्तम् ॥

रेखागणितस्य प्रधानकर्त्ता युक्लिदो न किन्तु पूर्वमिदं रेखागणितशास्त्रमिजिप्ट (Egypt) नाम्नि देशे प्रादुर्भूतम् । नीलाख्यनदीतटवर्त्तिक्षेत्रविभागार्थमेतच्छास्त्रमुत्पन्नमिति केषांचिन्मतम् । सेसोस्त्रीस् (Sesostris) संज्ञकनृपेण स्वदेशं खण्डैः खण्डैर्विभज्य तत्र करग्रहणार्थं तत्पतयो नियोजिता एतदर्थमिदं शास्त्रं तत्रत्यैर्गाणितिकैरकारीति हिरोडटस् (Herodotus) नाम्नः प्राचीनवृत्तान्तकर्त्तुः सम्मतिः । तद्देशीयधर्म्मोपदेशकैरेतच्छास्त्रमुत्पादितमिति सिकन्दरसार्वभौमसभाप्रधानपण्डितस्य आरिस्टोटलाख्यस्य (Aristotle) मतम् ।

शालिवाहनशकात्पूर्वं पञ्चसप्तरस६७५ वर्षान्तरे मिलिटस् (Miletus) नगरनिवासिना थे*लस (Thales) संज्ञकेनास्य शास्त्रस्यानेके सिद्धान्ताः प्रकाशिताः । अर्द्धवृत्ते जाताः कोणाः समा भवन्तीति तेनैवाऽबोधि । उच्छ्रितपदार्थानामौच्च्यं समुद्रान्तर्गतबृहन्नौकास्थानान्तरं च तेनाऽऽनीतम् । स्वदेशे चैनेनैकं विद्यामन्दिरं च स्थापितम् ।

* अस्य जन्म प्रायः ख्रीष्टशकात्पूर्वं ६४० वर्षे निधनं च नवति ९० वर्षसमे वयसि ।

Digitized by Google

उक्तिज्ञानार्थमेवैनेन सम्प्रति प्रसिद्धरेखागणितप्रथमाध्यायस्य ५, १५, २६ प्रतिज्ञाः षष्ठाध्यायस्य २, ४ प्रतिज्ञे च प्रकाशिते । अयं ज्योतिषसिद्धान्तकर्त्ता चासीत् । एकस्मिन् समये ह्ययं पथि गच्छंस्तत्राम्बरलोकनार्थं दत्तोर्ध्वदृष्टिरन्धकूपे पपात । तदा "तव पादतले किमस्तीत्यस्य ज्ञानं यदि ते न तदा खस्थपिण्डज्ञानं कथं भविष्यतीति" कयाचिद्वृद्धयाऽस्योपरि व्यङ्ग्योक्तिरुक्ता । अस्य निधनानन्तरं तच्छात्रः अनाक्सिमेण्डर (Anaximander*) संज्ञस्तदीयपाठशालायां तत्पदं विभूष्य रेखागणितस्य तत्त्वरूपान् कतिपयसिद्धान्तान् भूगोलखगोलाकृतिं पलभायन्त्रं च रचयामास ।

तदनन्तरं अनाक्सेगोरास् (Anaxagoras) नामकस्तत्राध्यापको भूत्वाऽतीवदुरूहं वृत्तवर्गीकरणं (Quadrature of the circle) समुत्पादितवान् ।

थेलस् (Thales) संज्ञकस्य द्वितीयश्छात्रः पैथागोरास् (Pythagoras) संज्ञकश्च त्र्यस्रे कोणत्रययोगः समकोणद्वयसमो भवति । जात्यत्रिभुजे भुजकोटिवर्गयोगः कर्णवर्गसमो भवतीति सिद्धान्तमुत्पादयामास । रेखयोर्दृढत्वं ज्ञातवान् । बहूनि सरलपृष्ठघनक्षेत्राणि च कल्पयामास । अयं विद्यासम्पादनाय भारतवर्षमिजिप्टदेशं चाऽगादिति बहूनां विदुषां सम्मतिः । तत इटलीदेशे टारेण्टम् (Tarentum) नगरे स्थित्वा शकात्पूर्वं पञ्चयुग्मरसं ६२५ वर्षान्तरे तत्र स्वनामपूर्वकमेकं विद्यामन्दिरं स्थापितवान् ।

पृथिवी स्वाक्षोपरि भ्रमति नक्षत्रगणाश्चाचल इत्यस्य मतं दृढमवगम्य तत्रत्या जना भ्रान्तोऽयमिति परस्परं निगदन्तो विना भोजनाच्छादनादिनाऽमुं विद्वांसं पीडितवन्तस्तत्पीडयैवाऽयं पञ्चत्वं च गत इति बहूनां प्राचीनेतिहासवेदिनां मतम् ।

कियस् (Chios) नगर निवासी हेपाक्रेटस (Hippocrates) नामा चतस्मिन् देशे द्वितीयो रेखागणितसिद्धान्तकर्त्ताऽऽसीत् । अयं चन्द्रखण्डवर्गीकरणं (Quadrature of the Lune) मध्यमप्रमाणद्वारा निर्दिष्टघनाद् द्विगुणघनकरणप्रकारं च रचयामास । अहो एतादृशस्य गाणितिकस्य कृतिः सम्प्रति लुप्ता ।

शकात्पूर्वं पञ्चसप्ताब्धि ४७५ वर्षान्तरे गणितविद्याविशारदः प्लेटो (Plato) संज्ञक एकं गणितविद्यामन्दिरं स्थापितवान् । तत्रात्या अध्यापका-

* अस्यजन्म ६११ खी॰ पू॰ निधनं च ५४५ खी॰ पू॰ । थेलस-अनाक्सिमेण्डरसंज्ञकयोर्मतेन भूमिर्मुकुरोदरसमेति बहूनां मतं प्रायः सत्यमेव ।

Digitized by Google

निर्दिष्टघनाद् द्विगुणघनज्ञानार्थं कोणस्य तुल्यभागत्रयकरणार्थं चैवाऽनेकान् रेखागणितसम्बन्धिनः शङ्कुच्छिन्नक्षेत्रसम्बन्धिनश्च सिद्धान्तानुत्पादयामासुः।

प्लेटोनामकपाठालयद्वारस्थः "अत्र रेखागणितज्ञ एव प्रविशेनान्य"-इति लेखो वस्तुतेऽस्यास्मिन् शास्त्रे महोत्सुक्यं प्रकटयति । अथैतत्स-मकालिक एव टारेण्टम् (Tarentum) नगरनिवासी आर्किटस् (Archytus) नामा पैथागोरास् (Pythagoras) स्थापितपाठालयेऽध्यापकोऽभूत् । अयं चापि द्वयोरेखयोर्द्वे मध्यप्रमाणे उत्पादयामास नूतनप्रकारेण ।

प्लेटो (Plato) संज्ञस्य लियन् (Leon) नामाऽन्तेवासी रेखागणित-शास्त्रं संशोध्य तेने । प्लेटो (Plato) संज्ञस्य सुहृच्च युडाक्सस् (Eudoxus) नामा सूचीक्षेत्रपृष्ठफलसाधनं कतिपयवक्राकृतीश्च चकार ।

मिनीक्मस् (Menæchmus) नामा प्लेटोयुडाक्ससंज्ञयोश्छात्रः शङ्कुच्छिन्नक्षेत्राणि रेखयोर्मध्यप्रमाणद्वयज्ञानार्थं परवलय-(Parabola) वृत्तसम्पाततो दीर्घवृत्तद्वयसम्पाततश्च प्रकारद्वयमुत्पादितवान् ।

डिनास्ट्रेटस् (Dinastratus) संज्ञश्च तौर्यिकं वक्रं (Quadratrix) निर्दिष्टकोणस्य यथेच्छं तुल्यभागकरणाय वृत्तस्य वर्गीकरणाय च कल्प-यामास । (चुचरचारनामकं पुस्तकं मत्कृतं विलोक्यम्) ।

ज़ीनो (Zeno) डेमोक्रिटस् (Democritus) नामा च व्यक्तगणितं रेखागणितं च रचयामास । अरिस्तियससंज्ञः (Aristaes) युक्लिद (Euclid) संज्ञकस्य गुरू रेखागणितशास्त्रे महाप्रवीणो घनक्षेत्रविषये शङ्कुच्छिन्नक्षेत्र-विषये च किञ्चिद्विलिलेख ।

शककालात्पूर्वं पञ्चरसराम ३६५ वर्षान्तरे आर्किमिडिज् (Archimed-es) नामाऽतिप्रसिद्धो गणितशास्त्रे पटिष्ठोऽभूत् । अयं गोलघनफलं तद्बहि-र्लग्नसमतलमुखशङ्कुघनफलस्य तृतीयांशद्वयेन समं तथा परिधिव्यासघातपा-दसमं वृत्तफलं भवतीत्याद्यनेकान् फलानयनप्रकारान् स्वधियोत्पादितवान् ।

येन क्षेत्रेण मया गोलघनफलं ज्ञातं तत्क्षेत्रं मन्निधनानन्तरं मत्समाध्युपरि विलेख्यमिति स्वनिधनसमये आर्किमिडिजुसंज्ञकेना-ज्ञापितम् । तदनुयायिभिस्तदीयाऽऽज्ञया निधनानन्तरं तत्समाध्युपरि तत्क्षेत्रचित्रं च स्थापितं यद्द्यावधि तदीयपाण्डित्यं प्रकटयति ।

अथ तदासन्नकाल एव रेखागणितशास्त्रविशारदो युक्लिद (Euclid) संज्ञोऽभूत् । अस्य जन्मस्थानं न विदितं किन्त्वयं आथेन्स (Athens)

Digitized by Google

नगरे रेखागणितशास्त्रं सम्भ्यधीत्य ग्रीस (Grees) देशात् समागत्य सिक-न्दरसार्वभौमस्थापितविद्यामन्दिरेऽध्यापकोऽभूदिति प्रसिद्धः । अनेन गणितशास्त्रे बहवो विशेषभराश्चमत्कारकरा ग्रन्था ग्रथिता येष्वेको रेखा-गणितग्रन्थ एवावशिष्टो यश्च पूर्वाचार्यकृतान् अनेकान् ग्रन्थान् संवर्ग्य युक्लेदेन विरचितः । सोऽयं ग्रन्थस्तदीयभाषायां प्रसिद्धो जगन्नाथपण्डि-तेन जयसिंहनरपतिसमाज्ञया संस्कृते कृतः ।

जयसिंहनरपतिना ग्रहवेधार्थं काश्यामवन्त्यां जयपुरादिषु यानि यन्त्राणि विनिर्मितानि तेषां रचनाप्रकारश्च सिद्धान्तसम्राजि विस्तरतो वर्णितः । अयं सिद्धान्तग्रन्थश्च पञ्चाशत्सहस्रश्लोकात्मक इति प्रथाऽस्ति ।

सिद्धान्तसम्राजि यथा मिर्जा-उलूकवेगस्य तृतीयांशज्यासाधने प्रथमाध्याये द्वितीयः प्रकारः ।



"तत्र कखजदं चापं षड्‌ंशानां कल्प्यम् । यस्य वृत्तस्येदं चापं तद्वृत्तकेन्द्रं न कल्पनीयम् । पुनः प्रत्येकं कखचापं खजचापं जदचापमंशद्वयं कल्पितम् । कख-कज-कद खज-खद-जद-पूर्णज्याः संयोज्याः । पुनः कखपूर्णज्याकजपूर्णज्याकदपूर्णज्यानां हभवचिन्हेष्वर्द्धं कार्यम् । पुनस्तहरेखातभरेखातवरेखाः संयोज्याः । एता रेखाः प्रत्येकं तासु पूर्णज्यासु लम्बरूपा भविष्यन्ति । पुनः कतरेखाव्यासार्द्धं संयोज्यम् । पुनः अचिन्हेऽर्द्धितं कार्यम् । पुनः अचिन्हं केन्द्रं कृत्वा अकव्यासार्द्धेन वृत्तं कार्यम् । तत्र कहतकोणकभतकोणकवतकोणाः समकोणाः सन्ति । तद्वृत्तार्द्धमेतद्-हभवचिन्हेषु गमिष्यति । पुनः हभभववतहतरेखाः संयोज्याः । हचिन्हात् हललम्बः कभपूर्णज्यायां निष्काश्यः । तदा कभपूर्णज्या लचिन्हेऽर्द्धिता भविष्यति । तत्र भवरेखया कजभुजकदभुजयोरर्द्धस्थानं कर्त्तितम् । तदा भवरेखा जदरेखायाः समानान्तरा भविष्यति । तस्मात् कजदत्रिभुजकभवत्रिभुजे मिथः सजातीये भविष्यतः । कवं कदस्यार्द्धमस्ति कभं कजस्यार्द्धमस्ति तेन भवं जदस्यार्द्धं भविष्यति । पुनरनेनैव प्रकारेण हभरेखा खजस्यार्द्धं भविष्यति । कहं कखस्यार्द्धमस्त्येव । तस्मात् कहहभभवपूर्णज्या मिथः समाना भविष्यन्ति । पुनः अचिन्हात् अलम्बः कभपूर्णज्यायां निष्काश्यः । अयं लम्बः कभरेखां लचिन्हेऽर्द्धितां करिष्यति । पुनरयं वर्द्धितःसन् हचिन्हे लगिष्यति । तस्मात् कहमेकांशज्या यावत्तावन्मिता कल्प्या । पुनः कवं अंशत्रितयस्य ज्या एतावत्यस्ति ३ । ८ । २४ । ३३ । ५९ । ३४ । ३८ । १५ यदि कहवर्गः याव१ कतरेखया६० भाज्यते तदा लब्धिरेका कला यावद्वर्गस्य भविष्यति । इदं हलप्रमाणमस्ति यथा पूर्वमुपपन्नम् । अस्य वर्गः $\left(\frac{\text{यावव१}}{\text{६०}\times\text{६०}}\right)$ यावद्वर्गवर्गस्यैका विकला भविष्यति । अयं कहवर्गे शोधितः शेषं कलवर्गो भविष्यति । स च $\left(\text{याव१ } \frac{\text{यावव१}}{\text{३६००}}\right)$ याव१ यावववि‌कला१ कभवर्गस्य चतुर्थांशः कलावर्गः । तस्मात् कभवर्गः याव४ यावववि‌कला ४ । पुनः कभहवघातरूपः कभवर्गः कहभवघातरूपकहवर्गस्य हभकवघातस्य च योगेन तुल्योऽस्ति । कभवर्गश्चैतावान् याव१ हभकवघातः१ वा याव१ या ३ । ८ । २४ । ३३ । ५९ । ३४ । ३८ । १५ ॥ अयं द्वितीयप्रकारेण कभवर्गः सिद्धः । एतौ समाविति समशोधनार्थं न्यासः

यथा याव४ यावघविकला ४ } अत्र संप्रदायेन
याव१ या ३ । ८ । २४ । ३३ । ५९ । ३४ । २८ । १५ } शोधने कृते सति
प्रथमपक्षे याव३ या ३ । ८ । २४ । ३६ । ५९ । ३४ । २८ । १५
द्वितीये यावघविकला ४ अनयोस्त्र्यंशावपि समानौ तस्मात् त्रिभिरपवर्त्तितौ अवशिष्टावेतावपि समानौ याव१ या १ । २ । ४८ । ११ । १९ । ५१ । २९ । २५ ॥ यावघविकला१ प्रतिविकला२० पुनरेतौ यावत्तावतापवर्त्तितौ जातौ पक्षौ या१ रू १ । २ । ४८ । ११ । १९ । ५१ । २९ । २५
याघविकला१ प्रतिविकला२०

यद्यत्र तादृशाङ्को लभ्यते यस्याङ्कस्य पुनः रूपस्य चान्तरं अङ्कघनस्यैकविकलाविंशतिप्रतिविकलातुल्यं भवेत् ।

एवमत्र ग्रन्थे यवनानामनेके प्रकारा वर्त्तन्ते ।

यद्यप्यत्र सिद्धान्तसम्राजि वेधादीनां बहवः प्रकारा उपयोगिनः सन्ति तथाप्यत्र लेखः प्रौढो न ।

औरङ्गजेबसार्वभौमाज्ञया जयसिंहनरपतिर्यदा करसप्तनृप१६७२ख्रीष्टशकासन्ने शिवाजीनामकेन सह योद्धुं दक्षिणदेशं गतस्तदा प्रत्यागमनसमये जगन्नाथं विंशतिवर्षसवयस्कं वेदवेदाङ्गदर्शनशास्त्रपारङ्गतं दृष्ट्वा पारसीकारबीभाषाध्ययनार्थं स्वदेशमानयत् । अयं च स्वल्पेनैव कालेन पारसीभाषायां तथारबीभाषायां चातिप्रवीणो जातः । दिल्लीश्वरश्चैतद्बुद्ध्या सन्तुष्टः स्वसभाप्रधानपण्डितत्वेनामुं नियुक्तवान् । अयं चापि दिल्लीश्वरसंमानेन तोषितो जयसिंहेनासकृत्प्रार्थितोऽपि पुनर्जयसिंहसभां नाऽभजत् ।

"दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः ।

अन्यैर्नरेन्द्रैः खलु दीयमानं शाकाय वा स्याल्लवणाय वा स्या"दित्युत्तरं च दत्तवान् । पुनर्जयसिंहमहाराजेन दिल्लीश्वरं सम्प्रार्थ्यायं स्वदेशं नीतस्ततस्तत्साहाय्येनारबीपारसीभाषालिखिता बहूपयोगिनोऽनेके ग्रन्थाः संस्कृतभाषायां प्रकाशिताः ।

दिल्लीश्वरसभास्थारबीपारसीविद्विद्वद्भिः "संस्कृतवेत्तारो मद्भाषाभिज्ञा न भवन्ती"त्यसकृदुक्तोक्त्या पीडितः किल जयसिंहनरेन्द्रोऽमुं विलक्षणबुद्धिसम्पन्नं बहुभाषाज्ञानार्हं विचार्याऽऽनीतवानिति चिराद्भारतवर्षे जनश्रुतिः । जयसिंहसभायामागमनसमये यदि जगन्नाथ-

वयो विंशतिवर्षमितं कल्प्यते तदाऽस्य जन्मशको वेदसप्तपञ्चेन्दु१५७४-समः समायाति ।

अत्र रेखागणितस्य

प्रथमाध्याये ४८ । द्वितीयाध्याये १४ । तृतीयाध्याये ३७ । चतुर्थाध्याये १६ । पञ्चमाध्याये २५ । षष्ठाध्याये ३३ । सप्तमाध्याये ३९ । अष्टमाध्याये २५ । नवमाध्याये ३८ । दशमाध्याये १०९ । एकादशाध्याये ४१ । द्वादशाध्याये १५ । त्रयोदशाध्याये २१ । चतुर्दशाध्याये १० । पञ्चदशाध्याये ६ । क्षेत्राणि सन्ति ।

काशिकराजकीयपाठशालीयपुस्तके ग्रन्थादौ ।

कूरं जनार्दनं नाम दूरीकृत्य स्वतेजसा ।
भ्राजते दुःसहोऽरीणां यथा ग्रीष्मे दिवाकरः ॥
नाडीयन्त्रं गोलयन्त्रं दिगंशाख्यं तथैव च ।
दक्षिणोदग्भित्तिसंज्ञं वृत्तषष्ठांशकं तथा ॥
यन्त्रं सम्राडिति ख्यातं यन्त्राणामुत्तमोत्तमम् ।
जयप्रकाशं तदुच्च सर्वयन्त्रशिखामणि ॥

इति श्लोका अधिकाश्च सन्ति सिद्धान्तसम्राजि ॥

सिद्धान्तसम्राजि रेखागणिते च बहुत्र प्रतिज्ञास्थाने शकलानि लिखितानि सन्ति ।

१०. कूरः । १६४८

अयं वसिष्ठगोत्रो रैवतिकाचलप्रान्तवासी शुकभट्टात्मजो वसुवसुरसचन्द्रसंमिते १६८८ शाके वैष्णवकरणं व्यधात् ।

यद्यपि ग्रन्थादौ "श्रीविष्णुगुप्तस्य मतानुसारं सारं प्रकुर्वे" इत्यादि लेखस्तथापि सर्वं करणं भास्कराचार्यमतानुसारं पूर्वाचार्यकरणप्रक्रियावदस्ति । अत्र

"स्थूलं कृतं भानयनं यदेतज्ज्योतिर्विदां संव्यवहारहेतोः ।
सूक्ष्मं प्रवक्ष्येऽथ मुनिप्रणीतं विवाहयात्रादिफलप्रसिद्ध्यै" ॥

इति भास्कराचार्योक्तदिशा सूक्ष्मक्षेत्रानयनं च कृतम् ।

अस्यान्ते ।

आसीद्वर्तिकाचले गिरिवरे वासिष्ठगोत्रोद्भवः
ख्यातश्चारुगुणाकरैर्हरिहरो रामाभिधस्तत्सुतः ।
तत्पुत्रो हि धनेश्वरः सुमतिमान् तत्पुत्रः शुक्राख्यः सुधी-
स्तत्सूनुः करणं हि वैष्णवमिदं चक्रे कविः शङ्करः ॥

अयं श्लोको भास्करकृतगोलाध्यायान्तश्लोकप्रतिबिम्बरूपः ।

एवमत्र करणे बाणाब्धिवेद ४४५ मिते शकेऽयनांशाभाव इति लिखितम् । ग्रन्थसंख्या च श्लोकशतत्रयासन्ना । "गजभुजद्रुमभूपवियुक्शको रविगुणो मधुतो गतमासयुगि"त्याद्यहर्गणानयनेन करणारम्भशको ज्ञायते ।

यथा सर्वे ग्रहा दृक्तुल्यतां प्रयान्ति तथाऽत्र करणे विधयः सन्ति- इति मध्यमाधिकारस्य विंशतिश्लोके शङ्करेणात्र लिखितं परन्तु ग्रन्थस्यावलोकनेन पूर्वाचार्येभ्यो न कश्चिद्विशेषः प्रतिभाति । ग्रन्थरचनाकालेऽस्य वयश्चत्वारिंशद्वर्षसमं चेत्तदाऽस्य जन्मशकोऽष्टवेदनृप १६४८ सम आयाति ।

शिवलालपाठकः । १६५६

सरयूपारीणब्राह्मणाः सोनौरापाठकाः कश्यपगोत्राः काश्यामसीसङ्गमनिकटनिवासी त्रिस्कन्धज्योतिषशास्त्रपारङ्गमः पुराणेतिहासतत्त्ववेत्ता तन्त्रविद्यैककुशलः खल्वासीत् । अस्यैव तनयो रामानन्दपाठकः पुरा काशिकराजकीयप्रधानपाठशालायां सर्वपण्डितप्रधानत्वेन नियुक्त आसीत् । रामानन्दपाठको यदा पाठशालायां नियुक्तोऽभूत्तस्मिन् तद एवायं पुत्रार्जितातुलधनधान्याशनभिया गृहं त्यक्त्वा सीतारामचरणसरोरुहार्पितचित्तो विरक्तोऽभूत् ।

ज्यौतिषे यद्यप्ययं त्रिस्कन्धविद्याचतुरस्तथापि वास्तुविद्यायामस्य महती प्रसिद्धिः । अयं वास्तुविद्यां सङ्गीतविद्यारसिकः सङ्गीतविद्याकुशलस्य कस्यचिद्यवनबालकस्य गानेन सन्तुष्टस्तमपाठयत् । यद्वंशीया अद्यावधि काश्यां कर्णघण्टासन्निधे शिल्पचतुरा वास्तुप्रवीणाश्च राजन्ति ।

वाल्मीकिरामायणोपरि सुन्दरी टीका च कृता पाठकेन । गोस्वामितुलसीदासकृतहिन्दीभाषाग्रन्थेष्वप्यस्य महती प्रीतिरासीत् । एतच्छोधिता तुलसीदासकृतविनयपत्रिका च काश्यां ज्योतिर्विद्वरश्यामाचरणशर्म्मगेहे मया दृष्टा यदन्ते पाठककृतः ।

"शोधिता शिवलालेन भूवाणाङ्कनुचन्द्रके १८५१ ।
वर्षे गीतावलिरियं श्रीसीतारामतुष्टये" ॥

श्लोकोऽयं वर्त्तते । अस्य निधनसमयो न ज्ञायते । विनयपत्रिकाशोधनकाले नृपसप्तेन्दु १७१६ शके यद्यस्य वयः षष्टिवर्षात्मकं कल्प्यते तदा जन्मशको रसशररसेन्दु १६५६ समः समायाति ।

भारतवर्षेऽयमतीव प्रख्यातो विविधविद्यातत्त्वकुशलः सिद्धरूपश्चासीदिति सर्वत्र वृद्धेभ्यः श्रूयते ।

परमानन्दपाठकः । १६७०

अयं सारस्वतब्राह्मणो यद्यपि ज्योतिषस्कन्धत्रये विलक्षणः सभारञ्जनगुणस्तथाप्यस्य फलिते महती प्रसिद्धिरासीत् । जन्मकुण्डलीस्थद्वादशभावादीनां सम्यक् शुभाशुभफलज्ञानार्थमेनेन महता परिश्रमेण प्राचीनमतान्यवलम्ब्य वस्तुत आदरणीया प्रश्नमाणिक्यमालाख्या कृतिरकारि । अत्रान्ये च प्रश्नसम्बन्धिनो बहवो विशेषा भागचतुष्टयेन वर्त्तन्ते । परमानन्देन भागत्रयमेव विरचितम् । ततस्तस्मिन् दिवं गते तद्वंशीयेनोमापतिशर्म्मणा चतुर्थं भागं विरचय्य तदीया कृतिः पूर्णीकृतेति वृद्धेभ्यः श्रूयते । अयं काशिराजमहाराजबलवन्तसिंहवीरपुङ्गवसभामण्डनप्रधानगणक आसीत् तेन तन्महाराजसमय एवास्य समयः खसप्तरसेन्दुमितशकः स्फुटः । अस्य काचिदन्या कृतिर्नोपलभ्यते । अस्माभिरेतन्निर्मितपञ्चाङ्गं फलादेशीयबहुविषयभूषितं काश्यां सारस्वतविश्वनाथाग्निहोत्रिगृहे दृष्टम् ।

लक्ष्मीपतिः । १६७०

अयं पर्वतीयो ब्राह्मणः काश्यां सिद्धान्तविद्याप्रचारकः शिवलालदुर्गाशङ्करपाठकादीनां गुरुर्ज्योतिषसिद्धान्ते पाटीबीजयोश्चातिप्रगल्भ आसीत् ।

अस्य बीजे चानेकप्रकारा बहुत्रोपलभ्यन्ते । यथा करणीनां लाघवेन योगान्तरार्थमेतद्विरचितं सूत्रम् ।

"आदौ करण्योऽप्यपवर्त्तनीयास्तथा यथा स्युः कृतयः क्रमेण ।
तन्मूलयुत्यन्तरवर्गनिघ्नो युत्यन्तरे स्तोऽप्यपवर्त्तनाङ्कः" इति ॥

वस्तुतस्तत्समये प्रशंसनीयम् । काश्यां लक्ष्मीपतिस यादेव फलितविद्याया ह्रासः सिद्धान्तविद्यायाश्च वृद्धिरभूत् । अहो येषां छात्रा

Digitized by Google

इत्यादौ लसार्वधातुकमात्रस्यानुदात्तत्वे सति धातुस्वरस्य सावकाशत्वात्, प्रातिपदिकान्तोदात्तत्वमपि अग्निमान् वायुमान् अग्नीनामित्यादौ 'ह्रस्वनुड्भ्यां मतुप्' 'नामन्यतरस्या' मिति स्वरसिद्ध्यर्थं स्यात्, अत्र ह्यन्तोदात्तादिति वर्त्तत इत्यलमति कर्कशेन चोदेन ॥

अनुदात्तौ सुप्पितौ ॥ सुबिति प्रत्याहारस्येदं ग्रहणं न सप्तमीबहुवचनस्य, पित्त्वादेवानुदात्तत्वस्य सिद्धत्वात्, अत एव वृत्तौ सुप इति बहुवचनं, पित एतत्तु प्रक्रमानुरोधेन बहुवचनं, सुपश्च पकारेण प्रत्याहारो न कपः, टाबादीनां पित्करणात्, । 'पचतीति'। अवन्तोदाहरणं, तिपस्त्वदुपदेशाल्लसार्वधातुकमित्येव सिद्धम् ॥

"गुप्तिच्किद्भ्यः सन्" ॥ 'गुप गोपनइति'। गुप व्याकुलत्वे गुपू रक्षणइत्येतयोस्तु ग्रहणं न भवति तिज्ञिना सह गणे पठितस्यानुदात्तेत एव गुपेरिहापि ग्रहणात् । 'प्रत्ययसंज्ञा चाधिकृतैवेति'। का पुनरत्र विस्मरणाशङ्का, किं त्वन्वर्था प्रत्ययसंज्ञा ऽनर्थकस्य गुपादिसनो न स्यादित्याशङ्कानेन निवार्यते, अधिकारसामर्थ्यादनर्थकस्यापि भवतीत्यर्थः। अन्वर्थता त्वर्थवदनर्थकसम्भवे ऽर्थवतो ग्रहणहेतुः, निन्दादयस्तु गुपादीनामर्था न सनः, अन्यथा गुपादीनामानर्थक्यप्रसङ्गात्, धातूनां चानेकार्थत्वं तत्रतत्र दृश्यते, प्रत्ययास्तु स्वार्थिका अपि भवन्ति समासान्तादिवत् । 'जुगुप्सतइति'। धातोरित्येवमनभिधानादस्य सनो ऽनार्द्धधातुकत्वादिडभावः। 'निन्दा क्षमेति'। प्रायिकमेतदुपाधिवचनं, तथा च 'क्षेत्रियच् परक्षेत्रे चिकित्स्य' इत्यत्र ग्रन्थः, अथ वा क्षेत्रियाणि तृणानि सस्यार्थे क्षेत्रे जातानि चिकित्स्यानि विनाशयितव्यानि, अथ वा क्षेत्रियः पारदारिकः, परदाराः परक्षेत्रं, तत्र चिकित्स्यो निग्रहीतव्य इति, संशयेपि दृश्यते तद्धि चिकित्सन् य एवं विद्वान्विचिकित्सति तच्छुश्रुवानृषिर्व्यचिकित्सदिति च । 'अन्यत्रेति'। अर्थान्तरश्चेद्धोत्वन्तरादित्यर्थः। एतच्च 'पूर्ववत्सन' इत्यत्र निपुणतरमुपपादितम् । 'गुपादिष्वनुबन्धकरणमात्मनेपदार्थमिति'। एतदपि तत्रैवोपपादितं, गुपादिष्विति बहुवचनं मान्वधादिसूत्राभिप्रायं, कितिस्तु परस्मैपदी, तथा चानन्तरमेव प्रयोगा

Digitized by Google

दर्शिताः, सनो नकारः स्वरार्थः, नित्करणसामर्थ्याद्धातुस्वरो न भवति, यत्स्तोतारं जिघांससि सखायं, विशेषणार्थश्च, 'अज्झनगमां सनि' 'हनेः सः' हंस इत्यत्र मा भूत् 'स्तौतिण्योरेव षण्यभ्यासात्,' सुषुपिष इन्द्रमित्यत्र मा भूत्, 'सन्यङो' रित्यत्रापि लिटि धातोरित्यतो धातोरित्यनुवृत्तेर्यद्यपि मृणादिभ्यः से ऽप्रसंगो हंसो वत्स इत्यादौ तु स्यादेवोणादीनां व्युत्पत्तिपक्षे, अकारस्तु प्रतीषिषतीत्यत्र प्रतिपूर्वादिणः सनि विहिते 'अजादेर्द्वितीयस्ये' ति सशब्दस्य द्विर्वचनं यथा स्यादित्येवमर्थः, यथेष्टं नामधातूनामिति वक्तव्यं पुत्रीयियिषति, अन्यत्र त्वार्द्धधातुके ऽतो लोपः, सार्वधातुके शपा सहैकादेश इति नास्ति विशेषः ॥

"मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य" ॥ अत्र मान्बधी अनुदात्तेतौ शेषौ स्वरितेतौ । 'अभ्यासस्य चेकारस्य दीर्घो भवतीति' । 'सन्यत' इतीत्त्वे दीर्घो भवतीत्यर्थः । ननु विशेषविहितो दीर्घः सामान्यविहितमित्त्वं बाधित्वा ऽवर्णस्यैव प्राप्नोति, ज्ञापकात्सिद्धं, यदयं 'दीर्घो ऽकित' इत्यत्राकित इत्याह, तज्ज्ञापयति नाभ्यासविकारेषु बाध्यबाधकभाव इति, तद्धि यंयम्यत इत्यादौ नुकि कृते मा भूदिति, यदि चाभ्यासविकारेषु बाध्यबाधकभावः स्यात्ततो विशेषविहितत्वान्नुकि कृते ऽनजन्तत्वादेव न भविष्यति दीर्घः किं प्रतिषेधेन, अत एव डोढौक्यत इत्यादौ ह्रस्वत्वे कृते गुणो भवति, अन्यथा बबाध इत्यादौ चरितार्थं ह्रस्वं पापच्यत इत्यादौ चरितार्थो दीर्घः परत्वाद्बाधेत, अपर आह । सूत्रोपात्त एवार्थो वृत्तिकारेणोक्त इति कथमाभ्यासस्येति पदच्छेदः, अभ्यासस्य विकार आभ्यासः स चेत्त्वमेव, तथाहि । लोपस्य तावदभावरूपत्वादादेशो विधातुमशक्यः, यदि च ह्रस्वस्य दीर्घत्वं स्यात् तद्वितनिर्देशो ऽनर्थकः स्यात्, दीर्घश्रुत्या 'ऽचश्चे' त्युपस्थानादजन्तस्य दीर्घविधानाद्दीर्घस्य ह्रस्वस्य वा दीर्घो विशेषाभावात्तस्मादित्त्वमेव तद्धितेन प्रत्याय्यते, अथ वा सन्याहत्य विहितस्य विकारस्य ग्रहणं तदाह । 'अभ्यासस्य चेकारस्येति' । '[1]सर्वशेष इति' । न केवलं तस्यैवापि तु पूर्वयोरपि द्वयोरित्यर्थः ।

१ सर्वस्य शेष इति काशिकायां मुद्रितपुस्तके पाठः ।

'तेन क्व चिच्च भवतीति' । अर्थान्तरवृत्तिभ्यो धात्वन्तरेभ्य इत्यर्थः । एतच्च 'पूर्ववत्सन' इत्यत्रोपपादितं, मानयतीत्यादयश्चुरादिण्यन्ताः । निशानइति ण्यन्तादेव पचाद्यच् । 'मानेर्जिज्ञासायामिति' । यद्येवं ज्ञानार्थवृत्तेर्मानेरुत्तरसूत्रेणैव सन् सिद्धः, सत्यं, दीर्घविधानार्थं वचनमिड्भावार्थं च । 'वधेर्वैरूप्यइति' । चित्तस्य दुर्गन्धाद्यनुभवनिमित्तो विकारो वैरूप्यम् । 'शानेर्निशानइति' । निशानं तीक्ष्णीकरणं, यत्रैवायं पठितः शान तेजनइति तत्रैवेत्यर्थः ॥

"धातोः कर्मणः समानकर्तृकादिच्छायां वा" ॥ कर्मत्वसमानकर्तृकत्वयोः क्रियापेक्षत्वादिच्छायाश्च प्रत्ययार्थत्वेनापि तावच्छ्रुतत्वात्तदपेक्षे एव ते विज्ञायेते इत्याह । 'इषिकर्म यो धातुरिषिणैव समानकर्तृक इति' । 'अर्थद्वारकमिति' । धात्वर्थस्य कर्मत्वात्समानकर्तृकत्वाच्च धातुस्तथा व्यपदिश्यते न स्वरूपेणेत्यर्थः । किं कारणमसम्भवात्, यद्यपि करोतिमिच्छतीत्यादौ धातोः स्वरूपेणापि कर्मत्वसम्भवस्तथापि न तस्य स्वरूपेणार्थद्वारेण वा समानकर्तृकत्वं सम्भवति, किं चात्र श्तिपा निर्देशात्स्वरूपपरत्वं सन्प्रकृतेस्तु लोकव्युत्पत्त्यनुसारेणार्थपरत्वमेवातः सुष्ठूक्तं धातोरर्थद्वारकं विशेषणमिति, इच्छायाः क्रियायाः कर्मभूत इच्छयैव समानकर्तृकोऽर्थो यस्य धातोस्तस्मात्सन् भवतीत्यर्थः । 'चिकीर्षति जिहीर्षतीति' । कृहृभ्यां सन् 'इको झलि' ति कित्त्वम्, 'अज्झनगमां सनी'ति दीर्घः, 'ऋत इद्धातोः' 'हलि चे' ति दीर्घः, सनः षत्वं, द्विर्वचनं, हलादिशेषः, ह्रस्वः, 'कुहोश्चु' रिति चुत्वं ककारस्य चकारः, हकारस्य झकारः, 'अभ्यासे चर्चे' ति जश्त्वं जकारः, 'सनाद्यन्ता धातव' इति धातुसंज्ञायां लडादिः । 'धातुग्रहणं किमिति' । कर्मणः समानकर्तृकादिति वचनाद्वाक्याद्व भविष्यति, नह्येतदुभयं वाक्यार्थस्य सम्भवति सुबन्तादपि पुत्रमिच्छतीत्यादौ असमानकर्तृकत्वाच्च भविष्यति, यत्रापि समानकर्तृकत्वं गमनमिच्छति आसनमिच्छतीत्यादौ तत्रापि क्यच् बाधको भविष्यति । यद्यपि पुत्रमिच्छतीत्यादौ असमानकर्तृके क्यच् सावकाशः, तथापि चिकीर्षतीत्यादावसुबन्ते सावकाशं सनं सुबन्तेषु समा-

Digitized by Google

नकर्तृकेषु परत्वाद्बाधिष्यते, यत्रापि क्यच् प्रतिषिध्यते क्यचि मान्ताव्य-यप्रतिषेध इति, कर्तुमिच्छतीति, तत्रापि काम्यच् बाधकः, ङ्याप्प्राति-पदिकेष्वपि खट्वाकुमारीपुत्रादिषु न समानकर्तृकत्वमासनशयनादौ त्वकर्मत्वं, नहि ङ्याप्प्रातिपदिकं कर्माभिधायि विभक्त्यभिधेयत्वात्कर्मा-दीनां, धातोरपि तर्हि न स्यात्, अथ तत्र वस्तुतो धात्वर्थस्येच्छया व्याप्यमानत्वात्कर्मत्वं, प्रातिपदिकादपि स्यात्, अथात्र कर्मरूपानभिधा-नान्न स्याद्धातोरपि न स्यादिति समानं वचः, एवं तर्ह्यसमानकर्तृक-त्वादेवात्र न भविष्यति शयनासनादौ हि प्रकृत्यर्थस्यैव समानकर्तृकत्व-क्रियारूपत्वाद् न प्रत्ययार्थस्याक्रियारूपस्य, क्रियारूपस्य सिद्धता नाम यो धर्मस्तत्र घञादय इति स्मरणात्। तिङन्तादपि यत एव हेतोः पाकमिच्छतीत्यत्रार्थे पचतीच्छतीति न भवति तत एव हेतोः सनपि न भविष्यति, तदेवं न धातुमपहाय क्वचिदपि प्रसङ्ग इति प्रश्नः। 'सोप-सर्गादुत्पत्तिर्मा भूदिति'। अन्यथा सङ्घातस्य विशिष्टक्रियावचनत्वात्तत एव सन्स्यात् ततश्च सन्नन्तत्वेन तस्यैव धातुत्वात्तत एव लङ्युपसर्गात्पूर्वो ऽडागमः प्राप्नोति। ननु [1]लिङ्यप्युपसर्गस्य द्विर्वचनप्रसङ्गो दोषः शक्यो दर्शयितुं, सत्यम्, अट्प्रसङ्गमप्यपरं दोषं दर्शयितुं लङुदाहृतः। ननु धातुरेव विशिष्टक्रियावाची उपसर्गस्तु सन्निधिमात्रेणोपकारको न तु कस्य चिदर्थस्याभिधानेन, यथा भुङ्क्तेत्यत्र भुजिरेवाभ्यवहारे वर्त्तते आत्मने-पदं तु कर्त्तरि, अथ चान्तरेणात्मनेपदं नाभ्यवहारो गम्यते तद्वदुपसर्ग-सन्निधाने धातुरेव विशिष्टां क्रियामाह, ततश्चार्थद्वारके कर्मत्वसमान-कर्तृकत्वे अपि धातोरेव न सङ्घातस्य, अवश्यं चैतदेवं विज्ञेयं धातुरेव च क्रियावाची, कथं यो हि मन्यते सङ्घातः क्रियावाचीति क्रियमाणेपि तस्य धातुग्रहणे योऽत्र धातुर्न तस्मादुत्पत्तिः प्राप्नोति अकर्मत्वादसमानकर्तृ-त्वाच्च, एवं मन्यते प्रशब्दसन्निधौ तावत्प्रकर्षाख्यो विशेषो गम्यते, न च प्रकर्षमपि धातुरेवाचष्टे, प्रशब्दस्य वैयर्थ्यप्रसङ्गात्, सति चैवं समुदायस्यैव कर्मत्वं, नह्यसौ करोत्यर्थमात्रेण सन्तुष्यति नापि प्रकर्षमात्रेण, न चैवं

१ लङ्यपीति २ पु· पाठः।

योऽत्र धातुस्तस्मादनुत्पत्तिप्रसङ्गः, तस्यापि कर्मत्वात्, तथा च कठं करोति भीष्ममुदारं दर्शनीयमिति समुदायचिकीर्षायामपि भीष्मादिभ्यो द्वितीया भवति तेषामपि कर्मत्वात् । नन्वेवमपि यथा जनपदसमुदायो जनपदग्रहणेन न गृह्यते तथा कर्मसमुदायस्याकर्मत्वात्समुदायादुत्पत्तिर्न भविष्यति, यत्र तर्हि समुदायस्यैव कर्मत्वं तत्र कथं यथा प्रस्थातुमिच्छति प्रतिष्ठासतइति, अत्र हि तिष्ठतीति गतिनिवृत्तिः प्रतीयते प्रशब्दसन्निधौ तु गतिस्तत्र यथा जिगमिषतीत्येकमेव कर्म तद्वदत्रापि ततश्च समुदायादेव स्यात्, यद्येवं योऽत्र धातुः कथं ततः सन्, नह्यसौ कर्म, कर्मण इति नैषा धातुसमानाधिकरणा पञ्चमी, किं तर्हि षष्ठी कर्मणोऽवयवाद्धातोरिति, चिकीर्षतीत्यादावपि केवलस्यापि व्यपदेशिवद्भावेन कर्मावयवत्वम्, एवमप्यसमानकर्तृत्वान्न प्राप्नोति धातुमात्रस्याक्रियावाचित्वात्, अतः समानकर्तृकादित्यपि षष्ठ्यर्थे पञ्चमीति व्याख्येयं, तदेवं सङ्घातनिवृत्त्यर्थं धातुग्रहणमिति स्थितम् । 'कर्मण इति किमिति'। जिगमिषतीत्यादौ प्रयोगे प्रत्ययवाच्याया इच्छायाः कर्मापेक्षायां प्रत्यासत्त्या प्रकृत्यर्थ एव कर्म प्रत्येष्यते, यद्यपि क्रिया करणमप्यपेक्षते स्फुटतरा त्विच्छायाः कर्मापेक्षेति सैव प्रकृत्यर्थेन पूरयिष्यते नार्थः कर्मग्रहणेनेति प्रश्नः । 'गमनेनेच्छतीति' । अस्यां विवक्षायां गमेर्मा भूदित्यर्थः । असति हि कर्मग्रहणे सत्यामपीच्छायाः कर्मापेक्षायां यथैतद्वाक्यं भवति गमनेनेच्छतीति तथासन्नपि स्यादिति भावः । 'इच्छायामिति किमिति'। शब्दवैरादिसूत्रे यत्करणइति तद्विशेषणात्तु, अभिधानशक्तिस्वाभाव्याच्च करणविशेषइच्छायामेव सन् भविष्यति नमस्प्रभृतिभ्यः पूजादाविव क्यजिति प्रश्नः । 'कर्तुं जानातीति' । लक्षणैकशरणो नैवं प्रतिपाद्येतेति भावः । 'वावचनाद्वाक्यमपि भवतीति'। ननु 'समानकर्तृकेषु तुमुन्नि'-ति तुमुन्विधानसामर्थ्यादेव वाक्यं भविष्यति, अस्ति तस्यावकाशः चिकीर्षितुमिच्छतीति, नह्यत्र सनः प्रसङ्गः, सनन्तान्न सनिष्यतइति वक्ष्यमाणत्वात् । धातोरिति विधानादित्यादिना धातुग्रहणस्य प्रयोजनान्तरं दर्शयति । 'न पूर्वत्रेति' । तथा च जुगुप्सतइत्यादाविडभावः ।

'आशङ्कायामिति'। आशङ्का सम्भावना प्रयोक्तृधर्मः, तद्विशिष्टक्रियावचनात्स्वार्थे प्रत्ययः, । 'कूलं पिपतिषतीति'। कूलस्याचेतनत्वादिच्छाया असम्भवः । 'श्वा मुमूर्षतीति'। शुनश्चेतनत्वेपि जीवितस्य प्रियत्वाद्व्याध्याद्यभिभवेपि तिर्यक्त्वान्मर्तुमिच्छा न भवतीति, शङ्के पतिष्यति कूलं, शङ्के मरिष्यति श्वेत्यत्रार्थः । प्रत्याख्यानं तु यो यदिच्छति स तस्य पूर्वरूपाणि करोति, यथा देवदत्तः कटं चिकीर्षुः सचक्षति रज्जुकीलपूलादिकं चादत्ते, कूलस्यापि च पूर्वरूपाणि दृश्यन्ते लोष्टाः शीर्यन्ते भिदा जायन्ते, श्वानः खल्वपि मुमूर्षव एकान्तशीलाः स्थूलाश्च भवन्ति, तदिह पूर्वरूपदर्शनादिच्छाध्यारोप्यते इच्छत्येवायं य एवमिच्छाविनाभूतानि पूर्वरूपाणि करोति, गौणमुख्यन्यायश्च क्व चिल्लक्ष्यापेक्षया नाश्रीयते ततश्चाध्यारोपितेच्छाश्रयः प्रत्यय इति । 'विशेषणं किमिति'। इच्छाग्रहणं किमित्यर्थः । 'शैषिकादिति'। सन्प्रसङ्गादन्योप्यनिष्टः प्रत्ययो वार्यते, शेषाधिकारविहितः शैषिकः, मतुबर्थे भवो मतुबर्थीयः, गहादेराकृतिगणत्वाच्छः, मतुपोर्थो मतुबर्थः, सोस्यास्तीति मतुबर्थिकः । 'अत इनिठनौ'। शैषिकप्रत्ययान्ताच्छैषिकः सरूपप्रत्ययो नेष्टः, तद्यथा शालायां भवो घटः शालीयः, तत्र भवमुदकं पुनश्छो न भवति, विरूपस्तु भवत्येव, अहिच्छत्रे भवमाहिच्छत्रं, तत्र भवमाहिच्छत्रीयम्, अणन्ताच्छो भवति, तथा दण्डोस्यास्तीति दण्डिकः, 'अत इनिठनौ' सोऽस्यास्तीति पुनष्ठन् भवति, विरूपस्तु भवत्येव दण्डिमती सेनेति । 'सनन्तान्न सनिष्यत इति' सरूप इत्येव, सारूप्येण चात्र सादृश्यं लक्ष्यते तच्चार्थद्वारकमिति इच्छासनन्तादिति पूर्वोक्त एवार्थो भवति, एतच्च न्यायसिद्धम् । तथाहि । जातौ पदार्थे समुदाये सङ्कल्पलक्षणं प्रवर्तते ततश्च तत्प्रवृत्तेः प्राक् तत्प्रत्ययान्तप्रकृत्यसम्भवात्सन्नन्तान्नास्ति तत्प्रत्ययप्रसङ्गः, इह यो ग्रामं गन्तुमिच्छति तस्य यद्यपि ग्रामो न स्वरूपेणेष्टो ग्रामो मे स्यादिति तथापि गम्यमानतारूपेण सोपीष्ट एव, ग्रामो जिगंस्यते, जिगमिषितः, जिगमिषितव्यः, सुजिगमिष इति इच्छावाचिनः सन्नन्तात् ग्रामे कर्मणि लादयो भवन्ति, गमिं प्रति कर्मत्वं

Digitized by Google

[1]ग्रामस्य स्पष्टमेव,अत एव ग्रामं जिगमिषति ग्रामाय जिगमिषतीति गत्यर्थकर्मणीति द्वितीयाचतुर्थ्यौ भवतः॥

"सुप आत्मनः क्यच्" ॥ अत्रापीच्छायामित्यनुवृत्तेस्तदपेक्षमेव सुबन्तस्य कर्मत्वं विज्ञायतइत्याह। 'इषिकर्मण इति'। आत्मशब्दोयं परव्यावृत्तिवचनः स्वशब्दपर्यायो गृह्यते न चेतनद्रव्यवचनः, स हि गृह्यमाण इच्छया वा सम्बध्येत सुबन्तेन वा, तत्रेच्छया सम्बन्धे कर्त्तरि षष्ठी, आत्मन इच्छायामात्मकर्तृकायामिच्छायामात्मा चेदिच्छतीत्यर्थः स्यात्, ततश्चात्मग्रहणमनर्थकं स्यात्, सर्वैवेच्छा ऽऽत्मकर्तृका तस्यास्तद्धर्मत्वात्, सुबन्तसम्बन्धे तु देवदत्तस्य पुत्रमिच्छति यज्ञदत्त इत्यत्रापि प्राप्नोति परस्यापि ह्रीष्यमाण आत्मन एवेष्टो भवति तस्याप्यात्मत्वात्, अनर्थकं चात्मग्रहणं स्यात् व्यावर्त्याभावात्, वृक्षस्य जलमिच्छति खट्वायाः पादमिच्छतीत्यादौ यत्राचेतनार्थं किं चिदिष्यते तद्व्यावर्त्यमिति चेत्, न। तत्रापि चेतनस्यैव परमशेषित्वात्, सर्वमेव हि भोग्यं चेतनानामेव शेषभूतं खट्वायाः पादमिच्छतीत्यत्रापि यस्य तत् खट्वादिकमुपभोग्यं तदर्थमेव तदिष्यते खट्वादिकं तु तस्यैव द्वारमात्रम्, अतः परव्यावृत्तिवचन एवात्मशब्दस्तत्रापि यदीच्छया सम्बन्धः स्यात् पूर्ववत्कर्त्तरि षष्ठ्यामात्मग्रहणमनर्थकं स्यात् सर्वस्या एवेच्छाया एषितृकर्तृकत्वादिति सुबन्तेन सम्बध्यते, सुबन्तात्कर्मण इच्छायामभिधेयायां क्यज् भवति तच्चेत्सुबन्तमात्मनः स्वस्य सम्बन्धि भवति, कस्य स्वस्येत्यपेक्षायामिच्छया एषितुः सन्निधापितत्वात् तस्यैवैषितुरात्मनः सम्बन्धिइति विज्ञायते तदाह। 'एषितुरेवात्मसम्बन्धिनः सुबन्तादिति'। न चैवमात्मनः पुत्रं परस्य दारमिच्छतीत्यत्रापि सुबन्तस्यात्मसम्बन्धित्वात्प्रसङ्गः, नात्र यथाकथंचिदात्मसम्बन्धित्वविवक्षितं किं तर्हि इष्यमाणमेव रूपमात्मसम्बन्धित्वेन यदेष्यते तदा प्रत्ययः। 'पुत्रीयतीति'। 'क्यचि चे'तीत्वम्। 'सुप इति किमिति'। कर्मण इति वचनात्तिङन्तादप्रसङ्गः, नहि तिङन्तं कर्म, धातोश्चाप्रसङ्गो विशेषविहितेन सना बाधितत्वात्।

१ अत एवेत्यधिकं २ पुस्तके।

ङ्याप्प्रातिपदिकादुत्पत्तावपि न कश्चिद्दोषः 'नः क्ये' इति पदसंज्ञाविधानात्, तच्च क्रियमाणे सुब्ग्रहणे नियमार्थं नान्तमेव क्ये पदमिति, तदेव ङ्याप्प्रातिपदिकादुत्पत्तौ विध्यर्थं भविष्यति । नन्वसति सुब्ग्रहणे ङ्याप्प्रातिपदिकात्सुबन्ताच्चोत्पत्तव्यमविशेषात्ततश्च 'नः क्ये' इत्येतद्यद्यपि नियमार्थमथापि विध्यर्थम् उभयथापि दोषः, नियमार्थे हि वाच्यतीत्यादौ प्रातिपदिकात्सुबन्ताच्चोत्पत्तौ यद्यपि दोषाभावो नकारान्तेषु प्रातिपदिकादुत्पत्तिपक्षे नलोपो न स्यात्, अथ तेषु प्रातिपदिकादुत्पत्तौ विध्यर्थम्, एवं सति वाच्यतीत्यादौ सुबन्तादुत्पत्तिपक्षे जश्त्वादिपदकार्यं स्यात्, अतः सुबन्तादेव यथा स्यात्प्रातिपदिकान्मा भूदिति नियमार्थं सुब्ग्रहणं कर्त्तव्यमेव, एवं तर्हि कर्मग्रहणाद् ङ्याप्प्रातिपदिकादप्रसङ्गः, सुबन्तमेव हि कर्माभिधायि पञ्चकपक्षेपि द्योतकविभक्त्यपेक्षितत्वात्, तदेवं सुबन्तमपहाय न क्वचित्प्रसङ्ग इति मत्वा प्रश्नः । 'वाक्यादिति' । पदसमूहादित्यर्थः । 'महान्तं पुत्रमिच्छतीति' किं च स्याद्यद्यत्र स्यात् प्रत्ययार्थे गुणभूतयोर्महत्पुत्रशब्दयोरसति परस्परसम्बन्धे समासो न स्यात्, [1]तथा च तन्निबन्धनमात्वं न स्यात्, किमिदानीं न भवति महापुत्रीयतीति, भवति, यदैतद्वाक्यं भवति महान्पुत्रो महापुत्रः महापुत्रमिच्छतीति, अथ क्रियमाणेपि सुब्ग्रहणे कस्मादेवात्र न भवति प्रत्ययग्रहणपरिभाषया समुदायस्यासुबन्तत्वात्, किं पुनरयं कर्मणोः समुदाय आहोस्वित्समुदायः कर्म, किं चातः, यदि कर्मणोः समुदायो न कर्मग्रहणेन गृह्यतइति समुदायादप्रसङ्गः, अथ समुदायः कर्म अवयवाद् द्वितीया न प्राप्नोत्यकर्मत्वात्, एवं तर्हि कर्मणोरेवायं समुदायः सुब्ग्रहणं तु यदत्र कर्म तस्मान्मा भूदिति, अथ क्रियमाणेपि सुब्ग्रहणे कस्मादेव तस्मान्न स्यात् सुबन्तमेव हि तत्, असामर्थ्यात्, कथमसामर्थ्यं, सापेक्षमसमर्थं भवतीति, अक्रियमाणे पुनः सुब्ग्रहणे नायं पदविधिर्भवति, यत्र हि पदस्यैवासाधारणं किञ्चिद्रूपमाश्रितं स पदविधिः, कर्मग्रहणं तु न पदस्यैवासाधारणं धातोः कर्मण इत्यपदेपि दृष्टत्वात् । अन्ये त्वाहुः ।

[1] ततश्चेति २ पु॰ पा॰ ।

Digitized by Google

समुदायस्यापि कर्मत्वमवयवयोश्च महत्त्वविशिष्टस्य पुत्रस्येष्यमाणत्वा-द्विति तेषां समुदायादवयवाच्च मा भूदिति सुब्ग्रहणम् । ‘राज्ञः पुत्र-मिच्छतीति’ नन्वसामर्थ्यादेवात्र न भविष्यति, कथमसामर्थ्यं, सापेक्षमसमर्थं भवतीति, यत्र तदर्थान्तरेणापि तृतीयस्य पदस्य प्रयोगं परस्येति गम्यते तत्र मा भूद्यथा ऽघमिच्छति व्यसनमिच्छतीति, नहि कश्चि-दात्मनोघमिच्छति । ‘ककार इत्यादि’ । स्यादेतत् । ‘नः क्य’ इत्य-त्रापि मा कारि ककार इति, यद्येवं सामसु साधुः सामन्यः, अत्रापि प्राप्नोति । ‘चकारस्तद्विघातार्थइति’ । स्वरस्तु प्रत्ययस्वरेण सिद्धो धातुस्वरेण वा,[1] अकारस्तु दृषदमिच्छति दृषद्यतेर्ण्वुल् ‘अतो लोपः,’ ‘यस्य हलः,’ ‘क्यस्य विभाषा’ दृषदकः, अत्रातो लोपस्य स्थानिव-द्भावा ‘दत उपधाया’ इति वृद्धिर्मा भूत् । मृदमिच्छति मृद्यति मृद्यतेरचो यत्, अतो लोपादि पूर्ववत्, मृद्यं, ‘यतो ऽनाव’ इत्याद्युदात्तत्वं यथा स्यादिति, पुत्रीयतीत्यादौ च शपा सहैकादेश उदात्तो भवति । ‘क्यचि मान्ताव्ययप्रतिषेध इति’ । मान्तग्रहणं प्रातिपदिकस्य विशेषणं न सुबन्तस्य, तेन पुत्रमिच्छतीत्यादौ क्यच् भवति कामिच्छति कानिच्छती-त्यादौ च न भवति । ‘उच्चैर्नीचैरिति’ । अधिकरणप्रधानयोरप्यनयोरा-धेये यदा वृत्तिस्तदा कर्मत्वं, गोसमानाक्षरनान्तादित्येके, गोशब्दात्स-मानाक्षरान्ताच्चान्ताच्च क्यच् भवतीत्येके मन्यन्ते । अकारादयो दश समा-नाक्षरास्तत्र लवर्णान्तस्य ऋकारान्तस्य च प्रातिपदिकस्याभावादेकारा-त्पूर्वेषां सप्तानामचां ग्रहणम्, अस्मिन्पक्षे वाच्यतीत्यादि न सिद्ध्यति, तस्मान्नायं स्थितः पक्ष इत्याहुः । अत एवास्य वृत्तावनुपन्यासः । ‘परे-च्छायामिति’ । शेषषष्ठ्याः समासो न कर्तृषष्ठ्याः, सुबन्तद्वारकश्च पर-स्येच्छया सम्बन्धः, परस्य सुबन्तार्थो या इच्छा तस्यामित्यर्थः । ‘अघा-यवइति’ ‘क्याच्छन्दसी’ त्युप्रत्ययः, अश्वाघस्यादित्यात्वम्, एतदेव क्यचि परत आत्वविधानं ज्ञापकं छन्दसि परेच्छायामपि क्यच् भव-तीति, नहि कश्चिदात्मनोघमिच्छति, न चाचारक्यजर्थं, छन्दस्यघश-

[1] सिद्ध इत्यधिकम् ।

Digitized by Google

च्छादाचारे क्यचोऽदर्शनात्। अथास्मात्क्यजन्ताल्लकृत्यक्तखलर्था भवन्तः क्व भवन्ति, यथायोगं भावे कर्त्तरि च, न तु कर्मणि, प्रकृत्यर्थविशिष्टाया नियतविषयाया इच्छायाः क्यजन्तेनाभिधानं न सा वस्त्वन्तरं विषयीकरोति, अतो जीवत्यादिवदकर्मकः क्यजन्तः, आचारक्यजन्ते तूपमानकर्मणः पुत्रादेरन्तर्भावेपि उपमेयस्यच्छात्रादेरनन्तर्भावात्तस्मिन्कर्मणि लादयो भवन्त्येव पुत्रीय्यतेच्छात्रः पुत्रायितव्य इत्यादि, यथा श्येनायते काक इति उपमानकर्त्तुरन्तर्भावेपि उपमेयकर्त्तरि लो भवति तद्वत्, इह च माणवकं मुण्डं करोति मुण्डयति माणवकं मुण्ड्यते माणवको मुण्डयितव्यो माणवक इति, णयन्तो धातुर्मौण्ड्यगुणविशिष्टद्रव्यमात्रमन्तर्भावयितुं शक्तो न तु माणवकादिकं विशेषमिति तस्य धातावनन्तर्भावात्तत्र लादयो भवन्ति, यद्येवमनेन हेतुना क्यजन्तादपि प्राप्नोति, माणवकं मुण्डमिच्छति मुण्डीयति माणवकं मुण्डीय्यते माणवक इति, नात्र क्यचा भवितव्यमसामर्थ्यात्, कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति, णिजपि तर्हि न प्राप्नोति। स्यादेतत्। नोभौ करोतियुक्तो मौण्ड्यं माणवकश्च नहि माणवकत्वं क्रियते ततश्च मुण्डं करोतीत्यत्रैवार्थे मुण्डयतीति णिजुत्पद्यते मुण्डं करोति माणवकमित्यत्र वाक्येपि मुण्डस्यैव कर्मत्वं तत्सामानाधिकरण्यात्तु माणवकाद् द्वितीयोत्पत्तिः, तदेवं माणवकादयो मौण्ड्यस्याधारविशेषप्रतिपादनार्थमुपादीयमानाः करोतियुक्ता न भवन्ति, यदा पुनरुभौ करोतियुक्तौ भवतो न भवति तदा वृत्तिः, तद्यथा बलीवर्द्दं करोति तं च मुण्डं करोति मुण्डयति बलीवर्द्दमिति णिज्न भवति, यद्येवमनेनैव हेतुना क्यजपि न प्राप्नोति, यदि चाधारत्वेनापि माणवकोपेक्ष्यते पुनरपि सापेक्षता। किं च यदि न माणवकः करोतियुक्तः कथं तत्र लकार उत्पद्यते मुण्ड्यते माणवक इति, कश्चायं न्यायो न माणवकः करोतियुक्त इति, नह्यसौ मौण्ड्यमात्रेण सन्तुष्यति माणवकस्यमसौ मौण्ड्यमभिनिर्वर्त्तयति ततश्च स्वरूपेणाक्रियमाणोपि माणवको मुण्डरूपेण क्रियते, दृश्यते च, तदेवं सति यदि णिज् भवति क्यजपि स्याद् अथ क्यज्न भवति णिजपि न स्यादिति समानं वचः, एवं तर्हि मुण्डा-

दयो गुणवचाना, गुणवचनाश्च सापेक्षाः उच्यते च णिच् सो वचना-त्सापेक्षेभ्योपि भविष्यति, क्यच् पुनरनपेक्षेभ्यः पुत्रादिभ्यः सावकाश इति माणवकं मुण्डमिच्छतीत्यादौ सापेक्षेभ्यो न भविष्यतीति, यद्यप्ययमपि णिच् गुणमात्रकरणविवक्षायां सावकाशः मुण्डयत्ययं नापितः प्रवीणो मौण्ड्यकरण इति तथापि तत्करोतीति सिद्धे णिचि पुनर्विधानमिदं सापे-क्षेभ्योपि यथा स्यादित्येवमर्थमेव, यद्वा द्विविधा मुण्डादयो धातवः प्रातिपदिकानि च तत्र सूत्रे धातव उपात्तास्तेभ्यः स्वभावत एव विशि-ष्टक्रियावचनेभ्यो णिज्भविष्यति प्रातिपदिकानां तु विग्रह एव माणवकं मुण्डं करोतीति । अथ वा नेदं युगपदुभयं भवति वाक्यं च प्रत्ययश्च ततश्च मुण्डयतीति द्रव्यमात्रं प्रतीयते तत्र विशेषार्थिना विशेषो ऽनु-प्रयोक्तव्यः, अथ वा मुण्डस्यैव शुद्धेन करोतिना ऽन्वयः मौण्ड्यविशिष्टेन तु माणवकस्य यथा गां दोग्धि पय इति शुद्धस्य दुहेः पूर्वं गवाभि-सम्बन्धः पश्चात्तु गोदुहिना पयसः, क्यच्प्रत्ययस्त्वनभिधानान्न भवति माणवकं मुण्डीयतीत्युक्ते माणवकं मुण्डमिवाचरतीत्यर्थान्तरमेव प्रती-यते तदेवमिच्छाक्याजन्ताद्भावे कर्त्तरि च लादय इति स्थितम् ॥

"काम्यच्च" ॥ किमर्थो योगविभागो न सुप आत्मनः क्यच्का-म्यचावित्येकयोग एव क्रियेत, एवं हि चकारो न कर्त्तव्यो भवति तत्राह । 'योगविभाग इत्यादि' । एकयोगे हि सति उत्तरसूत्रे द्वयोरप्यनुवृत्तिः स्यात् । ननु योगविभागेप्यानन्तर्यात्काम्यच एवानुवृत्तिः प्राप्नोति, नैष दोषः । चकारोत्र क्रियते स क्यचोनुकर्षणार्थः, तदनुकर्षणस्य चैतदेव प्रयोजनमुत्तरत्रानुवृत्तिर्यथा स्यात् काम्यचस्तु योगविभागसामर्थ्यादननु-वृत्तिः । 'प्रयोजनाभावादिति' । अग्निकाम्यतीत्यादौ गुणनिषेधो न प्रयो-जनम्, अनार्द्धधातुकत्वादेव गुणस्याप्रसङ्गात् 'विजुपे छन्दसि' उपयट्, उप-यजमिच्छति उपयट्काम्यतीत्यत्र न संप्रसारणं प्रयोजनं, यजादिभिः कितो विशेषणात्, यजादिभ्यो यो विहितः किदिति, वाक्काम्यतीत्यत्रापि धातोः सद्रूपग्रहणे तत्प्रत्यये कार्यविज्ञानान्न संप्रसारणं प्रयोजनम् । 'चकारादित्वाद्वेति' । केचिद्व्याचक्षते, अन्तेस्य चकारोनर्थकः, धातुस्वरो-

धान्तोदात्तत्वस्य सिद्धत्वात्, स आदौ कर्त्तव्यः, अथ वा अन्तेऽपि कृतो नियमार्थः संपद्यते चिदेवायं व्यपदेष्टव्यो नानुबन्धान्तरेणेति, तेनान्ते कृत आदित्वफलसंपादनादादितः संपन्नइति । अन्ये तु सुप आत्मनः क्यच् काम्यच्चेति द्विचकारकनिर्देशाश्रयेण चकारादित्वं वर्णयन्ति, चित्कर्णं तु पुत्रकाम्यतीत्यत्र सति शिष्टमपि स्वस्वरं बाधित्वा चित्स्वर एव यथा स्यादिति ॥

"उपमानादाचारे" ॥ कुटइत्युपमेये सप्तमीश्रवणादुपमानमपि सप्तम्यन्तमेवेति कर्मविवक्षायामेतत्प्रयोगसम्भवाद्वचनारम्भः । कुट्यामिति तु युक्तः पाठः ॥

"कर्त्तुः क्यङ् सलोपश्च" ॥ 'आचारइति वर्त्तत इति' । तेन तदपेक्षमुपमानस्य कर्तृत्वं विज्ञायतइति भावः । 'सलोपश्चेति' । यद्ययं चशब्दः समुच्चयवृत्तिर्विज्ञायेत यदेकमेव वाक्यं स्यात् क्यङ्सलोपौ भवत इति ततश्च यत्रैव सलोपस्तत्रैव क्यङपि स्याद् ओजायतइति, इह तु न स्यात् श्येनायते काक इति, अतो ऽन्वाचये चशब्दे वाक्यभेदश्चाश्रयणीयः, अविशेषेणोपमानात्कर्त्तुः क्यङ् भवति यत्र तु सकारः सम्भवति तत्र तस्य लोप इति तदिदमुक्तम् । 'अन्वाचयशिष्टः सलोपस्तदसम्भवेऽपि क्यङ् भवतीति' । 'श्येनायतइति' 'अकृत्सार्वधातुकयोर्दीर्घः' । 'सलोपविधावपीति' । सलोपस्यान्वाचयशिष्टत्वेन वाक्यभेदे सत्ययमपि गुणो भवतीत्यर्थः । अपिचशब्देनैतद्दर्शयति क्यङ्विधौ तावत्सम्बध्यते वाक्यसंपादनाय एवं सलोपविधावपीति । 'ओजायतइति' । ओजःशब्दो वृत्तिविषये तद्वति वर्त्तते । 'ओजसोऽप्सरसो नित्यं पयसस्तु विभाषयेति' । अन्यस्य तु यशःप्रभृतेर्नैव भवतीत्येके, नेति वयम् । ओजोऽप्सरोव्यतिरिक्तस्य सकारान्तस्योपलक्षणार्थं पयोग्रहणम् । अत एवं सलोपो वा, ओजोऽप्सरसोर्नित्यमिति सामान्येन वार्त्तिकं तेन यशायते यशस्यतइत्यादावपि भवति । सलोपोऽप्सरस एवेत्ययं तु पक्षो भाष्येऽपि न स्थितः, । 'सलोपविधौ कर्त्तुरिति स्थानषष्ठी संपद्यतइति' । प्रत्ययविधौ यत्पञ्चम्यन्तं तदेव लोपेन सम्बन्धे ऽर्थाद्विभक्तिविपरिणामो भवतीति षष्ठ्यन्तं संपद्य-

तदत्यर्थः । 'तत्रालोन्त्यस्येति नियमे सतीति' । सकारेण कर्तृविशेषणात्तदन्तविधिविज्ञानात्तदर्थमेव च सेति पृथक् पदं लुप्तषष्ठीकं, क्वचिदलोन्त्यनियमे सतीति पाठः, तत्र सूत्रैकदेशानुकरणत्वात्समासेपि विभक्तेर्लुगभावो यथास्यवामीयमिति । 'आचारइत्यादि' । क्यङपवादोऽयं, गल्भ धार्ष्ट्ये, क्लीब अधार्ष्ट्ये, होडृ अनादरे, एते पचाद्यजन्ता गृह्यन्ते, तस्य चाकारस्य वाक्ये ऽनुदात्तत्वानुनासिकत्वे प्रतिज्ञायेते, तेन क्विबन्तादात्मनेपदं भवति, वावचनात्क्विपा मुक्ते क्यङ् भवति, क्विप्सवियोगेनानुनासिकत्वप्रतिज्ञानात् क्यङ्पक्षे इत्संज्ञा न भवति । किमर्थं पुनरिदं यावता गल्भादयो धातव एवानुदात्तेतः पठ्यन्ते, तेभ्यो गल्भतइत्यादि सिद्ध्यति एतेभ्य एव पचाद्यजन्तेभ्यः क्यङि अवगल्भायतइत्यादि, यद्यपि धार्ष्ट्याद्यर्थे गल्भादयः पठ्यन्ते तथाप्यनेकार्थत्वाद्धातूनाम् अवगल्भइवाचरतीत्यत्रार्थेपि तएव वर्त्तिष्यन्ते, सत्यम्, अवगल्भांचक्रइत्यादौ प्रत्ययान्तत्वादाम्यथा स्यादित्येवमर्थं क्विब् विधीयते । अथ यदा धातुभ्य एव लिड्विधीयते तदा कथं भवितव्यम् अवजगल्भे विचिक्लीबे विजुहोडे इति । अन्ये तु धातुभ्य एव क्विब् विधीयइति वदन्त एतानि रूपाणि न सम्भवतीत्याहुः । तदयुक्तं भाष्यविरोधात् । भाष्यकारस्तावत्सर्वप्रातिपदिकेभ्य इत्यनेन सिद्धिमाशङ्कते न तर्हीदानीमित्यादिना, नहि धातुग्रहणे सति तेन सिद्धिशङ्कोपपद्यते । वार्त्तिककारोपि सर्वप्रातिपदिकेभ्य इति वदन् गल्भादिष्वपि प्रातिपदिकग्रहणमेव मन्यते, न केवलं गल्भादिभ्य एवापि तर्हि सर्वेभ्य एव प्रातिपदिकेभ्य इति हि तस्यार्थः । सर्वप्रातिपदिकेभ्य इत्यत्र सर्वेभ्य इति वक्तव्ये प्रातिपदिकग्रहणात् प्रातिपदिकादेव क्विब् विधीयते न सुबन्तात् तेन पदत्वाभावादश्वतीत्य 'तो गुणे' इति शपा पररूपं भवति, विधुर्विशब्दाभ्यां क्विपि शपि गुणे 'एङः पदान्तादती' ति न भवति, विधवति स्वयति, राजनतीति नलोपो न भवति, वाचतीत्यादौ तु कुत्वजश्त्वादि न भवति, येपि सर्वप्रातिपदिकेभ्यः क्विपमिच्छन्ति तैरपि गल्भाद्यनुक्रमणं कर्त्तव्यमात्मनेपदार्थाननुबन्धानासंज्ञामीति ॥

"भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः" । लोपविधौ भृशादिभ्य इति

पञ्चमी स्थानषष्ठ्या विरिच्यते, हला च भृशादयो विशेष्यन्ते, तत्र तदन्त-
विधौ सति हलन्तानां लोपो विधीयमानो भृशायत इत्यादावहलन्ते न भवति
तदाह। 'हलन्तानां च लोप इति'। एवं च स्पष्टमेव प्रतीयते ऽन्वाचये
चशब्द इति, सन्नियोगे हि विज्ञायमाने ऽहलन्तानां पाठोनर्थकः स्यात्।
'अच्वेरिति प्रत्येकमभिसम्बध्यत इति'। तेनैकवचनमुपपद्यत इति भावः।
'किमर्थं पुनरिदमुच्यत इति'। अच्वेरित्येतदधिकृत्य प्रश्नः। 'तेनेति'।
अनुप्रयुज्यमानेन भवतिनेत्यर्थः। न च भवतेरनुप्रयोगं बाधित्वा क्यङ्
भवितुमर्हति, अच्व्यन्तेषु सावकाशत्वात्। किञ्च भवतेरभावे च्वेरपि
निवृत्तिप्रसङ्गः, तद्योगे तस्य विधानात्, कथं तर्हि डाजन्तात्क्यष् भवति
यावता डाजपि भवतियोगे विधीयते, अत्र परिहारं वक्ष्यति कृभ्वस्ति-
भिरिव क्यषापि योगे डाज् भवतीत्येतदेव ज्ञापकमिति। 'तत्सदृशप्र-
तिपत्त्यर्थं तर्हीति'। नञिवयुक्तन्यायेन च्व्यन्तसदृशा भृशादयः कथनाम
प्रतीयेरन्निति च्व्यन्तपर्युदासः क्रियते सादृश्यं चाभूततद्भावविषयत्वेने-
त्याह। 'अभूततद्भावविषयेभ्यो भृशादिभ्य इत्यादि'। 'भृशायत
इत्यादि'। अजन्तानामकृत्सार्वधातुकयोरिति दीर्घः, हलन्तानां तु लोपः।
असुमनाः सुमना भवति सुमनायते, दुर्मनायत इत्यादि। 'भृशीभव-
तीति'। इदानीमेवोक्तं नास्त्यत्र प्रसङ्ग इति तस्मादच्व्यर्थविषयं प्रत्यु-
दाहरणं प्रदर्शनीयं क्व दिवा भृशा भवन्तीति। ये रात्रौ भृशा नक्षत्रा-
दयस्ते दिवा क्व प्रदेशे भवन्तीत्यर्थः। इह मनःशब्दः सोपसर्गः
पठ्यते सुमनस् दुर्मनस् अभिमनस्, उन्मनस्, अत्र किं सोपसर्गात्सङ्घा-
तात्प्रत्ययो भवत्याहो स्विदुपसर्गरहितान्मनःशब्दादेवेति विचारः,
तदर्थं च किमुपसर्गः प्रकृत्यर्थविशेषणं सुमनश्शब्दाद् दुर्मनःशब्दादिति
उत प्रत्ययार्थविशेषणं सुभवतौ दुर्भवतौ अभिभवतौ उद्भवताविति, कथं
पुनर्मनश्शब्देन सह पठित उपसर्गः प्रत्ययार्थविशेषणमाशङ्क्यते, तद्विशे-
षणत्वे हि प्राग्भवतेः पठेत, नैष शक्यः प्राग्भवतेः पठितुम्, एवं हि
सर्वेभ्य एव भृशादिभ्य उपसर्गविशिष्ट एव भवत्यर्थे प्रत्ययः स्याद्
मनश्शब्दादेव च विशिष्टेर्थे इष्यत इत्येवमर्थो मनश्शब्देन सह पाठः

स्यात्, तत्र यदा मनश्शब्देन स्वादीनां बहुव्रीहिस्तदा प्रकृत्यर्थविशेषणं ते भवन्ति, यदा त्वसमस्ता एव तदा प्रत्ययार्थविशेषणं, मनश्शब्दश्च वृत्तिविषये तद्वति वर्त्तते मनस्वी सुष्ठु भवतीत्यादावर्थे क्यङ् प्रत्ययः, प्राप्त्यर्थस्य वा भवते 'राधृषाद्वेति' विकल्पितणिचोऽत्र विषये ग्रहणं तेन मनः कर्म शोभनं प्राप्नोतीत्यादिरर्थो भवति, तत्राद्ये पक्षे ऽडाड्ल्यब्द्विर्वचनेषु दोषः, अट्, स्वमनायत, दुरमनायत। आट्, अभ्यमनायत उदमनायत। उपसर्गस्यापि क्यङन्ते धातावन्तर्भावात्ततः पूर्वमडाटो प्राप्नुतः, परौ चेष्येते, ल्यप्, सुमनाय्य, अभिमनाय्य, उपसर्गस्य तदन्तेऽनुप्रवेशात्तद्व्यतिरिक्तपदाभावादसति समासे ल्यपोऽभावात्सुमनायित्वेति स्यात्, द्विर्वचनं, क्यङन्तात्सनि कृते उपसर्गस्य सनन्तेऽनुप्रवेशात्तस्य द्विर्वचने सति सुसुमनायिषते अबिभिमनायिषतइति स्याद्, सुमिमनायिषते अभिमिमनायिषतइति चेष्यते, नैष दोषः। चुरादौ संग्राम युद्धइति पठ्यते स न पाठ्यः। संग्रामशब्दाद् युद्धवाचिनः 'तत् करोति तदाचष्ट' इत्येव णिचः सिद्धत्वात्, पठ्यमानस्तु ज्ञापयति सोपसर्गात्सङ्घातादुातुसंज्ञानिमित्तकप्रत्यये विधित्सिते उपसर्गाः पृथक् क्रियन्ते परिशिष्टादेव तु प्रत्यय इति, संग्रामशब्दो हि सोपसर्गः सङ्घात एव चुरादावपि पठ्यते न तूपसर्गसदृशावयवं शब्दान्तरं तथा च 'वा पदान्तस्य' ति परसवर्णविकल्पो भवति, अन्यथा स न स्यात्, स एवमर्थः पठ्यते असंग्रामयत शूरः संग्रामयित्वा सिसंग्रामयिषतइत्यादि रूपं यथा स्यादिति, ततश्चोक्तस्यार्थस्य ज्ञापकः नियमार्थो वा धातुसंज्ञाहेतुः प्रत्ययः सोपसर्गाद्यदि भवति संग्रामशब्दादेवेति। ननु चात्रानुदात्तेदयं संग्रामयतिरिष्यते ततश्चात्मनेपदार्थमनुबन्धमासंक्ष्यामीति पाठः स्यादिति कथं ज्ञापको नियमार्थो वा भवेत्। स्यादेतत्। अनुबन्धासञ्जनार्थे हि पाठे ग्राम युद्धइत्येव पठितव्यं संशब्दस्तु द्योतकः प्रयोगदर्शनादेव लभ्यते इङ्कोरिवाधिः, नियमार्थस्तु संग्रामेति पाठ इति, एवमपि यथा इङिकोरधेः पूर्वमाण् न भवति तथा ऽस्यापि न स्यात्, तस्माद् द्वितीयः पक्ष आश्रीयते, यद्येवं यथा श्येनायतइति आचारार्थस्य क्यङोक्तत्वादाडः

Digitized by Google

प्रयोगो न भवति तथा स्वादीनामपि न स्यात् तद्विशिष्ट इवार्थो क्यङो विधानात् युक्तमेकोपसर्गेण विशिष्टार्थे क्यङुत्पद्यतइति तस्य तेनाभिधानम्, इह पुनरनेकेन तत्र मनायतइत्युक्ते संदेहः स्यात् सुभवतो दुर्भवतो वेति तत्रासंदेहार्थमुपसर्गः प्रयोक्तव्यः, अयं तर्हि दोषः, मनःशब्दात्क्यङि कृते मनायतइत्यस्य तिङन्तस्य स्वादेरतिङन्तादुत्तरस्य निघातः प्राप्नोति, पक्षान्तरे तु सुमनायतइत्यादि तिङन्तं संपद्यतइति सङ्गतिरिक्ताभावान्निघाताभावः, एवं तर्हि भृशादिषूपसर्गस्य पराङ्गवद्भावं वक्ष्यामि सुबामन्त्रितइत्यस्यानन्तरं भृशादिषूपसर्गेइति, इहापि तर्हि प्राप्नोति अभिभृशायते सुभृशायतइति, यदि नेष्यते मनस्युपसर्गइति वक्ष्यामि मनश्शब्दे परत उपसर्गस्तस्यैव परस्य मनस्शब्दस्याङ्गवद्भवति स्वरे कर्तव्यइति, एवं च देवदत्तः सुमनायत इत्यादौ उपसर्गस्यापि 'तिङ्ङतिङ' इति निघातो भवति, योप्याह सुमनश्शब्दात्प्रत्यये विधित्सितउपसर्गः पृथक् क्रियते परिशिष्टादेव प्रत्यय इति तेनापि स्वरे पराङ्गवद्भावो वक्तव्य एव, तदेवं प्रत्ययार्थविशेषणं स्वादयः मनस्शब्दादेव केवलात्प्रत्यय इति स्थितं, यदि तु सामान्येन ज्ञापकमिष्यते सङ्घातात्प्रत्यये विधित्सिते उपसर्गाः पृथक् क्रियन्तइति नात्रैव, यथा 'प्रभौ परिवृढ' इत्यत्र वक्ष्यते परिवृढमाचष्टइति णिचि क्त्वाप्रत्यये कृते परिवृढय्येति ल्यब् भवतीति, ततो ज्ञापकान्तरं मृग्यं, वक्तव्यं च किं चिद्वृत्त्याभिधानं सूरिभिरित्युपरम्यते ॥

"लोहितादिडाज्भ्यः क्यष्" ॥ 'पटपटायतीति' । अव्यक्तानुकरणादिति डाचि विवक्षिते 'डाचि बहुलं द्वे भवत' इति द्विर्वचन, ततो डाच् पटत्पटाइति स्थिते 'नित्यमाम्रेडिते डाची' ति पठच्छब्दस्य यस्तकारो यश्च परः पकारस्तयोः पररूपं पकारः, 'लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणीति' वार्त्तिकं तदेतत्पठिताभिप्रायं न पुनरनेनादिग्रहणं प्रत्याख्यायतइत्याह । 'यानि पठन्तइति' । निद्राकरुणाकृपाशब्दा वृत्तिविषये तद्वति वर्त्तन्ते, अनिद्रो निद्रावान् भवति, अकरुणः करुणावान्भवति, अकृपः कृपावान् भवतीत्यत्रार्थे प्रत्ययः, अपरिपठितेभ्यस्तु

स्ववाक्यस्थविशेषशब्दादिपरः, विशेषनिश्चयायोगादित्यस्य पूर्ववाक्येनान्वयः, अवयवशक्तिसाधनमात्रप्रत्यायकत्वादर्थप्रकरणादिभिर्विना विशेषनिश्चयायोगाच्चमस-शब्देन यथा न चमसविशेषप्रतीतिरित्यर्थः । ननु यथा चमसविशेषो वाक्यशेषावसेयः तद्वदजाविशेषोऽपि हेत्वन्तरेण निश्चेतुं शक्यते इति शङ्कायां परपक्षे तथा निश्चयस्याशक्यतां दर्शयितुं स्वपक्षे विशेषनिश्चयप्रकारमाह "तत्र यथेदं तच्छिर" इति, यथेति श्रुतिपदं दृष्टान्ते दर्शितस्य न्यायस्य दार्ष्टान्तिकेऽप्यवर्जनीयत्वमाह—

भा० तथा अत्राऽप्यर्थप्रकरणादिभिरेवाजा निर्णेतव्या, न चाऽत्र तन्त्रसिद्धाऽजाग्रहणहेतवोऽर्थप्रकरणादयो दृश्यन्ते, नचास्या विशेषग्रहे स्वातन्त्र्येण स्रष्टृत्वं प्रतीयते बह्वीः प्रजाः सृजमानामिति स्रष्टृत्वमात्रप्रतीतेः, अतो ऽनेन मन्त्रेण नाब्रह्मात्मिकाऽजाऽभिधीयते ॥ ब्रह्मात्मि[1]काजाग्रहणे एव विशेषतो हेतुरस्तीत्याह—

सू० **ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ॥ ९ ॥**

तु-शब्दोऽवधारणार्थः, ज्योतिरुपक्रमैवेषाऽजा ज्योतिर्ब्रह्म तन्देवा ज्योतिषां ज्योतिः अथ यदतः परो दिवो ज्योतिर्दीप्यत इत्यादिश्रुतिप्रसिद्धं, ज्योतिरुपक्रमा ब्रह्मकारणिकेत्यर्थः, तथाऽह्यधीयत एके, हि हेतौ, यस्मादस्या अजाया ब्रह्मकारणकत्वमेके शाखिनस्तैत्तिरीया अधीयते "अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोर्निहितं गुहायामिति हृदयगुहायामुपास्यत्वेन स-

१ ब्रह्मात्मकाजा इति तु युक्तः पाठः ।

त्स्थितं ब्रह्माभिधाय सप्त प्राणाः प्रभवन्ति तस्मादि-
त्यादिना

टी० "तथा अत्राऽपी"ति, यथाऽर्वाग्बिलश्चमस इति मन्त्रेण चमस-विशेषप्रतीतिः तत्र विशेषनिश्चयश्च निश्चायकवाक्यान्तराधीनः, तथाऽत्राऽपि निश्चायकान्तरेणाऽजाविशेषनिश्चयः कार्य इत्यर्थः । ततः किमित्यत्राह "न चात्रे"ति, सृजमानामिति स्वातन्त्र्येण स्रष्टृत्वप्रतीतिर्विशेषनिश्चायिकेत्यत्राह "न चास्या" इति, स्वातन्त्र्येण–ईश्वराधिष्ठितत्वमन्तरेणेत्यर्थः, स्रष्टृत्वमात्रप्रतीतेरिति स्वव्यापाराश्रयत्वलक्षणं स्वातन्त्र्यमेव प्रत्ययवाच्यं न त्वपराप्रेर्यत्वरूपमिति मात्र–शब्दाभिप्रायः, रथो गच्छतीत्यत्र कर्तृप्रत्ययो हि स्वव्यापाराश्रयत्वरूपं स्वातन्त्र्यं रथस्यावगमयति न त्वपरप्रेर्यत्वम्, अपरप्रेर्यत्वलक्षणस्वातन्त्र्यप्रतीत्यभ्युपगमेऽपि तादृशस्वातन्त्र्यलक्षणकर्तृत्वं ? किं प्रकृत्याश्रयमुताजा–शब्दवाच्यप्रकृतिशरीरकब्रह्माश्रय ? मिति विशये प्रकृतिमात्राश्रयमिति निश्चायकाभावश्च मात्र–शब्दाऽभिप्रेतः, यदि ब्रह्मात्मकत्वं प्रामाणिकं स्यात्तदानीम् इह प्रतीयमानं स्वातन्त्र्यलक्षणं कर्तृत्वं हि तद्गततया ब्रह्मात्मकत्वाऽविरोधि स्यात् ॥ उत्तरसूत्रमवतारयति "ब्रह्मात्मके"ति, सू· ज्योतिरुपक्रमा तु तथा ह्यधीयत एके, तु–शब्दस्य पक्षव्यावर्तकत्वशङ्काव्युदासाय व्याचष्टे "तु–शब्द" इति, इतरेतरार्थव्याश्रुत्यर्थं श्रुतिप्रसिद्ध्यनुबन्धेन व्याचष्टे "ज्योतिर्ब्रह्मे"ति, तदेव दर्शयति "तं देवा" इति, ब्रह्मकारणत्वपरतां प्रकरणे दर्शयति "अणोरणीयानि"ति, न ह्यजामेकामित्यस्मिन् मन्त्रे उत्पत्तिः प्रतीयत इत्यत्राह–

श्रु० सर्वेषां लोकानां ब्रह्मादीनाञ्च तत उत्पत्तिमभिधाय सर्वकारणीभूताजा तत उत्पन्नाऽभिधीयते "अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् अजो ह्येको जुषमाणोऽनुशेते जहात्येनाम्भुक्तभोगामजोऽन्य इति सर्वस्य तद्व्यतिरिक्तस्य वस्तुजातस्य तत उत्पत्त्या

तदात्मकत्वोपदेशे प्रक्रियमाणे ऽभिधीयमानत्वाद्भागसमुद्रपर्वतादिवदेषाऽप्यजा बह्वीनां सरूपाणां प्रजानां स्रष्ट्री कर्म्मवश्येन आत्मना भुज्यमानाऽन्येन विदुषाऽऽत्मना त्यज्यमाना च ब्रह्मण उत्पन्ना ब्रह्मात्मिकाऽवगन्तव्येत्यर्थः, अतो वाक्यशेषाच्चमसविशेषवच्छाखान्तरीयादेतत्सरूपात्त्यभिप्रायमानार्थाद्वाक्यान्नियमिताऽजा ब्रह्मात्मिकेति निश्चीयते ॥

टी० "सर्वस्ये"ति, यथा इडो यजति बर्हिर्यजति तनूनपातं यजतीत्यादिष्वङ्गत्वाश्रवणेऽपि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिप्रकरणस्थतया तदङ्गत्वं निश्चीयते तद्वत् सृष्टिप्रकरणस्थत्वादुत्पत्तिसिद्धेत्यर्थः, अस्मिन्मन्त्रे न सृष्टिर्विवक्षिता सृष्टिप्रकरणस्य पूर्वमेव विच्छेदादत्र जहात्येनां भुक्तभोगामजोऽन्य इत्युक्तस्य मुक्तस्योत्पत्त्यनुपपत्तेश्चेत्यत्राह "बह्वीनामि"ति न सृष्टिप्रकरणविच्छेद इत्यर्थः, यस्माज्जाता न यदा नैव किञ्चना सेत्युत्तरत्राऽपि सृष्ट्यनुवृत्तेरिति चार्थसिद्धं सर्वस्य तद्व्यतिरिक्तस्य वस्तुजातस्य तत उत्पत्त्या तदात्मकत्वोपदेशे प्रक्रियमाण इति ह्युक्तं, मुक्तात्मकीर्त्तनमेतद्विशेषणत्वेन न तु सृष्टिप्रकरणविच्छेदात् यथा बद्धात्मकीर्त्तनमित्यभिप्रेत्याह "कर्मवश्येनात्मना भुज्यमानाऽन्येन विदुषाऽऽत्मना त्यज्यमाना चेति, एवं तन्त्रसिद्धाऽजास्वविरोधिज्योतिरुपक्रमात्त्वं शाखान्तरे दर्शितम् । अथ सृजमानामिति पदप्रतीतस्वातन्त्र्य विरोधिब्रह्मात्मकत्वं स्वप्रकरणे दर्शयति—

भा० इहाऽपि प्रकरणोपक्रमे किं कारणं ब्रह्मेत्यारभ्य ते ध्यानयोगाऽनुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढामिति परब्रह्मशक्तिरूपाया अजाया अवगतेः, उपरिष्टाच्च अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः

"मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् यो योनिं योनिमधितिष्ठत्येक इति च तस्या एव प्रतीतेर्नास्मिन्मन्त्रे तन्त्रसिद्धस्वतन्त्रप्रकृतिप्रतिपत्तिगन्धः, कथं तर्हि ज्योतिरुपक्रमाया लोहितशुक्लकृष्णरूपाया अस्याः प्रकृतेरजात्वम्? अजाया वा कथं ज्योतिरुपक्रमात्व? मित्यत्राह—

सू० कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥

प्रसक्ताशङ्कानिवृत्त्यर्थश्च—शब्दः, अस्याः प्रकृतेरजात्वं ज्योतिरुपक्रमात्वञ्च न विरुध्यते, कुतः, कल्पनोपदेशात्, कल्पनं—क्लृप्तिः, सृष्टिः, जगत्सृष्ट्युपदेशादित्यर्थः, यथा "सूर्य्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति कल्पनं सृष्टिः, अत्राप्यस्मान्मायी सृजते विश्वमेतदिति जगत्सृष्टिरुपदिश्यते स्वेनाविभक्तादस्मात्सूक्ष्मावस्थात्कारणान्मायी सर्वेश्वरः सर्वं जगत्सृजतीत्यर्थः।

टी० "इहापी"ति, शक्तिरूपायाः—अपृथक्सिद्धविशेषणरूपायाः कार्योपयोग्यपृथक्सिद्धविशेषणं हि शक्तिः, योनिं—जगद्योनिभूतां प्रकृतिमित्यर्थः, तस्या एव—ब्रह्मात्मिकाया एव, स्वतन्त्रप्रकृतिप्रतिपत्तिगन्ध इति न केवलं शाखान्तरैकार्थ्यात्स्वप्रकरणाच्च ब्रह्मात्मकत्वावगमादिति भावः। उत्तरसूत्रशङ्कामाह "कथन्तर्ही"ति, लोहितशुक्लकृष्णाकारत्वं हि कार्यावस्थायामुपपद्यते तदानीं ज्योतिरुपक्रमात्वाङ्गीकारे अजात्वानुपपत्तिरजात्वे ज्योतिरुपक्रमत्वानुपपत्तिरित्यर्थः। सू० कल्पनोपदेशाच्च मध्वादिवदविरोधः, प्रसक्तेति चस्त्वर्थ इत्यर्थः। अविरोध—शब्दार्थमाह "अस्या" इति, अतस्मिंस्तद्भावारोपणपरत्वव्युदासाय कल्पन—शब्दस्य सृष्टिवाचित्वं धातोः सृष्टिवाचित्वेन दर्शयति "कल्पनं क्लृप्तिरि"ति, क्लृप्ति—शब्दं विशदयति "सृष्टिरि"ति, क्लृप्ताश्च इत्यादिप्रयोगो लोकसिद्ध इति मत्वा

श्रौतप्रयोगं दर्शयति "यथे"ति, "प्राकल्पयच्चो भुवनानि सप्ते"त्यादिस्मृतिप्रयोगश्च प्रसिद्धः अतो ज्योतिःकल्पन-शब्दो वैदिकशब्दनिर्देशानुसारिणो तथा निर्देशश्च मुनिसमाधिः सम्प्रसादादभ्युपदेशात् समानो ज्योतिषेत्यादिषु दर्शनात् अजात्वज्योतिरुपक्रमात्वयोरविरोधसिद्धिं दर्शयति–

सू० अनेन कल्पनोपदेशेनास्याः प्रकृतेः कार्यकारणरूपेणाऽवस्थाद्वयान्वयोऽवगम्यते, सा हि प्रलयवेलायां ब्रह्मतापन्ना अविभक्तनामरूपाऽव्यक्तादिशब्दवाच्या सूक्ष्मरूपेणावतिष्ठते, सृष्टिवेलायां चोद्भूतसत्वादिगुणा विभक्तनामरूपाव्यक्तादिशब्दवाच्या तेजोऽबन्नादिरूपेण च परिणता लोहितशुक्लकृष्णाकारा चाऽवतिष्ठते, अतः कारणावस्थाऽजा कार्य्यावस्था च ज्योतिरुपक्रमेति न विरोधः, मध्वादिवत् यथेश्वरेणादित्यस्य कारणावस्थायामेकस्यैवावस्थितस्य कार्य्यावस्थायाम् ऋग्यजुस्सामाथर्व्वप्रतिपाद्यकर्मनिष्पाद्यरसाश्रयतया वस्वादिदेवताभोग्यत्वाय मधुत्वकल्पनमुदयास्तमयकल्पनञ्च न विरुध्यते, तदुक्तम्मधुविद्यायाम् "असौ वा आदित्यो देवमध्वि"त्यारभ्य "अथ तत ऊर्द्ध्वम् उदेत्यनैवोदेता नैवास्तमेतैकल एव मध्ये स्थाते"त्यन्तेन, एकलः एकस्वभावः, अतोऽनेन मन्त्रेण ब्रह्मात्मिकैवाऽजाऽभिधीयते न कापिलतन्त्रसिद्धेति सिद्धम् ॥ अन्ये त्वस्मिन्मन्त्रे तेजोऽबन्नलक्षणाऽजैकाऽभिधीयत इति ब्रुवते, ते प्रष्टव्याः, किं तेजोऽबन्नान्येव तेजोऽबन्नात्मिकाजैका? उत तेजोऽबन्नरूपं ब्रह्मैव? किं वा–

टी० "अनेने"ति सूत्रस्यार्थं विवृणोति "सा ही"ति, ब्रह्मता-

Digitized by Google

यथा कारणावस्थब्रह्मतापत्त्या ननु कथं प्रकृतेर्ब्रह्मत्वापत्तिः न ह्यन्यद्द्रव्यन्द्रव्यान्तरम्भवति सत्यं, नाऽत्र केवलप्रकृतेर्ब्रह्मतापत्तिर्विवक्षिता किन्तु प्रकृतिशरीरकब्रह्मणः कारणावस्थाप्राप्तिः भाष्ये प्रकृत्युपस्थापकं सेतिपदं हि ब्रह्मपर्य्यन्तं कारणावस्थं ब्रह्मैव प्रकृति–शब्देनाऽभिधीयते ब्रह्मव्यतिरिक्तवस्त्वन्तराभावादिति प्रकृत्यधिकरणे वक्ष्यमाणत्वात्, कार्यवस्था ज्योतिरुपक्रमेति कार्यावस्थाजाशरीरकं ब्रह्म कार्यं, कारणावस्थाऽऽजाशरीरकं ब्रह्म कारणमित्यर्थः, सूत्रखण्डं व्याचष्टे "मध्वि"ति, उदयास्तमयमधुत्वकल्पनानि तदभावश्चादित्यस्यावस्थाद्वयेन यथोपपद्यते तथा अजात्वज्योतिरुपक्रमात्वे अवस्थाभेदेन प्रकृत्यास्त्वैकधर्मिपर्यवसिते इत्यर्थः । एकस्य–ईश्वरस्यैकस्याविभक्तनामरूपस्येत्यर्थः, ज्योतिरुपक्रमेत्यादिसूत्रद्वयस्य परोक्तमर्थं निराचिकीर्षुस्तत्र प्रथमस्य सूत्रस्यार्थन्दूषयति "अन्ये त्वि"ति, दूषयितुं विकल्पयति "किमि"ति, एकाजात्वेन परिकल्प्यमानं वस्तु किन्तेजोऽबन्नान्येवेत्यर्थः, अजात्वैकत्वसिद्ध्यर्थं ब्रह्मकारणवादानुगुण्यार्थञ्च ब्रह्मानुबन्धित्वेन मध्यमं शिरो दर्शितं, तेजोऽबन्नरूपस्तेजोबन्नावस्थं ब्रह्म किमेकच्छागत्वेन कल्प्यत इत्यर्थः ।

मू० तेजोऽबन्नकारणभूता काचिदि? ति प्रथमे कल्पे तेजोऽबन्नानामनेकत्वादजामेकामिति विरुध्यते, न च वाच्यन्तेजोऽबन्नानामनेकत्वेऽपि त्रिवृत्करणेनैकतापत्तिरिति त्रिवृत्करणेऽपि च बहुत्वानपगमात् "हन्त इमास्तिस्रो देवताः तासां त्रिवृतं त्रिवृतमेकैकाङ्करवाणीति प्रत्येकं त्रिवृत्करणोपदेशात्, द्वितीयः कल्पो विकल्प्यः, किन्तेजोऽबन्नरूपेण विकृतं ब्रह्मैवाजैका? किं वा स्वरूपेणावस्थितमविकृत? मिति प्रथमः कल्पो बहु[1]त्वाऽनपगमादेव निरस्तः, द्वितीयेऽपि लोहितशुक्लकृष्णामिति विरुध्यते, स्वरू-

[1] बहुत्वानपायादेव इति पुस्तकान्तरपाठः ।

पेणावस्थितन्तेजोऽबन्नलक्षणामिति वक्तुमपि न शक्यते तृ-
तीये कल्पेऽप्यजा-शब्देन तेजोऽबन्नानि निर्दिश्य तैस्त-
त्कारणावस्थोपस्थापनीयेत्यास्थेयं ततो वरमजा-शब्देन ।

टी० तेजोऽबन्नकारणभूता काचिदिति तेजोऽबन्नवाचिशब्देन लक्षि-
ता तत्कारणभूता काचिदेकाऽजात्वेन किं रूप्यत इत्यर्थः । प्रथमं शिरो
दूषयति "प्रथमे"ति, एकत्वविरोधपरिहारमाशङ्क्याह "न च वाच्यमि"ति,
कुत इत्यत्राह "त्रिवृत्करणेऽपीति, बहुत्वानपगममुपपादयति "इमा"-
इति, न समुदायैकत्वमपि तु समुदायत्रयमेवेत्यर्थः । द्वितीयं शिरो विकल्प-
यति "किमि"ति, तेजोऽबन्नरूपाः ब्रह्मणो विकाराः किमजा-शब्देनो-
च्यन्ते? । उत स्वरूप?मिति विकल्पग्रन्थार्थः, प्रथमे शिरस्यवस्थाबहुत्वादेक-
त्वविरोधमाह "प्रथम"इति, मध्यमे शिरसि द्वितीयकल्पं दूषयति "द्वितीये-
ऽपी"ति, ब्रह्मस्व[1]रूपस्य लोहितशुक्लकृष्णत्वाभावात् श्रुत्यस्वारस्यमित्यर्थः ।
तेजोऽबन्नादिसर्वात्मकस्य ब्रह्मणः किन्नोपपद्यत? इत्यत्राह "स्वरूपेणे"ति, ।
यद्वा सूत्रास्वारस्यमप्याह "स्वरूपेणे"ति, ज्योतिरुपक्रमेति हि सूत्रमप्येवं
ज्योतिरुपक्रम-शब्दस्तेजोऽबन्नवाचीति हि तैर्व्याख्यातं, न हि ब्रह्मस्वरूपं
तेजोऽबन्न-शब्दवाच्यम् अतस्सूत्रास्वारस्यमित्यर्थः, तेजोऽबन्नावस्थाविशिष्टं
ब्रह्माजा-शब्दवाच्यमिति पक्षे किमवस्थाविशिष्टत्वं सद्वारक? मद्वारकं वा?
अद्वारकत्वे लोहितशुक्लकृष्णत्वविरोधः, अरसमलोहितमिति श्रुतेः, सद्वार-
कत्वेऽस्मत्पक्ष एव परिगृहीतः स्यादिति विकल्पपरिहारयोः स्पष्टत्वान्न
तत्कण्ठोक्तिः । प्रथमविकल्पिताशिरस्त्रये तृतीयं शिरो दूषयति "तृतीय"इति,
लोहितशुक्लकृष्णत्वाजात्वैकत्वसिद्ध्यर्थमयं पक्षः शङ्कितः । तत्र दूषणमुच्यते—

सू० तेजोऽबन्नकारणावस्थायाः श्रुतिप्रसिद्धाया एवाभिधानं, यत्पु-
नरस्याः प्रकृतेरजा-शब्देन छागत्वपरिकल्पनमुपदिश्यत
इति तदप्यसङ्गतं, निष्प्रयोजनत्वात्, यथात्मानं रथिनं वि-

१ ब्रह्मस्वरूपे इति पा० ।

ह्मीत्यादिषु ब्रह्मप्राप्त्युपायमाख्यापनाय शरीरादिषु रथादिरूपणं क्रियते, यथा चादित्ये वस्वादीनामभोग्यत्वख्यापनाय मधुत्वकल्पनं क्रियते, तद्वदस्यामप्यजनौ छागत्वपरिकल्पनं क्वोपयुज्यते, न केवलमुपयोगाभाव एव विरोधश्च, छन्दजगत्कारणभूतायास्त्वस्मिन् अनादिकालसम्बद्धानां सर्वेषामेव चेतनानां निखिलसुखदुःखोपभोगापवर्गसाधनभूताया अचेतनाया अत्यल्पप्रजासर्गकराऽऽगन्तुकसङ्गमचेतनविशेषैकरूपात्यल्पप्रयोजनसाधनस्वपरित्यागाहेतुभूतस्वसम्बन्धिपरित्यागसमर्थचेतनविशेषरूपच्छागत्वभावख्यापनाय तद्रूपत्वकल्पनं विरुद्धमेव "अजामेकाम् अजो ह्येकः अजोऽन्य इत्यत्राजा-शब्दस्य विरूपार्थपरिकल्पनञ्च न शोभनं, सर्वत्र छागत्वं परिकल्प्यत इति चेत् ।

टी० "अजा-शब्देने"ति, तेजोऽबन्नानामवाचकस्याजा-शब्दस्य तेजोऽबन्नपरत्वमारोप्य तेन तत्कारणस्य लक्षणयोपस्थापनादपि मुख्यवृत्त्या कारणप्रतिपादनपरत्वाश्रयणं युक्तमित्यर्थः। कल्पनोपदेशादिति सूत्रस्य परोक्तार्थं दूषयति "यत्पुनरस्या" इति, सर्वत्र रूढितोऽवयवशक्त्या वा प्रतिपाद्यमानमुख्यार्थपरिग्रहः स्वतः प्राप्तः, गौणार्थपरिग्रहस्तु मुख्यार्थानुपपत्त्या क्रियते, तत्रौचित्यातिशयलाभोऽनेकपदमुख्यार्थत्वसिद्धिश्च प्रयोजनं, तच्च मुख्यार्थानुपपत्त्यभावः प्रदर्शितः अजात्वज्योतिरुपक्रमात्वयोरवस्थाभेदेन अविरोधस्योक्तत्वात् अतोऽर्थौचित्यलाभरूपप्रयोजनाभावरूपं दूषणमाह "निष्प्रयोजनत्वादि"ति, प्रयोजनभावस्य दूषणत्वज्ञापनाय कल्पनस्य प्रयोजनसिद्ध्यर्थतां दर्शयति "यथाऽऽत्मानमि"ति, विरोधं दर्शयति "छन्दे"ति, एकरूपेति दुग्धादिरेव प्रयोजनमित्यर्थः, अचेतनाया इत्यनेन स्वसम्बन्धिपरित्यागासामर्थ्यं सिद्धमिति तत्प्रत्यनीकाकारमाह "स्वसम्ब-

न्धी''ति, । परिमितकार्यकरत्वादित्यत्र विरोध उक्तः । दूषणान्तरमाह "अजामि"ति, मर्यैकरूप्यं शङ्कते "सर्वत्रे"ति, तत्र विरोधान्तरमाह–

सू० जहात्येनाम्भुक्तभोगामजोऽन्य इति विदुष आत्यन्तिकप्रकृतिपरित्यागङ्कुर्वतोऽनेन वाऽन्येन वा पुनरपि सम्बन्धयोग्यच्छागत्वपरिकल्पनमत्यन्तविरुद्धम् ॥ चमसाधिकरणं समाप्तम् ॥

टी० "जहाती"ति, एवमर्थौचित्यलाभरूपप्रयोजनाभावो दर्शितः सर्वत्र छागत्वपरिकल्पनशङ्कोपन्यासेनैवानेकपदान्तरमुख्यार्थत्वसिद्धिरूपप्रयोजनाभावश्च फलितः, एवं हेत्वभावात् प्रयोजनाभावाच्च छागत्वपरिकल्पनं व्युदस्तम् । ननु नार्थविरोधः कार्यकारित्वप्रयोजनसाधनत्वचेतनसङ्गादिमात्रस्य विवक्षितत्वात्, न हि दृष्टान्तगतसर्वधर्माणां विवक्षानियमोऽस्ति तथा सति सर्वत्र दृष्टान्तोपन्यासभङ्गप्रसङ्गात्, गौरनाद्यन्तवती आत्मानं रथिनं विद्धीत्यादिषु च प्रकृत्यादेर्गोत्वादिपरिकल्पनं दृश्यते, तच्च सर्वथा साधर्म्यविवक्षायां न घटत इति उच्यते आत्मानं रथिनं विद्धीत्यत्र पृथगेव रूप्यरूपकवाचिपदश्रवणाद्रूपकानङ्गीकारे रूपकवाचिपदवैयर्थ्यप्रसङ्गात्, येनाकारेण साधर्म्यं योग्यं प्राप्त्युपायतादिरूपं तदाकारमात्रन्तत्र विवक्षितमिति निश्चितं प्रयुक्तपदवैयर्थ्यपरिहारार्थम् अजामेकामिति वाक्ये तु रूप्यरूपकवाचिपदद्वयाश्रवणात् अर्थौचित्यं नावगम्यते तेन गौणवृत्त्यनङ्गीकारेऽपि न वैयर्थ्यं गौरनाद्यन्तवतीत्यत्र रूप्यवाचिपदाश्रवणात् अजा-शब्दवत् गो-शब्दस्यावयवशक्त्या प्रकृत्युपस्थापनासामर्थ्याच्च गत्यभावाच्च गौणी वृत्तिराश्रिता अनाद्यन्तवती सर्वकामदुघेत्याद्युचितविशेषणश्रवणादर्थौचित्यमवगम्यते, अजा-शब्दे तु न तथा गत्यन्तराभावः उचितावयवार्थसम्भवात् उचितविशेषणं च रूढिसिद्धाजाव्यावर्त्तकं न श्रूयते पुँलिङ्गाज-शब्दयोश्चामुख्यत्वं बह्वीः, प्रजा इत्यादिपदानां सङ्कोचश्च विफलः, अतः प्रयुक्तपदवैयर्थ्यपरिहारपदान्तरस्वारस्यार्थौचित्यसद्भावासद्भावरूपवैषम्यात् आत्मनं रथिनं विद्धीत्यादिवद्रूपणपरत्वमयुक्तङ्कार्यका-

रित्वादर्थमात्रविवक्षायामर्थविरोधाभावो य उक्तः स चेन्मुख्ययैव वृत्त्या लभ्यते तदा गौणवृत्तिपरिग्रहो निष्फलत्वादनुपपन्नः, एवं परोक्तज्योतिरुपक्रमेत्यादिसूत्रार्थस्य एक-शब्दार्थविरोध उक्तः, कल्पनोपदेशादिति सूत्रस्याजाशब्दास्वारस्यं दूषणतयोक्तं, यद्यपि ज्योतिरुपक्रमा-शब्देन तेजःप्रमुखत्वकल्पनशब्देनातस्मिँस्तद्भावारोपणाच्च परोक्तं सूत्राक्षरानुगुणमिव प्रतीयते तथाऽप्यनुपपत्तिपराहतम्, अस्मदुक्तार्थस्तु वैदिकनिर्देशसमाधिना स्वरस उपपन्नश्चेतिभिदा "चमसवदविशेषादि"ति, सूत्रं परस्यास्वरसश्चमस-शब्दस्य यौगिकत्वाद्रूढार्थपरत्वाभावाच्च ॥ चमसाधिकरणं समाप्तम् ॥

संख्योपसंग्रहाधिकरणम् ।

सू० न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥

भा० वाजसनेयिनस्समामनन्ति "यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः तमेवं मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतमिति" किमयं मन्त्रः कापिलतन्त्रसिद्धतत्त्वप्रतिपादनपरः? उत नेति सन्दिह्यते किं युक्तं तन्त्रसिद्धतत्त्वप्रतिपादनपर इति, कुतः ।

टी० न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च, अजा-शब्दस्य स्वतन्त्रप्रकृत्युपस्थापकत्वे विशेषाभावाद्वाक्यान्तरानुरोधेन प्रकृतेर्ब्रह्मात्मकत्वं साधितन्तदत्रानुपपन्नं परमात्मपरत्वे संख्याधिक्यात् परमात्मना विनाऽपि सङ्ख्यापूरणेनाब्रह्मात्मिका प्रकृतिरिति विशेषनिश्चयसम्भवादिति शङ्कया सङ्गतिः । विषयादिकमाह "वाजे"ति, पञ्चविंशतिसङ्ख्यान्वयतत्त्वाधिक्यादिप्रतीतिजनकमिदं वाक्यम्, एवंजातीयकवाक्यानि सन्ति चेतान्यपि विषयः, पञ्चविंशतिसङ्ख्यान्वयतत्त्वाधिक्यप्रतीतिभ्यां संशयः, यस्मिन् पञ्च पञ्चजना इति मन्त्रः किं कापिलतन्त्रसिद्धतत्त्वपरः? उत नेति, किं पञ्चपञ्चजन-शब्देन पञ्चविंशतितत्त्वप्रतीतिः? रस्ति नेति

किमाकाशस्य पृथग्निर्देशोऽवान्तरसङ्ख्याऽन्वयनिमित्तविरोधी? उत ने?ति किं वाक्यशेषेण पञ्चजन-शब्दस्य प्राणादिविषयत्वनिश्चयः शक्य? उत ने?ति यदा न विरोधी यदा च निश्चयेन शक्यः तदाऽवान्तरसङ्ख्यान्वयानिमित्तसम्भवेन समासस्य समाहारविषयता पञ्चपञ्चजन-शब्देन पञ्चपञ्चकान्युच्यन्त इति पञ्चविंशतितत्त्वप्रतीतेरयं मन्त्रस्तन्त्रसिद्धतत्त्वप्रतिपादनपर इति पूर्वः पक्षः, यदाकाशस्य पृथग् निर्देशोऽवान्तरसङ्ख्यान्वयनिमित्तविरोधी वाक्यशेषेण च प्राणादिविषयत्वनिश्चयः शक्यः तदाऽवान्तरसङ्ख्यान्वयनिमित्ताभावेन समासस्य संज्ञाविषयतया पञ्चपञ्चजन-शब्देन पञ्च पदार्था उच्यन्त इति पञ्चविंशतितत्त्वाप्रतीतेरयम्मन्त्रो न तन्त्रसिद्धतत्त्वप्रतिपादनपर इति राद्धान्तः। यद्यपि स्युः पुमांसः पञ्चजना इति मनुष्यनामतया पठितस्य समुद्रान्तर्वर्तिनि च दानवविशेषे प्रयुक्तस्य च पञ्चजन-शब्दस्य सङ्ख्यापूर्वसमासत्वं नाऽस्ति सप्तर्षीणामेकैकस्य सप्तस्वन्यतमभाववन्मनुष्याणां दानवविशेषस्य च पञ्चस्वन्यतमत्वाभावेन सङ्ख्यान्वयप्रतीत्यनुपपत्तेः समाससामर्थ्याभावस्तथाऽप्यस्य तु पञ्चजन-शब्दस्य सङ्ख्याप्रतीतिस्वारस्यानुरोधे सम्भवति तत्परित्यागायोगात् सङ्ख्यापूर्वसमासत्वं युक्तमित्यभिप्रेत्याह—

भा० पञ्च-शब्दविशेषितात्पञ्चजन-शब्दात्पञ्चविंशतितत्त्वप्रतीतेः, एतदुक्तम्भवति पञ्चजना इति समासः समाहारविषयः, पञ्चजनाः—पञ्चानां जनानां समाहाराः पञ्चजनाः पञ्चपूल्य इतिवत् पञ्चजना इति लिङ्गव्यत्ययश्छान्दसः ते च समाहाराः कतीत्यपेक्षायां पञ्चजन शब्द-विशेषणेन प्रथमेन पञ्च-शब्देन समाहाराः पञ्चेति प्रतीयन्ते यथा पञ्च पञ्चपूल्य इति अतः पञ्च पञ्चजना इति पञ्चविंशतिपदार्थावगतौ ते[1] कतीत्यपेक्षायाम्

टी० "पञ्चजनशब्दविशेषितादि"ति, ननु कथमिदमवसीयते?

[1] ते कतम इत्यपेक्षायामिति पा०।

पञ्चजना इत्येकं पदं न तु पञ्च पञ्चजना इतीति तदा हि दशत्वमापद्येत यदा च समस्तः पञ्चजन-शब्दस्तदापि कथन्तत्त्वसिद्धतत्त्वप्रतिपत्तिः पञ्चजन-शब्देन पञ्चसंख्यतया प्रतिपन्नार्थस्य पुनः पञ्चतया विशेषणे पञ्चविंशतितत्त्वप्रतिपत्तिरिति चेन्न पुनरुक्तिप्रसङ्गात्, विशिष्टस्य विशेषणादर्शात् इति चेत् किं विशेष्यस्य? उत विशेषणस्य? आहोस्विदुभयस्य? न तावद्विशेष्यस्य, तत्र पञ्चत्वसंख्याऽन्वयस्य शब्दान्तरसिद्धतया पुनरुक्तत्वात्सङ्ख्याभ्यासेऽभिमते दशसङ्ख्याप्रतीतेश्च, नाऽपि विशेषणस्य विशेष्यपर्यन्तशब्दोपस्थापितस्य विशेषणस्य पुनस्तत्पदनिर्दिष्टसजातीयविशेषणान्वयायोगात्, न हि गौर्गौरिति गोत्वं गोत्वेन विशेष्यं, न चोभयस्य, अंशे पौनरुक्त्यादंशे सङ्ख्यान्वयायोग्यत्वात्, न च द्वे शते त्रीणि शतानीतिवद्विशेष्टुं युक्तम् । अवान्तरसङ्ख्यानिवेशनिमित्तकोपाध्यभावेन समूहैक्यासिद्धेः, एकयामस्थित्याद्युपाधिना हि शतसङ्ख्यपुरुषसमूहैक्यन्तस्मिंश्च सति द्वेकत्वद्वित्वादिना पुनर्विशेषणसम्भवः, अन्यथा बहूनामेकत्वद्वित्वाद्यभावात् अतो न पञ्चविंशत्यर्थसिद्धिः, सिद्धावपि न तन्त्रोक्तार्थत्वनिश्चयः, निश्चायकाभावादित्याशङ्कायामाह "एतदुक्तम्भवतीति, समासः समाहारविषय इति पञ्चानां त्वा पञ्चजनानामित्यत्र पञ्चजन-शब्दस्य समस्ततयैकपदप्रदर्शनादिहाप्यौचित्यतस्तत्प्रतिपत्तेः, द्वितीयपञ्चशब्दसमभिव्याहारबलेन इतरपञ्च-शब्दस्य सङ्ख्यापरत्वप्रतीतेः समाहारसमासत्वं स्वीक्रियत इति भावः । तत्फलमाह "पञ्चानामि"ति, छान्दस इति त्रिभुवनादिशब्दवत् स्त्रीलिङ्गस्मृतेरपवादाभावात् छान्दसत्वमिति भावः। भूतत्वज्ञानेन्द्रियत्वादिकमवान्तरसङ्ख्यानिवेशनिमित्तमस्तीत्यभिप्रेतं तद्धि स्फुटीभविष्यति एवं समूहसिद्धौ पञ्चतया विशेषणोपपत्तिमाह "ते चे"ति, एवं पञ्चविंशतिसङ्ख्यासिद्धौ अस्य मन्त्रस्य मोक्षाधिकारात्सङ्ख्यतत्त्वपरत्वसिद्धिमाह—

सू० मोक्षाधिकारान्मुमुक्षुभिर्ज्ञातव्यतया स्मृतिप्रसिद्धाः प्रकृत्यादय एव आयन्ते "मूलप्रकृतिरविकृतिर्महदाद्याः

प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" इति हि कापिलानां प्रसिद्धिः, अतस्तन्त्रप्रसिद्धतत्त्वप्रतिपादनपर इति प्राप्ते प्रचक्ष्महे, न संख्योपसंग्रहादपीति, पञ्च पञ्चजना इति पञ्चविंशतिसंख्योपसंग्रहादपि न तन्त्रसिद्धतत्त्वप्रतीतिः कुतः नानाभावात् एषां पञ्चसङ्ख्याविशेषितानां पञ्चजनानां तन्त्रसिद्धेभ्यस्तत्त्वेभ्यः पृथग्भावात् यस्मिन्पञ्चपञ्चजना आकाशश्च प्रतिष्ठित इत्येतेषां यच्छब्दनिर्दिष्टब्रह्माश्रयतया ब्रह्मात्मकत्वं हि प्रतीयते, तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतमित्यत्र तमिति परामर्शेन यच्छब्दनिर्दिष्टं ब्रह्मेत्यवगम्यते, अतस्तेभ्यः पृथग्भूताः पञ्च पञ्चजना इति न तन्त्रसिद्धा एते, अतिरेकाच्च, तन्त्रसिद्धेभ्यस्तत्त्वेभ्योऽत्र तत्त्वारेकाऽपि भवति यच्छब्दनिर्दिष्ट आत्मा आकाशश्च तथातिरिच्येते ।

टी० "ते कतम" इति, आकाशेन यस्मिन्निति निर्दिष्ट "नात्मना च सप्तविंशतितत्त्वप्रतीतिरपि न विरुद्धा, सत्त्वरजस्तमसां पृथग्द्रव्यत्वाभ्युपगमात् आत्माकाशाभ्यां विना पञ्चविंशतिसङ्ख्यासिद्धेः, गुणत्रयमहदहङ्काराः पञ्च वायुतेजोजलपृथिवीघ्राणाः पञ्चतन्मात्राणि पञ्च जिह्वादिज्ञानेन्द्रियाणि चत्वारि मन इति पञ्च, कर्मेन्द्रियाणि पञ्च इति पञ्चविंशतिसङ्ख्यान्वयसिद्धिरिति । यद्वा आत्मनः स्वस्मिन्नवस्थितत्वादाकाशस्यादरेण भूयः कीर्तनादविरोध इति पञ्चविंशतिपदार्थास्तदन्तर्भूत, आत्मनि प्रतिष्ठिताः किमपरैस्तदन्तर्गत आकाशोऽपि तस्मिन् प्रतिष्ठित इत्यादरातिशयादुक्तिर्हि सम्भवति । राद्धान्तमारभते "न सङ्ख्ये"ति, नानाभावादिति नानाभावः—पृथक्त्वम् अन्यत्वं विवक्षितं न तु बहुत्वं विना नाना

Digitized by Google

हिहिक् पृथगिति नैघण्टुकाः, तन्त्रसिद्धतत्त्वेभ्यः पृथग्भावोऽन्यत्वं ब्रह्मात्मकत्वं यस्मिन्निति सप्तम्यर्थमभिप्रेत्याह "यच्छब्दनिर्दिष्टब्रह्मायतये"ति, यच्छब्द-निर्दिष्टस्य ब्रह्मत्वमुपपादयति "तमेवमि"ति, नानाभावो व्याख्यातः । अथातिरेकं व्याचष्टे "तन्त्रे"ति, अतिरेकः—सङ्ख्याधिक्यम्

सू० अतस्तं षड्विंशकमित्याहुः सप्तविंशकमथापर इति श्रुति-प्रसिद्धसर्वतत्त्वाश्रयभूतः सर्वेश्वरेश्वरः परमपुरुषोऽत्राऽभिधीयते न संख्योपसङ्ग्रहादपीत्यपि—शब्दस्य पञ्च पञ्चजना इत्यत्र पञ्चविंशतितत्त्वप्रतीतिरेव न सम्भवतीत्यभिप्रायः कथं पञ्चभिरारब्धसमूहपञ्चकासम्भवात्, नहि तन्त्रसिद्धतत्त्वेषु पञ्चसु पञ्चस्वनुगतन्तत्सङ्ख्यानिवेशनिमित्तं जात्याद्यस्ति, न च वाच्यं पञ्च कर्मेन्द्रियाणि पञ्च ज्ञानेन्द्रियाणि पञ्च महाभूतानि पञ्च तन्मात्राण्यवशिष्टानि पञ्चेत्यवान्तरसङ्ख्यानिवेशनिमित्तमस्त्येवेति आकाशस्य पृथङ्निर्देशेन पञ्चभिरारब्धमहाभूतसमूहासिद्धेः, अतः पञ्च जना इत्ययं समासो न समाहारविषयः, अयन्तु "दिक्सङ्ख्ये संज्ञाया"मिति संज्ञाविशेषविषयः, अन्यथा पञ्चजना इति लिङ्गव्यत्ययश्च

टी० अतस्तं षड्विंशकमिति कालस्य प्रकृतिविकाराणां विशेषणतयाऽन्तर्भावेन षड्विंशकत्वं कालस्य स्वतन्त्रवस्तुत्वाभिप्रायेण सप्तविंशकत्वमित्यर्थः । साङ्ख्यप्रसिद्धादपि श्रुतिप्रसिद्धं ग्राह्यम् अन्तरङ्गत्वादिति भाववानाह "श्रुतिप्रसिद्धे"ति, अपि—शब्दाभिप्रेतमर्थमाह "न संङ्ख्ये"त्यादिना, पञ्चभिरिति पञ्चभिरारब्धसमूहपञ्चकाभावादित्यनेन पञ्चस्वनुगतोपाध्यभावादित्युक्तम्भवति, एकोपाधिगृहीतत्वं हि समूहत्वं पञ्चस्वनुगतानुपाधीनाशङ्क्याह "न च वाच्यमि"ति, आकाशस्य पृथक्करणात् प्राच.

पञ्चमेषु प्राण्यादिषु मनः पञ्चमेषु रसनादिषु गुणत्रयमहदहङ्कारेषु चानुगतो-ऽप्यभावादित्यर्थः । भूतसमूहासिद्धेरित्युपलक्षणं सत्त्वरजस्तमसां गुणत्वेन श्रुतिस्मृतिप्रसिद्धानां द्रव्यत्वाभावादात्माकाशाभ्यां सप्तविंशतितत्त्वप्रतीतिरपि परस्याऽनुपपन्ना । किञ्च "सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् त्रिविधोऽयमहङ्कारो महतस्त्वादजायते" ति महदहङ्कारयोश्च त्रिविधत्वावगमादेकत्रिंशत्सङ्ख्यत्वन्तत्त्वानां प्रसजेत अतश्चैतन्मन्त्रप्रतिपन्नतत्त्वसङ्ख्याविरोधः अतस्सत्त्वरजस्तमसां द्रव्यतया बहुत्वेन निर्वाहोऽनुपपन्नः, यस्मिन्निति निर्देशस्य स्वे महिम्नीतिवत् निर्वाहोऽनुपपन्नः सप्रम्यन्तस्वबाधिपदाश्रवणेन स्वप्रतिष्ठितत्वकल्पनायोगात् आकाशस्यादरातिशयात् पृथगुक्तिरित्यप्ययुक्तं ततोऽपि तत्कारणतत्त्वानां वैपुल्ये सति तदनादरेणाकाशस्य पृथगुक्त्यनुपपत्तेः । साधारणनिर्वाहमाह "अयं त्वि"ति, संज्ञाविषयत्वोपपादनाय समाहारविषयत्वे शाब्ददूषणमाह "अन्यथे"ति, लिङ्गव्यत्ययश्च क्लिष्ट इत्यर्थः । अर्थदूषणं हि समूहासिद्धिलक्षणमुक्तं पञ्चजन-शब्दस्य तन्त्रसिद्धार्थविषयत्वे व्युदस्ते अर्थान्तरसद्भावमाह-

सू० पञ्चजना नाम केचित्सन्ति ते च पञ्चसङ्ख्यया विशेष्यन्ते पञ्च पञ्चजना इति, सप्त सप्तर्षय इतिवत्के पुनस्ते पञ्च पञ्चजना इत्यत आह-

टी० "पञ्चजना नामे"ति, पञ्च-शब्दस्य च तेष्वर्थवत्त्वमाह "ते चे"-ति, । ननु सञ्ज्ञात्वेऽप्यजहदवयवार्थैव पञ्चजन-शब्दवृत्तिः, अन्यथा निरर्थकतया सङ्ख्यावाचित्वाभावेन समास सामर्थ्याभावात्, न हि निरर्थक-शब्दस्य समासामर्थ्यन्ततश्च सङ्ख्याविशिष्टार्थप्रतिपत्तौ पुनःसङ्ख्याविशेषणमनुपपन्नमिति शङ्कां निराचिकीर्षुराह "सप्त सप्तर्षय इति वदि"ति, सप्त सप्तर्षयोऽमला इति श्रीमद्विष्णुपुराणप्रयोगोऽभिप्रेतः, अत्राऽयमभिसन्धिः सञ्ज्ञिपदप्रतिपन्ना सङ्ख्या शाखावदुपलक्षणभूता सञ्ज्ञिप्रतिपत्त्यर्थं न तु सञ्ज्ञिनि वाच्ये विशेषणतयाऽन्तर्भूता अतो यथा गच्छतीति गौरिति व्युत्पत्तावपि गमनस्य तटस्थत्वात्तात्पर्याविषयतया वाक्यार्थान्वयित्वाभावेन

गौर्गच्छति गौस्तिष्ठतीत्यत्र न पुनरुक्तिर्व्याघातो वा तटस्थस्यास्य वाक्यार्थान्वये ऽविवक्षितेत्प्रतिपादनस्याकाङ्क्षितत्वाच्च गच्छतीति पुनरुक्तिः, अवयवेनावस्थापितस्य गमनस्याऽविवक्षितत्वाच्च तिष्ठतीति व्याघातः । एवं संज्ञिपदप्रतिपन्नसङ्ख्याया व्युत्पत्तिसमये तटस्थत्वेनावगतायास्तात्पर्याविषयत्वात् पुनर्वाक्यार्थान्वयित्वज्ञापनाय पञ्च-शब्देन सङ्ख्याया विशेषणत्वज्ञापनं युक्तम्पदद्वयस्य सामर्थ्यं चेदमेव यद्द्वयवाक्येऽर्थाभिधानशक्तिः, अतः समास उपपन्नः, अतोऽर्थस्याविवक्षितत्वात् पुनस्तया सङ्ख्यया विशेषणं स फलमिति, अन्यैस्तु नानाभावादिति पदमेकीकारोपाद्यभावात् समूहासिद्धिपरं व्याख्यातन्तदानीं शब्दस्वारस्याभावः स्फुटतरः । अपि-शब्दवैयर्थ्यं च स्यात् अपि-शब्दो हि पञ्चविंशतित्वप्रतिपत्त्यभ्युपगमेन दूषणोक्तिं द्योतयति अतः पञ्चभिरारब्धसमूहपञ्चकासम्भवकं पञ्चविंशतितत्त्वाप्रतिपत्तिहेतुमभिप्रेत्य पुनस्तदभ्युपगमेऽपि तन्त्र प्रसिद्धतत्त्वपरत्वं यथा व्युदस्तं भवति तथा भाष्ये योजिते वयोजना युक्ता शब्दानुरोधिनी च उत्तरसूत्रस्याकाङ्क्षां दर्शयति "के पुनरि"ति, सङ्ख्यापूर्वसमासत्वमयुक्तस्मिन्वाक्ये सङ्ख्येयविशेषाप्रतिपत्तेरित्यर्थः ॥

सू० प्राणादयो वाक्यशेषात् ॥ १२ ॥

भा० "प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नम्मनसो मनो ये विदुरि"ति वाक्यशेषात् ब्रह्माश्रयाः प्राणादय एव पञ्च पञ्चजना इति विज्ञायन्ते। अथ स्यात्काण्वानां माध्यन्दिनानाञ्च यस्मिन्पञ्च पञ्चजना इत्ययं मन्त्रः समानः प्राणस्य प्राणमित्यादिवाक्यशेषे काण्वानामन्नस्य पाठो न विद्यते, तेषां पञ्च पञ्चजनाः प्राणादय इति न शक्यते वक्तुमिति,

टी० सू० प्राणादयो वाक्यशेषात्, ननु किमनेन सूत्रेण कर्ममीमांसायां "सन्दिग्धे तु वाक्यशेषादि"ति वाक्यशेषात्सन्देहनिरासस्य कर्तव्यत्वं

Digitized by Google

हि निर्णीतं शास्त्रैक्यस्याभिमतम्, अत एव हि स्मृत्यधिकरणादिषु कर्मविचारोक्तैर्न्यायैः कृतकरत्वमाशङ्क्य भाष्ये परिह्रियत इति नैवं वाक्यशेषात्सन्देहव्युदासः कार्य्य इति एतावत्युपजीव्ये ऽपि वाक्यशेषयोरेव निर्णीतार्थत्वानिर्णीतार्थत्वरूपवैषम्यात् "तेजो वै घृतमि"ति वाक्यस्य घृतसमर्पकत्वे हि न सन्देह इह तु अनिन्द्रियवाचिप्राणाच-शब्दसमभिव्याहारात् वाक्यशेषस्येन्द्रियपरत्वे सन्देहानपगमात् प्राणादिषु पञ्चसङ्ख्यानिवेशनिमित्तोपाध्यभावात् प्राणादीनामेव पञ्चजन-शब्दवाच्यत्वानुपपत्तेः इन्द्रियत्वरूपैकोपाधिसिद्ध्युपपादनेन वाक्यशेषार्थनिर्णयाय सूत्रप्रणयनं प्रयोजनवत् सन्देहव्युदासकश्चाप्यप्रायन्यायोऽभिप्रेतः, प्राणाच-शब्दौ द्वौ चक्षुःश्रोत्रमनःशब्दास्त्रयः अतस्तदनुगुणतया प्राणाचशब्दयोरपीन्द्रियपरत्वात् प्राणादयः पदार्था इन्द्रियाणीति त एव पञ्चजना इत्यर्थः,अनन्तरसूत्रस्य शङ्कामाह "अथ स्यादि"ति,पञ्च पञ्चजनाः प्राणादय इति न शक्यं वक्तुमिति काण्वानामन्नपाठवैकल्येन प्राणादिषु पञ्चसङ्ख्यानिवेशानुपपत्तेः पञ्चजनत्वमयुक्तमित्यर्थः । ननु सर्वशाखाप्रत्ययन्यायेन माध्यन्दिनपाठस्य काण्वपाठेऽप्युपजीव्यत्वात् पञ्चसङ्ख्योपपत्तेर्न सूत्रान्तरापेक्षा, सत्यं, मा भूच्छाखान्तरीयं वाक्यमितिकृत्वा स्वप्रकरणेनैव प्राणादीनां पञ्चसंख्योपपत्त्या पञ्चजनत्वसिद्धिप्रतिपादनार्थं सूत्रमप्यप्रायन्यायतिरस्कारकानुपपत्त्यन्तरशङ्कापरिहारश्चार्थात्सिध्यति सर्वशाखाप्रत्ययन्यायेन अनुक्तस्यान्नपाठस्याऽन्यतो ग्रहणेऽपि कैश्चिद्धेतुभिःप्राणादीनामिन्द्रियत्वनिश्चयदौर्लभ्येन पञ्चसङ्ख्यानिवेशनिमित्ताभावात् पञ्चजनत्वमनुपपन्नमिति शङ्काऽवतिष्ठते प्राणादीनामिन्द्रियत्वे हि प्राणाच-शब्दयोरस्वारस्यद्वयं स्यात् प्राणशब्दश्चोपक्रमस्थो नभञ्जनीयः अन्न-शब्दस्य तन्त्रेणार्थद्वयपरत्वं च क्लिष्टम् अतोऽप्यप्रायन्यायस्यानेकहेत्वभिभूतस्याकिञ्चित्करतया प्राणादीनामिन्द्रियत्वमशक्यनिश्चयम्, अतः काण्वपाठेऽपि माध्यन्दिनशाखाधिगतान्नपाठोपजीवनमनपेक्षितं स्यात् प्राणादीनामिन्द्रियत्वानिश्चयात्तन्निश्चये सति ह्यनुक्तेन्द्रियग्रहणापेक्षा, एवमिन्द्रियत्वानिश्चयेन पञ्चसंख्यानिवेशनिमित्तैकोपाध्यभावात् क्वचिन्न्यूनतया च पञ्चसङ्ख्यानिवेशायोगाच्च प्राणा-

Digitized by Google

दीनां पञ्चजनत्वमिति शङ्कापरिहारार्थं सूत्रम्। नन्विन्द्रियस्यानिश्चयहेतवः शङ्कायनयेऽनुक्ताः सत्यमुत्तरत्र परिहारादिहाभिप्रेतत्वमवगम्यते यथाऽन्तरादित्याधिकरणे सिद्धान्ते परिहारदर्शनात् पूर्वपक्षेऽप्यभिप्रेतत्वावगमः ॥

श्रु० अथोत्तरम्

सू० ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

श्रु० एकेषां काण्वानां पाठे असत्यन्ने ज्योतिषा पञ्चजना इन्द्रियाणीति विज्ञायन्ते तेषां वाक्यशेषः प्रदर्शनार्थः एतदुक्तम्भवति, यस्मिन् पञ्च पञ्चजना इत्यस्मात् पूर्वस्मिन्मन्त्रे "तन्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमि"ति ज्योतिषां ज्योतिष्ट्वेन ब्रह्मण्यभिधीयमाने ब्रह्माधीनस्वकार्याणि कानिचिज्ज्योतींषि प्रतिपन्नानि

टी० सू० ज्योतिषैकेषामसत्यन्ने ज्योतिषा षष्ठ्यन्तज्योतिःशब्देनेत्यर्थः, सूत्रेऽपि ज्योतिःशब्दः शब्दस्वरूपार्थः श्रुतिवाक्यस्वारस्यसिद्ध्यौपयिकत्वात् सूत्रस्थज्योतिश्शब्दास्वारस्यं सोढव्यमिति भावः, परैर्हि तन्देवा ज्योतिषां ज्योतिरिति द्वितीयान्तज्योतिश्शब्दनिर्दिष्टब्रह्मणा पञ्चसङ्ख्यासिद्धिरुक्ता तदानीमेकस्य मन्त्रस्य शाखाद्वयगतस्य एकार्थत्वप्रत्यभिज्ञानभङ्गेन ब्रह्मपञ्चमतयाऽचपञ्चमतया च पञ्चजन-शब्दनिर्वाहास्वारस्यमवर्जनीयं स्यात् । किञ्च यस्मिन्नित्याधारतया ब्रह्मणो निर्दिष्टत्वेन प्राणादिषु पञ्चमस्यापि प्राणादिचतुष्टयवत् ब्रह्मव्यतिरिक्तत्वप्रतीतेश्च ब्रह्मणः पञ्चमत्वमयुक्तं, स्वे महिम्नि प्रतिष्ठित इतिवद्विवक्षाह इति चेन्न सप्तमीप्रतिष्ठित-शब्दयोर्मुख्यार्थे सम्भवत्यमुख्यार्थस्वीकारायोगात्, अतः पञ्चजन-शब्दसप्तमीविभक्तिप्रतिष्ठित-शब्दानामर्थवैरूप्यास्वारस्यप्रसङ्गात् ज्योतिःपञ्चमत्वपरत्वमनुपपन्नमिति मन्वानेन भगवता भाष्यकारेण षष्ठ्यन्तज्योतिःशब्दस्वरूपपरतया ज्योतिषेति पदं व्याख्यातम्, इन्द्रियाणीति

ज्ञायन्ते चेत्कथं चतुष्टयकर्त्तनं वाक्यशेष इत्यत्राह "तेषामि"ति, ज्योतिशब्दस्य कोऽर्थः तैरिन्द्रियाणीति कथं ज्ञायन्ते ततः किमन्नपाठवैकल्यस्य दोषस्येत्यत्राह "एतदुक्तमि"ति. ब्रह्माधीनस्वकार्याणीत्यनेन प्राणस्य प्राणमित्यादेरर्थ उक्तः, पवित्राणाम्पवित्रमितिवदितिभावः । ज्योतींषीत्यनेन प्रकाशकत्वमभिप्रेतन्ततश्च कर्मेन्द्रियादिव्यावृत्तिसिद्धिः तेषां प्रकाशकत्वाभावात् कानिचिदिति आदित्यादिज्योतींषि न वेति संशये विशेषनिर्धारणाकाङ्क्षा तिष्ठतीति भावः । ततः किमित्यत्राह—

सू० तानि च विषयाणां प्रकाशकानीन्द्रियाणीति यस्मिन्पञ्च पञ्चजना इत्यनिर्द्धारितविशेषनिर्देशेनावगम्यन्ते इति प्राणस्येति प्राण-शब्देन स्पर्शेन्द्रियङ्गृह्यते वायुसम्बन्धित्वात्स्पर्शेन्द्रियस्य मुख्यप्राणस्य ज्योतिश्शब्देन प्रदर्शनायोगात् चक्षुष इति चक्षुरिन्द्रियं, श्रोत्रस्येति श्रोत्रेन्द्रियमन्नस्येति घ्राणरसनयोः तन्त्रेणोपादानम्, अन्न-शब्दोदितपृथिवीसम्बन्धित्वात् घ्राणेन्द्रियमनेन गृह्यते

टी० "तानि चे"ति, अनिर्धारितविशेषनिर्देशेनेति संख्येयविशेषणस्यापकवाक्यान्तरसाकाङ्क्षत्वं द्योतितं ततश्च तत्र श्रुतपञ्चमसंख्याविशेषितत्वात् पञ्चसंख्याकज्योतिरन्तरप्रसिद्ध्यभावाच्च परिशेषेणेन्द्रियत्वावगमः, एवं वाक्यशेषस्याप्युपक्रमभूतेन परस्परसाकाङ्क्षेण मन्त्रद्वयेनेन्द्रियाणाम्प्रतिपादितत्वात् षष्ठ्यन्तज्योतिश्शब्दोक्तानां तेषां चक्षुषः श्रोत्रस्य मनस इति षष्ठ्यन्तैः पदैः प्रत्यभिज्ञायमानत्वाच्च वाक्यशेषस्येन्द्रियपरत्वमभिप्रेत्य प्राण-शब्दं व्याचष्टे "प्राणस्येती"ति, वायुसम्बन्धित्वाद्वाय्वाप्यायितत्वात् प्रसिद्धः प्राणः कस्मान्न गृह्यत इत्यत्राह "मुख्यप्राणस्य ज्योतिःशब्देन प्रदर्शनायोगादिति, ज्योतिश्शब्देन ज्योतिषां ज्योतिरित्यत्र षष्ठ्यन्तज्योतिश्शब्देनेत्यर्थः, अनेन मुख्यावस्य च ज्योतिश्शब्देन प्रदर्शनायोगो-

विवक्षितः स्पष्टार्थानामपि चक्षुःश्रोत्रादिपदानां व्याख्यानं किमर्थं षष्ठ्यन्त-
ज्योतिश्शब्दाभिहितानां षष्ठ्यन्तपदैरेकैकश उच्यमानत्वज्ञापनार्थं, तेन हि
पूर्वसूत्राभिप्रेतस्याग्रप्रायन्यायस्य हेत्वन्तराभिभूतस्य पूर्वमन्त्रद्वयसाहच-
र्योत्तम्भितत्वेन इदानीं प्राबल्यं ज्ञायते, एवञ्च सति प्राण-शब्दस्य उप-
क्रमस्थत्वमकिञ्चित्करं तस्याप्युपक्रमभूतमन्त्रद्वयप्राबल्याद्तो न प्राणान्न-
शब्दमुख्यार्थानुगुणमितरपदानि व्याख्येयानि पदत्रयस्वारस्यानुगुणपदद्व-
यस्य व्याख्येयत्वान्न ह्यनेकपदस्वारस्यभङ्ग उचित इत्यभिप्रायेण चक्षुः-
श्रोत्रमनांसि त्रीण्यपि स्व-शब्देनैव व्याख्यातानि, एवमुपक्रमैकार्थ्यात्
प्राणादीनामिन्द्रियत्वे निश्चिते सत्यनुक्तेन्द्रियस्वीकारस्याऽपेक्षितत्वात् सर्व-
शाखाप्रत्ययन्यायेन काण्वपाठेऽप्यन्नपाठः सिद्ध इति उभयसाधारणमन्न-शब्दं
व्याचष्टे "अदनस्ये"ति, ननु यस्मिन् इत्यादिमन्त्रे पञ्चसंख्यावगमाद्धि ज्योति-
षामिन्द्रियत्वमध्यवसितम् अतो वाक्यशेषस्येन्द्रियपरत्वनिश्चय उपक्रमम-
न्त्रसापेक्षः, मन्त्रश्च विशेषकीर्त्तनाय वाक्यशेषसापेक्ष इत्यन्योन्याश्रय इति
नैवम् उपक्रमस्थमन्त्रद्वयस्येन्द्रियपरत्वनिश्चये वाक्यशेषानाकाङ्क्षत्वात् वा-
क्यशेषस्येन्द्रियपरत्वनिश्चय एव ह्युपक्रमसाकाङ्क्षः, एवमुपक्रमादेवेन्द्रियत्वेऽ-
वगते प्रत्येककीर्त्तनं वाक्यशेषस्थमिति न तावता नान्योन्याश्रय इति, अन्न-श-
ब्दं व्याचष्टे "अदनस्ये"ति, अन्न-शब्दस्य घ्राणरसनोपस्थापकत्वद्वयमित्यपे-
क्षायाम् अन्न-शब्दस्य घ्राणवाचित्वन्दर्शयति "अन्न-शब्दोदिते"ति, पृथिवी
संबन्धित्वात् पृथिव्याप्यायितत्वाल्लक्षणयेत्यर्थः। रसनावाचित्वमुपपादयति

मू० अद्यतेऽनेनेत्यन्नमिति रसनेन्द्रियमपि गृह्यते मनस इति
मनः, घ्राणरसनयोरन्नेनोपादानम् इति पञ्चत्वमप्यविरुद्धं
प्रकाशकानि मनः पर्यन्तानीन्द्रियाणि पञ्चजन-शब्दनि-
र्दिष्टानि तदविरोधाय घ्राणरसनयोरन्नेनोपादानन्तदेवं
यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठित इति पञ्चजन-
शब्दनिर्दिष्टानीन्द्रियाणि आकाश-शब्दप्रदर्शितानि म-

Digitized by Google

न्याभूतानि च ब्रह्मणि प्रतिष्ठितानीति सर्वतत्त्वानां ब्रह्माश्रयत्वप्रतिपादनान्न तन्त्रसिद्धपञ्चविंशतितत्त्वप्रसङ्गः, अतः सर्वत्र वेदान्ते सङ्ख्योपसङ्ग्रहे

टी० "अन्नेन" इति, लक्षणाया बीजभूतत्वं दर्शयितुमन्न-शब्दवाच्यभोग्यवस्तुविनियोगे कारणतया सम्बन्धः प्रदृश्यते अद्यतेऽनेनेति अन्नतेऽनेनेत्येवं रूपसम्बन्धादन्नमिति रसनेन्द्रियं गृह्यते अन्न-शब्देन रसनेन्द्रियं लक्ष्यत इत्यर्थः । अनेन घ्राणस्याऽप्याप्यतया संबन्धः तद्विनियोगकरणतया रसनायाः अतोऽन्नसंबन्धिवस्तु लक्षयताऽन्न-शब्देन घ्राणरसनयोरेकव्यापारेण लक्षणा भवतीति भावः । न तर्हि पञ्चत्वसिद्धिः मनसः षष्ठत्वादित्यत्राह "घ्राणरसनयोरि"ति, पञ्चत्वमप्यविरुद्धमिति पञ्चत्वं न निर्दुश्यापेक्षया किन्तु निर्दुशापेक्षयेत्यर्थः तन्त्रेणोपादानकल्पकं किमित्यत्राह "प्रकाशकानी"ति, प्रकाशकत्वं पञ्चसंख्याविशिष्टत्वं मनःपर्यन्तमिन्द्रियाणामुक्तत्वेन पारिशेष्यञ्च घ्राणरसनयोस्तन्त्रेणोपादानकल्पकं घ्राणरसनसमुदायगतमेकत्वं पञ्चजनविशेषणभूतायाः पञ्चसंख्याया अवान्तरसंख्यात्वेन विवक्षितमित्यर्थः अवयवगतद्वित्वानादरेण समुदायगतैकत्वविवक्षया पञ्चसंख्यानिर्देशश्च श्रुतिसमाधिः, यथा द्वादशमासाः पञ्चर्तव इति षट्के सत्यपि हेमन्तशिशिरसमुदायगतैकत्वविवक्षया हि तत्र पञ्चत्वसंख्याव्यपदेशः वसन्तमृतूनां प्रीणामि ग्रीष्ममृतूनां प्रीणामीत्यादिना सर्वमृतून् प्रत्येकं निर्दिश्य हेमन्तशिशिरावृतूनां प्रीणामीति सह व्यपदेशाद्धेमन्तशिशिरसमुदायगतैकत्वं पञ्चर्त्तव इत्यत्र विवक्षितमिति ज्ञायते, एवमस्मिन्वाक्ये फलितमर्थमाह "तदेवमि"ति, पञ्चजन-शब्दनिर्दिष्टानि प्रदर्शितानीत्यर्थः, अत एव कौन्द्रियाणीत्युक्तं न तु ज्ञानेन्द्रियाणीति महाभूत-शब्देन भूततन्मात्राण्यपि विवक्षितानि सर्वतत्त्वानां सर्वाश्रयत्वप्रतिपादनादित्युक्तेः, एवं संख्यामुपगमात्तदनभ्युपगमाच्च द्विधा परिहृतम्, एवम्परिहारद्वयकथनस्याऽपि प्रयोजनं वदन्नुपसंहरति "अत" इति, सर्वत्र वेदान्ते संख्योपसंग्रहे

Digitized by Google

मू० तदभावे वा न कपिलतन्त्रसिद्धतत्त्वप्रतीतिरस्तीति स्थितम्।
संख्योपसंग्रहाधिकरणं समाप्तम् ॥

कारणत्वाधिकरणम् ।

सू० कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥

पुनः प्रधानकारणवादी प्रत्यवतिष्ठते ।

टी० तदभावेचेति, अनेन ग्रन्थेन अनन्तरसूत्रस्य यादवप्रकाशकृतयोजनाव्युदासो हेलया कृतो भवति स खलु कारणत्वनेत्यादिसूत्रं तदुत्तरसूत्रात्पृथगधिकरणत्वेन वर्णयन् "स वा एष पुरुषः पञ्चधा पञ्चात्मेति" वाक्यं विषयमुदाहरन् तदयुक्तं कृतकरत्वादित्यनेन दर्शितम्भवति पञ्चसङ्ख्याभिनिवेशनिमित्तकारासिद्ध्या समूहपञ्चकासिद्धेः पञ्चविंशतितत्त्वप्रतिपादनायोगस्तावस्थितः पञ्चात्मेति मृदात्मा घट इतिवदर्थानुपपत्तः पुरुषस्य प्रकृततत्त्वैः स्वरूपैक्यायोगात् ततश्च प्रत्येकं पञ्चधाभूतपञ्चतत्त्वसंघातानामात्मेत्यर्थः स्यात् तथा सति पञ्चविंशतितत्त्वातिरिक्त आत्मा परमपुरुषः स्यात् पञ्चविंशतितत्त्वानां तदात्मकत्वाद्ब्रह्मात्मकोपस्तन्त्रसिद्धतत्त्वेभ्यो विलक्षणत्वं स्यादिदं चाभ्युपगम्योक्तं वस्तुतः एकैकशः शिरःपक्षादिरूपेण पञ्चविधान्नमयप्राणमयादिरूपतया सद्वारकमद्वारकञ्च पञ्चप्रकारत्वमुच्यत इति पूर्वाधिकरणसमर्थितादर्थान्न कश्चिद्विशेषः, तस्मादधिकरणान्तरत्वैयर्थ्यमिति, एवमन्यत्रापि सङ्ख्यासम्भवे तथा वर्णनीयम्, असम्भवे च सङ्ख्यानादरेण निर्वाह्यमिति ज्ञापनं प्रयोजनमित्यर्थः, संख्योपसंग्रहाधिकरणं समाप्तम् ॥ सू० कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः, सर्वतत्त्वानां यस्मिन्निति ब्रह्माश्रयत्वप्रतीत्या स्वातन्त्र्येण प्रधानस्य कारणत्वं निरस्तमथ स्वातन्त्र्येण कारणत्वं प्रतीयते ब्रह्माश्रयत्वाप्रतीतेरिति शङ्कया सङ्गतिः, तामाह "पुनरि"ति, अवर्जनीयाचिद्बोधव्याकुलार्थशब्दोपलक्षितकारणवाक्यसमुदायो विषयः व्याकुलत्वादेव संशयः किं जगत्कारणविषयवेदान्तवाक्यप्रतिपाद्यमव्यक्तं? मुत ब्रह्मे? ति किमसद्वा इदमग्र आसीत् तद्धेदन्तर्ह्यव्याकृतमासीदि"त्यग्रासद-

व्याकृतनामरूपावस्थब्रह्मपरो? उताव्यक्तपरा? विति तदर्थं किं तदप्येष श्लोको भवतीति साक्षित्वेन निर्देशो ऽसच्छब्दस्य प्रकृतब्रह्मपरतामवगमयति ने? ति स एष इम प्रविष्ट इह प्रशासितुरनुकर्षश्चाव्याकृत-शब्दस्य ब्रह्मपरतामवगमयति नेति संशयो ऽर्थसिद्धः, यदा "स एष इत्यनुकर्षो नाव्याकृतशरीरब्रह्मपरतामवगमयति यदा च तदप्येष इति निर्देशः प्रकृतब्रह्मपरतामसच्छब्दस्य नावगमयति तदानीमसदव्याकृतशब्दयोरव्याकृतनामरूपावस्थब्रह्मपरत्वाभावात् कारणवाक्यप्रतिपाद्यमव्यक्तमिति प्राप्नोति, यदा तदप्येष इति निर्देशो ऽसच्छब्दस्य ब्रह्मपरतामवगमयति यदा च स एष इत्यनुकर्षो ऽव्याकृतशब्दस्याव्याकृतशरीरकब्रह्मपरतामवगमयति तदानीमसदव्याकृतशब्दयोरव्याकृतनामरूपावस्थब्रह्मपरत्वाज्जगत्कारणवाक्यप्रतिपाद्यं ब्रह्मेति सिद्ध्यति, वेदान्तेषु कारणवाक्यानामैककण्ठ्येन हि ब्रह्मकारणत्वमुक्तं तदनुपपन्नम् ऐककण्ठ्याभावादित्याह—

सू॰ न वेदान्तेष्वेकस्मात्सृष्टिराम्नायत इति जगतो ब्रह्मैककारणत्वं न युज्यते च वक्तुं, तथाहि "सदेव सोम्येदमग्र आसीदि"ति सत्पूर्विका सृष्टिराम्नायते "असदा इदमग्र आसीदि"त्यसत्पूर्विका चान्यथा"सदेवेदमग्र आसीन्नसदासीत्तत्समभवदि"ति" च, अतो वेदान्तेषु सृष्टेरव्यवस्थितेर्ज्जगतो ब्रह्मैककारणत्वं न निश्चेतुं शक्यं प्रत्युत प्रधानकारणत्वमेव निश्चेतुं शक्यते "तद्धेदं तर्ह्यव्याकृतमासीदि"त्यव्याकृते प्रधाने जगतः प्रलयमभिधाय "तन्नामरूपाभ्यां व्याक्रियत" इत्यव्याकृतादेव जगतः सृष्टिश्चाभिधीयते अव्याकृतम् हि अव्यक्तं नामरूपाभ्यां न व्याक्रियते न व्यज्यत इत्यर्थः, अव्यक्तं प्रधानमेव, अस्य च स्वरूपनित्यत्वेन परिणामाश्रयत्वेन च जगत्कारणवा-

कयगतौ सदसच्छब्दौ ब्रह्मणीवास्मिन्न विरोत्स्येते, एवमव्याकृतकारणत्वे निश्चिते इति ईक्षणादयः

टी० "न वेदान्तेष्वि"ति, एकस्मादेकरूपात् कारणात् सृष्टेरव्यवस्थितेः ब्रह्मकारणवादे सृष्टिकारणस्याव्यवस्थितेरित्यर्थः । प्रधानकारणवादे सामञ्जस्यमाह "प्रत्युते"ति, । नन्वव्याकृतात् सृष्टिः प्रतीयते न प्रधानादित्यत्राह "अव्याकृतं ही"ति, अव्याकृतत्वं नामरूपविशिष्टतयाऽनभिव्यक्तत्वमस्तु ततः किमित्यत्राह "अव्यक्तं प्रधानमेवे"ति, परस्परप्रतिक्षेपकार्यविषययोः सदसच्छब्दयोः कथं प्रधानविषयत्वोपपत्तिरित्यत्राह "अस्य चे"ति, ब्रह्मणीवेति वैधर्म्यदृष्टान्तो, ननु तद्धेदमिति प्रकरण एव "पश्यन् चक्षुः शृण्वन् श्रोत्रमि"त्यव्याकृतशब्दवाच्यस्य चेतनत्वमवगम्यते असच्छब्दस्याप्यव्याकृतशब्दसमानयोगक्षेमत्वाच्चेतनविषयत्वमापतति प्रकरणान्तरेषु चेक्षणं श्रूयते परब्रह्मशब्दस्य चेतनविषयत्वं, श्रुतिप्रसिद्धम् आत्म-शब्दश्च चेतनैकान्त इति शङ्कायामीक्षणधर्मयोगं प्रतिवक्ति "एवमि"ति, एवं-शब्देन कारणवाक्यस्थसदसदादिशब्दानां परमात्मन्यसामञ्जस्यं प्रधाने सामञ्जस्यञ्च पूर्वोक्तत्वात्परामृश्यते ईक्षणादय इत्यादि-शब्देन "स तपोऽतप्यत, इदं सर्वमसृजते"त्यादिवाक्यप्रतिपन्नौ पूर्वोक्तपर्यालोचनाप्रयत्नौ विवक्षितौ

मू० कारणगताः सृष्ट्यौन्मुख्याभिप्रायेण योजयितव्याः, ब्रह्मात्म-शब्दावपि वृद्धत्वव्यापित्वाभ्यां प्रधान एव वर्त्तेते, अतः स्मृतिन्यायप्रसिद्धं प्रधानमेव जगत्कारणं वेदान्तवाक्यैः प्रतिपाद्यते

टी० "कारणगता" इति, अव्याकृत-शब्देन प्रथमत एवाचेतनस्य प्रतिपन्नतया पश्चादवगतम्पश्यन् चक्षुरित्यादिवाक्योक्तं चेतयितृत्वं चक्षुराद्युत्पादनौन्मुख्याभिप्रायम् एवं प्रकरणान्तरेऽप्यपीक्षणोक्तेर्धर्मिवाचिपदनिर्देशपूर्वकत्वाद्धर्मिवाचिपदानां च सर्वशाखाप्रत्ययन्यायेन अव्याकृतशब्द-

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
काशिका पण्डितवरवामनादित्यविरचिता पूर्वार्धम् ५ रु॰ उत्तरार्धम् ५ रु॰ ..	१०)
बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	७)
प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१।)
लघुकौमुदी वरदराजकृता	१=)
लघुकौमुदी श्रीयुतडाक्तरबालण्टैनाचार्य्येणाङ्गलदेशीयभाषायां कृता	८)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफाचार्य्येणाङ्गलदेशीयभाषायां कृतम्	४)
मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	३।)
वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिनगा-देशाधिपतिरचिता	४)
श्रौतपदार्थनिर्वचनम्	४)
वाक्यार्थचन्द्रिका परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूकशास्त्रि-संशोधिता	४)
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-शास्त्रिप्रणीतक्काचित्कविषमपदटिप्पणीसमेतः	६।।।)
तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम्	८।)
तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम्	४॥)
शास्त्रदीपिका	८।)
खण्डनखण्डखाद्यं सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्प-णीसहितम्	७॥)
काव्यप्रदीपः काव्यप्रकाशस्य प्रसिद्धा व्याख्या वाराणसेयसमाद्प्रतिष्ठा-पितसंस्कृतपाठशालीयदर्शनशास्त्राध्यापकरामशास्त्रिभागवताचा-र्य्येण परिशोधितः	३॥)
वेदान्तसिद्धान्तमुक्तावली श्रीयुत आर्थर् विनिस महाशयेनेङ्गलेण्डीय-भाषायामवतारिता	२॥)
चित्रमीमांसा अप्पयदीक्षितकृता, श्री तै॰ रामशास्त्रिणा संशोधिता	१।)
तत्त्वबिन्दुः वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।=)॥

Digitized by Google

CONTENTS.

Page.

GAṆAKATARAṄGIṆĪ, or LIVES of HINDU ASTRONOMERS, by Mahāmahopādhyāya Sudhākara Dvivedī, Professor, Sanskrit College, Benares. ... 331

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed: Dāmodara Śāstrī, Professor, Sanskrit College, Benares. ... 347

ŚRĪBHĀSHYA WITH ŚRUTAPRAKĀŚIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. .. 363

Digitized by Google

HARVARD COLLEGE
JAN 18 1893
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 9.] AUGUST, 1892. [Vol. XIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1892.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यंप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

JAN 18 1893
LIBRARY

दिगन्तप्रसिद्धाः सिद्धान्तविवेकमानिनः कृष्णदेवशिवलालदुर्गाशङ्करपाठकादय आसन् तद्बहुवर्णनमनावश्यकमेव मन्ये । अयं बबुआज्योतिर्वित्समकालिकः । यथा बबुआज्योतिर्विदः फलितेऽपूर्वा प्रसिद्धिरासीत्तथैवाऽस्य सर्वगणकमान्यस्य सिद्धान्ते । अस्य जन्मशकः खसप्तरसेन्दु १६७० समासन्नो हि सम्प्रति वर्त्तमानवृद्धजनेभ्यः श्रूयते निधनसमयश्च द्विवेदसप्तेन्दु१७४२ मितशकः । जानथन डंक्यान् (Jonathan Duncan, the Resident of Benares) साहिबेन रूपनन्दसप्तेन्दु १७९१ खीष्टशके अक्टोबरमासस्य २८ दिवसे काश्यां स्वप्रबन्धेन यदा काशि*कराजकीयप्रधानपाठशाला स्थापिता तदाऽयं लक्ष्मीपतिस्तत्पाठशालायां प्रधानगणितशास्त्राध्यापक आसीत् (See p. 12 of Sketch† of the Rise and Progress of the Benares Páṭhaśálá.)

बबुआज्यौतिषी । १६७८

काशीस्थो महाराष्ट्रब्राह्मणो बहूनां मते सिद्धान्ततत्त्वविवेककारकमलाकरवंशीयो यद्यपि ज्योतिषस्कन्धत्रयेऽद्वितीयः पण्डितस्तथापि काश्यां फलितेऽस्य महती प्रसिद्धिरासीत् । अवधनृपति–आसफउलदौलानाम्नः पुत्रो मिर्ज़ाअलीनामा यश्च वज़ीर–अलीनाम्ना प्रसिद्धो यदा नवनवसप्तेन्दु १७९९ खीष्टशके जनवरीमासस्य १४ दिने चेरीसाहिबं व्यापादयामास तदा बबुआज्योतिर्विन्मुहूर्त्तबलेनैव स्वराज्यप्राप्त्यर्थं बृटिशगवर्नमेण्टतो योद्धुं प्रवृत्तः । अयं शत्रुभिया मुहूर्त्तसमयतः पूर्वमेव योद्धुं प्रवृत्तस्तेनैव हेतुना काश्यामस्य सपादैकप्रहरमात्रं राज्यमासीत् सम्यक् मुहूर्त्तपालनेनायं सार्वदिको राजाऽभविष्यदिति काश्यां चिराज्जनश्रुतिः । वज़ीर–अलीमुहूर्त्तदानसमयादेव राजप्रतिबन्धजनेभ्यः काशीस्थेभ्यो राज्यार्थं यात्रामुहूर्त्तो भवद्भिर्न देय इति भृशं बृटिशगवर्नमेण्टेनाऽऽज्ञापितोऽयं जातः ।

बृटिशगवर्नमेण्टप्रतिबन्धतः काश्यां निवसतो नयपालमहाराजस्यापि यात्रामुहूर्त्तोऽनेन दत्तो यद्बलेन स महाराजः सुखेन नयपालं प्राप्य प्रतिबन्धमुक्तोऽभूत् । स तत्र गत्वाऽसकृत्स्वदेशागमनार्थं तं ज्योतिर्विदं प्रार्थयामास पत्रादिना परन्तु स काशीं विहाय न गतवान् पश्चात्त-

---

* तस्मिन् समय इयं पाठशाला काश्यां कर्णघण्टानामकप्रदेशे भूतभैरवनिकट आसीत् । अद्यावधीदं स्थानं वर्त्तते ।

† It is not printed. MS. is kept in Benares College Library.

त्पुत्रो जयरामशर्म्मा तत्र गत्वा द्रव्यादिना बह्वादरसम्मानं चाऽऽसादितवान् ।

बबुआज्यौतिषी खलूच्छिष्टगणपतिमुपास्य विलक्षणां सिद्धिं प्राप्तो-ऽतस्तद्बलेनैव तस्य मुहूर्त्तादिकं सर्वदा सत्यरूपमिति परम्परातः श्रूयते । अयं च स्वगृहहर्म्यादधो नागतः सर्वदा तदुपरि तिष्ठन्नेवाऽऽस्ते । मुहूर्त्तदानसमये मुहूर्त्तार्थमागतादधो बहिः स्थिताज्जनाद्गवाक्षद्वारा रज्ज्ववलम्बितपात्रेण धनमादाय स्वल्पाधिकधनानुसारेण सामान्योत्तममुहूर्त्तान् ददाति स्म । यात्रामुहूर्त्तविषयेऽस्य महती प्रशंसा प्रथिताऽस्ति ।

यथा काशीस्थः कश्चिद्दीनयवनो धनार्जनार्थं परदेशं निर्गमिषुर्मुद्राद्वयेन बबुआज्योतिर्विदो मुहूर्त्तं गृहीतवान् । मुहूर्त्तविश्वासी स मुहूर्त्तसमय एव प्रस्थितः क्रोशदशकं गत्वा तस्थौ । तत्र ज्वरवेदनादुःखितः सप्तदिनान्युषोष्य निधनशङ्कयाऽऽकुलो मुद्राचतुष्टयेनैकां कृशामश्वतरीं जीर्णपर्याणोपेतां क्रीत्वा तत्रोपरि स्थित्वा कथमपि महता क्लेशेन स्वगृहं प्रत्यागतः । मासद्वयेन निवृत्तज्वरो जातबलो लगुडं गृहीत्वा शनैः शनैर्ज्योतिषिगृहमधिगत्य मुहूर्त्तनिन्दां कर्त्तुमारभत । ज्योतिर्विच्च जातविस्मयो यात्रायां किमुपार्जितं भवतेत्यवोचत् । जीर्णपर्याणोपेता कृशैकाऽश्वतरी क्रीता सापि दिवंगतेति क्रोधविस्फुरितेक्षणो यवनोऽवदत् । तज्जीर्णपर्याणमेवानयेत्युक्तो ज्योतिर्विदा स सहसा पर्याणं गृहादानीय ज्योतिर्विदभिमुखे छिन्नभिन्नमकरोत् । छिन्ने पर्याणे च स्वर्णमुद्राशतद्वयं युगपत्तत्र दृष्ट्वा विस्मयापन्नो विनयेन स्वर्णमुद्रादशकेन च तं ज्योतिर्विदं सम्पूज्य बहु संस्तुत्य च सानन्दं सदनं ययौ । एवमनेकधा ।

अस्य निधनशकश्चाष्टाग्निसप्तेन्दुसमासन्न१७३८स्तदाऽस्य वयः षष्टिवर्षमितं चेत्तदा जन्मशकोऽष्टसप्तरसेन्दुमितः समायाति । अयमुदितनारायणसिंहवीरपुङ्गवात्काशिराजात् वृत्तिं च लब्धवान् याऽद्यावधि तद्वंशे वर्त्तते * ।

मथुरानाथशुक्लः । १६८०

अयं मालवीयब्राह्मणो ज्योतिषसिद्धान्तविद्याचतुरः पारसीकभाषा-

* एतदाख्यानसमय एव काश्यामतीव प्रसिद्धो वामोपासकः फलितप्रवीणश्चिन्तामणयुपाध्यायः सरयूपारीणब्राह्मणो लक्ष्मणा (लखनौ) पुराधिपतियवननृपतितो लब्धबह्वादरश्चासीत्तद्वंशीया अद्यावधि काश्यां तल्लब्धग्रामादिना सुखं भुञ्जन्ते ।

Digitized by Google

प्रवीणो यन्त्रराजघटनाद्यनेकग्रन्थकर्ताऽसीत् । पुराऽयं काशिकराजकीय-प्रधानपाठशालायां विश्वधृति १८१३ खीष्टशके पुस्तकालयाध्यक्षत्वेन नियुक्तः । यन्त्रराजघटनाख्याऽस्य कृतिः काश्यां पाठशालापुस्तकाल-यस्था वस्तुतः प्रकटयति विशिष्टं पाण्डित्यमस्य । अस्य निधनं च धृति-धृति १८१८ खीष्टशके दिसेम्बरमासेऽभूत् । ततोऽस्य पुत्रो यदुनाथ-शर्म्मा पुस्तकालयाध्यक्षस्ततो बेचनरामत्रिपाठी ततो यदुनाथशर्म्मणा-स्तनयो रमानाथशर्म्मा ततो ढुण्ढिराजशास्त्री ततोऽहम् । सम्प्रति विन्ध्ये-श्वरीप्रसादद्विवेदी पुस्तकालयाध्यक्षपदमलं करोति इति पुस्तकालया-ध्यक्षव्यवस्था ।

निधनसमये मथुरानाथशुक्लस्य वयश्चेत् षष्टिवर्षसमं कल्प्यते तदाऽस्य जन्मशकः खाष्टनृप १६८० समः समायाति ।

यन्त्रराजघटनानामकपुस्तकं मथुरानाथेन वेदाभ्रसप्तेन्दु १७०४ शके सम्प्रति राजपदवीमलङ्कुर्वतः शिवप्रसादमहाशयस्य पितामहस्य दयालुचन्द्रनृपते (राजाडालचन्द) राज्ययाऽकारि । इदं पुस्तकं यन्त्र-राजनिर्माणपद्धतिरूपं सहस्रश्लोकासन्नमस्ति ।

अस्य ३श्लोकः ।

कथं नु मम चेतसि स्थगितमेधसि स्थीयतां
सुखेन यदबाधितोऽम्बुधिरिवेदमावर्त्तताम् ।
कलाकुलविशारदः स्वकरपूरिताशः श्रिया
भवेन्न यदि नोदनो नृपदयालुचन्द्रः प्रभुः ॥

अन्ते ।

श्रीयन्त्रराजघटनाविधिरेष काश्यामीशप्रयोजितधिया मथुरेश्वरेण ।
श्रीमद्गुरुस्वपदरेणुवराञ्जनेन कालापरोक्षमतिना रुचिरो व्यधायि ॥
तन्त्रान्तरीयबहुलश्रमखेदभाजः सौकर्यतः सकलकालकलावबुद्ध्यै ।
तन्वन्तु सम्यगवलोक्य तु यन्त्रराजं तोषं ततस्समुपयात्विह कालकालः ॥

नक्षत्रस्थापनविधौ "तानि च नभस्यसङ्ख्ये यानि तत्र यवना-चार्यवर्यैः परिस्फुटानि द्वाविंशदुत्तरसहस्रमितानि नक्षत्राणि १०२२ विद्धानि तानि च जीवाभिधे तदीयसर्वेग्रहसंगणितसारणीग्रन्थे सम्य-राणि स्पष्टानि वर्त्तन्ते तेषु यथासम्भवं प्रतिराशीयानि कतिपयानि

Digitized by Google

श्रुत्यभ्रनगेन्दु १७०४ परिमितैतद्ग्रन्थशकाब्दकालिकानि स्पष्टराश्यंशयुतानि साभिधानि संगृह्यन्ते” इति लेखेन ग्रन्थारम्भशको विज्ञायते ।

परमसुखोपाध्यायः । १६६०

सीतारामोपाध्यायसुतः इटावामण्डलान्तर्गतनिवासी सनाढ्यब्राह्मण आसीत् । पतिनिधनशोकातुराऽस्य जननी सप्तदशवर्षवयस्कममुं काशीमानयत् । काश्यां चायमधीतज्यौतिषविद्योऽचिरेणैव कालेन परमप्रसिद्धोऽभूत् । फलितेऽस्य प्रसिद्धिं साधुजनेभ्यो निशम्य रीवांनरपतिना श्रीविश्वनाथसिंहतातेन सन्तानार्थमुचितानुष्ठानार्थमयमाहूतः । एतदनुष्ठानविधिना विश्वनाथसिंहस्य जन्माभूत् । विश्वनाथसिंहतातश्च पुत्रोद्भवसुखानुभवहृष्टोऽस्मै बहून् मातङ्गान् तुरङ्गमादींश्च लक्षमुद्रादानेनोपेतान् ददौ । अयमपि महानुदारः सर्वं तत्र लब्धं धनं प्रयागे दीनजनेभ्यो विभज्य प्रादात् स्वयं च यथा गतः सुखेन तथैव काशीं प्रत्यागतः ।

अयं फलितपण्डितः फलितग्रन्थरसिको लघुपाराशर्यास्त्रिकोणकेन्द्रनेतारावित्यादिश्लोकस्य वास्तवान्वयज्ञानार्थं कर्णाटकदेशादागतस्याऽतिवृद्धस्य ज्योतिषशास्त्रकुशलस्यैकपुत्रां पत्नीं तत्पुत्राय स्वर्णकङ्कटकदानेन सन्तोष्य तत्पुत्राध्यापनसमये तत्पत्नीकृपया प्रच्छन्नरूपेण स्थितः । निजपुत्राध्यापनसमये द्रागन्वयकृतो वृद्धपण्डितस्य तच्छ्लोकविषये यद्यपि कृतबहुपरिश्रमो दत्तबहुमूल्यस्वर्णकङ्कटकस्तस्मिन् समयेऽभिप्रायं नाऽज्ञानत् तथापि पञ्चगङ्गास्थले गङ्गायां निमज्जतोऽस्य वृद्धपण्डितस्य मुखात् “यदि तच्छ्लोकस्य वास्तवमन्वयं भवान् न करिष्यति तर्हि भवतः काशिवासफलं नष्टं भविष्यती”ति शपथेन ज्ञात्वा मुमुदे ।

एवं बांसबरैलीप्रान्तादागतं कमपि पण्डितं स्वगेहे निमन्त्र्य रत्नभूषितां बहुमूल्यां स्वर्णमुद्रिकां च दत्त्वा पश्चात्तद्देशं च गत्वा वस्त्रादिना तत्कुटुम्बं च सन्तोष्य “तत्कालमिन्दुसहितो द्विरसांशको य” इतिवराहमिहिरकृतबृहज्जातकश्लोकेनाऽनुपातद्वयेन प्रसवकालज्ञानं कथं भवतीति ज्ञातवान् । अयं स्वोदारप्रकृत्या निरभिमानतया प्रसिद्धो यशस्वी चाभवत् । वस्तुतो नायं त्रिस्कन्धज्यौतिषविद्याकुशलः । वह्निसप्तेन्दु१७३०शालिवाहनशकेऽयं पञ्चत्वं गतो निधनसमये च सप्ततिवर्षवयस्क आसीदिति वृद्धेभ्यः श्रूयते तेनास्य जन्मशकः खनवनृपासन्नः १६९० समायाति ।

बालकृष्णज्योतिषी । १६६२

बबुआज्योतिर्विदः सोदरभ्राता सेवारामज्योतिर्विद्वल्ल्योऽकरणे ज्योतिषस्कन्धत्रये च पटिष्ठः काशिराजश्रीमदुदितनारायणसिंहवीर-पुङ्गवसभाप्रधानपण्डित आसीत् । बबुआज्योतिर्विदः सर्वाणि बाह्यक-र्म्माणि यथावद्वयमेव सम्पादयति स्म । अस्यानेके छात्रा देशान्तरेषु वि-ख्यातयशस आसन् । यद्यप्यस्य काचित्कृतिर्ज्योतिषे प्रसिद्धा नास्ति तथापि काश्यां वृद्धाः पण्डिताः सम्प्रति वर्त्तमाना अस्य विलक्षणं पाण्डित्यं ज्योतिषे व्याकरणे काव्यसाहित्ययोश्च वदन्ति । अस्य निध-नसमयः कराश्वागेन्दु १७५२ शकासन्नः । निधनसमये ऽस्य षष्टिवर्षसमं वयः कल्प्यते तदा जन्मशकः करनवरसेन्दु १६९२ समः समायाति ।

कृष्णदेवः । १६६७

लक्ष्मीपतिपुत्रस्तातादधीतज्योतिषविद्यः काशिकराजकीयप्रधा-नसंस्कृतपाठशालायां ज्योतिषशास्त्रस्य प्रधानाध्यापक आसीत् । (इयं प्रधानपाठशाला तदा काश्यां भूतभैरवसन्निकट आसीत्) अयं च गणिते गोलविद्यायां चातिप्रगल्भ इति श्रूयते परन्त्वेतन्निर्मिता काचि-त्कृतिर्नोपलभ्यते । अस्य निधनसमयो युग्मनन्दवसुवसुमतीविक्रमाब्दः सप्तपञ्चसप्तेन्दु* १७५७ शकश्चात्रत्येभ्यस्तदीयकालेऽध्येतृभ्योऽधुना जराजर्जरितेभ्यः श्रूयते । निधनसमये चास्यावस्था षष्टिवर्षासन्नाऽऽसी-दित्यपि तेभ्यो ज्ञाता तदाऽस्य जन्मशकः सप्तनवरसेन्दुमितः १६९७ सिध्यति । काशिकराजकीयप्रधानपाठशालाकार्यसम्पादकैः सभ्यैरयं नख-धृति १८२० मिते खीष्टशके मई मासस्य २६ दिवसे पाठशालायां प्रधा-नगणितशास्त्राध्यापकपदे नियुक्तस्तदैव तेवारीश्वरशर्म्मा च द्वितीयगणि-तशास्त्राध्यापकत्वेन नियुक्तः ।

शिवदैवज्ञः । १७००

महादेवसुतो विश्वामित्रगोत्री गणेशदैवज्ञकृतग्रहलाघवानुसारेण सप्तत्रिसप्तेन्दुमिते१७३७ शके तिथिसाधनरूपं तिथिपारिजातं समका-र्षीत् । अत्रैका सारणी च तिथिसाधयिनी वर्त्तते । अस्य ज्ञानेश्वरनाम-

* निधनसमयः सत्य एव प्राचीनपाठशालास्थितिवर्णनानुसारेण । (See sketch of the Rise and Progress of the Benares Pátha Śalá p. 146, 271)

कवसतिरस्ति । एतत्सर्वं तत्रैव तिथिपारिजाते श्लोकशतासन्ने शिवेन स्वयं लिखितम् । ग्रन्थावलोकनेन न कश्चिद्विशेषो वस्तुतो ग्रहलाघव-कारतिथिचिन्तामणिवत् हाराद्भिर्व्यस्तैस्तिथिसाधनं वर्त्तते । ग्रन्थकृतोऽन्या कृतिरस्माभिर्न दृष्टा गणितेऽपि विशेषरूपेणास्य पाटवं न विभाति । कदाचित्फलिते कौशलं भवेत्तच्चैतत्कृतफलग्रन्थविलोकनमन्तरा वक्तुं न शक्यते । तिथिपारिजातस्य सारणीसहितं पुस्तकं काश्यां श्रीरामचन्द्रदीक्षितस्य जडे इत्युपनाम्नो गेहे वर्त्तते । रचनाकालेऽस्य वयश्चेत्सप्तत्रिंशद्वर्षसमं कल्प्यते तदाऽस्य जन्मशकः सप्तदशशतसमः १७०० समायाति ।

दुर्गाशङ्करपाठकः । १७०६

काशीस्थः शिवलालपाठकानुजो लक्ष्मीपतेः स्वभ्रातुश्चाधीतज्योतिषव्याकरणकाव्यसाहित्यतन्त्रविद्य औदीच्यब्राह्मणः स्वसमये जगतां गुरुरासीत् । अस्य शिष्यो ज्योतिर्विल्लज्जाशङ्करशर्म्मा काशिकराजकीय-प्रधानपाठशालायां प्रधानगणितशास्त्राध्यापकस्तथा हीरानन्दचतुर्वेदश्च तत्रैव प्रधानकाव्यसाहित्याध्यापक आसीत् । लाहोरनृपतिरणजितसिंह-निधनानन्तरमेतन्मुहूर्त्तेन खड्गसिंहः सिंहासनमध्यरोहत् । तदनन्तरमेनेन नवनिहालसिंहस्य जन्म*पत्रं विचित्रचित्रखचितं बहुविशेषविस्तृतं विरचितं यदीयरचनया जातहर्षो लाहोरनरपतिरस्मै लक्षमुद्रासमधनानि ददौ ।

स्वपुत्रविवाहे सिहोरनगरगतेन दुर्गाशङ्करपाठकेन सह एजेण्टविल्किन्सनसाहिबस्य समागमो जातः । समागमे पुराणज्योतिषयोर्मते विरोधो भवतीत्यत्रोभयोर्महान् संलापोऽभूत्तत्र "ज्योतिषपुराणयोरविरोध-प्रकाशको ग्रन्थो नीलकण्ठरचितो मत्सविधे वर्त्तते" इति पाठकेन कथितः काशीमागत्य तन्महाशयसविधे स ग्रन्थश्च प्रेषितः । एजेण्टसाहिबेनायं ग्रन्थः पाठ†कनिर्मित इति बुद्धा तत्रत्यपण्डितसाहाय्येन तन्मतं

* इदं जन्मपत्रं काशीस्थछन्नूलालवकीलद्वारा पोर्टरसाहिबेन गृहीतं तत्पत्नी च सम्प्रति तन्नीत्वा स्वदेशं गतवती । नवनिहालसिंहस्याकस्मान्मृत्युना तत्राऽसूचितेन तदनादरः पाठकानादरश्च पश्चान्महाञ्जातो लाहोरनगरे तत्रत्यजनैर्जन्मपत्रस्थमिथ्यालेखकारणक्रुद्धैः पाठकस्य मृत्युभयमुपस्थितं परन्तु लहनासिंहेन तत्र कोटाधीशेन रक्षितो बहुना काठिन्येन काशीमुपागमत्पाठक इति श्रूयते ।

† वस्तुतस्तत्र पाठकेन पुराणमतपक्षो न्यपिडतस्तत्सु स्वार्थमेव नीलकण्ठकृतं पुस्तकं प्रेषितमन्यथा पुस्तकप्रेषणमनावश्यकम् । पुस्तकप्रेषणे तत्खण्डनं पाठकसविधे प्रेषणमुचितमेवातो विलकिन्सनसाहिबेनोचितं कृतमिति मन्यतम् ।

संखण्डञ्च तदवलोकनार्थं ज्योतिर्विल्लज्जाशङ्करद्वारा तत्खण्डनं च प्रेषितम्। पाठकेन तदुत्तरपत्रं यल्लिखितं तत् अजेण्टसाहिबद्वारा सेवारामशर्म्मणा लब्धं सम्प्रति सेवारामसूनुर्सिद्धेश्वरगृहे मया तत्पत्रं दृष्टं तत्रत्यलेखश्च।

स्वस्ति श्रीमत्सकलभूपालमौलिमुकुटमणिदीपनीराजितचरणसरोरुहश्रीलान्सिलट्विल्किन्सन्साहेबप्रभुवर्य्येषु दुर्गाशङ्करपाठककृताशिकाशीर्वादास्समुल्लसन्तु आगे हजूर सें शिरोमणिप्रकाश ग्रन्थ की किताब १ आई औ हाल में अविरोधप्रकाश औ अविरोधप्रकाशविवेक की किताब १ आई हमने सब अवलोकन किया उस में श्रीसुब्बाजी रामचन्द्रकृत शिरोमणिप्रकाश औ अविरोधप्रकाशविवेक यह दूनों ग्रन्थ अच्छे हैं इस्से लोकोपकार बड़ा होगा औ हजूर ने जो नीलकण्ठ का खण्डन लज्जाशङ्करज्योतिषी के पास काशी में पत्र के साथ भेजा उस में नीलकण्ठ हमही को बनाया औ नीलकण्ठ का ग्रन्थ तो बहुत प्राचीन औ काशी में घर घर है उस का आदर कोई नहीं करता है हमारे हियां भी वेदवृद्ध वालकृष्ण हमारे विद्यार्थी ने दुष्टमुखचपेटिका इसी नीलकण्ठ का खण्डन बनाया है सो सेवाराम जोशी ने अच्छी तरह से देखा ही है और श्रीद्गुरु हमारे श्रीशिवलालपाठकजी सिद्धान्तमञ्जूषा किये हैं तद्विरुद्धप्रतिपादन करना हमको असंभव ही है और पूणा के पत्र की नकल जो काशी में आई सो हमने देखी उसमें नीलकण्ठ हमही कों समझ कों उनो ने भी कटु लिखा हुआ भी हमारी बदनामी होती है सो हम कों तो सर्कार के मुलाकात सों बड़ी उमेद भई की अब हमारी बहुत बेहतरी होगी सो वृथा कलंक होता है औ सेवाराम जोशी को चलते बखत हमने कहा था की हमारे तरफ सें सर्कार कों प्रार्थना करना की हमारे ऊपर प्रसन्नता रहे आप धर्म के संस्थापक हैं आप का प्रताप औ कीर्त्ति ईश्वर सर्वदा करैं यह प्रार्थना करते हैं हम तो केवल सर्कार के हैं आप सद्विद्या के रक्षक हैं और विशेष सेवारामजी के पत्र कों मुलाहेजा करने सों मालूम होगा अलमति विस्तरेण विज्ञप्रभुवर्य्येषु मिति श्रावणशुक्लद्वितीया गुरुवासरे संवत् १८९४।

एतत्पत्रेण दुर्गाशङ्करपाठकगुरोः शिवलालपाठकस्य सिद्धान्तम-

ऽन्नूषाख्या कृतिस्तच्छिष्यस्य बालकृष्णाख्यस्य च दुष्टमुखचपेटिका च । परन्त्वेतत्पुस्तकद्वयमस्मद्दृष्टिगोचरीभूतं न जातम् ।

रीवांनगरनरपतिना श्रीविश्वनाथवीरपुङ्गवेन सिंहासनरचनारीतिपठनार्थं श्रीदुर्गाशङ्करपाठकसविधे स्वीयो गणकः प्रेषितः । पाठकेन तद्रीतिं सम्यगध्याप्य पत्रे तदनुसारेण चित्ररूपं सिंहासनं च विरचय्य तेन सह तदीयो गणकः प्रेषितः । श्रीविश्वनाथमहाराजश्च तेनै सिंहासनचित्रेण प्रीतः पाठकाय मुद्रासहस्रदशकं ददाविति परम्परातः श्रूयते ।

अयं सङ्गीते चित्ररचनायामशेषवाद्यविधौ च कुशलः शास्त्रे विशेषप्रविष्टानेव छात्रानध्यापयति स्म । अयं महाभिमानी स्वर्गवासिमहाराजकाशिराजश्रीमदीश्वरीप्रसादसिंहवीरपुङ्गवगेहेऽसकृदाहूतोऽपि न गतः । यदि मद्गेहे महाराजो वारद्वयमागच्छेत्तर्हि तत्रैकवारमहं गमिष्यामीत्यभिमानेन काशिराजसभा न समाभूषिता ।

सिहोरनगरस्य–एजेण्टसाहिबसविधे पत्रप्रेषणसमयेऽस्य वयः पञ्चाशद्वर्षसमं कल्प्यते तदास्य जन्मशको नवखसप्तेन्दु १७०९ समः समायाति । सम्प्रति प्रायः सर्वे प्रसिद्धा अप्रसिद्धाश्च काश्यां वर्त्तमाना ज्योतिर्विदोऽस्यैव शिष्यप्रशिष्यपरम्परायां वर्त्तन्ते । कमलाकरमुनीश्वरयोः खण्डनप्रखण्डनपरा ग्रन्था अन्ये प्राचीनज्योतिषग्रन्थाश्च पाठकसविधे ह्यासन् तान् गृहीत्वा तद्भ्रातुष्पुत्रेण जटाशङ्करशर्म्मणा कोटानगरी गता तत्रैव स्वा वसतिश्च चक्रे । अधुना तद्वंशीयास्तत्रैव वाऽन्यत्र तेषां निकटे ते ग्रन्थाश्च सर्वे सन्ति वा नेति सर्वं न ज्ञायते ।

गोविन्दाचारी । १७१६

गोवर्द्धनाचारिपुत्रः सरयूपारीणब्राह्मणो भभयामिश्रः काश्यां दारानगरनिवासी ज्यौतिषे त्रिस्कन्धकुशलस्तन्त्रविद्यापण्डितश्चासीत् । अयं यद्यपि रामानुजत्वेन प्रसिद्धस्तथापि प्रच्छन्नरूपेण वाममार्गप्रवृत्तआसीत् । दक्षिणदेशादागतस्य कस्यचित्पण्डितस्य मुखात् “यदि कश्चिन्नारीगुह्याङ्गे प्रक्षिप्तजिह्वो मन्मन्त्रं जपेत्तर्हि मासेन सिद्धो भवेदि”ति निशम्यैतत्संमत्याऽस्य पुत्रो राजाशर्म्मा, काशीस्थस्य चूडामणिपण्डितस्य पुत्रो दुःखभञ्जनशर्म्मा परमसुखोपाध्यायदत्तकपुत्रस्य रामनारायणशर्म्मणः पुत्रो रघुनाथशर्म्मा–इति त्रयस्तत्कर्म्मणि मुद्रादशकद्वयप्रलोभनेन कामपि

Digitized by Google

नटीं सन्तोष्य प्रवृत्ता अभूवन् । पश्चादसिद्धो राजाशर्म्मा नट्यै मुद्रा न प्रादात् । नटी च मुद्रालाभार्थं सर्वत्र गोविन्दाचारिणं तत्सुतं च बहुधा निनिन्द । सर्वत्र निन्दयाऽऽकुलमना गोविन्दाचारी पञ्चसप्तसप्तेन्दु-१७७५ शके काशीं विहाय विन्ध्याचलदेवीं ययौ तत्रैव वसतिं कृत्वा सर्वत्र स्वविद्यया कीर्त्तिं च संस्थाप्य फलिते साधनसुबोधयोगिनी-दशादिविचारान् ग्रन्थान् विरचय्य नवाष्टसप्तेन्दु १७८९ शकाब्दे पञ्चत्वं गतः । निधनसमये ऽस्य वयस्त्रिसप्ततिवर्षसममासीदिति वृद्धेभ्यः श्रूयते तेन जन्मशको नृपसप्तेन्दुसमाब्द १७१६ आयाति । एतद्वंशजाश्चाद्यावधि विन्ध्याचले वसन्ति यन्निकटे गोविन्दाचारिसम्पादिता बहवो ज्योतिषग्रन्था वर्त्तन्ते । काश्यां मिर्ज़ापुरे विन्ध्याचले चास्य मारणमोहन-वशीकरणोच्चाटनादिषु तन्त्रशास्त्रे महती प्रथाऽऽसीत् ।

जयरामज्योतिषी । १७१७

महाराष्ट्रब्राह्मणो वाराणसीनिवासी बबुआज्योतिर्वित्पुत्रः स्वपितुरधीतविद्यो ज्योतिषे व्याकरणे न्याये काव्यसाहित्ययोश्च कुशलः स्वविद्यया चमत्कृतकल्पनया च प्रौढसभारञ्जन आसीत् । अस्य स्मृतिशक्तिः पट्टिकां विनाऽन्तःकरणे सर्वगणितकरणे वस्तुतः श्लाघनीया । अयं ज्योतिर्विद्गोशङ्करपाठकश्चोभौ समकालिकौ परस्परं प्रतिस्पर्द्धिनावास्ताम् । एतत्पुत्रो भाऊशास्त्री सम्प्रति वर्त्तमानकाशिराजाश्रितोऽस्ति कुलपरम्परागतां तद्वृत्तिं च भुङ्क्ते । एतत्प्रशंसां श्रुत्वा सिहोरनगरात् ब्लेयट विल्किन्सिन्साहिबेनावलोकनार्थं लज्जाशङ्कर-ज्योतिर्विद्द्वारा तदीयसभाविद्वज्जनरचितं पुस्तकं प्रेषितम् । (ज्योतिर्विल्लज्जाशङ्करवर्णनं विलोक्यम्) अस्य निधनसमयाब्दशकः सप्तसप्तसप्तेन्दुसमस्तदा तद्वयः षष्टिश्चेत्तदाऽस्य जन्मशकः सप्तेन्दुसप्तेन्दुसम १७१७ आयाति । यद्यप्यस्य काचित्कृतिः प्रसिद्धा न तथापि काश्यामस्य महती प्रशंसाऽद्यावधि वृद्धानां मुखेभ्यः श्रूयते ।

सेवारामशर्म्मा । १७१७

सनाढ्यब्राह्मणो बांसबरेलीमण्डलान्तर्गतसर्कराग्रामनिवासी सम्प्रति प्रसिद्धबापूदेवशास्त्रिगुरुः सप्तेन्दुसप्तेन्दुमिते १७१७ शके शुद्धभाद्रपदशुक्लाष्टम्यां सोमे ह्युदभवत् । पतिनिधनशोकविधुराऽस्य माता द्वादशवर्षवयस्कममुं मूलस्थानं त्यक्त्वा काशीमानयत् । तत्रायं

श्रीबालकृष्णाज्ज्योतिर्विदो ज्यौतिषसिद्धान्तग्रन्थान् परमसुखोपाध्यायात् फलितग्रन्थान् चाटेकरोपनामकबापूशास्त्रिणश्च करणग्रन्थान् सम्यगध्यैष्ट। सिहोरनगरस्थ-एजेण्ट लान्सिलिट् विल्किन्सन (Mr. L. Wilkinson, * who published Siddhánta Śiromaṇi in the year 1841 A. D. at Calcutta). साहिबेन काशिकराजकीयप्रधानपाठशालाध्यक्षसविधे "सिद्धान्तकुशलमेकं गणकं प्रेषये"ति पत्रं लिखितम्। तेन पाठशालाध्यक्षमहाशयेन च ज्यौतिषसिद्धान्तकुशलो नवीनकल्पनावैभवशाली सेवाराम एव प्रेषितः। तत्रायं स्वविद्यया वशीकृतसकलजनस्तोषितप्रभुः सिहोरसंस्कृतपाठशालायां ज्यौतिषप्रधानपदमुपादाय चिरं बापूदेवशास्त्रिमुखान् बहून् छात्रान् समध्यापयत्। इन्दोरनगरस्थ-एजेण्ट हमिलटनसंज्ञकेन च सिहोरनगरस्थ-एजेण्टसाहिबं संप्रार्थ्य तत्र नीत्वाऽयमिन्दोरनगरसंस्कृतपाठशालायां ज्यौतिषाध्यापनार्थं नियुक्तः। वर्षद्वयानन्तरं बडवानीनगरस्थराणाशिक्षार्थं तत्र प्रेषितस्ततोऽपि वर्षद्वयानन्तरं पुनरिन्दोरनगर्यामाहूतश्च। तत्र वर्षद्वयमुषित्वा स्वमित्रसिहोर-एजेण्टसाहिबाज्ञया स सिहोरनगरं समागतवान्। ततो वर्षद्वयानन्तरं विल्किन्सनसाहिबनिधनशोकातुरो निजां जरावस्थां च समीक्ष्य स्वपदं त्यक्त्वा काशीमुपागमत् जम्बूदेशाधिपतिना श्रीरणवीरसिंहवीरपुङ्गवेनासकृदाहूतोऽपि तत्र न गतवान् अयोध्याधिपतिमानसिंहेनाप्याहूतस्तत्र न गतः। बलरामपुराधिपतिदिग्विजयसिंहविनयेन किञ्चित्कालं तद्राजधानीं विभूष्य तं पाठयामास च। तदीयो ज्येष्ठपुत्रः श्रीकृष्णदत्ताभिधश्च इन्दोर-आगरा-झांसी-हमीरपुर-लखनौ प्रधानपाठशालासु छात्रानध्याप्य ग्रामपाठशालानिरीक्षणार्थं डिप्युटीइन्सपेक्टरपदं समवाप्य चिरं सम्यक् स्वकार्यं सम्पाद्यार्धवेतनेन स्वपदं विहाय किञ्चित् काल पर्यन्तं काशीं च विभूष्य नागखाष्टेन्दु १८०८ शके पञ्चत्वं गतः। सेवारामशर्म्मा च चिरं वाराणसीं निषेव्य विश्वेश्वरं सम्पूज्य युग्मनन्दसप्तेन्दु१७९२ शके ज्येष्ठे मासि सर्वत्र स्वामतुलां कीर्त्तिं संस्थाप्य संसारं चासारं समवगम्य स्वर्गसुखं च तुच्छीकृत्याविमुक्ते शरीरं मुक्त्वा मुक्तिपदं ययौ। संप्रति तत्कनिष्ठः पुत्रः श्रीसिद्धेश्वरशर्म्मा समधीतज्यौतिषविद्यः स्वगृहे बहून् छात्रानध्यापयन् राजति तस्मादेवेदं तत्पितृवर्णनं मया लब्धं प्रामाणिकजनेभ्यस्तत्सत्यत्वं चावगत्यात्र निबद्धम्।

* He was Political Agent at Sehore.

लज्जाशङ्करशर्म्मा । १७२६

अयं गुर्जरजातीयो मोरब्राह्मणो लक्ष्मीपतेर्दुर्गाशङ्करपाठकाच्चाधीतज्योतिषविद्यः कृष्णदेवनिधनानन्तरं काशिकराजकीयसंस्कृतपाठशालायां तत्पदे नियुक्तः । अर्थाद्यदा कृष्णदेवो गणितप्रधानाध्यापक आसीत्तदाऽयं तदधो लघुमासिकेन तत्साहाय्यार्थं तत्रैव लघ्वध्यापकस्तन्निधनानन्तरं च तस्यैव पदे तत्रत्याध्यक्षैर्नियुक्त इति । अस्य निधनं रूपाष्टसप्तेन्दु १७८१ शके तच्छिष्येभ्यो मद्गुरुभ्यो देवकृष्णशर्म्मभ्यः श्रूयते तत्समये तदीयावस्था च पञ्चपञ्चाशद्वर्षसमा श्रुता ततोऽस्य जन्मशको रसयमसप्तेन्दुसमः १७२६ सिध्यति । अस्यानेके छात्राः सिद्धान्तविद्याकुशला बहुभी राजभिर्लब्धादरा अभूवन् ।

अयं चारुवपुष्मान् प्रियभाषी शान्तो दयालुः सत्यशीलः परिश्रमेण बह्वादरधिया सम्यक् छात्रानध्यापयति स्म तेनैवास्यान्तेवासिनो दिगन्तजातकीर्त्तयोऽधीतबहुज्योतिषविषया जगति प्रसिद्धा बभूवुः । दुर्गाशङ्करपाठकस्य समाग*मानन्तरमेतत्सविधे विल्किन्सन्साहिबेन नीलकण्ठकृतविरोधप्रकाशकस्य खण्ड†नरूपोऽविरोधप्रकाशकविवेकाख्यो ग्रन्थो दुर्गाशङ्करपाठकावलोकनार्थं पत्रद्वारा प्रेषितः । एनेन तदुत्तरपत्रं यल्लिखितं तद्देजर्टविल्किन्सन्द्वारा तदीयगणकेन सेवारामशर्म्मणा लब्धमधुना तत्पुत्रात् श्रीसिद्धेश्वरशर्म्मणो लब्धस्य तस्यैव लज्जाशङ्करलिखितपत्रस्य पाठकानां विनोदाय लेखः प्रदर्श्यते ।

स्वस्ति श्रीमत्परमसन्मतिविस्तारविस्तारितपराक्रमाक्रामितबलवद्वरिधरानायकमौलिमुकुटमणिस्फुरत्कान्तिचुंबितचरणसरोरुहसकलपण्डितमण्डलीसमाश्रयविश्रान्तिकल्पपादनिरुपमधीकरुणावरुणालयत्तपाकरत्नपाकरवदनारविन्दसप्तजलधिपारीणशरच्चन्द्रचन्द्रिकावदातकीर्त्तिश्रीधृलान्सिन्सर्टविल्किन्सन्साहिबबहादुरप्रभुवर्येषु कम्पिनीबहादुरनिर्मितकाशी-

---

* दुर्गाशङ्करपाठकवर्णनं विलोक्यम् ।

† अयं खण्डनरूपो ग्रन्थः एजेण्टसाहिबानुज्ञया नवपञ्चसप्तेन्दु १७५९ शके सुब्बाजीरामचन्द्रेण कृतः । तत्रान्तिमश्लोकश्च ।

"नन्दभूतगिरिचन्द्र १७५९ संमिते शालिवाहनशकेऽयने शुभे ।
राधमासि सितसप्तमीभगे सन्मुदे लिखितमस्तु पुस्तकम् ॥
इति विल्किन्सन्साहिबसभायां विचारः" ।

पाठशालास्थलब्धाशङ्करज्योतिर्वित्प्रणीतानेकाशिवः समुल्लसन्तुतरां शमत्र तत्रत्यमनुदिनमेधमानमाशास्महे वृत्तं तु भाषया आगे सरकार से किताब २ आई उस मो अविरोधप्रकाश एक द्वितीय अविरोधप्राकशविवेक इय दोनो अवलोकन किया उस में मुख्या श्री रामचन्द्र पण्डितकृत अविरोधप्रकाशविवेक हमको बहुत अच्छा मालूम होता है और नीलकण्ठ की कृति पर जो हजूर से लिखा आया सो हमने देखा तो नीलकण्ठने केवल पुराणाग्रहमात्र किया है हम तो सिद्धान्तमतानुयायी हैं आगे हम ने श्री ५ दुर्गाशङ्कर पाठक जी को हमारी चिठि और नीलकण्ठ की कृति पर हजूर सो लिखा आया इय दूनो देखाया तब उनो ने कहा के इस मो हमही कों नीलकण्ठ अपनी इच्छा सो बनाय को उत्तर पूछते हैं सो बड़ा आश्चर्य है नीलकण्ठ का खण्डन हमारे शिष्य बालकृष्ण वेदवृत्त का बनाया दुष्टमुखचपेटिका सेवाराम जोशीको देखाया ही रहा उस मो इय खण्डन तो गतार्थ ही है आगे हम ने भी देखा तो हजूर से लिखा आया सो भी उस मो लिखाहि है आगे श्रीदुर्गाशङ्कर पाठक जी के गुरु श्री६शिवलाल पाठक जी ने सिद्धान्तरत्नमञ्जूषा किये हैं उस मो निरूपण है उस्सो विरुद्ध श्रीदुर्गाशङ्करपाठक जी का मत कदापि नहिं होने सकेगा आगे दुसरी चिठि सिहूर से भेजी उस मोह के दसकत मे जो पुने की चिठि की नकल आर उस मो भी बाबा जोशी रोहे करने श्रीदुर्गाशङ्कर पाठक जी को नीलकण्ठ समुज को कटुवचन लिखा सो बड़ा खेद भया नीलकण्ठ का ग्रन्थ तो बहूत प्राचीन है काशी मो बहूत लोग के पास है प्रसिद्ध है और लोगों की अरुचि है और पाठक जी सिद्धान्तानुयायी उन को वृथा कलङ्क होना अयोग्य है ऐसी बाते सुन को उनका मन उदासीन है और श्रीजयराम जोशी के लिफाफा मो किताप भेजी थी सो हमने दीया और नीलकण्ठ की कृति पर जो हजूर से पोथी आयी थी सो भी लिखवाय को दीया है और उनके पास के येक वेर जवाप मांगा परन्तु अभी तक कुछ जवाप नही दिया जब उन्न जवाप लिखेंगे तब हम पिछे से भेज देंगे अलमतिविस्तरेण विज्ञवर्येषु संवत् १८९४ श्रावणकृष्ण अमावास्या।

काशिकराजकीयपाठशालाकार्यसम्पादकाः सभ्या नखधृति १८२० खीष्टशके मार्चमासस्य ३दिने पाठशालास्थितिप्रदर्शकं पत्रं कालिका-

तायां प्रधानराजकार्याधिपतिसविधे यत्प्रेषितवन्तस्तत्रा ऽस्य ज्योतिषच्छात्राणां मध्ये प्रशंसा कृता ऽस्ति इत्यद्विधृति १८२१ ख्रीष्टशके जानुअरीमासस्य १ दिने ज्योतिषसिद्धान्तोत्तमपरीक्षादानेन स्वर्णमुद्राद्वयमयं लब्धवान् । पाठशालाकार्यसम्पादकसभ्यैर्यदा बह्वयमधृति १८२६ ख्रीष्टशके सेप्टेम्बरमासे द्वितीयगणिताध्यापकपदमनुपयुक्तमवलोक्य न्यूनीकृतं तदा प्रधानगणितशास्त्राध्यापकपण्डितकृष्णदेवसाहाय्यार्थं लघुवेतनेना ऽयं नियुक्तः । (कृष्णदेववर्णनं विलोक्यम्) (See Sketch of the Rise and progress of the Benares Páṭha Sálá p. 96, 160, 219, 271.)

नन्दलालशर्म्मा वा नन्दरामशर्म्मा * । १०२६

सरयूपारीणो ब्राह्मणः प्रयागमण्डलान्तर्गतकडेमानिकपुरग्रामवासी काशिकराजकीयसंस्कृतपाठशालायां लज्जाशङ्करज्योतिर्वित्साहाय्यार्थे कृष्णदेवनिधनानन्तरं सप्तपञ्चसप्तेन्दु १७५७ शके ज्योतिषाध्यापनार्थं द्वितीयाध्यापकः कृष्णदेवाल्लज्जाशङ्कराच्चाधीतविद्यश्चासीत् । यद्यप्ययं पाठशालायां गणितशास्त्राध्यापकत्वेन नियुक्तस्तथाप्यस्य फलिते महती रुचिस्तद्वशेन सर्वत्र प्रसिद्धिश्चाभवत् । अयं बहूनि वर्षाणि स्वपदं सम्यग् विभूष्य बहून् सुयोग्यान् छात्रांश्चाध्याप्य फलितविद्यया बहूनि धनानि चार्ज्जयित्वा नन्दाष्टसप्तेन्दुशके १७८९ पञ्चत्वं गतः ।

सम्प्रति तदर्जितधनकलान्तरादिना तत्पुत्रो ऽम्बिकाप्रसादशर्म्मा पञ्चचत्वारिंशद्वर्षसवयस्कः सुखेन साधुवृत्त्या समयं जापयन् राजति । नन्दरामशर्म्मणो निधनसमये तदीयावस्था त्रिषष्टिवर्षसत्त्वा ऽऽसीदिति मया स्वतातात्तत्पुत्राच्च श्रुतं सम्प्रति अनुमीयते च तच्छरीरस्य स्वल्पे वयसि निरीक्षणत्वात् । एवं तज्जन्मशको रसकरसप्तेन्दुसमासन्न १७२१ आयाति । अस्यैव नन्दरामशर्म्मणः शिष्यो मत्तातः कृपालुदत्तशर्म्मा ऽऽसीत् ॥

देवकृष्णशर्म्मा । १०४०

गौडब्राह्मणो रामधनमिश्रतनयः काशिकराजकीयपाठशालायां गणितशास्त्रप्रधानाध्यापकाल्लज्जाशङ्करविदुषो ऽधीतसर्वज्यौतिषविद्यो

* एतदासन्नसमय एव काश्यामतीव प्रसिद्धो ज्योतिषसिद्धान्तवेत्ता मयूरभट्ट आसीत् यश्च चित्रकूटनिवसतः श्रीमन्तमहाशयस्य प्रधानज्योतिर्वित् सर्वेषां ज्योतिषच्छात्राणां परीक्षक आसीत् । तथा फलितवेत्ता लक्ष्मणनामा ज्योतिर्विदस्य "तत्कालमिन्दुसहितो द्विरसांशको य" इति बृहज्जातकश्लोकानुसारतो भाविजन्मकालप्रकथने महती प्रसिद्धिरासीत् ।

मन्नुरुः स्वल्प एव वयसि द्वाविंशतिवर्षासन्ने यथावज्ज्यौतिषमधीत्य स्वसदन एव बहूनि वर्षाणि बहून् मिथिलादिनानादेशागतान् सुयोग्यान् छात्रानध्यापयत् । रूपाष्टसप्तेन्दु १८८१ शके काश्मीराधिपतिना जम्बूनगरनिवासिना श्रीमहाराजरणवीरसिंहवीरपुङ्गवेन "नूतनं ज्योतिषशास्त्राध्यापनार्हमेकं सुयोग्यं गणकं प्रेषये"ति पत्रं वाराणस्यां पाठशालाप्रधानाध्यक्षडाक्टरबालण्टैनसाहिबसविधे प्रेषितम् । तेन महाशयेनायमेव प्रेषितस्तत्र नववर्षाणि सम्यक् कार्य्यं सम्पाद्यासक्तज्ज्यौतिषशास्त्रचमत्कारप्रदर्शनेन महाराजतो लब्धबहुपारितोषिकोऽपि काशीविरहविधुरोऽत्रत्यच्छात्रवर्गप्रार्थनया नन्दरामशर्म्मनिधनानन्तरं वसुरसधृति १८६८ खीष्टशके काशिकराजकीयपाठशालायां तत्पदं पाठशालाध्यक्षग्रिफिथसाहिबमहाशयानुकम्पया लब्धवान् । सम्प्रति बहुवर्षाणि यथावत् स्वपदकार्यं सम्पाद्य परःशतान् योग्यान् छात्रांश्चाध्याप्य जराशिथिलं शरीरमवगम्य रूपरूपाष्टरूप १८११ मिते शालिवाहनशके किल तृतीयांशवेतनेन स्वपदं विहाय वाराणस्यां स्वसदन एव शोभते जगद्गुरुर्देवकृष्णशर्म्मोऽयं प्राचीनपरम्परागतानां गणितफलितग्रन्थतत्त्वार्थानामेकवेत्ता विवादे सिद्धान्तकर्त्ता चतुःसप्ततिवर्षवयस्कः सवेदसप्तेन्दु-१७४० शके ऽर्थात् वसुरूपवसुवसुमती १८१८ खीष्टशके नोवेम्बरमासस्य ९ दिने लब्धजन्मा च ।

नृसिंहदेवशास्त्री वा बापूदेवशास्त्री । १७४३

ऋग्वेदीयः सीतारामदेवतनूजः पूनानगरनिवासी महाराष्ट्रभेदे चितपावनजातीयो रूपकरेभेन्दु १८२१ खीष्टशके नोवेम्बरमासस्य १ दिने समुदभवत् । बालावस्थायां नागपुरपाठशालायां महाराष्ट्रभाषीयं यूरपदेशीयं व्यक्तगणितं बीजगणितं च सम्यगपठत् । तत्र कान्यकुब्जदुण्ढिराजमिश्राद् भास्करीयं व्यक्तमव्यक्तं चाध्यैष्ट ।

कार्यान्तरवशात् तत्र खरससप्तेन्दु १७६० शालिवाहनशके गत एजेण्टलान्सलिट् विल्किन्सन् (Mr. L. Wilkinson) साहिबमहाशयोऽमुं गणिते निपुणं निरीक्ष्य सिहोरनगरस्थसंस्कृतपाठशालायां ज्योतिर्वित्सेवाराममसविधे पठनार्थं प्रेषितवान् । तत्रायं पादोनवर्षद्वयं रेखागणितादिकमधीत्य सम्यक् परीक्षां च दत्त्वा एजेण्टविल्किन्सन्साहिबानुकम्पया

Digitized by Google

युग्मवेदधृति १८४२ खीष्टशके फेब्रुअरीमासस्य १५ दिने यूरपदेशीयरेखा*गणितस्य संस्कृतभाषायामध्यापनार्थं काशिकराजकीयप्रधानसंस्कृतपाठशालायां नियुक्तः । एतदागमनात्पूर्वं रेखागणिताध्यापनार्थं कलिकातातः कश्चिदङ्गदेशीय आहूत आसीत् परन्तु एजेण्टसाहिबानुग्रहेणायमेव तत्र नियुक्तोऽभूत् । अयं किल स्वकार्यं सम्यक् सम्पाद्य लञ्जाशङ्करनिधनानन्तरं प्रधानगणितशास्त्राध्यापकपदं समवाप्य संस्कृतभाषायां रेखागणितस्य प्रथमाध्यायम् । त्रिभुजगणितपर्य्यन्तं त्रिकोणमितितन्त्रम् । सायनवादम् । प्राचीनज्यातिषाचार्याशयवर्णनम् । अष्टादशविचित्रप्रश्नानां सङ्ग्रहं सोत्तरम् । तत्त्वविवेकपरीक्षाम् । काश्यां मानमन्दिरस्थयन्त्रवर्णनम् । दशमलवादिबोधकं व्यक्तगणितम् । इत्येतानि पुस्तकानि विरचय्य संमुद्र्य च, चलनकलनस्याद्याध्यायसिद्धान्तबोधकान् विंशतिश्लोकान् । चापीयत्रिकोणगणितस्य द्वित्रिसत्तावयवबोधकानि कतिपयसूत्राणि । सिद्धान्तग्रन्थोपयोगिक्रोडपत्राणि । यन्त्रराजोपयोगि छेद्यकं । लघुशङ्कुच्छिन्नक्षेत्रगुणा चेत्येतानि चामुद्राणि विहाय हिन्दीभाषायां ग्रामपाठशालास्थबालानामुपकारार्थं व्यक्तगणितम् । बीजगणितम् । फलितविचारम् । सायनवादानुवादम् । पञ्चाङ्गोपपादनं च विरचय्य संमुद्र्य च । अङ्गलभाषायां सूर्यसिद्धान्तानुवादं भास्करीयसिद्धान्तशिरोमणिगोलाध्यायानुवादं मानमन्दिरस्थयन्त्रवर्णनं च कृत्वा संमुद्र्य च । भास्करीयलीलावतीं सिद्धान्तशिरोमणिगणितगोलाध्यायौ च संशोध्य टिप्पणीभिर्विभूष्य संमुद्र्य च । १९३२–१९४७ विक्रमाब्दानां यूरपदेशीयनाटिकलआलमनाक (Nautical Almanack) पञ्चाङ्गानुसारेण काश्यां संस्कृतभाषायां पञ्चाङ्गानि च विरचय्य संमुद्र्य च । पाठशालाध्यक्षानुकम्पया १८६४ खीष्टशके ग्रेटब्रिटेन् आरलेण्डस्यरायल एशियाटिक (Royal Asiatic Society of Great Britain and Ireland) समाजस्यादरणीयसभ्यपदं तथा १८६८ खीष्टशके वङ्गदेशीय–एशियाटिक समाजस्या (Asiatic Society of Bengal) दरणीयसभ्यपदं १८६९ खीष्टशके कलिकाताविश्वविद्यालय-(Calcutta University. स्य सहवासि (Fellow) पदं वसुसप्ताष्टेन्दु १८७८ खीष्टशके सी· आइ· ई· (C. I. E) Companion of the Order of the Indian Empire-

* अयं च रेखागणिते नीलाम्बरशर्म्मदेवकृष्णशर्म्मादीनां च गुरुरासीत् ।

नामकपदवीम् । जुबिलीमहोत्सवे महामहोपाध्यायपदवीम् । कलकत्ता-दयुनिवर्सिटीसभ्यपदं च समवाप्य जराजर्जरितं शरीरं शिथिलमवज्ञाय नवाष्टाष्टेन्दु १८८९ ख्रीष्टशके अप्रिल्मासस्य १ दिने अर्द्धवेतनेन काशिक-राजकीयप्रधानसंस्कृतपाठशालीयप्रधानगणितशास्त्राध्यापकपदं सन्त्यज्या-ऽऽत्मानं पूर्णकामं संसारं चासारं समवगम्य युग्मेन्दुवसुरूप १८१२ मिते शालिवाहनशके वैशाखे मासि स्वशरीरं विहाय दिवं ययौ । अयं च स्वसमये सर्वत्र लब्धप्रतिष्ठो गणितप्रवीणो जगतां * गुरुरासीत् ।

अयं यूरपदेशीयप्रकारान् संगृह्य बहुत्र लीलावतीगोलगणिता-ध्यायटिप्पणीषु स्वकल्पितसङ्केतेन अर्घं वासनायां गुरुकर्म्म मन्दानन्द-करं कृतवान् कुत्रचित् महाप्रश्नटिप्पण्यादौ स्वोक्तलग्नानयनादिप्रका-रेषु प्रमादतो गणितकर्म्मानयनाशुद्धिं च चकार ।

अस्य माता सत्यभामानाम्नी सन्तानविरहविधुरा नृसिंहदेव-माराध्य बहुनायासेनामुं प्राप्तवान् अतोऽस्य नामकरणं नृसिंहदेव इति कृतवती पश्चाल्लालनेन बापू इति प्रसिद्धिर्जाता । इति तल्लिखित†-लीलावतीटीकामनोरञ्जनीसमाप्तौ तद्रचितश्लोकद्वयेन ।

“खरसाद्रिकु१७६०मितशाके विलम्बकेऽब्दे च कार्त्तिके मासे ।
कृष्णे पत्रेऽष्टम्यां भार्गववारेऽपराह्नसमये च ॥
बापू इति प्रसिद्धः परमभिधानं च यस्य नृहरिः स्यात् ।
लिखितं तेन शुभमिदं लीलावत्या उदाहरणम् ॥

इत्यनेन बुध्यते । कुत्रचिदयं छन्दोभङ्गभिया बापू इति ह्रस्वपुकारेण स्वनाम विलिलेख यथा तन्मुद्रितसिद्धान्तशिरोमणिभूमिकासमाप्तौ “मि-लितकरयुगोऽहं बापुदेवाभिधानः” इत्यत्र ह्रस्वपुकारेण स्वनाम लिखितं तेन।

वस्तुतो भारतवर्षेऽयमतीव भाग्यशाली पण्डितो यूरपदेशीयगणि-तबलेन प्रख्यातोऽभूत् । यूरपदेशीयगणनानुसारेणास्य चन्द्रग्रहणपरिलेखं निरीक्ष्य जातहर्षो जम्बूद्वेशाधिपती रणवीरसिंहवीरपुङ्गवोऽस्मै सहस्रमुद्राः

---

* पश्चादयं प्रथमं Natural Philosophy अध्यापनार्थं नियुक्तः परन्तु संस्कृत-भाषायां तद्विषयकपुस्तकानामभावाद्रेखागणिताध्यापनार्थमेव प्रवृत्तः ।

† इदं पुस्तकं काश्यां पण्डितसेवारामसूनुश्रीसिद्धेश्वरज्योतिर्विद्गृहे वर्त्तते । बापूदेवशास्त्रिणा च स्वगुरोः सेवारामस्य कनिष्टपुत्रश्रीसिद्धेश्वरशर्म्मकृते तत्पुस्तकं लिखितमिति श्रीसिद्धेश्वरज्योतिर्विन्मुखाच्छ्रूयते ।

क्यषेव भवतीत्यस्योपपादनम् । 'आकृतिगणश्चायमिति' । कुत इत्यत आह । 'तथा चेति' । क्व पुनः सामान्यग्रहणार्थः ककारः । 'क्यच्व्योश्चेति' । आपत्यस्येति वर्त्तते, न चायमापत्यादिष्यते, इह तर्हि 'क्यस्य विभाषा' हल इति वर्त्तते, न चायं हलन्तादिष्यते, इह तर्हि 'क्याच्छन्दसि' एतक्या-च्छन्दसीति वक्तव्यं भुरण्युस्तुरण्युरिति कण्ड्वादियगन्तादपि यथा स्या-दिति, 'वा क्यष' इत्येतद्वा यादिन्येवास्तु, न चैवं 'पाशादिभ्यो यः' पाश्या, अत्र प्रसङ्गः, सामान्यविहितानान्तिङां नियमार्थं प्रकरणं, न च पाशादियात्परस्मैपदमात्मनेपदं वा प्राप्तमस्ति, अथाप्याचारक्विबन्तात्स-म्भवेद्, एवमपि वा यष इत्येवास्तु तत्राह । 'नः क्यइति' । ककारम-नुबन्धमासञ्जतः सूत्रकारस्याप्याकृतिगणत्वमभिप्रेतमित्याह । 'नहीति'। भाष्ये त्वादिग्रहणप्रत्याख्यानपरमेव वार्त्तिकं व्याख्यातं, ककारोऽपि प्रत्या-ख्यातः, कथं पुनः पटपटायतीति क्यष्योगे डाज् भवति, यावता कृभ्व-स्तियोगे स विधीयते, तत्राह । 'कृभ्वस्तिभिरिवेत्यादि' । भवत्यर्थे क्यष् विधीयते स भवतिप्रयोगे न भवति तेनैवोक्तत्वात्तस्यार्थस्यातो भवतेरप्रयोगएव क्यषा भवितव्यं, यदि च क्यषो योगे डाज् न स्याड्डा-जन्तात्क्यष्विधानमनुपपन्नं स्यादिति भावः । अथ किमर्थं 'वा क्यष' इति सूत्रमारभ्यते, न क्यष् चेति चकारोऽत्र कर्त्तव्यः, लोहितादिभ्यः क्यष् भवति चकारात्क्यङ् च, तत्र क्यङ्पक्षआत्मनेपदं क्यष्पक्षे परस्मैपद-मिति सिद्धमिष्टम्, अहो सूक्ष्मदर्शी देवानांप्रियः यदिदमपि न दृष्टं 'क्यङ्मानिनोश्चे'ति, इह तर्हि प्रातिपदिकग्रहणे लिङ्गविशिष्ट-स्यापि ग्रहणमिति लोहिनीशब्दादप्ययं क्यष् भवति, सति चैवं क्यङ-न्तादात्मनेपदं क्यषन्तात्परस्मैपदमिति विज्ञायमाने आत्मनेपदपक्षे 'क्यङ्मानिनोश्चे' ति पुंवद्भावे सति अलोहिनी लोहिनीभवति लोहि-तायतइति प्राप्नोति, अत्र पुनः क्यषन्तादात्मनेपदे विकल्पिते लोहि-नीयते लोहिनीयतीतीष्टं सिद्ध्यतीति स्पष्ठ एव फलभेदः ॥

"कष्टाय क्रमणे" ॥ 'चतुर्थीसमर्थादिति' । सङ्गतार्थः समर्थः, चतुर्थ्या समर्थइति तृतीयासमासः, प्रत्ययार्थेन क्रमणेन सह सङ्गतार्थत्वं

Digitized by Google

यस्य चतुर्थीकृतं तस्मादित्यर्थः, एतच्च कष्टायेति निर्देशादेव लभ्यते, क्रमणशब्दस्य पादविहरणे प्रसिद्धत्वात्तत्रैव प्रत्ययो मा विज्ञायीत्याह । 'क्रमणे ऽर्थेऽनार्जवइति' । अनार्जवं कौटिल्यम् इह त्वनार्जवशब्दोनाकरणरूपे क्रमणे पर्यवस्यत्यर्थात्, किं पुनः क्रमणमुत्साहः, यथा व्याकरणाध्ययनाय क्रमते उत्सहतइत्यर्थ इति व्याख्यातम् । 'कष्टाय क्रमणे क्रमतइति' । 'कृच्छ्रगहनयोः कष' इति कृच्छ्र इह भावः, कृच्छ्रं दुःखम्, इह तु तत्कारणं पापं कर्म, कृच्छ्रं पापं कर्म कर्त्तुमुत्सहतइत्यर्थः । वृत्तिसर्गेत्यात्मनेपदं, प्रायेण तु परस्मैपदं पठ्यते, तत्र पापं कर्म कर्त्तुकामः कुटिलमाचरतीत्यर्थः, अनुत्साहत्वात्परस्मैपदम्, 'अत्यल्पमिदमुच्यतइति' । सर्वलक्ष्यासंग्रहात्, कथं तर्हि वक्तव्यमित्याह । 'सत्रकक्षेत्यादि' । अस्मिन्पक्षे द्वितीयान्तेभ्यः प्रत्ययः चिकीर्षां प्रति कर्मत्वात् । 'कणवच्चिकीर्षायामिति' । प्रकृतिप्रत्ययसमुदायस्यायमर्थनिर्देशः, कणवं पापं, सत्रादयो हि वृत्तिविषये पापपर्यायास्तेभ्यश्चिकीर्षायां प्रत्ययः, पापं चिकीर्षतीत्यस्वपदेन विग्रहः । 'अजः कष्टं क्रामतीति' । क्रमिरत्र पादविहरणे वर्त्तते, कष्टं गहनदेशं क्रामति गच्छतीत्यर्थः ॥

"कर्मणो रोमन्थतपोभ्यां वर्तिचरोः" ॥ कर्मण इति पञ्चमी रोमन्थतपोभ्यामित्यनेन सामानाधिकरण्यात्, प्रत्येकसम्बन्धात्त्वेकवचनम् । 'वर्त्तीतीति' । णयन्ताद्वृते 'णयासश्रन्थो युज' ति युचि प्राप्ते ऽस्मादेव निपातनात् क्तिन्, युजपि भवति वर्त्तना, चरणं चर्, संपादित्वाद्भावे क्विप् । 'हनुचलनइति' । हनुचलनसहचरितं चर्वितस्य मुखप्रदेशे आकृष्य चर्वणं तत्रेत्यर्थः । 'कीटो रोमन्थं वर्त्तयतीति' अवगीर्णमपादानप्रदेशाच्चितं रोमन्थाख्यं द्रव्यं वर्त्तयति वृत्तं करोति गुलिकां करोतीत्यर्थः, नात्र हनुचलनमस्ति । 'तपसः परस्मैपदं चेति' । एवं च नमोऽवरिवआदिसूत्रे तपःशब्दः पठितव्यस्तथा तु न कृतमित्येव । इह तपस्यते लोकं जिगीषुरनेरिति छान्दसत्वादात्मनेपदम् ॥

"सुखादिभ्यः कर्तृवेदनायाम्" ॥ 'वेदनायामिति' । विद चेतनाख्याननिवासेष्वित्यस्माच्चुरादिणयन्ताद्भावे 'णयासश्रन्थो युच्,' घट्टिव-

न्द्विविदिभ्यश्चेत्योपसंख्यानिको वा । 'वेदनायामर्थेनुभवइति' । प्रत्यक्षज्ञानमनुभवः, यद्यपि वेदनाशब्दो ज्ञानमात्रवचनस्तथापि कर्तृग्रहणेन सुखादीनि विशेष्यन्ते, कर्तृगतानां च सुखादीनां वेदना ऽनुभवरूपैवेति मत्वैवमुक्तं, क्रियापेक्षं कर्तृत्वं वेदनासंनिधानात्तदपेक्षमेव विज्ञायते, कर्त्रा च सुखादीनि विशेष्यन्ते न वेदना, व्यभिचाराभावात्, सर्वत्र हि वेदना वेदयितुरेव भवति तदेतदाह । 'वेदयितुश्चेत्कर्तुः सुखादीनि भवन्तीति' । आश्रयाश्रयिभावलक्षणश्च सम्बन्धो न जन्यजनकभावलक्षणः, एवं च कर्तृग्रहणं लुप्तषष्ठीकं पृथक्पदम् । 'वेदयतइति' । आ कुस्मादादात्मनेपदीत्यधिकारे वेदिः पठितः, एवं च प्रत्युदाहरणे परस्मैपदपाठः प्रमादजः, प्रसाधको ऽभ्यङ्गादेः कर्ता संप्रसाध्यमानस्य नेत्रविकारादिना सुखमनुमानतो जानाति ॥

"नमोवरिवश्चित्रङः क्यच्" ॥ 'करणविशेषे पूजादाविति' । करणइति सामान्यानुवृत्तावप्यभिधानशक्तिस्वाभाव्याद्विशेषउपलभ्यतइति भावः । 'नमस्यति देवानिति' । नमःस्वस्तिस्वाहेति चतुर्थी न भवति, प्रत्ययार्थे गुणीभूतस्य नमःशब्दस्य निष्क्रम्य सम्बन्धाभावात्, अथ वा नमस्यति नमस्कारेण पूजयतीत्यर्थस्तत्रोपपदविभक्तेः कारकविभक्तिर्बलीयसीति द्वितीयैव भवति । एवं च नमस्करोति देवानित्यादावपि द्वितीयैव भवति । 'परिचर्यायामिति' । परिचर्या शुश्रूषा । 'चित्रीयतइति' । अवयवकृतं लिङ्गं समुदायस्य विशेषकं भवतीति क्यजन्तादात्मनेपदं भवति, 'क्यचि चे' तीत्वम्, एतदर्थमेव च शब्दवैरादिसूत्रे चित्रशब्दो न पठितः । 'चित्रीयतइति' । विस्मयतइत्यर्थ इत्येके, विस्मापयतइत्यर्थ इत्यन्ये, तथा च भट्टिकाव्ये मायामृगं प्रकृत्य भवति ततश्चित्रीयमाणे।सावित्ति ॥

"पुच्छभाण्डचीवराण्णिङ्" ॥ 'पुच्छादुदसने पर्यसने वेति' । उदसनमुत्क्षेपणं, पर्यसनं परितः क्षेपणम् । 'उत्पुच्छयतइति' । ननु यथा ऽऽचारे क्यङि विहिते आङः प्रयोगो न भवति, तत्कस्य हेतोः, आङ्विशिष्टस्यैव चरत्यर्थस्य क्यङाभिधानात्, तद्वदिहाप्युत्क्षेपणे णिङो विधा-

Digitized by Google

नादुदः प्रयोगो न प्राप्नोतीति, अस्त्यत्र विशेषः, पर्यसनेऽप्ययं विधीयते, तत्रोदसनन्द्योतयितुमुच्छब्दः पर्यसनं द्योतयितुं परिशब्दश्च प्रयोक्तव्यः, समाचयनं राशीकरणम्, अर्जनं द्रव्यलाभोपायो याञ्चादि, । 'इकार आत्मनेपदार्थ इति'। तेनोत्तरसूत्रे पुच्छादयो न शक्याः पठितुमिति भावः ॥

"मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्" ॥ किमर्थमिदं, न प्रातिपदिकाद्धात्वर्थइत्येव सिद्धं, न च तत्करोतीत्यादिना तत्र धात्वर्थनियमः क्रियते राजानमतिक्रान्तवानत्यरराजदित्यपि दर्शनात्, मुण्डं करोति माणवकमित्यादौ सापेक्षेभ्योऽपि णिज् यथा स्यादित्येवमर्थं प्रपञ्चार्थं वा, हलिकल्योरत्वदन्तत्वनिपातनार्थं, अन्यथा हलिइ कलिइ इति स्थिते 'अचोऽञ्णिती' ति वृद्धिः प्राप्नोति णाविष्ठवदिति टिलोपश्च, तत्र लोपः शब्दान्तरप्राप्त्याऽनित्यः, वृद्धिस्तु टिलोपे कृतेऽप्राप्तेवेत्युभयोरनित्ययोः परत्वाद्वृद्धौ कृतायामैकारस्य लोपस्तत्राग्लोप्यङ्गं भवतीति सन्वल्लघुनीति सन्वद्भावः स्यात्, 'दीर्घो लघो' रिति दीर्घश्च, अत्वनिपातने तु यद्यपि परत्वाद्वृद्धिस्तथाप्यगेव लुप्यतइति सन्वद्भावो न भवति तदाह । 'हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थमिति'। उपलक्षणमेतत्, 'दीर्घो लघो' रिति दीर्घाभावार्थं च, दीर्घो लघोरित्यत्राप्यनग्लोपइति वर्त्तते, एवं च बलिपटुप्रभृतिभ्यो णिचि अबीबलदपीपटदिति भवति, न त्वबबलत् अपपटदिति, सत्यापपाशेत्यत्र मुण्डादयः पठितव्यास्तथा तु न कृतमित्येव ॥

"धातोरेकाचो हलादेः क्रियासमभिहारे यङ्" ॥ हलादेरिति विशेषणादेकाच इति बहुव्रीहिः। 'क्रियासमभिहारे वर्त्ततइति'। समभिह्रियमाणायां क्रियायां हि वर्त्ततइत्यर्थः। अनेन समभिहारस्य प्रकृतिविशेषणत्वं दर्शयति, क्रिया हि धातुवाच्या, समभिहारविशिष्टापि क्रियैव भवति, अतः प्रकृतिविशेषणत्वमेव युक्तं, यथातिशयेन शुक्लोऽपि शुक्ल एवेत्यतिशायनं प्रकृत्यर्थस्तद्वत्। 'तस्माद्यङ्प्रत्ययो भवतीति'। क्व, अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति तत्रैव, समभिहारे द्योत्ये प्रकृत्यर्थसमभिह्रियमाणत्वद्योत-

Digitized by Google

नायेत्यर्थः, यथा प्रकृत्यर्थस्यातिशयद्योतनाय तरबादयस्तद्वत्, । इह विप्रकीर्णानां (१) पदार्थानां मूर्त्तानामेककालानामेकत्र राशीकरणं समुदायभावापत्तिर्मुख्यः समभिहारो यथा पूलादीनां, धातुवाच्या तु क्रियैकैव, यद्यपि दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिष्वित्यनेकार्थो दिविः पठ्यते तथापि न युगपदनेकमर्थमाचष्टे किं तर्हि प्रयोगभेदेन, यद्यपि चाश्रयभेदाद्विषयभेदाच्च भिद्यते पाको ऽन्य एव हि देवदत्तकर्तृकः पाको ऽन्य एव चान्यकर्तृको ऽन्यश्चौदनस्य पाको ऽन्य एव तैलादीनां, तथापि धातुना निवृत्तभेदैव सा प्रत्याय्यते, अत एव भवद्भिरास्यतइत्यादौ बहुवचनं न भवति, न खलु कर्तृभेदः क्रियाव्यक्तिभेदेन व्याप्तः,(२) एकफलावच्छिन्नामेकामेव क्रियां कुर्वत्स्वपि बहुषु पचन्तीति दर्शनात्, तदेवं धातुवाच्या समूहरूपा प्रधानक्रियैकैवेति समभिहाराभावः, अधिश्रयणादीनां तु गुणक्रियाणां युगपदेकधातुवाच्यत्वेपि क्रमजन्यत्वादुत्पन्नापवर्गित्वेन युगपदवस्थानाभावादमूर्त्तत्वाच्च समभिहाराभावः, तदेवं मुख्यस्य समभिहारस्य धात्वर्थविषये ऽसंभवाद्गौणो गृह्यते तद्दर्शयति । 'पौनःपुन्यं भृशार्थो वेति' । द्रव्याणां द्रव्यान्तरैरव्यपेतानां समभिहारो भवति, तथा क्रियाणामपि क्रियान्तरैरव्यपेतानामेतदुभयं भवति, तत्र प्रधानक्रियाणां पौनःपुन्यं समभिहारः पुनःपुनरनुष्ठीयमानविषयं हि तत्, प्रधानक्रियैव च पुनःपुनरनुष्ठीयते ऽवयवक्रियाणां तु भृशार्थता समभिहारः, बुद्धिगोचरानेकसकलावयवक्रियाविषया हि सा । 'पापच्यतइति' । 'दीर्घो ऽकित' इति दीर्घः । 'देदीप्यतइति' । 'गुणो यङ्लुकोः,' यङैव समभिहारस्य द्योतितत्वात् 'क्रियासमभिहारे द्वे भवत' इति वा 'नित्यवीप्सयो'रिति वा द्विर्वचनं न भवति । 'धातोरिति किमिति' । अन्यस्य क्रियासमभिहारे वृत्त्यसंभवात्प्रश्नः । 'भृशं प्राटतीति' । अत्र धातूपसर्गसमुदायस्य विशिष्टक्रियावचनत्वात्ततो यङ् स्यात् ततश्चोपसर्गस्य द्विर्वचनं स्यात्, यदि सोपसर्गसङ्घातस्यैव क्रियासमभिहारे वृत्तिः, प्रपापच्यतइत्यादौ यङ् न प्राप्नोति योत्र धातुः स न क्रियासमभिहारे यश्च क्रियास-

(१) बहूनामित्यधिकं २ पुस्तके ।
(२) भेदस्य व्यापक इति २ पुस्तके पा· ।

मभिहारे न स धातुरिति, तस्माद्धातुरेव समभिहारविशिष्टक्रियावाची, उपसर्गस्तु सन्निधिमात्रेणोपकारकः, ततश्च सङ्घातात्मात्प्रभावाचार्थो धातुग्रहणेन, यत्र तर्हि सङ्घातेनैव विशिष्टा क्रियोच्यते प्रतिष्ठीयतइति, अत्र हि केवलस्तिष्ठतिर्गतिनिवृत्तिवचनः प्रपूर्वेण तु सङ्घातेन गतिक्रियै-वोच्यते यथा जङ्गम्यतइति, अत्राप्यनेकार्थत्वाद्धातूनां तिष्ठतिरेव गतौ तन्निवृत्तौ च वर्त्तते, उपसर्गस्तु सन्निधिमात्रेणोपकारक इति धातोरुत्प-त्तिरविरुद्धा, तस्मादार्धधातुकसञ्ज्ञार्थमेव धातुग्रहणं, तेन 'ब्रुवो वचि' रि-त्यादि भवति, आनुषङ्गिकी त्वधातुनिवृत्तिः। अथ कथं यङन्तादात्म-नेपदं भवति, कथं च न स्यात्, ङितो धातोरात्मनेपदमुच्यते, यश्चात्र धातुर्न स ङित् नह्ययं समुदायस्यानुबन्धः, यश्च ङित्प्रत्ययो नासौ धातुः, यत्र चावयवे कृतं लिङ्गमचरितार्थं तत्र समुदायस्य विशेषकं भवति, अयं ङकारस्तु बेभिद्यतइत्यादौ गुणनिषेधादौ चरितार्थः। कश्चिदाह, क्रिया-समभिहारे यङित्यकारोऽत्र प्रश्लिष्यते स चानुदात्तानुनासिकः प्रतिज्ञायते, तत्रानुदात्तत्वमवयवे ऽचरितार्थं समुदायस्य विशेषकं भवति, 'अनुदात्त-तश्च हलादे' रित्येतच्च न भवति जुचङ्क्रम्यदन्द्रम्येत्यत्र चङ्क्रम्यदन्द्रम्यग्रह-णाल्लिङ्गादिति, स वक्तव्यः। अथ कथं ऋतेरीयङन्तादात्मनेपदं भवति, सोपि हि ङकारो गुणनिवृत्तौ चरितार्थ इति, स चेद् प्रयोक्तस्याप्यादित इकार ईकारो वा ऽनुदात्तः प्रश्लिष्यतइति प्रतिब्रूयादेनमिकारे नुम्प्रसज्येत ईकारे 'श्वीदितोनिष्ठाया' मितीण्निषेधः स्यादिति। नैव दोषः। नुम्विधौ 'गोः पादान्त' इत्यतो ऽन्तग्रहणमनुवर्त्तते, तेनान्ते इकार इत्स-ञ्ज्ञको येषां तेषां नुम्,। 'श्वीदितोनिष्ठायामि' त्यत्राप्येकाच इति वर्त्तते। सत्यं, प्रतिविहितमायुष्मता मुधा पुनरयं प्रयास,स्तथाहि। अनुदात्तङित इत्यत्र न धातुग्रहणमस्ति ततः किमिदन्ततो भवति प्रत्ययमेव ङितमा-श्रित्यात्मनेपदं सिद्धं भवति, न चैवमशिश्रियद् अवोचदित्यादौ चङङ्भ्या-मपि प्रसङ्गः, प्रागेव विकरणेभ्यो ऽनुदात्तङित इत्येतत्प्रकरणं प्रवर्त्तते ऽन्यथा वर्ततइत्यादौ विकरणव्यवधानान्नियमो न स्यात्,। यथा च प्रागेव विकरणेभ्यो नियमः प्रवर्त्तते प्रवृत्ते तु नियमे विकरण इति तथा

Digitized by Google

तत्रैव प्रतिपादितमित्यलमियता । 'सूचिसूत्रीत्यादि' । सूच्यादिभ्यो यङ् वक्तव्यः, किमर्थं, सूच्यादीनामनेकाजर्थमशादीनामहलाद्यर्थमूर्णोतेस्त्वनेकाजर्थमहलाद्यर्थं च । 'सोसूच्यतइति' । सूच पैशुन्ये, सूत्राव मोचने, मूत्र प्रस्रवणे चुरादिणयन्ताः, अत्र णिलोपेऽपि यङ अदुं धातुकत्वे प्रयोजनम् । 'अटाट्यते' । अट पट गतौ, 'अजादेर्द्वितीयस्ये' ति ट्यशब्दस्य द्विर्वचनम्, । 'अरार्यतइति' । ऋ गतौ 'गुणोर्तिसंयोगाद्योः' 'यङि चे' ति गुणः, 'नन्द्राः संयोगादय' इत्यत्र यकारपरस्य प्रतिषेध इति वचनाद्रेफस्य द्विर्वचनम् । 'अशाश्यतइति' । अश्नोतेरशेश्च यङ्गणामित्यागमः । 'प्रोर्णोनूयतइति' । ऊर्णुञ् आच्छादने नोपधोयम्, आष्टमिकं तु णत्वं तस्यासिद्धत्वात्नुशब्दस्य द्विर्वचनम् । ननु 'पूर्वत्रासिद्धीयमद्विर्वचने' । स्यादेतत् । आष्टमिकं तु द्विर्वचनमभिप्रेत्य तदुच्यते यथा चोजढदित्यत्र ढत्वादीनामसिद्धत्वाद्धत इत्येतद् द्विरुच्यते इति । तत्र, एवं हि सुपिभूतो द्विरुच्यतइति वक्ष्यमाणं व्याहन्येत, एवं तर्हि पूर्वत्रासिद्धीयमद्विर्वचनइत्येतदनित्यम्, 'उभौ साभ्यासस्ये' ति लिङ्गात्, अन्यथा 'ऽनिते' रिति णत्वे कृते तस्य सिद्धत्वाण्णिशब्दस्य द्विर्वचने सति सिद्धं स्यात्प्राणिणिषतीति, इह कस्मान्न भवति लुनीहिलुनीहीत्येवायं लुनातीति, भवत्येव, लोलूयतइति लोट् तर्हि न प्राप्नोति यङा बाधितत्वात्, अन्तरङ्गो यङ् क्रियासमभिहारमात्रापेक्षत्वात् लोट् तु बहिरङ्गः क्रियाभेदाश्रये धातुसम्बन्धे भावकर्मकर्तृषु च विधानात्, सावकाशश्च लोट्, कोऽवकाशः, अनेकाजहलादिश्च, जागृहिजागृहीत्येवायं जागर्त्ति, ईक्षस्वेक्षस्वेत्येवायमीक्षतइति, एवं तर्हि वेत्यनुवृत्तेः पक्षे यङ्, यदा न यङ् तदा लोड्भविष्यति । यङोकारो ऽटाट्यतइत्यादौ द्विर्वचनार्थः ॥

"नित्यं कौटिल्ये गतौ" ॥ धातोरिति वर्त्तते गताविति तस्य विशेषणं, गतौ वर्त्तमानाद्धातोरिति, (१) 'कौटिल्यइति' । संनिधानाद्गतिविषयमेव कौटिल्यं गम्यते । 'चंक्रम्यते दन्द्रम्यतइति' । क्रमु पादविक्षेपे, द्रम मीमृ गतौ, 'नुगतोनुनासिकान्तस्य,' योत्यीवस्यध्वनि गतागतानि

(१) एतदेवं वस्तु व्याचष्टे 'गतिवचनाद्धातोरिति' । इत्यधिकं ७ पुस्तके ।

करोति सकुटिलां गतिं सम्पादयन्नेवमुच्यते, नित्यग्रहणमनर्थकमनभिधानादेव वाक्यं न भविष्यति। नहि चंक्रम्यतइति वृत्तेरर्थं कुटिलं क्रामतीति वाक्यं शक्नोति गमयितुं, संशयो हि वाक्याद्भवति, किं गतिकौटिल्यमुत वक्रहृदयत्वनिबन्धनं जिह्माचरणमिति, वृत्तौ तु गतिकौटिल्यमेव नियतं, गम्यते कौटिल्यमात्रप्रतिपादने च वाक्यं निवारयितुमशक्यमनिष्टं चात आह। 'नित्यग्रहणं विषयनियमार्थमिति'। गतिकौटिल्यं विषयः, तत्रैव यङ् यथा स्यादित्येवमर्थमित्यर्थस्तदाह। 'गतिवचनान्नित्यं कौटिल्यएव भवतीति'। व्यवच्छेद्यं दर्शयति। 'न तु क्रियासमभिहारइति'। ननु यथा 'वडवाया वृषे वाच्य' इत्यपत्ये प्राप्तस्ततोपकृष्य विधीयते यथा वा 'भीतः क्तो' भूते प्राप्तस्ततोपकृष्य वर्त्तमाने विधीयते, एवमत्रापि धातुमात्रात्क्रियासमभिहारेयङ्विहितो गतिवचनात् तु कौटिल्यइति, तक्रकौण्डिन्यन्यायेनैव बाधः सिद्धः, यथा वा विवक्षितार्थानभिधानाद्वाक्यं न भवति तथा समभिहारानवगमादत्र प्रत्ययो न भविष्यति, अथैवमपि वचनापेक्षा वाक्यनिवृत्तावपि वचनमपेक्षस्व, तदेतन्नित्यग्रहणं चिन्त्यप्रयोजनम् ॥

"लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्" ॥ लुप्लृ छेदने, षद्लृ विशरणगत्यवसादनेषु, आङः सदिः पद्यर्थइत्यस्य तु चौरादिकणिजन्तस्य एकाच इत्यस्यानुवृत्तेरग्रहणं, चर गत्यर्थः, जप जल्प व्यक्तायां वाचि, जभी जृभि गात्रविनामे, दह भस्मीकरणे, दंश दशने, अनुनासिकलोपनिर्देशो यङ्लुक्यप्यनुनासिकलोपार्थो दन्दशीतीति, गृ निगरणे तुदादिः, गॄ शब्दे क्र्यादिः, तत्राकारान्तविकरणेन साहचर्यादाद्यस्य ग्रहणमित्येके, द्वयोरपीत्यपरे। 'धात्वर्थगर्हायामिति'। भावशब्दो धात्वर्थे वर्त्ततइति दर्शयति। 'गर्हितमिति'। क्रियाविशेषणं, तेन भावगर्हात्र गम्यते, गर्हितत्वं तुच्छेदनस्य निषिद्धतृणादिविषयत्वात्, 'लोष्ठमर्दी तृणच्छेदी नखखादी च यो नर' इति। एवमुत्तरत्रापि यथा सम्भवं गर्हितत्वं भेदेन द्रष्टव्यम्। 'चञ्चूर्यतइति'। 'चरफलोश्चे' ति नुक्, 'उत्परस्यातः,' 'हलि चे' ति दीर्घः, जञ्जप्यतइत्यादौ 'जपजभदह-

दशभञ्जपशां चे' ति नुक् । 'निजेगिल्यतइति' । 'अत इट्गातेः,' रपरत्वं, द्विर्वचनम्, अभ्यासस्य गुणः, जेगिर्य्यइति स्थिते 'ग्रो यङी' ति लत्वं च प्राप्नोति 'हलि चे' ति दीर्घश्च तत्र दीर्घस्यासिद्धत्वाल्लत्वे कृते विहतनिमित्तत्वाद्दीर्घाभावः । अन्ये तु 'न मु न' इत्यत्र नेति योगविभागेनासिद्धत्वं बाधित्वा दीर्घे कृते लत्वमिच्छन्ति, नात्राप्तवाक्यमस्ति । 'गर्हायामिति किमिति' । भावस्येत्येव तद्धर्मविशेषो लप्स्यतइति प्रश्नः । धर्मविशेषानुपादाने प्रशंसायामपि स्यादित्याह । 'साधु जपतीति' । 'जपति वृषलो मन्त्रमिति' । अत्र स्वरवर्णादिभ्रेषाभावाद्भावगर्हा नास्ति वैदिकमन्त्रजपं प्रति शुद्रस्यानधिकारात्तु साधनभावे गर्हितः, यस्य खल्वीदृशी गतिः शूद्रस्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम् उच्चारणे जिह्वाच्छेदो धारणे शरीरभेद इति नासौ जपितुमर्हति । 'नित्ययङ्गणामित्यादि' । पूर्ववदेतद्व्याख्येयम् ॥

"सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्" ॥ सत्यापेत्यकार उच्चारणार्थः । 'सत्यमाचष्टइति' । ननु भाष्ये सत्यस्य कृञ्यापुक्, सत्यशब्दात्कृञि करोत्यर्थे णिज्भवति आपुक्च, सत्यं करोति सत्यापयतीत्युक्तम्, सत्यं, कृञ्ग्रहणमनार्षं प्रदर्शनार्थो वा करोतिर्द्रष्टव्य इति मन्यते । 'आपुग्वक्तव्य इति' । आपुग्वचनसामर्थ्याट्टिलोपो न भवति, क्व चित्तु वृत्तावेवायं ग्रन्थः पठ्यते; अथ कथं पुनः शब्दापयेदिति, छन्दोवदृषयः कुर्वन्तु । एतेन प्रतालापयेदिति गृह्यप्रयोगो व्याख्यातः । 'पाशाद्विमोचनइति' । प्रायिकोयमर्थनिर्देशः, अन्यत्रापि भवति, अन्यथा विपाशतीति विशब्दस्य प्रयोगो न स्यात्, विशब्दविशिष्टस्यैव मोचनस्य णयर्थत्वात्, यथाचारक्यच्याङः प्रयोगो न भवति, एवमुपवीणयतीत्यादावपि द्रष्टव्यं, तूलं तृणाग्रं तेनानुकृष्णाति अनुघट्टयतीत्यर्थः, अनुगृह्णातीति तु पाठे न समीचीनोर्थः । 'अभिषेणयतीति' । उपसर्गात्सुनोतीत्यादिना षत्वम् । 'अकारान्तस्त्वचशब्द इति' । त्वच संवरणइत्यस्माद्धातोः पुंसि संज्ञायामिति घः । 'अवध्वंसयतीति' । विकिरतीत्यर्थः । प्रातिपदिकाद्धा-

Digitized by Google

त्यर्थइत्येव सिद्धे सत्यस्यापुग्विधानार्थं वचनमन्येषां प्रपञ्चार्थं, मालिन्यो ह्युपश्लोकयन्तीत्यादौ सापेक्षेभ्यो यथा स्यादित्येवमर्थं वा, कथं पुनर्विमोचनादिरर्थो ऽनिर्दिष्टो लभ्यतइत्यत आह । 'स्वाभाविकत्वादिति'। 'प्रत्ययार्थो निर्दिश्यतइति'। सूत्रकारेणानिर्दिष्टोऽपि प्रत्ययार्थो व्याख्याकारैर्निर्दिश्यतइत्यर्थः ॥

"हेतुमति च" ॥ लोके फलसाधनयोग्यः पदार्थो हेतुरित्युच्यते, तस्य ग्रहणे ऽध्ययनेन वसतीत्यत्रापि प्रसज्येत, हेतुमद्ग्रहणं चानर्थकं स्यात्, कथं, करणइति वर्त्तते तस्य विशेषणं हेतुमतीति, करणं क्रिया सर्वत्र च क्रिया हेतुमतीति किं विशेषणोपादानेन, ननु शब्दोपात्ते हेतौ यथा स्यादित्येवमर्थमेतत्स्याद्यथा 'समस्तृतीयायुक्तादि'त्यत्र श्रूयमाणायां तृतीयायामात्मनेपदं यथा स्यात्तदर्थयोगमात्रे मा भूदित्येवमर्थं तृतीयायुक्तग्रहणम्, एवं तर्ह्यसति विरोधे कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणं युक्तमिति । 'तत्प्रयोजको हेतुश्चे'ति यस्य संज्ञा विहिता तस्यैव पारिभाषिकस्य ग्रहणमिति मत्वाह । 'हेतुः स्वतन्त्रस्य कर्त्तुः प्रयोजक इति'। 'तदीयो व्यापार इति'। प्रवर्त्तना, तस्यास्त्ववान्तरभेदमाह । 'प्रेषणाध्येषणादिलक्षणइति'। भृत्यादेर्निकृष्टस्य प्रवर्त्तना प्रेषणमात्रेत्यर्थः । गुर्वादेराराध्यस्य प्रवर्त्तनाध्येषणं प्रार्थनेत्यर्थः । आदिशब्देन तत्समर्थाचरणं गृह्यते, तच्च बहुधा भिद्यते ऽनुमतिरुपदेशो ऽनुग्रह इति, तत्र यस्यानुमतिमन्तरेणार्थो न निर्वर्त्तते तस्य राजादेरनुमत्या प्रयोजकत्वं, वैद्यादेस्तु मुस्तापर्पटकं पिबेज्ज्वरित इत्याद्युपदेशेन प्रवर्त्तकत्वं, यः पुनः केन चिज्जिघांसितं पलायमानं निरुणद्धि निरुद्धश्च हन्यते तत्र निरोद्धा हन्तुरनुग्रहं करोतीत्यनुग्रहेण तस्य प्रवर्त्तकत्वं, सर्वश्चायं विशेषः प्रकरणादिगम्यः, सर्वत्रानुगतं प्रवर्त्तनामात्रमेव तु णिजर्थः । ननु यथा पितृमानित्युक्ते यं प्रति पितृत्वं स एव गम्यते तथात्रापि यं प्रति हेतुत्वं स एव हेतुमानिति युक्तं कं च प्रति हेतुत्वं तत्प्रयोजक इति वचनात्कर्त्तारं प्रतीति प्राप्तं कारकइत्यधिकारात्क्रियापेक्षत्वाच्च कारकभावस्य यस्मिन्व्यापारे प्रयोजकरूपेणोपयुज्यते तमेव प्रति, स च प्रयोज्य-

Digitized by Google

व्यापारोऽधिश्रयणादिः सर्वसाधनसाध्यो विक्लित्यादिर्वेति तयोरेव हेतुमत्त्वं युक्तं न पुनः प्रयोजकव्यापारस्य, नहि तत्रासौ प्रयोजकरूपेणोपयुज्यते किं तर्हि कर्तृरूपेण यथा काष्ठस्य पाकापेक्षं करणत्वं न तु ज्वलनापेक्षं तदपेक्षं तु कर्तृत्वमेव, उच्यते। णिचः प्रकृतिभूतेन धातुनैवाभिधीयते सोऽर्थस्तेन फलाभावात्तत्र णिज्न भविष्यति। ननु पचतीत्युक्ते न ज्ञायते किं स्वयमेव पचति उतान्येन प्रवर्त्तित इत्यतोऽन्येन प्रवर्त्तितस्येयं प्रवृत्तिरिति द्योतनाय णिज् भवतु, एवं तर्हि हेतोरिति वक्तव्यं करण इत्येव, हेतोः करणे व्यापारेऽभिधेये णिज् भवतीत्यर्थः। तथा तु न कृतं, का गतिरिदानीं सूत्रस्य, अभिधानस्वाभाव्यमत्र हेतुः, स्वभावतो हि णिच् प्रत्ययः प्रयोजकव्यापारमाचष्टे तेन पाकाद्यपेक्षया यो लब्धहेतुव्यपदेशः स हेतुत्वेनोपलक्षितो यस्यास्तीत्येवं प्रयोजकव्यापार एव मतुपोच्यते, अत्र द्वौ पक्षौ सम्भवतः, हेतुमतीति प्रकृत्यर्थनिर्देशो हेतुमति यो धातुर्वर्त्तत इति, प्रत्ययार्थो वा, हेतुमति करणेऽभिधेये णिज् भवतीति। ननु पचति पाचयतीति च व्यक्तमर्थान्तरं गम्यते तत्कथमस्य प्रकृत्यर्थत्वं शक्यते। उच्यते। इह हि कः पचेः प्रधानार्थो यासौ तण्डुलानां विक्लित्तिः, अधिश्रयणादीनां तु तादर्थ्यात्तदवच्छेदेन पच्यर्थता, यो हि पानार्थमुदकमाहरति विक्रयार्थं च काष्ठान्याहरति शीतं चापनेतुमग्निं समिन्धे नासौ पचतीत्युच्यते, तत्कस्य हेतोः, विक्लित्तिं प्रति तादर्थ्याभावात् तदवच्छेदाभावाच्च, अतस्तादर्थ्यादेवाधिश्रयणादीनां पच्यर्थता, तद्वत्प्रयोजकव्यापारोऽपि तादर्थ्यादेव पच्यादिवाच्यो भविष्यति, णिज् प्रत्ययस्तु द्योतकस्तथा च योऽप्येकान्ते तूष्णीमासीनो भक्तबीजबलीवर्दैः प्रतिविधत्ते स उच्यते पञ्चभिर्हलैः कृषतीति, तदेवं पक्षद्वयसम्भवे यद्याद्यः पक्ष आश्रीयते ततो यथा प्रकृत्यभिहिते णिज् भवति एवमुक्तप्रेषितादिशब्दाभिहितेऽपि स्यात् उक्तः करोति प्रेषितः करोतीति, हेतुमद्विषयत्वात्करोत्यर्थस्य, प्रत्ययार्थपक्षे तूक्तार्थत्वाण्णिजभावः। नैष दोषः। प्रयोजकव्यापारस्य द्योतनाय णिज्विधीयते तस्य स्वशब्देन द्योतितत्वाद्द्योत्याभावान्न भविष्यति।

इह तर्हि पाचयत्योदनं देवदत्तो यज्ञदत्तेन, द्वयोः कर्त्रोर्लेनाभिधानं प्राप्नोति धातुवाच्यव्यापारे हि कर्तरि लो भवति पचिना च प्रयोजकव्यापारोऽप्यभिधीयते प्रत्ययस्तु द्योतक इति धातुवाच्यव्यापारत्वसाम्यात् कर्त्रोरपि साम्यमिति द्वयोरप्यभिधानं प्राप्नोति पाचयतो देवदत्तयज्ञदत्ताविति, प्रत्ययार्थपक्षे तु प्रकृत्यर्थोपसर्जनस्य ण्यर्थस्य प्राधान्यात्तस्यैव कर्तरि लकारः, इह च गमितो ग्रामं देवदत्तो यज्ञदत्तेनेति प्रयोजकव्यापारस्यापि गमिवाच्यत्वादव्यतिरिक्तो गत्यर्थ इति कृत्वा गत्यर्थानां कर्तरि क्तः प्राप्नोति प्रयोज्यस्य तु कर्मत्वात्तत्रैवेष्यते, उक्तं हि 'ण्यन्ते कर्तुश्च कर्मणः' इति। इह च व्यतिच्छेदयन्ते व्यतिभेदयन्ते ऽव्यतिरिक्तो हिंसार्थ इति कृत्वा प्रयोजकव्यापारव्यतिहारविवक्षायामपि 'न गतिहिंसार्थेभ्य' इति प्रतिषेधः प्राप्नोति, तदेवमाद्ये पक्षे दोषदर्शनाद् द्वितीयं पक्षमाश्रित्याह। 'तस्मिन्नभिधेयइति'। किं चान्वयव्यतिरेकाभ्यां (१) शब्दार्थावसायः, न च पचति पठति गच्छतीत्यादावन्तरेण णिचं क्वचिदपि प्रयोजकव्यापारो ऽवसीयते, उत्पन्ने तु णिचि प्रतीयते ऽतस्तदर्थत्वमेव युक्तं, पञ्चभिर्हलैः कृषतीत्यत्र त्वनेकार्थत्वाद्धातूनां कृषिरेव प्रतिविधानेऽपि वर्ततइति युक्तं न पुनस्तद्दर्शनेन सर्वत्र प्रकृत्यर्थत्वं, नन्वत्रापि पक्षे पाचयत्योदनं देवदत्तो यज्ञदत्तेनेत्यत्र ण्यर्थस्य प्राधान्यात्तेन व्याप्यमानस्य प्रयोज्यस्य कर्मसञ्ज्ञा प्राप्नोति, गतिबुद्धिप्रत्यवसानार्थेति नियमाच्च भविष्यति, इह तर्हि ग्रामं गमयति ग्रामाय गमयतीति व्यतिरिक्तो गत्यर्थ इति कृत्वा गत्यर्थकर्मणीति द्वितीयाचतुर्थ्यौ न प्राप्नुतः। नैष दोषः। ग्रामोऽत्र गमेरेव कर्म ग्रामकर्मकं गमनं कुर्विति प्रैषार्थः, इह तर्हि एधो दकस्योपस्कारयतीति व्यतिरिक्तः करोत्यर्थ इति 'कृञः प्रतियत्न' इति षष्ठी न प्राप्नोति, सुट् तु करोतिधातुमात्राश्रयत्वाण्णिजुत्पत्तावपि तस्य रूपस्य भावात्सिद्ध्यति, अत्राप्येधोदककर्मके करोत्यर्थे प्रयुज्यतइति षष्ठी भविष्यति, इह तर्हि अभिषावयतीति व्यतिरिक्तः सुनोत्यर्थ इत्युपसर्गात्सुनोतीति षत्वं न

(१) भूयोविषयाभ्यामित्यधिकं २ पुस्तके।

प्राप्नोति, अथात्राप्यभिषवं कुर्वित्युपसर्गविशिष्टे प्रकृत्यर्थे प्रयुक्तिरिति सिद्धं षत्वं, यदा तु एयन्तेनैवोपसर्गस्य संबन्धस्तदा षत्वं भवति न वेति चिन्त्यम्, इह तर्हि भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामिति प्रयोज्ये कर्त्तरि कर्मयोगलक्षणा षष्ठी न प्राप्नोति अप्रधानत्वात्, तृतीयावद्भविष्यति, तद्यथा पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति प्रयोज्ये कर्त्तर्यप्रधानेपि तृतीया भवति व्याप्तेस्तथा षष्ठ्यपि भविष्यति, अथेह कथं णिज् भवति भिक्षा वासयन्ति कारीषोग्निरध्यापयतीति, कथं च न स्यात्, अचेतनत्वात्, चेतनावत एतद्भवति प्रेषणमध्येषणमिति, नैष दोषः । नावश्यं स एव वासं प्रयोजयति य आहोष्यतामिति, योपि तूष्णीमासीनस्तत्समर्थमाचरति सोपि वासं प्रयुङ्क्ते, भिक्षाश्च प्रचुराश्च व्यञ्जनवत्यश्च लभ्यमाना वासं प्रयुञ्जते, तथा कारीषोग्निर्निर्वात एकान्ते सुप्रज्वलितः शीतकृतमध्ययन-विरोधिनमुपद्रवमपनयन् अध्ययनेऽनुकूलो भवति, तत्र यथानुमतिरुपदे-शोनुग्रह इत्येतेषु णिज् भवति तथाऽत्रापि भविष्यति, यद्यप्यनुमत्यादिषु प्रयोज्यव्यापारोद्देशेन प्रवृत्तिरिह तु न तथा तथाप्यनुकूलाचरणमेव प्रयो-जकव्यापारत्वेनाध्यारोप्यते, इह कश्चित्कं चिदाह पृच्छतु मां भवान् अनुयुक्तां मां भवानिति, तत्र प्रष्टा प्रयोज्यस्तस्य प्रेरकः प्रयोजक इति तद्व्यापारे णिज् प्राप्नोति, एकविषयत्वाच्च णिचो लोडादीनां च पर्यायप्र-सङ्गः । नैष दोषः । कर्त्तुः प्रयोजको हेतुरित्युक्तं प्रयोज्यश्चात्र न कर्त्ता नह्यसौ सम्प्रति पृच्छति तूष्णीमास्ते तस्य निर्व्यापारत्वात् कारकत्वमेव नास्ति कुतस्तद्विशेषः कर्तृत्वं, कर्तृत्वमेव हि तस्य विधीयते प्रश्नक्रियायां कर्त्ता भवेति यथा राजा भव युध्यस्वेति राजत्वमेव विधीयते तत्र तदेवं प्रयोज्योऽकर्त्तेति प्रयोजकोपि न हेतुः, किमिदानीं पूर्वमेव कर्त्तुः सतः प्रयो-जको हेतुः, यद्येवं व्यर्था प्रयुक्तिः, अथाप्युपरतिशङ्कया क्व चित्प्रयुक्तेरर्थवत्त्वं तथापि यत्राप्रवृत्ततो बलादिना प्रवर्त्त्यते तत्र णिज् न प्राप्नोति, न ब्रूमः प्रवृ-त्तप्रवर्त्तनएव णिजिति किं तु प्रवर्त्तितोपि प्रयोज्यो यत्र प्रवर्त्ततएव न तु निवर्त्तते तत्र णिज् भवति, अनुवर्त्तमाना प्रयुक्तिः प्रयोज्यप्रवृत्तौ हेतुर्न मध्ये विच्छिन्ना, अतः प्रयोज्यप्रवृत्तिवेलायामपि बुद्धौ विपरिवर्त्तमाना

Digitized by Google

सैव प्रवृत्तिहेतुस्तस्यामेव च दशायां णिज्वाच्यो भवति तदेवं प्रयोज्य-प्रवृत्त्युपहितप्रयुक्तिर्णिजर्थः केवला तु लोडर्थ इति विवेकः, उक्तं च ।

द्रव्यमात्रस्य तु प्रैषे पृच्छादेर्लोड् विधीयते ।

सक्रियस्य यदा प्रैषस्तदा स विषयो णिच, इति ।

किं च प्रयोक्तृधर्मः प्रयुक्तिर्लोडर्थः, अनियतकर्तृका तु प्रयुक्तिर्णिजर्थः । 'तत्करोतीत्युपसंख्यानमिति' । तदिति कर्मपरमेतत्, तेन द्वितीयान्तात्प्रत्ययः करोतीत्यत्र प्रकृत्यर्थमात्रं विवक्षितं न प्रत्ययार्थस्तेन ण्यन्ताद्भावकर्मणोर्भूतभविष्यतोर्द्वित्वबहुत्वयोश्च लो भवति । 'सूत्रं करोति सूत्रयतीति' । इह व्याकरणस्य सूत्रं करोतीति वाक्ये द्रव्यरूपं सूत्रं सूत्रशब्देनोच्यते तत्र व्यपदेशिवद्भावेन व्यतिरेकनिबन्धना षष्ठी वृत्तौ तु व्याकरणं सूत्रयतीति प्रत्ययार्थभूतकरोत्यर्थाभिधायी सूत्रशब्दः सम्पद्यते, उक्तं हि 'परार्थाभिधानं वृत्ति' रिति । तेन सत्त्वभावो निवृत्त इति सूत्रव्याकरणयोरभिसम्बन्धो निवर्त्तते ऽस्ति च व्याकरणस्य करोतिना सामर्थ्यमिति द्वितीया भवति, यदि तु व्याकरणं सूत्रं करोतीति वाक्यएव सामानाधिकरण्यं तदा माणवकं मुण्डं करोति माणवकं मुण्डयतीतिवद् व्याकरणं सूत्रयतीत्ययमसिद्धं, सूत्र अवमोचने सूत्र प्रस्रवण इति चुरादौ पाठादेव सूत्रयतीति सिध्यति, अनेकार्थत्वाच्चार्थान्तरे ऽपि भविष्यति, गणपाठसिद्ध एव त्वर्थ उपसंख्यानेनापि प्रदर्शितः । आख्यानादिति वाक्यं व्याचष्टे । 'आख्यानात्कृदन्तादिति' । आख्यायत इत्याख्यानं, 'कृत्यल्युटो बहुलमि' ति कर्मणि ल्युट्, यत्किं चिदाख्यायते तत्सर्वं राजागमनादिकमप्याख्यानमिहाभिप्रेतं न कंसवधनलोपाख्यानादिकमेव संज्ञाभूतम्, कृदन्तादिति कृद्ग्रहणेन गतिकारकपूर्वस्यापि ग्रहणमिति कंसवधराजागमनसूर्योद्गमनादेरपि कृदन्तत्वम् । 'प्रकृतिप्रत्यापत्तिरिति' । कृतो या प्रकृतिः सा विकारपरित्यागेन स्वेनैव रूपेणावतिष्ठत इत्यर्थः । 'प्रकृतिवच्च कारकमिति' । यत्तत्र कृदन्ते संनिहितं कारकं तत्प्रकृतिवद्भवति कृत्प्रकृतेः शुद्धे णिचि यादृशं भवति तादृशमस्यापि ण्यन्तस्य भवतीत्यर्थः । 'कंसं घातयतीति' हन्ते 'र्हनश्च वध' इत्यप्

प्रत्ययो वधादेशश्च, हननं वधः कंसस्य वध इति कर्मणि षष्ठ्या समासः, ततो णिच्, कृतो लुक्, प्रकृतेः प्रत्यापत्तिर्वधादेशपरित्यागेन हन्तिरूपेणा-वस्थानं, यद्यप्यत्र सन्नियोगशिष्टानामन्यतराभावादुभयोरप्यभाव इत्येव वधादेशनिवृत्तिः सिद्ध्यति तथापि पुष्येण योगं जानाति पुष्येण योजय-तीत्यत्र कुत्वस्यासन्नियोगशिष्टत्वात्तन्निवृत्तिर्न सिद्ध्यतीति प्रकृतिप्रत्यापत्ति-वचनम् । अथ कथं कंसमघातयत् राजानमजीगमत्, यावता कंसवधरा-जागमनशब्दाभ्यां णिचि विहिते वृद्धसंज्ञा नामधातुत्वं च तयोरेव स्यातां ततश्चाड्द्विर्वचने अपि तयोरेव स्यातां, नैष दोषः । प्रकृतिवच्चकारक-मित्युक्तं कृत्प्रकृतेश्च शुद्धे णिचि विहिते कंसादिकारकं कीदृशं भवति धातावनन्तर्भूतं द्वितीयाद्यन्तं तेनात्रापि तादृशेनैव रूपेण भवितव्यं, तेन राजानमागमयतीत्यत्र नलोपाभावोऽप्युपपन्नो भवति, एवमपि कंसं 'घा-तयतीत्यत्र 'हो हन्तेर्ञ्णिन्नेषु' इति कुत्वं 'हनस्तोऽचिण्णलोः' इति तत्वं च न प्राप्नोति, किं कारणं धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यं विज्ञायते, एवं तर्हि प्रकृतिवच्चकारकमिति चकारो भिन्नक्रमः कारकमि-त्यस्यानन्तरं द्रष्टव्यः, कार्यशब्दश्चाध्याहार्यः, एतदुक्तं भवति कृत्प्रकृति-र्हन्त्यादिस्तस्याः शुद्धे णिचि यादृशं रूपं भवति तथाऽस्यापि ण्यन्तस्य भवति कार्यं च तद्वदेव भवतीति, एतेनाड्द्विर्वचने अपि व्याख्याते । 'बलिबन्धमिति' । बन्धनं बन्धः बलेर्बन्धो बलिबन्धः पूर्ववत्कर्मणि षष्ठ्याः समासः, शेषं पूर्ववत् । 'राजागमनमिति' । अत्र कर्तरि षष्ठ्याः समासः । 'राजानमागमयतीति' । अत्र कृत्प्रकृतौ राजा कर्ता तस्य गमेः शुद्धे णिचि गतिबुद्धीत्यादिना कर्मसंज्ञा भवतीत्यस्मिन्नप्युपसंख्यानिके णिचि तथैव कर्मसंज्ञा भवति, इह तु देवदत्तपाकमाचष्ट इति णिचि विहिते देवदत्तेन पाचयतीति भवति, नहि देवदत्तस्य शुद्धे णिचि कर्मसंज्ञास्ति गत्यर्थादीनामेवेति नियमात्, इह तु मृगरमणमाचष्टे मृगान् रमयतीति यदा प्रतिपाद्यस्य दर्शनार्थमाख्यानं तदा णिजिष्यते नान्यदा, तत्र यदाऽरण्यस्थो रममाणान्मृगान्प्रतिपाद्यमाचष्टे एतस्मि-न्नवकाशे एवं मृगा रमन्त इति तदा तस्य प्रतिपाद्यदर्शनार्थो प्रवृत्तिरिति

Digitized by Google

णिङ् भवति, यदा तु ग्रामे मृगरमणमाचष्टे तदा तत्र मृगाणामसम्भवाच तद्दर्शनार्थो प्रवृत्तिरिति मृगरमणमाचष्ट इति वाक्यमेव भवति, एतच्च मृगरमणादिविषयमेव राजागमनादौ त्वन्यदापि भवति । 'आङ्लोप इति' । अत्राख्यानादिति न सम्बध्यते, मर्यादायां य आकारस्तस्य लोपो भवति कृल्लुगित्यादि पूर्ववत् । 'आरात्रिविवास इति' विवसनं विवासो ऽतिक्रमणं, रात्रेर्विवासो रात्रिविवासः कर्त्तरि षष्ठ्याः समासः, तत 'आङ् मर्यादाभिविध्यो' रित्यव्ययीभावः, यावद्रात्रेरतिक्रमणं तावत्कथाः कथयतीत्यर्थः । वसेरकर्मकत्वाद्गतिबुद्धीत्यादिना रात्रेः कर्मसंज्ञा हेतुमण्णिचि भवति तद्वदस्मिन्नपि णिचि भवति । 'रात्रिं विवासयतीति' । 'चित्रीकरणे प्रापीति' । तदित्येव, चित्रीकरणमाश्चर्यकरणं, प्रापि प्राप्नोत्यर्थे चित्रीकरणे गम्यमाने तत्प्राप्नोतीत्यस्मिन्नर्थे णिच् भवति, कृल्लुगित्यादि पूर्ववत् । 'सम्भावयतइति' । भू प्राप्तावात्मनेपदी, उज्जयिन्या माहिष्मती विदूरे देशइति तावतो देशस्य प्रागुदयादतिक्रमणमाश्चर्यम् । 'सूर्यमुद्गमयतीति' । प्रकृतिवच्च कारकमिति सूर्यशब्दस्य पृथक्करणं, संग्रामयतेरेव सोपसर्गादिति न्यायादुच्छब्दस्यापि पृथक्करणम्, अत्रापि सूर्यस्य हेतुमण्णिचि कर्मत्वादस्मिन्नपि णिचि कर्मत्वम् । 'नक्षत्रयोगे ज्ञीति' । तदित्येव, ज्ञि जानात्यर्थे नक्षत्रयोगे यत्कृदन्तं वर्त्तते तस्मात्तज्जानातीत्यस्मिन्नर्थे णिङ् भवति, कृल्लुगित्यादि पूर्ववत् । 'पुष्ययोगमिति' । पुष्येण चन्द्रमसो योगः पुष्ययोगः, पुष्येणेति कर्त्तरि तृतीया, 'उभयप्राप्तौ कर्मणी' ति नियमात् षष्ठी न भवति । 'चन्द्रमस इति' । नियमेन गम्यमानत्वादुभयप्राप्तिः, पुष्यो हि चन्द्रमसं युनक्ति सम्बध्नाति तत्र युजेर्गत्यादिष्वनन्तर्भावादण्यौ कर्त्तुः पुष्यस्य शुद्धे णिचि कर्तृत्वमेवेत्यस्मिन्नपि णिचि कर्तृत्वात्तृतीया भवति । 'पुष्येण योजयतीति' । लकारस्तु प्रधानएव कर्त्तरि भवति यथा शुद्धे णिचि, तत्तर्हीदं बहु वक्तव्यं, वक्तव्यम् इह तावत्सूर्यमुद्गमयतीति यो यस्य प्रवर्त्त्यः स तस्याभिप्रायं निर्वर्त्तयति गन्तुश्चायमभिप्रायो माहिष्मत्यां सूर्योद्गमनं सम्भावयेयमिति, तं च सूर्यो

तुल्यार्थत्वात्तद्गता ईक्षणादयः सृष्टौ मुख्याभिप्राया इत्यर्थः । यद्वा कारणगता इति ब्रह्मकारणवादिनाऽपि प्रधानन्तस्यानादितया परमकारणत्वं चानुमतन्तस्य वेदान्तवाक्यप्रसिद्धत्वात्, अतश्चिदचिदीश्वरसमुदायस्य कारणत्वादीक्षणस्यांशे मुख्यत्वभङ्गः स्वीकार्य्यः, ततश्चाचिदतिरिक्तवस्तुनि वेदान्तवाक्यानां सामञ्जस्याभावेन अमानतया वैपरीत्यभङ्गेन सर्वत्रेक्षणं गौणमास्थेयमित्यभिप्रायः भूयस्त्वं बलीयस्त्वशङ्काऽप्यनेन निरस्ता, सर्वकारणवाक्येष्वपीक्षणस्यांशे गौणतयाऽर्द्धजरतीयप्रहाणेन गौणत्वावश्यम्भावात् । ब्रह्मात्म-शब्दयोः प्रधानपरत्वमुपपादयति "ब्रह्मात्मे"ति, अनेन ईक्षत्यधिकरणाक्षेपः फलितः । अधिकयुक्त्यन्तरमाह "स्मृतिन्याये"ति, नन्वयोगव्यवच्छेदनिषेधेनोत्थितस्याधिकरणस्य कथं त्रिपाद्यां सङ्गतिः अस्यां सङ्गतस्य वा कथमयोगव्यवच्छेदप्रतिक्षेपेणोत्थानम् ? किंच न चात्र निरूपणीयमस्ति पूर्वापरवाक्येषु समाकर्षणेन ह्यर्थो निष्कृष्यते, सिद्धान्ते पूर्वापरवर्णनं चासच्छब्दस्यानन्दमयाधिकरणे कृतम्, अतः संशयोत्थानाभावादनारम्भणीयत्वञ्चेति, नैवं प्रधानप्रतिपादनच्छायानुकारिवाक्यविषयत्वात्, न चानन्दमयाधिकरणेन चरितार्थता, असच्छब्दस्य प्रधानपरत्वशङ्कायास्तत्रानपाकृतत्वात् पूर्वापरवाक्यानां परविषयत्वे निरूपितेऽपि प्रकरणाच्छ्रुतेर्बलीयस्त्वादसच्छब्दस्य ब्रह्मपरत्वं हि दुरवगमं तर्हि "अस्मिन्नस्य च तद्योगं शास्ती"ति सूत्रस्यानन्तरमेवानन्दित्वप्राप्तिनिमित्तस्य वस्तुनोऽसच्छब्दवाच्यतया प्रधानत्वमाशङ्क्य तत्रैव निराकरणं कर्त्तव्यमिति चेन्न प्रधानप्रतिपादनच्छायानुकारिवाक्यविचारस्य पादसङ्गत्यभावात्, अतोऽत्रैव निरूप्यत्वे सति पूर्वपक्षयुक्तिवशादयोगव्यवच्छेदनिषेधः फलितः कारणवाक्यानां ब्रह्मपरत्वे अनुपपन्ने सति पूर्वपक्षिणाऽपि वेदप्रामाण्यमभ्युपगच्छता तेषामानर्थक्यपरिहाराय कस्यचिदर्थस्य प्रतिपादकत्वेऽवश्याभ्युपगन्तव्ये सति प्रधानपरत्वे च समञ्जसेऽर्धजरतीयप्रसङ्गपरिहारायेक्षणाद्यमुख्यत्वे च न्याय्ये सति प्रधानातिरिक्तकारणसद्भावानुपपत्तेः, अतस्त्रिपाद्यारम्भे तस्या अन्ययोगव्यवच्छेदपरत्वाभिधानं प्रायिकत्वाभिप्रायं मन्तव्यमिति ॥

भू० इति प्राप्ते प्रचक्ष्महे कारणत्वे चाकाशादिषु यथाव्यपदिष्टोक्तेः च-शब्दस्तु-शब्दार्थे सर्वज्ञात् सर्वेश्वरात्सत्यसङ्कल्पान्निरस्तनिखिलदोषगन्धात् परस्माद्ब्रह्मण एव जगदुत्पद्यत इति निश्चेतुं शक्यते, कुतः आकाशादिषु कारणत्वेन यथाव्यपदिष्टस्योक्तेः, सर्वज्ञत्वादिविशिष्टत्वेन जन्माद्यस्य यत इत्येवमादिषु प्रतिपादितं ब्रह्म यथाव्यपदिष्टमित्युच्यते, तस्यैकस्यैव आकाशादिषु कारणत्वेनोक्तेः "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः "तत्तेजोऽसृजते"त्यादिषु सर्वज्ञं ब्रह्मैव कारणत्वेनोच्यते तथा हि "सत्यं ज्ञानमनन्तं ब्रह्म सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिते"ति ।

टी० इति प्राप्त इति, त्वर्थेन च-शब्देन फलितां प्रतिज्ञामाह "सर्वज्ञादि"ति, परस्माद्ब्रह्मण एवेत्येवकारेण नेति पदानुषङ्गफलितप्रधानप्रतिक्षेपः सूचितः यथाव्यपदिष्टमित्युक्ते श्रुतौ व्यपदिष्टमिति शङ्काव्यावृत्त्यर्थमाह "जन्माद्यस्य यत इत्येवमादिष्वि"ति, अत्राऽयमभिसन्धिः परैस्तु यथाव्यदिष्टोक्तेरिति पदमेवं व्याख्यातं यथा श्रुत्यन्तरेषु व्यपदिष्टन्तथेहाप्युक्तेरिति तदयुक्तं श्रुत्यन्तरेष्वपि प्रधानमेवोक्तं स्यादित्युक्ते किमुत्तरन्तेषु परब्रह्मणः परमकारणत्वेन प्रतिपादितत्वं प्राचीनन्यायैः समर्थितमिति वक्तव्यं तर्हि पूर्वप्रतिपादितप्रकारस्य कारणस्येहाऽपि प्रतिपादितत्वं हेतुतया वर्णनीयम्, अतः कल्पान्तरसापेक्षयुक्तिप्रतिपादकत्वादपि निरपेक्षहेतुप्रतिपादकत्वस्य समुचितत्वादिति, आकाशादिषु कारणत्वेन आकाशादीनां कारणत्वेनेत्यर्थः, अर्थस्वारस्येनाऽत्र व्याख्यातं, दीपे तु सप्तमीस्वारस्येना काशादिपदचिह्नितेषु तेषु वाक्येष्वित्युक्तं तस्माद्वा इति स्वतश्चेतनैकान्तात्म-शब्दोपेतप्रकरणस्मारणार्थमाकाशादिष्वित्युक्तमिति

भावः, न त्वसच्छब्दोपेतप्रकरणं विवक्षितं तद्धि उत्तरसूत्रे विवक्षितं भूयसां बलीयस्त्वमेवास्मिन् सूत्रे हेतुतया विवक्षितम्, अत एव हि सद्विद्यावाक्यमुपादीयते, तत्तेजोऽसृजतेति, आदि-शब्देन मुण्डकोपनिषदादि विवक्षितं धर्मिवाचिनोऽव्याकृतादिपदस्य प्रथमश्रुतत्वाच्चरमावगतमीक्षणादिकं तदाऽनुगुण्येन गौणमित्युक्तमिति शङ्कायान्तु प्रकरणेषु सर्वज्ञत्वादिगुणकस्यैव कारणत्वेन प्रतिपादितत्वमुपपादयति "तथा ही"ति, कारणत्वप्रतिपादनात् प्रागेव कारणत्वधर्मिणः प्रथमत एव चेतनत्वप्रतिपादनं दर्शयति "सत्यं ज्ञानमि"ति, सम्भूत इति सृष्टिप्रतिपादनात्पूर्वमेव प्रयुक्तः स्वतश्चेतनैकान्त आत्म-शब्दः प्रबलतरः, ततः पूर्वमेव तस्य कारणस्य विपश्चित्त्वप्रतिपादनादात्म-शब्दस्य क्लिष्टनिर्वाहशङ्का दूरोत्सारितेत्यभिप्रायेणाह-

सू० प्रकृतं विपश्चिदेव ब्रह्म, तस्माद्वा एतस्मादिति परामृश्यते, तथा "तदैक्षत बहु स्यामि"ति निर्दिष्टं सर्वज्ञं ब्रह्मैव "तत्तेजोऽसृजते"ति परामृश्यते, एवं सर्वत्र सृष्टिवाक्येषु द्रष्टव्यम्, अतो ब्रह्मैककारणं जगदिति निश्चीयते। नन्वसद्वा इदमग्र आसीदि"त्यसदेव कारणत्वेन व्यपदिश्यते, तत्कथमिव सर्वज्ञस्य सत्यसङ्कल्पस्य ब्रह्मण एव कारणत्वं निश्चीयत इत्यत आह-

सू० समाकर्षात् ॥ १५ ॥

"असद्वा इदमग्र आसीदित्यत्रापि विपश्चिदानन्दमयं सत्यसङ्कल्पं ब्रह्मैव समाकृष्यते, कथं तस्माद्वा एतस्मा द्विज्ञानमयादन्योऽन्तर आत्मा-

टी० "प्रकृतं विपश्चिदेवे"ति, तथेति "तत्तेजोऽसृजते"ति कारणत्वप्रतिपादनात् पूर्वमेव तदैक्षतेति ईक्षितृत्वप्रतिपादनादीक्षणानुगुणाङ्कार-

Digitized by Google

त्वात्वं नेयं न तु कारणत्वाणुगामीक्षितृत्वं नेयमित्यर्थः, ततः पूर्वनिर्दिष्ट सदिति पदं तत्साधारणत्वात् न प्रधानपरतया स्वतः प्रतीयते ईक्षण-दर्शनात्, प्रधानविलक्षणकारणं निश्चीयत इति नोपक्रमविरोधः सच्छब्द-स्य इदं-शब्दसामानाधिकरण्यं तु सम्भवतीत्ययमर्थः "ईक्षतेर्नाशब्दमि"-त्यत्र समर्थित इत्यभिप्रायः, एवं सर्वत्रेति "आत्मा वा इदमेक एवाग्र आसीत् स ईक्षत लोकान्नु सृजा" इति स इमान् लोकानसृजत" "यस्स-र्वज्ञः सर्ववित् यस्य ज्ञानमयन्तपः तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते" "एको ह वै नारायण आसीत्" इत्यारभ्य स एकाकी न रमेत सोऽन्यं काममनसा ध्यायीत तद्धिरण्मयमण्डमभवत् तत्र ब्रह्मा चतुर्मुखो ऽजायत अथ पुरुषो ह वै नारायणोऽकामयत प्रजास्सृजेयमि"ति, नाराय-णाद्ब्रह्मा जायते"त्यादिषु सृष्टुक्तेः पूर्वमेव परमचेतनतदसाधारणेक्षणादिक-मवगन्तव्यमित्यर्थः,उपक्रमस्यबहुश्रुतिविरोधादव्याकृतश्रुतिमात्रदौर्बल्य-मर्थसिद्धम् । उत्तरसूत्रशङ्कामाह "नन्वि"ति, सू० समाकर्षात्, असद्वा इद-मित्यादिना समाकर्षः प्रतिज्ञातः, ब्रह्मणा विपश्चिता अन्योऽन्तर आ-त्माऽऽनन्दमयः सोऽकामयतेति वाक्यान्यभिप्रेत्य विपश्चित्त्वादिकमुक्तं, प्रति-ज्ञातार्थविषयवाक्यबुभुत्सां दर्शयति "कथमि"ति, तस्माद्वा इत्यात्म-श-ब्देन कारणविषयेण निर्दिष्टस्य विपश्चिदा-

न्नु० नन्दमयः सोऽकामयत बहु स्यां प्रजायेयेति" इदं सर्वम-सृजत यदिदं किञ्च तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाऽभवदि"त्यादिना ब्राह्मणेनानन्दमयं ब्रह्म सत्य-सङ्कल्पं सर्वस्य स्रष्टृ सर्वानुप्रवेशेन सर्वात्मभूतमभिधाय "तदप्येष श्लोको भवती"त्युक्तस्यार्थस्य सर्वस्य साक्षित्वेन स्फु-दाहृतोऽयं श्लोकः, "असद्वा इदमग्र आसीदि"ति, तथो-त्तरत्र "भीषाऽस्माद्वातः पवते इत्यादिना तदेव ब्रह्म समा-कृष्य सर्वस्य प्रशासितृत्वनिरतिशयानन्दत्वादयोऽभिधीय-

Digitized by Google

न्ते, अतोऽयमन्यस्तद्विषय एव तदानीं नामरूपविभागा-भावेन तत्सम्बन्धितयाऽस्तित्वाभावाद्ब्रह्मैवासच्छब्देनोच्यते "असदेवेदमग्र आसीदि"त्यत्राप्ययमेव निर्देशः, यदुक्तं, "तद्धेदन्तर्ह्यव्याकृतमासीदि"त्यत्र प्रधानमेव जगत्कार-णत्वेनाऽभिधीयते इति, नेत्युच्यते तत्राप्यव्याकृत-शब्दे-नाऽव्याकृतशरीरं ब्रह्मैवाभिधीयते "स एष इह प्रविष्ट आनखाग्रेभ्यः "पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मन आत्मेत्येवोपासीतेत्यत्र स एष इति तच्छब्देनाव्याकृतश-ब्दनिर्दिष्टस्यान्तः प्रविश्य प्रशासितृत्वेनानुकर्षात् "त-त्सृष्ट्वा तदेवानुप्राविशत् अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति स्रष्टुः सर्वज्ञस्य परस्य ब्रह्मणः

टी० नन्दमयस्य स इति पुंल्लिङ्गान्तशब्देन सत्यसङ्कल्पादिगुण-कस्य तदप्येष इति तच्छब्देन च समाकर्ष उपपादितो भवति पूर्वस्माद्वा-क्याद्वसद्वा इति वाक्ये समाकर्ष उक्तः, अनेन प्रकरणाच्छ्रुतिर्बलीयसीत्येत-दपि परिहृतं, ज्ञानविपश्चिदादिबहुश्रुतिप्राबल्यसिद्धेः, तस्मादुत्तरत्र समा-कर्षमाह "तयोत्तरत्रे"ति, भीषाऽस्मादित्यत्र अस्मादित्ययं-शब्दो ब्रह्मण आकर्षकः प्रकृतपरामर्शित्वात् । असच्छब्दार्थमाह "तदानीमि"ति, श्रुत्य-न्तरस्थस्याप्यसच्छब्दस्य उक्तार्थपरत्वमाह "असदेवे"ति, तत्राप्यसद्वा इद-मिति वाक्यस्थकारणविषयासच्छब्दार्थैकार्थ्यात् सत्यसङ्कल्पत्वादिकं सिद्धमित्यभिप्रायः तत्रासच्छब्दोक्तस्य तत्सदासीदित्यनुकर्षप्रदर्शनं सच्छ-ब्दस्य चिदचित्साधारण्यनिबन्धनं, सच्छब्दो हि तुच्छव्यावर्त्तकः न त्वचिद्व्यावर्तकः कारणावस्थायामसद्व्यावृत्तिश्चारम्भणाधिकरणावसेया तद्धेदमित्यादिश्रुतावप्यनुकर्षं दर्शयति "यदुक्तमि"ति, तद्धेदमिति श्रुत्यु-क्तानुप्रवेशनामरूपव्याकरणयोः परमात्मधर्मत्वेन प्रसिद्धिमाह "तत्सृ-ष्ट्वे"ति, प्रधानस्यापि स्व–

सू० कार्यानुप्रवेशेन नामरूपव्याकरणप्रसिद्धेश्च, "अन्तः प्रविष्टः शास्ता जनानां सर्वात्मेति नियमनार्थत्वादनुप्रवेशस्य प्रधानस्याचेतनस्यैवंरूपोऽनुप्रवेशो न संभवति, अतोऽव्याकृतम् अव्याकृतशरीरं ब्रह्म तन्नामरूपाभ्यां व्याक्रियत इति तदेवाविभक्तनामरूपं ब्रह्म सर्वज्ञं सत्यसङ्कल्पं स्वेनैव विभक्तनामरूपं स्वयमेव व्याक्रियत इत्युच्यते, एवं च सतीक्षणादयो मुख्या एव भवन्ति, ब्रह्मात्म–शब्दावपि निरतिशयबृहत्त्वनियमनार्थव्यापित्वाऽभावेन प्रधाने न कथञ्चिदुपपद्येते अतो ब्रह्मैककारणं जगदिति स्थितम् ॥

कारणत्वाधिकरणं समाप्तम् ॥

जगद्वाचित्वाधिकरणम् । सू० जगद्वाचित्वात् ॥ १६ ॥

पुनरपि सांख्यः प्रत्यवतिष्ठते यद्यपि वेदान्तवाक्यानि चेतनं जगत्कारणत्वेन प्रतिपादयन्ति तथाऽपि तन्त्रसिद्धप्रधानपुरुषातिरिक्तं वस्तु जगत्कारणं वेद्यतया न तेभ्यः प्रतीयते तथा हि भोक्तारमेव पुरुषं कारणं वेद्यतयाऽधीयते कौषीतकिनो बालाकिजातशत्रुसंवादे "ब्रह्म ते ब्रवाणीत्युपक्रम्य यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत्कर्म स वै वेदितव्य इति

टी० कार्यानुप्रवेशो युक्त इत्यत्राह "अन्तः प्रविष्ट" इति, पश्यन् चक्षुः शृण्वन् श्रोत्रमि'ति वाक्यात् व्याकरवाणीति सङ्कल्पश्रवणाच्च प्रधानव्यावृत्तिसिद्धावप्यधिकहेतुज्ञापनार्थं परिहारान्तरमुक्तं वेदान्तवाक्यविशेषविवक्षितोऽनुप्रवेशविशेषो न सम्भवतीत्यर्थः, अनुप्रविश्य नियमनस्य पुरुषव्यावर्तनक्षमत्वेऽपित्रापेक्षितं प्रधानव्यावर्तनमात्रमितिप्रधानमात्रस्य

Digitized by Google

तदसम्भवोक्तिः, अस्येन व्याकृतत्वशङ्काव्युदसनार्थं तन्नामरूपाभ्यां व्याक्रियतेति वा अयखण्डमुपादाय व्याचष्टे "तद्वे"ति, असच्छब्दोक्तकारणविषयेण तदात्मानं स्वयमकुरुतेत्यनेनैकार्थ्यादिति भावः । असदव्याकृतादिशब्दानां ब्रह्मण्यघटमानत्वेन पराभिमतानाम् उपपन्नतोक्ता । अथेक्षणादीनां ब्रह्मण्येवोपपन्नत्वं प्रधानेऽनुपपन्नत्वं चाह "एवञ्चे"ति, असदव्याकृतादिशब्दा ईक्षणादयश्च ब्रह्मण्युपपन्नाः, प्रधाने त्वीक्षणादयोऽनुपपन्ना इति वैषम्यं दर्शितम्भवति । अधिकरणार्थमुपसंहरति "अत"इति, कारणत्वाधिकरणं समाप्तम् ॥ सू· जगद्वाचित्वात्, सङ्गतिमाह "यद्यपी"ति, "स वै वेदितव्य इत्यन्तं विषयवाक्यं दर्शितं कारणवाक्यप्रतिपाद्यं किं प्रकृत्यधिष्ठाता पुरुषः? उत परमात्मे? ति संशयस्वरूपमर्थसिद्धं तदर्थं बालाक्यजातशत्रुसंवादे वेदितव्यतयोपदिष्टं ब्रह्म किं जीव? उत परमात्मे? ति किमेतेषां पुरुषाणां कर्त्तेति निर्दिष्टः कर्त्ता जीवः? उत पर? इति यस्य चैतत्कर्मेति कर्म-शब्दः किं पुण्यापुण्यवाचि? उत जगद्वाची? ति किमेतच्छब्दसामानाधिकरण्येन कर्म-शब्दस्य जगद्वाचित्वं युक्तम्? उत एतेषां पुरुषाणां कर्त्तेति पृथग् निर्देशावैयर्थ्याय पुण्यापुण्यवाचित्वं युक्तं? तौ ह सुप्तं पुरुषमित्याद्यवगते जीवमुख्यप्राणलिङ्गे पुण्यापुण्यवाचितामुपोद्बलयतो नेति किमेते लिङ्गे जीवबोधनार्थे? उत क्व वा इत्यादिप्रश्नप्रतिवचनाभ्यां जीवातिरिक्तब्रह्मबोधनपरे,? यदा जीवबोधनार्थे तदा तयोः पुण्यापुण्यवाचित्वोत्तम्भकत्वेन पृथङ्निर्देशावैयर्थ्याय कर्म-शब्दस्य पुण्यापुण्यवाचितोपपत्तेस्तत्सम्बन्धीकर्त्ता पुरुष इति बालक्यजातशत्रुसंवादस्य जीवपरत्वात् सर्ववेदान्तवेद्यो भोक्ता पुरुष इति फलितं स्यात्, यदा ब्रह्मप्रतिबोधनपरे तदा तयोर्लिङ्गयोः पुण्यापुण्यवाचित्वोत्तम्भकत्वाभावादेतच्छब्दसामानाधिकरण्येन इह कर्म-शब्दस्य जगद्वाचित्वात्तत्कर्त्ता जीवविलक्षण इति बालाक्यजातशत्रुसंवादस्य परमात्मविषयतया सर्ववेदान्तवेद्यः परमात्मेति सिद्ध्यतीति विषयेऽर्थसिद्धे सति पूर्वपक्षमाह–

सू० उपक्रमे वक्तव्यतया बालाकिनोपक्षिप्तं ब्रह्माजानते

Digitized by Google

तस्मा एव अजातशत्रुणा स वै वेदितव्य इति ब्रह्मोपदिश्यते, यस्य वैतत्कर्मेति कर्मसम्बन्धात्प्रकृत्यध्यक्षो भोक्ता पुरुषो वेदितव्यतयोपदिष्टं ब्रह्मेति निश्चीयते नार्थान्तरस्यास्य कर्मसम्बन्धानभ्युपगमात्, कर्म च पुण्यपापलक्षणं क्षेत्रज्ञस्यैव सम्भवति, न च वाच्यं क्रियत इति कर्मेति व्युत्पत्त्या प्रत्यक्षादिप्रमाणोपस्थापितं जगदेतत्कर्मेति निर्दिश्यते यस्यैतत्कृत्स्नं जगत्कर्म स वेदितव्य इति क्षेत्रज्ञादर्थान्तरमेव प्रतीयत इति यो वै बालाक एतेषां पुरुषाणां कर्त्ता यस्य चैतत्कर्मेति पृथङ्निर्देशवैयर्थ्यात्, कर्म-शब्दस्य च लोकवेदयोः पुण्यापुण्यरूप एव कर्मणि प्रसिद्धेः तत्तद्भोक्तृकर्मनिमित्तत्वाज्जगदुत्पत्तेः, एतेषां पुरुषाणां कर्त्तेति च भोक्तुरेव चोपपद्यते

टी० "उपक्रम"इति, प्रतिवचनस्य उपक्रमस्यब्रह्मविषयत्वेन ब्रह्मणोऽन्यस्य जीवस्य कर्मसम्बन्धपरत्वशङ्का निरस्ता, ततः किमित्यत्राह "यस्ये"ति, नार्थान्तरं प्रकृतिबद्धेश्वरोऽपीत्यर्थः यज्ञादिकं कर्म यस्य प्रीणनमित्येतदर्थपरत्वव्युदासायाह "कर्म चे"ति, कर्म-शब्दोऽसङ्कुचितवृत्तिः पापमपि वक्तीति कर्माराध्यपरत्वमयुक्तमिति भावः। अत्रानन्दमयाऽधिकरणाक्षेपः फलितः। पादसंगतिः पूर्ववद् भोक्तृपुरुषप्रतिपादनच्छायानुसारिवाक्यविषयत्वात्कर्तृत्वस्य जीवे सम्भवद्रूपपूर्वपक्षहेतुवशादयोगव्यवच्छेदाक्षेपः फलितः। सिद्धान्तमाशङ्क्याह "न चे"ति, पौनरुक्त्यापादनेन परिहरति "यो वा इति, हेत्वन्तरमाह "कर्म-शब्दस्य चे"ति, रूढिर्हि योगाद् बलीयसीत्यर्थः। सर्वकर्तृत्वं कथमित्यत्राह "तत्तदि"ति, इह निर्दिष्टानां भोक्तृणामनिर्दिष्टानां च तत्सजातीयानां ज्ञाततया नोपदेष्टव्यत्वं न च वेदितव्यमित्यत्राह–

भा० तदयमर्थः एतेषामादित्यमण्डलाद्यधिकरणानां चेतनस-भोग्यभोगोपकरणभूतानां पुरुषाणां यः कारणभूतः एतत्का-रणभावहेतुभूतपुण्यापुण्यलक्षणं च कर्म यस्य स वै वेदि-तव्यः तत्स्वरूपं प्रकृतेर्विविक्तं वेदितव्यमिति, तथोत्तरत्र "तौ ह सुप्तं पुरुषमाजग्मतुः तं यष्टिना विचिक्षेपे"ति सुषुप्त-पुरुषागमनयष्टिघातोत्थापनादीनि भोक्तृत्वप्रतिपादन एव लिङ्गानीति, तथोपरिष्टादपि भोक्तैव प्रतिपाद्यते तद्यथा "श्रेष्ठैः स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्ति एवमे-वैष प्रज्ञात्मा एतैरात्मभिर्भुङ्क्ते एवमेवैते आत्मान एनं भुञ्ज-न्ती"ति यथा चैष एतद्वालाके पुरुषोऽशयिष्ट क्व वा एतदभूत कुत एतदागा"दिति पृष्टमर्थमजानते तस्मै स्वयमेवाजातशत्रुरुवाच हिता नामनाड्यस्तासु तदा भवति यदा सुप्तः स्वप्नं न कथञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति मनस्सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते यथाऽग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गाः विप्रतिष्ठेरन् एवमेवैतस्मादात्मनः प्राणाः यथाऽऽयतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका इति सुषुम्नाधारतया स्वप्नसुषुप्तिजागरितावस्थासु वर्त्त-मानं वागादिकरणाप्ययोद्गमस्थानमेतमेव जीवात्मानम-थास्मिन्प्राण एवैकधा भवति इत्युक्तवान्

टी० "तदयमर्थ"इति, कर्तृत्वे हेतुः क इत्यपेक्षायां यस्य वैतत्क-र्मेति कर्मेत्योपपादनं शुद्धस्वरूपं चाविदितं, कर्मसम्बन्धस्तु उपलक्षणमि-त्यर्थः, एवं कर्मनिमित्तभोक्तृत्वात् जीवत्वमुक्तं तदेव यष्टिघातोत्थापना-

Digitized by Google

च्छेष्ठिदृष्टान्तात् सुषुप्तिप्रबोधादियोगाच्चोपपादयति "तथोत्तरत्रेत्या"-दिना, सुषुप्तिस्थानं नाड्यः न परमात्मेत्यभिप्रायेण हिता नाम नाड्य इति वाक्यमुदाहृतं, तदानीं तदा-शब्दः सुषुप्तिवेलापरः स्यात्,सर्वैर्नामभिस्सर्वैर्ध्यानैरिति तत्तत्करणमुपरतस्वस्वव्यापारमित्यर्थः, एतस्मादात्मनः प्राणा इति प्राण-शब्दः पञ्चवृत्तिप्राणपर इति पूर्वपक्षी मन्यते देवा इन्द्रियाणि लोका ज्ञानं विषयो वा सुषुप्त्याधारता सुषुप्तिमत्त्वं सुषुप्त्याधारतयोक्तत्वानित्यन्वयः, प्राण-शब्दस्य प्रथमान्तत्वशङ्कां मुख्यप्राणपरमात्मपरत्वशङ्कां च निराकर्त्तुं व्याचष्टे-

सू० अस्मिन् जीवात्मनि प्राणश्चब्दनिबन्धनोऽयं प्राण-शब्दः स यदा प्रतिबुध्यत इति प्राण-शब्दनिर्दिष्टस्य प्रबोधश्रवणान्मुख्यप्राणस्येश्वरस्य च सुषुप्तिबोधयोरसम्भवात् अथवा अस्मिन् प्राण इति व्यधिकरणसप्तम्यौ अस्मिन्नात्मनि वर्त्तमाने प्राण एवैकधा भवति वागादिकरणग्राम इति प्राण-शब्दस्य मुख्यप्राणपरत्वेऽपि जीव एवास्मिन् प्रकरणे प्रतिपाद्यते स्वतः प्राणस्य जीवोपकरणत्वात्, अतो वक्तव्यतयोपक्रान्तं ब्रह्म पुरुष एवेति तद्व्यतिरिक्तेश्वरासिद्धिः कारणगताश्चेतनादयश्चेतनधर्म्मा अस्मिन्नेवोपपद्यन्त इत्येतदधिष्ठितप्रधानमेव जगत्कारणमिति

टी० "अस्मिन् जीवात्मनी"ति, तदुपपादयति "स यदे"ति, प्रबोधः श्रूयतां ततः किमित्यत्राह "मुख्यप्राणस्ये"ति, प्रथमान्तत्वासम्भवोऽतिप्रसिद्ध इति न कण्ठोक्तः, तदा ह्येकधा भवतीत्यनेन वागादिकरणानामिव निवृत्तव्यापारतयाऽवस्थानं तूक्तं स्यात्, तच्च विरुद्धं स्वापे ऽपि प्राणव्यापारोपलब्धेरवधारणानुपपत्तिश्च वागाद्युपरतेः प्रतिपाद्यमानत्वात्, न च वाच्यं प्राण एवानुपरतव्यापार एकरूपस्थित इत्यर्थ इति प्रत्यक्षसिद्धार्थस्य प्रतिपादनवैयर्थ्यात् प्राणस्य स्वाधीनेन्द्रियस्थितिप्रवृत्तित्वरूपं प्राधान्य

विवक्षितमिति चेन्नतु सर्वदा भवतीति स्वापदशायान्तत्प्रतिपादनमसङ्गतं स्यात्, अतः सप्तम्यन्तत्वमङ्गीकृत्य जीवपरत्वमुपपादितम्, अस्यां योजनायां सम्यप्तन्तपदयोः सामानाधिकरण्यस्वारस्येऽपि प्राण-शब्दस्य लाक्षणिकत्वं तद्व्यावृत्त्यर्थं योजनान्तरमाह "अथ वे"ति क एकधा भवतीत्यत्राह "वागादिकरणग्राम"इति, प्राणाधिकरणवाचितया अधिकरणस्यास्मिन्निति पदस्य परमात्मपरत्वमाशङ्क्याह "प्राण-शब्दस्ये"ति, कुत इत्यत्राह "स्वत" इति, धर्मान्तराणामपि जीवे सम्भवन्दर्शयन् पूर्वपक्षमुपसंहरति "अत"इति, अस्मिन्नधिकरणे प्राणजीवपरमात्मविषयतया त्रिशिरस्को विचार इतरैः कृतः, तत्रेह वेदितव्यतयोपदिष्टपुरुषस्य प्राणानामभिरामन्त्रणाश्रवणादिना मुख्यप्राणवैलक्षण्यस्य स्फुटत्वाद् द्विशिरस्को विचार उपपन्न इत्यभिप्रायेण जीवपरत्वमेव पूर्वपक्षीकृतम् । ननु समष्ट्यात्मा हिरण्यगर्भः प्राणशब्दविषयत्वेन शङ्कित इति युक्तं त्रिशिरस्कत्वं विचारस्य न परिस्पन्दलक्षणकर्मसम्बन्धस्य हेतुतयोपन्यासानुपपत्तेः परिस्पन्दात्मकं कर्म हि मुख्यप्राणधर्मतया प्रसिद्धं न तु हिरण्यगर्भधर्मतया प्राणसमष्ट्यभिमानित्वाद्धिरण्यगर्भस्य प्राणधर्मेण कर्मणा विशेष्यत्वं युक्तमिति चेत् हिरण्यगर्भः किं भवत्पक्षे क्षेत्रज्ञोऽभिमत ? उत ईश्वर ? इति, ईश्वरत्वे हिरण्यगर्भपरत्वं सिद्धान्तीकर्त्तव्यम् अतो न पूर्वपक्षतामर्हति परमेश्वर एवायमेतेषां पुरुषाणां कर्त्ता स्यादिति हि भवतां सिद्धान्तप्रतिज्ञा, यदि क्षेत्रज्ञोऽभिमतः तर्हि जीवपरत्वप्रतिक्षेपादेव तत्परत्वं प्रतिक्षिप्तं भवतीति प्राणो न पृथग्विचार्यः किं जीवमात्रपरः ? उत जीवविशेषपर इति ? सन्देहो युक्त चेन्न एकस्मिन् प्रकरणे सामान्यशब्देनाऽर्थप्रतिपादनेऽपि विशेषोपस्थापके सति तस्य तत्पर्यवसानस्य न्याय्यतया हिरण्यगर्भो वा परमात्मा वेति द्विशिरस्क एव संशयः स्यात् । ननु जीवमुख्यप्राणलिङ्गादिति सूत्रेण पूर्वं त्रयद्योतनायुक्तं विचारत्रयमिति चेत् न जीवसाधकत्वेन मुख्यप्राणलिङ्गस्य शङ्कितत्वात् जीवोपकरणावगमो हि जीवसाधकः, अतो मुख्यप्राणवैलक्षण्यस्य स्फुटत्वात् प्राण-शब्दस्य हिरण्यगर्भवाचित्वे स्वरस्याभावाच्च जीवविषयः पूर्वपक्ष उपन्यस्तः । राद्धान्तमाह

भू० प्राप्ते प्रचक्ष्महे सू. जगद्वाचित्वात्, अत्र पुण्यापुण्यपरवशः क्षुद्रः क्षेत्रज्ञः स्वस्मिन् प्रकृतिधर्माध्यानेन तत्परिणामहेतुभूतः पुरुषो नाऽभिधीयते अपि तु निरस्तसमस्ताविद्यादिदोषगन्धोऽनवधिकातिशयासंख्येयकल्याणगुणगणनिधिः निखिलजगदेककारणभूतः पुरुषोत्तमोऽभिधीयते कुतः, यस्य चैतत्कर्मेत्यत्र एतच्छब्दान्वितस्य कर्म–शब्दस्य परमपुरुषकार्यभूतजगद्वाचित्वादेतच्छब्दो ह्यर्थप्रकरणादिभिरसङ्कुचितवृत्तिरविशेषेण

टी० "इति प्राप्त"इति पूर्वपक्षे कर्त्रादिशब्दानामस्वारस्यं स्वमते स्वारस्यं चाभिप्रेत्य तदुपपादकं जीवपरयोः स्वभावविशेषं वदन् प्रतिजानीते "अत्रेत्या"दिना, प्रकृतिधर्माध्यासेन स्वस्मिन् प्रकृतिगतकर्तृत्वाध्यासेनेत्यर्थः, नेति पदानुषङ्गसिद्धार्थ उक्तो नाभिधीयत इत्यन्तेन सोत्रहेतुबलसिद्धं प्रतिज्ञांशमाह "अपि त्वि"ति, यादृशस्य कर्म शब्दस्य जगद्वाचित्वं युक्तं तादृशत्वं सूत्रकाराभिप्रेतमिति मन्वानः कर्म–शब्दं विशिनष्टि "एतच्छब्दान्वितस्ये"ति, । नन्वेतच्छब्दः प्रकृतपरामर्शी तत् कथम् अप्रकृतजगत्परामर्श इत्यत्राह "एतच्छब्दो ही"ति, अर्थप्रकरणादिभिरिति, अर्थ–शब्देन स्ववाक्यस्य पदान्तरान्वययोग्यत्वं विवक्षितं प्राचीनवाक्यनिचयः प्रकरणम्, आदि–शब्देन उपरितनवाक्यानि विवक्षितानि। यद्वा पूर्वापरवाक्यजातं प्रकरणम्, आदि–शब्देन तात्पर्यलिङ्गानि विवक्षितानि असङ्कुचितवृत्तिरिति लिङ्गवचनविरोधात् पुरुषपरामर्शोऽनुपपन्नः पुण्यपापरूपं कर्माप्रकृतम् अप्रकृतमपि कर्तृत्वकारणतया परिकल्प्य धीस्यत्वापादनमत्यन्तविलम्बितम्पुरुषनिर्माणरूपव्यापारमेतत्कर्मेति निर्दिश्य यस्येति तत्सम्बन्धे विवक्षिते पुनरुक्तिः स्यात् निर्माणव्यापाराश्रयत्वस्य कर्तृशब्देनेवाभिहितत्वात्, अतः सङ्कोचकाभावादसंकुचितवृत्तिरिति भावः । तर्ह्यप्रकृतं जगत् कथमुपस्थाप्येतेत्यत्राह–

भा० प्रत्यक्षादिप्रमाणोपस्थापितनिखिलचिदचिन्मिश्रजगद्विषयः, न च पुण्यापुण्यलक्षणं कर्मैव कर्म-शब्दाभिधेयं ब्रह्म ते ब्रवाणीत्युपक्रम्य ब्रह्मत्वेन बालाकिना निर्दिष्टानामादित्यमण्डलाद्यधिकरणानां पुरुषाणामब्रह्मत्वेन मृषा वै खलु मा संवादयिष्ठा इति तमब्रह्मवादिनमपोद्य तेनाविदितब्रह्मज्ञापनायाजातशत्रुणेदं वाक्यमवतारितं, यो वै बालाक इत्यादि पुण्यापुण्यलक्षणकर्मसम्बन्धिन आदित्याद्यधिकरणास्तत्सजातीयाश्च पुरुषास्तेनैव विदिता इति तद्विदितपुरुषविशेषज्ञापनपरोऽयं कर्म-शब्दो न पुण्यापुण्यमात्रवाची क्रियामात्रवाची वा अपि तु कृत्स्नस्य जगतः कार्यत्ववाची ।

टी० "प्रत्यक्षादी"ति, एतच्छब्दः सन्निहितपरामर्शी, सन्निधिश्च बुद्धिस्थितिः, सा च प्रकरणतो वा प्रकृतार्थान्तरसम्बन्धित्वेन वा प्रसिद्धितो वा भवति, तत्र प्रकरणादिना सङ्कोचानुपपत्तेः परिशेषात् प्रसिद्धार्थपरामर्शित्वे सति तत्राऽपि सङ्कोचकाभावात् निखिलचिदचिन्मिश्रजगद्विषय इत्यर्थः । चिदचिन्मिश्रेति जगदेकदेशभूतस्यादित्यादेः प्रकृतत्वादेकदेशि च जगत्तद्द्वारा बुद्धिस्थम् अतश्च जगत्परामर्शो युक्त इति भावः । रूढेर्योगात् प्राबल्यमेतच्छब्दस्वारस्यं च तुल्यं तत्कस्यानुरूपोऽर्थनिश्चय इत्यपेक्षायामाह "न च पुण्ये"ति, तुल्यत्वनिवारकबलीयस्त्वसिद्धये हेत्वन्तरमाह "ब्रह्मन्त"इति, ततः किमित्यत्राह "पुण्यापुण्ये"ति क्रियामात्रवाचीवेति दृष्टान्ततयोक्तं यथा वेदितव्यतया प्रकृतस्य प्राणानामभिरामन्त्रणाश्रवणादिना

एवमेव व्यस्त्वविदितोऽर्थ उपदिष्टो भवति पुरुषस्य कर्मसंबन्धोपलक्षितस्वाभाविकस्वरूपस्याज्ञातस्य वेदितव्यत्वोपदेशे च लक्षणा कर्मसंबन्धमात्रस्यैव वेदितव्यस्वरूप-

लक्षणत्वाद्यस्य कर्म स वेदितव्य इत्येतावतैव तत्सिद्धेः; यस्य वै तत्कर्मेत्येतच्छब्दवैयर्थ्यं च, य एतेषां कर्ता यस्य वै तत्कर्मेति पृथङ्निर्देशस्य चायमभिप्रायः, ये त्वया ब्रह्मत्वेन निर्दिष्टाः पुरुषाः तेषां यः कर्ता ते यत्कार्यभूताः किं विशिष्याभिधीयते कृत्स्नं जगद्यस्य कार्यम् उत्कृष्टा अपकृष्टाश्चेतना अचेतनाश्च सर्वे पदार्था तत्कार्यत्वे तुल्याः स परमकारणभूतः पुरुषोत्तमो वेदितव्य इति जगदुत्पत्तेर्जीवकर्मनिबन्धनत्वेऽपि न जीवस्स्वभोग्यभोगोपकरणादेस्स्वयमुत्पादकः, अपि तु स्वकर्मानुगुण्येनेश्वरसृष्टं सर्वं भुङ्क्ते, अतो न तस्य पुरुषान्प्रति कर्तृत्वमुपपद्यते ॥

प्राणवैलक्षण्यस्य स्फुटत्वात्प्रकरणस्य बालाक्यविदितपुरुषविशेषाज्ञापने प्रवृत्तत्वाच्च मुख्यप्राणस्य लोकाविदितत्वाच्च कर्म-शब्दो न मुख्यप्राणव्यापारभूतक्रियामात्रवाची, एवमेव पुण्यापुण्यमात्रवाची न भवतीत्यर्थः। आदित्यमण्डलाद्यधिकरणानां पुरुषाणामिति अस्य वाक्यस्य यः कर्तेत्यनूद्य वेदितव्यविधिपरत्वाच्चक्षोस्सूर्यो अजायत नाभ्या आसीदन्तरिक्षं सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् दिवञ्च पृथिवीं चेत्यादि प्रापकवाक्येषु आदित्यादिपुरुषाणां द्युपृथिव्यादिजगतश्च पृथक् सृष्टिप्रतिपादनादिहापि पुरोवादानुरोधेनादित्यादिभिस्सह जगन्निर्देशाश्रयणं युक्तमिति भावः। क्रियत इत्यवयवार्थस्य प्रवृत्तिनिमित्तत्वज्ञापनाय जगतः कार्यत्ववाचीत्युक्तं, कार्यभूतजगद्वाचीत्यर्थः, जगद्वाचित्वे सति अविदितार्थोपदेशपरत्वोपपत्तिमाह "एवमेवे"ति, अनेकहेत्वपेक्षया एको हेतुर्दुर्बलः, अतः सङ्कोचरहिते शब्दस्वारस्यादविदितपुरुषविशेषोपदेशोपक्रमाच्च पुरोवादानुरोधाच्च कर्म-शब्दस्य जगद्वाचित्वं युक्तमित्यर्थः । अविदितत्वं कर्मसम्बन्धर-

Digitized by Google

हितस्वरूपस्य पुरुषस्य सम्भवतीत्यत्राह "पुरुषे"ति, कर्मसम्बन्धिवाचिपदस्य कर्मरहितोपस्थापकत्वमयुक्तं, न चावस्याद्वयसाधारणात्मशब्दोऽपि प्रयुक्तः यस्य कर्म स वेदितव्य इति हि निर्देशः, अतो लक्षणेत्यर्थः, एतच्छब्दस्य तदुक्तार्थपरत्वेऽनिष्टमाह 'यस्य कर्मे"ति, त्वन्मतेऽपि वैयर्थ्यं तुल्यमित्यत्राह "य एतेषामि"ति, य एतेषां पुरुषाणां कर्त्तेति निर्देशो बालाकिनोक्तानां कार्य्यत्वनाब्रह्मत्वज्ञापनार्थं तेषां कर्त्तेति प्रतिपादनमात्रेण तदुक्तादित्यादिभ्योऽपि अधिकहिरण्यगर्भादिदेवताविशेषसमन्वितब्रह्मजगत्कारणत्वं न सिध्यतीति यस्य चैतत्कर्म युक्तं जगत्कर्तृत्वस्य सन्निहितविषयतयाऽवच्छिन्नत्वव्यावृत्त्यर्थमेतेषां कर्त्तृत्वमित्यर्थः । विपक्षे दूषणान्तरमाह "जगदुत्पत्तेरि"ति, स्वकर्मानुगुण्येनेश्वरसृष्टं सर्वं भुङ्क्त इति, न हि घटादिकर्तृत्वं विनियोगादृष्टवतः पुरुषस्य अपि तु कुलालस्येति भावः । मुक्तपरत्वे कर्मवाचिपदलक्षणा एतच्छब्दवैयर्थ्यं कर्तृ—शब्दास्वारस्यं चोक्तं चरमं हेतुद्वयं बद्धपरत्वेऽपि तुल्यम्

सू० अतः सर्वं वेदान्तेषु परमकारणतया प्रसिद्धं परं ब्रह्मैवात्र वेदितव्यतयोपदिश्यते ॥

सू० जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥ १७ ॥

अथ यदुक्तं जीवलिङ्गान्मुख्यप्राणसङ्कीर्त्तनाच्च लिङ्गाज्जीवोऽस्मिन् प्रकरणे प्रतिपाद्यते न परमात्मेति तद्व्याख्यातं तस्य निर्वाहः प्रतर्दनविद्यायामभिहितः, एतदुक्तं भवति यत्रोपक्रमोपसंहारपर्यालोचनया ब्रह्मपरं वाक्यमिति निश्चितं तत्रान्यलिङ्गानि तदनुरोधेन वर्णनीयानीति तच्च प्रतिपादितम् अत्राप्युपक्रमे ब्रह्म ते ब्रवाणीति ब्रह्मापक्षिप्तं मध्ये च यस्य चैतत्कर्मेति निर्दिष्टं न पुरुषमात्रम् अपि तु निखिलजगदेककारणं ब्रह्मैवेत्युक्तम्

Digitized by Google

टी० अतः सर्ववेदान्तेषु परमकारणतया प्रसिद्धमिति एतेषां यः कर्त्ता यस्य चैतत्कर्मेति यच्छब्देनानुवादरूपत्वप्रतिपत्तेर्यतो वा इमानी-त्यादिष्विव सर्ववेदान्तप्रसिद्धः परमपुरुष एवात्र कारणमनूद्यत इति भावः। एवं प्रथमवाक्यगतहेतुः परिहृतः, अथोपरितनवाक्यगत हेतुमनूद्य परि-हरति सू० जीवमुख्यप्राणलिङ्गाच्चेति चेत्तद् व्याख्यातम्, जीवलिङ्गान्मुख्यप्रा-णसङ्कीर्त्तनाच्चेति समासान्तर्गता जीवमुख्यप्राणयोरिति षष्ठी संबन्धसा-मान्यविषया, ततश्च जीवस्य लिङ्गित्वेन सम्बन्धः ज्ञाप्यतया मुख्यप्राणस्य च वाच्यतया सम्बन्धः इत्यर्थवशात्सिद्ध्यतीति भावः। यद्वा लिङ्गं ज्ञापकम् उभयोरपि विज्ञाप्यतया ज्ञापकेन सम्बन्ध इति भावः, जीवस्य लिङ्गं ज्ञापकं मुख्यप्राणस्य सङ्कीर्त्तनं ज्ञापकं मुख्यप्राणसङ्कीर्त्तनाच्च लिङ्गादिति द्युक्तं, कर्म-शब्दस्य स्पन्दरूपक्रियावाचित्वानुपपत्तेः परिशेषात्कीर्त्तनमेव प्राणलिङ्गमित्यभिप्रायः, उपकरणभूतमुख्यप्राणज्ञापकं तत्कीर्त्तनमपि तदुपक-रणिनो जीवस्य प्रतिपाद्यत्वे हेतुरित्यभिप्रायेण सूत्रे मुख्यप्राणलिङ्गमुपात्तं न तु प्राधान्येन मुख्यप्राणस्य प्रतिपाद्यत्वसाधकतयोपन्यस्तं तत्प्रतिपाद-कशङ्कानुत्थानस्य दर्शितत्वात् निर्वाहः-परिहारः प्रतर्दनविद्यायां कथं परिहृतं, तत्रातिदेष्टव्यांशः कः? स चात्र कथं घटत इत्यत्राह "एतदुक्तं भवती"ति, तदनुरोधेन वर्णनीयानीत्यन्तेनातिदेष्टव्यांशः उक्तः न सूपास-नार्थत्वमप्यतिदेष्टव्यमिति भावः। तस्याऽत्र संघटितत्वं दर्शयति "अत्रा-प्युपक्रम"इति, ब्रह्मोपक्षिप्तमिति ब्रह्म-शब्दस्य परस्मिन्नेव मुख्यत्वात्त-त्परत्वं स्वतः प्राप्तमुपक्रमावगतत्वात् प्रबलञ्चेति भावः। ब्रह्मैवेत्युक्तमिति मध्यगतवाक्यस्य परमात्मपरत्वस्योपपादितत्वान्मध्येऽपि परमात्मपरत्वं प्रतिपन्नमित्यर्थः ॥

भा० उपसंहारे च सर्वान् पाप्मनोऽपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेदेति ब्रह्मोपासनै-कान्तं सर्वपापापहतिपूर्वकं स्वाराज्यं च फलं श्रुतम् अतो-ऽस्य वाक्यस्य ब्रह्मपरत्वविनिश्चयेन जीवमुख्यप्राणलिङ्गान्यपि

तत्परतया वर्णनीयानीति प्रातर्दने ह्युपासात्रैविध्येन जीव-मुख्यप्राणलिङ्गानां ब्रह्मपरत्वमुक्तम् अथाप्यथास्मिन् प्राण एवैकधा भवतीति सामानाधिकरण्यसम्भवे वैयधिकरण्य-संश्रयणायोगात् ब्रह्मण्येव प्राण-शब्दप्रयोगनिश्चयेन च प्राणशरीरकब्रह्मोपासनार्थं प्राणसङ्कीर्त्तनं लिङ्गं युज्यते, जीवलिङ्गानां ब्रह्मपरत्वं पुनः कथमित्यत्राह-

सू० अन्यार्थं तु जैमिनिः प्रश्नव्याख्याना-भ्यामपि चैवमेके ॥ १८ ॥

तु-शब्दो जीवसङ्कीर्तनेन वाक्यस्य तत्परत्वसम्भावनाव्या-वृत्त्यर्थः,

टी० उपसंहारे चेति सर्वपापहतिपूर्वकं स्वाराज्यमित्यनेन श्रैष्ठ्या-धिपत्य-शब्दयोः स्वाराज्यविशेषणत्वमेव न तु पृथक्फलवाचित्वं च-शब्दा-भावादित्यभिप्रेतं सर्वान् पाप्मनोऽपहत्येत्यनेन अपहतपाप्मत्वादिगुणाष्टक-मुक्तं जरादीनामपि पाप्मान्तर्गतत्वात्, उक्तं च वाक्यकारैः स्युः पाप्मानः का-लजरामृत्युशोकादयः सङ्घातत्वादि”ति, स्वाराज्यं-स्वाधीनत्वम्, अतःस-त्यकामत्वं सत्यसङ्कल्पत्वं चोक्तम्भवति तत्स्वाराज्यं संसारिभ्योऽस्य श्रैष्ठ्यरूप-माधिपत्यम् अधिपतिः-परमात्मा “सर्वस्याधिपतिरि”ति श्रुतेः, तत्सम्ब-न्ध्याधिपत्यं गुणाष्टकं हि ब्रह्मसम्बन्धितया ब्राह्ममुच्यते, “ब्राह्मेण जैमि-नि”रिति अतो ब्रह्मसम्बन्धितया तत्साधर्म्यरूपं संसारिभ्यः श्रैष्ठ्यरूपं स्वाराज्यमेतीति श्रुतेरर्थ इत्यभिप्रायः । अनेन ग्रन्थेन फलविशेषकीर्त्तनस्य परमात्मपरत्वे हेतुतोपन्यासो ब्रह्माज्ञानवादिनामनुपपन्न इत्यर्थो दर्शितो भवति, अविद्यानिवृत्त्यतिरेकेण स्वाराज्य-शब्दवाच्याभावाद्दुःखाभावाभि-प्रायत्वे लक्षणा, सगुणप्राप्तिविषयं वाक्यमिति चेत् सत्यं निर्गुणप्राप्तेर-प्रामाणिकत्वाद्विशेषणवैयर्थ्यमेव न हि ततः प्राप्यान्तरमुक्तम् उपनिषदः समाप्तत्वात् । स्वाराज्यं फलं श्रूयते ततः किमित्यत्राह “अतोऽस्ये”ति,

अत्र निर्वाहप्रकारं दर्शयितुं तत्रोक्तं विशेषमाह "प्रातर्दने ही"ति, त्रैविध्येनेति हेतौ तृतीया, प्रयोजनतया च हेतुत्वमुपासात्रैविध्यसिद्ध्यर्थमित्यर्थः । अस्मिन्निर्वाहेऽत्र सम्भवदंशमाह "अत्रापी"ति, प्रातर्दनोपन्यासन्यायेन प्राणलिङ्गस्य ब्रह्मपरत्वमुक्तमित्यर्थः, जीवलिङ्गस्य तु प्रकारान्तरेण निर्वाहप्रतिपादकमनन्तरसूत्रमवतारयितुं जीवलिङ्गनिर्वहणाकाङ्क्षां दर्शयति जीवलिङ्गानामिति, सू॰ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्याम् अपिचैवमेके, जीवप्राणलिङ्गयोर्द्वयोरपि निर्वाहमुक्त्वा मतान्तरेण तयोर्निर्वाहमाहेतिशङ्काव्यावृत्त्यर्थमाह "तु-शब्द"इति, तु-शब्दो न पूर्वोक्तनिर्वाहव्यावृत्त्यर्थः ।

भा॰ अन्यार्थं जीवसङ्कीर्तनं जीवातिरिक्तब्रह्मस्वरूपप्रतिबोधनार्थमिति जैमिनिराचार्यो मन्यते स्म, कुतः प्रश्नव्याख्यानाभ्यां, प्रश्नस्तावत् "तौ ह सुप्तं पुरुषमाजग्मतुरि"त्यादिना सुप्तस्य प्रतिबुद्धप्राणस्यैव प्राणनामभिरामन्त्रणाश्रवण-यष्टिघातोत्थापनाभ्यां प्राणादिव्यतिरिक्तं जीवं प्रतिबोध्य पुनर्जीवव्यतिरिक्तब्रह्मप्रतिबोधनपरो दृश्यते "क्वैष एतद्बालाके पुरुषो ऽशयिष्ट क्व वा एतदभूत् कुत एतदागादि"ति" व्याख्यानमपि "यदा सुप्तः स्वप्नं न कथंचन पश्यति अथास्मिन् प्राण एवैकधा भवति य एतस्मादात्मनः प्राणाः यथा यथाऽऽयतनं प्रतिष्ठन्ते प्राणेभ्यो देवाः देवेभ्यो लोकाः" इति जीवादर्थान्तरभूतपरमात्मपरमेव, सुप्तस्य हि जीवस्य यथोदितस्य जागरितस्वप्नदशासम्बन्धिविचित्रसुखदुःखानुभवकालुष्यविरहेण संप्रसन्नस्य

टी॰ अपि तु पूर्वपक्षव्यावृत्त्यर्थः इत्यर्थः, व्याख्येयं पदं सविशेष्यमाह "अन्यार्थमि"ति अन्यः कः तदर्थत्वं कथमित्यत्राह "जीवातिरिक्ते"ति, प्रबुद्धप्राणस्यैव अनुपरतव्यापारप्राणवत इत्यर्थः प्राणनामभिरिति प्राणना-

म-शब्देन बृहत्पाण्डुरवासःसोमराजशब्दा विवक्षिताः "तौ ह सुप्तं पुरुषमीयतुः तं हाजातशत्रुरामन्त्रयाञ्चक्रे "बृहत्पाण्डुरवासः सोमराजन्नि"ति हि श्रुतिः प्राणो वाव ज्येष्ठश्च श्रेष्ठश्चे"ति ज्येष्ठश्रेष्ठगुणवत्त्वात् बृहदित्यामन्त्रणम्, पाण्डुरवासस्त्वञ्च प्राणधर्मः "किमे वास" इति प्राणेन पृष्टे "आपो वास" इति अपां प्राणवासस्त्वोक्तेः यच्छुक्लं तदपामित्यपां शुक्लवर्णश्रवणाच्च, सप्तान्नब्राह्मणे "अथैतस्य प्राणस्याऽऽपः शरीरं ज्योतीरूपं असौ चन्द्र" इति चन्द्रे ज्योतीरूपत्वदर्शनाच्च चन्द्रसम्बन्धेन सोमेत्यामन्त्रणं तदधीनतया प्राणो वा सम्राट्परं ब्रह्मेति सम्राट्त्वश्रवणात् राजन्नित्यामन्त्र्यते अतः प्राणनामभिरित्युक्तम् । ननु कथमामन्त्रणस्य प्राणविषयत्वनिश्चयः, तन्निश्चये सति ह्येवं निर्वाह इति योग्यतासहकृतात् पारिशेष्यात् प्राणविषयत्वनिश्चय इति ब्रूमः, स्वापदशायां काष्ठकल्पत्वाद्देहस्यानात्मत्वं स्फुटम् इन्द्रियाणान्तु पाण्डुरवासस्त्वादिकमनुपपन्नम् अतः स्वापेऽप्यनुपरतव्यापारस्य प्राणस्याचेतनत्वेनानात्मत्वख्यापनमपेक्षितं पाण्डुरवासस्त्वादीनां तद्विशेषणत्वं श्रुतिसमाधियोग्यं च अतो यथोक्त एवार्थ इति । नन्वत्रैव बालाक्यजातशत्रुसंवादे "स होवाच य एवासौ चन्द्रे पुरुष" इति प्रक्रान्ते चन्द्रपर्याये बृहत्पाण्डुरवासाः सोमो राजेति चन्द्रविषयतया श्रुतानामेषां नामधेयानां प्राणविषयत्वं कथम् उच्यते—

सू॰ सुषुप्तस्य स्वस्थतापत्तिः पुनरप्यस्य यस्माज्ञोगाय निष्क्रमणं सोऽयं परमात्मा, तथाहि "सता सोम्य तदा सम्पन्नो भवति प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमि' ति सुषुप्त्याधारतया प्रसिद्धो जीवादर्थान्तरभूतः प्राज्ञः परमात्मा, अतः प्रश्नप्रतिवचनाभ्यां जीवसङ्कीर्त्तनं जीवादर्थान्तरभूतपरमात्मप्रतिपादनार्थमिति निश्चीयते, यदुक्तं प्रश्नव्याख्याने जीवपरे सुषुप्तिस्थानं च नाड्य

एव करणग्रामस्य प्राणशब्दनिर्दिष्टे जीवे एवैकधा भवतीति ॥

सुषुप्तपुरुषं गत्वा चन्द्रामन्त्रणस्याघटमानत्वाद्वाक्यस्य देहातिरिक्तात्मबोधनपरत्वावगमादर्थान्तरेषु पदानामनन्वयात् प्राणेऽन्वयार्हत्वाच्च तद्विषयत्वमिति । केचित्त्वेतानि चन्द्रनामान्येव पाण्डुरैरंशुभिर्जगच्छादकत्वात् पाण्डुवासस्त्वमनाध्यात्मं मन्तव्यमधिभूतं चन्द्रोऽधिदैवतमिति मनसश्चन्द्रदैवत्यत्वाल्लक्षणयेन्द्रियवर्गप्रधानस्य मनस आमन्त्रणान्तत्वेन्द्रियातिरिक्तत्वप्रतिबोधनार्थमित्याहुः, तत्राऽपि न दोषः तदानीं भाष्ये प्राणनामभिरित्यत्र प्राणशब्द इन्द्रियविषयो योजनीयः, न हि मुख्यप्राणनामभिरित्युक्तम्, अतः प्राणनामभिरिति निर्देशस्य इन्द्रियाभिप्रायत्वं घटते जीवव्यतिरिक्तब्रह्मप्रतिबोधनपरः प्रश्नो दृश्यत इत्यन्वयः, क्वैष इति स्वप्नस्थानप्रश्नः, क्व वा एतदिति सुषुप्तिस्थानप्रश्नः, क्व वा एतदिति सुषुप्तिस्थानप्रश्नः । प्राणादिव्यतिरिक्तस्य जीवस्य यष्टिघातोत्थापनादिनाऽवगन्तव्यत्वात् प्रश्नस्य जीवातिरिक्तविषयत्वमित्यर्थः । अत एव प्रतिवचनस्यापि जीवातिरिक्तविषयत्वासिद्धिः, व्याख्यानं प्रतिवचनं सप्तम्यन्तः प्राण-शब्दः प्राणशरीरकपरमात्मवाची प्राणाः, जीवाः, देवाः—इन्द्रियाणि लोकाः लोकनानि ज्ञानानि, जीवादर्थान्तरपरमात्मपरत्वं दर्शयति "सुषुप्तस्य ही"ति, सुषुप्तिस्थानत्वनिष्क्रमणापादानत्वाभ्याम्परमात्मत्वं कथमित्यपेक्षायां श्रुत्यन्तरेण तदुपपादयति "तथा ही"ति, सद्विद्यावाक्यस्य परमात्मपरत्ववैशद्याय सुषुप्तिविषयं श्रुत्यन्तरमुपादत्ते "प्राज्ञेने"ति, जीवकीर्त्तनस्य तदतिरिक्तबोधनार्थत्वं निगमयति "अत" इति, अनेन निर्वाहवैषम्यप्रदर्शनेन अतिदेशसूत्रस्याधिकशङ्कापरिहारौ दर्शितौ च भवतः । प्रातर्दनविद्यायामुपक्रमे जीवलिङ्गावगमः महावाक्यस्वारस्यन्तु परमात्मपरत्वे इह तूपक्रमोपसंहारमध्येषु जीवलिङ्गावगमात्, अत एव परमात्मनश्चिदचिद्विशिष्टतापरत्वाभावेन उपासात्रैविध्याप्रतिपत्तेः प्रातर्दनन्यायानवकाश इत्यधिकाशङ्का त्रिविधोपासनाऽभावेऽपि जीवातिरिक्तब्रह्मबोधनरूपप्रयोजनान्त-

Digitized by Google

रसम्भवादस्यवकाशइत्यनन्तरसूत्रे विवचितोऽधिकः परिह इति ह्यवधार-म्यते। अथ प्रतिवचनवाक्यस्य पूर्वपक्षितमर्थं यदुक्तमित्यादिनाऽनूद्य दूषयति

सू० तदयुक्तं नाडीनां स्वप्नस्थानत्वादुक्तरीत्या ब्रह्मण एव सुषुप्तिस्थानत्वाच्च प्राण-शब्दनिर्दिष्टे ब्रह्मण्येव जीवस्य तदुपकरणभूतवागादिकरणग्रामस्य चैकतापत्तिविभागव-चनाच्च, अपि चैवमेके वाजसनेयिनोऽस्मिन्नेव बालाक्य-जातशत्रुसंवादे सुषुप्त्यादिविज्ञानमयाद्भेदेन तदाश्रयभूतं पर-मात्मानमामनन्ति "य एष विज्ञानमयः पुरुषः क्वैष तदा-भूत् कुत एतदागात् यत्रैष एतत् सुप्तोऽभूत् य एष विज्ञानमयः पुरुषस्तदैषां प्राणानां विज्ञानेन विज्ञान-मादाय य एषोऽन्तर्हृदय

टी० "तदयुक्तमि"ति, नाडीनां स्वप्नस्थानत्वादिति तासु तदा भवतीत्यत्र तदा-शब्दः स्वप्नावस्थापरः "यदा सुप्तः स्वप्नं न कथंचन पश्यति अथास्मिन् प्राण एवैकधा भवती"त्यनन्तरवाक्ये अथ-शब्देन तद-शब्दनिर्दिष्टावस्थायाः सुषुप्तेश्च अवस्थान्तरत्वावगमादुत्तरवाक्ये स्वप्ना प्रतिषेधेन पूर्ववाक्यस्य स्वप्नसञ्ज्ञकतया तद्विषयत्वावगमाच्चेति भावः ननु यदा स्वप्नं न पश्यति तदा तासु नाडीषु भवति तदनन्तरमेवास्मिन् प्राण एवैकधा भवति करणग्राम इतीत्थं किं न स्यात्, नैवम् अथ-शब्दा-स्वारस्यप्रसङ्गात्, प्रश्नप्रतिवचनवैषम्यप्रसङ्गाच्च[1] यदा स्वप्नं न पश्यति यदा तासु भवति अथास्मिन्नेकधा भवति करणग्राम इत्युक्ते स्वप्नाभावावच्छि-न्नकालादनन्तरं करणग्रामोपरम इति प्रतीयते तथा सति प्रबोधदशायां करणग्रामाप्यय उक्तः स्यात्, तदनुपपन्नं सुषुप्तिप्रथमक्षणादनन्तरं करण-ग्रामाप्यय इति चेत् तदानीं तदा-शब्दस्य क्लिष्टता स्यात् यदा न पश्यति

१ वैषम्यप्रसङ्गादिति पा० ।

तदेत्युक्ते हि स्वप्नाभावावच्छिन्नकृत्स्नकालपरत्वं तदा-शब्दस्य प्रतीयते, न हि तत्र स्वापारम्भवाचिशब्दः श्रूयते अतस्तदा भवति यदा सुषुप्त इति प्रतिवचनवाक्यद्वयं स्वप्नसुषुप्त्यवस्थाद्वयपरम् । किञ्च क्व वा एतदभूदिति प्रश्नस्य करणग्रामपरत्वमयुक्तम् एतच्छब्दस्य प्रकृतपरामर्शित्वात् करणग्रामस्य च अप्रकृतत्वात् पुरुषोऽशयिष्टेति पुरुषस्य प्रकृतत्वात् एतच्छब्दः पुरुषविषयः, लिङ्गव्यत्ययस्तु न पुरुषपरत्वविरोधी प्रातिपदिकस्य प्रधानस्य प्रकृतपरामर्शित्वाद्विभक्तेरप्रधानत्वाच्च, तस्मात् क्वैष एतत्, क्व वा एतदिति प्रश्नयोः पुरुषविषयत्वे सति प्रतिवचनवाक्ये स्वप्नतदभावयोः प्रतिपाद्यमानत्वात् प्रश्नयोः स्वप्नसुषुप्तिविषयत्वं युक्तम् अन्यथा सुषुप्तिमात्रप्रश्नस्य स्वप्नसुषुप्तिविषयप्रतिवचनस्य च वैषम्यं स्यात्, अपृष्टस्य प्रतिवचनायोगात् प्रतिवचनस्य चावस्थाद्वयविषयत्वमुपपादितम् अपृष्टः करणग्रामाप्ययः कथमुच्यत इति चेन्न तस्य पृथक् प्रश्नानपेक्षत्वात् सुषुप्तेस्सकलबाह्यान्तःकरणव्यापारोपरतिरूपतया सुषुप्त्यन्तर्भूतत्वात्तस्य, अत एव करणग्रामस्य सुषुप्तावप्ययो नाम

सू० आकाशः तस्मिंश्चेत इति आकाश-शब्दस्य परमात्मनि प्रसिद्धः दहरोऽस्मिन्नन्तर आकाश इति, अतोऽत्र जीवसङ्कीर्त्तनं, तस्मादर्थान्तरभूतस्य प्राज्ञस्य परस्य ब्रह्मणः प्रतिबोधनार्थमित्यवगम्यते, तस्मादस्मिन् वाक्य पुरुषादर्थान्तरभूतस्य निखिलजगत्कारणस्य परस्यैव ब्रह्मणो वेदितव्यतयाऽभिधानान्न तन्त्रसिद्धस्य पुरुषस्य तदधिष्ठितस्य वा प्रधानस्य कारणत्वं क्वचिदपि वेदान्ते प्रतीयत इति स्थितम् ॥ जगद्वाचित्वाधिकरणं समाप्तम् ।

टी० व्यापारोपरतिरेव न तु स्वरूपनाशः करणग्रामाप्ययोक्तिश्च जीवस्यैकधाभावोपपादनरूपत्वात्कृता तत्करणद्वारकनानाविधज्ञानप्रसराभावो हि तस्यैकधाभावः, अतो नाडीनां स्वप्नस्थानत्वम् । सुषुप्त्याधारस्य

Digitized by Google

प्राण-शब्दोक्तस्य परमात्मत्वे हेतुमाह "उक्तरीत्ये"ति, उदाहृतश्रुत्यन्तरैकार्थ्यलक्षणयेत्यर्थः । ननु प्राण-शब्दः प्रथमान्तो जीवविषयो मुख्यप्राणविषयो वा किं न स्यात्? उच्यते जीवविषयत्वे लक्षणा स्यात् प्राण-शब्दस्य तत्सहचारिणि वृत्तेः, परमात्मपरत्वे तु न लक्षणा शरीरवाचिशब्दस्य शरीरिपर्यन्ततया मुख्यत्वात् । नन्वेकधाभावस्य कर्त्ताऽध्याहार्य्य इति चेत् न स्वप्नं यदा न पश्यति तदैकधा भवतीति यत्तदोर्नित्यसम्बन्धेन प्रत्यासत्त्यतिशयात् एकवाक्यतुल्यत्वात् सुषुप्तस्यैकधाभवनकर्तृत्वसिद्धेः, अस्मिन्निति पदस्य विशेष्यं चाकाङ्क्षितम् अतः सप्तम्यन्तत्वं युक्तम्, अन्यथा अस्मिन्निति पदमासन्नजीवपरं स्यात् तदा जीवः स्वस्य स्वयमेवाधार इत्युक्तं स्यात्, तदयुक्तं, श्रुत्यन्तविरोधात् तर्हि मुख्यप्राणस्याधारोऽस्त्विति चेन्न तस्य सुषुप्तावेकधाभावस्य प्रत्यक्षविरुद्धत्वात् स यदा प्रतिबुध्यते इत्यनन्तरोक्तप्रबोधस्यैकधाभवनसमानकर्तृकत्वस्वारस्यात् सुषुप्तस्यैव प्रबोधसम्भवात् मुख्यप्राणस्य स्वापाभावाच्च तच्छब्दो हि स्वतः प्रथमानिर्दिष्टपरामर्शी न तु तदनादरेणाधिकरणपरामर्शी मुख्यप्राणः प्रथमान्तप्राणशब्दोक्तश्चेत्प्राण एवेत्यवधारणानुपपत्तिश्च वागाद्यप्ययेऽपि प्रतिपाद्यमाने कथमवधारणं घटते अत एव प्रथमान्तत्वे प्राण-शब्दस्य करणग्रामपरत्वमप्ययुक्तं तस्य प्रबोधकर्तृत्वायोगात्, अत एव पूर्वपक्षिणोक्तमस्मिन्निति पदस्य जीवपरत्वं तद्वैयधिकरण्येन प्राणशब्दस्यापि सप्तम्यन्ततयैव करणग्रामाप्ययाधारत्वमपि निरस्तं स्वतः प्राप्तसामानाधिकरण्यस्वारस्यभङ्गात् एकधाभवनकर्तृत्वेन करणग्राम इत्यध्याहारप्रसङ्गात्, स यदा प्रतिबुध्यते इत्युक्तप्रबोधस्य एकधाभवनस्य च समानकर्तृकत्वप्रतिपादकतच्छब्दस्वारस्यभङ्गाभावात् सामानाधिकरण्ये प्राण-शब्दस्य लक्षणा पूर्वोक्ता । अतः प्राणशरीरकतया तच्छब्दवाच्ये ब्रह्मणि सुषुप्तौ जीवावस्थितिपरम् अथास्मिन् प्राण एवैकधा भवतीति वाक्यमित्यभिप्रायेणाह "प्राण-शब्दनिर्दिष्टे ब्रह्मण्येवे"ति, सूत्रखण्डं व्याचष्टे "अपि चैवमेक"इति, क्वैष तदाऽभूत् क्व सुप्त इत्यर्थः, प्राणानां विज्ञानेन विज्ञानमादाय प्राण-शब्दवाच्येन्द्रियजन्यं मनसा सहादायेत्यर्थः उपरतव्यापारं मन इत्यर्थः,

Digitized by Google

अनेनेन्द्रियाणामपि व्यापारोपरतिः फलिता, । तेषां मनःसापेक्षत्वात् "य एषोऽन्तर्हृदयाकाश इत्यत्राकाश-शब्दस्य भूताकाशव्यावृत्तिः समानप्रकरणस्थप्राण-शब्दश्रवणसिद्धा प्राण-शब्दस्य च मुख्यप्राणव्यावृत्तिराकाश-शब्देन न साध्येति नान्योन्याश्रयणं, जीवलिङ्गनिर्वाहमुपसंहरति "अत" इति, परमात्मगुणान्वयस्य परमात्म-शब्दसामानाधिकरण्यस्य वा श्रवणे सति तत्तद्विशिष्टोपासनार्थत्वनिर्णयः, अतोऽत्र परमात्मधर्मान्वयश्रवणाभावात् वैयधिकरण्यनिर्देशाच्च अन्यथासिद्धत्वाच्चोपासनार्थत्वं जीवलिङ्गस्य, अपि तु भेदज्ञापनार्थत्वमित्यर्थः । कृत्स्नवेदान्तस्य पुरुषप्रधानपरत्वासिद्धिमुपसंहरति "तस्मादि"ति, इह प्रधानोपादानं जीवस्य तेन विना कारणत्वानुपपत्त्यभिप्रायकृतम् । यद्वा अनेनाधिकरणद्वयेन ईक्षत्यानन्दमयाधिकरणाक्षेपद्वयस्य परिहृतत्वज्ञापनार्थम् । जगद्वाचित्वाधिकरणं समाप्तम् ॥

वाक्यान्वयाधिकरणम् । **सू० वाक्यान्वयात् ॥ १९ ॥**

न्नु० अथापि कापिलतन्त्रसिद्धपुरुषतत्त्वावेदनपरं वाक्यं क्वचित् दृश्यत इति तदतिरिक्त ईश्वरो नाम न कश्चित्सम्भवतीत्याशङ्क्य निराकरोति बृहदारण्यके मैत्रेयीब्राह्मणे श्रूयते "न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवती"त्यारभ्य "न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति" "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमिति, तत्र संशयः किमस्मिन् वाक्ये द्रष्टव्यतयोपदिश्यमानः तन्त्रसिद्धपुरुष एवाथवा सर्वज्ञः सत्यसंकल्पः सर्वेश्वर इति किं युक्तं पुरुष इति,

संस्कृतपुस्तकानां सूचीपत्रम् ।

मूल्यम्

काशिका पण्डितवरवामनादित्यविरचिता पूर्वार्धम् ५ रु॰ उत्तरार्धम् ५ रु॰ .. १०)

बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम् .. .. ३)

प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम् .. .. १।)

लघुकौमुदी वरदराजकृता .. .. १)

लघुकौमुदी श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता .. .. ८)

श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः ≡)

वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम् .. .. ४)

मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद .. .. ४)

शाश्वतधर्मदीपिका .. .. १)

अमरकोशः सटीकः .. .. ४)

योगवार्तिकम् .. .. ३।)

वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः .. .. .. १)

शीतपदार्थनिर्वचनम् .. .. ४)

वाक्यार्थचन्द्रिका परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि-
संशोधिता .. .. ४)

श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-
शास्त्रिप्रणीतकाचित्कविषमपदटिप्पणीसमेतः .. .. ६।॥)

तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् .. .. ८।)

तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् .. .. ४॥)

शास्त्रदीपिका .. .. ८।)

खण्डनखण्डखाद्यं सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्प-
णीसहितम् .. .. ७॥)

काव्यप्रदीपः काव्यप्रकाशस्य प्रतिच्छायाव्याख्या वाराणसेयसमादृप्रतिष्ठा-
पितसंस्कृतपाठशालीयदर्शनशास्त्राध्यापकरामशास्त्रिभागवताचा-
र्येण परिशोधितः .. .. ३॥)

वेदान्तसिद्धान्तमुक्तावली श्रीयुत आर्थर्विनिस महाशयेनेङ्गलण्डीय-
भाषायामवतारिता .. .. २॥)

चित्रमीमांसा अप्पयदीक्षितकृता, श्री तै॰ रामशास्त्रिणा संशोधिता .. .. १।)

तत्त्वबिन्दुः वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः .. .. ।≡)॥

Digitized by Google

CONTENTS.

Page.

GAṆAKATARAṄGIṆĪ, OR LIVES OF HINDU ASTRONOMERS, by Mahāmahopādhyāya Sudhākara Dvivedī, Professor, Sanskrit College, Benares. ... 387

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed: Dāmodara Śāstrī, Professor, Sanskrit College, Benares. ... 403

ŚRĪBHĀSHYA WITH ŚRUTAPRAKĀŚIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. ... 419

Digitized by Google

Titlepage

HARVARD COLLEGE
DEC 19 1892
LIBRARY.

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 9.] SEPTEMBER, 1892. [Vol. XIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1892.

Price, Rs. 9-0 per annum.]

[All rights reserved.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

निर्वर्त्तयति एतदेव प्रवर्त्यस्य प्रवर्त्यत्वं यदुत प्रवर्त्तयितुरभिप्रायसम्पादनं, नहि कश्चित्परो ऽनुग्रहीतव्य इति प्रवर्त्तते सर्वइमे स्वभूत्यर्थे, ये ताव-द्देते गुरून् शुश्रूषन्ते तेपीह प्रीतो गुरुरध्यापयिष्यति परत्र चाभ्युदेष्याम इति प्रवर्त्तन्ते, दासाश्चापि भक्तं च लप्स्यामहे परिभाषाश्च न नो भवि-ष्यन्तीति प्रवर्त्तन्ते, यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणं, शिल्पिनोपि मित्राणि च नो भविष्यन्ति वेतनं च लप्स्यामहइति प्रवर्त्तन्ते, यद्यप्यत्र सर्वत्र तत्तदुद्देशेन प्रवृत्तिः सूर्यं तु न, तथाप्यभिप्रायसंपत्तिमात्रेण प्रयो-ज्यप्रयोजकभावाध्यारोपेण णिज् भविष्यति, इह च कंसं घातयतीति ये तावदेते कंसघातानुकारिणां नटानां व्याख्यानोपाध्यायास्ते कं-सानुकारिणं नटं सामाजिकैः कंसबुद्ध्या गृहीतं तादृशेनैव वासुदेवेन घातयन्ति, येपि चित्रं व्याचक्षते ऽयं मथुराप्रसादो ऽयं कंसो ऽयं भग-वान्वासुदेवः प्रविष्ट एताः कंसकर्षिण्यो रज्जव एते उद्गूर्णा निपा-तिताश्च प्रहारा अयं हतः कंसो ऽयमाकृष्ट इति तेपि चित्रगतं कंसं तादृशेनैव वासुदेवेन घातयन्ति, चित्रेपि हि तद्बुद्धिरेव पश्यताम्। एतेन चित्रलेखका व्याख्याताः, येपि ग्रन्थं वाचयन्तः कंसवधमाचक्षते काथिका नाम तेप्युत्पत्तिप्रभृत्याविनाशात्कंसादीन् वर्णयन्ति तेपि वर्ण्यमानाः श्रो-तृणां बुद्धिस्थाः प्रत्यक्षवद्भवन्ति चितमपि तेषां तदात्मकमिव भवति, अत एव व्याश्रिताश्च भवन्ति, नानापक्षसमाश्रयो व्याश्रयः, के चित्कंसभक्ताः के चिद्वासुदेवभक्ताः वर्णान्यत्वं खल्वपि पुष्यन्ति, के चिद्रक्तमुखाः के चि-त्कालमुखाः त्रैकाल्यमपि लोके लक्ष्यते, कथायां वाच्यमानायां हि वक्तारो भवन्ति गच्छ हन्यते कंसो गच्छ घानिष्यते कंसः, किं गतेन हतः कंस इति तदेवं काथिकोपि बुद्धिस्थेन वासुदेवेन घातयति श्रोतापि॥

शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान्।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते॥

एवं राजानमागमयतीत्यादावपि यथासम्भवं द्रष्टव्यम्॥

"कण्ड्वादिभ्यो यक्"॥ यदीमे कण्ड्वादयो धातव एव स्युस्ततो वाग्रहणमनुवर्त्तते वा न वा, अनुवृत्तौ यगभावपक्षे लडादिषु सत्सु कण्ड-

वतीत्याद्यनिष्टं प्रसज्येत कण्डूरित्यादि च न स्यात्, धातोः सुबभावात्, क्विबन्तात्सुप्सम्भवेपि कण्डूरिति न वेदनामात्रं गम्यते कर्त्तरि क्विपो विधानात्, संपदादित्वाद्भावे क्विब् भविष्यति, एवमपि कण्ड्वौ कण्ड्वः, अचि श्नुधात्वित्युवङ् प्राप्नोति, कण्ड्वा कण्ड्वे 'नोङ्धात्वो'रिति विभक्त्युदात्तनिषेधः स्यात्, मन्तुर्वल्गुरित्यत्र च तुक् प्रसङ्गः, अथ नानुवर्त्तते कण्डूरिति न सिध्यति, यगन्तात्सम्पदादित्वाद्भावे क्विप्यल्लोपयलोपयोः कृतयोर्भविष्यति, न चैवमल्लोपस्य स्थानिवत्त्वादुवङ् प्रसङ्गः, क्वौ लुप्तं न स्थानिवदिति वचनात् । ननु च क्वौ विधिं प्रति स प्रतिषेधः, अन्यथा लवमाचक्षाणो लोरित्यत्र क्वौ लुप्तस्य णेः स्थानिवत्त्वाभावेपि णौ कृतस्य टिलोपस्य स्थानिवत्त्वादूण् न स्यात्, अतोत्र स्थानिवत्त्वे सत्युवङ् स्यादेव, अस्तु, च्छ्वोः शूडित्यूठ् करिष्यते, न चोठ्यपि कर्तव्ये स्थानिवत्त्वं, तस्य क्वौ विधित्वाद् आदिष्टादचः पूर्वत्वाच्च, अत एवोठि कृते पुनरुवङोप्रसङ्गः, एवमपि कण्ड्वौ कण्ड्वः कण्ड्वा कण्ड्वे, धातुविधिः प्राप्नोति, मन्तुर्वल्गुरिति च न सिध्यति यकि दीर्घे कृते मन्तूर्वल्गूरिति स्यात्, अथ प्रातिपदिकान्येव, तत्रापि वाग्रहणाननुवृत्तौ स एव दोषो यो धातुपक्षे, अनुवर्त्ततां तर्हि वाग्रहणं सन्तु च प्रातिपदिकान्येव तत्राप्ययमर्थः ककारो नानुबन्धथ्यो भवति अनार्धधातुकत्वादेव गुणो न भविष्यति, नैवं शक्यम्, इह हि सुष्यति दुःष्यति मगध्यतीत्यतो लोपो न स्याद् अनार्धधातुकत्वादेव, न च व्यञ्जनान्त एव शक्यः पठितुं यगभावपक्षेपि तथा प्रयोगप्रसङ्गादत उभये कण्ड्वादय इत्याह । 'द्विविधाः कण्ड्वादय इति' । 'धातुभ्य एव प्रत्ययो विधीयतइति'। नित्यमिति भावः। तेन पक्षे कण्डूवतीत्यादि न भवति । 'न तु प्रातिपदिकेभ्य इति'। तेन कण्ड्वौ कण्ड्वो मन्तुरित्यादिप्रयोगसिद्धिः, न चास्मिन्नपि पक्षे यगन्तात्सम्पदादिक्विब्विधीयते तदा पूर्वोक्तदोषानुषङ्गः, किं कारणं दृशिग्रहणादेतेभ्यः क्विब् स्याद् न चैतेभ्य इदानीं क्विब् दृश्यते, पूर्वत्र तु पक्षे कण्डूरित्यादिसिद्ध्यर्थमेव क्विब् द्रष्टव्यः । कथं पुनर्ज्ञायते उभये कण्ड्वादय इति तच्छ्लोकेन दर्शयति। 'धातुप्रकरणादिति'। अनुवृत्तेन धातुग्रहणेन विशेषणात्ककारासञ्जनाच्च धातुत्वमेषामभिमत-

मिति विज्ञायतइत्यर्थः । यतस्तु खल्वयमाचार्यः क्व चिद्दीर्घमुच्चारयति कण्डूञ् हृणीञ् महीङिति, ततो मन्ये धातुर्विभाषित इति, धातुत्वमेषां विभाषितमिति मन्यइत्यर्थः । अथ कण्ड्वादीनामर्थनिर्देशः । कण्डूञ् गात्रविकर्षणे । मन्तु अपराधे । हृणीङ् रोषे । वल्गु पूजामाधुर्ययोः । अस्मनस् उपतापे । महीङ् वृद्धिपूजनयोः । लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने । इरस इरज् इरञ् ईर्ष्यायाम् । दुवस् परिचरणे । मेधा आशुग्रहणे । कुशुभ् क्षेपे । मगध परिवेष्टने । तन्तस् पम्पस् दुःखे । सुख दुःख तत्क्रियायाम् । सपर पूजायाम् । अरर आराकर्मणि । भिषज् चिकित्सायाम् । भिष्णज् उपसेवायाम् । इषुध शरधारणे । चरण भुरण गतौ । चुरण चौर्ये च । तुरण त्वरायाम् । भुरण धारणपोषणयोः । गद्गद वाक्स्खलने । एला केला खेला विलासे । लिट् अल्पार्थे कुत्सायां च । लोट् दीप्तौ ॥

"गुपूधूपविच्छिपणिपनिभ्य आयः" ॥ 'विच्छायतीति' । विच्छिरयं तुदादौ पठ्यते तत्सामर्थ्यादायप्रत्ययान्तादपि शविकरणो भवति न तु शप्, यथा जुगुप्सतइत्यात्मनेपदं तेन विच्छायन्ती विच्छायतीति 'आच्छीनद्योर्नुमि'ति नुम्विकल्पो भवति । अन्ये तु सार्वधातुकेप्यायप्रत्ययस्यैव तुदादिपाठसामर्थ्येन विकल्पमाहुः । 'स्तुत्यर्थेनेति' । भट्टिकाव्ये तु व्यवहारार्थादप्यायः, न चोपलेभे वणिजां पणाया इति । 'अनुबन्धः केवलेऽचरितार्थ इति' । अवयवेष्वचरितार्थं लिङ्गं समुदायस्य विशेषकं भवति यथा गुपादीनामनुदात्तत्वमिति भावः । ये तु व्यवहारार्थादप्यायमिच्छन्ति तेषामपि पणिष्यते पाणयिष्यतीत्यादावनुबन्धः केवले चरितार्थः ॥

"ऋतेरीयङ्" ॥ 'सौत्र इति' । अस्मिन्नेव सूत्रे उच्चरित इत्यर्थः । 'घृणायां वर्त्तत इति' । नात्र कृपायां घृणाशब्दः किं तर्हि जुगुप्सायां, घृणा जुगुप्साकृपयोरिति वचनात् । जुगुप्सा निन्दा बीभत्सेत्यर्थः । ऋतीयाशब्दो बीभत्सापर्यायो निघण्टुषु पठितः । अथ कस्मादीयङुच्यते न क्ङेवोच्यते तस्य ईयादेशे कृते ऋतीयतइति सिद्धं, परत्वादिडागमे कृते सत्यप्रत्ययादित्वादीयादेशो न स्यादिति चेत्, न । अन्तरङ्गत्वात्, आयवादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति वचनादन्तरङ्गत्वं, ज्ञापनार्थं तु,

Digitized by Google

एतज् ज्ञापयति धातुप्रत्ययानामायचादयो न भवन्तीति, तेन कणेह इत्य-नेकादेशो न भवति । क्व चित्तु वृत्तावेवं पठ्यते, चतेश्छन्दसीत्येव सिद्धे ईयङ्वचनं ज्ञापकं धातुविहितानामायचादयो न भवन्तीति । अत्र ब्रूमः । द्विवचनविभज्योपपदे तरप्तमपाविस्येव सिद्धे ईयसुन्वचनं ज्ञापकं प्रातिपदिकप्रत्ययानामायचादयो न भवन्तीति । उच्यन्ते चाय-चादयस्ते वचनादुभयेषामपि स्युस्तस्मादृतेश्छन्दसीत्यादि वृत्तौ न पठनीय-मिति ॥

"कमेर्णिङ्" ॥ इह णिङो णकारो 'णेरनिटी'ति विशेषणे चरि-तार्थो ङकारोऽप्यात्मनेपदार्थ इत्युभयोश्चरितार्थयोः प्रतिषेधबलीयस्त्वा-'दत उपधाया' इति वृद्धेः 'क्ङिति चे'ति प्रतिषेधः प्राप्नोति, ज्ञापका-त्सिद्धं, यदयं 'न कम्यमिचमा'मिति कमेर्मित्संज्ञायां प्रतिषेधं शास्ति तज् ज्ञापयति भवत्यत्र वृद्धिरिति, तस्य हि प्रयोजनं 'मितां ह्रस्व'इति ह्रस्वो मा भूदिति, यदि चात्र वृद्धिर्न स्याद् ह्रस्व एवोपधेति कृत्वा मित्सं-ज्ञाप्रतिषेधो ऽनर्थकस्स्यात् । नैतदस्ति ज्ञापकं यदा णिङन्ताद्धेतुमण्णिच् क्रियते तदा णिङन्तस्य णिचि या वृद्धिस्तस्या ह्रस्वो मा भूदित्येवमर्थमे-तत्स्यात्, न च णिजपेक्षाया अपि वृद्धेर्णिङमेव ङितमपेक्ष्य प्रतिषेधः, किं कारणं, ङितीति निमित्तसप्तमी, ननु च न णिङन्तस्य णिचि वृद्ध्या भवितव्यं णिङा व्यवहितत्वात्, णिलोपे कृते स्थानिवद्भावाद्व्यवधानमेव, यदा तर्हि णिङन्ताच्चिण्णमुलौ भवतस्तदा 'चिण्णमुलोर्दीर्घो ऽन्यतरस्या'-मित्येव विधिर्मा भूदित्येवमर्थो मित्संज्ञाप्रतिषेधः स्यात्, किं पुनः कारणं तत्र दीर्घान्यतरस्यामित्युच्यते न प्रकृतौ ह्रस्व एव विकल्प्येत, एवं हि कमेर्मित्संज्ञाप्रतिषेधो न कर्त्तव्यो भवति, कथं यदा णिङि वृद्धिर्नास्ति तदा ह्रस्व एवोपधेति सत्यपि ह्रस्वविकल्पे नैवानिष्टप्रसङ्गः, अशमि अशा-मीत्यादि च सिद्धं, नैवं शक्यं, यदा शमिप्रभृतिभ्यो णिजन्तेभ्यो द्वितीयो णिच् क्रियते तदा न स्यात्, यश्च णमुल्परो णिज् द्वितीयो न तस्मिन् प्रथमेन णिचा व्यवहितत्वात्, यस्मिंश्च मिदङ्ग प्रथमे णिचि नासौ चिण्ण-मुल्परो द्वितीयेन व्यवहितत्वात्, णिलोपेपि कृते स्थानिवद्भावाद्व्यवधान-

Digitized by Google

मेव, दीर्घोन्यतरस्यामित्युच्यमाने पुनरत्रापि भवति दीर्घविधिं प्रति स्थानिवद्भावनिषेधात्, तथा शमिप्रभृतिभ्यो यङन्तेभ्यो णिच्यल्लोपयलोपयोरल्लोपस्य स्थानिवद्भावादसत्यां वृद्धौ चिण्णमुलोः कृतयोरशंशमि अशंशामि शंशमं शंशाममिति न स्यात्, दीर्घः पुनर्विकल्प्यमानोऽत्रापि भवति तद्विधौ स्थानिवद्भावप्रतिषेधात्, तथा हेडृ अनादरे घटादिः, 'एच इग् घ्रस्वादेशे' हिडयति तत्र चिण्णमुलोः कृतयोर्ह्रस्वे विकल्प्यमाने अहिडि अहेडीति स्यात् दीर्घे तु पुनरहिडि अहीडीति भवति, तस्माद्दीर्घ एव विकल्पनीयः ततश्च मित्संज्ञाप्रतिषेधोऽपि तन्निवृत्तये वक्तव्यः, तथा 'आयादय आर्द्धधातुके वे'ति णिङभावे णिचि सति वृद्धौ कृतायां 'मितां ह्रस्व' इति ह्रस्वो मा भूदित्येवमर्थोऽपि मित्संज्ञाप्रतिषेधो वक्तव्य एवेत्यज्ञापकमेतत्। एवं तर्ह्यस्थानेयं यत्नः क्रियते नैवात्र प्रतिषेधः प्राप्नोति, किं कारणमिग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः, न चैषा इग्लक्षणा वृद्धिरित्यलमतिकर्कशप्रक्रियातर्कानुसरणेन॥

"आयादय आर्द्धधातुके वा"॥ आर्द्धधातुकइति परसप्तम्यामायादिविधिभिरेकवाक्यता स्यात्, भिन्नवाक्यतायामयमर्थो भवति, गुपादिभ्य आर्द्धधातुके परतो वाऽऽयप्रत्ययो भवति, एवमुत्तरत्रापि, ततश्चार्द्धधातुके एव विकल्पेनायादयः स्युः सार्वधातुके नैव स्युः, नैष दोषः। पृथगारम्भाद्यदि ह्यार्द्धधातुकएवायादीनामुत्पत्तिः स्यात्ततो गुपादिभिः संयुज्यैव निर्दिशेत्, गुपादिभ्य आर्द्धधातुके वेत्येवं हि आयादय इति न वक्तव्यं भवति, पृथक् तं निर्दिशति तेन मन्यामहे व्यापारभेदेनैकवाक्यतेति। ततश्चायमर्थो भवति गुपादिभ्यो नित्यमायादयो भवन्त्यार्द्धधातुके वेति, एवमपि गुपादेर्यदार्द्धधातुकं प्राप्तं तत्र ततो विहिते विकरणविकल्पे नायादयः स्युस्ततश्च स्त्रीभावविवक्षायां गुपेरप्रत्ययान्तत्वाभावात् क्तिनि कृते यदायप्रत्ययो न भवति तदा गुप्तिरिति काममिष्टं सिद्ध्यति, यदा तु भवति तदाऽल्लोपयलोपयोर्गोपातिरित्यनिष्टं प्राप्नोति, गोपायेति चेष्टं न सिद्ध्यति, भिन्नवाक्यतायामायाद्यन्ताद्यदार्द्धधातुकं प्राप्तं तत्र ततो विहिते आयादयो वा भवन्तीत्यर्थः स्यात्तत्र चाया-

Digitized by Google

द्यन्तादप्यार्द्धधातुकमिति वदता तेषामुत्पत्तिस्तावदङ्गीकृता, न चोत्प-न्नानामुत्पत्तिविकल्पः शक्यते कर्तुमिति लोपन्यायेन निवृत्तिविकल्पो भवति, ततश्चायप्रत्ययान्तात् स्त्रीभावविवक्षायामप्रत्ययादित्यकारे कृते निवृत्त्यभावपक्षे गोपायेति काममिष्टं सिद्ध्यति, निवृत्तिपक्षे तु गोपेत्यनिष्टं प्राप्नोति, गुप्तिरिति चेष्टं न सिद्ध्यति, लिटि च निवृत्त्यभावपक्षे गोपाया-ञ्चकारेति काममिष्टं सिद्ध्यति, निवृत्तिपक्षे तु यदि लिटि परतो निवृत्ति-स्तथापि प्रत्ययलक्षणेन कास्प्रत्ययादित्यामा भवितव्यमथाप्यामि कृते निवृत्तिस्तथापि तस्यैव श्रवणं प्राप्नोतीति, सर्वथा गोपांचकारेत्यनिष्टं प्राप्नो-तीति जुगोपेति चेष्टं न सिद्ध्यति, तस्माद्दुष्ट एवायं परसप्तमीपक्ष इति मत्वाह । 'आर्द्धधातुके विषय इति'। कोर्थ इत्याह । 'आर्द्धधातुकविव-क्षायामिति'। आर्द्धधातुकमिहोत्पादयिष्यामीति बुद्धौ सत्यामित्यर्थः । विषयसप्तमीपक्षेपि भिन्नवाक्यतायामार्द्धधातुके विधित्सिते आयादयो भवन्तीत्युक्ते कुतो विधित्सतइत्यपेक्षायामायाद्यन्तस्यापि धातुत्वात्तत इति गम्यते, ततश्च निवृत्तिपक्ष एवाश्रित इति स एव दोषो यं पूर्व-मवोचाम, तस्मादेकवाक्यतयोत्पत्तिविकल्प इत्याह । 'नित्यं प्रत्ययप्रसङ्गे तदुत्पत्तिरार्द्धधातुकविषये निर्विकल्प्यतइति'। किमेवं सति सिद्धं भव-तीत्याह । 'तत्रेति' ॥

"सनाद्यन्ता धातवः" ॥ 'सनादयो ऽन्ते येषामिति'। अन्त-शब्दः समीपवचनः वैयधिकरण्येपि गमकत्वाद्बहुव्रीहिः । अथ वा वृत्तावर्थमात्रं दर्शितं सूत्रे त्ववयववाचिनो ऽन्तशब्दस्य समानाधिकरण-स्यैव बहुव्रीहिः । सनादयोऽन्तावयवा येषां समुदायानामित्यनेन तद्गु-णसंविज्ञानो बहुव्रीहिरिति दर्शयति । 'धातुसंज्ञा इति'। धातुशब्दोत्र स्वरूपपदार्थो न भूवादिपदार्थकस्तावतीनां संज्ञानां विधाने प्रयोजना-भावात् । सुप्तिङन्तमित्यत्रान्तग्रहणाज्ज्ञापिता संज्ञाविधौ प्रत्ययग्रहणे प्रत्य-यग्रहणपरिभाषा न प्रवर्ततइति, ततश्चासत्यन्तग्रहणे तदन्तविधिने स्यादि-त्यत्रान्तग्रहणं कृतम्, एवं स्थिते यत्पूर्व एवानेन तदन्तविधिः क्रियते ततो देवदत्तश्चिकीर्षतीत्यत्र देवदत्तादेः समुदायस्य संज्ञा प्रसज्येतेति मत्वाह ।

Digitized by Google

‘प्रत्ययग्रहणपरिभाषैवेत्यादि’ । अपूर्वविधौ गौरवं प्रतिप्रसवे तु यत्नस्य लाघवं भवतीति भावः । भूवादय इत्यस्यानन्तरं सनाद्यन्ताश्चेत्युच्यमाने सनादीनामियत्तापरिच्छेदो न स्यात् । एवं तर्हि सङन्ताश्चेत्युच्यतां, सङिति प्रत्याहारः सनः सशब्दादारभ्या णिङो ङकारात् । एवमपि सन्देहस्स्यात् यङादिष्वपि ङकारस्य भावा, देवं तर्हि सनाद्यन्ता इत्यस्यानन्तरं भूवादयश्चेति वक्तव्यं, स्यादेतदेवमुच्यमाने सनाद्यन्तशब्दवद् भूवादिशब्दोपि प्रकृतापेक्षः स्यात्ततश्चानुक्रान्तानां गुपादीनामेव स्या,दित्येवमपि भूवादिग्रहणमनर्थकं गुपादयश्चेति वक्तव्यं, नानर्थकं, भुवो वादयो भूवादय इत्येवमर्थमेव स्याद्, भूवादि पाठ इदानीं किमर्थः स्यादन्तर्गणकार्यार्थो ऽनुबन्धासञ्जनार्थश्च, येषां तर्हि तदुभयं न संभवति भूरणिप्रभृतीनां तेषां पाठः किमर्थः । अलमतिनिर्बन्धेन ॥

“स्यतासी लृलुटोः” ॥ इह यद्यपि लृ इत्यनुकरणमुच्चारितमेकमेव तथापि तस्य प्रतिपाद्यभूतमनुकार्यं भिद्यते लृट् लृङ् इति यत्र च प्रतिपाद्यानां संख्यासाम्यं तत्र संख्यातानुदेशो न तूच्चारितरूपसाम्ये, अन्यथा परस्मैपदानामित्येकं णलादयस्तु नवेति वैषम्यान्न स्यात्, तथा डारौरसः प्रथमस्येत्यत्रापि न स्यात्, तदेवम् लृ इत्यस्य द्वे प्रतिपाद्ये लुङिति चापरमिति त्रीणि निमित्तानि निमित्तिनौ तु द्वावेवेति वैषम्यात्संख्यातानुदेशो न प्राप्नोतीत्यत आह । ‘लृरूपमुत्सृष्टानुबन्धं सामान्यमेकमेवेति’ । नात्र प्रतिपाद्यं भिद्यते यत्तदुभयानुगतमुत्सृष्टानुबन्धं लृ इति सामान्यरूपं तदनुक्रियते, एतच्च लृलुटोरिति द्विवचननिर्देशादवसीयते, तत्र यथानुकरणे न भेदस्तथानुकार्येपीत्यर्थः । ‘करिष्यतीति’ । ‘ऋद्धनोः स्य’ इतीट् । ‘श्वः कर्त्तेति’ । श्व इत्यस्योपन्यासस्तृजन्तशङ्कानिवृत्त्यर्थः । ‘इदित्करणमिति’ । इत्सञ्ज्ञकस्येकारस्य करणमित्यर्थः । ‘अनुनासिकलोपप्रतिषेधार्थमिति’ । अन्यथा मन्तास् आ इति स्थिते टिलोपे कृते मकार उपधेन्यात्मनेपदे ङिति परतो ऽनिदितामिति नलोपः प्राप्नोति तस्यानिदितामितीदित्त्वनिबन्धनः प्रतिषेधो यथा स्यादित्यर्थः । ‘मन्ता सङ्गन्तेति’ । कोर्थः मन्तेत्येतत्पदं सङ्गन्तम्भ-

Digitized by Google

विष्यतीत्यर्थः, न तु सङ्गन्तेत्येतदुदाहरणमनोपधत्वात् । अनुस्वारपरसवर्णयोः कृतयोरपि तयोरसिद्धत्वादनोपध एव, अन्ये त्वाहुर्यथासिद्धत्वात्सङ्गन्तेत्येतदनुदाहरणं मन्तेत्येतदपि उदाहरणं न भवति, अत्रापि टिलोपस्याभीयस्यासिद्धत्वाद् मन्तास्थाइति स्थिते नकार उपधा न भवतीति, यदि मतमा भाच्छास्त्रीयमसिद्धत्वमनित्यं, 'श्नसोरल्लोप' इति तपरकरणात्, तद्धास्तामासचित्यादौ मा भूदित्येवमर्थं तत्राटो ऽसिद्धत्वादेव लोपो न भविष्यति किं तन्निवृत्त्यर्थेन तपरत्वेन, तज् ज्ञापयत्यसिद्धत्वमनित्यमिति, तेन देभतुर्देभुरित्यत्र श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति लिटः कित्त्वान्नलोपे तस्यासिद्धत्वाभावादेत्वाभ्यासलोपौ भवतः, तदत्र टिलोपस्यासिद्धत्वाभावान्मन्तआ इति स्थिते उपधैव नकार इत्युदाहरणमिति, यद्येवं पूर्वत्रासिद्धीयमसिद्धत्वमप्यनित्यं 'न मुन' इत्यत्र नेति योगविभागात्, तथा चैकादेशस्वरोऽन्तरङ्गः सिद्धो भवति, सिज्लोप एकादेशे सिद्धो भवति, निष्ठादेशः षत्वादिषु सिद्धो भवति, द्विर्वचनविषये च पूर्वत्रासिद्धीयं न भवति, ततश्चानुस्वारपरसवर्णयोः सिद्धत्वात्सङ्गन्तेत्येतदप्युदाहरणमेवेति । अन्ये तु संहन्तेति पठन्ति, हन्ते 'र्भावकर्मणो' रित्यात्मनेपदं तत्र सम्पूर्वस्य पाठे प्रयोजनं मृग्यम्, एवं तावज्जयादित्येनासिद्धत्वमनित्यमाश्रित्य तासेरिदित्करणमनुनासिकलोपप्रतिषेधार्थमित्युक्तम् । वामनस्तु टिलोपस्य सिद्धत्वादेव नलोपो न भविष्यतीति मन्यमान इदितोरित्यत्र वक्ष्यति तासिसिचोरिदित्कार्यं नास्तीत्युच्चारणार्थो निरनुनासिक इकारः पठ्यत इति, यदि तु तासेरिकारोऽनुबन्धः स्यात्ततो नुम्विधौ धातोस्तासेर्मा भूदित्येवमर्थं स्यात्ततश्च धातूपदेशावस्थायामेव नुम् भवतीत्ययमर्थो न साधितः स्यादिति तस्याभिप्रायः । जयादित्यस्तु नुम्विधावुपदेशिवद्वचनं प्रत्ययसिद्ध्यर्थमिति वचनमेव शरणमाशिश्रयत् । [1]इह विकरणाः के चन लकारोपादानेन विधीयन्ते यथा स्यादयः, ते किं लावस्थायामेव भवन्त्युताहो आदेशेषु कृतेषु, यदि लावस्थायामेव ततस्तास्यनुदात्तेदित्यत्र यदुच्यते तासेः परस्य लसार्वधातुकस्यानुदात्तवचनं ज्ञापकं

१ इह एते लकारोपादानेन विधीयन्ते स्यादय इति २ पुस्तके पाठः ।

सतिशिष्टोपि विकरणस्वरो लसार्वधातुकस्वरं न बाधतइत्यस्यार्थस्येति तथोपपद्यते लावस्थायामेव तासौ कृते तस्य च प्रत्ययाद्युदात्तत्वे पश्चात्लादेशेषु क्रियमाणेषु तेषामेव स्वरः सतिशिष्टो भवति ततश्चानुदात्तवचनमप्राप्तविधिरेव स्यात्, तत्र को दोषः चिनुतश्चिन्वन्ति क्षीणीतः क्षीणन्ति सतिशिष्टो विकरणस्वर एव प्राप्नोति, द्वितीये तु पक्षे पूर्वं तिबादयः पश्चात्तासिरिति तस्यैव स्वरः सतिशिष्टः, ततश्च निघातस्वरेणैव सार्वधातुकानुदात्तत्वे सिद्धे तासिग्रहणं क्रियमाणमुक्तार्थस्य ज्ञापकं सम्पद्यते, अस्तु तर्हि तथा, यद्येवं धातुमात्रात्सार्वधातुकमात्रे भावकर्मणोर्यक् कर्त्तरि तु शब्विधीयतइति यक्शपावुत्सर्गौ तेष्वेवार्थेषु धातुमात्रात्सार्वधातुकविशेषे स्यादय इति ते ऽपवादाः, तथा दिवादेर्धातुविशेषात्कर्तरि श्यनादयः शपोपवादास्तत्र देविष्यति तनिष्यतीत्यादावुभयप्रसङ्गे ऽपवादविप्रतिषेधात् श्यनादयः स्युः, पक्षान्तरे त्वन्तरङ्गाः स्यादय एव सिद्ध्यन्ति । नैष दोषः । 'दिवादिभ्यः श्यन्' इत्यादिषु स्यादयोनुवर्तिष्यन्ते दिवादिभ्यः श्यन् भवति लृलुटोस्तु स्यतासी भवतो दिवादिभ्य इति, एवं सर्वत्र, एतेनैतदपिनिरस्तं यत् खल्विदमाशङ्क्यते परेण लावस्थायां विधीयमानाः स्यादयः किमिति सार्वधातुकोत्पत्तिं प्रतीक्षन्तइति कथम्, उत्तरत्रानुवृत्तेरेव, सार्वधातुके यग्भवति भावकर्मणोर्लृलुटोस्तु स्यतासी भवतः सार्वधातुके, एवं सिजादिष्वपि द्रष्टव्यम् । तदेवमादेशेषु कृतेषु स्यादय इति स्थितम् ॥

"सिब्बहुलं लेटि" ॥ 'जोषिषन्मन्दिषदिति' । जुषी प्रीतिसेवनयोः मदि स्तुतिमोदस्वप्नगतिषु अनुदात्तौ, व्यत्ययेन परस्मैपदं, सिच इट्, 'लेटोऽडाटौ' विति तिपो ऽट्, 'इतश्च लोपः परस्मैपदेष्वि' तीकारलोपः, तत्र च वेति वर्त्तते । 'तारिषदिति' । तॄ प्लवनतरणयोः, सिब्बहुलं छन्दसि णिद्वक्तव्य इति वचनाद्वृद्धिः, अमीषां भविता भाविषदिति यथा छान्दसो वा दीर्घः । 'पतातीति' । शल हुल पत्लृ गतौ, 'लेटोऽडाटा' वित्याट् अपासहैकादेशः, । 'च्यावयातीति' । च्युङ् प्रुङ् प्लुङ् गतौ णयन्तः, इहा

वयासिषीष्ठादिति यातेरवपूर्वाल्लिङि बहुलवचनात्सिप्, यास् सीयुट्, इट्, 'एकाजुपदेशेनुदात्तादि' ति तु प्रतिषेधो न भवति सिपा व्यवधानात् ॥

"कास्प्रत्ययादाममन्त्रे लिटि" ॥ 'आम् प्रत्ययो भवतीति'। हलन्तपक्ष एतदुक्तम्, अदन्तपक्षे त्वामप्रत्ययो भवतीति वक्तव्यम्। 'अमन्त्रविषय इति'। मन्त्रविषयश्चेत्प्रयोगो न भवतीत्यर्थः। ऋग्यजुःसामलक्षणो मन्त्रम् तत्रैवाभियुक्तैर्मन्त्रशब्दस्य प्रयोगात्, आथर्वणा अपि मन्त्रा ऋग्यजुष एवान्तर्भवन्ति, तान्त्रिकेषु मन्त्रशब्दप्रयोगो मन्त्रवदुपचारात्। छन्दसीति नोक्तं, ब्राह्मणेऽपि यथा स्यात्, अथ ह शुनःशेप ईक्षांचक्रे ते ह तदन्तर्वेद्यासांचक्रिरे अविज्ञातानि च दर्शयांचकार। 'कासां चक्र इति'। आमन्तस्य पदत्वमाम इत्यत्रोपपादितम्। 'नोनावेति'। नोतेर्यङ्लुगन्तात्प्रत्ययलक्षणेन प्राप्त आम् न भवति। 'कास्यनेकाच इति वक्तव्यमिति,'। यथान्यासे हि कशब्दादशब्दाद्गुणादिभ्यश्चाचारक्विबन्तेभ्य एकाज्भ्योऽपि प्रत्ययान्तत्वादाम् प्रसक्तः, चुलुम्पादिभ्यश्चाप्रत्ययान्तत्वादप्रसक्तोऽतोऽव्याप्त्यतिव्याप्तिपरिहाराय प्रत्ययग्रहणमपनीयानेकाज्ग्रहणं कर्तव्यमित्यर्थः। तत्र कशब्दस्य णलि 'अचो ञ्णिती' ति वृद्धौ 'आत औ णलः,' चकौ, अन्यत्रातो लोपः चकतुः चकुः, अशब्दस्य णलि रूपमाविति, अन्यत्रा 'ऽत आदे' रिति दीर्घत्वे 'आतो लोप इटि च' आतुः, उः। 'चकासांचकारेति'। चकास् दीप्तौ। 'दरिद्रांचकारेति' 'आत औ णल' इत्यत्र ओकारे विधातव्ये औकारविधानं दरिद्रातेरार्धधातुकलोप इत्याकारलोपेऽप्योकारस्य श्रवणार्थं, तेन ददरिद्रावित्यपि भवतीत्याहुः। 'चुलुम्पाञ्चकारेति'। चुलुम्पतिर्वार्त्तिककारवचनात्साधुः। आमो मकारस्य 'हलन्त्य' मितीत्संज्ञा कस्माच्च भवतीत्याह। 'आमोऽमित्त्वमिति'। कारयांचकारेत्यादौ प्रयोगे य आम्शब्दस्तस्यामित्त्वं मकार इत्संज्ञको यस्य नास्ति सोऽमित् तस्य भाव अमित्त्वं, कुत इत्याह। 'अदन्तत्वादिति'। अद् अन्ते समीपे यस्य सोऽदन्तः सूत्रे विधानवेलायां समीपेऽकारवत्त्वादित्यर्थः। तेनैतत्र चोदनीयमाम् चेत्कथमदन्तः, अथादन्तः, कथमामिति, सूत्रे विधीयमानस्यैव वा प्रत्ययस्योपलक्षणमाम

Digitized by Google

इति । 'अगुणत्वं विदेस्तथेति' । विदाञ्चकारेत्यत्र विदेरामि गुणा-
भावोपि तथा, अदन्तत्वादेवेत्यर्थः । अदन्तत्वादित्येतत्प्रसङ्गेन चेदमि-
होक्तम्, 'उषविदजागृभ्योन्यतरस्या'मित्यत्र तु वक्तव्यं, तत्र हि विदेर-
कारान्तत्वमाम्प्रत्ययसन्नियोगेन निपात्यते, तत्रातो लोपस्य स्थानिव-
त्त्वाद्गुणो न भवति, न पुनर्विद ज्ञानइत्यकारो विवक्षित इत्युच्यते
वेत्तीत्यादौ श्रवणप्रसङ्गात्, अभ्युपेत्यापि मकारान्तत्वमित्संज्ञाभाव-
माह । 'आस्कासोराम्विधानाच्चेति' । आमोऽमित्त्वमित्यनुषङ्गः, सति
हि मित्त्वे आस्कासोराम् भवन्नप्यचामन्त्यात्परः स्यात्तथा च सवर्णदीर्घत्वे
सत्यकिञ्चित्करः स्यात्, अतो 'दयायासश्च' कास्प्रत्ययादिति आस्का-
सोराम्विधानादप्यामो ऽमित्त्वमवसीयतइत्यर्थः । आस्चकासोर्विधाना-
च्चेत्यन्ये पठन्ति, तदयुक्तं, नहि सूत्रे चकास आम्विधानमस्ति, यदपि
कास्यनेकाज्ग्रहणं तदपि चुलुम्पादौ सावकाशं, नन्वदन्तत्वपक्षे आमा-
मन्तइति निर्देश्यं स्यात्तत्राह । 'पररूपं कतन्तवदिति' । यथा 'सर्वत्र-
लोहितादिकतन्तेभ्य' इत्यत्र पररूपमेवमत्रापि निपातनात्पररूपमित्युक्तं
भवति ॥

"इजादेश्च गुरुमतो ऽनृच्छः" ॥ 'ऋच्छतिवर्जित इति'। ऋच्छ-
तिना त्यक्तः तद्रूपरहित इत्यर्थः । ऋच्छतेरन्य इति यावत् । 'इयज
उवपेति' । यजिवप्योरुत्तमे णलि 'णलुत्तमो वे'ति णित्त्वाभावपक्षे
वृद्ध्यभावाद्गुरूपोत्तमत्वाभावः, अथ थलि प्रत्युदाहरणम् । इयजिथ इयष्ठ,
उवपिथ, उवप्थेति । नन्वत्र सन्निपातपरिभाषयैव न भविष्यति, लिट्स-
न्निपातजं हि अभ्यासस्य संप्रसारणं तद्विघातकस्यामो निमित्तं न भवति,
आमि हि सति लेर्लुका भवितव्यमिति लिट्सन्निपातमसौ विहन्यात्,
इदन्तर्हि प्रत्युदाहरणम् इयेषेति, नह्यत्र लिट्सन्निपातजमिजादित्वम्,
अथ क्रियमाणेपि गुरुमद्ग्रहणे कस्मादेवात्र न भवति यावता गुणे कृते
गुरुमानेष भवति, एवमीषतुरित्यादावपि सवर्णदीर्घत्वे कृते गुरुमानेव
भवति, सत्यं, सति गुरुमद्ग्रहणे सन्निपातपरिभाषयैवात्राप्याम् न भवति
लिडानन्तर्यहेतुकत्वाद्गुरुमत्तायाः, अथ वा गुरुमत इति नित्ययोगे

Digitized by Google

मतुप्, नित्यं यस्य गुरुणाभिसम्बन्धः,[१] यद्येवम् उच्छी विवासे उच्छा-ञ्चकार उ[२]च्छ उच्छे उच्छाञ्चकार आगमनिमित्ता चास्य गुरुमत्ता तस्मादाम् न प्राप्नोति ज्ञापकात्सिद्धं, यदयमनृच्छ इत्याह तज्ज्ञापयति भवत्येवं जातीयके आमिति, स तर्हि ज्ञापकार्थमृच्छतिप्रतिषेधो वक्तव्यो भवति । ननु चाम्निवृत्त्यर्थ एवासौ कर्त्तव्यो नार्थ आम्निवृत्त्यर्थेन, ज्ञापका-त्सिद्धं, यदय 'मृच्छत्यृता' मिति लिटि परतो गुणं शास्ति तज्ज्ञापयति नास्मादाम् भवतीति, न च तत्रर्छतीत्यर्त्तेश्तिपानिर्देशः, ऋच्छति च ऋता-मित्यर्तेरपि स्वरूपेणैव प्रश्लेषात्, प्रश्लेषे बहुवचनमत्र प्रमाणम्, अर्त्तेश्च लिटि गुणविधाने प्रयोजनं तत्रैव वक्ष्यामः, तस्मादृच्छतेर्गुणविधानं ज्ञापक-मेव तस्मादाम्न भवतीति स एषोऽनृच्छ इति प्रतिषेधो ज्ञापकार्थ एव कर्त्तव्यः स्यात्, एवं तर्हि लिटीति विहितविशेषणम् इजादेर्गुरुमतो यो लिड्विहितस्तत्रेति, तेन लिण्निमित्ता यस्य गुरुमत्ता तस्माच्च न भविष्यति आगमनिमित्ता यस्य गुरुमत्ता तस्माच्च भविष्यति, अनृच्छ इति प्रतिषेधस्तु क्रियतां मा वा कारि, क्वचित्तु गुरुमत इति किम्, इयेष उवोषेति पठ्यते, तत्र उवोषेत्युदाहरणमयुक्तम् उषविदजागृभ्य इति विकल्प-विधानात्तु नित्यस्य विधेः प्रसङ्गाभावात्, अन्यथा विकल्पविधानमनव-काशं स्यात् । 'प्रोर्णुनावेति' । 'अजादेर्द्वितीयस्य' 'नन्द्राः संयोगा-दय' इति नुशब्दस्य द्विर्वचनं कार्यान्तरसिद्ध्यर्थमवश्यमूर्णोतेर्गुणवद्भावो वाच्यः, तेनैवामोऽपि प्रतिषेधः सिद्ध इत्याह । 'अथ वा वाच्य इति' । तत्र यदि भावातिदेशः, आमिटोस्त्वभावातिदेशो नैतेस्तयोरभावात् । इडुपग्रह इट्प्रतिषेधः, विभाषा गुण इति पञ्चमी, फलस्य चात्र हेतुत्वं यथाध्ययनेन वसतीति, एकाच इति वर्त्तमाने 'श्र्युकः किती' ति य इट्-प्रतिषेधः ततोऽपि हेतोर्गुणवद्भावो वाच्य इत्यर्थः । उदाहरणानि प्रोर्णो-नूयते, प्रोर्णुनाव, प्रोर्णुतः, प्रोर्णुतवानिति ॥

१ स गुरुमानित्यधिकं २ पु० ।

२ उच्छ उच्छे । उच्छाञ्चकारेति २ पु० नास्ति ।

"दयायासश्च" दयायासः सर्वेऽप्यनुदात्तेतः । 'पलायाञ्चक्रइति'। 'उपसर्गस्यायतौ' वित्युपसर्गस्य लत्वम् ॥

"उषविदजागृभ्यो ऽन्यतरस्याम्" ॥ 'विद ज्ञानइति'। सत्ताविचारणार्थयोस्त्वात्मनेपदिनोर्लाभार्थस्य चोभयपदिनोर्ग्रहणं न भवति परस्मैपदिभ्यामुषिजागृभ्यां जागर्तिनाऽदादिकेन साहचर्यादिति भावः । 'विवेदेति'। आम्प्रत्ययसन्नियोगेनादन्तत्वप्रतिज्ञानादत्र गुणो भवत्येव, अत एवाह, 'विदेरदन्तत्वप्रतिज्ञानादामि गुणो न भवतीति' ॥

"भीह्रीभृहुवां श्लुवच्च" ॥ श्लुवत्कार्यापेक्षया सूत्रे षष्ठी, सन्नियोगशिष्टत्वाच्चाम् प्रत्ययोपि तेभ्य एव विज्ञायते । 'द्वित्वमित्वेइति'[१]। श्लाविति द्विर्वचनं 'भृञामित्' इतीत्वं, तत्र श्लाविति वर्तते, 'न लुमताङ्गस्ये' ति गुणप्रतिषेधस्तु न भवति, किं कारणं, 'प्रत्ययलोपे प्रत्ययलक्षण' मित्यस्याप्राप्तेरयं प्रतिषेधः श्रूयमाणत्वादामः ॥

"कृञ्चानुप्रयुज्यते लिटि" ॥ अनुप्रयुज्यतइत्यनुशब्दः पश्चादर्थे, तत्र कस्य पश्चादित्यपेक्षायामामः प्रकृतत्वात्तस्यैवेति विज्ञायतइत्याह । 'आम्प्रत्ययस्येति'। यो ऽयमाम्प्रत्ययो विहितः, कर्मधारयो ऽयं न तु बहुव्रीहिः, आम्प्रत्ययो यस्मात्सो ऽयमाम्प्रत्ययस्तस्येति । तथा हि सत्याम्प्रत्ययवदितिवदामः प्रत्ययस्य प्रकृत्युपलक्षणत्वाद्धातोरामश्च मध्ये कृञः प्रयोग उक्तः स्यात् । 'पश्चात्कृञनुप्रयुज्यतइति'। पश्चाच्छब्दसन्निधावनुशब्दो ऽयमनुवादः । 'लिटि परत इति'। लिटि परतः स्थितो यः कृञ् सो ऽनुप्रयुज्यतइत्यर्थः । सूत्रेपि लिटीति नानुप्रयोगस्य निमित्तनिर्देशः, किं तर्हि 'परोक्षे लिङि' त्यनेन विहिते लिटि परभूते यः कृञ् सो ऽनुप्रयुज्यतइति वचनव्यक्तिः । चकारेत्यादिपदमनुप्रयुज्यतइति यावत् । 'कृञिति प्रत्याहारेणेति'। कृभ्वस्तियोगइति कृशब्दादारभ्य कृञो द्वितीयेत्या कृञो ञकारात्प्रत्याहारः । अत्र च प्रमाणमाम्प्रत्यय इत्यत्र कृञ् ग्रहणं, यदि ह्यत्र स्वरूपग्रहणं स्यात्तदान्यस्यानुप्रयोगस्याभावादनर्थकं तत्र कृञ्ग्रहणं स्या,दत एव विपर्ययोपि न भवति तत्र प्रत्याहारग्रहणमिह

१ द्वित्वमित्वं चेति मुद्रितमूलपुस्तके पाठः ।

स्वरूपग्रहणमिति, नह्यत्र स्वरूपमात्रग्रहणे तत्र कृभ्वस्तीनामनुप्रयोगस्त्वा-नुवाद उपपद्यते । 'तत्सामर्थ्यादिति' । प्रत्याहारग्रहणसामर्थ्यादित्यर्थः । 'अस्तेर्भूवभावो न भवतीति' । अन्यथा ऽसन्देहार्थं कृभ्वनुप्रयुज्यते लिटीत्येव ब्रूयादिति भावः । तत्र एधि इटि च रूपे विप्रतिपन्ना उभयत्र 'ह एति' ईत्वामाह इति केचित् । अन्ये तु तासिसाहचर्यादित्येव हत्व-मिति, अपरे तु साहचर्यादेव सार्वधातुके एवेति हत्वमित्युभयत्र ईत्वामा-स इतिरूपमिति स्थिताः । इहामन्तमेतदनभिव्यक्तपदार्थकं नास्माद्वा-वकर्मकर्तृविशेषः पुरुषविशेषः संख्याविशेषो वा गम्यते केवलं पूर्वापरीभू-तानद्यतनकालं परोक्षं साधनादिविशेषाकाङ्क्षं क्रियारूपमर्थमाह, तत्रा-वश्यं तदाकाङ्क्षानिवृत्तये विशेषवाचिपदमनुप्रयोक्तव्यं, तस्मादनुप्रयुज्यत-इत्यंशो न विधातव्यः, इदं तर्हि प्रयोजनं कृभ्वस्तीनामेव यथा स्याद्धा-त्वन्तरस्य मा भूत्, कस्य पुनः प्राप्नोति सामान्यवचनस्यानुप्रयुज्येत कार-यांपपाचेति, विशेषवचनस्य वा तत्रापि सोऽनुप्रयुज्येत उषामुवोष विदां-विवेद जागराञ्जजागारेति, तत्समानार्थो वा उषान्ददाहेतीत्यावर्था-न्तरवचनो वा उषाम्पपाचेति । प्रथमे पक्षे यावदपेक्षमेव नानुप्रयुक्तं स्याद-धिकोऽप्यर्थो गम्येत पाकादिविशेषो नाम, द्वितीयतृतीययोस्त्वनुप्रयोगेणैव सकलार्थावगतेरासप्रयोगो व्यर्थः स्या,च्चतुर्थे त्वर्थान्तरगत एव विशेषो गम्येत न त्वामवगतस्तद्गतविशेषाभिधानाय त्वामनुप्रयोगव्यसन,मत एव प्रत्याहारान्तर्भूतस्यापि सम्पद्यतेरनुप्रयोगो न भवति, अन्यथा तस्यापि स्यात्, 'सनाद्यन्ता धातवः' इत्यतो धात्वधिकाराद्वा धातूपसर्गसमुदायस्य न भविष्यति, एवमपि योऽत्र धातुस्तस्य प्राप्नोति तस्मात्सामान्यवचनस्य विशेषवचनस्य वा सामान्यवचनं वानुप्रयोक्ष्यते एवं हि सामान्यस्य सन्नि-हिते एव विशेषे पर्यवसानात्तद्गतसाधनादिविशेषाभिधानमामन्तर्गतवि-शेषाभिधानमेव संवर्तते, तथा भ्वस्त्योरनुप्रयुज्यमानयोरामन्तवशेन सक-र्मकत्वं भवति, तस्यातपत्रं बिभराम्बभूवे, अहं किल व्यपेक्षामास इति, तदुपपद्यते, तेन द्वयोः सहप्रयोगः, यदि तु सामान्यवचन एव प्रयुज्येत क्रियाविशेषो न गम्येत । आमन्तस्यै वानभिव्यक्तिस्तस्मात्कृञ्चेत्ययमप्यंशो

Digitized by Google

न विधेयः, इदं तर्हि प्रयोजनं लिट्परस्यैव यथा स्यात्प्रत्ययान्तरपरस्य मा भूत्किं परस्य पुनः प्राप्नोति कृत्परस्य, न कृत्परस्यानुप्रयोगे ह्यमाणपुरुषविशेषाभिव्यक्तिः लिटि तु विरुद्धकालतैव लुङ्लुटोरपि, लिङादिष्वपि विध्याद्यर्थान्तरप्रतीतिप्रसङ्गः, लुङि भूतमात्रं गम्येत नानद्यतनविशेषः, लटि न परोक्षं गम्येत। ननु च यथानुप्रयोगे प्रकृतिवाच्यस्य सामान्यस्यामन्तवाच्ये विशेषे पर्यवसानमेवं प्रत्ययवाच्यस्याप्यामन्तवाच्ये ऽनद्यतने परोक्षे च विशेषे पर्यवसानाद्युज्यतएव लुङो ऽनुप्रयोगः, तथा 'ह शश्वतोर्लङ् चे' ति लिडर्थएव लङ् विधीयते लङन्तस्यानुप्रयोगः प्राप्नोति। नैष दोषः। एकस्या आकृतेश्चरितः प्रयोगो न द्वितीयस्यास्तृतीयस्याश्च भविष्यति। कोर्थः। यया प्रकृत्या प्रयोगः प्रारभ्यते तयैव समापनीयः। यथा खादिरे बध्नाति पालाशे बध्नातीति यूपद्रव्यविकल्पे खादिरेण प्रयोगे प्रारब्धे दैवान्मानुषाद्वा कस्माच्चिदपराधात्खादिरापचारे मुख्ये पलाशे लभ्यमानेपि तत्परित्यागेनालभ्यमानस्यापि खादिरस्य प्रतिनिधिना बादरादिना प्रयोगः परिसमाप्यते, एवं हि प्रारब्धः प्रयोगः परिसमापितो भवति द्रव्यान्तरोपादाने तु प्रयोगान्तरं स्याद् द्रव्यभेदे क्रियाभेदात्, प्रतिनिधिस्तु मुख्यबुद्ध्यैवोपादीयते तदवयवानां तत्र भूयसां सम्भवात् तथेहाप्यामन्तेन लिट्प्रयोगः प्रारब्धोपरिसमाप्तः साकाङ्क्षः, तस्याकाङ्क्षापूरणेन स एव प्रयोगो ऽनुप्रयोगेण परिसमाप्यमानो युक्तं यल्लिट्परस्यैवानुप्रयोगेण परिसमाप्यते तस्मान्नास्ति प्रत्ययान्तरपरस्यानुप्रयोगप्रसङ्गः, तस्माल्लिटीत्ययमप्यंशो न विधातव्यः, इदं तर्हि प्रयोजनम् अनुप्रयोगः पश्चात्प्रयोगो यथा स्यादीक्षांचक्रे चक्रे ईक्षामिति मा भूत् व्यवहितनिवृत्त्यर्थं च ईक्षां देवदत्तश्चक्रे, कथं व्यवहितनिवृत्तिः, आमपेक्षया पश्चाद्भावस्य तत्रैव मुख्यत्वात् तदेवं पूर्वनिवृत्तिर्व्यवहितनिवृत्तिश्च प्रयोजनमिति स्थितम्। इह तु तान्ह राजा मदयामेव चकारेति बह्वृचब्राह्मणे व्यवहितप्रयोगश्छान्दसः। कथं भट्टिकाव्य उक्षां प्रचक्रे नगरस्य मार्गान्, बिभयां प्रचकारासाविति, कथं वा तं पातयां प्रथममास, प्रभ्रंशयां यो नहुषं चकारेति, वार्त्तिककारः पृथक्त्वतां यः पठति विपर्यासनिवृत्त्यर्थं वाच्यं व्यवहितनिवृत्त्यर्थं चेति॥

"विदांकुर्वन्त्वित्यन्यतरस्याम्" ॥ इहोत्तरत्र चानुप्रयोगानुसारेण आमन्ते लकार उन्नेयः। 'विदेर्लोट्याम्प्रत्यय इति'। निपात्यतइत्यनुषङ्गः, तथा गुणाभावश्चेत्यत्र, एवं लोटो लुगित्यत्र, तथा कृञश्च लोट्परस्यानुप्रयोग इत्यत्र, सर्वमेतदप्राप्तमिति निपात्यते। 'इतिकरणः प्रदर्शनार्थ इति'। सर्वेषां लोड्वचनानामुपलक्षणार्थ इत्यर्थः, किमेवं सति सिद्धं भवतीत्याह। 'न केवलमिति'। प्रचुरप्रयोगत्वात्तु सूत्रे बहुवचनं पठितम्। कश्चित्तु भाष्यवार्तिककारानुक्तत्वादुपलक्षणत्वं नेच्छति स इतिकरणस्य प्रयोजनं ब्रवीतु॥

"अभ्युत्सादयांप्रजनयांचिकयांरमयामकःपावयांक्रियाद्विदामक्रन्निति च्छन्दसि" ॥ 'अकरिति'। कृञो लुङि सिपि मन्त्रे घसेत्यादिना लुक्, सिपो हल्ङ्यादिलोपः। 'अक्रन्निति'। तत्रैव बहुवचनं झिः। 'क्रियादिति'। तस्यैवाशिषि लिङ्, 'लिङाशिषी' त्यार्द्धधातुकत्वाद्विकरणाभावः, रिङ् शयेति रिङ्। 'द्विर्वचनं चेति'। चकारात्कुत्वं च। 'अभ्युदसीषददिति'। सदेर्ण्यन्ताल्लुङि चङ्युपधाया ह्रस्वः, 'चङीति' द्विर्वचनं 'हलादिः शेषः' सन्वल्लघुनीतीत्वं 'दीर्घो लघोः'। 'भाषायामिति'। अन्यतरस्यामित्यनुवृत्तेश्छन्दस्यपि यथादर्शनं भवत्येव, भाषायां त्वेतदेव रूपमिति अभ्युदसीषददिति भाषायामित्युक्तम्॥

"च्लि लुङि" ॥ 'इकार उच्चारणार्थ इति'। चकारलकारसंयोगस्य केवलस्योच्चारयितुमशक्यत्वात्, न त्वयमनुबन्धः, प्रयोजनाभावात्। 'चकारः स्वरार्थ इति'। एतदुत्तरसूत्रे वक्ष्यामः। 'अस्य सिजादीनादेशान्वक्ष्यतीति'। यद्येवं किमर्थोयमुपदिश्यते, यावता श्रवणार्थो वा भवत्युपदेशः कार्यार्थो वा, न चायं च्लिः क्व चिच्छ्रूयते नापि क्विबादीनामिवाश्रियमाणस्यैवास्य किं चित्कार्यं दृश्यते, तस्मात् सिचमेवोत्सृज्य तस्यापवादाः क्सादयो विधीयेरन्, नैवं शक्यम्। एवं हि मन्त्रे घसादिसूत्रे बहूनां ग्रहणं कर्तव्यं स्याद्, गम्यर्थमङो ग्रहणम्, आकारान्तेषु

१ मूले कुत्वं चेति पाठो ऽपपाठः।

Digitized by Google

कुतः, आदिमध्यावसानेषु पुरुषस्यैव प्रतीतेः, उपक्रमे तावत्पतिजायापुत्रवित्तपश्वादिप्रियत्वयोगाज्जीवात्मैव प्रतीयते मध्येऽपि "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ती"त्युत्पत्तिविनाशसंयोगात्स एवावगम्यते ॥

टी० सू० वाक्यान्वयात्, बद्धासाधारणेन कर्मसम्बन्धवाचिना शब्देन कर्मरहितशुद्धस्वरूपप्रतिपादनं लाक्षणिकमिति जीवपरत्वं निरस्तम्, अत्र तु बद्धमुक्तसाधारणात्म-शब्दनिर्देशात् मुक्तलिङ्गश्रवणाच्च शुद्धस्वरूपपरत्वं युक्तमिति शङ्कया सङ्गतिः । यद्वा कर्म-शब्दस्य क्रियत इति व्युत्पत्त्या प्रकरणस्य ब्रह्मपरत्वमुक्तं कर्मफलभूतभोक्तृत्वश्रवणात् अस्य तथा व्युत्पत्तिविशेषप्रदर्शनासम्भवात् तन्त्रसिद्धपुरुषपरत्वमिति शङ्कया सङ्गतिः, उत्तराधिकरणे हि सेश्वरसाङ्ख्यप्रत्यवस्थानं, तस्मादिदमपि निरीश्वरसाङ्ख्यनिराकरणपरमित्यभिप्रायेणात्रापीत्युक्तं, बृहदित्यादि कर्मफलभोक्तृत्वकण्ठोक्तिमुमुक्षूपास्यत्वादिब्रह्मलिङ्गवद्वाक्यं विषयः, पतिजायादिप्रियसम्बन्धप्रतिपादकोपक्रममैत्रेयीब्राह्मणं चतुर्थे षष्ठे च अध्याये श्रूयते तदुभयमपि मैत्रेयीब्राह्मण-शब्देन विषयवाक्यतया विवक्षितं, यथा ऽन्तस्तद्धर्मोपदेशादित्यत्र "य एषोऽन्तरादित्ये" "य एषोऽन्तरक्षिणी"ति वाक्यद्वयं सर्वज्ञः सत्यसङ्कल्प इति सिद्धान्तानुगुणविशेषणं जीवकर्मविशेषाभिज्ञस्तत्फलदानशक्त इति भावः। किं जगत्कारणवादिवेदान्तप्रतिपाद्यं पुरुषाधिष्ठितं प्रधान? मुत ब्रह्मे? ति प्रथमविचारः, तदर्थं बृहदारण्यके मैत्रेयीब्राह्मणे द्रष्टव्यतयोक्त आत्मा किं पञ्चविंशक? उत परमात्मे? ति किमुपक्रमे पतिजायापुत्रादिप्रियसम्बन्धः आत्म-शब्दस्य पञ्चविंशपुरुषपरतामवगमयति ने? ति किं वाक्यावयवानां सर्वेषां परमात्मन्यन्वयासामञ्जस्य? मुत पञ्चविंश? इति । यदा परमात्मन्यन्वयासामञ्जस्यं तदा

सू० तथान्ते च "विज्ञातारमरे केन विजानीयादि"ति स एव ज्ञाता क्षेत्रज्ञ एव प्रतीयते नेश्वरः, अतस्तन्त्रसिद्ध-

पुरुषप्रतिपादनपरमिदं वाक्यमिति निश्चीयते । नन्व“मृतत्वस्य तु नाशाऽस्ति वित्तेने”त्युपक्रमात् अमृतत्वप्राप्त्युपायोपदेशपरमिदं वाक्यमित्यवगम्यते तत्कथं पुरुषप्रतिपादनपरत्वमस्य वाक्यस्य, तदुच्यते अत एव ह्यच पुरुषप्रतिपादनं, तन्त्रे ह्यचिद्धर्माध्यासवियुक्तपुरुषस्वरूपयाथात्म्यविज्ञानमेवामृतत्वहेतुत्वेनोच्यते, अतो जीवात्मनः प्रकृतिवियुक्तं स्वरूपमिहामृतत्वाय “आत्मा वा अरे द्रष्टव्य” इत्यादिनोपदिश्यते सर्वेषामात्मनां प्रकृतिवियुक्तं स्वरूपमेकरूपमिति प्रकृतिवियुक्तस्वात्मयाथात्म्यविज्ञानेन सर्वे एवात्मानो विदिता भवन्तीत्यात्मविज्ञानेन सर्वविज्ञानमुपपन्नं देवादिस्थावरान्तेषु सर्वेषु भूतेषु आत्मस्वरूपस्य वि[१]ज्ञानैकप्रकारत्वादिदं सर्वं यदयमात्मेत्यैकात्म्योपदेशः, देवाद्याकाराणामनात्माकारत्वात्सर्वं तं परादादित्यादिनाऽन्यत्वनिषेधश्च

टी० पतिजायादिप्रियसम्बन्धेनात्म-शब्दस्य पुरुषपरत्वावगमाद् द्रष्टव्यतयोक्तः पञ्चविंशक इति तदधिष्ठितं प्रधानं वेदान्तवेद्यमिति स्यात्, यदा पञ्चविंशे वाक्यावयवानां समन्वयासामञ्जस्यं तदा पतिजायादिप्रियसम्बन्धादात्म-शब्दस्य पञ्चविंशपरत्वानवगमात् मैत्रेयीब्राह्मणे द्रष्टव्यतयोक्तः पञ्चविंशातिरिक्त इति कारणवाक्यानां परमात्मपरत्वं स्यादिति, तथा ऽन्ते चेति आदिमध्यगतजीवहेत्वनुगृहीतोऽपि ज्ञातृ-शब्दस्तत्पर इति भावः । नन्विति पतिजायादिप्रियसम्बन्धप्रतिपादकवाक्यात् पूर्वमेवामृतत्वप्राप्त्युपायपरत्वमवगम्यत इत्यर्थः । परिहरति “तदुच्यते”इति, अत एव-अमृतत्वप्राप्त्युपायोपदेशपरत्वादेवेत्यर्थः, ऐक्योपदेशफलभूतमेक-

१ ज्ञानैकप्रकारत्वादिति पा० ।

विज्ञानेन सर्वविज्ञानं जीवप्रतिपादनपरत्वे कथं घटते, बहवो हि जीवाः न च मिथः कार्य्यकारणभूताश्चेत्याशङ्क्य प्रकारैक्यात् उपपद्यत इत्याह "सर्वेषामि"त्यादिना, ऐक्योपदेशश्च तन्निबन्धन इत्याह "देवादिस्थावरान्तेष्वि"ति, ऐक्यविधिशेषभूतभेदनिषेधं प्रतिविवक्षन् भेददर्शनेनानर्थप्रतिपादकवाक्यस्यार्थमाह "देवाद्याकाराणामि"ति, देवाद्याकारस्यानात्माकारत्वात्तस्य तदनन्यत्वमुक्तं, तस्मादात्मनोऽन्यत्वदर्शनं नाम निकृष्टस्वरूपव्यतिरिक्तदेवाद्याकारदर्शनमिति तस्यानर्थहेतुत्वमुच्यत इत्यर्थः । प्रबुद्धस्य भेदनिषेधं परि[1]हरति–

मू॰ "यत्र हि द्वैतमिव भवती"ति च नानात्वनिषेधेनैकस्वरूपे ह्यात्मनि देवादिप्रकृतिपरिणामभेदेन नानात्वं मिथ्येत्युच्यते "तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद" त्याद्यपि प्रकृतेरधिष्ठातृत्वेन पुरुषनिमित्तत्वाज्जगदुत्पत्तेरुपपद्यते एवमस्मिन् वाक्ये पुरुषपरे निश्चिते सति तदैकार्थ्यात्सर्वे वेदान्तास्तन्त्रसिद्धं पुरुषमेवाभिदधतीति तदधिष्ठिता प्रकृतिरेव जगदुपादानं नेश्वर इत्येवं प्राप्ते प्रचक्ष्महे सू॰ वाक्यान्वयादि"ति, सर्वेश्वर एवास्मिन्वाक्ये प्रतीयते कुतः, एवमेव हि वाक्यावयवानामन्योन्यान्वयः समञ्जसो भवति "अमृतत्वस्य तु नाशाऽस्ति वित्तेनेति"याज्ञवल्क्येनाभिहिते "येनाऽहं नामृता स्यां किमहन्तेन कुर्य्यां यदेव भगवान्वेद तदेव मे ब्रूहीत्य"मृतत्वानुपायतया वित्ताद्यनादरेणामृतत्वप्राप्त्युपायमेव प्रार्थयमानायै मैत्रेय्यै तदुपायतया द्रष्टव्यतयोप-

१ प्रतिवदतीति पा॰ ।

दिष्टोऽयमात्मा परमात्मैव "तमेवं विदित्वाऽतिमृत्युमेति" "तमेवं विद्वानमृत इह भवति" नान्यः पन्थाः" इत्यादिभिरमृतत्वस्य परमपुरुषवेदनैकोपायतया प्रतिपादनात्

टी० "यत्र ही"ति, अनात्माकाराणां देवत्वादीनां बहुत्वादेकाकार आत्मनि देवत्वादीनि न सन्तीति निषिध्यत इत्यर्थः, एवमनर्थहेतुतया कदाचिन्निवृत्तिहेतुमत्तया च प्रतिपन्नं भेददर्शनं देवादिभेददर्शनमेवेत्युक्तं भवति । कारणत्वं कथ? मित्यत्राह "तस्य ह वा इति", जीवाधिष्ठितप्रधानादाकाशगुणशब्दोत्पत्तिरिति ऋग्वेदादिकारणत्वमुपपद्यत इत्यर्थः, । एवं पूर्वपक्षयुक्तिवशात् फलितमयोगव्यवच्छेदप्रतिक्षेपं दर्शयति "एवमस्मिन्नि"ति, पादसङ्गत्यादिकं पूर्ववत्, राद्धान्ते समञ्जसो भवति स्वारसिको भवति इत्यर्थः, अस्वरसान्वयो हि परेरुच्यते, श्रुतेः स्वारस्यं नाम सजातीयश्रुत्यैकार्थ्यं न तु बाह्यस्मृत्यैकार्थ्यमित्यभिप्रायेणाह "तमेवं विदित्वे"त्यादि श्रुतावपि प्रजापतिवाक्यादिषु जीवस्वरूपस्य प्रतिपाद्यमानत्वात्तदैकार्थ्यात्स्वारस्यमित्यत्राह—

भू० परमपुरुषविभूतिभूतस्य प्राप्तुरात्मनः स्वरूपयाथात्म्यविज्ञानमपवर्गसाधनपरमपुरुषवेदनोपयोगितयाऽवगन्तव्यं न स्वत एवोपायत्वेन, अतोऽत्र परमात्मैवामृतत्वोपायतया द्रष्टव्य इत्यादिनोपदिश्यते, तथा "तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिना कृत्स्नस्य जगतः कारणत्वमुच्यमानं परमपुरुषादन्यस्य कर्मपरवशस्य मुक्तस्य निर्व्यापारस्य च पुरुषमात्रस्य न संभवति, तथा "आत्मनो वा अरे दर्शनेने"त्यादिनैकविज्ञानेन सर्वविज्ञानमभिधीयमानं सर्वात्मभूते परमात्मन्येवावकल्पते यत्त्वेतदेकरूपत्वादात्मनामेकात्मविज्ञानेन सर्वात्मविज्ञा-

Digitized by Google

ममुच्यत इति तदयुक्तम्, अचेतनप्रपञ्चज्ञानाभावेन सर्व-
विज्ञानाभावात् प्रतिज्ञोपपादनाय च इदं ब्रह्मेदं क्षत्र-
मित्युपक्रम्येदं सर्वं यदयमात्मेति प्रत्यक्षादिसिद्धं चिद-
चिन्मिश्रं प्रपञ्चमिदमिति निर्दिश्यैतदयमात्मेत्यैकात्म्योप-
देशस्य परमात्मन एवोपपद्यते

टी० "परमपुरुष"इति, प्रधानभूतोपायपरवाक्यैकार्थ्यं स्वारसिक-
मित्यर्थः, श्रुत्यन्तरैकार्थ्यात् ब्रह्मवेदनस्यैवामृतत्वोपायत्वमित्युपपादितमु-
पसंहरति "अतोऽत्रे"ति, एवमुपक्रमवाक्यसामञ्जस्यं दर्शितं वाक्यान्तरा-
णामप्यन्वयस्वारस्यं दर्शयन् कारणत्वं स्वपक्षोपपादकमेव सत् परपक्षप्रति-
क्षेपकं चेत्याह "तथा तस्ये"ति, बद्धस्य सर्वज्ञत्वाद्ययोगान्मुक्तस्य जगद्व्या-
पारशून्यत्वाच्च कृत्स्नजगत्का.रणत्वं न सम्भवतीत्यर्थः, पुरुषमात्रस्य
जीवमात्रस्याल्पशक्तित्वं मात्रचा अभिप्रेतम् । यद्वा कर्मपरवशस्य मुक्त-
स्येति पदाभ्यां स्वपक्षे सर्वावस्थस्य जीवस्य जगत्कारणत्वानुपपत्तिरुक्ता
साङ्ख्यमतेऽपि तदनुपपत्तिमाह "निर्व्यापारस्य च पुरुषमात्रस्ये"ति, निमि-
त्तोपादानभावानुगुणसङ्कल्पशक्तियोगाभावादिति भावः । कारणत्वफल-
भूतमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञानमपि दृष्टान्तोपपादकमित्याह "त-
थाऽऽत्मन"इति, एकविज्ञानेन सर्वविज्ञाननिर्वाहं परोक्तं "यस्त्वेतदित्या-
दिनाऽनूद्य तदयुक्तमित्यादिना दूषयति । ऐकार्थ्योपदेशानुपपत्तिमाह "प्र-
तिज्ञोपपादनाये"ति, श्रुतिस्थेदं-शब्दस्थाने एतच्छब्दो भाष्ये स्वका-
र्यत्वज्ञापनाय प्रयुक्तः, इदमयमात्मेति कार्यस्य कारणतादात्म्योपदेशः,
जीवस्य तदनुपपत्तिमुपपादयति—

मू० न हीदं-शब्दवाच्यं चिदचिन्मिश्रं जगत्पुरुषेणाचित्सं-
सृष्टेन तद्वियुक्तेन वा स्वरूपेणावस्थितेन चैक्यमुपगच्छ-
ति, अत एव सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेति
व्यतिरिक्तत्वेन सर्ववेदननिन्दा च, तथा प्रथमे च मैत्रे-

Digitized by Google

यीब्राह्मणे "महद्भूतमनन्तमपारमिति श्रुता महत्त्वादयो गुणाः परमात्मन एव सम्भवन्ति, अतः स एवात्र प्रतिपाद्यते, यत्तूक्तं पतिजायापुत्रवित्तपश्वादिप्रियान्वयिनो जीवात्मन उपक्रमे त्वन्वेष्टव्यतया प्रतिपादनात्तद्विषयमेवेदं वाक्यमिति तदयुक्तम्, आत्मनस्तु कामायेत्यात्मशब्देन जीवात्मसंशब्दने तस्यात्मा वा अरे द्रष्टव्य इत्यनेनानन्वयप्रसङ्गात् आत्मा वा अरे द्रष्टव्य इत्यात्मनो द्रष्टव्यत्वोपयोगितयाऽऽत्मनस्तु कामायेत्युपदिष्टमिति प्रतीयते आत्मनस्तु कामाय—आत्मनः कामसंपत्तये काम्यन्त इति कामाः आत्मन इष्टसंपत्तये इति यावत्, न च जीवात्मन इष्टसंपत्तये पत्यादयः प्रिया भवन्तीत्युक्ते सति तस्य स्वरूपमन्वेष्टव्यं भवति

टी० "न ही"ति, कार्य्यस्य कारणेन हि स्वरूपैक्यसम्भवः सूक्ष्मस्थूलचिदचिच्छरीरकः परमात्मेति कार्य्येण जगतैक्यं तस्यैव हि सम्भवति न तु बद्धस्य वा मुक्तस्य वा जीवस्याकारणभूतस्य सम्भवतीत्यर्थः अत एवेति सर्वस्य परमात्मात्मकत्वादेवातदात्मकानुसंधाननिषेधः, न तु देवादिदृष्टिनिषेधः प्रागुक्तहेतुनिबन्धनत्वात् भेदनिषेधस्येत्यर्थः, प्रथमे चेति मैत्रेयीब्राह्मणानामनेकत्वात्प्रथम इति विशेषितम्, उत्तरे मैत्रेयीब्राह्मणे महद्भूतमनन्तमपारमिति विशेषणाश्रवणेऽप्यनुक्तमन्यतो ग्राह्यमिति न्यायात् महत्त्वभूतत्वादिकमप्युक्तं भवतीति भावः । पतिजायादिभोग्यत्ववाचिवाक्यस्याप्यन्वयस्वारस्यं हि सूत्राभिप्रेतं "वाक्यावयवेषु प्रधानभूतोपक्रमावयवस्य वाक्यशब्देनाविवक्षितत्वानुपपत्तेः, तस्मात्तदुपपादयितुं परोक्तार्थं यत्तूक्तमित्यादिनाऽनूद्य दूषयति "तदयुक्तमि"त्यादिना, अनन्वयस्यानिष्टत्वं कथं तस्य प्रसङ्गो वा कथमित्यत्राह "आत्मा वा"इति, "आत्मनस्तु का-

Digitized by Google

माय सर्वं प्रियं भवति आत्मा वा अरे द्रष्टव्य" इत्युक्ते आत्मनस्तु कामाये"त्यस्य आत्मनोद्रष्टव्यतोपयोगित्वं हि स्वरसतः प्रतीयत इत्यर्थः । अतो मा भूदन्वय इति न वाच्यमिति दर्शितम् । अथ जीवपरत्वेऽनन्वयमुपपादयति "आत्मनस्त्वि"त्यादिना इष्टसंपत्तये-सुखादिसंपत्तये । ततः किमनन्वयस्येत्यत्राह "न चे"ति, नेत्यस्यान्वेष्टव्यं भवतीत्युत्तरत्रान्वयः कथमन्वेष्टव्यत्वासिद्धिरित्यत्राह-

सू० प्रियमेव ह्यन्वेष्टव्यं न तु प्रियं प्रति शेषिणः प्रियवियुक्तं स्वरूपं यस्मादात्मनः इष्टसंपत्तये पत्यादयः प्रिया भवन्ति तस्मात्पत्यादिप्रियं परित्यज्य तद्वियुक्तमात्मस्वरूपमन्वेष्टव्यमित्यसङ्गतं भवति प्रत्युत न पत्यादिशेषतया पत्यादीनां प्रियत्वम् अपि त्वात्मनः शेषतया पत्यादीनां प्रियत्वमित्युक्ते स्वशेषतया त एवोपादेयाः स्युः, आत्मनस्तु कामाय सर्वं प्रियं भवतीत्यस्य परेणानन्वये वाक्यभेदः प्रसज्यते, अभ्युपगम्यमानेऽपि वाक्यभेदे पूर्वस्य वाक्यस्य न किञ्चित्प्रयोजनं दृश्यते, अतः पत्यादि सर्वं प्रियं परित्यज्यात्मन एवान्वेष्टव्यत्वं यथा प्रतीयते तथा वाक्यार्थो वर्णनीयः, सोऽयमुच्यते अमृतत्वस्य तु नाशाऽस्ति वित्तेनेति वित्तादीनां नित्यनिर्दोषनिरतिशयानन्दरूपामृतत्वप्राप्त्यनुपायत्वमुक्त्वा वित्तपुत्रपतिजायादीनां सातिशयदुःखमिश्रकादाचित्कप्रियत्वमनुभूयमानं न पत्यादिस्वरूपप्रयुक्तम् अपि तु निरतिशयानन्दस्वभावपरमात्मप्रयुक्तम्, अतो य एवं स्वयं निरतिशयानन्दः सन्नन्येषामपि प्रियत्वलेशास्पदत्वमापादयति स परमात्मैव द्रष्टव्य इत्युपदिश्यते

टी० प्रियमेव ही"ति, पत्यादीनामात्मनः प्रियत्वे तेषामन्वेष्टव्यत्वं स्यात् प्रियस्यैव दृष्टव्यार्थत्वादित्यर्थः। एवकाराभिप्रेतमाह "न त्वि"ति, प्रियवियुक्तं-पुत्रपत्न्यादि वियुक्तं, तद्विवृणोति "यस्मादि"ति, न केवलं स्वाभिमतार्थासङ्गतिः। अनभिमतार्थसङ्गतिश्चेत्याह "प्रत्युते"ति, त एवोपादेयाः स्युरिति सकलेतरत्यागपूर्वकमात्मनो द्रष्टव्यत्वस्य विरोध एव स्यादित्यर्थः, जीवपरत्वेऽनन्वयश्चेन्माभूदन्वय इत्यत्राह "परेणे"ति, परेण आत्मा वा अरे द्रष्टव्य इति परेण वाक्येन, वाक्यभेदः-महावाक्यभेदः, एकवाक्यत्वेन निर्वाहे सुशकेऽपि वाक्ये भेदोऽनुपपन्नः "सम्भवत्येकवाक्यत्वे वाक्यभेदस्तु नेष्यत" इति न्यायादित्यर्थः। वाक्यभेदाऽभ्युपगमेऽपि प्रयोजनाभावाच्च अन्वयोऽनुपपन्न इत्याह "अभ्युपगम्यमानेऽपी"ति, एवं परपक्षानुपपत्तेः परिशेषादर्थान्तरपरत्वं सिद्धमित्याह "अत"इति, उपपन्नार्थः क इत्यत्राह "सोऽयमुच्यत"इति, स्वयं निरतिशयानन्दः सन्नन्येषामपि प्रियत्वलेशास्पदत्वमापादयतीति अन्येषाम् आनन्दोयदधीनस्तस्यानन्दोनिरवधिक इत्यर्थसिद्धं, यथाऽन्येषां विद्यां धनञ्च ददतः पुरुषस्य ज्ञानाधिकत्वं धनाधिकत्वं चार्थसिद्धं "स एको ब्रह्मण आनन्दः" "यतो वाचो निवर्तन्ते" "रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती"त्यादिषु श्रुत्यन्तरेषु तत्स्पष्टमभिहितं चेत्यभिप्रायः उपदिश्यत इत्यन्तेन श्रुतेस्तात्पर्यार्थ उक्तः। अस्यार्थस्य शब्दवाच्यत्वं कथमित्यत्राह-

मू० तदयमर्थः "न वा अरे पत्युः कामाय पतिः प्रियो भवति" न हि पतिजायापुत्रवित्तादयो मत्प्रयोजनायाहमस्य प्रियः स्यामिति स्वसङ्कल्पात्प्रिया भवन्ति, अपि त्वात्मनः कामाय परमात्मनः स्वाराधकप्रियप्रतिलम्भनसङ्कल्पेष्टनिर्वृत्तय इत्यर्थः, परमात्मा हि कर्मभिराराधितस्तत्तत्कर्मानुगुणं प्रतिनियतदेशकालस्वरूपपरिमाणमाराधकानां तत्तद्वस्तुगतम्प्रियत्वमापादयति "एष ह्येवा-

नन्दयातीति' श्रुतेः, न हि तत्तद्वस्तुस्वरूपेण प्रियमप्रियं वा यथोक्तं "तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते। तदेव कोपाय यतः प्रसादाय च जायते॥ तस्माद् दुःखात्मकं नास्ति न च किंचित्सुखात्मकमिति, आत्मनस्तु कामायेत्यस्य जीवात्मपरत्वेऽपि "आत्मा वा अरे द्रष्टव्य" इति तु परमात्मविषयमेव, तत्राप्ययमर्थः यस्मात्पत्यादीनामिष्टसंपत्तये तत्परत्वेन पत्यादयः प्रियत्वेन नोपादीयन्ते अपि त्वात्मेष्टसंपत्तये [1]स्वातन्त्र्येण स्वप्रियत्वेनोपादीयन्ते तस्माद्य एवात्मनो निरुपाधिकनिर्दोषनिरवधिकप्रियः परमात्मा स एव हि द्रष्टव्यः न दुःखमिश्राल्पसुखदुःखोदर्काः परायत्तस्वभावाः पतिजायापुत्रवित्तादयो विषया इति

टी० "तदयमर्थ"इति, परमात्मनः स्वाराधकाभिमतदानस्येष्टत्वं विवृणोति "परमात्मा ही"ति, प्रतिनियतेति स्वरूपनियमो नाम स्रक्चन्दनादिषु अस्येदमेव भोग्यं नान्यदिति नियमः, परिमाणनियमो भोग्यत्वपरिमाणनियमः, न हि मनुष्यभोग्यस्य स्रगादेर्देवभोग्यस्रगादितुल्यभोग्यत्वमस्ति। आश्रितप्रियप्रतिलम्भकत्वे श्रुतिमाह "एष ह्येवे"ति, तदेव प्रीतय इति कस्यचिद्वस्तुनः प्रियत्वं तत्स्वरूपप्रयुक्तं चेत्सर्वदा सर्वेषां प्रियत्वं स्यात्, न च तदस्ति कञ्चित्प्रति कदाचित्प्रियत्वमप्रियत्वं च परसङ्कल्पाधीनमित्यर्थः नतु "आत्मनस्तु कामाय सर्वं प्रियं भवति""आत्मा वा अरे द्रष्टव्य"-इति वाक्ययोर्जीवपरत्वेऽप्यन्वयस्संभवति तथा हि न हि तत्परतन्त्रो भोक्ता भुङ्क्ते अपि तु स्वातन्त्र्येण तत्स्वीकारपरित्यागक्षमः, तस्मात् प्रकृष्टानन्दरूपे निष्कृष्टात्मनि तेनैव स्वातन्त्र्येण प्रवर्ततेति इति शङ्कायामात्मनस्तु कामायेत्यस्य जीवस्य परत्वाभ्युपगमेऽपि आत्मा वा अरे द्रष्टव्य इति वा-

१ स्वतन्त्रेणेति पा० ।

क्यस्य परमात्मपरत्व एव स्वारस्यमुपपादयति "आत्मनस्तु कामायेत्यस्ये"ति, येन स्वातन्त्र्येण स्वात्मदर्शने प्रवर्त्तते तेनैवानवधिकातिशयानन्दरूपंपरब्रह्मप्राप्तौ प्रवर्त्तते तस्यैव स्वाभाविकनिरतिशयानन्दयोगादित्यर्थः। प्रकृष्टानन्दस्यैव प्रेप्सितव्यतारूपार्थौचित्यातिशयादात्मशब्दार्थवैरूप्यं सोढव्यं, मुण्डोपनिषदि "तपसा चीयते ब्रह्म तस्मादेतद् ब्रह्मे"ति वाक्य-

सू० अस्मिँस्तु प्रकरणे जीवात्म-वाचि शब्देनाऽपि परमात्मन एवाभिधानादात्मनस्तु कामाय आत्मा वा अरे द्रष्टव्य इति पूर्वोक्तप्रक्रिययोभयचात्म-शब्दावेकविषयौ। मतान्तरेणाऽपि जीव-शब्देन परमात्माभिधानोपपादनायाह-

टी० द्वयस्यब्रह्मशब्दवैरूप्यवदिति भावः। एवं तर्ह्ययमेव निर्वाहः स्यादिति शङ्कायामस्मादप्यर्थात् पूर्वोक्तार्थ उपपन्नः आत्म-शब्दवैपरीत्याभावादित्यभिप्रायेणाह "अस्मिँस्तु प्रकरण"इति, वक्ष्यमाणसूत्रोक्तप्रकारेण जीववाचिशब्दानां परमात्मपर्यन्ताभिधायित्वमुपजीव्योक्तं परमात्मन एवाभिधानादिति, अयमर्थः महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीत्यत्र विज्ञानघन-शब्दो जीवविषयः भूतानुविनाशित्वावगमात्, अत्रामृतत्वप्राप्त्युपायत्वसर्वजगत्कारणत्वसर्वज्ञत्वतदेकविज्ञाननिबन्धनसर्वविज्ञानव्यतिरिक्तवेदननिन्दादिभिः प्रकरणस्य परमात्मपरत्वदार्ढ्यावगमात् महद्भूतमनन्तमपारमिति पदैः सामानाधिकरण्याच्च जीववाचिनोऽप्यस्य विज्ञानघन-शब्दस्य परमात्मपरत्वमवर्जनीयं, तस्माज्जीववाचिशब्दस्याऽपि परमात्मपरत्वनिश्चयानुगुणबहुवाक्यस्वारस्यभङ्गेन अन्यतरात्मशब्दस्यार्थकथनादात्म-शब्दद्वयस्य अर्थैकरूप्यवर्णनादपि तादृशबहुवाक्यस्वारस्यानुगुणं परमात्मपरतयैव आत्मनस्तु कामाय आत्मा वा इति वाक्यद्वयस्यात्म-शब्दयोरर्थैकरूप्यवर्णनं युक्तमिति प्रतिज्ञासिद्धेरित्यादिसूत्रत्रयमात्मनस्तु कामाय पतिः प्रियो भवतीत्यारभ्य एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यतीति जीवोपक्रमनिर्वाहपरं परैर्व्याख्यातं तदयुक्तं पूर्वसूत्रेणोपक्रमस्य

Digitized by Google

हृतनिर्वाहत्वात्, वाक्यान्वयो नाम वाक्यावयवानां मिथोऽन्वयः न तु वाक्यान्तरेणान्वयः सूत्रस्यैकप्रकरणविषयत्वात्प्रकरणस्य महावाक्यरूपत्वात्, उपक्रमश्च वाक्यावयवेषु प्रधानभूतः स कथं वाक्यावयवानामन्वयं परमात्मविषयतयैव प्रतिपादयता सूत्रेणाविवक्षितः स्यात्, अतो जीव-शब्देन परमात्माभिधाननिर्वाहपरमुत्तरसूत्रत्रयं मन्वानस्तत्राऽपि चरमसूत्रस्यैव सूत्रकाराभिमतनिर्वाहपरत्वं हृदि निधाय ततः पूर्वस्य सूत्रद्वयस्य मतान्तरपरत्वं वदन् सूत्रत्रयमवतारयति "मतान्तरेणापी"ति, मतान्तरेण सूत्रकारानभिमतेनेत्यर्थः अनेन यादवप्रकाशोक्तयोजनाव्यावृत्तिः, जीवशब्देनपरमात्माभिधानोपपादनायेति सर्वव्याख्यातृऽभिमतनिर्वाहव्यावृत्तिर्दर्शिता, जीव-शब्देन-उपरितनवाक्यगतेनेत्यर्थः ॥

सू० प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥

भू० एकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धेरिदं लिङ्गं यज्जीवात्मवाचिशब्दैः परमात्मनोऽभिधानमित्याश्मरथ्य आचार्यो मन्यते स्म, यद्ययं जीवः परमात्मकार्य्यतया परमात्मैव न भवेत्तदा तद्व्यतिरिक्ततया परमात्मविज्ञानादेतद्विज्ञानं न सेत्स्यति "आत्मा वा इदमेक एवाग्र आसीदि"ति प्राक् सृष्टेरेकत्वावधारणात्, यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ति सरूपाः तथाऽक्षराद्विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ती"त्यादिभिर्ब्रह्मणो जीवानामुत्पत्तिश्रवणात्तस्मिन्नेवाप्ययश्रवणाच्च जीवानां ब्रह्मकार्य्यत्वेन ब्रह्मणैक्यमवगम्यते, अतो जीवशब्देन परमात्मन एवाभिधानमिति, ॥

सू० उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २१ ॥

Digitized by Google

यदुक्तं जीवस्य ब्रह्मकार्य्यतया ब्रह्मणैक्येनैकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनार्थं ब्रह्मणो जीवशब्देन प्रतिपादनमिति तदयुक्तं "न जायते म्रियते वा विपश्चिदित्यादिना ऽजत्वश्रुतेर्जीवानां प्राचीनकर्मफलभोगाय जगत्सृष्ट्यभ्युपगमाच्च, अन्यथा विषमसृष्ट्यनुपपत्तेश्च ब्रह्मकार्य्यत्वे च जीवस्य ब्रह्मतापत्तिलक्षणो मोक्ष आकाशादिवदवर्जनीय इति तदुपायविधानानुष्ठानानर्थक्याच्च, घटादिवत्कारणप्राप्तेर्विनाशरूपत्वेन मोक्षस्यापुरुषार्थत्वाच्च जीवात्मन उत्पत्तिप्रलयवादोपपत्तिरुत्तरत्र प्रपञ्चयिष्यते ।

टी० सू० प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धेरिदं लिङ्गमिति, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादककार्य्यकारणभावकृतैक्यस्य लिङ्गं जीवात्मवाचिशब्देन परमात्माभिधानमित्यर्थः हेतुवशात्साध्यप्रतिज्ञांशोऽध्याहृतो जीवात्मवाचीति अयं यादवप्रकाशपक्षोऽस्मिन् सूत्र उपन्यस्तः, तत्र हि कार्यात्मना कारणात्मना च जीवब्रह्मणोर्भेदाभेदौ स्वाभाविकौ मतौ सू० उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः, विरुद्धमतान्तरं हि पूर्वमतनिरासेन विना नोदेति तस्मात् सूत्राभिप्रेतमाश्मरथ्यमतदूषणमाह "यदुक्तमित्यादि"ना, अजत्वश्रुतिविरोधः, अकृताभ्यागमकृतविप्रणाशादिप्रसङ्गः फलभोगार्थसृष्टिविरोध उपायानुष्ठानवैयर्थ्यमपुरुषार्थता च दूषणम्, तेयेन जीवान् विससर्जेत्यादयो जीवोत्पत्तिप्रलयवादाः कथमित्यत्राह "जीवात्मन" इति, । सूत्रार्थमाह—

भू० अत "एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाऽभिनिष्पद्यते "यथा नद्यः स्यन्दमानाःसमुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमि"त्युक्त-

मिष्यतः परमात्मभावाज्जीवशब्देन परमात्मनोऽभिधान-मित्यौडुलोमिराचार्यो मन्यते स्म, ॥

सू० अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

यदुक्तमुत्क्रमिष्यतो जीवस्य ब्रह्मभावाद्ब्रह्मणस्तच्छब्देनाऽभिधानमिति तदप्ययुक्तं विकल्पासहत्वात्—अस्य जीवात्मन उत्क्रान्तेः पूर्वमनेवम्भावः किं स्वाभाविकः? उतौपाधिकः? न चाऽपि पारमार्थिकोऽपारमार्थिको वे?ति स्वाभाविकत्वे ब्रह्मभावो नोपपद्यते भेदस्य स्वरूपप्रयुक्तत्वेन स्वरूपे विद्यमाने तदनपायात् । अथ भेदेन सह स्वरूपमप्यपैतीति तथा सति विनष्टत्वादेव तस्य न ब्रह्मभावः, अपुरुषार्थत्वादिदोषप्रसङ्गश्च पारमार्थिकौपाधिकत्वेऽपि प्रागपि ब्रह्मैवेत्युत्क्रमिष्यत एवंभावादिति विशेषो न युज्यते वक्तुम्, अस्मिन् पक्षे ह्युपाधिब्रह्मव्यतिरेकेण वस्त्वन्तराभावान्निरवयवस्य ब्रह्मण उपाधिना भेदा[१]द्यसम्भवाच्चोपाधिगत एव भेद इत्युत्क्रान्तेःप्रागपि ब्रह्मैव चौपाधिकस्य भेदस्यापारमार्थिकत्वे कस्यायमुत्क्रान्तौ ब्रह्मभाव इति वक्तव्यं, ब्रह्मण एवाविद्योपाधितिरोहितस्वस्वरूपस्येति चेन्न नित्यमुक्तस्वप्रकाशज्ञानस्वरूपस्याविद्योपाधितिरोधानासम्भवात् ।

टी० "अत"इति, सू० अवस्थितेरिति काशकृत्स्नः, अत्राऽपि पूर्ववदभिप्रेतं दूषणमाह "यदुक्तमित्यादि"ना, सम्भावितयोः पक्षयोः पराभिमतं

१ छेदाद्यसंभवादिति पा०

परिशेषयितुं स्वाभाविकौपाधिकत्वविकल्पः कृतः, शङ्करभास्करोक्तपक्षद्वयस्याप्युत्क्रमिष्यत इति सूत्रैकदेशेन सूचितस्य एतेन निराचिकीर्षितत्वज्ञापनाय पारमार्थिकत्वापारमार्थिकत्वविकल्पः कृतः, स्वाभाविकत्व इत्यादि मुक्तौ स्वरूपं किं विद्यमानमुताविद्यमानमिति विकल्पमभिप्रेत्य ग्रन्थद्वयेन विरोध[1]द्वयं दूषयति भेदस्येत्यादिना, प्रथमविकल्पस्य द्वितीयं शिरोदूषयंस्तद्विशेषणीभूतद्वितीयविकल्पगतं प्रथमं शिरश्च दूषयति "पारमार्थिके"ति, प्रागपि ब्रह्मत्वमुपपादयति "अस्मिन् पक्षे ही"ति, द्वितीयविकल्पे द्वितीयं शिरो दूषयति "औपाधिकस्ये"ति, तिरोधानासम्भवः कथमित्यत्राह–

भा० तिरोधानं नाम वस्तुस्वरूपे विद्यमाने तत्प्रकाशनिवृत्तिः प्रकाश एव वस्तुस्वरूपमित्यङ्गीकारे तिरोधानाभावः स्वरूपनाशो वा स्यात्, अतो नित्याविर्भूतस्वस्वरूपत्वात्तस्योत्क्रान्तौ ब्रह्मभावे न कश्चिद्विशेष इत्युत्क्रमिष्यत इति विशेषणं व्यर्थमेव, अस्माच्छरीरात्समुत्थायेति पूर्वमनेवंरूपस्य न तदानीं ब्रह्मतापत्तिमाह अपि तु पूर्वसिद्धस्वरूपस्याविर्भावं, तथाहि वक्ष्यते सम्पद्याविर्भावः स्वेन शब्दादित्यादिभिः, अतोऽनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति

टी० "तिरोधानं नामे"ति, तिरोधानं नामैवंविधमस्तु ततः किमित्यत्राह "प्रकाश एवे"ति, तिरोधानं न सम्भवति चेत् नित्याविर्भूतं स्यात् ततः किमित्यत्राह "अत" इति, ननु उत्क्रमिष्यत इत्यत्र न तात्पर्यं सर्वदा ब्रह्मभावो विवक्षितः, अतः उपाधेः पारमार्थ्यापारमार्थ्यपक्षद्वयेऽपि न दोष इति चेत् न पूर्वं तथाभावे बन्धनिवृत्तिप्रयोजनशास्त्रस्य अनारम्भणीयत्वप्रसङ्गात् औपाधिकहेयप्रहाणार्थम् आरम्भणीयतेति चेन्न औपाधिकहेयस्य

१ शिरोद्वयमिति पा० ।

ब्रह्मणश्च्छेदे सम्बन्धित्वादेकत्वप्रतिसन्धानेन जीवेश्वरविभागाभावप्रसङ्गात् प्रदेशभेदात् अप्रतिसन्धानं चेदेकस्योपाधौ गच्छत्येकस्याऽपि प्रतिसन्धानं न स्यादित्यादिदूषणजातं प्रदेशान्तरोक्तत्वादिह न प्रपञ्चितम् । अपरमार्थोपाधिकृतभेदवादे च उत्क्रमिष्यत इति पदमविवक्षितं कृत्वा सर्वदा ब्रह्मभावाविर्भावाभ्युपगमे अध्यासानुपपत्तिः तिरोधानाभावात्, न ह्यतिरोहितस्वरूपे तत्त्वतो भासमाने अध्याससम्भवः, तिरोधानाभ्युपगमे च दूषणं दर्शितम्, अतिरोहितस्वरूपस्याऽपि भेददर्शनं सम्भवतीति चेत् आच्छादिकाविद्याकल्पनवैयर्थ्यं, मुक्तावपि भेददर्शनप्रसङ्गश्च स्वरूपयाथात्म्यावभासस्य भ्रमविरोधित्वाभावात्, निवर्त्तकज्ञानेन दोषस्य निवृत्तत्वात् न भेददर्शनमिति चेन्न निवर्त्तकज्ञानस्याऽपि पूर्वमवभासमानात्स्वरूपादनतिरिक्तविषयकत्वेन भ्रमनिवर्त्तकत्वानुपपत्तेः "न हीदमि"ति, शतशो विशदतरमुपजायमानमपि ज्ञानं रजतभ्रमं निवर्त्तयतीत्यादिकमनुपपत्तिशतं पूर्वोक्तत्वादिह लेशतः प्रदर्शितन्तर्हि अस्माच्छरीरादिति श्रुतेः कोऽर्थ इत्यत्राह "अस्मादि"ति, तर्हि कथमभिनिष्पत्तिश्रुतिरित्यत्राह "तथाहि वक्ष्यत इति" अथ सूत्रं व्याचष्टे "अत इ"ति, अतः—मतान्तरेण निर्वाहानुपपत्तेरित्यर्थः । अवस्थिति—शब्दस्य स्वतोऽधिकरणमाकाङ्क्षितं कुत्रेति न तु किम्भावेनेति । कथमवस्थानमित्याकाङ्क्षाऽस्तीति चेत् सा तूल्याप्या न तु स्वतः किं भावेनेत्याकाङ्क्षा न क्वचिदप्यस्ति अतः सूत्रस्वारस्यानुगुणं वाक्यमादत्ते—

सू० "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स ते आत्माऽन्तर्याम्यमृतः" "योऽक्षरमन्तरे संचरन्" "यस्याक्षरं शरीरं यमक्षरं न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः" "अन्तः प्रविष्टः शास्ता जनानां सर्वात्मे"ति स्वशरीरभूते जीवात्मन्यात्मतयाऽवस्थिते जीवशब्देन ब्रह्मप्रतिपादनमिति काशकृत्स्न आचार्यो मन्यते

Digitized by Google

स्य, जीव-शब्दस्य जीवस्य परमात्मपर्य्यन्तस्यैव वाचकत्वं न जीवमात्रस्येति पूर्वमेवोक्तं नामरूपे व्याकरवाणीत्यत्र, एवमात्मशरीरभावेन तादात्म्योपपादने परस्य ब्रह्मणोऽपहतपाप्मत्वसर्वज्ञत्वादिगोचराः जीवस्याविदुषः शोचतो ब्रह्मोपासनान्मोक्षवादिन्यो जगत्सृष्टिप्रलयाभिधायिन्यो जगतो ब्रह्मतादात्म्योपदेशपराश्च सर्वाः श्रुतयः सम्यगुपपादिता भवन्तीति काशकृत्स्नीयमेव मतं सूत्रकारः स्वीकृतवान् ।

टी० "य आत्मनी"ति, अचिदन्तः प्रवेशस्य स्पष्टत्वात् तज्ज्ञापनार्थं जीवसामानाधिकरण्यस्य स्फुटतरार्थश्रुत्यन्तरैकार्थ्येन शरीरशरीरिभावनिबन्धनत्वज्ञापनार्थं चानेन जीवेनात्मनेति वाक्यं प्रथममुपात्तं। कारणावस्थायामपि शरीरत्वज्ञापनार्थं देवताविशेषनिर्णयार्थं चोदाहरति "योऽक्षरमन्तरे संचरन्"ति, अन्तः स्थितिनियमनयोरनुप्रवेशप्रशासनशब्दाभ्यां प्रत्यभिज्ञाततयैकार्थत्वात् सर्वात्मत्वविवरणरूपत्वाच्चोपादत्ते "अन्तः प्रविष्ट" इति, सप्तम्यन्तपदैः कुत्रेत्याकाङ्क्षा शमिता नियन्तृत्वामृतत्वादिभिः कथमित्याकाङ्क्षा शमिता, तत्तदवेद्यत्वेन नियन्तृत्वेन निर्दोषत्वेन च तेष्ववस्थानमित्यर्थः। नन्ववस्थितिरस्तु ततः कथं जीव-शब्दस्य ब्रह्मवाचित्वमित्यत्राह "जीव-शब्दश्चे"ति, शरीरवाचिशब्देषु आकृतिनयावतारः समर्थित इत्यर्थः। कस्मिन् प्रदेश इत्यत्राह "नामे"ति, सूत्रार्थो व्याख्यातः अस्य सूत्रस्य आश्मरथ्यौडुलोमिमतोक्तेः पूर्वमनिवेशितत्वादतः परमतान्तरानुपन्यासाच्च काशकृत्स्नमतेन निर्वाहस्य सूत्रकाराभिमतत्वमवगम्यते अस्य सूत्रकाराभिमतत्वे हेतुभूतं पूर्वोक्तमतद्वयवैषम्यमाह "एवमात्मे"ति, अपहतपाप्मत्वसर्वज्ञत्व-शब्दौ उभयलिङ्गत्वप्रदर्शनार्थौ आदि-शब्दो विरजत्वसर्वशक्तित्वादिपरः, मोक्षवादिन्य इत्यन्तेन भेदश्रुतयो विवक्षिताः। अभेदश्रुत्यभिप्रायेणाह "जगत्सृष्टी"ति, सम्य गिति प्रत्यक्षादिविरोध:

Digitized by Google

परस्परविरोधश्च यथा न भवति तथेत्यर्थः, सकलश्रुत्यविरोधमुख्यार्थत्वानुगुण्यमेतन्निर्वाहस्वीकारहेतुरित्यर्थः ।

सू० अयमत्र वाक्यार्थः, अमृतत्वोपाये मैत्रेय्या पृष्टे याज्ञवल्क्य आत्मा वा अरे द्रष्टव्य इत्यादिना परमात्मोपासनममृतत्वोपायमुक्त्वा आत्मनि खल्वरे दृष्टे इत्यादिना उपास्यलक्षणं दुन्दुभ्यादिदृष्टान्तैश्चोपासनोपकरणभूतमनःप्रभृतिकरणनियमनं च

टी० अभेदनिर्देशस्यावस्थितिनिबन्धनत्वं सूत्रकारेणैव भगवता व्यासेन मोक्षधर्मे च याज्ञवल्क्यजनकसंवादे स्पष्टतरमभिहितं "पश्यँस्तथैवापश्यँश्च पश्यत्यन्यस्तथाऽनघ । षड्विंशः पञ्चविंशञ्च चतुर्विंशञ्च पश्यती"त्यादिना चिदचिदीश्वरवैलक्षण्यं बहुशः प्रतिपाद्य "यदा तु मन्यतेऽन्योऽहमन्य एष इति द्विज । तदा स केवलीभूतः षड्विंशमनुपश्यती"ति प्रकृत्यात्मविवेकानन्तरं जीवविलक्षणपरमात्मदर्शनमुक्त्वा । "अन्यश्च राजन् स परस्तथाऽन्यः पञ्चविंशकः । तत्सस्थत्वादनुपश्यन्ति एक एवेति साधव" इति शरीरशरीरिणोर्भेदेऽपि शरीरान्तःस्थितस्य शरीरिण एकत्वादयमेकः पुरुष इति व्यवहारवदन्तरवस्थितिनिबन्धनाः प्रकार्य्यैक्यविषयाः अभेदव्यवहारा इत्युक्त्वा "तेनैतन्नाभिजानन्ति पञ्चविंशकमच्युतमि"ति तात्स्थ्यादेव हेतोः पञ्चविंशकस्याच्युत–शब्दवाच्यस्य परमात्मनश्च स्वरूपैक्यं साधूनामनभिमतमित्युक्त्वा।"जन्ममृत्युभयाद्भीता योगाः सांख्याश्च काश्यपाः।षड्विंशमनुपश्यन्ति शुचयस्तत्परायणा" इति संसारभयनिरासकं षड्विंशकत्वेन परमात्मनोऽभेदज्ञानमित्यध्यात्मशास्त्रविदामेककण्ठमित्युक्त्वा "यदा स केवलीभूतः षड्विंशमनुपश्यति। तदा सर्वज्ञसिद्धत्वाच्च पुनर्जन्म विन्दती"ति। षड्विंशकज्ञानादपवर्गमुक्त्वा"एवमप्रतिबुद्धश्च बुध्यमानश्च तेऽनघ । बुद्धश्चोक्तो यथातत्त्वं यथा श्रुतिनिदर्शनादिति चिदचिदीश्वरवैलक्षण्येनोपसंहृतं, तथा वैष्णवे पुराणे च स्पष्टमिदमुच्यते यथा भगवन्तं प्रति ध्रुवः "सर्वात्मको-

Digitized by Google

सर्वेश सर्वभूतस्थितो यतः। कथयामि ततः किं ते सर्वं वेत्सि हृदि स्थितमि”ति, अत्र ह्यवस्थितिनिबन्धनं सर्वात्मकत्वं स्पष्टम्, अवस्थानञ्च शरीरप्रतिसंबन्धितयेति तत्रैव दृश्यते “सर्वेन्द्रियान्तःकरणपुरुषाख्यं हि यज्जगत्। स एव सर्वभूतात्मा विश्वरूपो यतोऽव्यय” इति, न च विश्वरूप-शब्दश्चारुरूपा सालभञ्जिकेतिवदमुख्यार्थतया नेयः स्वारस्यापवादाभावात् तत्रैव स्वारस्योत्तम्भकमपि दृश्यते प्रल्हादवचनेन “एतद्विजानता सर्वं जगत्स्थावरजङ्गमं द्रष्टव्यमात्मवत्तस्माद्यतोऽयं विश्वरूपभाग्” इति धार्य्यत्वधारकत्वरूपवैधर्म्यनिर्देशेन रूपतद्वतोर्हि भेद उच्यते तत्रैव ध्रुववचनादेव धार्य्यधारकभावोऽवगम्यते “सर्वस्मिन् सर्वभूतस्त्वं सर्वः सर्वस्वरूपधृक्सर्वं त्वत्तस्ततश्च त्वं नमस्सर्वात्मनेऽस्तु त” इति सर्वस्मिन् शरीरे सर्वचेतनभूतत्वसर्वत्वोपपादकं सर्वस्वरूपधृगिति । कारणत्वमपि तदुपपादकमाह-

सू० सामान्येनाभिधाय स यथाऽऽर्द्रैधाग्नेरित्यादिना स यथा सर्वासामपां समुद्र एकायनमित्यादिना चोपास्यभूतस्य परस्य ब्रह्मणो निखिलजगदेककारणत्वं सकलविषयप्रवृत्तिमूलकरणग्रामनियमनञ्च विस्तीर्णमुपदिश्य

टी० “सर्वस्त्वत्त” इति ततश्च त्वमिति ततस्तस्मात्सर्वस्वरूपधृक्त्वात् सर्वकारणत्वाच्च सर्वं त्वमित्यर्थः, रूपत्वञ्च शरीरतयेति दर्शयता प्रल्हादेनोक्तं “सर्वगत्वादनन्तस्य स एवाहमवस्थित” इति शरीरं हि चेतनेन व्याप्यो द्रव्यविशेषः तथा च भगवन्तं प्रति अर्जुनवचनम्, “सर्वं समाप्नोषि ततोऽसि सर्व” इति एषु श्रुतिस्मृतिशतेषु “अनुक्तमन्यतो ग्राह्यमि”तिन्यायाद् धारणव्यापनादिष्वन्यतमोक्तावप्यन्यतमान्तरसिद्धिरनुसन्धेया, ततश्च व्यापनमेव धारणनियमनयोरन्यतरसचिवं हि नृपनभोभृत्यकुटुम्ब्यादिव्यावर्त्तनेन शरीरत्वमवगमयति, शरीरलक्षणं च भाष्य एव दर्शयिष्यते, अत एव तदनुप्रविश्य सच्च त्यच्चाभवदित्यत्राऽपि शरीरशरीरिभावनिबन्धनन्तत्तच्छब्दवाच्यत्वमवगम्यते अन्तःप्रवेशनेन प्रशासनादीनामर्थसिद्धत्वात् श्रूयते ह्यन्तः प्रवेशसहचारितया प्रशासनादिकम् “अन्तः प्रविष्टः शास्ता

जनानाम्, एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत" इति, तथा सर्वं खल्विदं ब्रह्म तज्जलानित्यत्रानल-शब्दवाच्या स्थिति-धारणनिबन्धना सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा इति सदायतन-शब्देन स्थितिहेतुत्वाभिधानात् धारणं चानुप्रविश्य प्रशासनेन उपदाहृतश्रुत्यैकार्थ्यात् "मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवे"ति स्मरणात् "तत्सृष्ट्वा तदेवानुप्राविशदि"ति, सृष्ट्यनन्तरं स्थित्यर्थानुप्रवेशदर्शनाच्च उत्पत्तिलयौ च न निकृष्टस्वरूपे निर्विकारे संभवतः, अतो जन्मादिकारणत्वस्य हेतुत्वोपन्यासाच्छरीरशरीरिभाव एव सामानाधिकरण्ये हेतुरिति श्रुत्यैव दर्शितम् अस्य सूत्रस्य न केवलं सर्वश्रुत्यविरोधमुख्यत्वोपपत्तेः किन्तु प्रबन्धान्तरस्यसूत्रकारवचनैकार्थ्यात् तदुपबृंहणैकार्थ्यात् प्रत्यक्षगुतावेव हेतुहेतुमद्भावदर्शनाच्चान्तरात्मतयाऽवस्थानस्यैव अभेदनिर्देशहेतुत्वपरत्वं सिद्धम् इह जीववाचिशब्दः कः, तस्य परमात्मपर्यन्तत्वे किं कारणं तस्मिन् सति हि तत्पर्यन्तत्वनिर्वाहकप्रकारापेक्षा, तत्पर्यन्तत्वे च किं फलमित्यपेक्षायामाह "अयमत्र वाक्यार्थ" इति, अमृतत्वस्य तु नाशाऽस्तिवित्तेन "न वा अरे पत्युः कामायेत्यादीनां वाक्यानाम् आद्यसूत्रव्याख्यानावसरे प्रपञ्चितार्थत्वादिह तदर्थोऽपि विस्तरेण न प्रतिपादितः "आत्मनि खल्वरे दृष्ट" इत्यादिनेति "आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेन इदं सर्वं विदितम्" इत्यात्मविज्ञानेन सर्वविज्ञानप्रतिज्ञानं "ब्रह्म तं परादात् सर्वं तम्परादादि"त्यादिना व्यतिरिक्तवेदननिन्दनम् "इदं ब्रह्मेदं क्षत्रमि"ति सर्वात्मकत्वोक्तिश्च कारणत्वफलम्, अतः प्रतिज्ञादिभिर्लक्षणाभिधानं हि फलितं स्यात् "योऽन्यत्रात्मनः सर्वं वेदेति अन्यत्र परमात्मानं विना अब्रह्मात्मकं स्वनिष्ठं योवेद तं सर्वं परादात् अभिभवेत् संसारयतीत्यर्थः । यद्वाऽन्यत्र परमात्मनोऽन्यत्र स्थितं न तु परमात्मनि स्थितं स्वनिष्ठमित्यर्थः, दुन्दुभ्यादिदृष्टान्तैः करणनियमनमभिधायेत्यन्वयः, अत्रायमभिप्रायः "स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयात् ग्रहणाय दुन्दुभ्याघातस्य वा शब्दो गृहीत इ"ति वाक्यस्य परैरेवमर्थ उक्तः दुन्दुभि-शब्देन दुन्दुभिशब्दसामान्यं लक्ष्यते यत् खलु यद्ग्रहणं विना

Digitized by Google

ग्रहीतुं न शक्यते तस्ततो न व्यतिरिच्यते यथा रजतं शुक्तिकायाः, दुन्दुभिशब्दावान्तरशब्दा हि तत्सामान्यग्रहणेनैव गृहीताः स्युः अयं दुन्दुभिशब्द इत्येव गृह्येत न दुन्दुभिशब्दतो व्यतिरेकेण अतस्तदवान्तरविशेषा यथा दुन्दुभिशब्देऽध्यस्ता एवं चिदात्मव्यतिरेकेण ब्रह्मतत्त्वादेर्जगदनवभासात् सर्वं चिदात्मन्यध्यस्तमिति एवं "सहोपलम्भनियमादभेदो नीलतद्धियोरि"ति बौद्धराद्धान्तप्रतिपादकमिदं वाक्यं व्याख्यातन्तदनुपपन्नं मुख्यार्थे सम्भवति उपरितनयोर्दुन्दुभिशब्दयोर्लाक्षणिकार्थपरत्वायोगात् लक्षणायां च दुन्दुभेर्हन्यमानस्येति पूर्ववाक्यवैयर्थ्यमेव, न हि गङ्गायामिति पदेनैव कूले लक्षिते गम्भीरायाम् गङ्गायाम् इति वाक्यं सफलं तथा दुन्दुभेस्तु ग्रहणेनेत्येतावताऽलन्तेनैव दुन्दुभिशब्दसामान्यग्रहणस्य प्रतिपन्नत्वात् आघातशब्दस्य न प्रयोजनं वा—शब्दवैयर्थ्यं च अत एवं योजनीयम्, दुन्दुभेरित्यनादरे षष्ठी ग्रहणशब्द इह निरोधपरः उपादाननिरोधयोरपि वाचकत्वात् यथा गृहीतानि पुष्पाणि गृहीतश्चोर इति यथा दुन्दुभौ हन्यमाने ततो बहिर्निस्सरतः शब्दान् न निरोद्धुं शक्नुयात् । कथं तर्हि निरुणद्धीत्यत्राह दुन्दुभेस्त्विति परेणोपादीयमानदुन्दुभिनिरोधेन तदा हन्तृपुरुषनिरोधेन वा शब्दो निरुध्यते, एवमिन्द्रियेषु व्याप्रियमाणेषु बाह्यार्थज्ञानं दुर्निरोधं तस्मादिन्द्रियनिरोधेन तत्प्रवृत्तिमूलस्य मनसो निरोधेन च परमात्मसाक्षात्कारविरोधिबाह्यार्थज्ञानं निरुध्यत इति एवं शङ्खवीणादृष्टान्तोपन्यासश्च योजनीयः, वीणाशब्दस्था चतुर्थी षष्ठ्यर्था पूर्ववाक्यद्वयैकार्थ्यात्, अतो दुन्दुभ्यादिदृष्टान्तत्रयोपन्यासवाक्यत्रये द्रष्टव्यम् इत्युक्तपरोपासनोपकरणायामनियमनमुक्तमिति इति मनःप्रभृतीति दुन्दुभिनिरोधस्थानीयञ्चक्षुरादिनियमनं तथा हन्तृपुरुषनिरोधस्थानीयं मनोनियमनमिति भावः सामान्येनाभिधायेति निमित्तोपादानरूपविभागानभिधानात् कार्यविशेषानुपादानाच्चोपास्यलक्षणभूतं कारणत्वं सामान्येनोक्तं चक्षुरादिकरणविशेषाणां नियमनप्रकारविशेषाकथनात् करणनियमनञ्च सामान्येनोक्तमित्यर्थः ।

भा० "स यथा सैन्धवघन" इत्यादिनाऽमृतत्वोपायप्रवृत्ति-

प्रोत्साहनाय जीवात्मस्वरूपेणावस्थितस्य परमात्मनोऽपरिच्छिन्नज्ञानैकाकारतामुपपाद्य तस्यैवापरिच्छिन्नज्ञानैकाकारस्य संसारदशायां भूतपरिणामानुवृत्तिम् ।

टी० स 'यथे'ति तृतीयान्तयोरित्यादिशब्दयोर्निखिलेत्यादिपदद्वयेन यथायोगमन्वयः, एध-शब्दोऽकारान्त इन्धनवाची आर्द्रेन्धनाग्निग्रहणं निमित्तोपादानयोर्ज्ञापनार्थम् अग्निर्हि धूमोत्पत्तौ निमित्तमिन्धनमुपादानं ऋग्वेदो यजुर्वेद इत्यादिना वाचकसृष्टिमात्रमुक्तं प्रथमे मैत्रेयीब्राह्मणे, उत्तरे तु इष्टं हुतमाशितं पायितमयञ्च लोकः परश्च लोकः सर्वाणि च भूतानि अस्यैवैतानि सर्वाणि निश्वसितानी''ति साधनसाध्यभोग्यभोगस्थानभोक्तृवर्गरूपवाच्यजगत्सृष्टिरुक्ता, अनुक्तस्यान्यतो ग्राह्यत्वात् प्रथमे च वाच्यसृष्टिरुक्ता भवतीत्यभिप्रायेणाह "निखिलजगदेककारणत्वमि''ति, निखिल-शब्दो वाच्यवाचकभोग्यभोगस्थानादिपरः, एक-शब्दो निमित्तोपादानैकत्वपरः स यथा सर्वासामपामित्यादिवाक्यानामर्थमभिप्रयन्नाह "सकलविषये''ति, यथा "सर्वासामपां समुद्र एकायनमेवं सर्वेषां स्पर्शानां त्वगेकायनं सर्वेषां रसानां सर्वेषां गन्धानामि''ति तत्तदिन्द्रियाणान्तत्तद्विषयायतनत्वमुक्तं दृष्टान्तदार्ष्टान्तिकयोरनुवृत्तमयनत्वं नाम तत्तदुपादातृत्वं तेनैकैककरणस्य एकैकजातीयस्पर्शाद्यवान्तरविशेषेषु वृत्तिविशेषा बहवो दर्शिता भवन्ति, सर्वेषां स्पर्शानामिति श्रवणादस्य वृत्तिविशेषप्रदर्शनस्य किं प्रयोजनमित्यपेक्षायामुपदेशस्य वैयर्थ्यायोगात् "आत्मा वा अरे द्रष्टव्य'' इति, आत्मसाक्षात्कारस्य प्रकृतत्वात् दुन्दुभ्यादिदृष्टान्तैः सामान्येन करणनियमनस्योक्तत्वात् तन्नियमनविशेषकथनस्यापेक्षितत्वादुत्तरवाक्येन पूर्ववाक्यविवरणस्य एतत्प्रकरणादृष्टत्वाच्च करणवृत्तिविशेषप्रदर्शनं तद्वृत्तिविशेषनिरोधेनात्मसाक्षात्कारनिष्पादनार्थमित्यभिप्रायः विस्तीर्णमिति कारणत्वं निमित्तो'पादानविभागकथनात् कार्य्यबाहुल्यदर्शनाच्च विस्तृतं, करणनियमनन्तु करणविशेषाणां निरोद्धव्यवृत्तिविशेषप्रदर्शनेन विस्तृतमित्यर्थः। उपदिश्येति न हि निष्प्रयोजनोपदेशस्सम्भवतीति भावः "स यथा सैन्धवघन''

Digitized by Google

इति वाक्योपादानं "स यथा सैन्धवखिल्य" इति वाक्यस्यापि प्रदर्शनार्थं प्रोत्साहनायेति आत्माभिमानविषयदेहस्य रोगान्ध्यादिदर्शनेऽपि आत्माभिमानविषयत्वादेव हि तत्संस्कारविषये प्रवर्त्तते तस्यैवोद्बुद्धस्य स्वस्वरूपस्यैव प्राप्यत्वेऽवगते हि प्रवृत्त्याधिक्यं जायत इत्यर्थः ॥

सू० "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यती"त्यभिधाय "न प्रेत्य संज्ञाऽस्ती"ति मोक्षदशायां स्वाभाविकापरिच्छिन्नज्ञानसङ्कोचाभावेन भूतसङ्घातेनैकीकृत्यात्मनि

टी० विज्ञानघन-शब्दस्य "महद्भूतमनन्तमपारमि"ति सामानाधिकरण्यं प्रथममैत्रेयीब्राह्मणप्रतिपन्नमुपजीव्योक्तं जीवात्मस्वरूपेणावस्थितस्येति "भगवान्नृसिंहःश्वेतः ब्राह्मणश्चतुर्वेदाभिज्ञो गौर इत्यत्र श्वेत्यादिवद्विशेषणद्वारा परमविशेष्यविशेषणं ज्ञानैकाकारत्वमित्यर्थः, अनेन पूर्वोक्तस्य जीववाचिशब्देन परमात्माभिधाननिर्वाहस्योपयोगस्थलं विज्ञानघन-शब्द इति दर्शितं तत्पर्यन्तत्वेव निर्वाह्यत्वे हेतुः परमात्मधर्मवाचिमहद्भूतानन्तापारशब्दसामानाधिकरण्यमित्यर्थसिद्धं, न चाव्यवधानेन परमात्मपरो विज्ञानघन-शब्दः 'उत्थाय विनश्यति प्रेत्येति श्रवणात् सर्वावस्थास्वपि जीवस्वरूपस्य परमात्मनिष्ठतया स्वातन्त्र्याभावज्ञापनं जीव-शब्देन तत्पर्यन्तनिर्देशस्य प्रयोजनमिति फलितम् । उपपाद्य-दृष्टान्तमुक्त्वेत्यर्थः तान्येवानुविनश्यतीत्यत्रानु-शब्दार्थमाह "भूतपरिणामानुवृत्ति"-मिति, भूतेषु नश्यत्सु एव नश्यतीत्यर्थः, विनाशो नाम अत्यन्तज्ञानसङ्कोचः "अविनाशी वा अरे अयमात्मे"त्यनन्तरवाक्यविरोधात् अत्र प्रेत्य-शब्दस्य पूर्वोक्तविनाशानुवादशङ्काव्यावृत्त्यर्थमाह "मोक्षदशायामि"ति, "न प्रेत्य संज्ञाऽस्तीति न देहविगमदशायां ज्ञाननिषेधः देहविगमदशायामज्ञानस्य तान्येवानुविनश्यतीत्युक्तत्वात्, नाऽपि लोकान्तरे ज्ञाननिषेधः कर्मफलभोगापवर्गकशास्त्रान्तरविरोधात्, नापि नैमित्तिकप्राकृतप्रलययोरज्ञानमुच्यते तयोरप्रस्तुत्वात्, अतः पारिशेष्यात् प्रेत्य-शब्दश्चरमदेहावसानपरः

Digitized by Google

"नोपजनं स्मरन्निदं शरीरमि"ति श्रुत्यन्तरार्थप्रत्यभिज्ञानात् अत्रा"प्येतावदेव खल्वरे अमृतत्वमि"त्यमृतत्वस्योक्तत्ववचनाच्च मोक्षविषयत्वं युक्तमित्यभिप्रायः, पूर्वापरवाक्यानुगुणमर्थमाह "स्वाभाविके"ति, स्वरूपस्य ज्ञानात्मकत्वं हि "स यथा सैन्धवघन इ"त्यादिनोक्तम्, अतः स्वाभाविकत्वं फलितम् अनन्तर-शब्देन बहिरपि ज्ञानात्मकत्वस्योक्तत्वाद्धर्मभूतज्ञानवत्त्वं सिद्धं तस्य चापरिच्छिन्नत्वं "सर्वं ह पश्यः पश्यतीत्यादिश्रुत्यन्तरसिद्धमित्यभिप्रेत्य स्वाभाविकापरिच्छिन्नज्ञानसङ्कोचाभावेनेत्युक्तं, समित्येकीकारइत्यभिप्रायेणाह "एकीकृत्ये"ति, केनेत्यपेक्षायाम् "एतेभ्यो भूतेभ्य इति पूर्ववाक्यमुपजीव्याह "भूतसङ्घातेने"ति,

मू० देवादिरूपज्ञानाभावमुक्त्वा पुनरपि "यत्र हि द्वैतमिव भवती"त्यादिना ऽब्रह्मात्मकत्वेन नानाभूतवस्तुदर्शनमज्ञानकृतमिति निरस्तनिखिलाज्ञानस्य ब्रह्मात्मकं कृत्स्नं जगदनुभवतो—

टी० देवादिरूपज्ञानाभावमुक्त्वेति नोपजनं स्मरन्निति प्रकरण एव "मनसैतान् कामान् पश्यन् रमत इति एते ब्रह्मलोक"इति ज्ञानविकासप्रतिपादनात् किञ्च "न प्रेत्य संज्ञेति" वाक्यं श्रुत्वा न ह वा अहमिमं जानामीति मैत्रेय्या पृष्टे अविनाशी वा अरे अयमात्मे"त्यात्मस्वरूपनित्यत्वमुक्त्वा अनुच्छित्तिधर्मेति ज्ञाननित्यत्ववचनाच्चेति भावः । मुक्तौ ज्ञानं नास्ति चेत् ज्ञानैकाकारत्वं पूर्वोक्तं विरुध्येतेति मैत्रेयीवाक्याभिप्रायः । अनुच्छित्तिधर्मेति ज्ञाननित्यतां याज्ञवल्क्यः प्रत्यभाषिष्ट न चोच्छित्तिभाव एव अस्य धर्म इत्युच्यते अविनाशीति स्वरूपनित्यत्वस्योक्तत्वात् अविनाशिपदाभावेऽपि धर्मशब्दवैयर्थ्यप्रसङ्गाच्च दीपादौ प्रतिक्षणविनाशसंततिविनाशयोर्दृष्टत्वात्तदुभयव्युदासाय पदद्वयमिति न शङ्कनीयम् अविनाशि-शब्देनैव असङ्कोचादुभयविनाशाभावसिद्धेः धर्मशब्दवैयर्थ्यप्रसङ्गाच्च अव्यय इतिवदनुच्छित्तिरित्येतावताऽपि स्वरूपानुच्छित्तिसिद्धेः पुनरपीति भ्रान्तिर्द्वेधा अनात्मनि देहेऽहं बुद्धिः, अब्रह्मात्मकतया स्वातन्त्र्यबुद्धि-

श्चेति तत्र न प्रेत्य संज्ञाऽस्तीत्यनेन बन्धनदशानुवृत्तदेहात्मभ्रमनिवृत्तिरुक्ता, अथ स्वनिष्ठताभ्रान्तिनिवृत्तिरुच्यत इत्यर्थः। यत्र यस्यामवस्थायां द्वैतमिव भवति परमात्मनः पृथक्त्वं स्वनिष्ठतया पृथक्त्वं भवति, इव-शब्दः स्वातन्त्र्यस्याप्रामाणिकत्वद्योतकः, तत्-तदा, इतरः-परमात्मन इतरः पृथक् स्थितः इतरं-स्वनिष्ठं वस्तु इतरेण स्वनिष्ठदर्शनसाधनेन पश्यतीति स्वनिष्ठभ्रमानुवादः। मुक्तौ तन्निवृत्तिमाह "यत्र त्वि"ति, यत्र-यस्यां मुक्तिदशायां सर्वमात्मैवाभूत् परमात्मात्मकत्वेन प्रकाशते तत्-तदा कश्चेतनः केन करणेन कं स्वनिष्ठमर्थं पश्येत् अब्रह्मात्मकं स्वनिष्ठतया भासमानं वस्तु तद्दर्शनसाधनं तद्द्रष्टा च मुक्तिदशायां नास्तीत्यर्थः। तदिदं वाक्यं हृदि निधायाह "अब्रह्मात्मकत्वेने"ति, नानात्वनिषेधस्य विहितनानात्वव्यतिरिक्तविषयत्वात् स्वनिष्ठनानात्वं निषेध्यमित्यभिप्रायः, नानाभूतवस्तुदर्शनमज्ञानकृतमिति न तत्तद्वस्तुदर्शनमात्रमज्ञानकृतं किन्तु स्वनिष्ठदर्शनमेव तदुपाधिकमिति भावः। अज्ञानकृतमिति स्वनिष्ठवस्तुदर्शनस्यौपाधिकत्वादुपाधिनिवृत्तौ तन्निवृत्तिर्युक्तेति भावः। उपाध्यभावेऽपि ब्रह्मस्वरूपानवभासे स्वनिष्ठार्थान्तरदर्शनं स्यादित्यत्राह "ब्रह्मात्मकं कृत्स्नं जगदनुभवत"इति, "यत्र त्वस्य सर्वमात्मैवाभूदिति न भवनमत्र विवक्षितं ब्रह्मात्मकत्वस्य नित्यत्वेन यत्रेत्यवस्थाविशेषान्वयोत्पत्त्यनुपपत्तेः, अतो "ब्रह्मवेद ब्रह्मैव भवती"त्यादाविव आविर्भावाभिप्रायं वाक्यमित्यभिप्रायः कृत्स्नानुभवेऽपि ब्रह्मणो जगतश्च पृथगनुभवः किं न स्यादित्यत्राह-

सू० ब्रह्मव्यतिरिक्तवस्त्वन्तराभावेन भेददर्शनं निरस्य "येनेदं सर्वं विजानाति तं केन विजानीयादि"ति च जीवात्मा स्वात्मतयाऽवस्थितेन येन परमात्मनाऽऽहितज्ञानः सन् इदं सर्वं विजानाति अयं तं केन विजानीयान्न केनाऽपीति परमात्मनो दुरवगमत्वमुपपाद्य "स एष नेति नेती"-त्यादिना अयं सर्वेश्वरः स्वेतरसमस्तचिदचिद्वस्तुविलक्षण-

रूप एव सर्वशरीरस्सन् सर्वस्यात्मतयाऽवस्थित इति स्वशरीरभूतचिदचिद्वस्तुगतैर्दोषैर्न संस्पृश्यत इत्यभिधाय "विज्ञातारमरे केन विजानीयादि"त्युक्तानुशासनास्मि मैत्रेय्येतावदरे खलु अमृतत्व"मिति, समस्तवस्तुविसजातीयं निरस्तनिखिलजगदेककारणभूतं सर्वस्य विज्ञातारं पुरुषोत्तममु–

टी० "ब्रह्मव्यतिरिक्तवस्त्वन्तराभावेने"ति, अप्रामाणिकज्ञानं हि दोषादुत्पद्यते दोषाभावे तु वस्तुसद्भावं विना दर्शनं नोपपद्यत इत्यर्थः "येनेदमिति क इत्था वेद यत्र स इतिवत् परमात्मप्रसादादृते तस्य दुरवबोधत्वमत्रोच्यते अन्यथा आत्मा वा अरे द्रष्टव्य इत्युपक्रमावगतद्रष्टव्यत्वविरोधात् "तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशमि"ति, तत्प्रसादेन तद्दर्शनस्य श्रुत्यन्तरसिद्धत्वाच्चेति भावः स्वेतरसमस्तचिदचिद्वस्तुविलक्षणस्वरूप एवेति चिदचिद्गतप्रकाराणां प्रमाणान्तरसिद्धत्वादिति शब्दद्वयेन तत्प्रकारमनूद्य निषेधद्वयेन चिद्गतोऽचिद्गतश्च प्रकारो व्युदस्यते विहितप्रकारस्य निषेधायोगात् "अगृह्यो न गृह्यते अशीर्यो न हि शीर्यते असङ्गो न हि सज्यत" इति, चिदचिद्गतप्रकारविशेषनिषेधेन तद्विवरणाच्चेत्यभिप्रायः। अग्राह्यश्चक्षुरादिना ग्रहणानर्हः अतो न गृह्यते एवमशीर्य इत्यादियोजनीयम् असङ्ग इत्यादिना जीवधर्मनिषेधः न ह्यचित्सङ्गोऽस्य स्वरूपतिरोधानकृद् भवति न हि सज्यत इत्यादावुक्ते सङ्गादियोग्यस्याऽपि दूरस्थतया तदभाव इति शङ्काव्यावृत्त्यर्थमसङ्ग इत्युक्तम्, असङ्गः सङ्गविरोधि सङ्गानर्हत्वमर्थसिद्धत्वं तेन सङ्गाद्यभावः न देशकालविप्रकर्षात् किन्तु स्वभावविप्रकर्षादित्यर्थः। पूर्ववाक्योक्तासङ्गादिफलमाह "समस्तवस्तुविसजातीयमि"ति, निखिलजगदेककारणभूतं सर्वस्य विज्ञातारमिति प्रकरणोपक्रमोदितकारणत्वव्याप्तसर्वज्ञत्वादिगुणप्रदर्शको विज्ञातृ-शब्द इति भावः। तं केन विजानीयादिति पूर्ववाक्येन पुनरुक्तिशङ्कापरिहारायाह–

Digitized by Google

सू० उक्तप्रकारादुपासनादृते केन विजानीयादितीदमेवोपासनममृतत्वोपायो, ब्रह्मप्राप्तिरेव चामृतत्वमभिधीयते इत्युक्तवान्,

टी० "उक्तप्रकारादि"ति, परमात्मप्रसादादृते तस्य दुरवगमत्वपरं पूर्ववाक्यं तत्प्रसादनोपायश्चात्राभिहितमुपासनमेवेति केवलयज्ञदानाद्युपायान्तरनिषेधपरमिदं वाक्यमित्यर्थः । विपरीतं किं न स्यादिति नाशङ्कनीयं द्रष्टव्य इत्युपक्रमावगतज्ञानेनैव निगमनस्य युक्तत्वात्, न हि दुरवबोधतया निगमनं न्याय्यं तदुपक्रमविरोधात्, एतावदित्यस्यार्थमाह "ब्रह्मप्राप्तिरेव चे"ति, उपायान्तरव्युदसनमुखेन उक्तोपायनिगमनपरं विज्ञातारमिति वाक्यम् एतावदित्यादिवाक्यमुपेयनिगमनपरमित्यर्थः । अधिकरणार्थमुपसंहरति "अत"इति, इतरैस्सर्वैः सूत्रत्रयव्याख्यानमन्यथा कृतं तत्तु प्रतिज्ञायादिसम्बन्धेन जीवत्वशङ्कानिरासस्यानुपयोगाद्विरुद्धत्वाच्च अनुपपन्नमित्यनुसन्धेयन्तत्र । मिथ्यावेदान्तिभिस्तु प्रतिज्ञासिद्धेरित्यादिसूत्रत्रयं द्विधा व्याख्यातन्तत्र प्रथममिदं सर्वं यदयमात्मेत्यभेदव्यपदेशस्य कार्य्यकारणभ.वनिबन्धनत्वं परमाद्यं सूत्रमुत्क्रमिष्यतो ब्रह्मभावापत्तिहेतुकत्वपरं द्वितीयं ब्रह्मण एवाविकृतस्य विज्ञानात्मभावेनावस्थानमूलत्वपरं तृतीयमित्युक्तम्, एवं वदतोऽभिप्रायः शोधनीयः, यदि कार्य्यकारणभावं वदताऽऽश्मरथ्येन ब्रह्मपरिणामो जीवोऽभिमतः पूर्वमनेवम्भावश्च चौडुलोम्यभिमत इति सूत्रद्वयार्थः पूर्वपक्षीकृतः एतावदस्माकमविरुद्धम् । अथ कार्य्यकार्य्यकारणभावो नामाध्यासरूप उत्क्रमिष्यत एवम्भावश्चाध्यस्ताकारनिवृत्तिरूपः, ब्रह्मण एव जीवभावारोपतन्निवृत्तिमत्त्वाभ्याम् अभेदव्यपदेशपरं सूत्रद्वयमिति मतं तदानीं सिद्धान्ततयाऽभिमतात्काशकृत्स्नमताद्भेदाभावेन सूत्रद्वयवैयर्थ्यं स्याद्भवत्पक्षे हि ब्रह्मण एव विज्ञानात्मभावेनावस्थानं काशकृत्स्नमतं जीवब्रह्मणोरैक्यमभ्युपगच्छतश्च काशकृत्स्नस्य जीवभावस्याध्यस्तत्वं निवर्त्त्यत्वं चाभिमतमेवेति काशकृत्स्नमताद्विशेषाभावेन सूत्रद्वयवैयर्थ्यं स्थितं काशकृत्स्नमतमस्यैवाचार्य्यान्तरद्वयाभिमत्या स्थिरीकरणार्थं

Digitized by Google

सूत्रद्वयमिति चेदुक्तातिरिक्तसर्वाचार्यानभिमतत्वशङ्काव्युदासार्थमाचार्य्यभूयस्तया सूत्रसहस्राणि प्रणेतव्यानि स्युः, विस्तरभयादाचार्य्यद्वयोक्तिः प्रदर्शनार्थेति चेत्काशकृत्स्नकीर्त्तनस्यैव सर्वाचार्य्यप्रदर्शनार्थत्वसम्भवात्सूत्रद्वयवैयर्थ्यमेव स्यात्, अस्मन्मते तु परिणामाध्यासपक्षद्वयपूर्वपक्षीकरणार्थत्वात् साफल्यं स्फुटतरं, पुनश्चैवं योजितं सूत्रत्रयं “विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाये”त्युक्तं, महतो भूतस्य ब्रह्मणो भूतेभ्यः समुत्थानं कार्यकारणाव्यतिरेकप्रतिज्ञासिद्धिसूचकं तान्येवानुविनश्यतीत्युक्तं विशेषविज्ञानोच्छेदरूपमभेदाभिधानमुत्क्रमिष्यतः परेणात्मनैक्यसम्भवाद् ब्रह्मण एव विज्ञानात्मभावेनावस्थानाच्च उपपन्नमिति, इदमप्ययुक्तं प्रकृतानुपयोगाद् द्रष्टव्यतयोपदिष्टस्यात्मनः परमात्मत्वं हि साध्यं जीवोत्पत्तिप्रलयवादः प्रकृतस्य परमात्मपरत्वं न निवारयति, न हि पृथिव्याद्युत्पत्तिप्रलयवादास्तत्प्रकरणानां परमात्मपरत्वं वारयन्ति अतो जीवोत्पत्तिप्रलयचिन्तनं प्रकृतस्यानुपयुक्तम्, अत एव पादासङ्गतं च, इदञ्च जीवनित्यत्वाजत्वादिश्रुत्य[1]न्तरविरोधेन नात्माऽश्रुतेरित्यत्र करिष्यते, भवद्भिरपीदमेव वाक्यमुपादाय उपाध्युत्पत्तिप्रलयाभिप्रायमिति तत्रैव व्याख्यातम्, अतः पृथक् प्रयत्नवैयर्थ्यञ्च तत्रोपजीव्यत्वायाच्च प्रसङ्गाच्चिन्तितमिति चेन्न इहोक्तस्य सूत्रद्वयार्थस्य भाविसाध्यानुपयोगात्प्रतिज्ञासिद्धिसूचकत्वं प्रलये ब्रह्मतापत्तिवचनं चोत्पत्तिप्रलययोर्न गौणत्वसाधकं तेजःप्रभृत्युत्पत्तिप्रलययोरपि गौणत्वप्रसङ्गादविकृतस्यैव ब्रह्मणो विज्ञानात्मभावेनावस्थानमपि न गौणत्वसाधकमविकृतस्यैव ब्रह्मणोऽव्यस्ततेजोऽन्नरूपेणावस्थितत्वेन तदुत्पत्त्यादेरपि ।

सू० अतः परं ब्रह्मैवास्मिन् वाक्ये प्रतिपाद्यते इति परमेव ब्रह्म जगत्कारणं पुरुषः तदधिष्ठिता च प्रकृतिरिति स्थितम् वाक्यान्वयाधिकरणं समाप्तम् ॥

टी० गौणत्वप्रसङ्गादस्त्विति चेत् तेजोऽन्नवाय्वुत्पत्तेर्जीवोत्पत्तिवैषम्यस्य दुर्वचत्वात् प्रयासवैयर्थ्यमेव स्यादिति, अतःप्रकृतानुपयोगादिभिर-

१ श्रुत्याविरोधेनेति तु पा० ।

नुपपन्नत्वात् जीवोत्क्रमणादिनिर्वाहपरत्वमनादृतं भाष्यकारैः, अभेदव्यपदे-
शनिर्वाहस्स्वत्यन्तापेक्षितःद्रष्टव्यस्यात्मनो जीववाचिशब्दनिर्देशकृतायाः अ-
परमात्मत्वशङ्काया निराकरणीयत्वात्। यादवप्रकाशैस्तु भोक्तृब्रह्मणोरैक्या-
वृते सर्वस्य ब्रह्मतादात्म्यप्रतिज्ञानासिद्धेर्जीवेनोपक्रमोजीवब्रह्मणोरभेदेन
प्रतीतिसिद्ध्यर्थ इत्याद्यसूत्रार्थो वर्णितः, अत्र सामान्येन ब्रह्मणैक्यज्ञापनं
प्रयोजनमुक्तं भवति उत्क्रान्तौ ब्रह्मणि लीनतया तेनैक्याज्जीवेनोपक्रम
इत्येतदर्थपरम्, उत्क्रमिष्यत एवंभावादित्यौडुलोमिरिति सूत्रं व्याख्यातं
ब्रह्मणास्सर्वत्र तृणकणादावपि पूर्णत्वेन अवस्थानात् येनकेनचित्तृणादि-
वाचकशब्देनाप्युपक्रमे ब्रह्मपरत्वं युक्तमिति तृतीयसूत्रार्थ उक्तः, तत्र
तावदाद्यसूत्रद्वयस्य सूत्रकाराभिमतनिर्वाहपरत्वमयुक्तंमुक्तिदशायामौडुलो-
म्यभिमतस्य ब्रह्मतादात्म्यस्य मुक्तिपादे चितितन्मात्रेण तदात्मकत्वादित्यौ-
डुलोमिरिति सूत्रोपन्यस्तस्य सूत्रकारैरेव पूर्वपक्षितत्वात् तथा तैर्व्याख्यात-
त्वाच्च स्वप्रकाशसन्मात्रमेव स्वरूपंगुणाष्टकोक्तिस्तु गुणानां शक्तिरूपत्वाच्छ-
क्तीनाञ्च भेदाभेदादिविकल्पयोग्यत्वाद्गुणशक्तियुक्तसन्मात्रस्वरूपाभिप्रा-
या क्रीडाजक्षणाद्युपन्यासस्तुतिपरोदुःखाभावाभिप्राय इति औडुलोमिम-
तमुपन्यस्य एवमुपन्यासात्पूर्वभावादविरोधं बादरायण इति सूत्रेण तत्प्र-
तिक्षिप्तं शक्तिमात्रस्य न पुरुषार्थत्वं, न हि गानमकुर्वतः श्रवणसामर्थ्य-
मात्रं पुरुषार्थः, अतो नाहमत्र भोग्यं पश्यामीत्युक्तवतो मघोनः पुरुषार्थ-
ज्ञापनायोपदिश्यमानं गुणाष्टकं न शक्तिमात्राभिप्रायम्, अतः शक्तिमात्रोप-
न्यासस्य वैयर्थ्यात् क्रीडादिकं ब्रह्मभूतस्य मुक्तस्येश्वरस्येवाभ्युपगन्तव्य-
मिति हि सिद्धान्तितमतो यादृशं ब्रह्मतादात्म्यमौडुलोम्यभिमतं मुक्तिपादे
पूर्वपक्षितन्तादृशमेव ब्रह्मतादात्म्यमिहाप्युपन्यस्तं स्यात्, न ह्येक एवाभ्रान्तः
पुरुषः स्वाभिमतविरुद्धमर्थं कदाचिदङ्गीकरोति, अतः उत्तरत्र निराकरिष्य-
माणस्य पक्षस्य इह प्रसङ्गादुपन्यास[1]स्याऽपि स्वीकारो व्याहत इति चेप्यत-
येत्र औडुलोमिमतोपन्यास इत्यभ्युपगन्तव्यम् इहोपन्यस्ततादात्म्यस्य निरा-
करिष्यमाणत्वात् वैषम्यस्य च दुर्वचत्वात्, अतस्तत्साहचर्यादाश्मरथ्यमत-

[1] उपन्यस्तस्यापीति पा० ।

मपि प्रतिक्षेप्यतयोपन्यस्तं स्यात् स्वरूपपरिणामस्य सकलविशेषशून्यब्रह्मतादात्म्यस्य च सकलप्रमाणन्यायविरुद्धत्वाच्च प्रतिक्षेप्यत्वं दुर्वारम्, अतश्चरमसूत्रमेव स्वाभिमतनिर्वाहपरं, तत्र च अवस्थितेरिति पदं सर्वत्र घटपटतृणादौ ब्रह्मणः पूर्णतयाऽवस्थानादिति व्याख्यातं, पूर्णतयाऽवस्थानञ्च सन्मात्ररूपेणाऽत्र विवक्षितं, यथोक्तम् 'अस्तित्वं ब्रह्मणो रूपं सर्वविकल्पप्रत्याख्यानात् न चास्तित्वं घटे पटे च खण्डितं वर्त्तते उभयत्राऽपि कृत्स्नास्तित्वदर्शनादिति तदयुक्तं, तथा हि न तावदिदं ब्रह्मस्वरूपभूतमस्तित्वं सामान्यरूपं व्यवहारार्हत्वमानार्हत्वाद्युपाधिरूपं वा भवितुमर्हति तस्य लोकसिद्धत्वेनेदं "पूर्णमदः पूर्णमि"त्यादिशास्त्रवैयर्थ्यप्रसङ्गात् तस्येन्द्रियकत्वेना'"दृश्यमग्राह्यमि"त्यादिश्रुतिविरोधात् द्रव्याश्रयस्य तस्य स्वे महिम्नि स्थितत्वायोगाज्जगदाधारत्वायोगाज्जडस्य ज्ञानस्वरूपत्वायोगाद् द्रव्यनिष्ठधर्मतया तदधीनात्मलाभस्य तस्य जगद्रूपेण परिणामायोगात् सार्वज्ञ्यसर्वशक्तित्वादिगुणाश्रयत्वायोगात्सङ्कल्पाश्रयत्वाभावेन निमित्तत्वायोगात्कारणत्वाभावेनैव अध्येयत्वेन प्राप्यत्वायोगाद्भवद्भिरनभ्युपगतत्वाच्च अतः 'सद्द्रव्यमेवैकैकस्मिन् घटादौ पूर्णमिति भवतां सम्मतं, न चास्तित्वं घटे पटे च खण्डितं वर्त्तते उभयत्राऽपि कृत्स्नास्तित्वदर्शनादिति भवद्भिरुक्तत्वात्सदिति प्रतीयमानद्रव्यमेव ब्रह्मस्वरूपमि"ति, अदृश्यमग्राह्यमित्या"दिश्रुतिविरोधो दुष्परिहारः। किञ्च घटे सद्वस्तुनः पूर्णत्वं नाम न संभवति सजातीयविजातीयघटपटाद्यनन्तपदार्थरूपेण सद्द्रव्यस्य विभक्तत्वात् घटत्वादिभिरवच्छिन्नं सत्पूर्णमिति चेत् न अवच्छिन्नत्वदर्शनादेवानवच्छेदासिद्धेः, घटत्वावच्छिन्नस्य सतः पटत्वाद्यवच्छिन्नैरंशान्तरैरभिन्नत्वं पूर्णत्वमिति चेत्तर्ह्येकसूत्रावस्थितस्यांशस्य सूत्रान्तरावच्छिन्नांशैरभिन्नत्वेन पूर्णत्ववत् घटावच्छिन्नस्य सद्द्रव्यस्य पूर्णत्वमंशान्तरसापेक्षमित्युक्तं स्यात्, ततश्च घटमात्ररूपस्य सद्द्रव्यस्य अपूर्णत्वमेवोक्तम्भवति कथन्तर्हि भवत्पक्षे शरीरभूतेषु चिदचिद्वस्तुषु परमात्मनः पूर्णत्वम् अणुमात्रेऽपि वस्तुनि स्थितस्य निरवधिकषाड्गुण्यविशिष्टतया प्रतिपत्तियोग्यत्वमिति ब्रूमः, तच्च शास्त्रबलादभ्युपेतं न तु प्रत्यक्षादिनेति न काचिदनुपपत्तिः। किञ्च परमात्मनस्तृणादावपि

Digitized by Google

सद्रूपेण पूर्णत्वप्रतिपादनप्रयासश्च तत्र भवतां विफलः येन केनचित्सुखादिवाचकशब्देनाप्युपक्रमे ब्रह्मपरत्वोपपादनार्थं हि पूर्णत्वकथनं तत्तु न सिध्यति, अस्तित्वस्य तत्तच्छब्दवाच्यत्वाभावादस्तित्वस्यापि घटादिशब्दवाच्यत्वे घटोऽस्ति नास्तीति प्रयोगस्य पुनरुक्तिव्याघातौ प्रसज्येयाताम् । ननु घटादिशब्दानां विशिष्टवाचित्वं तवाभिमतं तत्र विशेष्यद्रव्यं सदिति चेत् सत्यं, तथाऽपि घटादयः शब्दाः घटत्वाद्याश्रयरूपेण विशेष्यं वदन्ति न तु सत्तारूपेण द्रव्यत्वरूपेण वा अतोनास्मत्पक्षे पुनरुक्तिव्याघातादिदोषप्रसङ्गः, अतः पूर्णस्यापूर्णस्य वा सद्रव्यस्य शब्दवाच्यत्वाभावात्पूर्णतयाऽवस्थानकथनं परमात्मोपक्रमानुपयोगीति सूत्रत्रयस्य यथोक्तार्थपरत्वं सिद्धम् । वाक्यान्वयाधिकरणं समाप्तम् ॥

प्रकृत्यधिकरणम् ।

सू० प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥

भा० एवं निरीश्वरसाङ्ख्ये निरस्ते सति सेश्वरसाङ्ख्यः प्रत्यवतिष्ठते, यद्यपीक्षणादिगुणयोगात्सर्वज्ञमीश्वरं जगत्कारणत्वेन वेदान्ताः प्रतिपादयन्ति तथाऽपि वेदान्तैरेव जगदु-

टी० सू० प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधात्, पेटिकासङ्गतिमाह "एवमि"ति, एवं-शब्देन अतीताधिकरणत्रयात्मकपेटिकाद्वयकृतनिरसनप्रकारो विवक्षितः, आद्याधिकरणत्रयेण हि साक्षात्सङ्गतेन विकल्पेन पुरुषाधिष्ठितप्रकृतेर्जगत्कारणत्वं निरस्तं, द्वितीयेन तु पादासङ्गतेनाऽपि प्रसङ्गप्राप्तेन नियमेन कारणत्वं प्रतिक्षिप्तन्तत्रच्छायानुसारिवाक्यविषयतया पादसङ्गतत्वेऽप्ययोगव्यवच्छेदप्रतिक्षेपेण उत्थितत्वात्तेनाकारेण प्रासङ्गिकत्वमपि विद्यते, एवं विकल्पेन नियमेन च कारणत्वे प्रतिक्षिप्ते समुच्चयेन कारणत्वं प्रतिक्षिप्यत इति नासङ्गतिरित्यर्थः । स्वनिष्ठवस्तुद्वयस्य निमित्तभावेनोपादानभावेन च अन्योन्यसापेक्षतया एकस्मिन् कार्य्येऽन्वयो हि व्युदस्यते, सिद्धान्ते तु ज्ञानादिवदुपादानभूतस्य ब्रह्मणः प्रकृतिर्विशेषणं तस्य सर्वशक्तित्वादिति न समुच्चयनिरासविरोधः, अत एवावान्तरसङ्गति-

Digitized by Google

र्प्यस्ति, मैत्रेयीब्राह्मणे हि परब्रह्मण एव सर्वविधकारणत्वमुक्तम् एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानानादिभिः तदुक्तं परब्रह्मणो निमित्तमात्रत्वादुपादानं तु प्रधानमिति शङ्कयोत्थानप्रतीतेः किं ब्रह्मनिमित्तमात्रम्? उत उपादानमपीति किं कारणवाक्यं ब्रह्मणो। निमित्तत्वमात्रं प्रतिपादयति?

पादानतया प्रधानमेव प्रतिपाद्यत इति प्रतीयते, न हि वेदान्ताः सर्वज्ञस्यापरिणामिनोऽधिष्ठातुरीश्वरस्याधिष्ठेयेनाचेतनेन परिणामिना प्रधानेन विना जगतः कारणत्वमवगमयन्ति, तथा ह्यपरिणामिनमेवैनं प्रकृतिं चैतद्धिष्ठितामपरिणामिनीमधीयते "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं" "स वा एष महानज आत्माऽजरोऽमरः विकारजननीमज्ञामष्टरूपामजां ध्रुवां ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः। सूयते पुरुषार्थांश्च[1] तेनैवाधिष्ठिता जगत् गौरनाद्यन्तवती सा जनित्री भूतभाविनीति तथा प्रकृतिमुपादानभूतामधिष्ठायैवेश्वरो विश्वं जगत्सृजतीति श्रूयते "अस्मान्मायी सृजते विश्वमेतत् मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति ।

टी० उतोपादानतामपी?ति प्रतिज्ञादृष्टान्तौ किं स्वारस्येन नेयौ? उत क्लिष्टतया नेयौ? किमन्यत्र निमित्तोपादानभेदनियमो निर्दोषत्वश्रुतिर्निमित्तोपादानभेदश्रुतिश्च प्रतिज्ञादृष्टान्तोपरोधका भवन्ति न?ेति यदोपरोधका भवन्ति तदा प्रतिज्ञादृष्टान्तयोः क्लिष्टतया निर्वाह्यत्वान्निमित्तत्वमात्रं वेदान्ताः प्रतिपादयन्तीति ब्रह्म निमित्तमात्रमिति पूर्वपक्षः स्यात् यदा नोपरोधका भवति तदा प्रतिज्ञादृष्टान्तयोः स्वारसतया नेयत्वादुपादानत्वमपि वेदान्ताः प्रतिपादयन्तीति उपादानमपि ब्रह्मैवेति सिद्धान्ते फलफलिभावः ईक्षत्यानन्दमयाद्यधिकरणसिद्धार्थोत्र-

१ पुरुषार्थं चेति पा० ।

पपरिहारमुखेन परब्रह्मकारणत्वे समर्थिते कथं पुनः साङ्ख्यस्योत्थानमिति शङ्कामननुवदन् पूर्वपक्षी स्वमतं प्रतिजानीते यद्यपी"ति, ईक्षणादीत्यादि-शब्द आनन्दादिपरः वेदान्तैरेव ब्रह्मैककारणत्वपरतया त्वदभिमतैरेवेति भावः । प्रतिज्ञातमुपपादयति "न ही"ति, ईश्वरस्य चेतनत्वादपरिणामित्वेनाधिष्ठातृत्वेन च प्रधानस्याचेतनतया परिणामित्वेनाधिष्ठेयत्वेन च वेदान्तप्रतिपादितत्वं प्रतिज्ञातार्थे हेतुरित्यर्थः । हेतुसिद्धिं दर्शयति "तथा ही"ति, निष्कलमित्यादिवाक्यमीश्वरस्यापरिणामित्वविषयं, विकारजननीमिति प्रकृतेर्विकारित्वाधिष्ठेयत्वविषयं जनित्री-समष्टिसृष्टिकरी, भूतभाविनी-व्यष्टिसृष्टिकरी प्रधानप्रतिपादके वाक्ये तद्विशेषणतयेश्वरस्याधिष्ठातृत्वं दर्शितम् । ईश्वरप्रतिपादके वाक्ये तस्य प्रधानाधिष्ठातृतयोपादानभूतात्तस्माद्भेदं दर्शयति "तथे"ति, महेश्वर-शब्देन मायिशब्दनिर्दिष्टस्य निमित्तकारणस्य मायां प्रति प्रेरकत्वं विवक्षितमिति भावः । श्रुतेरुक्तार्थपरत्वं स्मृतिसंवादेन द्रढयति-

भू० स्मृतिरपि "मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरमि"ति, एवमश्रुतेऽपि प्रधानोपादानत्वे ब्रह्मणो जगत्कारणत्वश्रुत्यन्यथाऽनुपपत्त्यैव प्रधानस्वरूपं तस्येश्वराधिष्ठितस्य जगदुपादानकारणत्वं च सिध्यति, एवमेव हि लोके निमित्तोपादानयोरत्यन्तभेदो दृश्यते मृत्सुवर्णादेरचेतनस्य घटकटकाद्युपादानत्वं चेतनस्य कुलालस्वर्णकारादेश्च निमित्तत्वं च नियतमुपलभ्यते, कार्य्यनिष्पत्तिश्च नियमेनानेककारके सव्यपेक्षा दृष्टा, एवं निमित्तोपादानयोर्भेदनियमङ्कार्य्यनिष्पत्तेरनेककारणसव्यपेक्षत्वनियमञ्चातिक्रम्य

टी० "स्मृतिरपी"ति, श्रुतिषु प्रधानप्रतिपादनाभावमभ्युपगम्य तस्योपादानत्वं समर्थयति "एवमश्रुतेऽपी"ति, ब्रह्मण इति सत्यज्ञानादिलक्षणत्वादपरिणामिन इति भावः । प्रधानस्वरूपं तस्येश्वराधिष्ठितस्य

प्रादात् । बालबोधार्थं वर्गसमीकरणमात्रबीजगणितकृतेऽस्मै पारितोषिकरूपं मुद्रासहस्रं पश्चिमोत्तरप्रदेशीयाधिपति- (Government of N.-W. P.) र्ददौ । वस्वष्टाष्ट ८८८ शके चैत्रशुक्लपञ्चम्यां गुरावहर्गणगणितकृतेऽस्मै डाक्तरकर्णनामा भारतवर्षभूषणपदवीमदात् । (See preface of Brihat-Saṁhitá edited by Dr. Kern p. 6-7)

साधारणकरणग्रन्थवेत्तारो ज्योतिर्विदोऽनायासेनाहर्गणगणितं कुर्वन्ति । नहि कस्यचिद्योग्यताऽहर्गणगणितेन निश्चेतुं शक्यते । वस्तुतोऽयं भारतवर्षीयप्राचीनसिद्धान्ताभिज्ञो नासीत् किन्तु यूरपदेशीयगणितकर्म्मणा गणिते पाटवं सम्पाद्य सिद्धान्तशिरोमणिं संमुद्र्य स्वप्रसिद्धिं कृतवान् । काशिकराजकीयप्रधानपाठशालायामेतत्समयतः प्राचीनपरम्परागतगणितपट्टानामुच्छेदो जातः । अधुना छात्रा यूरपदेशीयरीतिवत् गणितार्थं शिलोद्भवां पाटीं गृह्णन्ति ।

पुरा हि हिन्दीभाषायामस्य जीवनवृत्तान्तप्रकाशनेऽस्यान्तेवासी कान्यकुब्जरामेश्वरदत्तत्रिपाठी यश्च सम्प्रति मिर्ज़ापुरप्रधानाङ्गलपाठशालायां संस्कृतपण्डितोऽस्ति प्रवृत्तः परन्तु पाठशालाध्यक्षग्रिफिथसाहिबमहाशयेन "कस्यचिन्निधनसमयासन्ने जीवनवृत्तान्तः सम्पूर्णो लेखनयोग्यो भवती"त्युक्तो निवृत्तस्तस्मात् ।

अस्य पूर्वजाश्च अहमदनगरमण्डलान्तर्गतगोदातीरवर्त्तिटोकाग्रामनिवासिन आसन् ।

नीलाम्बरशर्म्मा । १७४५

झोपाख्यमैथिलब्राह्मणः पाटलिपुत्रनगरनिवासी स्वज्येष्ठभ्रातुर्जीवनाथशर्म्मणो ज्योतिर्विल्लज्जाशङ्कराच्चाधीतज्योतिषविद्यः शम्भुनाथशर्म्मतनयः पञ्चवेदसप्तेन्दु १७४५ शके आषाढशुक्लैकादश्यां प्रादुरभूत् । अयमलवरदेशनरपतिश्रीशिवदानसभाप्रधानगाणितिक आसीत् ।

तस्मिन्नेव नृपतावलवरदेशं शासति यदा कप्तानठामसक्याडेल्नामा अलवरदेशस्य एजेण्टपदे नियुक्त (Captain Thomas Cadell, V. C.,

Political Agent of Ulwur) आसीत् तदा नृपतिविनोदाय यूरपदेशीयरीत्यनुसारतो गोलप्रकाशाभिधं ग्रन्थं संस्कृते व्यरचयत्। यश्च बापूदेवशास्त्रिणा संशोध्य तदीयाज्ञया त्रिनवाद्रीन्दु १७९३ शके काश्यां मेडिकल्हाललनाम्नि यन्त्रालये मुद्रितः।

अस्मिन् ग्रन्थे पञ्चाध्यायाः सन्ति यत्र प्रथमे ज्योत्पत्तिवर्णनं द्वितीये त्रिकोणमितिसिद्धान्तास्तृतीये चापीयरेखागणितसिद्धान्ताश्चतुर्थे चापीयत्रिकोणमितिसिद्धान्ताः पञ्चमे सरलत्रिकोणमितिचापीयत्रिकोणमितिसम्बन्धिनः सिद्धान्तोपयोगिनः प्रश्नाः सन्ति। वस्तुतः सम्प्रति यूरपदेशीयरीतिज्ञानार्थं यूरपभाषानभिज्ञानां छात्राणामनेन महानुपकारः।

अस्यादौ ११ श्लोकः।

प्रोद्यत्कीर्त्तिसुधांशुदीधितिचयैरानन्दिताखण्डल-
श्रीलश्रीशिवदानसिंहनृपतौ राज्यं प्रकुर्वत्यदः।
सद्युक्तिग्रथितं स्वबुद्धिमथितं गोलप्रकाशाभिधं
श्रीनीलाम्बरभूसुरः प्रकुरुते सन्देहसन्दोहहृत्॥

अन्ते।

गङ्गागण्डकिसङ्गमे हरिहरक्षेत्रं क्षितौ विश्रुतं
तस्मात्क्रोशयुगान्तरे सुरनदीतीरे परे दक्षिणे।
ख्याते पाटलिपुत्रसंज्ञनगरे विद्वज्जनैर्मण्डिते
ज्योतिर्दर्शनसर्वदर्शनयशा मान्यो वदान्यो विदाम्॥

श्रीशम्भुनाथः सुकृतैकगाथः कृपैकपाथः पतिरीशनाथः।
अभूद् द्विजेन्द्रः सुचकोरचन्द्रः क्षितावुपेन्द्रः स्मरणे वितन्द्रः॥

तदङ्गजः सर्वविदां समानस्त्रिस्कन्धपारङ्गमताभिमानः।
चकास्ति शिष्यादिविराजमानः श्रीजीवनाथः कविलभ्यमानः॥

नीलाम्बराख्योऽकृत तत्कनिष्ठस्सल्लब्धबोधः परमैकनिष्ठः।
गोलप्रकाशाभिधमाशुबोधं निरस्तसन्देहमनोनुरोधम्॥

यद्गोलपाण्डित्यविशेषरङ्गे सिद्धान्तकर्त्तुः पटुताविभङ्गः ।
संभूषयन् शङ्करराजधानीं विद्याप्रदाता जगतामिदानीम् ॥
श्रीबापुदेवः सुधियो मुदे वः संशोधयामास स यत्नपूर्वम् ।
गोलप्रकाशं त्रिनवाद्रिभूभिः १७९३ समे च मुद्रायितवान् शकाब्दे ॥

एनेन भास्करीयसिद्धान्तशिरोमणेर्ज्योत्पत्तेर्बेलनस्य दृक्कर्म्मणो लीलावत्या अङ्कपाशस्य च टीका वासनामण्डिता कृता । अस्य ज्येष्ठभ्राता श्रीजीवनाथशर्म्मा च भास्करीयबीजटीकां भावप्रकाशादिफलितग्रन्थांश्च कृतवान् ।

वस्तुत एतावुभौ प्राचीनज्यौतिषविद्याकुशलौ सर्वत्र लब्धप्रतिष्ठावास्ताम् । नीलाम्बरशर्म्मनिधनं काश्यां पञ्चाभ्रधृति १८०५ शके वैशाखशुक्लैकादश्यां मणिकर्णिकाघट्टेऽभूत् । निधनात्पूर्वं श्रीसीतारामप्रतिष्ठार्थं स्वगेहाच्चातिदूरे मन्दिरं कारयामासायम् ।

गोविन्ददेवशास्त्री । १८५६

महाराष्ट्रभेदे चितपावनजातीयो बापूदेवशास्त्रिभ्रातुष्पुत्रो बापूदेवशास्त्रितोऽधीतज्यौतिषविद्यः काशिकराजकीयप्रधानपाठशालायां लज्जाशङ्करगणकनिधनानन्तरं नवपञ्चधृति१८५९ खीष्टशके तृतीयगणितशास्त्राध्यापकत्वेन नियुक्तः ।

तस्मिन् समये श्रीदेवकृष्णशर्म्मा वस्तुतो गणितशास्त्राध्यापकः पाठशालीयच्छात्रेभ्य उत्तमः सर्वत्र प्रसिद्धस्तत्पदकार्यैककुशल आसीत् परन्तु बापूदेवशास्त्रिप्रार्थनया पाठशालाध्यक्षमहाशयेन श्रीडाकृबालण्टेनसाहिबेनायमेव नियुक्त इति काश्यां सर्वत्रैव प्रसिद्धिरस्ति । अयं पश्चात् खनगधृति १८७० खीष्टशके फेब्रुअरीमासे अङ्ग्लोसंस्कृतविभागे प्रधानाध्यापकसाहाय्यार्थं च पाठशालाध्यक्षेण श्रीग्रिफिथसाहिबमहाशयेन नियुक्तस्तत्र चाष्टौ मासान् कार्य्यं सम्पाद्य स्वल्पे वयस्येव खनगधृति१८७० खीष्टशके आक्टूबरमासस्य १२ दिने पञ्चत्वं गतः ।

वस्तुतोऽयं विद्यारसिकः परिश्रमशीलः सुशील आसीत् । निजेन

परिश्रमेणैव स्वल्पे वयसि गणितकाव्याङ्गलभाषासु प्रवीणोऽभवत् । एतेनैव प्रसन्नराघवं बालरामायणं च नाम नाटकं संशोध्य काश्यां पण्डितपत्रे पृथक् च मुद्रितम् । एवमस्य प्रसन्नराघवबालरामायणमुद्रणरूपा कृतिरेव राजति ।

अयं पाठशालायामध्यापकत्वेन नियुक्तो यदाऽभूत् तदा प्रायोऽस्य वयः पञ्चविंशतिवर्षसममासीत् तेनाऽस्य जन्मशको रसपञ्चसप्तेन्दुसमासन्न १७५६ आयाति । अयं सन् १८६६ अगस्तमासस्य पण्डितपत्रे च यूरपदेशरीतिवत् सायनेनैव गणना मुख्येत्यत्र किञ्चिल्लिलेख । यद्यप्ययं बापूदेवशास्त्रिभक्तस्तथापि पश्चाद्बापूदेवशास्त्रिणा महान् विरोधो जातः । यावज्जीवनं बापूदेवशास्त्रिणा तिरस्कृत आसीत् ।

आधुनिका ज्योतिर्विदः फलमात्रैकवेदिनः ।

व्याकरणादिशास्त्रमज्ञात्वैव लघुपाराशरीबालबोधशीघ्रबोधमुहूर्तचिन्तामणिनीलकण्ठीबृहज्जातकजैमिनिसूत्राणामेकदेशेन मत्ता आत्मानं कृतकृत्यं ज्यौतिषशास्त्रपारङ्गतं मन्यन्ते । तत्र साहसिनो मकरन्दादिरचितसारण्यनुसारेण तिथ्याद्युपपत्तिं विनैवाऽऽधारसारणी च वस्तुतः शुद्धा वा नेति सर्वमबुद्ध्वैव तिथिपत्रं विरचय्याऽऽत्मप्रसिद्धिं कुर्वन्ति ।

केचन च दुर्बोधलवमादकद्रव्यबलेनोन्मत्ता मुद्रणयन्त्रालयाधीशत्वेन वाऽन्यदत्तद्रव्यलोभतः प्राचीनग्रन्थान् सङ्गृह्याऽऽदावन्ते च नूतनान् द्वित्रान् श्लोकान् विरचय्य प्रशंसामात्रैकपूरितान् वस्तुतोऽसाररूपान् समुद्ररत्नाकरतत्त्वादिनामकरणालङ्कृतान् ज्योतिषग्रन्थान् विरचयन्ति ।

अहो एते चात्मप्रशंसाभिलाषेण प्राचीनानां कृतिं च बहुत्रान्यथारूपां कुर्वन्ति स्वकल्पितामितिहासकथां चासत्यस्तरूपां योजयन्ति । यथा दक्षिणप्रान्ते — औरङ्गाबादनगरे जोशिहरिकृष्णव्यङ्कटरामस्य श्रीगायत्रीमन्दिरस्थविद्याप्रकाशनाम्नि मुद्रणयन्त्रे गुर्जरौदीच्यमंछारामस्य पौत्रेण ज्योतिर्विद्व्यङ्कटरामस्य पुत्रेण कमलागर्भोद्भवेन कररसनगेन्दु १७६२ शके लब्धजन्मना हरिकृष्णनाम्ना युगनन्दसप्तेन्दु १७९२ शके प्राचीनमतानि संगृह्य मुद्रिते बृहज्ज्योतिषार्णवे प्रश्नस्कन्धस्य तृतीयश्लोकस्य

"यवनाष्टकमध्येऽभूदौरंगजेबाख्यवीर्यवान् ।
दिल्लीदेशाधिपः पूर्वं सर्वविद्याविशारदः" ॥

इत्यस्य टीकायां स्वकृतायां "अष्टौ यवनाः के इत्यपेक्षायामाह नामानि आदौ शालिवाहनशके १५११ एकादशोत्तरैकादशशततमे वर्षे श्रीतिमिरलिङ्गनामा भूपतिः तस्य राज्यवर्षाणि ६० ततो बाबरशाहवर्षाणि ५६ हुमाउवर्षाणि ५१ ततोऽकबरशाहवर्षाणि ५५ जहांगीरशाहवर्षाणि २२ साहिजहांवर्षाणि ३२ अवरंशाहवर्षाणि ४८ बहादुरशाहात्मज आलमगीरबादशाहवर्षाणि ५४ स अवरंगजेबः पूर्वजन्मनि मुकुन्दब्रह्मचारिनाम्ना इति ज्ञाने कस्यचित्पक्षं अमूलत्वादुपेक्षितं" ।

इति सर्वं परस्परमसङ्गतं कपोलकल्पितमेवाऽऽभाति यत एतदनुसारेण अकबरराज्यप्राप्तिशकः = १५११ + ६० + ५६ + ५१ = १६७८ अयमतीवाशुद्धः (रामदेवज्ञवर्णनं विलोक्यम्) एवं सर्वं वाग्जालमात्रमनभिज्ञानां व्यामोहकरमेव ।

*सम्प्रति काश्यां वस्तुतः फलितवेदिनः करणागतग्रहगतिकरणक्षमाः श्रीश्यामाचरणसिद्धेश्वरशर्म्मादयो वर्त्तन्ते येषु श्रीश्यामाचरणशर्म्मोऽतीवख्यातः स्वविद्यया बहुभिर्नृपतिभिर्हस्त्यश्वयानादिभिः पूजितः सकलजनरञ्जनः सज्जनशिरोमणिरनन्यरामोपासकः परःशतानां छात्राणामध्यापको भोजनाच्छादनादिभिस्तेषां पालकश्च षष्टिवर्षासन्नवयस्को राजति । एतत्तनयश्च सच्चर्यविनयोपपन्नस्तातादधीतफलितविद्यो मदीयानुग्रहेणाधीतगणितविद्यश्च बहून् छात्रानध्यापयन् स्वविद्यया पितरं चामोदयन् विराजते त्रिंशद्वर्षासन्नवयस्कोऽयोध्यानाथाङ्घ्रिभक्तिधर्म्मा श्रीयुतायोध्यानाथशर्म्मा ।

* सम्प्रति काश्यां ग्रहलाघवानुसारेण पञ्चाङ्गनिर्माता सरयूपारीणब्राह्मणो ज्योतिर्विद्रामेश्वरदत्तशर्म्मा राजति । यश्च रामभूपति १८१३ शके चैत्रशुक्लाष्टम्यां जलयन्त्रनिर्माणावसरे काश्यां भदैनीनामकप्रदेशे राममन्दिरविदारणसमुद्भवदुर्जनसन्दोहोपद्रवे कलङ्कित आसीत् ।

Digitized by Google

श्रीमद्भारतवर्षवर्षविलसत्सद्गोलविद्याविदां
वृत्तं न क्वचिदन्यथा शिथिलया विद्वामया वामया ।
युक्त्याऽवोचमशिष्टवाक्यमखिलं सन्त्यज्य नूनं खिलं
बालानन्ददमत्र किन्तु सुधियः प्रादर्शयं स्वाशयम् ॥

नगसागररत्नभूमिवर्षे गणकानन्दकरीं तरङ्गिणीम् ।
नगसागररत्नभूमिवर्षे समकार्षीत्सुखदां सुधाकरः ॥

Digitized by Google

Digitized by Google

गणकतरङ्गिणी ।

काशिकराजकीयप्रधानसंस्कृतपाठशालीयप्रधानगणितशास्त्रा-
ध्यापकमहामहोपाध्यायसुधाकरद्विवेदिनिर्मिता ।

काश्याम् ।

मेडिकल्हाल्नाम्नि मुद्रायन्त्रे मुद्रिता ।

सन् १८९२ ईस्वी ।

GAṆAKA TARAṄGIṆÍ

OR

LIVES OF HINDÚ ASTRONOMERS

BY

MAHÁMAHOPÁDHYÁYA SUDHÁKARA DVIVEDÍ,
PROFESSOR OF MATHEMATICS AND ASTRONOMY, SANSKRIT COLLEGE, BENARES.

BENARES:
PRINTED AT THE MEDICAL HALL PRESS, BENARES.
1892.

Digitized by Google

Digitized by Google

भूमिका ।

भारतवर्षे प्राचीनेतिहासानां यादृशी दुर्दशा सा च सर्वेषाम् विदिता तथातिश्रमेण कतिपयानां गणकानां समयादिकं निर्णीयात्र मया निवेशितम् ।

अथ येषां गणकानां नामानि तत्कृतग्रन्थाश्च ये ते सर्वे पृथगनुक्रमणिकायां च प्रदर्शिताः । तथापि येषां समयादिकमत्र स्फुटं तन्नामाग्रे * इति साङ्केतिकं चिन्हं न्यासि । गणकानां वर्णने च याव-च्छक्यं सर्वेषां द्रागवबोधाय कविवागाडम्बरं विहाय सरलवाक्य-संयोजना च कृता मया । अथ च येषां गणकानां केवलं नामैव तेषां समयादिज्ञाने भारतवर्षीयगणकानामितिहासः पूर्णप्राय एवातो याव-च्छक्यमितिहासतत्त्वविद्भिर्विद्भिर्यत्नतस्तत्समयादिकमन्वेषणीयं मन्नि-र्णीतं च शोधनीयमिति तान् सुजनान्मुहुरर्थये ।

संवत् १९४९
आश्विनशुक्लषष्ठ्यां कुजे

सुधाकरद्विवेदी ।

Digitized by Google

Digitized by Google

शुद्धिपत्रम् ।

पृ॰	पं॰	अशुद्धम् ।	शुद्धम् ।
१	१२	विश्वसङ्गा	विश्वसङ्गना
२	१४	आयभटः	आर्यभटः
३	२७	विंशति	विंशति
८	११	स्वाय	स्वीय
१६	३	वरहास्य	वराहस्य
१७	७	पापापि	पापाप
२६	२५	ध्यायछे	ध्यायच्छे
२६	१६	यच्चति	यच्छति
३०	१२	स्यछा	स्वच्छा
३२	१०	शास्त्रमं	शास्त्रसमं
३२	२८	प्युव	प्युव्र
३८	१७	सगुणा	रसगुणा
४२	१५	रूप	रूप
४५	६	गणाश	गणेश
५०	३	ब्रह्मार्थे	ब्रह्मार्य
५१	२८	क्लृत	क्लृतं
५६	२६	सिद्धन्त	सिद्धान्त
५८	२५	निर्णय	निर्णयः

पृ॰	पं॰	अशुद्धम् ।	शुद्धम् ।
५८	२८	सर्वंत्रेव	सर्वत्रैव
५६	१३	भस्करा	भास्करा
६२	८	हूवि	आहूवि
६३	६	चेक्भरि	चेक्भूरि
६५	१३	प्रधान्या	प्राधान्या
६८	२६	गैरकबल	गैरकबूल
७३	१६	परन्तुं	परन्तु
८६	२२	वुःकतौ	वुष्कतौ
८६	४	संदृशं	सदृशं
६०	१२	तन्ममध्ये	तन्मध्ये
१००	१६	तक	तर्के
१०४	३	भुञ्जन्ते	भुञ्जते
१०६	७	उत्या	उत्या
११२	२८	सया	समया
११४	३०	भुञ्जन्ते	भुञ्जते
११६	४	र्गत	र्गतयाम
१२१	२४	अयाति	आयाति
१२७	८	ज्यातिषा	ज्योतिषा
१२८	१३	प्राप्नवान्	प्राप्तवती

Digitized by Google

Digitized by Google

गणकतरङ्गिण्यामनुक्रमणिका ।

पृ०	पं०	गणकनामानि ।	तत्कृतग्रन्थनामानि ।
		अ	
१	८	अङ्गिराः	
१	७	अत्रिः	
६३	१८	अनन्तदैवज्ञः*	अनन्तसुधारसाख्यसारिणी ।
६४	२	अनन्तदैवज्ञः*	जातकपद्धतिः। कामधेनुगणितटीका ।
१३३	२२	अयोध्यानाथः	
१३	६	आमराजः	खण्डखाद्यकरणटीका ।
२	१४	आर्यभटः•	आर्यभटीयतन्त्रम् ।
		उ	
२१	१७	उत्पलः*	पञ्चसिद्धान्तिकाटीकां विहाय वराहमिहिरकृतग्रन्थोपरिटीका । षट्पञ्चाशिकायाष्टीका । प्रश्नज्ञानम् ।
११२	१५	उमापतिपाठकः	प्रश्नमाणिक्यमालायाश्चतुर्थो भागः ।
५५	१८	उर्वीधरः	
		ऋ	
४२	२५	ऋषिपुत्रः	
		क	
१७	५	कनकाचार्यः	
९३	६	कमलाकरः	
९८	६	कमलाकरः*	तत्त्वविवेकम् ।
१६	७	कल्याणवर्म्मा*	सारावली ।
१	८	कश्यपः	
८१	१५	कान्हजी	
४५	२६	कालिदासः*	ज्योतिर्विदाभरणम् ।
३७	२०	कृपानाथः	भास्करीयलीलावतीटीका ।
१२५	२३	कृपालुदत्तशर्म्मा	
१२२	२०	कृष्णदत्तः	
११७	११	कृष्णदेवः*	
१४	२०	कृष्णाचार्यः	
६९	२२	कृष्णदैवज्ञः	भास्करीयबीजगणितटीका नवाङ्कुरा । श्रीपतिपद्धतिटीका । छादकनिर्णयः ।
५३	५	केशवः*	वर्षग्रहसिद्धिः। ग्रहकौतुकम् । तिथिसिद्धिः । जातकपद्धतिः । ताजकपद्धतिः । सिद्धान्तवासनापाठः । मुहूर्त्ततत्त्वम् । कायस्थादिधर्मपद्धतिः । कुण्डाष्टकलक्षणम् । गणितदीपिका ।

Digitized by Google

पृ.	पं.	गणकनामानि ।	तत्कृतग्रन्थनामानि ।
५५	१७	केशवः	
४४	२३	केशवार्कः*	विवाहवृन्दावनम् । करणकण्ठीरवम् ।
८६	२०	क्षेमकर्णः	
		ग	
३७	१६	गङ्गाधरः	भास्करीयलीलावतीटीका।
५०	२३	गङ्गाधरः*	चान्द्रमानाभिधानम् ।
५८	४	गणेशः*	ग्रहलाघवम् । लघुतिथिचिन्तामणिः । बृहत्तिथिचिन्तामणिः । श्राद्धनिर्णयः । सुधीरञ्जनी । तर्जनीयन्त्रम् । कृष्णाष्टमीनिर्णयः । होलिकानिर्णयः । शिरोमणेष्टीका । लीलावतीटीका । विवाहवृन्दावनटीका ।
८१	६	गणेशः*	जातकालङ्कारः ।
१	८	गर्गः	
५२	२८	गोकुलनाथः	
१४	१७	गोविन्दः	बृहज्जातकस्य टीका ।
७४	१७	गोविन्ददैवज्ञः*	पीयूषधाराटीका ।

पृ.	पं.	गणकनामानि ।	तत्कृतग्रन्थनामानि ।
१३१	१३	गोविन्ददेवशास्त्री*	सायनविचारः।
१२०	२१	गोविन्दाचारी*	साधनसुबोधम् । योगिनीदशादयः ।
		च	
१८	१७	चतुर्वेदाचार्यः	ब्रह्मसिद्धान्तस्य टीका वासनाभाष्याख्या ।
५१	१३	चन्द्रभट्टः	
७१	११	चिन्तामणिः	
६४	३	चिन्तामणिदैवज्ञः	
११४टि·	२	चिन्तामण्युपाध्यायः*	
१	६	च्यवनः	
		ज	
१०२	१७	जगन्नाथः	सिद्धान्तसम्राट् । रेखागणितम् ।
१२१	१२	जयरामज्योतिषी	
१२६	२२	जीवनाथशर्म्मा	भास्करीयबीजगणितटीका । भावप्रकाशादिफलग्रन्थाः ।
१५	१०	जीवशर्मा	
४७	२६	जीवदेवः	
५६	२७	ज्ञानराजः*	सिद्धान्तसुन्दरम् । बीजगणितम् ।
		ढ	
६७	२५	ढुण्ढिराजः*	जातकाभरणम् ।
१२६	२३	ढुण्ढिराजमिश्रः	

Digitized by Google

पृ॰	पं॰	गणकनामानि ।	तत्कृतग्रन्थनामानि ।
		त	
८५	२७	त्रिविक्रमः	मुहूर्त्तग्रन्थः ।
		द	
८६	२६	दामोदरः	
६४	१७	दिवाकरः	
६४	२५	दिवाकरः*	जातकपद्धतिः। पद्मजातकं सविवृतिकम् । मकरन्दविवरणम् । केशवपद्धतिटीका प्रौढमनोरमाख्या ।
११८	६	दुर्गाशङ्करपाठकः*	
१७	३	देवकीर्त्तिराजः	
१२५	२४	देवकृष्णशर्म।*	
१०२	११	देवदत्तः	
५५	१८	देवनाथः	
४२	२३	देवलः	
१५	६	देवस्वामी	
८६	१७	दैविदासः	बीजगणितटीका । श्रीपतिपद्धतेष्टीका ।
		न	
१२५	६	नन्दलालशर्मा*	
६६	२०	नागनाथः	
१	८	नारदः	
२	१	नारायणः	
७८	१३	नारायणः*	मुहूर्त्तमार्त्तण्डः। तट्टीका मार्त्तण्डवल्लभाख्या ।
८५	७	नारायणः*	बीजगणितम् ।
८५	२५	नारायणः	
१०१	४	नित्यानन्दः*	सिद्धान्तराजः ।
६८	१६	नीलकण्ठदैवज्ञः*	ताजकपद्धतिः।
१३६	२०	नीलाम्बरशर्मा*	गोलप्रकाशः । शिरोमणेर्ज्योत्पत्तिबलनदृक्कर्मणां लीलावत्या अङ्कपाशस्य च टीकाः ।
६७	२६	नृसिंहदैवज्ञः*	मध्यग्रहसिद्धिः।
८२	१५	नृसिंहदैवज्ञः*	सूर्यसिद्धान्तस्य टीका सौरभाष्याख्या । शिरोमणेष्टीका वासनावार्त्तिकाख्या ।
		प	
२५	१५	पद्मनाभमिश्रः*	व्यवहारप्रदीपः।
११६	३	परमसुखोपाध्यायः*	
११२	८	परमानन्दपाठकः*	प्रश्नमाणिक्यस्य भागत्रयम्।
६	३	परमेश्वरः	भटदीपिका ।
४७	४	परशुरामदैवज्ञः	
१	७	पराशरः	
१	७	पितामहः	
१	१४	पुलस्त्यः	
४२	२६	पुलिशाचार्यः	
१५	७	पृथुयशाः	षट्पञ्चाशिका
१	६	पौलिशः	
६	२७	प्रद्युम्नः	
६	२४	प्रभाकरः	
		ब	
११३	१२	बबुआज्योतिषी	
८८	८	बलभद्रमिश्रः*	हायनरत्नम् ।
७६	२१	बल्लालः	
४२	११	बल्लालसेनः*	अद्भुतसागरः।
१२२	२	बापूदेवकरः	

पृ.	पं.	गणकनामानि ।	तत्कृतग्रन्थनामानि ।
१२६	१६	बापूदेवशास्त्री*	रेखागणितस्य १ अध्यायस्य संस्कृतेऽनुवादः। त्रिकोणमितिः। सायनवादः। प्राचीनज्योतिषाचार्याशयवर्णनम्। विचित्रप्रश्नः। तत्त्वविवेकपरीक्षा। मानमन्दिरस्थयन्त्रवर्णनम्। व्यक्तगणितम्। चलनकलनस्य १ अध्यायस्य २० सिद्धान्ताः। चापीयत्रिकोणमितिः। छेद्यकम्। लघुशङ्कुच्छिन्नक्षेत्रगुणाः। हिन्दीभाषायां व्यक्तगणितम्। बीजगणितम्। फलितविचारः। सायनवादानुवादः। पञ्चाङ्गोपपादनम्।
११७	१	बालकृष्णज्योतिषी●	दुष्टमुखचपेटिका।
१८	१	ब्रह्मगुप्तः*	ब्राह्मस्फुटसिद्धान्तः। खण्डखाद्यं करणम्।
३१	२४	ब्रह्मदेवः*	करणप्रकाशः।
		भ	
१४	१६	भगवत्पादाचार्यः	
४२	२६	भट्टबलभद्रः	
४५	२८	भावरत्नकृत्*	ज्योतिर्विदाभरणस्य टीका सुखबोधिका।
१४	२५	भास्करः	
३४	२२	भास्करः●	लीलावती। बीजगणितम्। सिद्धान्तशिरोमणिः। करणकुतूहलम्। सर्वतोभद्रयन्त्रम्। वसिष्ठतुल्यम्।
१	६	भृगुः	
३१	८	भोजराजः*	राजमार्तण्डः। पातञ्जलयोगसूत्रवृत्तिः। करणमृगाङ्कः।
		म	
५२	१०	मकरन्दः*	मकरन्दनामकं करणम्।
१५	६	मणित्थः	
११४	२६	मथुरानाथशुक्लः●	यन्त्रराजघटना।
४८	१४	मदनसूरिः	
१७	२०	मधुसूदनः	
१	८	मनुः	
१७	२	मन्दिलः	
१२५	टि१	मयूरभट्टः	
१	८	मरीचिः	
४८	१४	मलयेन्दुसूरिः	यन्त्रराजटीका।
७७	५	मल्लारिः*	ग्रहलाघवस्य टीका।
१४	१३	महादेवः	पद्मजातकस्य टीका।
४७	३	महादेवः●	महादेवसारिणी।

Digitized by Google

पृ॰	पं॰	गणकनामानि।	तत्कृतग्रन्थनामानि।
५०	१	महादेवः*	कामधेनुः।
४५	२८	महिमाप्रभसूरिः	
१४	१३	महीधरः	बृहज्जातकस्य टीका।
४८	१३	महेन्द्रसूरिः*	यन्त्रराजः
३४	२४	महेश्वरोपाध्यायः	
१	२८	माण्डव्यः	
४७	२७	माधवः	
१९	२०	मुञ्जालः*	लघुमानसम्।
९१	१४	मुनीश्वरः*	सिद्धान्तसार्वभौमः। निसृष्टार्थदूत्यभिधा लीलावतीटीका। मरीच्यभिधा शिरोमणिटीका। पाटीसारः। छेद्यकभङ्गी।
२	५	मैत्रेयः	
		य	
१	६	यवनः	
१४	२२	यवनेश्वरः	
३१	४	योगेश्वराचार्यः	
		र	
७२	१	रघुनाथशर्मा*	मणिप्रदीपं करणम्।
७९	२०	रङ्गनाथः*	गूढप्रकाशाभिधं सूर्यसिद्धान्तस्य टिप्पणम्।
९६	२५	रङ्गनाथः	सिद्धान्तचूडामणिः। भङ्गीविभङ्गी।
४२	२५	राजपुत्रः	
४५	२२	राणाः	
७१	१३	रामः	
३७	२०	रामकृष्णः	भास्करीयलीलावतीटीका।
८१	१६	रामकृष्णः	
७२	११	रामदेवज्ञः*	मुहूर्त्तचिन्तामणिः। रामविनोदम्। यन्त्रप्रकाशः। टोडरानन्दः।
२	१	रामेशः	
१३३	टि२	रामेश्वरदत्तशर्मा	
		ल	
१	२१	लगधः	
१०२	७	लक्ष्मणः	
१२५	टि३	लक्ष्मणशर्मा	
५५	१६	लक्ष्मीदासः*	शिरोमणिटीका सोदाहरणा चिन्तामणिसमाख्या। भास्करीयलीलावतीटीका सोपपत्तिका।
११२	२१	लक्ष्मीपतिः*	
१२३	१	लज्जाशङ्करशर्मा*	
८	१	लल्लः*	शिष्यधीवृद्धिदम्। पाटीगणितम्
६	३७	लाटाचार्यः	
१	६	लोमशः	
		व	
१६	१४	वटेश्वरः	
३३	२१	वनमपण्डितालि	हिन्दीभाषायां भास्वत्याष्टीका

पृ॰	पं॰	गणकनामानि ।	तत्कृतग्रन्थनामानि ।
११	१७	वराहमिहिरः॰	बृहज्जातकम्। लघुजातकम् । बृहत्संहिता । समाससंहिता। विवाहपटलम्।पञ्चसिद्धान्तिका । योगयात्रा ।
१	७	वसिष्ठः	
५५	१७	वाचस्पतिः	
१४	२२	बादरायणः	
१	२४	वामदेवः	
६	२६	विजयनन्दी	
८४	५	विट्ठलदीक्षितः॰	मुहूर्तकल्पद्रुमः।तट्टीका मुहूर्तकल्पद्रुममञ्जरी।
१४	२१	विद्यामाधवः	
८२	५	विश्वनाथदैवज्ञः॰	सूर्यसिद्धान्तादिग्रन्थानामुदाहरणानि
१५	६	विष्णुगुप्तः	
१८	६	विष्णुचन्द्रः	
६४	१६	विष्णुदैवज्ञः*	सौरपक्षीयं करणम् ।
११७	२२	वीरेश्वरशर्मा	
४२	१८	वृद्धगर्गः	
५३	६	वैद्यनाथः	
१३२	२५	व्यङ्कटरामः	
१	७	व्यासः	
		श	
११०	१६	शङ्करः*	वैष्णवकरणम्।
३३	६	शतानन्दः॰	भास्वती ।
६९	१३	शिवदैवज्ञः	
८६	६	शिवदैवज्ञः*	बीजगणितम् ।

पृ॰	पं॰	गणकनामानि ।	तत्कृतग्रन्थनामानि ।
११७	२४	शिवदैवज्ञः*	तिथिपारिजातं ससारिणीकम् ।
११९	१४	शिवलालपाठकः*	वाल्मीकिरामायणस्य टीका । एतच्छोधिता विनयपत्रिका । सिद्धान्तमञ्जूषा ।
१३३	१५	श्यामाचरणः॰	
२२	२३	श्रीधरः॰	त्रिशतिका । न्यायकन्दली ?।
२६	२२	श्रीपतिः॰	श्रीपतिपद्धतिः। रत्नावली। रत्नसारः । धीकोटिः।पाटीगणितम् । बीजगणितम्। सिद्धान्तशेखरम् ।
८६	१६	श्रीलालः	
६	२७	श्रीसेनः	
१	१०	शौनकः	
		स	
१५	१०	सत्याचार्यः	
१५	१०	सिद्धसेनः	
१२२	२८	सिद्धेश्वरः	
१२३टि	३	सुब्बाजीरामचन्द्रः	विरोधप्रकाशकस्य खण्डनरूपो ग्रन्थः।
१	७	सूर्यः	

Digitized by Google

पृ॰	पं॰	गणकनामानि ।	तत्कृतग्रन्थनामानि ।
६५	२२	सूर्यदासः॰	भास्करीयलीलावतीबीजयोष्टीके । श्रीपतिपद्धतेर्गणितम् । बीजगणितम् । ताजिकम् । अच्युतार्थबोधकं काव्यम् । वेदान्ते बोधसुधाकरः ।
१४	१६	सूर्यभटः	
८१	१७	सूर्यसूरिः	
१२१	२६	सेवारामज्योतिषी॰	
६०	५	सोमदैवज्ञः॰	कल्पलता
७२	७	सोमभट्टः	

ह

पृ॰	पं॰	गणकनामानि ।	तत्कृतग्रन्थनामानि ।
१३२	२६	हरिकृष्णः	बृहज्ज्योतिषार्णवः ।
१४	१६	हलधरः	

Digitized by Google

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
काशिका पण्डितवरवामनादित्यविरचिता पूर्वार्धम् ५ रु॰ उत्तरार्धम् ५ रु॰ ..	१०)
जानकीराघवं नाम नाटकम् श्रीराजशेखरप्रणीतम्	३)
प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	११)
लघुकौमुदी वरदराजकृता	१)
लघुकौमुदी श्रीयुतहाक्सबालन्टैनाचार्य्येणाङ्गलदेशीयभाषायां कृता	८)
श्रीयुतपण्डितवरप्रेमचन्द्रशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः	६)
वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफाचार्य्येणाङ्गलदेशीयभाषायां कृतम्	४)
मानवधर्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	३।)
वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
श्रीतत्त्वार्थनिर्वचनम्	४)
वाक्यार्थचन्द्रिका परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूकशास्त्रि-संशोधिता	४)
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीरामभिश्र-शास्त्रिप्रणीतकान्तिमत्याख्यविषमपदटिप्पणीसमेतः	६॥)
तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम्	८।)
तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम्	४॥)
शास्त्रदीपिका	८।)
खण्डनखण्डखाद्यं सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्पणीसहितम्	७॥)
काव्यप्रदीपः काव्यप्रकाशस्य प्रतिरूपव्याख्या वाराणसेयसमाद्दप्रतिष्ठापितसंस्कृतपाठशालीयदर्शनशास्त्राध्यापकरामशास्त्रिभागवताचार्येण परिशोधितः	३॥)
वेदान्तसिद्धान्तमुक्तावली श्रीयुत आर्थर्वेनिस महाशयेनाङ्गलदेशीयभाषायामनूदिता	२॥)
चित्रमीमांसा अप्पयदीक्षितकृता, श्री तै॰ रामशास्त्रिणा संशोधिता	११)
तत्त्वबिन्दुः वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	≡)॥

Digitized by Google

CONTENTS.

Page.

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed: Dāmodara Śāstri, Professor, Sanskrit College, Benares. ... 443

ŚRĪBHĀSHYA WITH ŚRUTAPRAKĀŚIKĀ, Ed: Rāma Miśra Śāstri, Professor, Sanskrit College, Benares. ... 459

GAṆAKATARAṄGIṆĪ, OR LIVES OF HINDU ASTRONOMERS, with the title page, preface and index etc., by Mahāmahopādhyāya Sudhākara Dvivedī, Professor, Sanskrit College, Benares. ... 491

Digitized by Google

HARVARD COLLEGE
JAN 18 1893
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 10.] OCTOBER 1892. [Vol. XIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1892.

Price, Rs. 9-0 per annum.] [All rights reserved.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अस्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

LIBRARY

धेटोऽन्तर्भावात्तदर्थं च चङो ग्रहणं तस्य हि 'विभाषा धेट्श्व्यो' रिति चङ्, धा¹त्वन्तरार्थं सिचो ग्रहणं, यदि जनेर्दीपजनेति विहितस्य चिणो लुक् छन्दसि दृश्यते ततस्तस्यापि, तान्येतानि त्रीणि चत्वारि वा ग्रहणानि भवन्ति उत्सर्गे पुनः सर्वेषां स्थानिभूतस्य तस्यैवैकस्य ग्रहणम् । ननु च क्रियमाणेऽप्युत्सर्गे तान्येव त्रीणि ग्रहणानि भवन्ति 'च्लि लुङि' 'च्लेः सिच्' मन्त्रे घसादिसूत्रे च यदेतल्लेरिति, एवं तर्हि यदेतद्गातिस्थाघुपाभूभ्यः सिच इति च्लेरिति वक्ष्यामि तदेव च मन्त्रे घसादिसूत्रेऽप्यनुवर्तिष्यते तल्लाघवं भवति, यदि लेरित्युच्यते किं त्यवस्थायामेव लुकं करिष्यति उताहो आदेशेषु कृतेषु स्थानिवद्भावेन, यदि त्यवस्थायामेव लुक्, अगुः अस्थुः 'सिजभ्यस्तविदिभ्यश्च'-ति जुस् न प्राप्नोति, मा भूत्सिजित्येव 'मात' इत्येवं भविष्यति, तत्रापि सिज्ग्रहणमनुवर्त्तते, सिज्ग्रहणं निवर्तिष्यते, यदि निवर्तते अभूवन्नित्यत्रापि प्राप्नोति, केन, सिजभ्यस्तेति, नेत्याह, इदानीमेव ह्युक्तं त्यवस्थायामेव लुगिति तदेव 'मात' इत्यत्र ङित इत्येवानुवर्त्तते न सिच इति लङ्यपि त²थैव स्यात्, धेट श्च विभाषा धेट् 'लङः शाकटायनस्यैवे' ति नियमाद्विकल्पो भविष्यति, एवमपि मा हि गातां मा हि स्थाताम्, 'आदिः सिचोऽन्यतरस्या' मित्येव स्वरो न प्राप्नोति । अथादेशेषु कृतेषु ततो विभाषा धाधेङित्यत्रापि तथैव स्यात् धेटश्च 'विभाषा धेट्श्व्यो' रिति चङपि विकल्पितः, तत्र यथा सिचा लुगलुको तदा ऽधात् अधाताम् अधुः अधासीत् अधासिष्टां आधासिषुरिति सिद्धमिष्टं चङोऽपि लुगभावपक्षे अदधत् अदधताम्, अदधन्निति सिद्धं लुक्पक्षे तु प्रत्ययलक्षणेन द्विर्वचने ऽदधादित्यपि चतुर्थं रूपं प्राप्नोति, न चङो लुकि द्विर्वचनं, 'न लुमताङ्गस्ये' ति प्रतिषेधात्, बहुवचने तर्हि चङो लुकि अधानित्यनिष्टं रूपं प्राप्नोति, त्रेश³ष्यमेव चेष्यते अधुः, आधासिषुः, अदधन्निति ।

१ अन्यार्थमिति २ पाठः ।
२ तर्हि प्राप्नोत ति २ पाठः ।
३ रूप्यमिति २ पाठः ।

ननु च चङोपि लुक्यात इति जुस् भविष्यति यथा सिचः, नैतदस्ति। सिज्ग्रहणं तत्रानुवर्त्तते, निवर्तिष्यते सिज्ग्रहणं, यदि निवर्तते 'आत' इत्येतद्धेटश्चङो लुकि विध्यर्थत्वसम्भवान्नियमार्थं न स्यात्, ततश्चाभूव-न्नित्यत्र प्रत्ययलक्षणेन सिच इति जुस् प्राप्नोति, इदानीमेव ह्युक्तं कृतेष्वादेशेषु लुगिति, एवं तर्हि यदेतत्सिजभ्यस्तेति एतत् च्ल्यभ्यस्तेति वक्ष्यामि किं कृतं भवति लुङ्लुक्यपि च्ल्यभ्यस्तेति जुस् सिद्धो भवति, आत इत्यत्रापि सिज्ग्रहणानुवृत्तेर्नियमादभूवन्नित्यत्र जुसभावश्च सिद्धो भवति कृतेष्वादेशेषु लुगिति सिज्लक्षणः स्वरः सिद्धो भवति, यदि च्ल्यभ्यस्तेत्यु-च्यते च्ल्यङ्वङ्क्तु दोषः, अधुक्षन्, अवोचन् अपीपचन्नत्रापि जुस् प्राप्नोति तस्मात्सिजभ्यस्तेत्येव वक्तव्यम्, आत इत्यत्रापि सिज्ग्रहणमेवानुवर्त्तनीयं नियमो यथा स्याद्विधिर्मा भूदिति, ततश्च तदेव स्थितं बहुवचने ऽधा-न्निति प्राप्नोतीति, यदा च धेटश्चङो लुक् क्रियते तदा न केवलं बहुवचने सर्वेष्वेव वचनेषु सिज्लक्षणस्वराभावान्स्वरे चातुःशब्दप्रसङ्गः, तस्माद् गातिस्थाघुपेत्यत्र सिच इत्येव वक्तव्यं ततश्च तदेवास्थितं तान्येव त्रीणि ग्रहणानीति प्रत्युताक्रियमाणे उत्सर्गे मन्त्रे घसादिसूत्रे द्वयोरेव ग्रहणं, कथं, धेटो जनेश्च चङ्चिणौ विकल्पितौ तत्र यानि लुक उदाहरणानि सिच एव तानि भविष्यन्ति। कोन्वत्र विशेषः, अयमस्ति विशेषः सिचो लुक्या 'इटः सिचोन्यतरस्या' मित्यनेन स्वरेण भवितव्यं चङ्चिणोस्तु नेति तस्माद् द्वयोरपि पक्षयोस्त्रीणि ग्रहणानि नार्थश्चोत्सर्गेण तदुच्यते असति ह्युत्सर्गे मन्त्रे घसेत्यत्र येभ्यः सिचो लुक् क्रियते तेषां 'मादिः सिचोन्यत-रस्या' मित्येष स्वरः प्राप्नोति सति त्वस्मिंल्लेरिति तदवस्थायामेव लुग्वि-धानात् सिजभावात् यथायथं स्वरः सिद्धो भवति, तथा ऽऽकारान्ते सिचो लुकि क्रियमाणे सिजभ्यस्त आत इति जुस् प्राप्नोति लेस्तु लुक्यन्तभाव एव भवति तस्मादुत्सर्गः कर्त्तव्यः, तथा 'शल इगुपधादनिटः क्स' इत्यत्रानिट इति लेर्विशेषणं यथा स्याद् असति पुनश्च्ल्युत्सर्गे तस्यैव तद्विशेषणं भवति धातोः, न विद्यते यस्मात्परस्येडिति तत्र च लुङा-देशानां सार्वधातुकत्वात्सम्प्रतिपन्नमनिट्त्वमव्यभिचारादविशेषणमिति

Digitized by Google

प्रत्ययान्तरगतं तदाश्रयणीयं, न विद्यते प्रत्ययान्तरस्य यस्मात्परस्येडिति ततो गुहेर्न स्यात् अघुक्षदिति, विद्यते ह्यस्मात्परस्य गूहितेत्यादाविट्, स्वरत्यादिसूत्रेण विकल्पितोऽपि पाक्षिकेणेडभावेनानिडिति व्यपदिश्येत नित्यं क्सः प्राप्नोति ह्युत्सर्गे पुनरनिड् इति तस्यैव विशेषणं भवति स च कदा चिदनिट् कदा चित्सेट्, यदानिट् तदा क्सः, यदा सेट् तदा सिजिति सिद्धमिष्टम्। 'अघुक्षत् अग्रहीदिति'। 'तस्माच्च्ल्युत्सर्गः कर्तव्य इति'। स्थानित्वेन विधानं कर्तव्यमित्यर्थः॥

"च्लेः सिच्"॥ 'इकार उच्चारणार्थ इति'। न त्वनुबन्धः, यद्येवममंस्तेत्यत्र सिजन्तस्याङ्गस्यात्मनेपदं ङितमपेक्ष्यानिदितामिति नलोपः प्राप्नोति, ज्ञापकात्सिद्धं, यदयं 'हनः सिजि'ति हन्तेः परस्य सिचः कित्त्वं शास्ति तज्ज्ञापयति न सिजन्तस्योपधालोपो भवतीति, यथा चैतज्ज्ञापकं तथा तत्रैवोक्तमिति तत्रैवावधार्यम्। 'चकारः स्वरार्थ इति'। अन्तोदात्तार्थः। ननु सिचोऽनच्कत्वात् कथं चकारः स्वरार्थः, इटि कृते साच्को भवति, एवमपि प्रत्ययस्वरेण सिद्धं, न सिद्ध्यति, नाप्राप्ते स्वरान्तरे विधीयमानमागमानुदात्तत्वं प्रत्ययस्वरं बाधेत, एवं तर्हि च्लेश्चित्त्वात्स्थानिवद्भावाच्चित्स्वरो भविष्यति तत्राह। 'आगमानुदात्तत्वं हीति'। चित्स्वरमपि बाधेतेति'। स्थानिवद्भावकृतम्। ननु च यदि मा हि लावीदित्यत्रागमानुदात्तत्वं स्याच्च्लेश्चित्करणमनर्थकं स्यात्, एवं मन्यते, च्लेश्चकारो मन्त्रेघसादिसूत्रे सामान्यग्रहणे चरितार्थः, अन्यथा निरनुबन्धकत्वादस्यैव ग्रहणं स्याद् न लिटः, ततश्चाम इत्यत्र निरनुबन्धकस्य लेरसम्भवाल्लेरिति नानुवर्तेत ततश्च परत्वादन्तरङ्गत्वाच्च तिबादिषु कृतेषु पश्चाल्लुकि कारयामित्यस्य प्रत्ययलक्षणेन तिङन्तत्वाद् देवदत्तः कारयांचकारेति तस्य च निघातस्तस्माच्चानिघातः स्यात्तस्मादाम इत्यत्र लेरित्यनुवर्तनीयं, तस्य च तत्रानुवृत्तिः पूर्वत्र सामान्यग्रहणे सत्युपपद्यते, तस्माच्च्लेश्चकारस्य चरितार्थत्वात्स्थानिवद्भावात्प्राप्तं चित्स्वरमपि बाधेतेति सम्भावने लिङ्, सम्भाव्येत बाधनमित्यर्थः। अनुबन्धान्तरेणापि सामान्यग्रहणसिद्धे चकारानुरोधेन चित्स्वर एव भविष्यतीति शक्यते वक्तुमिति

भावः । 'स्पृशमृशेति' । स्पृश स्पर्शने, मृश आमर्शने, कृष विलेखने, इत्येतेभ्यः क्से प्राप्ते तृप प्रीणने दृप हर्षविमोचनयोः, आभ्यां पुषादित्वादङि प्राप्ते सिजपि पक्षे ऽभ्यनुज्ञायते । 'अस्पृक्षदिति' । व्रश्चादिषत्वे 'षढोः कस्सी' ति कत्वम् । 'अस्प्राक्षीदिति' । अनुदात्तस्य चर्दुपधस्य चेति पक्षे अमागमः, ऋकारस्य यण्, वदव्रजेत्यादिनाकारस्य वृद्धिः, अमभावपक्षे ऋकारस्यैव वृद्धिः, एवमुत्तरत्रापि ॥

"शल इगुपधादनिटः क्सः" ॥ 'शलन्तो यो धातुरिगुपध इति' । ननु क्सेर्गुणनिमित्तत्वादकृतएव क्से लावस्थायामेव गुणः प्राप्नोति ततश्चेगुपधादिति विशेषणं न प्रकल्प्यते, नैष दोषः । विशेषणसामर्थ्यात्प्रागेव गुणात् क्सो भविष्यति । ननु च कृतेपि गुणे भूतपूर्वगत्या विहितविशेषणाश्रयणेन वा क्सो भविष्यति, कित्करणमिदानीं किमर्थं स्यात् 'क्सस्याची' ति विशेषणार्थं, सस्याचीच्युच्यमाने धुनर्वदिहनिकमिकषिभ्यः से वत्सो वत्साः, अत्रापि प्राप्नोति उणादयो ऽव्युत्पन्नानि प्रातिपदिकानीत्यनर्थकत्वान्न भविष्यति, एवमपि वृक्षणादिषु तृणादिभ्यः से प्रसङ्गः, तृणान्यस्मिन्देशे सन्ति तृणसो तृणसा इति, नैतदेवं 'घोर्लोपो लेटि वे' ति प्रकरणे धातुप्रत्ययानां ग्रहणं, किं च लुग्वादुहदिहेत्यत्रापि 'क्सस्याची' त्यतः क्सस्येति वर्त्तते, तेन दुहादिषु यस्य सम्भवः पूर्वसूत्रेपि तस्यैव ग्रहणं भविष्यति तदेवं कित्करणसामर्थ्याद्गुणो न भवतीति स्थितम् । 'क्लेरनिट इति' । यद्यपि क्लेः सिजादिभिरादेशैर्भवितव्यमिति क्व चिदप्यश्रवणान्न सेट्त्वमनिट्[1]त्वं वा तथापि दुहल् इति स्थिते क्सस्यायं विषय इति सिचा न भाव्यं, क्सोपि तावन्न भवति यावदस्यानिट्त्वं न ज्ञातं तत्र लकारस्यैवेटः प्राप्तौ तन्निषेधात्सेट्त्वमनिट्त्वं च निरूप्यतइति विशेषणोपपत्तिः । 'अधुक्षदित्यादि' । 'दादेर्धातोर्घः,' एकाचो बशो भष् । 'अलिक्षदिति' । लिह आस्वादने 'हो ढः,' भिदिर् विदारणे, छिदिर् द्वैधीकरणे, कुष निष्कर्षे, मुष स्तेये ॥

---

१ अनिट्त्वं वेति नास्ति २ पुस्तके ।

"श्लिष आलिङ्गने" ॥ 'श्लिषेर्द्धातोरिति' । श्लिष आलिङ्गन इत्यस्य न तु श्रिषु श्लिषु प्रुषु प्लुषु दाह इत्यस्यालिङ्गने वृत्त्यभावाद् अनिट इति चाधिकारात्सानुबन्धकत्वाच्च, तत्र नियमार्थमेतदिति, ननु श्लिषिरयं पुषादिः, तथा च प्रत्युदाहरणे अङ् भवति ततश्च पुषादिपाठात्प्राप्तमङं बाधित्वा ऽऽलिङ्गने क्सो यथा स्यादित्येवं विधिसम्भवाद्विधेयमो नोपपद्यते, अस्तु[1] विधिः, एवमप्यालिङ्गने क्सो ऽन्यत्राङिति सिद्धमिष्टं, सत्यं, सिद्धं परस्मैपदे आत्मनेपदे त्वङभावादालिङ्गने ऽनालिङ्गने च पूर्वेण क्सः प्राप्नोति इष्यते च तत्राप्यालिङ्गने क्सोन्यत्र सिच्, तच्च नियमे सत्युपपद्यते स च नियमो नोपपद्यते विधेयभावात्, योगविभागात्सिद्धं, श्लिष इत्येको योगः श्लिषश्च क्सो भवति, किमर्थमिदं पुषाद्यङो बाधनार्थं, यथैव तर्ह्यङं बाधते तथा चिणमपि बाधेत समाश्लेषि कन्या देवदत्तेनेति, पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानिति तत्रालिङ्गने ऽनालिङ्गने च श्लिषः क्सो भवति, इदमिदानीं किमर्थं नियमार्थम्, आलिङ्गनएव नान्यत्र, योग विभागसामर्थ्याद्या च यावती च क्सस्य प्राप्तिः सा सर्वा नियम्यते न त्वनन्तरस्य विधिर्वा भवतीति श्लिष इति या प्राप्तिरङ्बाधनार्थो सेव, एवमपि नियमो नोपपद्यते, कथं, श्लिष इत्येतदङ्बाधमार्थं, न च तदत्यन्तायाङं बाधितुं प्रभवति पुषादिपाठसामर्थ्यात्, ततश्चाङ्क्सयोः सर्वत्र विकल्पे प्राप्ते द्वितीयो योग आलिङ्गने क्स एव नित्यं यथा स्यान्मा कदाचिदङ् भूदित्येवमर्थः स्या,त्किं तर्ह्युच्यते नियमो नोपपद्यतइति, ननु तत्र भवतापि मुखान्तरेण नियम एवोक्त एतावांस्तु विशेषो मया प्रत्ययनियम उक्त आलिङ्गनएव क्स इति त्वया पुनरर्थनियम आलिङ्गने क्स एवेति सर्वथा नियमाच मुच्यामहे तत्र लक्ष्यानुरोधाद्विधेयविभक्तिनिर्देशेन प्रधानत्वाद्वा प्रत्ययनियम एव भविष्यति ॥

"न दृशः" ॥ 'पूर्वेणेति' । शल इगुपधादित्यनेन । 'अङ्-

१ तर्हीत्यधिकं २ पुस्तके ।

सिचो भवत इति'। परस्मैपदेष्वन्य[1]त्र सिजेव। 'अद्दर्शदिति'। 'ऋदृशोऽङि गुणः'। 'अद्राक्षीदिति'। 'सृजिदृशोर्झल्यमकिति'। अथ 'क्लेः सिजि'त्यस्यानन्तरं क्सस्य बाधनार्थं सिजेव कस्मान्न विहितः, इरित्त्वसामर्थ्यादङपि भविष्यति, सत्यं, तत्रापि दृशश्चेति चकारः कर्त्तव्य इति ला[2]घवे नास्ति विशेषः॥

"णिश्रिद्रुस्रुभ्यः कर्तरि चङ्"॥ 'चकारो विशेषणार्थ इति'। 'चङी'त्यत्र अङीत्युच्यमाने 'अस्यतिवक्तिख्यातिभ्योऽङ्' 'षिद्भिदादिभ्योऽङ्' अत्रापि प्राप्नोति, यदि पुनरयं ङो विधीयते चकारः शक्यो कर्त्तुं चिन्त्यं प्रयोजनमस्य। 'अशिश्रियदित्यादि'। अत्र चङि धातुरङ्गं चङन्तं तु तिपि तत्र चङाश्रयस्य गुणस्य क्ङितीति प्रतिषेधः, चङन्तस्य तु तिपमपेक्ष्य लघूपधगुणः प्राप्नोति, न च तस्यापि चङमेव ङितमपेक्ष्य प्रतिषेधः, किं कारणं क्ङितीति निमित्तसप्तमी, नैष दोषः। अन्तरङ्गावियङुवङौ अन्तर्भूतचङपेक्षत्वात्, बहिरङ्गो गुणो बहिर्भूततिबपेक्षत्वात्। 'अकारयिषातामिति'। णयन्तात्कर्मणि लुङ् द्विवचनमाताम्। 'कमेरुपसङ्ख्यानमिति'। ननु कमेर्णिङ् विहितः, न च प्रकृत्यन्तरं कमिः सम्भवति णिङन्तात्तु सूत्रेणैव सिद्धं तत्राह। 'आयादय आर्द्धधातुके वेति'। 'यदा णिङ् नास्तीति'। 'णिङ्पक्षे सन्वद्भाव इति'। सन्वत्सूत्रे चङ्परो णिरित्याश्रयणात् तत्र हि सन्वल्लघुनि चङीति वक्तव्ये परग्रहणं बहुव्रीह्यर्थं तत्र णिरन्यपदार्थो ऽन्यस्यासम्भवात्॥

"विभाषा धेट्श्व्योः"॥ 'अङोऽप्यत्र विकल्प इति'। जॄस्तम्भ्वित्यादिना। 'अश्वदिति'। 'श्वयते रः'। 'अश्वयीदिति'। ह्म्यन्तेत्यादिना सिचि वृद्धेः प्रतिषेधाद्गुणः। 'अधिषातामिति'। कर्मणि द्विवचनमातां 'स्थाघ्वोरिच्चे'ति कित्त्वत्वे॥

"गुपेश्छन्दसि"॥ 'यस्मादायप्रत्ययो नास्ति तत्रायं विधिरिति'। सूत्रे केवलस्योच्चारणाद्गुप गोपने गुप व्याकुलत्व इत्यनयोस्तु

१ अन्यत्रेत्यत्रात्मनेपदेष्विति पा· २ पुस्तके।
२ लाघवं प्रतीति पा· २ पुस्तके।

Digitized by Google

ग्रहणं न भवति छन्दसि दृष्टानुविधानात्, दर्शने तु तयोरपि ग्रहणम् । 'अजूगुपतमिति' । गुप् रक्षणे तस्यस्थमिपामिति थसस्तं, 'तुजादीनां दीर्घोऽभ्यासस्य' । 'अगोप्तमिति' । ऊदित्त्वादिड्भावपक्षे 'झलो झली'ति सिचो लोपः । 'अगोपायिष्टमिति' । आयप्रत्ययान्तात्सिच् ॥

"नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः" ॥ 'अर्द गतौ याचने चेति' । अर्द हिंसायामित्यस्यापि ग्रहणं यदिच्छन्दसि दर्शनमस्ति । 'एतेभ्य इति' । तत्रोनयतिश्चुरादिः, ध्वनिरपि गर्वमानइति प्रागेतस्माददन्ता इत्यधिकारे चुरादिः पठितः, घटादौ चापि पठ्यते, एलयतिश्चुरादिः, अर्दयतिर्हेतुमण्ण्यन्तः । 'पूर्ववेति' । णिश्रीत्यादिना । 'ऊनयीरिति' । मध्यमपुरुषैकवचनं, पूर्ववद्वृद्धौ प्रतिषिद्धायां गुणः, 'न माङ्योग' इत्याडागमप्रतिषेधः, मा त्वायतो जरितुः काममूनयीः । इदं प्रतिसव्यस्य च्वषेर्वचनं, त्वायतस्त्वामिच्छतो जरितुस्तोतुर्मम काममभिलाषं मा ऊनयेयीः ऊनं माकार्षीरित्यर्थः । प्रायेण तु तिबन्तं पठ्यते कृताडागमं च तदन्यत्र द्रष्टव्यम् । 'औनिनरिति' । सिपि चङि अजादेर्द्वितीयस्येति नशब्दस्य द्विर्वचनं, प्रायेण तूदाहरणवदिदमपि तिबन्तं पठ्यते । 'ध्वनयीदिति' । तिप् 'न माङ्योग' इत्यडागमप्रतिषेधः । 'आर्द्दिदिति' । 'अजादेर्द्वितीयस्य' 'नन्द्राः संयोगादय' इति दशब्दस्य द्विर्वचनम् ॥

"अस्यतिवक्तिख्यातिभ्योऽङ्" ॥ 'ब्रूञादेशो वेति' । वाशब्दः समुच्चये, एवमुत्तरत्रापि । 'पुषादित्वादेव सिद्ध इति' । परस्मैपदेषु । 'पर्यास्थतेति' । उपसर्गादस्य यूह्योर्वावचनमित्यात्मनेपदे ऽङि अस्यते स्युक् । 'अवोचदिति' । 'वच उम्' । 'आख्यदिति' । 'आतो लोप इटि च' ॥

"लिपिसिचिह्वश्च" ॥ लिपिसिचिसहितो ह्वा इति मयूरव्यंसकादय इति समासः, समाहारद्वन्द्वे तु नपुंसकह्रस्वत्वं स्यादितरेतरयोगे बहुवचनं [1]ह्सावातो धातोरित्याकार लोपः । 'योगविभाग उत्तरार्थ

१ ह्वसीति २ पु॰ पाठः ।

इति'[२]। अस्यतिवक्तिख्यातिलिपिसिचिह्व इत्येकयोगे त्वस्यादीनामप्युत्तरत्रानुवृत्तिः स्यात् ततश्च तेभ्योप्यात्मनेपदे विकल्पः स्यात् ॥

"आत्मनेपदेष्वन्यतरस्याम्" ॥ 'अलिप्त, असिक्तेति'। 'झलो झली' ति सलोपः, 'लिङ्सिचावात्मनेपदेष्वि' ति कित्त्वाद्गुणाभावः ॥

"पुषादिद्युताद्य्लृदितः परस्मैपदेषु" ॥ एकेनैवादिशब्देन प्रत्येकं सम्बन्धादेव सिद्धे द्वयोरुपादानं चिन्त्यप्रयोजनम्। 'दिवाद्यन्तर्गणा इति'। पुष पुष्टौ शुष शोषणइत्येवमादिरागणसमाप्तेः, यत्तु मध्ये ष्णिह प्रीतौ वृदिति वृत्करणं तद्रधादिपरिसमाप्त्यर्थमेतच्चास्यतिग्रहणमात्मनेपदार्थं पुषादित्वादिति वार्त्तिककारवचनाद्विज्ञायते। 'न भ्वादिरिति'। पुष पुष्टौ श्रिषु श्लिषु प्रुषु प्लुषु दाहइत्येवमादिः, अस्य यदि ग्रहणं स्यात्पुषाद्यनन्तरं पाठाद् द्युतादीनां पृथग्ग्रहणं न कुर्यात्। 'क्र्याद्यन्तर्गणो वेति'। पुष पुष्टौ मुष स्तेयइत्येवमादिः, तत्र हि चत्वार एव पठ्यन्ते तत्र यदि ते जिघृक्षिताः स्युर्लृदित एव तान् कुर्यात् स्वरितेत्त्वादेरपि तेनैव सिद्धत्वात्। अथ पुषादयो द्युतादयश्च लृदित एव कस्मान्न पठिता अशक्यास्ते तथा पठितुम्, आदितामीदितामुदितामूदितां च तत्र भावात्, तद्यथा, पुषादिषु तावत् ञिष्विदा गात्रप्रक्षरणे, मदी हर्षे, शमु उपशमने, षिधू राद्धाविति, द्युतादिष्वपि श्वितावर्णे, ञिमिदा स्नेहने ञिदा स्नेहविमोचनयोः, स्रंसु ध्वंसु भ्रंसु अवस्रंसने, स्यन्दू प्रस्रवणे कृपू सामर्थ्ये इति। 'अद्युतदश्वितदिति'। 'द्युद्भ्यो लुङी' ति पक्षे परस्मैपदम्। 'अलोटिष्टेति'। लुट लुठ प्रतिघाते ॥

"सर्त्तिशास्त्यर्तिभ्यश्च" ॥ शासेरदादित्वाच्छपो लुक्, इत्वरत्र निपातनात्। 'शासु अनुशिष्टाविति'। सर्त्त्यर्त्तिभ्यां परस्मैपदिभ्यां साहचर्यादस्यैव ग्रहणं न त्वाङः शासु इच्छायामित्यात्मनेपदिन इति दर्शयति। 'ऋ गताविति'। ऋ गतिप्रापणयोरिति भौवादिकः, ऋ सृ गताविति जौहोत्यादिकः, द्वयोरप्यत्र निर्देश इति केचित्, वयं तु जौहोत्यादिकयोरेवार्त्ति-

२ मुद्रितमूलपुस्तके तु पृथग्योग उत्तरार्थ इति पाठः।

Digitized by Google

सत्त्यार्यऽग्रहणं मन्यामहे । 'असरदिति' । 'ऋदृशो ऽङि गुणः' । 'अशि-षदिति' । 'शास इदङ्हलोः,' । 'शासिवसिघसीनाञ्चे' ति षत्वम् । 'पृथग्योगकरणमात्मनेपदार्थमिति' । अन्यथा पुषादिद्युदित्सत्तिशास्त्य-त्तिभ्य इत्येकमेव योगं कुर्यात्, एवं हि पृथग्विभक्तिनिर्देशश्चका-रश्च न कर्त्तव्यो भवति । 'समरन्तेति' । समो गम्यृच्छीत्यात्मनेपदं 'बहुलं छन्दस्यमाङ्योगेपी' त्याड्भावः, छान्दसत्वादस्य प्रयोगस्य, समन्यवो यत्समरन्त सेनाः, सङ्कल्पा अस्य समरन्त, तथा भट्टि-काव्ये समारन्त ममाभीष्टाः सङ्कल्पास्त्वय्युपागतइति, कश्चिदाह भाष्यविरुद्धमिदं भाष्यकारेण हि समो गम्यृच्छीत्यत्र मासमृषातां मासमृषतेति आत्मनेपदे सिजुदाहृत इति । अत्राहुः । शासिसा-हचर्यादर्त्तिसर्त्त्योरविद्यमानशपोर्जौहोत्यादिकयोरिह ग्रहणं समो गम्यृ-च्छीत्यत्र तु भौवादिकस्याप्यर्त्तेर्ग्रहणं, तत्र भौवादिकेर्त्तौ सिच उदा-हरणमविरुद्धमिति ॥

"इरितो वा" ॥ 'अभितेति' । स्वरितेत्वादात्मनेपदम् ॥

"जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च" ॥ 'अस्तम्भदिति' । अनिदितामित्युपधालोपः । 'अन्य[१]तरोपादानेपि रूपत्रयं सिद्ध्यतीति' । कथं, यदि तावद् ग्लुचिरुपादीयते तस्मादङ्सिचोरग्लुचत् अग्लोचीदि-त्येतद् द्वयं सिद्ध्यति ग्लुञ्चेस्तु सिचि तृतीयमग्लुञ्चीदिति, अथ ग्लुञ्चिरुपा-दीयते तस्याग्लुचत् अग्लुञ्चीदिति रूपद्वयं सिद्ध्यति ग्लुचेस्तु सिचि तृतीय-मग्लोचीदिति, किमर्थं तर्ह्युभयोरुपादानमित्यत्राह । 'अर्थभेदास्त्विति' । 'के चिदित्यादि' । इदं भाष्यविरुद्धं, भाष्यकारो हि अनेकार्थत्वाद्धातूनाम-र्थभेदो न प्रयोजक उभयोपादानस्येत्यन्यतरोपादानं प्रत्याख्यातवान् ॥

"कमृदृरुहिभ्यश्छन्दसि" ॥ 'अमरदिति' । व्यत्ययेन परस्मै-पदम् ॥

"चिण् ते पदः" ॥ 'सामर्थ्यादिति' । धातोरात्मनेपदित्वात्पर-स्मैपदबहुवचनस्य स्थाने यस्तशब्दस्तस्य स्थमिपामितिविहितस्तस्यास्मि-

१ मुद्रितमूलपुस्तके एकतरोपादानेनेति पाठः ।

न्विषये ऽसम्भवः। 'सामर्थ्यादुदपादीति'। चिणो लुक्। 'उदयत्सतेति'। 'आत्मनेपदेष्वनत' इत्यदादेशः, इह वेति निवृत्तमुत्तरत्रान्यतरस्यां-ग्रहणात् ॥

"दीपजनबुधपूरितायिप्यायिभ्यो ऽन्यतरस्याम्" ॥ 'जनी प्रादुर्भावे, बुध अवगमने इति'। जन जनने बुध बोधन इत्येतयोस्तु परस्मैपदिनोरिह ग्रहणं न भवति दीप्यादिभिरात्मनेपदिभिः साहचर्यात्, तेन परस्मैपदिभ्यां कर्मव्यतिहारे आत्मनेपदैकवचनेपि तशब्दे चिण् न भवति, यदि परस्मैपदिनोरिह ग्रहणं स्यादात्मनेपदिनोर्न स्यात् सानुबन्धकत्वात् कर्त्तरि चायं विकल्पः, भावकर्मणोस्तु 'चिण् भाव कर्मणो'-रिति नित्यमेव चिण् भवति, परत्वादिह कर्त्तरीत्यनुवृत्तेर्वा ॥

"अचः कर्मकर्त्तरि" ॥ 'कर्मकर्त्तरीति'। यत्कर्म भूत्वा कर्त्ता भवति तत्रेत्यर्थः। 'प्राप्तविभाषेयमिति'। कर्मवत्कर्मणेत्यतिदेशेन नित्यं चिणः प्राप्तेः। 'अकारि कटो देवदत्तेनेति'। अत्र शुद्धे कर्मणि 'चिण् भावकर्मणो'रिति नित्यमेव चिण् भवति। नन्विह कर्त्तरीत्यनुवर्त्तिष्यते, यद्येवं शुद्धे कर्त्तरि स्यात्, कर्मणीति वाक्यभेदेन कर्त्ता विशेषयिष्यते कर्मणि कर्त्तरीति, नैतदेवं शक्यते लब्धुं, कर्मणीत्युच्यमाने कर्त्तुर्निवृत्तिरेव स्यात् चकारेऽपि क्रियमाणे कर्मणि च भवति कर्त्तरि च भवतीत्यधिकरणयोरेव समुच्चयः स्याद् न सामानाधिकरण्ये प्रमाणमस्ति ॥

"दुहश्च" ॥ अप्राप्तविभाषेयं, 'न दुहस्नुनमां यक् चिणा' विति चिणः प्रतिषेधात्। तत्र दुहिग्रहणे यक्प्रतिषेधार्थं चिण्ग्रहणं त्वाग्र्यर्थम्। 'अदुग्धेति'। 'क्सस्याचि' लुग्वा दुहदिहेति क्सस्य लुक् ॥

"न रुधः" ॥ 'रुधिर् आवरण इति'। अनो रुध काम इत्यस्य तु ग्रहणं न भवति कर्तृस्थभावकत्वेन कर्मकर्त्तुरभावात् ॥

"तपोऽनुतापे च" ॥ 'कर्मकर्त्तरीति'। 'तपस्तपःकर्मकस्यैवे ति'। 'यत्र कर्मवद्भावो विहितस्तत्र भावकर्मणोरपीति'। अपिशब्दात्कर्मवत्कर्मणेति यत्र कर्मवद्भावोऽतिदिष्टस्तत्रापि भवति। 'अतप्त तपस्तापस इति'। अस्यार्थं 'तपस्तपःकर्मकस्यैवे' त्यत्र वृत्तिकार एव वक्ष्यति।

Digitized by Google

'अन्ववातप्त पापेनेति' । पूर्वं यत्पापं कर्म कृतं तेन पश्चात्तप्तो ऽभ्याहत इत्यर्थः । 'शुद्धे कर्मणि लकारः,' 'पापेनेति' । कर्त्तरि तृतीया कर्माविवक्षायान्तु शोकार्थे वा तपो भावे लकारः, पापेनेति हेतौ तृतीया, यदाभ्याहननार्थस्य तपेः कर्मस्थभावस्य कर्मकर्त्ता विवक्ष्यते तदा कर्मवत्कर्मणेत्यतिदेशादात्मनेपदं तदापि हेतौ तृतीया ॥

"चिण् भावकर्मणोः" ॥ 'चिण्ग्रहणं विस्पष्टार्थमिति' । 'चिण् ते पद' इत्यतस्तेशब्दवदनुवृत्तेः, यत्तु दीपजनेत्यादावन्यतरस्याङ्ग्रहणं तत्र रुधइति तत्प्रतिषेधविधावेव निवृत्तमन्यथा प्रतिषेधविधानमनर्थकं स्यात्, न च प्रतिषेधस्यानुवृत्तिशङ्का, प्राप्तिपूर्वको हि प्रतिषेधः, न च भावकर्मणोः केन चिच्चिणः प्राप्तिरस्ति ॥

"सार्वधातुके यक्" ॥ इहाशिषि लिङि लिटि चान्तरेणापि विकरणं सर्वेष्वेव धातुषु तिङामेव सद्भावे भावकर्मकर्त्तारस्त्रयोपि प्रतीयन्ते, भविषीष्ट त्वया, कृषीष्ट घटः, भूयात् क्रियात् बभूवे चक्रे घटः बभूव चकारेति । अस्तिजुहोत्यादौ कर्त्ता ॥

क्व चित्तिङामभावेपि प्रतीयन्ते त्रयोप्यमी ।
अशाय्यकारि गच्छेति चिणः सन्निधिमात्रतः ॥
अधोगविभरित्यादौ धातुमात्रेपि कर्तृधीः, ।
तथा व्यतिसइत्यादौ धात्वभावेपि कर्तृधीः, ॥

एवं स्थिते भूयो विषयाभ्यामन्वयव्यतिरेकाभ्यां शब्दार्थावगमो व्यभिचारभूमिषु तु तस्मिंस्तस्मिन्विषये तस्यतस्य शब्दस्य स स महिमेति कल्पयितुमुचितं न पुनः क्व चिद्व्यभिचारदर्शनेन सर्वत्रानास्वासः, तादृशौ चान्वयव्यतिरेकौ तिङामेवेति तेषामेव भावकर्मकर्त्तारो वाच्याः, सूत्रकारोप्याह 'लः कर्मणि च भावे चाकर्मकेभ्य' इति, लादेशाश्च तिङः, ततोपि तेषामेव तेर्था इति मन्यमान आह । 'भावकर्मवाचिनि सार्वधातुके परत इति' । उत्तरसूत्रे च कर्तृवाचिनि सार्वधातुके परत इति । 'शय्यतइति' । 'अयङ् यि क्ङिति' अथ यदा द्वौ कर्त्तारौ बहवो वा तदा

Digitized by Google

कथमास्यते भवद्भ्याम् । आस्यते भवद्भिः, द्विवचनबहुवचने कस्मान्न भवतः भावे भेदाभावात् धात्वर्थो हि भावः ॥

कर्तृभेदेपि नावश्यं धात्वर्थो भिद्यते यतः ।
एकामेव क्रियाव्यक्तिं बहुसूत्पादयन्त्स्वपि ॥

दृष्टमेते पचन्तीति कर्मभेदेऽपि तादृशः ।
पश्यैकस्यां क्रियाव्यक्तौ पच्यन्ते तण्डुला इति ॥

न कालभेदे शब्दैक्यमास्यासिष्यतमास्यते ।
पाकौ पाका इति त्वत्र शब्दैक्यादेकशेषता ॥

अतश्च ।

निवृत्तभेदा सर्वैव क्रिया ऽऽख्यातैरभिधीयते ।
अतेरशक्या भेदानां प्रविभागप्रकल्पना ॥

तदेवमाख्यातेन भावस्वरूपगतो भेदः प्रतीयतइति द्विवचनबहुवचनाभावः, यत्र तु स्वरूपगत एव भेदस्तत्र भवत्येव यथा उष्ट्रासिका आस्यन्ते हतशायिकाः शय्यन्ते इति, उष्ट्राणां ह्यासिकाः स्वत एव विलक्षणा हताश्च नानाप्रकारं शेरते उत्ताना अवताना विकीर्णकेशा विस्रस्तवस्त्रा इति तत्सामान्यादख्यातवाच्यस्यापि भावस्य स्वरूपगतभेदावभासाद् बहुवचनम्, इवशब्दप्रयोगमन्तरेणापि चेवार्थावगतिर्भवति, तदयमर्थः, यादृशानि हतानामनेकप्रकाराणि शयनानि तादृशानि देवदत्तादिभिः क्रियन्तइति । केचित्त्वत्र कर्मणि लकारमिच्छन्ति उष्ट्रासिकाहतशायिकालक्षणस्य भावस्य कालभावाध्वगन्तव्या इति कर्मत्वात्, यथा गोदोहः सुप्यतइति । 'ककारो गुणवृद्धिप्रतिषेधार्थ इति । मृज्यतइत्यत्र वृद्धिप्रतिषेधः । 'यग्विधान इति' । ननु च कर्मवत्कर्मणा तुल्यक्रिय इत्यतिदेशादेव यक् सिद्धः किमुपसङ्ख्यानेन तत्राह । 'विप्रतिषेधाद्धीति' । यदा कर्मवत्कर्मणेत्ययं शास्त्रातिदेशस्तदा तेनतेन शास्त्रेण कर्मकार्याणि भवन्ति तत्र कर्मणि यग्भवतीत्यस्यावकाशः शुद्धं कर्म पच्यते ओदन इति, कर्तरि शबित्यस्यावकाशः शुद्धः कर्ता भवति पचतीति, कर्मकर्त्तर्युभयप्रसङ्गे परत्वाच्छबेव स्यादित्यर्थः, ततश्चुप-

सङ्ख्यानं कर्तव्यं न कर्तव्यं 'न दुहस्नुनमां यक्चिणा' विति यक्प्रतिषेधो ज्ञापयति भवति कर्मकर्तरि यगिति, कार्यातिदेशे तु तस्मिंस्तेनैव सूत्रेण भवन्यगेव परो भवति ॥

"कर्तरि शप्" ॥ 'पकारः स्वरार्थ इति' । उपलक्षणमेतत्, ह्रिस्वप्रतिषेधार्थः, 'शप्श्यनोर्नित्य' मिति विशेषणार्थश्च । 'शकारः सार्वधातुकार्थ इति' । सञ्ज्ञापरोऽत्र सार्वधातुकशब्दो न सञ्ज्ञिपरः, सार्वधातुकसञ्ज्ञार्थ इत्यर्थः । कर्तृग्रहणस्य कर्मवत्कर्मणेत्यत्रोपयोगः, इह तु सार्वधातुके शब्भवति श्यन्भवतीति सामान्यविधानेपि भावकर्मणोर्यगपवाद इति कर्तर्येवात्र शबादयो भविष्यन्ति ॥

"दिवादिभ्यः श्यन्" ॥ 'मृग अन्वेषणइति' । चुरादावदन्तेष्वात्मनेपदी पठ्यते, तत्र मृगयतइति भवितव्यं दिवादिष्वपि पाठान्मृग्यतीति साधुः, कण्ड्वादिषु वा मृगशब्दो द्रष्टव्यः ॥

"वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः" ॥ उभयत्र विभाषेयम् । अनवस्थानार्था भ्रमिः क्लमित्रसी च दिवादयः, त्रुटिस्तौदादिकः, इतरे भौवादिकाः । 'भ्राम्यतीति' । 'शमामष्टानां दीर्घः श्यनी' ति दीर्घः, भौवादिकस्य तु न भवति अशमादित्वात्, क्रमेः 'क्रमः परस्मैपदेष्वि' ति दीर्घः क्लमेस्तु 'ष्ठिवुक्लम्वाचमां शिती' ति त्रसेर्दैवादिपाठे चिन्त्यं प्रयोजनं, क्लमेस्तु पुषादिकार्यार्थः ॥

"यसोनुपसर्गात्" ॥ 'दैवादिक इति' । दिवादिपाठोस्य सोपसर्गार्थः । 'अनुपसर्गादिति किमिति' । सम्यसश्चेत्येतत्सम एवोपसर्गान्नान्यस्मादिति नियमार्थं भविष्यतीति भावः । 'आयस्यति प्रयस्यतीति' । तुल्यजातीयानां हलन्तानामेव व्यावृत्तिः स्यादिति मन्यते ॥

"सम्यसश्च" ॥ इह सम इत्येवास्तु यस इत्यनुवर्तिष्यते, षमष्टम वैक्लव्यइत्यस्य ग्रहणशङ्कानिवृत्त्यर्थं तु सम्यस इत्युक्तम्, एवं तर्हि समो यसः, अनुपसर्गाच्चेत्यस्तु ॥

"स्वादिभ्यः श्नुः" 'सिनोतीति' । षिञ् बन्धने क्र्यादिपाठात्सिनातीत्यपि भवति ॥

Digitized by Google

"तनूकरणे तक्षः" ॥ 'अनेकार्थत्वादिति' । अत एव विशेषणोपादानादनेकार्थत्वं विज्ञायते, प्रदर्शनार्थस्तु गणे धातूनामर्थनिर्देशः । 'सन्तक्षति वाग्भिरिति' । निर्भर्त्सयतीत्यर्थः ॥

"तुदादिभ्यः शः" ॥ 'तुदतीति' । तुद्-ति इति स्थिते परत्वात्प्राप्तमपि गुणं नित्यः शो बाधते ॥

"रुधादिभ्यः श्नम्" ॥ 'श्नम्प्रत्ययो भवतीति' । यद्यपि प्रत्ययसंज्ञायां प्रकृत्युपपदोपाधिविकारागमान्वर्जयित्वेत्युक्तं तथापि विधीयमानत्वेन प्राधान्यात् शबादिवदर्थवत्त्वाच्छ्नमः प्रत्ययसंज्ञा भवतीति भावः, तेन शकारस्य प्रत्ययादित्वादित्संज्ञा । 'शपोऽपवाद इति' । देशभेदेनोभयोः सत्यपि सम्भवे नाप्राप्ते तस्मिन्नारभ्यमाणत्वादेकार्थत्वाच्चापवादत्वं विकरणा हि सार्वधातुकस्य धातोश्चार्थाभिधाने सहायतां प्रतिपद्यन्ते । 'शकारः श्नाल्लोप इति विशेषणार्थ इति' । अथार्धधातुकसंज्ञा माभूदित्येवमर्थः कस्मान्न भवति, सत्यां हि तस्यामनक्ति भनक्ति 'अतो लोपः' स्यात् रुणद्धि भिनत्ति गुणः स्यात्, छिनत्ति तृणेढि इडागमः स्यात्, 'नेड्वशि कृती'त्येतदपि नास्ति अकृत्त्वात्, सर्वमेतत् श्नमः पूर्वभागस्यानङ्गत्वान्न भविष्यति, कथमङ्गत्वं, यस्मात्प्रत्ययविधिरिति, कोऽर्थः प्रत्यये विधीयमाने यत्पञ्चम्या निर्दिष्टं धातोः प्रातिपदिकादिति तदादि तस्मिन्प्रत्यये परतोऽङ्गमिति यच्चात्र पञ्चम्या निर्दिष्टं रुधादिभ्यो धातुभ्य इति न तस्मात्प्रत्ययः, यस्माच्च प्रत्ययः पूर्वभागात्स न तस्मिन्विधीयमाने पञ्चम्या निर्दिष्टस्तस्मादङ्गादिति विशेषणार्थ एव शकारः, नाल्लोप इत्युच्यमाने 'यजयाचयतविच्छप्रच्छरक्षो नङ्' यज्ञानां यत्नानामत्रापि प्राप्नोति, नामीति दीर्घत्वे कृते नादितिव्यपदेशाभावान्न भविष्यति, परत्वाल्लोप एव प्राप्नोति, यत्तु 'अतो दीर्घो यञि' 'सुपि चे'ति दीर्घत्वं न च तदत्र प्रवर्तते किं कारणं सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति, इहापि तर्हि न स्याद्वृतायेति, 'कष्टाय क्रमणे' इतिनिर्देशाद्भविष्यति, इहापि तर्हि यत्नानामिति तस्मादेव निर्देशात्सामान्यापेक्षया ज्ञापनाद्दीर्घो भविष्यति, एवमपि तस्य पूर्वस्माद्विधौ स्थानिवत्त्वान्न-

Digitized by Google

शब्द एवायमिति नलोपः स्यादेव तस्माद्विशेषणार्थः शकारः कर्त्तव्यः । अथ क्रियमाणेपि शकारे इह कस्मान्न भवति विश्नानां प्रश्नानामिति लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणम् ॥

"तनादिकृञ्भ्य उः"॥'तनोतीत्यादिः'। तनु विस्तारे, षणु दाने, क्षणु हिंसायाम् । 'अन्यत्तनादि कार्यमिति' । तनादिकार्यापेक्षो नियम इत्यर्थः । व्यावर्त्त्यं दर्शयति । 'तनादिभ्यस्तथासो'रिति विभाषा सिचो लुङ् न भवतीति' । नन्वस्तु लुग्विकल्पः, तदभावे 'ह्रस्वादङ्गा-दि'ति लोपो भविष्यति, न च विकल्पेन बाधः विकल्पं प्रति नित्यस्या-सिद्धत्वात्, न च तनादिपाठसामर्थ्यादपवादो वचनप्रामाण्यादिति न्यायेनासिद्धत्वबाधाद्विकल्पेन नित्यस्य बाधः, तनादिपाठस्य विकरण-विधौ चरितार्थत्वात्, विकल्पोप्यतत,अतथा इत्यादौ चरितार्थः प्रत्युत क्रियमाणे कृञ्ग्रहणे तनादिषु कृञःपाठस्यानन्यार्थत्वाद्येन नाप्राप्तिन्या-येन विकल्पो नित्यविधिं बाधेत, इदं हि कृञ्ग्रहणविधौ तनादिषु पाठ-श्चरितार्थो मा विज्ञायीत्येवमर्थमेव स्यादिति कृञ्ग्रहणप्रत्याख्यानमेव न्याय्यं मन्यामहे ॥

"धिन्विकृण्व्योर च" 'अतो लोपस्य स्थानिवद्भावाद्गुणो न भवतीति' । तेन प्रक्रियालाघवाय धिन्विकृण्व्योर्लोप एव नोक्त इति भावः, लोपे हि गुणस्स्यात् । न च 'न धातुलोप आर्द्धधातुक'इति निषेधः, प्रत्ययसन्नियोगशिष्टत्वेन लोपस्यानार्द्धधातुकनिमित्तत्वात् । ननु नुमनुषक्तयोर्ग्रहणं किमर्थं नुमि कृते ऽत्वं यथा स्याद्, धिविकृव्योरित्युच्य-माने ऽत्वे कृते ऽत एव परो नुम् प्रसज्येत, अत्वं ह्यन्तरङ्गं प्रत्ययसन्नियो-गेन विधानात् नुमागमस्तु बहिरङ्ग, उत्पन्ने प्रत्ययेऽङ्गस्य सतो विधानात्, ननु चास्याङ्गस्य नुम् लावस्थायामेव भविष्यति तिबादीनामन्तरङ्गत्वात्, तिबादिष्वेव तर्हि भविष्यति, न, नित्येनात्वेन बाधनात्, नुमागमस्तु शब्दान्तरप्राप्तेरनित्यः, अन्तरङ्गस्तर्हि नुमागमस्तद्विधौ धातुग्रहणात् तर्हि धातुसंज्ञाप्रवृत्तिकालएव नुम् यथा स्यादित्येवमर्थम्, अन्यस्योदि-तोसम्भवात्, कथमसम्भवो यदिदानीमेवोक्तन्तासेरिदित्करणमनुनासिक-

Digitized by Google

लोपप्रतिषेधार्थमिति, नन्वत्रापि पक्षे नुम्विधावुपदेशिवद्वचनं प्रत्यय-सिद्ध्यर्थमिति वचनादुपदेश एव नुम् भविष्यति, एवन्तर्ह्यन्तरङ्गत्वादेव प्राप्तस्य नुमोऽयं निर्देशः ॥

"स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च" ॥ 'उदित्त्वप्रतिज्ञा-नादिति'। एषां ह्युकारोऽनुनासिक इत्संज्ञकः प्रतिज्ञायते तस्य प्रयो-जन 'उदितो वे'ति क्त्वाप्रत्यये इड्विकल्पः, यदि चैतद्विकरणविषया एवैते स्युस्तत्रोपपद्यते, तस्मादुदित्त्वेन प्रतिज्ञानात्सर्वार्थत्वं विज्ञायते सर्वे प्रत्ययाः प्रयोजनमेषामित्यर्थः, सर्वप्रत्ययशेषत्वमिति वा ॥

"हलः श्नः शानज्झौ" ॥ 'पुषाण मुषाणेति'। लोट् सिप् तस्य हिः, 'क्र्यादिभ्यः श्ना' तस्य शानच्, चकारः स्वरार्थः, अत्र सन्निपात-परिभाषया अनित्यत्वाद् 'तो हे' रिति हेर्लुक्, ननु च श्नाप्रत्ययस्य प्रकृत-त्वात्तस्यैव शानजादेशो भविष्यति नार्थः श्न इति स्थानिनिर्देशेनात आह। 'श्न इति'। 'स्थानीत्यादि'। आदेश इत्येष संप्रत्ययोऽवगमो यथा स्यादित्येवमर्थः। असति तु तस्मिन् किं स्यादित्याह। 'प्रत्यया-न्तरमिति'। अस्तु प्रत्ययान्तरं क्र्यादिभ्य इत्यनुवृत्तेस्तेभ्य एव हलन्तेभ्यो भविष्यतीति न कश्चिद्दोष इत्यत आह। 'सर्वविषयमिति'। अक्र्यादि-विहितविषयमपीत्यर्थः, क्र्याद्यनुवृत्तिर्दुर्ज्ञानेति मन्यते, शानचः शित्करण-ञ्चिन्त्यप्रयोजनं, स्थानिवद्भावेनैव सिद्धेः। इह ञिमिदा स्नेहने दिवादिः, व्यत्ययेन छन्दसि श्ना, तस्य शानजादेशः, मिदान, मिदेर्गुण इति प्रति-षेधविषये विधीयमानो गुणो न भवति पुनः शित्करणेन 'सार्वधातुक-मपिदि' त्यस्यापि पुनः प्रवृत्तेरिति केचित्, नेति वयं, यथैव व्यत्ययेन श्ना भवति एवं गुणविषये इकारो भविष्यति ॥

"छन्दसि शायजपि" ॥ 'गृभायेति'। ग्रहिज्यादिसूत्रेण संप्र-सारणं, 'हृग्रहोर्भश्छन्दसी' ति हकारस्य भकारः। 'बधानेति'। बन्ध बन्धने, अनिदितामिति नलोपः ॥

"व्यत्ययो बहुलम्" ॥ 'यथायथमिति'। स्वस्मिन्स्वस्मि-न्विषय इत्यर्थः। 'व्यतिगमनं व्यत्यय इति'। व्यतिपूर्वादिणो भावे

Digitized by Google

जगदुपादानत्वं चेति समस्तप्रपञ्चनिर्माणानुगुणमचेतनस्वरूपं तस्य चाचेतनत्वादेव तदधिष्ठितत्वं च सिद्ध्यतीत्यर्थः । कारणत्वश्रुतेरन्यथाऽनुपपत्त्युपयोगिनीं व्याप्तिं शिक्षयति "एवमेव ही"ति, अत्यन्तभेदः–शरीरतयाऽऽत्मनिष्ठत्वमप्यसहमानो भेदः ॥ यद्वा तर्कमपि पृथक् साधनत्वेनाह "एव-"मेव ही"ति, पूर्वोक्तश्रुत्यर्थोपपत्त्युपपादकत्वे हि–शब्दस्वरसः । ननु यत्र निमित्तोपादानयोरुभयोरप्यपेक्षा तत्र तयोर्भवतु भेदः यथा वृश्चिकोवृश्चिकोत्पादने गोमयानपेक्षः, यथा च स्वर्गे साध्ये ज्योतिष्टोमो दर्शपूर्णमासनिरपेक्षः, एवं निमित्तमात्रेण कार्यं सिध्यतीति चेत् किं प्रधानकारणत्वाश्रयणेनेत्यत्राह "कार्य्यनिष्पत्तिश्चे"ति, एवमेव हीत्यादिभाष्यं यदा पृथक्साधनत्वेन तर्कप्रतिपादकं तदानीमचेतनस्येत्यादिपदैर्हेतवोऽभिप्रेताः स्युः ईश्वरो न द्रव्यं प्रत्युपादानं चेतनत्वात् जीववत्, विमतम् उपादानं स्वकार्य्यनिमित्ताद् भिन्नम् उपादानत्वात्, मृत्पिण्डवत् विमतं कार्य्यम् अनेककारकसापेक्षं कार्य्यत्वात् पटवदिति प्रयोगः "एकमेवाद्वितीयं ब्रह्मवनं ब्रह्म स वृक्ष आसीदि"त्यादिश्रुतिबलान्निमित्तोपादानैक्यमभ्युपगन्तव्यमित्यत्राह "एवं निमित्तोपादानयो"रिति, एवमिति पूर्वोक्तश्रुतिश्रुत्यर्थोपपत्त्यानुगुण्येन तर्कसहचरितश्रुतिश्रुत्यर्थोपपत्तीनां प्रबलत्वात्केवलश्रुतिमात्रं प्रतीयमानमपि स्वार्थं यूपादित्यैक्यमिव न प्रतिपादयितुं शक्नोतीत्यर्थः ।

सू० एकमेव ब्रह्म उपादानं निमित्तञ्च प्रतिपादयितुं न प्रभवन्ति वेदान्तवाक्यानि, अतो ब्रह्म निमित्तकारणमेव नोपादानम्, उपादानं तु तदधिष्ठितं प्रधानमेवेत्येवं प्राप्तेऽभिधीयते "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादि"ति, प्रकृतिश्च=उपादानञ्च न निमित्तकारणमात्रं ब्रह्म उपादानकारणं च ब्रह्मैवेत्यर्थः, कुतः प्रतिज्ञादृष्टान्तानुपरोधात्, एवमेव हि प्रतिज्ञादृष्टान्तौ नोपरुध्येते, प्रतिज्ञातावत् "स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भव-

त्यमतम्मतमविज्ञातं विज्ञातमि”त्येकविज्ञानेन सर्वविज्ञानविषया, दृष्टान्तश्च यथा “सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् यथा सोम्यैकेन लोहमणिना यथा सौम्य एकेन नखनिकृन्तनेने”ति कारणविज्ञानात्कार्य्यविज्ञानविषयः, यदि निमित्तकारणमेव जगतो ब्रह्म तदा तद्विज्ञानाच्च समस्तं जगद्विज्ञातं स्यात्, न हि कुलालादिविज्ञाने घटादि विज्ञायते, अतः प्रतिज्ञादृष्टान्तयोर्बाध एव ब्रह्मण एवोपादानत्वे उपादानभूतमृत्पिण्डलोहमणिनखनिकृन्तन विज्ञानेन घटमणिककटकमुकुटवासीपरश्वधादितत्कार्य्यविज्ञानवत् निखिलजगदेककारणभूते ब्रह्मणि विज्ञाते तत्कार्य्यं जगद्विज्ञातमेव स्यात् ।

टी० ॥ एकमेव ब्रह्मोपादानं निमित्तं चेति परिणामित्वापरिणामित्वयोश्चेतनत्वाचेतनत्वयोः प्रेर्य्यत्वप्रेरकत्वयोश्च एकस्मिन् व्याहतत्वाच्चायोग्यं निमित्तोपादानैक्यं न वेदान्ताः प्रतिपादयितुं शक्नुवन्तीत्यभिप्रायः नोपादानं—नोपादानमपीत्यर्थः, न हि निमित्तं वोपादानं चेति विशये उपादानत्वं निषिध्यते किन्तूभयात्मकत्वं हि प्रतिषेध्यम्। एवं प्राप्त इति स्वभावमूलप्रकृतिव्यावृत्त्यर्थं प्रकृति-शब्दं व्याचष्टे “उपादानं चे”ति, सूत्रस्थच-शब्दं विवृण्वन् वाक्यार्थं योजयति “न निमित्ते”ति, का प्रतिज्ञा को दृष्टान्तः तयोरनुपरोधः कथमित्यत्राह “एवमेव ही”ति, बहुदृष्टान्तोपादानं तात्पर्यज्ञापनार्थम् । अनुपरोधं विवृणोति “यदी”ति,उक्तमुपपादयति “न हीति, एवं विपर्ययेऽनुपपत्तिरुक्ता। अथोक्तार्थोपपत्तिमाह “ब्रह्मण एवे”ति एवं सौत्रहेतुवाचिपदं व्याख्यातं, वैशेषिकमतेन बुद्धिशब्दान्तरादिभिः कारणात्कार्य्यस्य द्रव्यान्तरत्वेन प्रतिज्ञादृष्टान्तानुपपत्तिमाशङ्क्य तां परिहरन् सहेतुकं वाक्यार्थमाह—

सू० कारणमेवावस्थान्तरमापन्नं कार्य्यं न द्रव्यान्तरमिति कार्य्यकारणरूपेणावस्थितमृत्तद्विकारादिनिदर्शनेन प्रतिज्ञासमर्थनात् ब्रह्मैव जगदुपादानं चेति निश्चीयते । यत्तु निमित्तोपादानयोर्भेदः श्रुत्यैव प्रतीयत इति तदसत् निमित्तोपादानयोरैक्यप्रतीतेः "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवती"त्यादिश्यते प्रशिष्यते ऽनेनेत्यादेशः "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठत इत्या"दिश्रुतेः साधकतमत्वेन कर्त्ता विवक्षितः तमादेष्टारमप्राक्ष्यः

टी० ॥ 'कारणमेवे"ति, एवं वाचारम्भणमित्यादिवाक्यस्यार्थ उक्तः, तत्र हि कार्य्यकारणैक्यं प्रतिपाद्यते। नन्वव्यक्त-शब्दवाच्यावस्थायामेव ब्रह्मण उपादानत्वे सर्वोपानत्वाभावात्प्रतिज्ञोपरोधः, घटाद्यवस्थास्वपि ब्रह्मण उपादानत्वे मृद उपादानत्वाभावात् दृष्टान्तविरोध इति तत्र न प्रथमं शिरोऽनभ्युपगमहतत्वात्, द्वितीये मृदाद्यवस्थद्रव्यशरीरकस्यैव ब्रह्मणउपादानत्वादविरोधः, विशेषणभूतमृद्द्रव्यमात्रस्य कार्य्यकारणभावो लोकप्रसिद्धत्वाद् दृष्टान्तीकृतस्तत्तदवस्थद्रव्यशरीरकस्यैव ब्रह्मणः कारणभावस्तु लोकप्रसिद्धत्वाभावाद्दार्ष्टान्तिक इति प्रतिज्ञादृष्टान्तानुपरोधः ब्रह्मण उपादानत्वे निमित्तान्तरं स्यादिति शङ्कां परिहरिष्यन् परोक्तां श्रुत्यैव निमित्तोपादानभेदसिद्धिमनुवदति "यत्त्वि"ति, तत्-निमित्तोपादानभेदप्रतिपादनमसदित्यर्थः, निमित्तोपादानैक्ये श्रुतिमाह "उत तमादेशमि"ति, प्रत्ययार्थः कर्म प्रकृत्यर्थः, उपदेशः उपदेश्यमित्यर्थः इत्यादेश-शब्दः परैर्व्याख्यातः, तद्व्यावृत्त्यर्थं व्याचष्टे "आदिश्यत इत्यादिना, प्रशिष्यत इति प्रकृत्यर्थव्याख्यानम्, अनेनेति प्रत्ययार्थ व्याख्यानम्, "अकर्त्तरि च कारके संज्ञायामि"ति घञः कर्त्तृव्यतिरिक्तार्थविषयत्वात् आदिशतीत्यादेश इत्यनुक्तिः

Digitized by Google

अत आदिश्यते प्रशिष्यतेऽनेनेत्येवोक्तं प्रशासितृत्वे ब्रह्मणः सिद्धे एवं वर्णनीयमित्यत्राह "एतस्य वा इ"ति, अकर्त्रर्थप्रत्ययान्तस्य कथं शासितृवाचित्वमित्यत्राह "साधकतमत्वेने"ति, अव्यवहितसाधनत्वं साधकतमत्वं तथात्वेन कर्त्ता विवक्षितः, "विवक्षातः कारकाणि भवन्ती"ति न्यायादिति भावः। परेषाम्प्रत्ययार्थस्वारस्यम् अत्र तु प्रकृत्यर्थस्वारस्यम् अन्यतरास्वारस्यमुभयत्राविशिष्टमिति चेन्न प्रकृत्यर्थस्वारस्यमर्थौचित्यं चेति हेतुद्वयसिद्धेः प्रशासितृत्वे कथिते हि ब्रह्मणोऽसाधारणधर्म उक्तः स्यात् उपदेश्यत्वं हि साधारणमुपदेशश्चोपदेश्यवस्त्वसाधारणाकारेण प्रवक्तुं युज्यते, न हि गवये बुभुत्सिते चतुष्पाद् गवय इत्युपदेशो युक्तः तस्मात्प्रकृत्यर्थस्वारस्यमर्थौचित्यं चाप्यधिकमिति वैषम्यम्, एवं प्रशासितुर्विज्ञानेन सर्वविज्ञानोक्त्या निमित्तोपादानैक्यं सिद्धमित्याह—

मू॰ "येनाश्रुतं श्रुतं भवती"ति येनादेष्ट्राऽऽधिष्ठात्रा श्रुतेनाऽश्रुतमपि श्रुतं भवतीति निमित्तोपादानयोरैक्यं प्रतीयते, "सदेव सोम्येदमग्र आसीदेकमेवे"ति प्राक् सृष्टेरेकत्वावधारणाद् अद्वितीयपदेनाधिष्ठात्रन्तरनिषेधाच्च "नन्वेवं सति "विकारजननीं गौरनाद्यन्तवती"त्यादिभिः प्रकृतेराद्यन्तवद्विरहेण नित्यत्वं जगदुपादानत्वं च श्रूयमाणं कथमुपपद्यते तदुच्यते तत्राप्यविभक्तनामरूपं कारणावस्थं ब्रह्मैव प्रकृति-शब्देनाऽभिधीयते ब्रह्मव्यतिरिक्तवस्त्वन्तराभावात्, तथाहि श्रुतयः "सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद, यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं विजानीयादि"त्याद्याः "सर्वं खल्विदं ब्रह्म ऐतदात्म्यमिदं सर्वमि"ति कार्य्यावस्थं कारणावस्थं च सर्वं जगद्ब्रह्मात्मकमिति श्रवणाच्च

टी० ॥ "येने"ति, । कारणवाक्येऽपि निमित्तोपादानैक्यं दर्शयति "सदेवे"ति, प्राक्सृष्टेरेकत्वावधारणन्तु निमित्तोपादानभेदे न घटते, अतः एकत्वावधारणं च हेतुः, अधिष्ठात्रन्तरनिवारणं च हेतुरित्यर्थः "नन्वेवमि"ति, एवं सति-ब्रह्मण एव जगदुपादानत्वे सतीत्यर्थः, प्रकृतेर्जगदुपादानत्वश्रवणेऽपि ब्रह्मणोजगदुपादानत्वं युक्तं प्रकृतेरपि ब्रह्मोपादानकत्वादित्यत्राह "आद्यन्तविरहेण नित्यत्वमि"ति, प्रकृतेर्ब्रह्मोपादानकत्वमयुक्तं तस्यास्तु नित्यत्वश्रवणादतः सैवोपादानमिति ब्रह्मनिमित्तमेवेत्यभिप्रायः, तदुच्यत इति प्रकृति-शब्देन प्रकृतिवाचकशब्देनेत्यर्थः, ब्रह्मव्यतिरिक्तवस्त्वन्तराभावाद्यतसिद्धवस्त्वन्तराभावादित्यर्थः केन कं पश्येत्केन अब्रह्मात्मकस्वनिष्ठदर्शनसाधनेन कं स्वनिष्ठमर्थं कश्चेतनः पश्येत्स्वनिष्ठार्थदर्शनसाधनं स्वनिष्ठं दृश्यं तद्द्रष्टा च नास्तीत्यर्थः, नद्र ष्टृदृश्यनिषेध इह प्रतिपाद्यः, यत्र त्वस्य सर्वमात्मैवाभूदिति स्ववाक्यैकदेशेन "सर्वं ह पश्यः पश्यती"त्यादिवाक्यान्तरेण च ब्रह्मात्मकत्वेन सर्वानुभवस्य विहितत्वात् स्वनिष्ठवस्त्वन्तराभावे श्रुतिरुक्ता । अथ सर्वस्य तदात्मकत्वे श्रुतिमाह "सर्वं खल्वि"ति, एवं व्यतिरेकोऽन्वयश्चोक्तः ब्रह्मव्यतिरिक्तवस्त्वन्तराभावेन प्रकृति-शब्दवाच्यं ब्रह्मैव चेद्विकारापुरुषार्थरूपदोषाः ब्रह्मण एव स्युरित्यत्राह-

भू० एतदुक्तम्भवति "यः पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरं यं पृथिवी न वेदे"त्यारभ्य "योऽव्यक्तमन्तरे संचरन् यस्या[१]क्षरं शरीरं यमव्यक्तं न वेद योऽक्षरमन्तरे सञ्चरन् यस्याक्षरं शरीरं यमक्षरं न वेद यः पृथिव्यान्तिष्ठन् यः पृथिव्यन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयतीत्यारभ्य "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं

१ यस्याव्यक्तं शरीरमिति पा० ।

Digitized by Google

य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृत" इति च सर्वविदचिद्वस्तुशरीरतया सर्वदा सर्वात्मभूतम्परं ब्रह्म कदाचिद्विभक्तनामरूपं कदाचिच्चाविभक्तनामरूपं यदा-विभक्तनामरूपं तदेव बहुत्वेन कार्य्यत्वेन चोच्यते यदाऽ-विभक्तनामरूपं तदैकमद्वितीयं कारणमिति च, एवं सर्वदा चिदचिद्वस्तुशरीरस्य परस्य ब्रह्मणो विभक्तनामरूपा या कारणावस्था सा गौरनाद्यन्तवती विकारजननीमजाम-जामेकामि" त्यादिभिरभिधीयते। ननु च "महानव्यक्ते लीयते अव्यक्तमक्षरे लीयत" इति प्रलयश्रुतेः अव्यक्तस्यो-त्पत्तिप्रलयौ प्रतीयेते तथा च महाभारते "तस्मादव्यक्त-मुत्पन्नं त्रिगुणं द्विजसत्तम। अव्यक्तं पुरुषे ब्रह्मन्नि[१]ष्कले संप्रलीयत" इति नैष दोषः, अचिद्वस्तुशरीरस्य ब्रह्मणोऽ-व्यक्तशब्दवाच्यायाः त्रिगुणावस्थायाः कार्य्यत्वात् ।

टी० ॥ "एतदुक्तमि" ति, प्रकृतिपुरुषकालविशिष्टमेव कारणं चेत् कारणावस्था तस्यां चैकत्वं कार्य्यावस्था, तस्यां च बहुत्वं ब्रह्मणः कार-णत्वं चिदचितोः कार्य्यत्वं च घटते कथमित्याशङ्क्याह "कदाचिद्विभक्ते" ति, कदाचित्सिसृक्षोत्तरकालं कदाचित्संजिहीर्षोत्तरकालम् एकमद्वितीयमि" ति निर्देशो निमित्तोपादानैक्यविषयश्रुतिस्मारणार्थः। ततः किं गौरनाद्यन्तव-तीत्यादेः प्रस्तुतवाक्यस्येत्यत्राह "एवं सर्वदे" ति, या कारणावस्था सा-ऽभिधीयत इति, नावस्थानित्यत्वविवक्षयोच्यते किं तु कारणावस्थोप-लक्षितद्रव्यनित्यत्वमभिधीयत इत्यर्थः, अव्यक्त–शब्दवाच्याया अवस्थायाः परमकारणावस्थयैक्यं मन्वानः पार्श्वस्थश्चोदयति "ननु चे" ति, अविभ-क्तनामरूपप्रधानविशिष्टब्रह्मणः कारणत्वमनुपपन्नम् अविभक्तनामरूपस्य

१ निष्कये इति पा० ।

सूक्ष्मावस्थस्याव्यक्त—शब्दवाच्यस्याप्युत्पत्तिप्रलयश्रवणादित्यर्थः नैव इति अचिद्वस्तुनोऽव्यक्तावस्थाया अपि सूक्ष्मावस्थासम्भवात्तदवस्थाचिद्विशिष्टं ब्रह्माव्यक्तकारणमित्यर्थः । तत्र प्रमाणमाह—

सू० "यदा तमस्तन्न दिवा न रात्रि"रिति कल्पप्रलयदशायामपि ब्रह्मात्मकस्यातिसूक्ष्मस्याचिद्वस्तुनः स्थित्यभिधानाज्जगत्कारणस्य परस्य ब्रह्मणः प्रकारभूतमतिसूक्ष्मं चाचिद्वस्तु चिदचिद्वस्तु नित्यमेवेति तत्प्रकारं ब्रह्मैव गौरनाद्यन्तवतीत्यादिभिरभिधीयते अत एव चा"क्षरं तमसि लीयते तमः परे देव एकी भवतीति"तमस एकीभावमात्रमेव श्रूयते न तु लयः एकीभाव इति तमोऽभिधानातिसूक्ष्माचिद्वस्तुप्रकारस्य ब्रह्मणो विभक्तनामरूपतयाऽवस्थानमभिधीयते "तम आसीत्तमसा गूढमग्रे प्रकेतं तमसस्तन्महिम्ना जायतैकमित्याद्यप्येतदेव वदति, तथाच मानवं वचनम्

टी० ॥ "यदा तम" इति, अत एव चेति अत एव तदानीमपि तमशब्दवाच्यस्य ब्रह्मप्रकारस्याचित्तत्त्वस्य सद्भावादेवेत्यर्थः, शब्दवैजात्यमर्थवैजात्यनिबन्धनम्, अर्थवैजात्यञ्च सकलश्रुत्यनुसारेण भवतीति भावः अर्थवैजात्यमेव विवृणोति "एकीभाव" इति, पृथिव्यप्सु प्रलीयत इत्यादिषु लय—शब्देन पूर्वपूर्वावस्थस्य द्रव्यस्य पूर्वपूर्वावस्थाप्रहाणेन उत्तरोत्तरावस्थत्वमभिहितं, पृथिव्येव ह्यम्बवस्था ऽभूत् पृथिवीत्वं विहाय पृथिव्यम्भोभिरेकद्रव्यं यथा ऽभूत् एवं तमशब्दवाच्यमपि वस्तु तमस्त्वावस्थाप्रहाणेन परमात्मद्रव्यं भवतीति चेत् लय—शब्दः प्रयोक्तव्यः न तथा श्रूयते अतः परमात्मनि तमोऽवस्थितमित्यर्थः, तत्र पृथिवीत्वप्रहाणेन यद्वस्तु सलिलमभूत्तत्सलिलत्वाप्रहाणेन पूर्वमेव स्थितेनाम्भसैकीभवति, यथा च त्यक्तजलत्वावस्थसलिलद्रव्यं यत्तेजोऽभूत् तत्तेजस्त्वाप्रहाणेन प्राग-

Digitized by Google

वस्थिततेजसैकीभवति, एवं विभक्तं तमः तमस्त्वावस्थामजहदेव कार्यानुपयुक्तस्वजातीयतमसैकीभवति, तत्र परमात्मनः स्वरूपेण तमस्त्वायोगाद्यस्य मृत्युः शरीरमिति स्थानप्रमाणेन मृत्युसंज्ञतयाऽवगतस्य तमसः परशरीरत्वश्रवणाच्च कार्यानुपयुक्ततमश्शरीरकपरमात्मनैकीभवति, एकीभावश्च तमस्त्वे स्थित एव ततोऽप्यतिसूक्ष्मतापत्तिः, न हि पूर्वं खण्डितं तमः पश्चादेकीभवति किन्तु अवस्थावैषम्येण, अवस्थावैषम्यं हि विभागः, अतोऽनतिप्रकृष्टसूक्ष्मत्वं विभागः, अविभागश्च निरतिशयसूक्ष्मतापत्तिः वस्तुस्वरूपैक्याभावेऽपि तदन्तर्भावमात्रेणैकशब्दप्रयोगो दृष्टः, यथा मथनात्पूर्वमनुद्भूताग्नौ दारुण्येकः शब्दः, यथा वाहितमात्रगर्भायां योषायाम् एकेयमिति प्रयोगः, तत्र हि चेतनद्वयमस्ति तथाऽऽऽप्यन्यस्यान्यतरान्तर्भावादेकशब्दप्रयोगविषयत्वं यथावाऽनेककृमिकीटादिजन्तुसंवृतवपुषि पुरुषे एकशब्दप्रयोगः तथेत्यर्थः ॥

सू० "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वत इ"ति "अस्मान्मायी सृजते विश्वमेतदि-त्याद्यनन्तरमेवोपपादयिष्यते ब्रह्मणोऽपरिणामित्वं श्रुतयश्च यत्त्वेकस्य निमित्तत्वमुपादानत्वञ्च न सम्भवति एककारकनिष्पाद्यत्वं च कार्य्यस्य लोके तथा नियमदर्शनाच्च अतोऽनेना सिध्येदिति वेदान्तवाक्यान्येकस्माद्देवोत्पत्तिं प्रतिपादयितुं न प्रभवन्तीति । अत्रोच्यते सकलेतरविलक्षणस्य परस्य ब्रह्मणस्सर्वशक्तेस्सर्वज्ञस्यैकस्यैव सर्वमुपपद्यते ।

टी० ॥ "आसीदिदमि"ति, लय-शब्दार्थोऽवस्थान्तरापत्तिरेव न तु द्रव्यविनाशइति, इममर्थं विशदयति "तमोभूतमि"ति, तमोऽवस्थमित्यर्थः, "अभ्यवस्थे च सलिले वाय्ववस्थिते च तेजसी"ति च वचनात् तर्ह्युपलभ्यमुपलभ्यभावात्तत्रास्तीत्यत्राह "अप्रज्ञातमि"ति, प्रकृष्टं स्पष्टं ज्ञानमप-

Digitized by Google

रोचज्ञानं न तद्विषय इत्यर्थः। कुत इत्यत्राह "अलक्षणमि"ति, रूपादिरा- हित्यादित्यर्थः, "कारणगुणप्रक्रमेण कार्ये गुणारम्भ" इति न्यायात्, रूपा- दिमत्कारणमपि रूपादिमत्स्यादित्यत्राह "अप्रतर्क्यम्"अतर्कगोचरः, एवं विभक्तावस्थं तम उक्तम्, अविभक्तं तम आह "अविज्ञेयं" विविच्य विभज्य ज्ञातुमशक्यमित्यर्थः, प्रसुप्तमिव सर्वतः यथा सुषुप्तौ परमात्मनि लीनस्य चेतनस्य लयो न परमात्मत्वापत्तिः, अपि तु नामरूपप्रहाणेन सत्तामात्र- मेव तथा महाप्रलयेऽपि चिदचितोः पृथक् नामरूपप्रहाणमेव न सत्ताहा- निरित्यर्थः। विशेषमाह "सर्वत"इति, सुषुप्तावेकदेशलयः अत्र तु सर्वलय इत्यर्थः। यद्वा अविज्ञेयमित्यन्तेनाचिदंशलयः उक्तः प्रसुप्तमिवेति चिदंश- लयः, तत्रापि न सत्ताहानिः यथा सुषुप्तावित्यर्थः, एवं ब्रह्मण एव सर्व- विधकारणत्वं प्रामाणिकमित्युक्तं तर्हि पूर्वोक्तश्रुतिश्रुत्यार्थापत्तिनिर्वाहः कथ?मित्यत्राह "अस्मान्मायी"ति,अपरिणामित्वश्रुतयश्च उपपादयिष्यन्त इत्यन्वयः। श्रुत्यर्थापत्तिः परिहरिष्यत इत्यर्थः। श्रुत्यनुग्राहकतया पराभि- मततर्कमनुभाषते "यत्त्वेकस्ये"ति, पराभिमततर्काणां सोपाधिकत्वं वक्तुम् उपाधीनामज्ञत्वादीनां पक्षे ब्रह्मणि अविद्यमानतां दर्शयति"सकलेतरे"ति, परेण हि तर्कानुगृहीतश्रुतिप्राबल्यमुक्तं तत्र शरीरशरीरिभावश्रुतिभिरेव उपादानत्वनिर्विकारत्वादिश्रुतीनामविरोधस्य निरूप्यमाणत्वात् द्वारद्वारि- भावेन सर्वश्रुत्यैकार्थ्ये सम्भवत्यपि विरोधारोपणेन निमित्तोपादानैकत्वप- रानेकश्रुतिवाक्यबाधकल्पनस्यायुक्तत्वात्सर्वत्रैकार्थ्यमभ्युपगन्तव्यं, तथा सति तद्विरुद्धस्तर्कः केवलतर्क इति तस्य दुर्बलत्वाद्राद्धान्तः स्थिरतर इत्यभिप्रयन् सोपाधिकत्वमाह—

सू० मृदादेरचेतनस्य ज्ञानाभावेनाधिष्ठातृत्वायोगादधिष्ठातुः कुलालादेर्विचित्रपरिणामशक्तिविरहादसत्यसंकल्पतया च तथा दर्शननियमः, अतो ब्रह्मैव जगतो निमित्तमु- पादानं च॥

सू० अभिध्योपदेशाच्च ॥ २४ ॥

इतश्चोभयं ब्रह्मैव "सोऽकामयत बहु स्यां प्रजायेये"ति "तदैक्षत बहु स्यां प्रजायेये"ति स्रष्टुर्ब्रह्मणस्स्वस्यैव बहुभवनसंकल्पोपदेशाद्विचित्रचिदचिद्रूपेणाहमेव बहु स्यां तथा प्रजायेयेति संकल्पपूर्विका सृष्टिरुपदिश्यते ॥

सू० साक्षाच्चोभयाम्नानात् ॥ २५ ॥

न केवलं प्रतिज्ञादृष्टान्ताभिध्योपदेशादिभिरयमर्थो निश्चीयते, ब्रह्मण एव निमित्तत्वमुपादानत्वञ्च साक्षादाम्नायते किंस्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुर्मनीषिणो मनसा पृच्छते ।

टी० "मृदादेरि"ति, उपादानस्य मृदादेरनिमित्तत्वम् अज्ञत्वात्, निमित्तस्य कुलालादेरनुपादानत्वं स्वशरीरेण तथा परिणामशक्तिरहितत्वात्तस्याऽनेककारकसापेक्षत्वं चासत्यसङ्कल्पत्वादिति परोक्ततर्काः सोपाधिकाः, अतो मृत्पिण्डकुलालादिविपरीतस्वभावस्य ब्रह्मणः सर्वमुपपन्नमित्यभिप्रायः । सू· अभिध्योपदेशाच्च, इतश्चोभयं ब्रह्मेति पूर्वसूत्रप्रतिज्ञावाक्येनास्य हेतोरन्वय इत्यर्थः, सङ्कल्पोपदेशादित्यन्तेन सूत्राक्षरार्थ उक्तः, बहुभवनं रामकृष्णादिवच्च सम्भवतीति तद्व्यावृत्त्यर्थमाह "विचित्रचिदचिद्रूपेणे"ति, "तत्तेजोऽसृजते"ति, तेजःप्रभृतिसृष्टेरनन्तरोक्तत्वाच्चिदचिद्रूपेण बहुत्वस्य विवक्षितत्वमित्यर्थः।स्वस्यैव च बहुभवनादुपादानत्वं बहुभवनस्य सङ्कल्पसामानाधिकरण्यान्निमित्तत्वमिति भावः। सू· साक्षाच्चोभयाम्नानात् आदि-शब्देन वक्ष्यमाणा आत्मकृतिप्रभृतयो विवक्षिताः किंस्विद्वनं पूर्वं कुत्र स्थित इति भावः, क उ स वृक्ष आसीत्-किमुपादानमित्यर्थः यदध्यतिष्ठद्भुवनानि धारयन् भुवनानि धारयता ईश्वरेणाधिष्ठेयमुपकरणादिकं किमित्यर्थः, प्रतिवचनेऽपि ब्रह्मवनम् अधिकरणं ब्रह्म स वृक्ष उपादानं

Digitized by Google

निष्टतक्षुरिति बहुत्वमविवक्षितं "सूर्य्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् दिवञ्च पृथिवीञ्चे"ति द्यावापृथिव्यादीनां एककर्तृकत्वश्रवणेन कर्तृबहुत्वासम्भवात् । ननु ब्रह्म-शब्दः प्रकृतिवचनः भुवनानि धारयतेश्वरेणाधिष्ठितत्वश्रवणात् धारयन्निति पुंल्लिङ्गतया ब्रह्मशब्दसामाधिकरण्यायोगादधिष्ठाने हि ब्रह्म कर्मभूतमिति न ब्रह्म-शब्दमुख्यार्थपरिग्रहस्य स्वतः प्राप्तत्वादुपक्रमस्थानेकब्रह्मशब्दबाधायोगात् ॥

सू० ब्रह्माध्यतिष्ठत् भुवनानि धारयन् ब्रह्मवनं ब्रह्म स वृक्षः आसीद्यतो द्यावापृथिवी निष्टतक्षुः, मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद् भुवनानि धारय"न्निति अत्र हि स्रष्टुर्ब्रह्मणः किमुपादानं कानि चोपकरणानीति लोकदृष्ट्या पृष्टे सकलेतरविलक्षणस्य ब्रह्मणः सर्वशक्तियोगो न विरुध्यते इति ब्रह्मैवोपादानमुपकरणानि-चेति परिहृतम्, अतश्चोभयं ब्रह्म ॥

सू० आत्मकृतेः ॥ २६ ॥

"सोऽकामयत बहु स्यां प्रजायेये"ति सिसृक्षुत्वेन प्रकृतस्य ब्रह्मणस्तदात्मानं स्वयमकुरुतेति सृष्टेः कर्मत्वं कर्तृत्वञ्च प्रतीयत इत्यात्मन एव बहुत्वकरणात्तस्यैव निमित्तत्वमुपादानत्वञ्च प्रतीयते अविभक्तनामरूप एव आत्मा कर्त्ता स एव विभक्तनामरूपः कार्यमिति कर्तृत्वकर्मत्वयोर्न विरोधः स्वयमेवात्मानन्तथाऽकुरुतेति निमित्तमुपादानञ्च ।

टी० "एतदुक्तम्भवति ब्रह्माध्यतिष्ठद्भुवनानि धारयन्निति भुवनानि धारयन्नीश्वरो ब्रह्मवाच्यस्वात्मानमेवाध्यतिष्ठदधिष्ठेयमुपकरणादिकमपि ब्रह्मैवेत्यर्थ इति । अत्र प्रश्नप्रतिवचनरूपेण कथनस्य प्रयोजनं लोकदृष्ट्या

Digitized by Google

कृतं चोक्तं सर्वविलक्षणे ब्रह्मणि न जीवतीति ज्ञापनमित्याह "अत्र ही"ति, उभय-शब्दः सर्गप्रलयपरः परैर्व्याख्यातः तदयुक्तं निमित्तोपादानभेदेऽपि तयोरन्यतरस्य सर्गप्रलयकारणत्वाविरोधात्तदैक्यसाधकत्वाभावादाकाशादेव समुत्पद्यन्त इत्यवधारणस्य जगतो बहूपादानकत्वबहुकर्तृकत्वयोरन्यतरशङ्काव्यावर्त्तनसम्भवेन निमित्तोपादानभेदनिवारकत्वाभावाच्च। ननूभयाम्नानमिति विरुध्यते, अधिकरणस्य उपादानकारणस्य कर्तुश्चैकत्वप्रतीतेरिति, नैवम् अधिष्ठेयमधिष्ठातेति कोटिद्वयान्तर्भावात् कारकाणाम् उपादानाधिकरणोपकरणानि ह्यधिष्ठेयकोठिनिविष्टानि यदध्यतिष्ठत् ब्रह्माध्यतिष्ठद्भुवनानि धारयन्निति हि श्रूयते अत उभयाम्नानमिति युक्तम्, सू० आत्मकृतेः, आत्मानं प्रति स्वस्यैव कर्त्तृत्वमनुपपन्नं कार्य्यं हि साध्यं कर्त्ता हि सिद्ध इति एकस्य सिद्धासिद्धिविरोधादित्यत्राह "अविभक्ते"ति, आकारभेदात्सिद्धासिद्धोरविरोध इत्यर्थः । आकार्य्यैक्याच्चिमित्तोपादानैक्यमित्याह "स्वयमेवे"ति, उत्तरसूत्रशङ्कामाह–

सू० "सत्यं ज्ञानमनन्तं ब्रह्म आनन्दो ब्रह्मे"ति "अपहतपाप्मा विजरोविमृत्युर्विशोको विजिघत्सोऽपिपासः निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं स वा एष महानज आत्मा अजरोऽमर" इति, स्वभावतो निरस्तसमस्तचेतनाचेतनवर्त्तिदोषगन्धस्य निरतिशयज्ञानानन्दैकतानस्य परस्य ब्रह्मणो विचित्रानन्तापुरुषार्थास्पदविचित्रचिदचिन्मिश्रप्रपञ्चरूपेणात्मनो बहुभवनसङ्कल्पपूर्वकं बहुभवनं कथमुपपद्यत इत्याशङ्क्याह–

सू० परिणामात् ॥ २७ ॥

परिणामस्वाभाव्यान्नाचोपदिश्यमानस्य परिणामस्य परस्मिन् ब्रह्मणि दोषावहत्वस्वभावः प्रत्युत निरङ्कुशैश्वर्यावहत्वमेवेत्यभिप्रायः ।

टी० "सत्यज्ञानमि"ति, पूर्वसूत्रविषयवाक्यस्यानन्दवल्लीस्थत्वात्तत्प्रकरणस्थपूर्वापरवाक्येषु निर्दोषत्वकल्याणगुणाकरत्वविरोधस्य झटितिप्रतिपन्नत्वात् प्रथमं "सत्यज्ञानमि"त्यादिवाक्यद्वयमुपात्तं, सत्य-शब्दो हि विकाररहित्यपरः निर्दोषत्वादिस्फुटीकरणाय वाक्यान्तराण्युपादत्ते "अपहते"ति, पूर्वपक्षे हि निमित्तोपादानभेदश्रुतिर्निर्दोषश्रुत्यन्यथानुपपत्तिश्च हेतुतयोपन्यस्ते, राद्धान्ते तु प्रतिज्ञादृष्टान्तानुपरोधादभिध्योपदेशाच्चेति सिद्धान्तसाधकतया श्रुत्यर्थापत्तिद्वयं दर्शितम्, साक्षाच्चोभयाम्नानादित्यादि सूत्रद्वयेन योनिश्च हि गीयत इत्यनेन च सिद्धान्तसाधकश्रुतयो दर्शिताः।परिणामादिति सूत्रन्तु पूर्वपक्षोपन्यस्तश्रुतिश्रुत्यर्थापत्तिपरिहारपरमित्यर्थः शङ्कायन्ते निर्दोषत्वश्रुत्युपन्यासेन श्रुत्यर्थापत्तिः पूर्वोक्ता अनूदिता भवति, निमित्तोपादानभेदश्रुत्युपन्यासश्चाभिप्रेतः अवाप्तसमस्तकामस्य सृष्ट्यनुपपत्तिरूपा निमित्तभावविरोधिनी श्रुत्यर्थापत्तिश्चाभिप्रेता,उत्तरत्र तत्परिहारस्य च वक्ष्यमाणत्वाद् द्वितीयाध्याये बह्वधिकरणेषु समर्थयिष्यमाणं ब्रह्मात्मकत्वप्रकारम् उपजीव्य श्रुतिश्रुत्यर्थापत्तिपरिहारपरमिदं सूत्रं परिणामात् परिणामादित्युक्ते विरोधहेतुत्वमेवास्य प्रतीयते न तु विरोधपरिहारहेतुत्वम् इत्याशङ्क्याह "परिणामस्वाभाव्यादि"ति, स्वभाव एव हि विरोधहेतुरित्यत्राह "नात्रे"ति, परिणाम-शब्दः परिणामविशेषपरः,विवक्षितविशेषाभिप्रायेण सामान्यशब्दप्रयोगो गामानयेत्यादिषु दृष्टः, शब्दादेव प्रमितः, धर्मोक्तेरित्यादिषु विशेषाभिप्रायेण सामान्यनिर्देशः सोत्र एव दृश्यते इह प्रतिपन्नाच्छब्दादितिवदिह प्रतिपन्नात्परिणामादित्यर्थः । कथं तर्हि परिणामोपदेश? इति शङ्कायान्तं विवृणोति-

भा० एवमेव हि परिणाम उपदिश्यते अशेषहेयप्रत्यनीककल्याणैकतानं स्वेतरसमस्तवस्तुविलक्षणं सर्वज्ञं सत्यसङ्कल्पमवाप्तसमस्तकाममनवधिकातिशयानन्दं स्वलीलोपकरणभूतसमस्तचिदचिद्वस्तुजातशरीरतया तदात्मभूतं परं ब्रह्म स्वशरीरभूते प्रपञ्चे तन्मात्राहङ्कारादिकारणपर-

Digitized by Google

न्यरथा तमः-शब्दवाच्यातिसूक्ष्माचिद्वस्त्वेकशेषे सति तमसि च स्वशरीरतया पृथक् विनिर्देशानर्हाऽतिसूक्ष्मद-शापत्त्या स्वस्मिन्नेकतामापन्ने सति तथाभूततमःशरीरं ब्रह्म पूर्ववद्विभक्तनामरूपचिदचिन्मिश्रप्रपञ्चशरीरं स्यामिति सङ्कल्प्य अप्ययक्रमेण जगच्छरीरतयाऽऽत्मानं परिणमयतीति ।

टी० "एवमेव ही"ति, यथा तत्त्वक्रमसृष्टिरनुक्ताऽप्यन्यतोग्राह्या, यथा च सृष्ट्याद्युपयुक्ता गुणा अनुक्ता अप्यन्यतो ग्राह्याः तथा परिणामस्य सद्वारकत्वमप्यनुक्तमन्यतो ग्राह्यमिति दर्शयन् प्रधानकारणत्ववादिनीनामपि श्रुतीनां परमात्मपर्यन्ततामाह "अशेषहेये"त्यादिना, अवाप्तसमस्तकामस्य सर्गाद्यनुपपत्तिं परिहरति "स्वलीले"ति, एकीभावपदं व्याचष्टे "स्वशरीरतयाऽपी"ति, ननु तम आदिशब्दैः तन्निर्दिश्यते तत्कथं निर्देशानर्हत्वम्? उच्यते नात्र सर्वथा निर्देशानर्हत्वं विवक्षितम् अग्नि-शब्देन व्यवह्रियमाणत्वाद्दाह्याग्नेर्दारुण्यन्तर्भूतस्य पृथगग्निरित्यनिर्दिश्यमानस्यायोग्याद्दृशं सौक्ष्म्यविशेषरूपं वैषम्यं विद्यते अग्नित्वाप्रहाणमपि विद्यते, एवं तमस्त्वाप्रहाणेऽपि विभक्तात्तमसो ऽविभक्ततमसः सूक्ष्मत्वातिशयरूपं वैषम्यमस्तीत्यभिप्राय इति ईदृशतमःशरीरकत्वं तु न तदात्मानं स्वयमकुरुतेत्यादिप्रकरणे श्रूयत इत्यत्राह-

सू० सर्वेषु वेदान्तेषु परिणामोपदेशः, तथैव बृहदारण्यके कृत्स्नस्य जगतो ब्रह्मशरीरत्वं ब्रह्मणस्तदात्मकत्वं च श्रूयते "यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्माऽन्तर्याम्यमृत" इत्यारभ्य "यस्यापश्शरीरं यस्याग्निः शरीरं यस्यान्तरिक्षं शरीरं यस्य वायुः शरीरं यस्य द्यौः शरीरं यस्यादित्यः शरीरं यस्य दिशः शरीरं यस्य

Digitized by Google

चन्द्रतारकं शरीरं यस्याकाशः शरीरं यस्य मनः शरीरं यस्य तेजः शरीरं यस्य सर्वाणि भूतानि शरीरं यस्य प्राणः शरीरं यस्य वाक् शरीरं यस्य चक्षुः शरीरं यस्य श्रोत्रं शरीरं यस्य मनः शरीरं यस्य त्वक् शरीरं यस्य विज्ञानं शरीरं यस्य रेतः शरीरमि"त्येवमन्तेन काण्वपाठे, माध्यन्दिने तु पाठे विज्ञानस्य स्थाने "यस्यात्मा शरीर"मितिविशेषः, लोकयज्ञवेदानां परमात्मशरीरत्वमधिकं, सुबालोपनिषदि च पृथिव्यादीनां तत्त्वानाम्परमात्मशरीरत्वमभिधाय वाजसनेयकेऽनुक्तानामपि तत्त्वानां शरीरत्वञ्च ब्रह्मण आत्मत्वञ्च श्रूयते "यस्य बुद्धिः शरीरं यस्याहङ्कारः शरीरं यस्य चित्तं शरीरं यस्याऽव्यक्तं शरीरं यस्याक्षरं शरीरं यो मृत्युमन्तरे सञ्चरन् यस्य मृत्युः शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण" इत्यत्र—

टी० "सर्वेषु वेदान्तेषु"इति उक्तार्थे प्रमाणं दर्शयति "तथैवे"ति, अवान्तरतत्त्वानामुत्तरोत्तरं प्रति कारणत्वे श्रुतेऽपि तत्तच्छरीरकपरमात्मन एव कारणत्वमिति दर्शयितुं प्रकृतिपुरुषकालविशिष्टत्वमप्यत्रान्यत्र च क्वचिदनुक्तमपि सृष्टिवदन्यतो ग्राह्यमिति च ज्ञापयितुं यस्यापः शरीरमित्यादिसकलवाक्यजातोपादानं, काण्वपाठे अनुक्तानामपि ब्रह्मशरीरत्वज्ञापनार्थं विज्ञान-शब्दस्यात्म-शब्देन विवरणार्थं चाह "माध्यन्दिने त्वि"ति, अपहतपाप्म-शब्दे नाऽमृत-शब्दविवरणार्थं कारणावस्थायामपि ब्रह्मशरीरत्वज्ञापनार्थं देवताविशेषस्य कारणत्वज्ञापनार्थं चाह "सुबाले"ति, मृत्यु-शब्दस्य देवताविशेषे संसारे च प्रयुक्तत्वात्तयोश्चात्रान्वयानर्हत्त्वदाह—

श्रु० मृत्यु-शब्देन परमसूक्ष्ममचिद्वस्तुतमः-शब्दवाच्यमभि-

Digitized by Google

धीयते अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते इति तस्यामेवोपनिषदि क्रमप्रत्यभिज्ञानात्सर्वेषामात्मनां ज्ञानावरणानर्थमूलत्वेन तदेव हि तमो मृत्यु-शब्दव्यपदेश्यं सुबालोपनिषद्येवं ब्रह्मशरीरतया तदात्मकानान्तत्त्वानां ब्रह्मण्येव प्रलय आम्नायते "पृथिवी अप्सु प्रलीयते आपस्तेजसि लीयन्ते तेजो वायौ लीयते वायुराकाशे लीयते आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ लीयन्ते भूतादिर्महति लीयते महानव्यक्ते लीयते अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते तमः परे देवे एकीभवती"ति अविभागापत्तिदशायामपि चिदचिद्वस्त्वतिसूक्ष्मं सकर्मसंस्कारन्तिष्ठतीत्युत्तरत्र वक्ष्यते—"न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते चे"ति ।

टी० "अत्र मृत्यु-शब्देने"ति कथमचिद्वस्तुवाची मृत्यु-शब्दः तमः शब्दवदिति चेत्तमःशब्दो वा कथमचिद्वस्तुवाची तत्राह "सर्वेषामि"ति, ज्ञानावरणरूपत्वात्तमःशब्दवाच्यं तदेव ज्ञानावरणरूपानर्थमूलत्वात् मृत्यु-शब्दवाच्यमित्यर्थः, आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेष्वित्यत्र लय-शब्दाप्रयोगो लयस्थानत्वाभावात्तत्र साहित्यमात्रं विवक्षितं तन्मात्रेष्विति बहुवचने तात्पर्यम् । अदितिः पाशानितिवत् शब्दतन्मात्र इत्यर्थः, लय-शब्देन जीवब्रह्मणोः स्वरूपैक्यशङ्कानिवृत्त्यर्थमाह "अविभागापत्ती"ति, यद्वा न केवलं प्रलये चित्संसृष्टाचिद्वस्त्ववस्थानं श्रुत्या गम्यते श्रुत्यर्थापत्त्या चेत्याह "अविभागापत्ती"ति, विषमसृष्ट्यनुपपत्त्या चेतनबहुत्वस्थितिवत्तत्कर्मानुगुणदेहसृष्ट्यनुगुणा चिद्वस्तुस्थितिरपि स्वरूपपरिणामानुपपत्तिबलसिद्धेत्यर्थः । यद्वा लयदशायां सूक्ष्मरूपेणाचिद्वस्त्ववस्थानन्दर्शितं सकर्मवासवासनजीवबहुत्वावस्थानं दर्शयति "अविभागा-

Digitized by Google

पत्नी''ति, आनन्दवल्लीवाक्यस्य निर्विकारत्वादिपरवाक्यस्योपादानत्वपरवाक्यस्य चाविरोधनिर्वाहार्थं हि श्रुत्यर्थान्तराण्युदाहृतानि ततः किं प्रस्तुतस्य विरोधस्येति शङ्कायामविरोधं पश्चाद्दर्शयितुं प्रथमं विरुद्धार्थतया प्रतिपन्नानामेतत्प्रकरणस्थवाक्यानां विशिष्टपरिणामपरत्वमाह—

सू० एवं स्वस्माद्विभागव्यपदेशानर्हतया परमात्मन्येकीभूनात्यन्तसूक्ष्मचिदचिद्वस्तुशरीरादेकस्मादेवाद्वितीयान्निरतिशयानन्दात्सर्वज्ञात्सत्यसङ्कल्पाद्ब्रह्मणो नामरूपविभागार्हस्थूलचिदचिद्वस्तुशरीरतया बहुभवनसङ्कल्पपूर्वको जगदाकारेण परिणामः श्रूयते, “सत्यं ज्ञानमनन्तं ब्रह्म” “तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तरात्माऽऽनन्दमयः” “एष ह्येवानन्दयाति” “सोऽकामयत बहु स्यां प्रजायेयेति” “स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किञ्च तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तं चानिरुक्तञ्च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवदिति, अत्र तपः—शब्देन प्राचीनजगदाकारपर्यालोचनरूपं ज्ञानमभिधीयते “यस्य ज्ञानमयं तपः” इत्यादिश्रुतेः प्राक्सृष्टं जगत्संस्थानमालोच्येदानीमपि तत्संस्थानं जगदसृजदित्यर्थः ।

टी० “एवं स्वस्मादि”ति, एकत्वावधारणादिना चिदचिच्छरीरकत्वमयुक्तमित्यत्राह “विभागव्यपदेशानर्हे”ति, एकस्मादेवाद्वितीयादिति, अतिसूक्ष्मचिदचिच्छरीरकत्वमेकत्वावधारणविवक्षितं श्रुत्यन्तरैकार्थ्याद्विषमसृष्ट्यन्यथाऽनुपपत्त्यादिभिश्चेत्यभिप्रायः । यद्वाऽऽनन्दवल्ल्यामनुक्तमाव-

भक्तनामरूपवत्त्वं श्रुत्यन्तरस्यैनेकत्वावधारणादिना यथाऽवगम्यते एवं चिदचिच्छरीरकत्वमपि कारणावस्थायामिह विवक्षितमित्यभ्युपगन्तव्यमिति भावः। स्वरूपैक्यानुपपत्तिद्योतनाय प्राकरणिकान् कल्याणगुणानाह "निरतिशयानन्दादि"त्यादिपदैः, उक्तकल्याणगुणविषयवाक्यान्यादत्ते "सत्यं ज्ञानमि"ति,। विशिष्टस्य परिणामपरवाक्यमुपादत्ते "सोऽकामयते"ति, उदाहृतवाक्येषु कर्मसम्बन्धप्रतीतिव्युदासार्थं तपश्शब्दं व्याचष्टे "ज्ञ-त्रे"ति, प्राक्सृष्टमिति यौचित्याज्जगदालोचनमर्थ इत्यर्थः "तप आलोचने" इत्यस्माद्धातोस्तपःशब्दनिष्पत्तिरित्यभिप्रायः। पूर्वं जगदालोचनं किमर्थं सिसृक्षितं जगदेव पर्यालोचनीयमित्यत्राह "तत्संस्थानमि"ति, यथापूर्वं स्रष्टुमर्थमित्यभिप्रायः। न केवलमौचित्यादयमर्थः लिङ्गादपीत्याह—

सू० तथैव हि ब्रह्म सर्वेषु कल्पेष्वेकरूपमेव जगत्सृजति "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयद् दिवञ्च पृथिवीं चान्तरिक्षमथो सुवः" "यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये। दृश्यन्ते तानि तान्येव तथाभावा युगादिषि"ति श्रुतिस्मृतिभ्यः, तदयमर्थः, स्वयमपरिच्छिन्नज्ञानानन्दकस्वभावोऽत्यन्तसूक्ष्मतयाऽसत्कल्पस्वलीलोपकरणचिदचिद्वस्तुशरीरतया तन्मयः परमात्मा विचित्रानन्तक्रीडनकोपादित्सया स्वशरीरभूतप्रकृतिपुरुषसमष्टिपरम्परया महाभूतपर्यन्तमात्मानं तच्छरीरकं परिणमय्य तन्मयः पुनस्तत् त्यच्छब्दवाच्यविचित्रचिदचिन्मिश्रदेवादिस्थावरान्तजगद्रूपोऽभवत् "तदेवानुप्राविशत् तदनुप्रविश्ये"ति कारणावस्थायामात्मतयाऽवस्थितः परमात्मैव कार्य्यरूपेण।

टी० "तथैव ही"ति, यथा पूर्वसृष्टिप्रतिपादनं हि तदालोचने लिङ्गं भवति। अथ पूर्वोदाहृतश्रुत्यन्तरवाक्यानुगृहीतस्यैतत्प्रकरणस्थवाक्य-

Digitized by Google

ज्ञातस्यार्थाविरोधित्वं वक्तुं प्रतिपन्नमर्थमाह "तदयमर्थ" इति, सत्यं ज्ञानम् अन्योऽन्तर आत्माऽऽनन्दमय इत्यादेरर्थमाह "स्वयमपरिच्छिन्ने"ति, "सोऽकामयते"त्यत्र स इति पदस्य वाक्यान्तरानुगृहीतस्यार्थमाह "अत्यन्तसूक्ष्मतये"ति, । अकामयतेत्यस्यार्थमाह "विचित्रे"ति, प्रकृतिपुरुषसमष्टिपरम्परया तत्तच्छरीरकमात्मानं महाभूतपर्य्यन्तं परिणमय्येत्यन्वयः समष्टिपरम्परया—महदादिक्रमेणेत्यर्थः तत्तच्छरीरकं पूर्वपूर्वतत्त्वशरीरकः परमात्मा ह्युत्तरोत्तरतत्त्वकारणं तत्तच्छरीरकं परिणमय्येत्यन्तेन समष्टिसृष्टिरुक्ता पुनरिति व्यष्टिसृष्टिः । नन्वनुप्रवेशस्य सृष्ट्यनन्तरभावित्वश्रवणात्कारणावस्थायां चिदचिच्छरीरकत्वं न सिध्येदिति शङ्कायामुदाहृतप्रकरणस्थवाक्येषु घटकस्य वाक्यविशेषस्यार्थमाह "तदेवे"ति, विक्रियमाणद्रव्यस्यापीति "तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् अनुप्रविश्य नामरूपे व्याकरवाणीति वचोभ्यां सृष्ट्यनुप्रवेशयोः पौर्वापर्यनियमोऽपि न विवक्षितः अनुप्रवेशपूर्वकसृष्टिवचनात्सृष्टिपूर्वकानुप्रवेशवचनाच्च, तस्मात्समकालीनत्वमेव विवक्षितं वक्त्रं व्यादाय स्वपितीतिवत्, तथा तस्य त्वष्टा विश्वरूपमेतीति ह्युच्यत इत्यभिप्रायः । यद्वा सृष्टिपूर्वकानुप्रवेशस्थितिहेतुरित्यभिप्रायः, तदानीमिहोक्तमनुप्रवेशस्य सामानाधिकरण्यहेतुत्वं श्रुत्यन्तरसिद्धमव्यक्ताक्षरतमःप्रभृत्यन्तरात्मत्वं चोपजीव्याह—

भ्रू० विक्रियमाणद्रव्यस्याप्यात्मतयाऽवस्थाय तत्तद्भवदित्युच्यते, एवं परमात्मा चिदचित्संघातरूपजगदाकारपरिणामिपरमात्मशरीरभूतचिदंशगताः सर्व एवापुरुषार्थाः तथाभूताचिदंशगताश्च सर्वे विकाराः परमात्मनि कार्यत्वन्तदवस्थयोस्तयोर्नियन्तृत्वेनात्मत्वं, परमात्मा त्वनयोः स्वशरीरभूतयोर्नियन्तृतया आत्मभूतः तद्गतापुरुषार्थैर्विकारैश्च न स्पृश्यते । अपरिच्छिन्नज्ञानानन्दमयस्सर्वदैकरूप एव जगत्परिवर्त्तनलीलयाऽवतिष्ठते तदेतदाह "सत्यं चान्-

तच्च सत्यमभवदि"ति विचित्रचिदचिद्रूपेण विक्रियमाणमपि ब्रह्म सत्यमेवाभवन्निरस्तनिखिलदोषगन्धमपरिच्छिन्नज्ञानानन्दैकरूपमेवाभवदित्यर्थः सर्वाणि चिदचिद्वस्तूनि सूक्ष्मदशापन्नानि स्थूलदशापन्नानि च परस्य ब्रह्मणो लीलोपकरणानि सृष्ट्यादयश्च लीलेति भगवद्द्वैपायनपराशरादिभिरुक्तम् "अव्यक्तादिविशेषान्तं परिणामर्द्धिसंयुतम्। क्रीडा हरेरिदं सर्वं क्षरमित्युपधार्य्यताम्॥ क्रीडतो बालकस्येव चेष्टान्तस्य निशामय। बालः क्रीडनकैरिवे"त्यादिभिः, वक्ष्यति च "लोकवत्तु लीलाकैवल्यमि"ति ।

टी० "विक्रियमाणद्रव्यस्यापी"ति, प्रकृतविरोधः कथं परिहृत इत्यत्राह "एवमि"ति, तर्हि कथं ब्रह्मणः कार्य्यत्वमित्यत्राह "परमात्मनी"ति, तत्संसर्गप्रयुक्तदोषः स्यादित्यत्राह "परमात्मा त्वि"ति, उक्तदोषासंसृष्टत्वं प्राकरणिकवाक्येन दर्शयति "तदेतदाहे"ति, सत्यञ्चेत्यादिवाक्यस्यार्थमाह "विचित्रे"ति, पूर्वं सत्य-शब्दोऽनृतशब्दसाहचर्य्यात्कार्य्यचेतनपरः, उत्तरस्तु विशेष्याकाङ्क्षायामभिक्रियमाणत्वात् ब्रह्मणस्तद्विषयवाक्योक्तव्यष्टिवस्थचिदचिच्छरीरकस्यानुवादेन सत्यत्वं विधत्त इत्यर्थः। एवमुपादानभावविरोधिनी श्रुत्यर्थापत्तिः परिहृता सद्वारकत्वेन परिणामस्य निर्विकारत्वश्रुत्यविरोधात् । अथावाप्तकामस्य व्यापारानुपपत्तिरूपानिमित्तभावविरोधिनीं श्रुत्यर्थापत्तिं वक्ष्यमाणाधिकरणार्थोपजीवनेन परिजिहीर्षन् अवाप्तसमस्तकामस्यापि लीलया सृष्टिसम्भवे प्रमाणमाह "सर्वाणी"ति, निमित्तमात्रत्वे परोक्तायाः "अस्मान्मायी" सृजत इति श्रुतेरर्थमाह—

भू० "अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्ध" इति च ब्रह्मणि जगद्रूपतया विक्रियमाणेऽपि

तत्प्रकारभूताश्चिदंशगताः सर्वे विकारास्तत्प्रकारभूतत्वे- चदंशगताश्चापुरुषार्था इति विवेक्तुं प्रकृतिपुरुषयोर्ब्रह्म- शरीरभूतयोस्तदानीं तथानिर्देशानर्हातिसूक्ष्मदशापत्त्या ब्रह्मणैकीभूतयोरपि भेदेन व्यपदेशः "तदात्मानं स्वयम- कुरुते"त्येवमादिभिरैकार्थ्यात्तथा च मानवं वचनम् "सोऽ- भिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु वीर्यमपासृजदि"ति, अत एव ब्रह्मणो निर्दोषत्वनिर्विकारत्वश्रुतयश्चोपपन्नाः, अतो ब्रह्मैव ज- गतो निमित्तमुपादानञ्च ॥

सू० ॥ योनिश्च हि गीयते ॥ २८ ॥

इतश्च जगतो निमित्तमुपादानञ्च ब्रह्म यस्माद्योनित्वे- नाऽप्यभिधीयते "कर्त्तारमीशं पुरुषं ब्रह्म योनिमि"ति, "यद्भूतयोनिं परिपश्यन्ति धीरा" इति च ।

टी० "अस्मादि"ति, अस्मात्स्वशरीरभूतादित्यर्थः श्रुत्यन्तरैकार्थ्या- दस्मान्मायीति भेदव्यपदेशप्रयोजनं स्वभावासङ्करज्ञापनं निमित्तभूतस्यैव ब्रह्मणा उपादानभावर्तावबन्धनजगत्सामानाधिकरण्यानुग्रन्थिबहुनुपपत्ति- परिहारपरानेकाधिकरणार्थजातस्य एतदधिकरणार्थोपपादकत्वेन स्मारण- परमिदं सूत्रम्, इदं सूत्रं ब्रह्माज्ञानपक्षे विरुद्धं, न हि विवर्तादिति सूत्रं भेदाऽभेदपक्षेऽपि भोग्यांशेन परिणाम इति वक्तव्यम्, अत्र तु विशेषणां- शेन परिणामः उच्यते, अतोंऽशतः परिणामपरतया सङ्कोचास्वारस्यं तुल्यं श्रुत्यन्तरोपपत्त्याऽनुगुण्यमस्मन्मत इति वैषम्यम्, इदं सूत्रं पूर्वसूत्रेणैकीकृत्य सिद्धस्य कर्त्तुस्साध्यत्वमवस्थाभेदादुत्पन्नमित्येवंपरम् अन्यैर्व्याख्यातं तदयुक्तं पूर्वपक्षयुक्तश्रुतिश्रुत्यर्थोपपत्तिपरिहारस्यापेक्षितस्याकथनेन अनपेक्षि- तविधानायोगात्, एकस्य कार्य्यत्वकारणत्वविरोधोऽवस्थाभेदादुपपन्न इति

ह्यर्थसिद्धं, सू॰ योनिश्च हि गीयते, अस्य च सूत्रस्य निमित्तोपादानैक्यसाधकत्वमाह "निमित्तमुपादानञ्चे"ति, कर्त्तारमिति विषयवाक्ये हि श्रुतं "तपसा चीयते ब्रह्म यः सर्वज्ञ सर्ववित् इति च शास्त्रयोनित्वात् योनिष्ट इन्द्र निषदे अकारीत्यादिष्विव ब्रह्मयोनि-शब्दस्य कारणमात्रपरत्वव्यावृत्त्यर्थं तं व्याचष्टे-

सू॰ योनि-शब्दश्चोपादानवचन इति "यथोर्णनाभिः सृजते गृह्णते चे"ति वाक्यशेषादवगम्यते-

टी॰ "योनि-शब्दश्चे"ति, इयं सूत्रसङ्गतिः प्रतिज्ञादृष्टान्ताभ्यां निमित्तोपादानैकत्वम् उपपादितमाद्यसूत्रे तत उपरितनवाक्यस्यहेतुपरं द्वितीयं सूत्रम् । एवं श्रुत्यर्थोपपत्तिद्वयमुक्तम् । अथ श्रुतिप्रदर्शकं तृतीयं ब्रह्मवनमित्यादिवाक्यस्यास्फुटत्वात् स्फुटार्थवाक्योपस्थापकं चतुर्थम् । आत्मकृतिप्रतिपादकवाक्यस्य स्फुटार्थतया वाक्यान्तरनिरपेक्षार्थनिश्चयत्वाद्धेतोर्नैरपेक्ष्याभिप्रायश्च-शब्दाप्रयोगः, तत्प्रकरणस्य पूर्वापरवाक्यविरोधः पञ्चमेन परिहृतः, "कर्त्तारमीशं पुरुषं ब्रह्मयोनिमि"ति, वाक्यं जगत्कारणोपासनफलपरं भूतयोनिमिति वाक्यं तूपादानत्वमात्रप्रतिपादकं तस्यैव निमित्तत्वं "यस्सर्वज्ञ इत्याद्युपरितनवाक्यपर्यालोचनया विलम्बेनावगम्यते, एवमन्यपरत्वविलम्बान्वितवाक्यद्वयविशिष्टविषयत्वात् "योनिश्च हि गीयत" इतिसूत्रमुभयप्रतिपादकवाक्यविषयमपि "साक्षाच्चोभयाम्नानादि"ति, सूत्रानन्तरं न निवेशितम् । अनन्यपरस्पष्टार्थपरवाक्ये लब्धे तदैकार्थतया निश्चितवाक्यद्वयविषयत्वाद् योनिश्च हीत्यादि सूत्रञ्चरममभूदिति उपादानत्वं ब्रह्माज्ञानपक्षे न सङ्गच्छते लक्षणायोगात्, यद्ग्रहणेन विना यन्न गृह्यते तत्तस्योपादानमित्ययुक्तम् । अतीन्द्रियलिङ्गं प्रति लिङ्गस्योपादानत्वप्रसङ्गाच्च हि पुण्यापुण्ययोः सुखदुःखे उपादाने, नाप्यनुवृत्तं व्यावृत्तस्योपादानं गुरुत्वं प्रति रूपस्योपादानत्वप्रसङ्गात्, रूपं हि तेजोऽवयवेऽष्वनुवृत्तं गुरुत्वं तु तेजसोव्यावृत्तं, भ्रमाधिष्ठानत्वमुपादानत्वमिति चेत् शुक्तिरूप्यं प्रति देवदत्तस्योपादानत्वप्रसङ्गः, स हि भ्रान्तिज्ञानाश्रयः अध्य-

स्याधिष्ठानत्वमध्यस्तं प्रत्युपादानत्वमिति चेदधिष्ठान-शब्दस्य कोऽर्थः यदधिकरणतयाऽध्यस्तं प्रतीयते तत्तस्याधिष्ठानमिति चेत्तर्हि रजतस्य शुक्तिरुपादानं न स्यात्तदधिकरणत्वेन रजतप्रतीत्यभावादिदं रजतमिति हि प्रतीतिः न त्वस्मिन् रजतमिति, अध्यस्तं यत्सामानाधिकरण्येन प्रतीयते तत्तस्योपादानमिति चेत्तर्हि पीतश्शङ्ख इत्यत्र पीतिम्नः शङ्ख उपादानं न स्यात्, न हि पीतिमा शङ्ख इति सामानाधिकरण्येन प्रतीतिरपि तु पीतिमयुक्तः शङ्ख इति हि प्रतीतिः, द्रव्यान्तरवाचिशब्दसमानाधिकरणः पीत-शब्दो हि पीतिमगुणान्विते वर्त्तते पीतशङ्खस्य शङ्खान्तरेण सामानाधिकरण्यादुक्तं लक्षणमिति चेन्न पीतिममात्रस्यैव बाधदर्शनात् शङ्खस्याबाधितत्वात्तदुभयव्यतिरेकेण बाध्यशङ्खान्तरकल्पनायोगात् । किञ्च द्वौ चन्द्रावित्यत्र द्वितीयचन्द्रस्य प्रथमचन्द्र उपादानं न स्यान्न हि द्वौ घटावित्युक्ते घटयोस्सामानाधिकरण्यं विशेष्यभेदात् द्वित्वमात्रमध्यस्यत इति चेत्ततोऽपि लक्षणाव्याप्तिः, द्वित्वस्य विशेषणतया प्रतीतेः, विशेषणविशेष्ययोरैक्याप्रतीतेश्च, न हि दण्डिनो पुरुषावित्युक्ते दण्डतद्वतोरैक्यम् । किञ्च आत्मानं प्रति देहस्य उपादानत्वं प्रसजेदात्मनो देहेऽधिष्ठानेऽध्यस्तत्वात् आत्मनि देहाऽध्यास इति चेद् देहेऽप्यात्माऽध्यासो भवदभिमतः शास्त्रसिद्धश्च "अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासस्तद्विपर्ययेण विषयिणस्तद्धर्माणाञ्च विषयेऽध्यासो मिथ्येति भवितुं युक्तमिति अन्योऽन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्ये"ति, च विषये युष्मदर्थे देहे विषयिणोऽस्मदर्थस्य अध्यासो ह्युक्तः "पञ्चभूतात्मके देहे देही मोहतमोवृतः । अहं ममेतदित्युच्चैः कुरुते कुमतिर्मतिमि"ति, "आकाशवाय्वग्निजलपृथिवीभ्यः पृथक्स्थिते । आत्मन्यात्ममयं भावं कः करोति कलेवरे" इति च अतोऽतिव्याप्तिः, न केवलं पराभिमतस्थले एवाव्याप्त्यतिव्याप्ती किन्तु श्रुतिस्मृतिलोकप्रसिद्धे चूदाहरणेष्वव्याप्तिश्च मृत्पिण्डलोहमणिनखनिकृन्तनतत्कार्यादिदृष्टान्तो वेदसिद्धः, कटकमुकुटादिदृष्टान्तश्च स्मृतिसिद्धः तेष्वव्याप्तिस्तत्कार्याणां मिथ्यात्वाभावात्, तन्मिथ्यात्वं विवक्षितमिति चेत्, यथेति प्रसिद्धवदुपन्यासो न घटते अ -

तद्वेदान्तस्य श्वेतकेतोः घटादिमिथ्यात्वासिद्धेः, तन्मिथ्यात्वं युक्तिभिरुपपादयिष्याम इति चेन्न कुयुक्तीनां प्रबलयुक्तिभिर्निरस्तत्वात्तच्च दर्शितं दर्शयिष्यामश्च । अत एव लोकसिद्धेष्वव्याप्तिः सिद्धा । अस्तु वा मिथ्यात्वं घटादीनां तथाऽपि तदधिष्ठानत्वं नोपादान-शब्दप्रवृत्तिनिमित्तं तद्विषयतया व्युत्पत्त्यभावात् प्रयोगाभावाच्च, यद्यद्वस्तुनि विद्यते न तत्सर्वं शब्दवाच्यं न ह्ययं ब्राह्मण इत्युक्ते तद्गतसुखदुःखादिकमपि ब्राह्मणशब्दवाच्यं, यदाकारविषयतया शब्दो व्युत्पन्नः स तस्य प्रवृत्तिनिमित्तं, न चोपादान-शब्दोऽध्यासाधिष्ठानविषयतया व्युत्पन्नः, न च तद्विषयतया प्रयुज्यते तस्मादव्याप्तिरिति । यश्चापि ईश्वर एव ब्रह्म तेन स्वत एव भिन्नाभिन्ना प्रकृतिरिति वदति तन्मतेऽपि जगदुपादानत्वं ब्रह्मणोऽनुपपन्नं चेतनांशस्यानादित्वादेव जीवत्वावस्था सर्गात्पूर्वं नास्तीति चेत् जीवस्यादिमत्त्वं तत्प्रयुक्तदोषाश्च स्युः, घटत्वावस्थायाः पूर्वमभावादेव हि घटस्यादिमत्त्वं, जीवत्वं प्रागप्यस्ति इति चेत् तदुपादानत्वानुपपत्तिः, देवमनुष्यादिनामरूपाभिमानित्वावस्थामपेक्ष्योपादानत्वमिति चेन्न कार्यकारणयोरनन्यत्वस्य दुरुपपादत्वादनन्यत्वं वदता हि कार्ये कारणासाधारणाकारस्य वा परमकारणाकारस्य वा ऽनुवृत्तिर्वक्तव्या यथा कुण्डले तत्कारणस्य स्वर्णत्वाकारेणाऽनुवृत्तिः, यथा च वृश्चिके तत्कारणस्य पृथिवीत्वाकारेणानुवृत्तिः, तत्र ब्रह्मणः कारणान्तराभावाद् द्वितीयः कल्पो नोपपद्यते, प्रथमे च तत्र केनाकारेण जीवब्रह्मणोरैक्यं न तावद्धेयप्रत्यनीकनित्याविर्भूतज्ञानानन्दादिरूपेण जीवे तदसम्भवात्, नापि जीवत्वरूपेण कारणे परब्रह्मणीश्वरे तदभावात्, यदि सत्त्वद्रव्यत्वचेतनत्वादिरूपेण तर्हि ततश्च इदानीं देवाद्यवस्थाः जीवाः कारणावस्थायां सन्तो द्रव्यभूताश्चेतना इत्युक्तं भवति, वैशेषिकादिमतेऽप्येतावत्सं प्रतिपन्नं, ततश्च ब्रह्मकार्यत्वोपदेशवैयर्थ्यं न हि पूर्वं जीवा अचेतना अद्रव्यभूता इति कश्चिन्मन्यते, अतः ईश्वरासाधारणाकारानुवृत्त्यभावाद्ब्रह्मोपादानकत्वं न सिध्येच्च हि घटे द्रव्यत्वानुवृत्त्या तन्तूपादानकत्वं सिध्येत् तन्तुतत्कारणकार्पासतूलाद्यसा-

धारणाकारानुवृत्तेरनन्यत्वाभावात्, अनेनैव न्यायेन महदादिकं प्रति ब्र-
ह्मोपादानत्वं च निरस्तम् । यादवप्रकाशीयमते तु प्रकृतिश्चेति मूलप्रकृति-
ब्रह्मेति व्याख्यातं तदयुक्तं, तथा हि प्रतिज्ञादृष्टान्तौ हि जगदुपादानत्व-
साधकौ तौ कथं ब्रह्मण एव मूलप्रकृतित्वसाधकौ "गौरनाद्यन्तवती" त्या-
दिवाक्यान्तरैर्महदादिप्रपञ्चस्य प्रकृतिकार्य्यत्वप्रतिपादनात्तदेकत्वाभावे
ब्रह्मण उपादानत्वानुपपत्त्या प्रतिज्ञादृष्टान्तोपरोधप्रसङ्गादिति चेत्सौ-
त्रहेतुपदस्याव्यवहितसाध्येनान्वये सम्भवति व्यवहितसाध्यान्वये क्लिष्टत्व-
मेव फलम् । ननु प्रकृतेर्ब्रह्माव्यतिरिक्तत्वमुपादानत्वोपयोगि, सत्यम्, अव्य-
वहितं प्रधानसाध्यं च वक्तव्यं ब्रह्माव्यतिरिक्तनिर्वाह्यमुपादानत्वं हि प्रधा-
नसाधनसाध्यं, तदार्थमस्त्विति चेन्न अव्यवहितस्य प्रधानसाध्यस्य श्रौतत्वेन
तदुपयोग्यर्थान्तरस्यार्थसिद्धत्वोपपत्तेः, तदुपयोगि ब्रह्मात्मकत्वं तु निर्दो-
षत्वश्रुत्यविरोधेनान्यत्र सम्यक् निरूपितमिहार्थसिद्धमिति प्रकृतिशब्द-
स्योपादानपरत्वं युक्तम् । एवं सति च-शब्दश्चार्थत्वान्निमित्तभूतमेवो-
पादानं चेति ह्यर्थः, मूलप्रकृतित्वे च-शब्दस्य न प्रयोजनं बहुभवनसमान-
कर्तृकाभिध्योपदेशश्च निमित्तभूतस्यैवोपादानभावं प्रथममवगमयति तृती-
यसूत्रार्थः पूर्वमेव शिक्षितः । परिणामादित्यस्य व्याख्यानावसरे च यदुक्तं
बहु स्यां प्रजायेयेति बहु स्यामिति प्रकृतिपुरुषेश्वरभावेन विभागं दर्शयति
"प्रजायेये"ति, महदादिरूपेण विक्रियामिति, तत्सकलप्रमाणोपपत्तिविरुद्धं
प्रकृतिपुरुषेश्वराणां नित्यत्वानादित्वश्रुतिविरोधादकृताभ्यागमादिप्रसङ्गा-
ज्जीवस्याप्यन्तवत्त्वेन मोक्षशास्त्रानर्थक्यप्रसङ्गाच्च, शक्तिरूपेणावस्थानान्नि-
त्यत्वादिकमिति चेद्यदि शक्ति-शब्दस्तदुत्पादनसामर्थ्यवाची तदा घटा-
दितुल्यत्वं, यदि त्रिविधशक्तिमद् द्रव्यमवस्थितं तदा स्वशक्तिभेदेन प्रल-
यदशायामपि द्रव्यत्रयं विलक्षणं स्थितमिति प्रकृतिपुरुषेश्वरभावेन बहु
स्यामिति सङ्कल्पोऽनुपपन्नः, । किंच सङ्कल्पमात्रमेवानुपपन्नम् ईश्वरांशस्य
विभागो नाम ज्ञानादिगुणोद्बोधः न तु खण्डितत्वं प्रलये नियन्त्रंशस्याऽपि
शक्तिमात्रावशिष्टतया तदानीं सार्वज्ञ्याद्युद्बोधाभावात् । यदि सार्वज्ञ्यादि-
कमुद्भूतं तदानीमीश्वरः स्यामिति सङ्कल्पोऽनुपपन्नः, उद्भूतसार्वज्ञ्यादिगु-

चकत्वमेव हि ईश्वरत्वं, चैतन्यशक्तियोगात् सङ्कल्पोपपत्तिरिति चेन्न घटरूपेण परिणामशक्तियोगेऽपि घटत्वानुदये सलिलाहरणादिकार्यानुपपत्तिवद् ज्ञानादिगुणानुद्भवेन तत्कार्य्यसङ्कल्पविशेषाऽनुपपत्तेः, अतः सङ्कल्पाद् ईश्वरत्वविभागः ईश्वरत्वविभागात्सङ्कल्प इत्यन्योऽन्याश्रयः । पूर्वं जगदवसाने इयन्तं कालं स्वप्स्यामि ततः प्रबोद्धाऽहमिति सङ्कल्पबलात्प्रबुद्धः सङ्कल्पयति इति चेत्तर्हि ईश्वरांशस्य प्रबुद्धत्वमेव विभाग इति प्रबुद्धस्य प्रकृतिपुरुषेश्वररूपेण विभक्तः स्यामिति सङ्कल्पोऽनुपपन्नः, त्रिधाविभागविषयो बहु स्यामिति सङ्कल्पः पूर्वजगत्संहारसमय इति चेत् न "सदेवसोम्येदमग्र आसीदेकमेवेति श्रुतिविरोधान्न हि प्रलयात्पूर्वमेकत्वापत्तिः, अतः परोक्तार्थोऽनुपपन्नः "योनिश्च हि गीयत इत्यत्राऽपि ब्रह्मयोनिमि"ति, पदस्य ब्रह्मणः- अव्यक्तस्योपादानमिति व्याख्यानमप्यनुपपन्नं ब्रह्म-शब्दस्य मुख्यार्थे बाधकाभावात्समासेऽपि निषादस्थपतिन्यायेन षष्ठीसमासात्कर्मधारयस्य प्रबलत्वादलुप्तविभक्तित्वेन द्वितीयार्थत्वे सम्भवति लुप्तविभक्तित्वाश्रयणेनाऽश्रुतविभक्त्यर्थलक्षणायोगादस्मिन् प्रकरणे येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तान्तत्वतो ब्रह्म विद्यामिति पुरुषशब्दास्य-ब्रह्मशब्दस्य पुरुषविषयत्वदर्शनेन पुरुषं ब्रह्मयोनिमिति ब्रह्म-शब्दस्याऽपि पुरुषशब्दसमानविषयत्वोपपत्तेश्च। किंच स्वाभाविकभेदाभेदपक्षे ब्रह्मण उपादानत्वमपि दुर्घटं भोक्तृभोग्यनियन्तृणाम् अंशानामनादित्वात्तेषां न ब्रह्मोपादानकत्वमुपपन्नम् । ईश्वरातिरिक्तस्यांशिनः कस्यचिदप्रामाणिकत्वं च वक्ष्यते त्रयाणामप्यंशानां शक्तिरूपेणाऽनादित्वमप्यनुपपन्नं विकल्पासहत्वात् किं तदुत्पादनसामर्थ्यं शक्तिः? उत त एवांशाः सूक्ष्मरूपाः? प्रथमेऽनादित्वं न सिध्येत्, न हि घटकरकशरावोत्पादनसामर्थ्यं मृत्तिकायामस्तीति घटादीनामनादित्वं, द्वितीये च सूक्ष्मरूपास्त एव कारणमिति तेषामेव ब्रह्मलक्षणयोगित्वात्कारणातिरिक्तब्रह्मणो मानशून्यत्वात्तेषां मिथः प्रकारप्रकारिभावानभ्युपगमाच्च ब्रह्मबहुत्वं स्यात्। किं च किं भोग्यभोक्तृनियन्तारः प्रत्येकं ब्रह्म? उतांशत्रयसमुदायो ब्रह्म? उत तेष्वनुगतं तैर्भिन्नाभिन्नस्वरूपं सन्मात्रं ब्रह्म,? प्रथमे प्रकृतेरेव महदाद्युपादानत्वं स्यात्, न द्वितीयः समुदायरूपस्य ब्रह्मण उपादान-

Digitized by Google

त्वेन भोक्तरि नियन्तरि च महदाद्यवस्थान्वयप्रसङ्गात्, तृतीये जगदुपादान-
वस्तुवाचिनः शब्दस्य किं प्रवृत्तिनिमित्तं? किं सत्तासामान्यम्? उत मानार्ह-
त्वव्यवहारार्हत्वरूप उपाधिः? उत द्रव्यत्वम्? उत अर्थान्तरं? तत्र सामान्यं
भवद्भिरनभ्युपगतम्, अभ्युपगमेऽपि चतुर्ष्वपि शिरस्सु शास्त्रवैयर्थ्यं सामान्यस्य
वैशेषिकादिभिरभ्युपगतत्वात्प्रामाणिकं व्यवहारार्हं द्रव्यं जगत्कारणमित्य-
स्यार्थस्य प्रधानपरमाणुकारणवादिनामविगीतत्वाच्च, न ह्यद्रव्यमव्यवहार्यं
मानशून्यं जगदुपादानमिति तैरभिमतम् । अर्थान्तरं चेत्तच्चिद्रूपत्वं वा त्रि-
विधशक्त्युपेतत्वं वा? निरतिशयबृहत्त्वं वा यत्किञ्चिद्वा भवतु तत्किं वन-
समुदाये वनत्ववदंशत्रयसमुदाये वर्त्तते? उत समुदायेष्वेकैकस्मिन्? प्रथमे
अंशत्रयसमुदायो ब्रह्म स्यादेकत्वञ्च समूहैक्यमेव भवेत्, न तु समूहा-
न्तर्गतद्रव्यैक्यं ततश्च यथा सहकारफलानां न वनगतवृक्षत्वसमुदाय
उपादानम् अपि तु सहकार एव एवं महदादीनां प्रकृतिरेवोपादानं
स्यान्न तु समुदायः, द्वितीये च तत्प्रवृत्तिनिमित्तं किं गोत्वादिवत् साधा-
रणं? उत खण्डत्वादिवदसाधारणं,? प्रथमे त्रयाणामेकत्वं नाम एकजातीय-
त्वमेव भवेत्ततश्च प्रकृतिरेव महदाद्युपादानं, यथा खण्डगतरोम्णां खण्ड
एवोपादानं न मुण्डः, यथा च द्रव्यत्वेनैकजातीयत्वेऽपि घटस्य मृत्पिण्ड
एवोपादानं न कुलालादिद्रव्यमात्रं तद्वत् त्रयाणां मिथो भिन्नत्वेऽपि स-
न्मात्ररूपेणाभिन्नत्वात् सन्मात्रस्यैकस्यांशिनो ब्रह्मण उपादानत्वं युक्त-
मिति चेन्न खण्डमुण्डादीनां व्यक्तीनां मिथो भिन्नत्वेऽपि तासां द्रव्यत्व-
गोत्वाद्याकारेणाऽभिन्नत्वादंशिन एकस्य गोद्रव्यमात्रस्य शृङ्गलोमाद्युपा-
दानत्ववचनतुल्यत्वात्, द्वितीये च कस्यैकस्यांशस्यासाधारणः, यदि प्रकृत्यं-
शस्य तदा प्रकृतिरेवोपादानमित्युक्तं स्यात् इतरांशयोरन्यतरासाधारणत्वे
प्रकृतेरप्रसक्तत्वान्महदादिकं ब्रह्मोपादानकं न स्यात्, यथा वृक्षत्वं स्कन्ध-
प्रकाण्डशाखाद्यनेकांशानाम् अंशिभूतैकद्रव्यवृत्ति एवं सच्छब्दनिमित्तमपि
त्रयाणामंशानामंशिभूतैकद्रव्यवर्त्तीति चेन्न तथा सति सन्मात्रस्य तदंशभूतेषु
वस्तुषु पूर्णवृत्तित्वाऽनुपपत्तेः, न हि वृक्षः, शाखापत्रपुष्पादिषु प्रत्येकं पूर्णः
तत्समुच्चयो हि पूर्णवृक्षः यदि बहुंशेषु प्रत्येकं सत्त्वं पूर्णवृत्ति तदा जातिरेव

स्यात् मिथो विरुद्धाकारेषु बहुषु प्रत्येकं पूर्णाकारो हि जातिः यथा गोत्वं, ततश्च ब्रह्मैक्यं नाम जात्यैक्यं स्यादाकारत्वेन ब्रह्मणो जातित्वप्रसङ्गः, यदि वृक्षत्ववत्संहतेष्वंशेषु वर्तते तदा ब्रह्मैकत्वं नाम समूहैकत्वं स्यात् । नन्वेकजातीयानां समूहभावमुपगतानामपि पर्णानामेकवृक्षानन्यत्ववत् त्रयाणामेकद्रव्यानन्यत्वमुपपद्यत इति चेत्तर्हि नीरन्ध्रसंबन्धविशेषेणैकत्वं स्यात् भेदकाकारवतां बहूनां निश्छिद्रसंश्लेषविशेषेण विनैकत्वानुपपत्तेः, तत्र वनस्य वृक्षस्य चैतावान् भेदः परस्परनिरन्तरसंश्लेषरहितवृक्षसमूहो वनं, निरन्तरसंसर्गविशेषयुक्तपदार्थसङ्घातो वृक्ष इति तत्तदवयवानां स्वाश्रयवसजातीयवस्त्वसाधारणकार्योत्पादनानुगुणसंसर्गो विशेष-शब्देन विवक्षितः, तेन भिन्नानां वृक्षावयवानां मिथस्संसर्गव्यावृत्तिः, उक्तलक्षणसम्बन्धविशेष एव वृक्षस्यैकत्वप्रतीतिव्यवहारहेतुः तदभावात्तदुत्थबीजान्तरोत्पन्नवृक्षाणां वृक्षान्तराणां चान्योन्यैकत्वव्यवहाराभावः, तत्र केचित्पदार्थो भेदकाकारप्रहाणेनैकत्वं भजन्ते यथा विलीनाः कटकमुकुटादयः पिण्डत्वं, केचिच्च भेदकाकाराप्रहाणेनैव एकत्वं भजन्ते, यथेष्टका इष्टकात्वाप्रहाणेन भित्तित्वं, तत्र भेदकाकारप्रहाणाप्रहाणे यथाप्रमाणमभ्युपगन्तव्ये तत्र भोक्तृभोग्यनियन्तृणाम् असङ्कीर्णस्वभावत्वस्य तत्तदसाधारणशक्तियोगस्य नित्यत्वाभ्युपगमात् स्वासाधारणाकाराप्रहाणेनैव ब्रह्मात्मनैकत्वं वर्णनीयं, तत्र भेदकाकारस्य यथा प्रमाणमङ्गीकार्यत्वे सति नियन्त्रंशस्याश्रयत्वमितरांशद्वयस्य तदाश्रितत्वं च भवति "एतस्य वा अक्षरस्य प्रशासने गार्गि सर्वमिदं विधृतं तिष्ठती"त्यादिश्रुतेः, तथा च सति ईश्वरं प्रति चिदचितोः शरीरत्वमर्थसिद्धं, चेतनेन धार्यं द्रव्यविशेषो हि शरीरं, वृक्षे तु प्रकाण्डशाखांशिनो ऽचेतनत्वाच्छाखादीनां न तच्छरीरत्वम्, ईश्वरस्य तु चेतनत्वादंशान्तरस्य तद्धार्यत्वेन शरीरत्वं फलितम्, एतदुक्तं भवति सन्मात्रस्य ब्रह्मणो मृत्पिण्डवदेवैकत्वे त्रयाणां नित्यत्वानादित्वश्रुतिविरोधः स्वतो भिन्नेषु अंशेषु प्रत्येकं पूर्णवृत्तिसत्त्वाकारेणैकत्वे जात्यैक्यं, सत्त्वं संहतेषु वर्तते चेत्समूहैक्यम्, अतो निमित्तोपादानभेद एव भवेद्धर्मैक्याभावात्संहतेषु वर्तते चेदनादिभेदाप्रहाणेन सङ्घातत्वादाश्रयाश्रयिभावादिलक्षणस्य

Digitized by Google

भेदस्य प्रामाणिकत्वाच्चिदचितोश्शरीरत्वमर्थसिद्धमिति चिदचिच्छरीरकं ब्रह्म सच्छब्दवाच्यमुपादानं स्यात्ततश्च अस्मदीयपक्षः परिगृहीतः स्यात्, आश्रयाश्रयिभावानभ्युपगमे जात्यैक्यं वा समूहैक्यं वा स्यात्ततश्च निमित्तोपादानैक्यासिद्धिरिति । किञ्च बहु स्यामिति सङ्कल्पश्च घटः स्यामिति कुलालसङ्कल्पकल्पः स्यात्, सङ्कल्पस्य सद्द्रव्यैकदेशगतत्वात्परिणामस्य तदेकदेशान्तरगतत्वाच्च सामानाधिकरण्येनैक्योपदेशाः सर्वेऽप्यमुख्याः स्युरिति प्रथमसूत्रे सम्यगुपपादितं, सन्मात्रं ब्रह्म किं स्वांशगतं नरकादिदुःखं स्वगतत्वेन जानाति न वा? न चेदज्ञत्वमेव, स्वगतत्वेन जानाति चेत् दुःखित्वं स्यात्, जीवांशस्य भिन्नत्वाददोष इति चेन्न, भेदे सत्यऽपि अभेदाभिमानस्यापरोक्षस्य विद्यमानतया दुःखित्वमेव स्यात्, पाणिपादादीनां पुरुषांशतया भेदे सत्यप्यभिन्नत्वप्रतिपत्त्या हि पन्नगदष्टपादस्य पुरुषस्य अङ्गान्तरेषु प्रदाहो भवति प्राणो सञ्जातव्रणस्य करणान्तरपाटवं च शिथिलीभवति हृदि निहितहरिचन्दनबिन्दोः सर्वाङ्गाऽऽप्यायनं भवति छिन्नायामङ्गुलौ चन्दनलिप्तायां ज्वलनज्वलितायां च सुखदुःखे पुरुषस्य न भवतः स्वगतत्वेन ज्ञानाभावादतः स्वगतत्वेन ज्ञानवत्त्वे ब्रह्मणो दुःखित्वं स्यात्, ततश्च बहु स्यामिति दुःखाकरबहुभवनसङ्कल्पः सर्वज्ञस्य न स्यात्, किं च "तद्रूपमनामय"मित्यादयोऽपुरुषार्थनिषेधश्रुतयो निर्विषयाः। किं च निर्विकारत्वश्रुतयश्च विफलाः । ननु नियन्त्रंशविषया निर्विकारत्वश्रुतयः, ब्रह्मविषया विकारित्वश्रुतय इति सविषयत्वं, नैतदुपपद्यते "यत्तच्छान्तममरमजरममृतमभयमेतद्ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्म यतो वा इमानि भूतानि जायन्ते तद्ब्रह्म सर्वं खल्विदं ब्रह्म तज्जलानि"ति ब्रह्मण एव विकारतदभावश्रवणा "न्नित्यो नित्यानां ज्ञाज्ञौ द्वौ स वा एष महानज आत्माऽजरोऽमरः स वा एष महानज आत्मा अन्नादो वसुदानः स त आत्माऽन्तर्याम्यमृतः स कारणं करणाधिपाधिपः यः सर्वज्ञः सर्ववित् तस्मादेतद् ब्रह्म नामरूपमन्नं च जायते धातुः प्रसादान्महिमानमीशं सप्त प्राणाः प्रभवन्ति तस्मात् सहस्रशीर्षा पुरुषः तस्माद्विराडजायत विराजो अधिपुरुष" इति ईश्वरस्यैव विकारतदभावश्रवणाच्च, तथा स्मृति-

श्चापि "तद् ब्रह्म परमं नित्यम् अजमक्षयमव्ययम्। एकस्वरूपं च सदा हेयाभावाच्च निर्मलम्॥ कारणं कालगगने यथा सन्निधिमात्रतः। अविकारतया ब्रह्म तथा सृष्टेर्महीपते? इति, सकाशादात्मनस्तद्वदात्मानः प्रभवन्ति ही"ति ब्रह्मण एव विकारित्वाविकारित्वस्मरणात्, सन्निधानाद्यथाकाशकालाद्याः कारणं तरोः तथैवापरिणामेन विश्वस्य भगवान्हरिः। कटकमुकुटकर्णिकादिभेदैः। कनकमनेकमपीष्यते यथैकं सुरपशुमनुजविकल्पनाभिर्हरिरखिलाभिरुदीर्यते तथैक" इति, ईश्वरेऽपि विकारतदभावस्मरणाच्च, विकारवाक्येषु ईश्वरवाचिशब्दा ब्रह्मपराः, अविकारित्ववाक्येषु ब्रह्मवाचिशब्दा ईश्वरविषया इति चेन्न सार्वज्ञ्यादिगुणविशिष्टेश्वरवाचिनां द्रव्यमात्रवाचित्वस्यामुख्यत्वात्, पद्ममात्रे वृक्षशब्दवत्, ब्रह्मैकदेशे ब्रह्मवाचिशब्दानाममुख्यत्वाच्च ईश्वरातिरिक्तस्य कारणस्य अप्रामाणिकत्वस्य वक्ष्यमाणत्वाच्च, अतो निमित्तोपादानयोर्मृत्कुलालयोरिव ऐक्यानुपपत्तेरपुरुषार्थान्वयप्रसङ्गात् विकारविधिनिषेधविरोधानुपपत्तेश्च स्वाभाविकभेदाभेदपक्षे उपादानत्वमनुपपन्नम् । ननु कथं तर्हि भवत्पक्षे सविकारत्वं निर्विकारत्वं च ईश्वरस्योपपद्यत इति चेत् शरीरभूतप्रकृतिद्वारको विकारान्वयः, निर्विकारत्वं चाव्यवधानेन घटत इत्यविरोधः ननु तर्ह्युपादानत्वममुख्यं स्याद्देवादिनामरूपाभिमानानुगुणज्ञानप्रसरस्य महदाद्यवस्थायाश्चेश्वरगतत्वाभावात्, भाव्यवस्थाविशेषवतः प्रागवस्थायोगो ह्युपादानत्वम्, अवस्थाविशेष–शब्दः स्थूलावस्थापरः, तेनाप्रलीनजगतः प्रलयावस्थामपेत्य उपादानत्वव्युदासः, उच्यते चिदचिच्छरीरकं ब्रह्म महदादिकार्य्यं प्रति मुख्योपादानम् उपादानत्वलक्षणयोगित्वात् मुकुटं प्रति कनकवत् । ननु असिद्धो हेतुः महदाद्यवस्थानां ब्रह्मगतत्वाभावात्, न, ब्रह्मणः चिदचिच्छरीरकतया प्रकृतेर्ब्रह्मस्वरूपान्तर्गतत्वात् प्रकृत्यवस्थानां ब्रह्मावस्थात्वात्, न हि विशेष्यमात्रं कस्यचित्स्वरूपं विशिष्टस्य वस्तुनो विशिष्टमेव हि स्वरूपं, न हि घटस्य मृन्मात्रं स्वरूपं, किन्तु घटत्वविशिष्टम् । ननु यदि विशेषणमपि स्वरूपान्तर्भूतं तर्हि दण्डादयः संयोगादयश्च स्वरूपं स्युः, न, यावद्विशेष्यभाविनामपृथक्सिद्धप्रकार-

णामेव स्वरूपान्तर्भावात् । किञ्च घटादिवस्तुन उदकाहरणादि तत्तद-
साधारणकार्य्ययोग्यमेव स्वरूपं न मृन्मात्रं पिण्डेष्टकादीनामपि घटस्व-
रूपत्वप्रसङ्गात्, घटस्योदकाहरणं प्रति योग्यता नाम निश्छिद्रघटत्वमेव यस्य
वस्तुनो यत्कार्य्यं यदाकारान्वयव्यतिरेकानुविधायि स आकारस्तस्य वस्तु-
नस्तत्कार्ये प्रति योग्यता यथाऽग्नेरुष्णत्वं स्फोटजनने, यथा च परशो-
र्नैशित्यं छेदने, यथा च मृदो मृत्त्वं घटादिरूपपरिणामे श्लक्ष्णार्द्रभावश्च,
प्रकृतिपुरुषकालाश्च जगद्रूपेण बहुभवने परमात्मनो योग्यता स्थानीया
अयुतसिद्धप्रकाराः, अत एव हि क्वचिच्छक्ति-शब्देन जगदभिधीयते
कार्य्योपयोग्यपृथक्सिद्धविशेषणं हि शक्तिः, सा च योग्यता योग्यवस्तुनः
स्वरूपान्तर्गता अतो महदाद्यवस्था चिदचिद्विशिष्टब्रह्मस्वरूपगता इति
न हेत्वसिद्धिः, यतो विशिष्टं ब्रह्मस्वरूपम्, अत एव हि "तद्यथा रथस्यारेषु
नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः
प्रज्ञामात्राः प्राणेऽर्पिता" इति अरनाभिदृष्टान्त उपन्यस्यते, न हि नाभिदृ-
ष्टान्त उपन्यस्यते न हि नाभिमात्रं रथचक्रं किन्तु नाभिवदरनेमी अपि हि
स्वरूपान्तर्गते "तथाऽङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा । सदा जनानां हृदये सन्नि-
विष्टः तं स्वाच्छरीरात्प्रवृहेत् मुञ्जादिवेषीकाम्, इति मुञ्जेषीकादृष्टान्तश्च
श्रुतः न हीषीकामात्रं मुञ्जः किन्तु बाह्यदलविशिष्टेषीका हि मुञ्जस्वरूपं
विशेष्यांशस्य दृष्टान्त इषीका तथा यथा "यदा हि कदली नान्या त्वक्प-
त्राद्वाथ जायते । एवं विश्वस्य नान्यस्त्वं त्वं चापीश्वर! दृश्यसे" इति त्वक्पत्र-
कदलीदृष्टान्तश्च चिदचिद्विशिष्टं ब्रह्मस्वरूपमवगमयति, न हि बाह्यत्व-
क्पत्रेण विना काण्डमात्रं कदली अपि तु त्वक्पत्रविशिष्टकाण्डस्वरूपा,
एवं विश्वविशिष्टं यत्स्वरूपं तत्र विशेष्यभूतस्त्वं विशेषणांशविलक्षणश्च
दृश्यस इत्यर्थः, इयान् भेदः नाभीषीकाकाण्डानामरनेमिबाह्यत्वक्पत्राणां
चाचेतनतया मिथो नियन्तृनियाम्यभावाभावाच्च शरीरशरीरिभावः, अत एव
नेम्यादिशब्दाश्च न विशेष्यवाचकाः, इह तु नियन्तृनियाम्यभावादिना
शरीरात्मभावसम्भवाच्छरीरवाचिशब्दा ब्रह्मपर्य्यन्ता इति, अतो मह-
दाद्यवस्थानां विशिष्टब्रह्मस्वरूपगतत्वादुपादानत्वं मुख्यम् । किञ्च माभू-

Digitized by Google

त्प्रकृतिपुरुषयोः स्वरूपान्तर्भावस्तथाऽपि मुख्यत्वं युक्तं, न हि शरीरद्वारकं ब्रह्मणो महदाद्युपादानत्वममुख्यं मुख्यनिर्वाहकव्यवहितत्वाज्ज्वालाव्यवहितस्य काष्ठस्य भस्मकारणत्ववत्, न चाऽव्यवहितत्वमुपाधिः दर्शितसपक्षे वृत्त्यभावेन साध्यसमव्याप्त्यभावात्। ननु मृद्द्रव्यव्यवहितकुलालस्याऽपि घटं प्रत्युपादानत्वं स्यात्, न निर्वाहकव्यवहितत्वाभावात्तदभावश्च स्वनिष्ठस्य मृत्पिण्डस्य घटं प्रत्युपादानत्वनिर्वाहकत्वायोगात्कारणकारकस्य तु स्वनिष्ठत्वात्तन्निष्ठज्वालायास्तन्निर्वाहकत्वं युक्तम् आश्रयिनिष्ठामवस्थां प्रत्याश्रयभावस्य स्वनिष्ठस्यनिर्वाहकत्वं हि न घटते। नन्वाश्रयस्यातद्धेतोर्व्यवहितत्वादाश्रयाश्रयिभावाभावादुपादानत्वममुख्यमिति किमुपादान एवायं निर्बन्धः? उत कर्त्रादिकारकान्तरेष्वऽपि? न प्रथमः, दर्शितपक्षानादरेण पक्षपातस्य निर्निर्बन्धनत्वेनाकिञ्चित्करत्वात्, द्वितीये तु कुलालस्य घटकर्तृत्वं न सिध्येत् तद्व्यापकहेतुत्वासिद्धेः, वृक्षत्वनिवृत्तौ शिंशिपात्वनिवृत्तिवत्, हेतुत्वासिद्धिश्च हेतुहेतुमतोः पुरुषघटयोः पाणिव्यापारदण्डचक्रादिहेत्वन्तरव्यवहितत्वात् "यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रवि"रित्यत्र रवेः प्रकाशकत्वं न मुख्यं सिद्ध्येत्किरणव्यवहितत्वात् जगतः प्रकाशमानत्वे रविः किरणव्यवहितो हेतुः, तथा जलं वहतीत्यत्र जलस्य कर्मत्वं न सिद्ध्येत् घटव्यवहितत्वात्, पाके काष्ठस्य करणत्वं न सिद्ध्येत् ज्वालाव्यवहितत्वात् गवा यजेत अरुणया क्रीणातीति जातिगुणयोर्यागक्रयसाधनत्वं द्रव्यद्वारकत्वादमुख्यं स्यात् यज्ञाय पशव इत्यत्र पशूनां यज्ञतादर्थ्यं न स्यात् तेषां हविरर्थतया तद्व्यवहितत्वात् "आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा" इत्यत्रादित्यादीनां वृष्ट्याद्युपादानत्वं च न सिद्ध्येत् किरणमेघादिव्यवहितत्वात् इक्ष्वाकूणामियं भूमिरित्यादौ स्वस्वातन्त्र्यलक्षणसम्बन्धोऽपि न सिद्ध्येत् करदानां राज्ञामवान्तरस्वातन्त्र्यव्यवहितत्वात्पर्यङ्के शेत इति पर्यङ्कस्याधिकरणत्वं न सिद्ध्येदास्तरणव्यवहितत्वात्, सर्वोऽयं व्यवहारो न मुख्य इति चेन्न मुख्यत्वे सम्भवति अनेकव्यवहारामुख्यताश्रयणानुपपत्तेः, उक्तं हि "निर्वाहकव्यवधानं न मुख्यत्वविरोधी"ति, किञ्च व्यवहितस्य कार्यं प्रति हेतुत्वे को विरोधः, लक्षणाभाव इति चेन्न निय-

Digitized by Google

तपूर्वभावित्वस्य लक्षणस्य स म्भवात्, नियतानन्तरपूर्वभावित्वं लक्षणमिति चेन्न, तद्धि सामग्र्या एव न हेतुमात्रस्य, अन्यथा क्षय्यादिव्यवहितवृष्टिनदीपूरादेः सुभिक्षताहेतुत्वं न स्यात्, तद्धेतुत्वं हि व्यवह्रियते, काष्ठादीनां कारणत्वादिकं च न स्यादपूर्वस्य कृतिसाध्यत्वं च न स्यात्, भावार्थव्यवहितत्वात्। ननु व्यवहितस्याऽपि हेतुत्वेऽतिप्रसङ्गः स्यादिति चेत् तर्ह्यव्यवहितस्याऽपि-हेतुत्वे रासभादावतिप्रसङ्गः स्यात्, न, अन्वयव्यतिरेकाभ्यामतिप्रसङ्गस्य निवार्यमाणत्वादिति चेत्तुल्यमव्याप्तिस्तु भवतोऽधिका, सजातीयव्यवहितस्य न कारणत्वमिति चेत्किं येन केनाप्याकारेण सजातीयत्वम्? उत हेतुत्वाकारेण? उत हेतुत्वावान्तराकारेण? न प्रथमः, व्यवहितपत्रवेधे पुरुषस्याहेतुत्वप्रसङ्गात्, न द्वितीयः, कुलालस्य घटं प्रति अहेतुत्वप्रसङ्गात्, न तृतीयः, शरव्यवहितस्य धनुषो जयसाधनत्वाभावप्रसङ्गात्, व्यवहितहेतुरन्यथासिद्धत्वान्न व्यवहितकार्य्यं प्रति हेतुरिति चेद् व्यवहितस्यान्यथासिद्धिः किं तस्मिन् सत्यपि कार्य्यानुदयात्? उतासत्यपि कार्योदयात्? उत कार्य्यान्तरनिष्पन्नार्थत्वात्? उत व्यवहितकार्य्यं प्रति किञ्चित्करायोगात्? उत व्यवहितत्वादेव? न प्रथमः, अव्यवहिते बीजादौ हेतौ सत्यपि कदाचिदङ्कुराद्यनुदयेन बीजादेरहेतुत्वप्रसङ्गात्, सामग्रीवैकल्यादनुदयः नाहेतुत्वादिति चेदिहापि स्वकार्य्यस्य सामग्रीकल्यादनुदयः न त्वहेतुत्वादिति तुल्यं, न द्वितीयः, वृष्टिनदीपूराद्यभावे सस्यानुदयात्, न तृतीयः, गमनादिकार्य्यान्तरहेतूनां कुलालशरीरादीनां घटादिकार्य्यान्तरोत्पत्तिहेतुत्वात्, न चतुर्थः कर्त्तुः कार्य्यं प्रति करणप्रेरणरूपकिंचित्कारवत् काष्ठस्यौदनं प्रति ज्वालोत्पादनरूपकिंचित्कारवत्तविष्यादककार्य्यनिष्पादनरूपकिंचित्कारसद्भावाद् व्यवहितव्यापारस्याऽपि किञ्चित्काररूपत्वेऽतिप्रसङ्गः परिहृतः, पञ्चमेऽपि किं व्यवहितत्वम् अव्यवहितकारणत्वं वारयति? उत व्यवहितकारणत्वं? प्रथममिष्टं, द्वितीये तु कथमिदमहेतुत्वसाधकम्? व्यवहितानामशनिपातादीनां सस्याद्यहेतुत्वदर्शनादिति चेदव्यवहितरासभादेरप्यहेतुत्वाद्दहनादेरपि धूमादिहेतुत्वं न स्यात्सन्निकर्षमनादृत्य अन्वयव्यतिरेकाभ्यां हेतुत्वनिश्चये व्यवधानमप्यनादृत्यान्वयव्यतिरेकाभ्यां हेतुत्वनिश्चय इहाऽप्युपपन्नः, अन्य-

Digitized by Google

था कुलालादेर्घटादिहेतुत्वाभावप्रसङ्गात् । एवं हेतुमात्रस्य सद्वारकत्वोपपत्तेस्तदवान्तरविशेषस्य निमित्तत्ववत् उपादानत्वमपि सद्वारकं मुख्यम् । ननूपादानस्य कार्य्यावस्थाश्रयत्वं वाच्यं कथं व्यवहितस्यावस्थाविशेषाश्रयत्वम् ? उच्यते—कुम्भोदरसम्भृतमम्भः प्रति पुरुषस्येव परमात्मनो महदाद्यवस्थाश्रयत्वमुपपन्नमिति कुम्भव्यवहितस्याम्भसः पुरुषानाधेयस्यापि स्वाधारधारकायत्तस्थितित्वं हि दृश्यते, न च वाच्यं परमाधारः स्वाधेयधारणोपक्षीणः न तु व्यवहितधारणपर इति पुरुषस्य सलिलधारणफलान्वयदर्शनाच्च हि निरुदकस्येवोदकपूर्णस्य घटस्य धारणे गुरुत्वातिशयनिबन्धनश्रमातिशयो न भवति, यदि घट एव पुरुषेण धार्य्यते न जलं तर्हि निरम्भःकुम्भधारण इव श्रमातिशयो न स्यात्कुम्भमात्रधारणस्याविशेषात्, जलस्य संघटसमेतत्वाच्छ्रमातिशयः न धार्य्यत्वादिति चेन्न अन्येन धृतस्य सोदकघटस्य पाणिस्पर्शमात्रेण श्रमप्रसङ्गात्, विमतं देवदत्तधार्य्यं तदुपरिभागस्थत्वे सति तच्छ्रमहेतुत्वात्तुल्यगौरवसंप्रतिपन्नपदार्थवत्, उदकविशिष्टघटो धार्य्य इति श्रमातिशयोपपत्तिर्व्यवहितधारणं च न स्यादिति चेत्तत्र विशेषणांशस्य धार्य्यत्वमस्ति वा न वा ? न चेच्छ्रमातिशयो न स्यादस्ति चेत्तद्वदेव महदाद्यवस्थाविशिष्टमचिद्द्रव्यं परमात्मधार्य्यमिति विशेषणभूतमहदाद्यवस्थाविशेषस्याऽपि परमात्मायत्तस्थितित्वात्तस्य तदाश्रयत्वमुपपन्नम् । किं चाव्यवहितादपि व्यवहितस्यैवाश्रयत्वं मुख्यं दृश्यते, यथाऽऽस्तरणांशुकादपि पर्य्यङ्कस्य यथा दर्भेभ्यो भूतलस्य, अव्यवहितमपि ह्यंशुकं न पुरुषस्य धारकम् असामर्थ्यात् स्वभ्रमुखपिधायकं विस्तीर्णमंशुकं हि न पदन्यासन्धारयितुं प्रभवति कूपाच्छादका हि दर्भास्तत्र निहितपदं पुरुषं न धारयन्ति, तस्मादंशुकस्य दर्भाणां च धारणासामर्थ्यात्पर्य्यङ्कभूतलयोरेव हि धारणसामर्थ्यान्मुख्यमाश्रयत्वं पर्य्यङ्कभूतलस्थयोरास्तरणदर्भयोरपि धारणसामर्थ्यकल्पने गौरवं स्यादतश्चास्तरणदर्भाणां संयोगमात्रेण व्यवधायकत्वम्, एवं महदाद्यवस्थामपेत्य प्रकृतेराश्रयत्वासंभवेन परमात्मनस्सर्वशक्तेस्तदाश्रयत्वं मुख्यं, व्यवधायकसद्भावस्तु व्यवहितयोर्नाश्रयाश्रयिभावविरोधी, विमतं व्यवधायकं स्वसम्बन्धिनोर्व्यवहितयोर्नाश्रयाश्रयिभावविरोधी स्वधारणासमर्थवस्तुनि-

Digitized by Google

ष्ठव्यवधायकत्वादास्तरणवद्भेदवच्च, एवं महदाद्यवस्थां प्रति चिदचिच्छरीरकस्य परब्रह्मण आश्रयत्वोपपत्तेः जगदुपादानत्वं मुख्यम् । ननु यद्येवं शरीरशरीरिभावमाश्रित्योपादानत्वमुच्यते वैशेषिकादिपक्षात्कोभवन्मतस्य भेदः, नियाम्यविशेषो हि शरीरमभिमतं चिदचितोरीश्वरप्रेर्य्यत्वं हि तन्मतेऽप्यस्ति, अहो महत्तरोऽयं पर्यनुयोगः, वैशेषिकादयश्चेदप्रामाणिकमेव ब्रूयुः तदुक्तं चेदमादरणीयमिति न नः प्रतिज्ञा अस्मदुक्तार्थस्तैरभ्युपगतश्चेत्प्रामाणिकोऽर्थोऽङ्गीकृतः स्यात् का नः क्षतिः । किं च साम्यमपि दुरुपपादं कालदिगाकाशाद्यचेतनस्येश्वरधार्यत्वानभ्युपगमाच्छब्दादिगुणोत्पत्तावेवाकाशादीनां तद्भोक्तृपुरुषादृष्टप्रेरणमुखेनेश्वरापेक्षा न त्वाकाशादिस्वरूपस्य, चेतनानामप्यदृष्टानुगुणदेहेन्द्रियसंयोजनमुखेन सुखदुःखज्ञानादिहेतुरीश्वर इत्येतावता तत्प्रेर्य्यत्वं न तु स्वरूपस्थितौ तदपेक्षा, मुक्त्यवस्थायां तु न कदाचिदपि तदपेक्षा, पश्चाद्दुःखाद्यसंयोगाय तदपेक्षेति चेन्न पुण्यपापयोरात्यन्तिकविच्छेदादेव तत्सिद्धेः, प्रध्वंसस्यानन्ततया तन्नैरपेक्ष्याच्च अदृष्टाभावेऽपि दुःखोत्पादनक्षम ईश्वरः, अतस्तदनुदयाय तदपेक्षेति चेन्न अपार्थिवत्वेऽपि खे पुष्पं जनयितुमीश्वरः क्षम इति पुष्पानुदयाय खस्येश्वरापेक्षेति वचनतुल्यमिदम्, उभयोरप्ययोग्यत्वाविशेषादतो धारणाद्यनुगुणमसङ्कुचितमीशनं तन्मते नास्तीति यावद्द्रव्यभावितया तन्नियाम्यत्वधार्य्यत्वाद्यभावात्पराभिमतेन वाऽस्मदभिमतेन वा लक्षणेन कथंचिदपि चिदचितोः शरीरशरीरिभावानुपपत्तेर्जगदुपादानत्वं तन्मते दुरुपपादम्, अतो भाष्योक्तप्रकारमेव परमात्मनो जगदुपादानत्वमिति स्थितम् ॥

प्रकृत्यधिकरणं समाप्तम् ॥

सर्वव्याख्यानाधिकरणम् ।

सू० एतेन सर्वे व्याख्याताः व्याख्याताः ॥ २९ ॥

टी० सू० एतेन सर्वे व्याख्याता व्याख्याताः, कृत्स्नाधिकरणन्यायातिदेशरूपत्वात्सङ्गतिः, प्रथमसूत्रस्य समन्वयसूत्रस्य च सिद्धपरास्सर्वे वेदान्ता

विषयाः, वाक्यविशेषा इतरेष्वधिकरणेषु विषयाः, एवमुदा[1]हृतवाक्यशेषाः सर्वेऽप्यस्य पञ्चत्रिंशस्य विषयः पूर्वाधिकरणेष्विव विचारोऽर्थसिद्धः अनुदाहृताः कारणवादिवाक्यविशेषाः किमुक्तलक्षणचिदचिद्विलक्षणब्रह्मपरा? उत ने? ति विचारः, तदर्थं ते तेकिमुक्तन्यायानामविषया ः उत विषया? इति, विषयत्वं सम्भवति ने? ति, यदा न सम्भवति तदा तदविषयत्वादुक्तलक्षणब्रह्मपरत्वाभावः, यदा सम्भवति तदोक्तन्यायविषयत्वादुक्तलक्षणब्रह्मपरा इति फलफलिभावः, । एतेनेति पदस्य एतेन योगः प्रत्युक्तः एतेन शिष्टापरिग्रहा इति सूत्रस्यैतच्छब्दवदनन्तरपूर्वप्रकृतार्थविषयतया प्रकृत्यधिकरणन्यायमात्रपरामर्शित्वव्युदासाय व्याचष्टे "पादचतुष्टयोक्ते"ति उपासनतत्फलादिप्रतिपादकवाक्यानां निरूपयिष्यमाणानां व्यवच्छेदायाह "जगत्कारणप्रतिपादनपरा" इति, इदं–पदं हेतुगर्भं कारणविषयत्वमेव ह्यधिकाशङ्कायाः परिहारहेतुः, निरूपितवाक्यव्यवच्छेदाय वाक्यविशेषा इत्युक्तं, पूर्वमनुदाहृता अनिश्चितार्था इत्यर्थः । यथैतेषु त्रय एव यज्वान इत्युक्तेऽन्येषाम् अयज्वत्वं व्याख्यातम्भवति, एवमुदाहृतवाक्यानां चिदचिद्विलक्षणब्रह्मपरत्वप्रतिपादनेनाऽन्येषामतत्परत्वेन व्याख्यातत्वशङ्कां व्यावर्त्तयितुमाह "चेतनाचेतनविलक्षणे"ति, वैलक्षण्यहेतुभूतगुणप्रदर्शनार्थं तेषु प्रधानं गुणद्वयमाह सर्वज्ञसर्वशक्ति–शब्दाभ्यां सर्वज्ञत्वसर्वशक्तित्वे हि निमित्तोपादानतोपयोगिनी । का पुनरधिकाशङ्का उच्यते–जगत्कारणत्ववाक्यविशेषेषु केचित्सर्वसाधारणशब्देन कारणनिर्देशपरा, यथा सदेव सोम्येत्यादयः सद्ब्रह्माक्षरशब्दैः केचिच्चेतनमात्रासाधारणशब्दान्विताः, यथा तावेतौ सत्त्वक्षेत्रज्ञाविति पैङ्गिश्रुतिः क्षेत्रज्ञ–शब्देन केचिदचिन्मात्रासाधारणशब्दान्विताः यथा गौरनाद्यन्तवती अजामेकामित्यादि, केचिज्जीवेश्वरसाधारणशब्दान्विताः यथाऽऽ"त्मन आकाश"इति "पुरिशयं पुरुषमि"ति च केचिच्चिदचिद्विशेषासाधारणशब्दाः, यथा वैश्वानरशब्दवती [illegible]तिः, केचिच्चाचिद्विशेषा-

सू० एतेन पादचतुष्टयोक्तन्यायकलापेन सर्ववेदान्तेषु जगत्कारणप्रतिपादनपराः सर्वे वाक्यविशेषाश्चेतनाचेतनविलक्षण

[1] एष्वनुदाहृतवाक्यविशेषा इति पु॰ पा॰ ।

सर्वस्य सर्वप्रशास्त्रा ब्रह्मप्रतिपादनपराः व्याख्याता व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्तिद्योतनार्थः ।

धारणशब्दा, यथा "आकाशादेव समुत्पद्यन्त" इति, केचिच्चेतनविशेषासाधारणशब्दाः, यथेन्द्रशब्दवती प्रतर्दनोपासनश्रुतिः, केचित्तु परमपुरुषासाधारणशब्दाः, यथाऽन्तरादित्यविद्याश्रुतिः, यथा च पुरुषसूक्तम्, एवंविधेष्वेव वाक्येषु केचित्साक्षादेव कारणत्वप्रतिपादकाः, केचिच्च कारणत्वव्याप्तवेदितव्यत्वनिरतिशयदीप्तियोगादिपरा इति विभागो यथासम्भवं द्रष्टव्यः, उक्तकोटिष्वनन्तर्भूतं कारणविषयं वाक्यं न क्वचित्सम्भवति तत्र चिदचित्साधकैर्लिङ्गशब्दादिभिः पूर्वपक्षे प्राप्ते चिदचिद्व्यावर्त्तनक्षमैरीक्षणविशेषानन्दविशेषसर्वप्रशासितृत्वसमस्तहेयप्रत्यनीकत्वसर्वचिदचिद्द्वारकत्वपतित्वान्तरात्मत्वमुक्तप्राप्यत्वादिभिर्धर्मविशेषैस्तेषां वाक्यानां चिदचिद्विलक्षणजगदेककारणभूतदेवताविशेषप्रतिपादकत्वं समर्थितम् । उक्तकोट्यन्तर्भूतेष्वपि येष्वनुदाहृतवाक्यविशेषेषु जगत्कारणत्वमात्रं श्रुतं न त्वीक्षणविशेषादयश्चिदचिद्व्यावर्त्तकाः परमपुरुषासाधारणाश्च धर्माः श्रुताः तेषु यथाप्रतिपन्नवस्त्वभ्युपगमे विरोधाभावात् न परमात्मपरत्वमित्यनुयायिनी अधिका शङ्का, अभ्युच्चयहेतवश्च यथासम्भवं तत्र तत्र द्रष्टव्याः, ईक्षणविशेषादिधर्मान्तराश्रवणेऽपि जगत्कारणत्वस्येक्षणविशेषादिवत् परमपुरुषासाधारण्यस्य द्वात्रिंशदधिकरणन्यायनिर्णीतत्वाज्जगत्कारणत्वमेव चिदचिद्विलक्षणसर्वविधकारणभूतपरब्रह्मशब्दवाच्यदेवताविशेषपरत्वसाधकमित्यधिकानुयायिपरिहारः, परिहारे चाभ्युच्चययुक्तयस्तत्र तत्र द्रष्टव्याः । ननु जगत्कारणत्वं परमात्मलिङ्गं स्यात् कथं परमात्मनो देवताविशेष[1]परत्वसाधकं "जन्माद्यस्य यत" इत्यादीनामधिकरणानां सर्वेषां देवताविशेषनिर्णय[2]परत्वादिति ब्रूमः—तथा हि ब्रह्म-शब्दस्य भगवच्छब्दतुल्यत्वं प्रथमसूत्रे प्रतिपादितं यत इति यच्छब्दस्यानुवादरूपतया प्रापकवाक्यानुरोधित्वात्, तेषु च सदादिशब्दानां

१ देवताविशेषत्वसाधकमिति पा· ।
२ पर्यन्तत्वादिति पा·

Digitized by Google

देवताविशेषपर्यन्तत्वावगमात्, सूत्रे च यत इति जनिकर्तुः प्रकृतो न पञ्चमी, किन्तु हेताविति समर्थनेन नारायणातिरिक्तनिमित्तविरोधित्वाच्च जन्मा[1]धिकरणं देवताविशेषनिष्ठमेव लक्षणं स्थापयति, तृतीयं तु सामान्येनोपयुक्तं, चतुर्थं देवताविशेषनिष्ठं परमप्रयोजनत्वं दर्शयति "आनन्दो ब्रह्म रसो वै सः" इत्यादिवाक्यानामानन्दवल्लीस्थत्वात्तस्याश्चान्तरादित्यविद्यैकार्थ्यात्, ईक्षत्यधिकरणे तु गतिसामान्यस्योक्तत्वात्साधारणस्य सच्छब्दस्य देवताविशेषनिष्ठत्वमेव दर्शितम् । आनन्दवल्ल्यास्तु "स यश्चायं पुरुषे यश्चासावादित्ये" इत्यन्तरादित्यविद्यैकार्थ्यावगमादन्योऽन्तर आत्माऽऽनन्दमय इत्यन्तरात्म-शब्देन सुबालोपनिषत्प्रत्यभिज्ञानादुपक्रमस्थस्यानन्त-शब्दस्य रूढिपरित्यागे हेत्वभावाच्च सिद्धं भगवत्परत्वम् । अन्तरादित्यविद्यायान्तु पुण्डरीकाक्षत्वप्रतिपादनात्पुरुष-शब्देन हिरण्मयत्वविशेषणेन च पुरुषसूक्तप्रत्यभिज्ञानात्सर्वपाप्मभ्य उदयेनैष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण" इति सुबालोपनिषदैकार्थ्यावगमाच्च सिद्धं परमपुरुषपरत्वम् । इतराधिकरणचतुष्टयस्याकाशप्राणज्योतिरिन्द्रादिशब्दानामपि पुरुषसूक्तप्रतिपाद्यपरमपुरुषविषयतया समर्थनपरत्वं तत्र तत्र स्फुटम् । मनोमयत्व-भारूपत्वप्रत्यभिज्ञापितैर्विद्युद्वर्णहिरण्यपुरुषपरैः "हृदा मनीषामनसाऽभिक्लृप्तः विद्युतः पुरुषादधि तस्मिन् अयं पुरुषो मनोमयः अमृतो हिरण्मय" इत्यादिभिरैकार्थ्याच्छाण्डिल्यविद्या देवताविशेषविषया कठवल्ली भगवत्परेति स्फुटम्, अध्वनःपारभूतवैष्णवपरमपदविषयत्वात्तस्याः, अक्ष्यन्तरः परमपुरुषः पुरुष-शब्दवाच्यत्वादमृतत्वाच्च तस्मिन्नयमिति वाक्यप्रत्यभिज्ञानादन्तर्यामिविद्या नारायणविषयेति स्फुटं सुबालोपनिषदैकार्थ्यात्, मुण्डकोपनिषदः कार्त्स्न्येन परमपुरुषविषयत्वं, ब्रह्माक्षर-शब्दयोश्च पुरुष-शब्दसमानार्थत्वं च दर्शितं, तत्र श्रुतरूपविशेषान्वयादेव वैश्वानरविद्या तदेकविषया, पुरुषमपि चैनमधीयत इति च स्फुटमुक्तम् । द्युभ्वाद्यधिकरणं तु मुण्डकोपनिषद्विषयत्वादेव परमपुरुषविषयं, भूमविद्या तु निरतिशयसुखरूपवस्तुविषयत्वादानन्दवल्लीतुल्यविषया, अम्बरान्तधारकमक्ष-

[1] जन्माद्यधिकरणमिति पा° ।

Digitized by Google

रं सूर्यचन्द्रादिप्रशासितृत्वादानन्दवल्लीप्रत्यभिज्ञानादक्षर-शब्दवाच्यतया मुण्डोपनिषत्प्रत्यभिज्ञानाच्च बृहदारण्यकेऽन्तर्यामिविद्यानन्तरवाक्यप्रतिपाद्यत्वाच्च परमपुरुषः ईक्षतिकर्म परमपुरुष एव श्रुतः, दहराधिकरणं तु व्योमातीतमतत्प्रत्यनीकत्वात्, स उत्तमः पुरुष इति परमपुरुषविषयत्वाच्च देवताविशेषसाधकं प्रमितश्च पुरुष एव श्रुतः, देवताधिकरणमधुविद्ये हिरण्यगर्भेन्द्रादीनामपि गुरुशिष्यभावप्रदर्शनेनादित्यान्तर्यामिविषयत्वेन च भगवतो महामहिमप्रतिपादिके, "आकाशो ह वै नामे" ति वाक्यं पुरुषसूक्तप्रत्यभिज्ञानात्परमपुरुषविषयं, चतुर्थाद्ये तु "पुरुषान्न परं किञ्चि-दिति समर्थितम्, अनन्तरे चाऽधिकरणे अजायाः परमपुरुषात्मकत्वं स्थितं, तैत्तिरीयकेऽजावाक्यचिह्निते ऽनुवाके यस्मात्परमिति वाक्यस्याधीतत्वाद्य-स्मिन् पञ्च पञ्चजना" इति च वाक्यं भगवत्परम् अमृतात्मब्रह्म-शब्दनिर्देशादन्तरक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमेतदभयमेतद् ब्रह्म अमृतो हिरण्मयः स त आत्माऽन्तर्याम्यमृत" इति वाक्यैकार्थ्यं हि तस्य प्रतीयते, यश्चक्षुषि तिष्ठन्नित्यादि अन्तर्यामिब्राह्मणैकार्थ्येन पञ्चजनसञ्ज्ञानामिन्द्रियाणां भगवदधीनत्वमपि ह्यवगम्यते, कारणत्वेन चेत्यत्र आनन्दवल्लीवाक्यस्य विषयत्वात्सिद्धं परमपुरुषत्वनिर्धारणं, बालाक्यजातशत्रुसंवादे च वेदितव्यतयोक्तः परमपुरुषः यस्येत्यनुवादस्य प्रापकसापेक्षत्वाद्वेदितव्यत्वस्य च तमेवं विद्वानित्यादिवाक्यैकार्थ्यज्ञापकत्वाच्च, अवस्थितेरिति सूत्रस्यान्तर्यामिब्राह्मणविषयत्वात्, मैत्रेयीब्राह्मणे च जीवसमानाधिकरणवाक्यानां नारायणपरत्वं स्थितं, प्रकृत्यधिकरणस्य तु निमित्तोपादानभेदवादिपाशुपतप्रक्रियाविरोधित्वाद्रुक्मवर्णपुरुषस्य योनित्वकथनाच्च परमपुरुषविषयत्वं स्पष्टम् । एतदुक्तम्भवति केचिद्वाक्यविशेषा अनुवादरूपतया प्रापकसाकाङ्क्षाः "यतो वा इमानि" "यो वै बालाक एतेषां पुरुषाणाङ्कर्त्ते"त्येवमादयः, केचित्साधारणशब्दचिह्नितत्वाद्विशेषाकाङ्क्षाः, यथा सदेवेत्यादयः, केचिच्च अयोग्यस्वार्थतया योग्यविशेषाकाङ्क्षाः, यथा आकाशप्राणादिशब्दचिह्निताः, केचिच्च योग्यविशेषप्रत्यभिज्ञापकविशेषणोपस्थापकाः, यथा "सर्वव्यापी सर्वभूतान्तरात्मे"त्यादयः सर्वव्यापित्वं सर्वभूता-

न्तरात्मत्वमपि नारायणप्रत्यभिज्ञापकं "व्याप्य नारायणः स्थितः सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण" इति श्रूयमाणत्वात् । केचिच्च योग्यविशेषोपस्थापकाः हिरण्मयः पुरुषः तस्य यथा कप्यासम्पुण्डरीकमेवमक्षिणी सहस्रशीर्षा पुरुषः सोऽध्वनः पारमाप्नोति तद्विष्णोः परमम्पदम्परात्परम्पुरुषमुपैति परमपुरुषमभिध्यायीत दिव्योदेव एको नारायण" इत्यादयः, अतो योग्यविशेषपरेषु वाक्यविशेषेषु तदितरकोटिचतुष्टयानिविष्टवाक्यविशेषाः पर्यवस्यन्ति, अन्यथा निराकाङ्क्षत्वायोगादिति अतो जगदेककारणचिदचिद्विलक्षणदेवताविशेषे कारणवाक्यानां समन्वयोऽध्यायप्रतिपाद्य इति स्थितम्, ॥ अतोऽधिकाशङ्कास्पदानामनुदाहृतवाक्यविशेषाणामपि नारायणपरत्वमेव चरमाधिकरणे सूत्रकारैरुपपिपादयिषितमिति सिद्धम् । एवं पादचतुष्टयेऽपि विषयत्वेनोदाहृतानां वाक्यानामेककण्ठ्यं स्थितम्, अनुदाहृतवाक्यविशेषाणां तु न कस्मिंश्चिदर्थे ऐककण्ठ्यं प्रतीयते, अतस्तेष्वेकैकं निरूप्यमाणेषु निरूपितचराणां भूयसां वाक्यानां बलीयस्त्वादेकैकस्य वाक्यस्य तदनुगुणत्वं युक्तमिति च सिद्धं, के पुनस्ते वाक्यविशेषाः येषूक्तन्यायातिदेशः—उच्यते अनुदाहृतवाक्यानामानन्त्यान्न कार्त्स्न्येन तत्प्रदर्शनं शक्यम् अतः केषुचिद्वाक्येषु दिङ्मात्रं प्रदर्श्यते बृहदारण्यके श्रूयते—ब्रह्म वा इदमग्र आसीदेकमेवेत्यादि अत्र न परं ब्रह्म प्रतिपाद्यन्तदसाधारणेतरविशेषाद्यभावादत्र ब्रह्म—शब्दो ब्राह्मणजातिपरो वा तदभिमान्यग्निदेवतापरोवा तदधिष्ठितब्राह्मणजातिपरो वा अन्यसृजततत्त्रमिति क्षत्रियसृष्टिश्रवणात् तस्माद् ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूय इति क्षत्रप्रशंसनवाक्ये ब्राह्मण—शब्देन निर्देशाच्च एनं हिनस्ति स्वां योनिमृच्छति स पापीयान् भवतीति ब्राह्मणहिंसायां प्रत्यवायकथनात्परस्य हिंसाप्रसङ्गाभावात् "स विशमसृजत स शौद्रं वर्णमसृजतेति, स इति पुंल्लिङ्गेन शब्देन ब्राह्मणं परामृश्य वैश्यशूद्रयोरपि तत्स्रष्टृत्वकथनात्तदेतत् ब्रह्म क्षत्रं विट् शूद्र इति वर्णचतुष्टयनिगमनाच्च ब्रह्म—शब्दो ब्राह्मणपरः, तदभिमान्यग्निपरो वा तदधिष्ठितब्राह्मणवर्णपरो वा "आग्नेयो वै ब्राह्मण" इति श्रुत्यन्तरादिहाप्यग्निनैव देवेषु ब्रह्माऽभ-

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
काशिका पण्डितवरवामनादित्यविरचिता पूर्वार्धम् ५ रु॰ उत्तरार्धम् ५ रु॰ ..	१०)
बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	३)
प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१।)
लघुकौमुदी वरदराजकृता	१)
लघुकौमुदी श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता	८)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम्	४)
मानवधर्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
भागवतधर्मदीपिका	१)
अमरकोशः सटीकः	४)
योगवार्तिकम्	३।)
वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
गीतापदार्थनिर्वचनम्	४)
वाक्यार्थचन्द्रिका परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि- संशोधिता	४)
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र- शास्त्रिप्रणीतकाविल्कविषमपदटिप्पणीसमेतः	६।।।)
तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम्	८।)
तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम्	४।।)
शास्त्रदीपिका	८।)
खण्डनखण्डखाद्यं सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्प- णीसहितम्	७।।)
काव्यप्रदीपः काव्यप्रकाशस्य प्रतिच्छायाव्याख्या वाराणसेयसमाद्प्रतिष्ठा- पितसंस्कृतपाठशालीयदर्शनशास्त्राध्यापकरामशास्त्रिभागवताचा- र्येण परिशोधितः	३।।)
वेदान्तसिद्धान्तमुक्तावली श्रीयुत आर्थर्विनिस महाशयेनेङ्गलण्डीय- भाषायामवतारिता	२।।)
चित्रमीमांसा अप्पयदीक्षितकृता, श्री तै॰ रामशास्त्रिणा संशोधिता	१।)
तत्त्वबिन्दुः वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।≡)॥

CONTENTS.

Page.

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed: Dāmodara Śāstrī, Professor, Sanskrit College, Benares. ... 497

ŚRĪBHĀSHYA WITH ŚRUTAPRAKĀŚIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. ... 513

Digitized by Google

HARVARD COLLEGE
FEB 13 1893

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 11.] NOVEMBER, 1892. [Vol. XIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1892.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अर्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

HARVARD COLLEGE LIBRARY

'एत्य' । अन्योन्यविषयावगाहनमित्यर्थः । क्व चिदित्यादिना व्यत्ययस्य प्रकारान्दर्शयति । 'न मरतीति' । परस्मैपदमप्यत्र व्यत्ययेन । 'नेष-त्विति' । नयतेर्लोटि शप्सिपौ । 'तरुषेमेति' । तरतेर्विध्यादौ लिङ्, तथा च तरेमेति प्राप्त इति वृत्तिः, इतरथा तीर्यास्मेति प्राप्त इति वक्तव्यं स्यात्, ततश्शप् सिब् उप्रत्यय इति त्रयो विकरणाः, धातोर्गुणः । तरुषमस्, ततो यासुट् 'लिङः स लोपोऽनन्त्यस्य' 'नित्यङ्कितः' 'अतो येयः' यलोपः, 'आद्गुणः' तरुषेम । बहुलग्रहणमनर्थकं पूर्वसूत्रादपिशब्दस्यानुवृत्तौ छन्दसि व्यत्ययोऽपि भविष्यति अपिशब्दादप्राप्तञ्चेति सर्वमिष्टं सिध्यति अत आह । 'बहुलग्रहणमिति' । सर्वस्य प्रकृतस्याप्रकृतस्य च विधेर्व्यभिचारो व्यत्ययलक्षणो यथा स्यादित्येवमर्थमित्यर्थः । एवमर्थे बहुलग्रहणे सति यदिष्टं सिध्यति तच्छ्लोकेन दर्शयति । 'सुप्तिङुपग्रहेत्यादि' । तत्र सुपां व्यत्ययः धुरि दक्षिणायाः । दक्षिणस्यामिति प्राप्ते । तिङाम् । चषालं ये अश्वयूपाय तक्षति । तक्षन्तीति प्राप्ते । लादेशव्यङ्ग्यः क्रियासाधनविशेषः स्वार्थपरार्थत्वव्यक्तत्वात्मकादिको यः स मुख्य उपग्रहः, यथोक्तम् ॥

य आत्मनेपदाद्भेदः क्व चिदर्थस्य गम्यते ।
अन्यतश्चापि लादेशान्मन्यन्ते तमुपग्रहम् ॥

इति, आत्मनेपदाद्धेतोरित्यर्थः । एवमन्यतश्चापि लादेशादिति, इह तु तद्व्यक्तिनिमित्तत्वात्परस्मैपदात्मनेपदयोरुपग्रहशब्दो वर्तते । स ब्रह्मचारिणमिच्छते । इच्छतीति प्राप्ते । ऊर्मिर्युध्यति, युध्यत इति प्राप्ते । लिङ्गम्, मधोस्तृप्ता इवासते, मधुन इति प्राप्ते । भाषायामपि मधुशब्दं पुल्लिङ्गं प्रयुञ्जते मधूंश्च पिबति रम्यद्रुविटपिन इति । तच्चिन्त्यम् । नरः पुरुषः । अधासवीरैर्दशभिर्वियूयाः, वियूयादिति प्राप्ते, यु मिश्रणे विपूर्वः, आशिषि लिङ् । कालवाची प्रत्ययः कालः, श्वोऽग्नीनाधास्यमानेन, लुटो विषये लृट् । हल्, त्रिष्टुभौजः शुफितमुग्रवीरं, शुभ शोभार्थे भकारस्य फकारः आश्वलायनसूत्रे तैत्तिरीये च भकार एव पठ्यते । अच् । उपगायन्ति मापत्नयो गर्भणायः, दीर्घस्य ह्रस्वः । स्वरव्यत्ययः पराद्विश्छन्दसि बहुलमित्यत्र

Digitized by Google

वक्ष्यते। कर्तृशब्दः कारकमात्रस्योपलक्षणार्थः, तद्वाचिनां शब्दानां व्यत्यय इत्यर्थः। विभक्तीनां व्यत्यय इति यावत्, यङां, यङिति प्रत्याहारः यङो य-शब्दादारभ्य लिङ्याशिष्यङिति ङकारेण, तेषां व्यत्यय आयङा शुष्मस्य भेद-तीत्यादिना वृत्तावेव दर्शितः। एषां सुप्प्रभृतीनां व्यत्ययमिच्छति शास्त्रकृत्पाणिनिराचार्यः सोऽपि तथाविधो व्यत्ययो बाहुलकेन सिद्ध्यति, बहुलस्य भावो बाहुलकं मनोज्ञादित्वाद्वुञ्, तत्पुनर्बहुलशब्दस्य प्रवृत्तिनिमित्तं यद्बहूर्थादानस्वशब्दो हतो यस्मादेवमुक्तप्रकारो व्यत्ययो बहुलग्रहणेनैव सिद्ध्यति तस्माद्बहुलग्रहणं कर्तमित्यर्थः॥

"लिङ्याशिष्यङ्"॥ 'शपोपवाद इति'। लिङाशिषीत्यार्द्धधातुकत्वात्कथमत्र शपः प्राप्तिरित्यत आह। 'छन्दस्युभयथेति'। शब्ग्रहणं चोपलक्षणं शकेः श्नोरपवादः, स्थादिष्वेवायमङ् प्रायेण दृश्यतइत्याह। 'स्थागागमीत्यादि'। 'उपस्थेयांमति'। उपपूर्वात्तिष्ठतेराशिषि लिङ्गिप्रोभावः यासुटस्सार्वधातुकत्वा 'ल्लिङस्स लोपोनन्त्यस्य' अङि 'आतो लोप इटि च' 'अतो येयः' 'आद्गुणः' एवमुपगेयमिति। 'गमेमेति'। मस्। 'वोचेमेति'। अङ्, 'वच उम्,' यासुट्, इयादेशः, वलि लोपः। 'दृशेरग्वक्तव्य इति'। अङि हि सति ऋदृशोऽङीति गुणस्स्यात्॥

"कर्मवत् कर्मणा तुल्यक्रियः"॥ कर्मणा तुल्यं वर्त्ततइति कर्मवत् तेन तुल्यमित्यादिना वतिः, न तु तत्र तस्येवेति, तुल्यक्रिय इति प्रतियोगिनि प्रथमानिर्द्देशात्, अन्यथा तुल्यक्रिये तुल्यक्रियस्येति वा निर्द्देश्य स्यात्, तथा हि वाक्ये तावद्यतो वतिर्भवति यश्च प्रतियोगी उभाभ्यामपि ताभ्यां षष्ठीसप्तम्यौ भवतः, विप्रस्येवास्य शीलं मथुरायामिव पाटलिपुत्रे प्राकार इति, उभयोरपि सम्बन्धित्वाद् आधारत्वाञ्च ततश्चोत्पन्नेऽपि वतौ प्रतियोगिनस्ते एव षष्ठीसप्तम्यावतिष्ठेते, तुल्यार्थयोगे तु या तृतीया सोपमानादेव भवति नोपमेयात्तुल्यशब्दस्योपमेयनिष्ठत्वात्तद्यथा चन्द्रेण तुल्यं मुखमिति ततश्चोत्पन्नेऽपि वतावुपमेयात्प्रथमैवावतिष्ठते, कर्मणेति पारिभाषकं कर्म गृह्यते न लौकिकं क्रिया कर्म तस्य हि ग्रहणे क्रियया तुल्या क्रिया

यस्येति किमुक्तं स्यात् क्रियाया यया कया चन क्रियया तुल्यत्वाद् अत-स्साधनकर्मणो ग्रहणान्तत्र साध्यसाधनयोरत्यन्तभेदान्मुख्येन कर्मणा क्रिया-याः सादृश्यासम्भवात्कर्मशब्देन तत्स्था क्रिया लक्ष्यते, भवति हि तात्स्थ्या-त्ताच्छब्द्यं यथा मञ्चाः क्रोशन्तीति तदेतदाह । 'कर्मणि क्रिया कर्मेति'।

विशेषणस्य वैयर्थ्यं न चेदानीं प्रसज्यते ।
कर्मणः क्रियया तुल्या न सर्वस्य क्रिया यतः ॥

कर्मणः क्रियया तुल्यक्रियो न साधनान्तरस्येत्येवं प्रतिपत्त्यर्थं-स्यादित्याह । 'कर्मस्थया क्रियया तुल्यक्रिय इति'। तुल्यशब्दस्य नित्यसा-पेक्षत्वात्कर्मस्थया क्रिययेत्येतदपेक्षस्यापि सूत्रवद्बहुव्रीहिर्नानुपपन्नः, तुल्य-शब्दोयमस्ति साधारणवचनः, एतौ तुल्यधनाविति सादृश्यवचनस्तु प्रसिद्ध-एव तत्राद्यस्य ग्रहणे कर्मणेति यदि मुख्यवृत्तिस्तदा कर्तुः कर्मणश्च या सा-धारणी क्रिया तत्र यः कर्त्ता कर्मणा सह साधारणक्रियः सकर्मकेषु यः कर्त्ते-त्युक्तं भवति तत्र तुल्यक्रिय इत्यनर्थकं कर्मणेत्येव वाच्यं स्यात् कर्मणा सह यः कर्त्ता प्रतिपाद्यतइत्यर्थः । अथ गौणवृत्तिस्तदायमर्थः क्रियया हेतुना साधारणक्रियः कया क्रियया कर्मस्थया क्रिययेति, एवमपि पच-त्योदनन्देवदत्त इत्यत्रापि प्राप्नोति यासौ कर्मस्था विक्लित्तिरूपा क्रिया तया साधारणक्रियत्वात् अतोस्मिन्पक्षे ऽनिष्टप्रसङ्गः प्रसिद्धतरश्च सदृ-शपर्यायस्तुल्यशब्द इति तस्यैव ग्रहणमिति दर्शयन्नाह । 'यस्मिन्कर्म-णीत्यादि'। अत्र तद्वत्प्रथाशब्दो प्रयुञ्जानः सादृश्यवचनस्तुल्यशब्दो न साधारणवचन इत्याचष्टे । 'कर्तृभूत इति'। कर्त्तरि सम्पन्न इत्यर्थः । त्वर्वि-कल्पितत्वादत्राभावः, अथ वा कर्तृशब्दः कर्तृत्वे वर्त्तते, भूतइति भू प्राप्ता-वित्यस्माद्धृषाद्वेति णिजभावे रूपं कर्तृत्वं प्राप्तइत्यर्थः, तत्र पचत्योदनमि-त्यत्र कर्तृकर्मव्यापारयोरत्यन्तभेदेन सादृश्याभावात्कर्मवद्भावाभावः, एव-मपि भिद्यमानः कुसूलः पात्राणि भिनत्तीत्यत्रापि प्राप्नोति यादृशी हि पात्रेषु क्रिया ऽवयवविशरणात्मिका तादृश्येव कुसूलेपि कर्त्तरि लक्ष्यतइति । नैष दोषः । कर्मस्थया क्रियया तुल्या क्रिया यस्य कर्त्तुरित्युक्ते कर्तृत्वोपयोगिनी या क्रिया यदावेशादसौ कर्त्ता भवति सैव क्रिया गम्यते इह तु पात्रेषु दृश्यमानं

द्विधाभवनं कुसूले ऽपि दैवगत्या दृष्टमित्येतावता पुनस्तत्समावेशादसौ भिनत्ति स्वयमभिद्यमानोऽपि कुसूलउपरि पतन् पाषाणो भिनत्त्येव तत्र-अप्यन्योन्यमाश्लिष्यतः अन्योन्यं स्पृशतः अन्योन्यं गृह्णीतः अथ प्राप्नोति यत्र हि यत्क्रियावेशात्कर्त्ता भवति सैव कर्मण्यपि दृश्यते, सत्यं, दृश्यते न सा कर्म चोपयोगिनी नह्यसौ तदावेशात्कर्म भवति स्वयमाश्लिष्यतोऽपि परेणाश्लिष्यमाणस्य कर्मत्वसम्भवात् तदेतदुक्तं भवति कर्मणः कर्मत्वोपयोगिनी या क्रिया तया तुल्या यस्य कर्तृत्वोपयोगिनी क्रिया स कर्मणा तुल्यक्रियः कर्त्तेति, एवञ्च यस्यैव कर्मणः कर्मावस्थायां या क्रिया कर्त्रवस्थायामपि यदि सैव क्रिया भवति स कर्त्ता कर्मवदित्युक्तं भवति तदस्यचैवोक्तं 'यस्मिन् कर्मणि कर्तृभूतेऽपीति' तस्मिन्नेव कर्मणि कर्त्रवस्थाप्राप्त इति सूत्रार्थः, एवञ्च कर्तृकर्मावस्थाभेदादेकस्या अपि क्रियाया भेदाश्रयं सादृश्यमुपपाद्यम्। अतिदेशो रूपनिमित्ततादात्म्यव्यपदेशशास्त्रकार्यातिदेशभेदेनानेकविधः, तत्रादितस्त्रयाणामसम्भवो व्यपदेशातिदेशस्तु संज्ञापक्षाद् भिद्यते तत्र यत्करणमनर्थकमतः शास्त्रातिदेशः कार्यातिदेश इति द्वावेव पक्षौ तत्र शास्त्रातिदेशे भावकर्मणोरित्यादिषु शास्त्रेष्वतिदिष्टेषु तेनतेन शास्त्रेण तत्तत्कार्यं प्रवर्त्तते ततश्च भावकर्मणोरित्यस्यावकाशः शुद्धं कर्म पच्यते ओदनः, शेषात्कर्त्तरि परस्मैपदमित्यस्यावकाशः शुद्धः कर्त्ता पचति पठति, कर्मकर्त्तर्युभयप्रसङ्गे परत्वात्परस्मैपदं प्राप्नोति, नैष दोषः, कर्त्तरि कर्मव्यतिहार इत्यतः कर्तृग्रहणमनुवर्त्तते तेन कर्त्तैव यः कर्त्ता तत्र परस्मैपदं कर्मकर्त्तरि न भविष्यति इह तर्हि कर्मणि यक् भवतीत्यस्यावकाशः शुद्धं कर्म पच्यते ओदनः कर्त्तरि शबित्यस्यावकाशः शुद्धः कर्त्ता पचति पठति, कर्मकर्त्तर्युभयप्रसङ्गे परत्वाच्छप् प्राप्नोति नैष दोषः, कर्त्तरि शबित्यत्र कर्तृग्रहणाच्च कर्त्तव्यं सार्वधातुके शबिति सामान्यस्य भावकर्मणोर्यगपवादो भविष्यति एवं सिद्धे यत्कर्तृग्रहणं क्रियते तस्यैतत्प्रयोजनं कर्त्तैव यः कर्ता तत्र शबादयो यथा स्युः कर्मापदिष्टे माभूवन्निति, सत्यमप्रतिविहितमायुष्मता वृथा पुनरयम्प्रयासः, कार्यातिदेशाश्रयेणैव सिद्धेः तत्र ह्यनेनैवात्मनेपदमनेनैव यगिति परत्वाद्यगात्मनेपदे सिद्धमतः

Digitized by Google

प्रधानं च कार्यं तदर्थत्वान्निर्देशान्तरणामतः कार्यातिदेशः स्यादयं तदाह । 'कर्माश्रयाणि कार्याणि प्रतिपद्यत इति'। ननु च नेह सूत्रे कर्तृग्रहणमस्ति यद्यपि प्रकृतं कर्तरि शबिति तदपि सप्तम्यन्तं तु व्यक्रियत इति प्रथमान्तेन सम्बध्यतेति तत्राह । 'कर्तरि शबित्यत इति'। 'यगात्मनेपदेत्यादि'। लान्तस्य कर्ता कर्मवदिति वक्ष्यमाणस्यास्य यगादीनामेव सम्भव इति भावः । भिद्यतइत्यादीनि चीण्यात्मनेपदस्योदाहरणानि यगादीनां क्रमेण, कथं पुनः काष्ठस्य भिदां प्रति कर्तृत्वं यावता भिद्यतेऽसौ देवदत्तेन यो ह्युद्यमननिपातनादि कुठारस्य करोति स भेदने कर्ता उच्यते सर्वेषामेव कारकाणां प्रातिस्विकोऽवान्तरव्यापारोऽस्ति अकिंचित्करस्य कारकत्वानुपपत्तेः, एतच्च कारकप्रकरणे व्युत्पादितं तत्र च स्वव्यापारे स्वतन्त्रत्वं सर्वत्रास्ति कारके कर्तृव्यापारेण तिरस्कृतत्वात्तु न्यग्भूतं स्वातन्त्र्यमिति कर्तृत्वं न भवति करणादिसंज्ञैव भवतीत्येतावत्सकर्मकास्तु के चिद्धातवः कर्मव्यापारमप्यभिधाय तावत्येवापर्यवस्यन्तस्तदनुपसर्जनं कर्तृव्यापारमाचक्षते तद्यथा भिदिर्द्विधाभवनोपसर्जनं द्विधाभावनमाह न खल्वयमुद्यमननिपातनमात्रवचनः एवकेऽपि प्रसङ्गात् सोऽपि हि वस्त्रमुद्यच्छति निपातयति च, अथ च न भिनत्तीत्युच्यते द्विधाभवनाभावात्, एतेन छिदिलुनती व्याख्यातौ, तथा पचिरपि विक्लित्त्युपसर्जनं विक्लेदनमाह तत्र यदा कर्मणः सौकर्यातिशयप्रतिपादनाय कर्तृव्यापारो न विवक्ष्यते तदा निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितं निवर्त्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते धातुरपि तद्व्यापारमात्रे वर्त्तते । कथं पुनरुभयवचनो धातुः कर्मव्यापारमात्रवचनो भवति को विरोधः, अनेकार्था धातवः समुदायेषु च वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्ते तदेवं कर्मव्यापारमात्रवाचिषु कर्तृत्वमेव काष्ठादीनां न तु कर्मत्वगन्धोऽप्यस्ति धातवश्चैते प्रयोगेऽस्मिन्नकर्मकाः यथा विक्लिद्यति द्विधा भवतीति, कथं तर्हि कर्मणा तुल्यक्रियः कर्ता, न ब्रूमोऽस्मिन् प्रयोगे यत्कर्म तेन तुल्यक्रिय इति किं तर्हि प्रयोगान्तरे यत्कर्म तेन तुल्यक्रिय इति, नन्वेवं पचत्योदनं देवदत्तो राध्यत्योदनः स्वयमेव अत्रापि प्राप्नोति अत्र परिहारं वक्ष्यति धात्वधिकारादिति, कर्तृकर्मणोर्द्धातोरन्यत्रासम्भवादेव सिद्धत्वा-

Digitized by Google

नुवृत्तिरेकत्वविवक्षार्थो यस्मिन्नेव धातौ यत्कर्म तेन तुल्यक्रियस्तस्यैव धातोः कर्त्तेति तेन धातुभेदे न भविष्यति, आहाध्यारोपोयमस्तु कोर्थः कृत्स्न एव धात्वर्थः कर्मण्यध्यारोप्यते किमत्र देवदत्तेन ओदन एव पाकं करोतीति एवं हि सौकर्यातिशयः सुतरां प्रतिपादितो भवति करणाधिकरणवत् यथा साध्वसिश्छिनत्ति साधु स्थाली पचतीति तत्र येषु तावत्कृत्स्न एव धात्वर्थः कर्मण्यपि सम्भवति आत्मना बुध्यते आत्मना मुच्यते आत्मना हन्यते आत्मना ताड्यत इति तेषु शुद्धे कर्मणि लकारः केन चिद्रूपेण कर्तृत्वं केन चिद्रूपेण कर्मत्वमिति तथा भिद्यते कुसूल इति यत्रापि चेतनो भेत्ता न दृश्यते तत्र वाता-तपकालाभिवर्षणानामन्यतमस्य कर्तृत्वमध्यारोपो वा पच्यते ओदनः स्वय-मेव लूयते केदारः स्वयमेवेत्यादावध्यारोप एव आत्मनैवोदनः पच्यते न तु देवदत्तेनेति एवं नाम पाकेनुकूलो भवतीत्यर्थः, तदेवं शुद्धे कर्मणि लकारोत्प-त्तेरर्थ एतेन, यद्येवं भिद्यते कुसूलेनेति भावे लो न स्यात् सकर्मकत्वात् अथाप्यत्र भिद्यते कुसूलेनात्मेति कर्मणि व्याख्यायेतैवमपि भेत्तव्यं कुसूलेन भिन्नं कुसूलेन ईषद्भेदं कुसूलेनेति भावे कृत्यक्तखलर्था न स्युः, न च तत्रापि कर्मणीति शक्यमाश्रयितुं नपुंसकलिङ्गदर्शनात्, तथा नमते दण्डः स्वय-मेव कारयते कटः स्वयमेव अचीकरत् कटः स्वयमेव यक्चिणोः प्रतिषिद्ध-योरपि शप्चङौ न स्याताम् अकर्तृत्वात् तस्मात्कर्मव्यापारमात्रवाचिभ्यः कर्त्तरि भावे च लादय इत्येतदेव साधीयः, तथा च वृत्तं पाक इत्यत्र पचेः कर्मव्यापारे कर्तृव्यापारे च वृत्तमिति भवति द्वयोरपि पाकशब्दाभि-धेयत्वात् एवं हि या विसृष्टा शास्त्रं न करिष्यामीति मतिः सापि त्याज्या असति सूत्रे 'न दुहस्नुनमां यक्चिणौ' विति प्रतिषेधस्य विषयो न प्रद-र्शितः स्यात्, किञ्च यद्यपि पच्यते ओदनः स्वयमेवेत्यादिकः प्रयोगः कर्मणि समर्थ्यते कर्त्तरि तु लकारोत्पत्तौ पचत्योदन इत्यादिकः प्रयो-गोपि प्रसज्येत तस्मादारब्धव्यं सूत्रम् । अत्रोदाहरणेषु कर्त्रन्तरव्युदासार्थं स्वयमिति प्रयुज्यते न त्वेतदुदाहरणाङ्गं, प्रयुक्तएतस्मिन्नात्मनेत्यस्यार्थे वृत्तेः प्राकृतमेवैतत्कर्म स्यात् स्वाश्रयमपि यथा स्यादिति. असति वत्करणे कर्त्तुः कर्मसंज्ञा ज्ञायेत ततश्चानेन कर्मणा सकर्मकत्वाद्भावे चाकर्मकेभ्य

इति भावे लो न स्यात् सति तु तस्मिन्नस्वतः प्राप्तस्याकर्मकव्यपदेशस्या-
निवर्त्तनादकर्मककार्याणामभावे लः सिद्धो भवति, अकर्मककार्याणामभावे यो लो
विधीयते स सिद्धो भवतीत्यर्थः, कथं सिद्धो भवति यावता नित्योयमति-
देशः नित्ये चास्मिंस्तत्र लविधिरपि कर्मकार्यमेवेति स्यादेवातिदेशः
आतिदेशिकाविरुद्धं स्वाश्रयं वतिना प्राप्यते न तु विरुद्धमपि नह्ययं विक-
ल्पार्थः कदा चित्कर्मवत्कदा चिदेति, अथ लान्तस्य कर्त्तेति वक्ष्यमाणत्वा-
देतत्सूत्रप्रवृत्तेः प्रागेव लः कर्मणि चेत्येतत्प्रवृत्तिरङ्गीक्रियते तच्च प्रवर्त्तमान-
मकर्मकत्वाद्भावे कर्त्तरि च प्रवर्त्तते यदा कर्त्तरि तदाऽयमतिदेश इति भावे
लविधिः समर्थ्येत, यद्येवं माभूदुतिः लकारवाच्यस्य कर्त्तुः कर्मसञ्ज्ञैवास्तु
यगात्मनेपदयोस्त्वप्रसिद्धिः परत्वाच्छबादीनां परस्मैपदस्य च प्रसङ्गः, न च
कर्मसञ्ज्ञया कर्तृसञ्ज्ञाया बाधः, एकसञ्ज्ञाधिकारादन्यत्र सञ्ज्ञानां समावे-
शात्, सत्यमुक्तोत्र परिहारः, तदेतद्वत्करणं सर्वसादृश्यार्थं तेनोदाहरणेषु
काष्ठादिभ्यो द्वितीया न भवति इतरथा कर्मकार्यत्वात्प्राप्नोति, अभि-
हितत्वान्न भविष्यति, भवेदयं परिहारः शास्त्रातिदेशे, कार्यातिदेशे त्वनेनैव
कर्मकार्याणि प्राप्यन्ते न चात्रानभिहिताधिकारोस्तीति स्यादेव द्वितीया
वत्करणात्तु सर्वसादृश्यार्थाद्यथा कर्मण्यभिहिते न भवति एवं कर्त्तर्यपीति
द्वितीयाभावः, यदा तर्ह्यकर्मकत्वाद्भावे लकारस्तदा प्राप्नोति तत्राह । 'लि-
ङ्याशिष्यङित्यादि' । तत्र लग्रहणमनुवृत्तं षष्ठ्या विपरिणम्यतइत्यभिप्रा-
येणाह । 'लान्तस्य कर्त्तेति' । लकारवाच्यः कर्त्तेत्यर्थः । 'कुसूलाद् द्वितीया न भव-
तीति' । भिद्यते कुसूलेनेत्यनन्तरोदाहृतेषु उदाहरणेषु तु वत्करणादेव सर्व-
सादृश्यार्थाद् द्वितीयाया अभाव इति भावः । तदेवं वृत्तिकारस्याभिप्रेतमेतद्वृ-
त्तिः सर्वसादृश्यार्थे इति । किं च नावश्यं द्वितीयैव कृत्यक्तखलर्था अप्यस्मिन्विषये
कर्त्तर्यतिदेशेन प्राप्नुवन्ति भेत्तव्यः कुसूलः स्वयमेव भिन्नः कुसूलः स्वयमेव ईष-
द्भेदः कुसूलः स्वयमेवेति भाव एव चेष्यन्ते भेत्तव्यं कुसूलेन कुसूलस्य वा 'कृत्या-
नां कर्त्तरि वा,' भिन्नं कुसूलेन ईषद्भेदं कुसूलेनेति अत्र वार्त्तिके क्तग्रहणमन्यत्र स-
हपाठात्पठितं यथा कक्कारो गुणवृद्धिप्रतिषेधार्थ इति भवत्येव ह्यस्यो ऽकर्मक-
त्वाद् गत्यर्थाकर्मकेति कर्त्तरि क्तः, तथा च सिनोतेर्ग्रासकर्मकर्तृकस्येति वक्त-

मिति निष्ठान्तत्वे । सिनो ग्रासः स्वयमेवेति कर्त्तरि क्त उदाहरिष्यति तस्मात्कृत्यखलर्थेष्वेव दोषो ऽतस्तत्र लान्तस्य कर्मण्याश्रयणादेवासिद्धेरा-भावः। 'कर्मणेति किमिति'। धातुवाच्या क्रिया कर्तृकर्मणोरेव समवेता तत्र सादृश्यस्य भेदाधिष्ठानत्वात्कर्तृस्थया क्रियया तुल्यक्रियः कर्ता न सम्भवतीति कर्मस्थैव क्रिया आश्रयिष्यत इति मत्वा प्रश्नः। 'करणाधिकरणाभ्यामिति'। तत्स्थक्रिययेत्यर्थः।'साध्वसिश्छिनत्तीति'। किं पुनरत्र करणाधिकरणव्यापारमात्रे धातुर्वर्तते आहोस्वित्तत्र कृत्स्नधात्वर्थाध्यारोपः, न तावदाद्यकल्पः तावति धातोरप्रवृत्तेरसिना छिनत्तीत्यत्रापि नैव करणव्यापारो धातुनोपादीयते केवलं करणस्यावान्तरव्यापारोऽस्तीत्येतावत्, द्वितीये तु भिन्नक्रियत्वादेवाप्रसङ्गः, तस्मात्करणाधिकरणव्यापारमात्रेऽपि धातोर्वृत्तिमङ्गीकृत्य प्रत्युदाहृतं द्रष्टव्यं, क्वचित्तु करणेनापि तुल्यक्रियस्य कर्मवद्भाव इष्यते यदाह करणेन तुल्यक्रियः कर्ता बहुलमिष्यते, परिवारयति कण्टकैर्वृक्षम्परिवारयन्ते कण्टका वृक्षम् आत्मनेपदं भवति वृत्तिकारस्तु णिचश्चेत्यात्मनेपदमुपपद्यत इति मन्यमानो नैतदुपसमचष्ट । 'धात्वधिकारात्समाने धाताविति'। एकस्यैव धातोरित्यर्थः। एतच्च प्रागेव व्याख्यातं, 'कर्मस्थभावकानामित्यादि'। यद्यपि क्रियाभावशब्दयोरभिन्न एवार्थस्तथा च 'यस्य च भावेन भावलक्षण'मिति क्रियापि गृह्यते लक्षणहेत्वोः क्रियायाः कर्मणा तुल्यक्रिय इति च वाच्योऽपि, तथाप्यस्मिन् ग्रन्थे भेदेनोपादानादर्थभेदो द्रष्टव्यः। अपरिस्पन्दरूपो धात्वर्थो भावः, परिस्पन्दरूपस्तु क्रिया क्व पुनरसौ कर्मस्थः क्व वा कर्तृस्थः । केचिदाहुः । येषु कर्मव्यापारोपसर्जनः कर्तृव्यापारोऽभिधीयते तेषु कर्मस्थः, येषु कर्तृव्यापार एव तेषु कर्तृस्थ इति । नेति वयं, प्रधानक्रिया यत्र समवैति कर्तरि कर्मणि वा तत्स्थो धात्वर्थः यदुद्देशेन कारकव्यापारः सा प्रधानक्रिया यथा पचेर्विक्लित्तिः, गमेर्देशान्तरप्राप्तिः, एवञ्च कृत्वा न्यग्भवनोपसर्जनन्यग्भाववचनोऽपि रुहिः कर्तृस्थक्रियः। 'आरोहन्ति हस्तिनं हस्तिपका इति'। उपरिदेशप्राप्तिरूपायाः कर्तरि समवायात् तत्रैव कर्मस्थेन व्यापारेण कर्तृव्यापारस्योपमानात्, अस्य चार्थस्य कर्तृस्थव्यापारेष्वसम्भवाद्यथाप्राप्त एवार्थो वृत्तिकारेण दर्शितः. तत्र कर्मस्थव्यापारस्य

कर्तृस्थस्य चोदाहरणमात्रं श्लोकेन दर्शयति । 'कर्मस्थः पचतेर्भाव इति'। पच्यते घट इत्यत्र तद्देशस्यैव घटस्य पाक इति भावोऽसौ भवति कर्मस्थश्च पच्यते ओदन इत्यत्र परिस्पन्दत एव पाक्यस्य पाकाभिनिर्वृत्तिरिति कर्मस्थैव पचेः क्रिया भवति । 'कर्मस्था च भिदेः क्रियेति' । भिद्यते कुसूल इत्यत्रावयवविश्लरणात्मिका भिदिक्रिया भेदस्य परिस्पन्दे सति भवतीति कर्मस्था च भिदेः क्रिया भवति। 'मासासिभावः कर्तृस्थ इति'। मासमास्त इत्यत्र कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मकाणामिति मास-कर्मकोऽयमासिधातुः, तत्र मासासिधातौ प्रतीयमानोऽर्थो भावोऽपरिस्प-न्दरूपत्वात् स च कर्तृस्थ इत्यर्थः । 'कर्तृस्था च गमेः क्रियेति' । गमे-रर्थः क्रिया सा च कर्तृस्थेत्यर्थः । तेनास्यते मासः स्वयमेव गम्यते ग्रामः स्वयमेवेति न भवति । अथेह कथं कर्मवद्भावः, तस्मादुदुम्बरः सलोहितं पच्यते फलमिति, अत्राहुः । पचिरत्र विषये द्विकर्मकः वृक्षस्य पाकमन्तरेण फलस्य पाकासम्भवात्, तत्राप्रधाने दुहादीनामिति वृक्षो ऽकथितं कर्मेति तत्र लकारः कालस्तु कर्त्तेति । इदन्तु वक्तव्यमेव सृजि-युज्योः श्यंस्त्विति सृज विसर्गे युजिर् योगे अनयोः सकर्मकयोः कर्त्ता कर्म-वद्भवति तत्र सृजेः श्रद्धोपपन्ने कर्त्तरि कर्मवद्भावः, यग्विषये च श्यन् चिण्वि-षये तु चिणेवेष्यते, सृज्यते मालां देवदत्तः श्रद्धया निष्पादयतीत्यर्थः, श्यनि सति प्रकृतेराद्युदात्तत्वं भवति यकि तु सार्वधातुकानुदात्तत्वे यक एवो-दात्तत्वं स्यात् असर्जि मालां श्रद्धया निष्पादयति स्मेत्यर्थः, युजिर् युज्यते ब्रह्मचारी योगेन ॥

"तपस्तपःकर्मकस्यैव" ॥ क्रियाभेदाद्व्यर्थमिदमिति वक्ष्यति, कथं तर्ह्येवकारस्यान्वय इत्याशङ्क्य वाक्यभेदेन व्याचष्टे । 'तप सन्तापे अस्य कर्त्ता कर्मवद्भवति स च तपः कर्मकस्यैवेति' । एवकारस्य व्यवच्छेद्यं दर्शयति । 'नान्यकर्मकस्येति' । एतच्च श्रुतस्यैवकारस्यान्वयो वक्तव्य इति मत्वोक्तं न पुनरस्य किं चित्प्रयोजनमस्ति । 'क्रियाभेदादिति' । अत्यन्तभेदा-दित्यर्थः । नियमपक्षेऽपि क्रियायां च भेदोऽपेक्षितः, तुल्यत्वस्य भेदाधिष्ठा-नत्वात् । क्रियाभेदमेव दर्शयति । 'उपवासादीनीति' । 'दुःखयन्तीत्यर्थे'

Digitized by Google

इति’। सुखदुःख तत्क्रियायामिति चुरादिपाठाणिच्, अनेन तापसस्य कर्मत्वे तपेर्दुःखनमर्थ इति दर्शितम्। ‘अर्जयतीत्यर्थ इति’। अनेनापि तापसस्य कर्तृत्वे तपेरर्जनमर्थ इति दर्शितं, क्वचित्स्वार्जयतीति पाठः, तत्राङ्पूर्वस्य प्रयोगः, नन्वेवमपि शरीरसन्तापलक्षणा क्रियाऽवस्थाद्वयेपि तुल्या नहि शरीरसन्तापादन्यदर्जनं तापसस्य व्यापारः, तदसत्। वस्तुस्थित्या सतोपि शरीरसन्तापस्याशब्दार्थत्वात्, कथमन्यथा तपसः कर्मत्वं, तस्मादर्जनं निष्पादनमलब्धस्य लाभः दुःखं तु शरीरसन्ताप एवेति स्पष्ट एव क्रियाभेदः। विध्यर्थमेतदिति यदुक्तन्तदेवोपसंहरति। ‘पूर्वेणाप्राप्तः कर्मवद्भावो विधीयत इति’। ‘अतप्त तपस्तापस इति’। ‘तपोनुतापे चे’ति चिणः प्रतिषेधात्सिच्, झलो झलीति लोपः॥

“न दुहस्नुनमां यक्चिणौ”॥ दुह प्रपूरणे ष्णु प्रस्रवणे, टुदु उपतापे हसे हसने णु स्तवने इत्येतेषां तु ग्रहणं न भवति, नोतिहसत्योरकर्मकत्वात्, यदि च तेषां ग्रहणमिष्टं स्यादसन्देहार्थं न दुनुहस्नमामित्येव ब्रूयात्, अवयवप्रसिद्धेश्च समुदायप्रसिद्धिर्बलीयसी। कर्मवद्भावापदिष्टाविति,। एतेनानन्तरस्य विधिर्वा भवति प्रतिषेधो वेति कर्मवत्कर्मणेति प्राप्तयोर्यक्चिणोरयं प्रतिषेधो न तु ‘चिण् भावकर्मणोः’ ‘सार्वधातुके यगि’ति शुद्धे कर्मणि भावे प्राप्तयोरिति दर्शयति। ‘दुग्ध इति’। यकि प्रतिषिद्धे शप्, तस्य अदादित्वाल्लुक्, ‘दादेर्धातोर्घः’, ‘झषस्तथोर्धोऽधः’ जश्त्वं दुहिरयं द्विकर्मकः, तत्राप्रधाने दुहादीनामिति यस्मिन्कर्मणि लकारस्तस्य कर्तृत्वविवक्षा प्रधानं तु कर्म कर्मैवेति, यथा स्वयं प्रदुग्धेस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनीति। ‘अदुग्धेति’। णिच्, भावे क्सः, लुग्वा दुहेत्यादिना तस्य लुक्। नन्विदानीमेवोक्तं दुहेरनेन यक् प्रतिषिध्यते चिण् तु दुहश्चेति पूर्वमेव विकल्पित इति, तस्माच्चैतदत्रोदाहर्तव्यम्। ‘प्रस्नुत इति’। यकि प्रतिषिद्धे पूर्वं श्नुपो लुक्। ‘प्रास्नोष्टेति’। चिण्प्रतिषेधे सिच्। ‘नमत इति’। अन्तर्भावितण्यर्थोऽत्र नमिस्तत्र यथा नमयति दण्डं देवदत्तः, नमयते दण्डः स्वयमेवेति ण्यन्तस्य कर्मस्थक्रि-

यस्त्वमेवमस्यापि द्रष्टव्यम् । 'णिश्रन्थिग्रन्थीत्यादि' । णीति णिङो णिचश्च सामान्येन ग्रहणं, श्रन्थ ग्रन्थ सन्दर्भे चुरादावाश्रृषोयो तयोर्णिज्भावपक्षे ग्रहणं, तथा क्र्यादिष्वपि पठ्येते तयोरपि ग्रहणं, ब्रूञ् व्यक्तायां वाचि आत्मनेपदविधावकर्मका ये धातवो निर्दिष्टास्ते यदान्तर्भावितण्यर्थाः सकर्मका भवन्ति तदमे आत्मनेपदाकर्मकाः । वृत्तौ क्व चिदेषामुदाहरणानि पठ्यन्ते क्व चित्र, णिचि, कार्यते कटः स्वयमेव, अचीकरत कटः स्वयमेव, यक्चिणोः प्रतिषिद्धयोः शप्चङौ भवतः, णिङ्, पुच्छमुदस्यति उत्पुच्छयते गौः, स यदान्तर्भावितण्यर्थस्तदा उत्पुच्छयते गां, पुनः सौकर्यातिशयेन कर्तृत्वविवक्षायामुत्पुच्छयते गौः स्वयमेव, उदपुपुच्छत गौः स्वयमेव, श्रन्थिग्रन्थ्योराश्रृषीययोः ग्रन्थति ग्रन्थं देवदत्तः, श्रन्थति मेखलां, ग्रन्थते ग्रन्थः स्वयमेव अग्रन्थिष्ट ग्रन्थः स्वयमेव, श्रन्थते मेखला स्वयमेव अश्रन्थिष्ट मेखला स्वयमेव, क्रैयादिकयोस्तु ग्रथ्नीते ग्रन्थः स्वयमेव श्रथ्नीते मेखला स्वयमेव । ब्रूञ्, ब्रवीति कथां देवदत्तः, ब्रूते कथा स्वयमेव, वचनं शब्दप्रकाशनफलत्वात्कर्मस्थम्, आत्मनेपदाकर्मक, 'वेः शब्दकर्मणः' 'अकर्मकाच्च' विकुर्वते सैन्धवाः वल्गन्तीत्यर्थः, तान्यदान्यो वल्गयति तदा तेषां कर्मत्वं, पुनः सौकर्यातिशयात्कर्तृत्वविवक्षायां विकुर्वते सैन्धवाः स्वयमेव व्यकृषत सैन्धवाः स्वयमेव, यक्चिणो न भवतः, क्व चित्तु वृत्तौ आहन्ति माणवकम्, आहते माणवकः स्वयमेवेति पठ्यते, तदयुक्तम्, आहन्ति माणवकमिति सकर्मकत्वादात्मनेपदाभावाच्च, अन्ये पुनराहुः । आत्मनेपदाकर्मकेति धातूपलक्षणं हन्तिश्चाय 'माङो यमहत' इत्यत्र यदा कर्माविवक्षया ऽकर्मकस्तदात्मनेपदस्य निमित्तं स्यात्तस्याप्यसकर्मकत्वे ग्यविरुदुदाहरणमिति, भूषाकर्मकिरादिसनां यक्चिणोः प्रतिषेधो वक्तव्यः, कर्मशब्दः क्रियावाची भूषाफलं च शोभाख्यं कर्मणि दृश्यतइति कर्मस्था भूषा, अलङ्कुरुते कन्या स्वयमेव अलंकरिष्यते कन्यास्वयमेव अलमकृत कन्या स्वयमेव, अवकिरते हस्ती स्वयमेव अवाकीर्ष्ट हस्ती स्वयमेव अवकरिष्यते हस्ती स्वयमेव, यक्चिण्चिण्वद्भावा न भवन्ति, सन्, मुमुक्षते वत्सः स्वयमेव अमुमुक्षिष्ट वत्सः स्वयमेव, चिकीर्षते कटः स्वयमेव अचिकीर्षिष्ट कटः

Digitized by Google

स्वयमेव प्रकृत्यर्थापेक्षमत्र कर्मस्थक्रियत्वम्, इच्छा तु कर्तृस्था, सार्थे च प्रकृत्यर्थस्य प्राधान्यं तदर्थत्वादिच्छायाः ॥

"कुषिरजोः प्राचां श्यन् परस्मैपदं च" ॥ 'यगात्मनेपदयोरपवादाविति'। श्यन्यकोपवादः परस्मैपदमात्मनेपदस्य, श्यन्यकोश्चात्र नुमि स्वरे च विशेषः, कुष्यन्ती जङ्घा, श्यनि 'शप्श्यनोर्नित्य'मिति नित्यं नुमागमः, नित्त्वाच्चाद्युदात्तत्वं भवति, यकि 'आच्छीनद्योर्नुमि'ति नुम्विकल्पः, लसार्वधातुकानुदात्तत्वे च यक एवोदात्तत्वं स्यात्। 'रज्यतीति'। अनिदितामिति नलोपः। कुष्यते रज्यत इति पक्षे यगात्मनेपदे भवतः। 'लिङ्लिटोरिति'। आशिषि लिङत्र गृह्यते यदुक्तं कुषिरजोः श्यन्विधाने सार्वधातुकवचनमवचने हि लिङ्लिटोः प्रतिषेध इति। 'स्यादिविषये चेति'। आदिशब्देन सिजादीनां ग्रहणम्। 'चुकुषे रञ्ज इति'। लिट् आत्मनेपदं तस्य एशादेशः। 'कोषिषीष्टेति'। 'लिङः सीयुट्' 'सुट्तिथोः' लघूपधगुणः। 'रङ्क्षीष्टेति'। एकाच इतीट्प्रतिषेधः, 'चोः कु'रिति कुत्वं गकारः, तस्य चर्त्वं ककारः। 'अकोषि अरञ्जीति'। चिण् ॥

"धातोः" ॥ आ कुतोऽयमधिकारः, किं प्राग्लादेशाद् आहो स्विदाध्यायपरिसमाप्तेरिति विचारे द्वितीयं पक्षमाश्रयति। 'आध्यायपरिसमाप्तेरिति'। एशः शित्करणात्, तद्धि धातोरित्यधिकारे सति 'तस्मादित्युत्तरस्य' 'आदेः परस्य' तकारस्य स्थाने एत्वे सति अकारस्य स्थाने टेरेत्वे अयादेशे च सत्यर्थशब्दस्य श्रवणं मा भूदित्येवमर्थं क्रियते प्राग्लादेशात्तु नद्वृत्त्वधिकारे ऽलोन्त्यस्य विधयो भवन्तीति एकारस्यैकारवचने प्रयोजनं नास्तीति कृत्वान्तरेणापि शकारमन्त्ये ऽल्यनुसंहारं बाधित्वा सर्वादेशो भविष्यति किं शकारेण, यदाध्यायपरिसमाप्तेरयमधिकारः, आद्ये योगे न व्यवाये तिङः स्युः, आद्ये योगे तिबादिसूत्रे येमी लावस्थायां स्यादयो विधीयन्ते तेषु कृतेषु तैर्व्यवधाने तिबादयो न स्युः, करिष्यति हरिष्यति कर्त्ता, शबादिषु तु न दोषः, तेषां सार्वधातुकाश्रयत्वादकृते लादेशे प्राप्त्यभावात् तिबादयश्च तत्र सावकाशाः, न स्यादेत्वं टेष्टितां यद्विधत्ते व्यवायद-

Digitized by Google

स्येव पचते यजते, क्व तर्हि स्यात् आस्ते शेते धत्ते हन्ते वेभिद्यते इत्यादौ यत्र न विकरणाः सन्ति एशः शित्त्वं लिटस्तझयोरेशिरेच्य एश्‌मित्यनेकाल्‌शित्सर्वस्य, एतच्चोपक्रमएव व्याख्यातं, यच्च लोटो विधत्ते तच्च विकरणव्यवाये न स्यात् 'लोटो लङ्वत्' 'एरुः' 'सेर्ह्यपिच्च' त्यादि पचतु पचतमित्यादि, स्तौतु जुहोतु भिनत्तु आस्तामित्यादावेव स्यात्, यच्चाप्युक्तं लङ्लिङोस्तच्च न स्यात् 'नित्यं ङितः' इतश्च 'तस्थस्थमिपां तान्तन्तामः' 'लिङः सीयुट्' 'यासुट् परस्मैपदेषूदात्तो ङिच्च' त्यादि, तथा 'थासः से' पचसे इत्यादौ न स्यात् । नैष दोषः । विहितविशेषणं विज्ञास्यते धातोर्विहितस्य लोट इति, यद्येवं 'विदो लटो वे' त्यत्रापि विदेर्धातोर्विहितस्य लटस्तिबादीनां णलादय इति विज्ञायमाने विन्दति विन्दतः विन्दन्तीति लाभार्थस्य विकरणेन व्यवायेपि णलादयः प्राप्नुवन्ति, न क्वचिद्विहितविशेषणं धातुग्रहणमिति सर्वत्र तथा भवितव्यम् । अथ वात्र धातुना विहितं विशेषयिष्यामो विदिना ऽऽनन्तर्यं, धातोर्विहितस्य लटो विदेरनन्तरस्येति, 'सिजभ्यस्तविदिभ्यश्चे' त्यत्रापि धातुना विहितं विशेष्यते अभ्यस्तेन चानन्तर्यं धातोर्विहितस्याभ्यस्तादनन्तरस्य ङितो झेर्जुसिति तेनाजक्षिष्टाम् अजागरिष्यवित्यादौ न भविष्यति, आत इत्यत्र कथं, यदि तावद्धातोर्विहितस्याकारादनन्तरस्येति अलुनन् अपुनन् अत्रापि प्राप्नोति, अथ आकारान्ताद्धातोर्विहितस्येति, अपिबवित्यत्र प्राप्नोति, अस्तु धातोर्विहितस्याकारादनन्तरस्येति अलुनन् अपुनन् इत्यत्र लुना झि इति स्थिते 'श्नाभ्यस्तयोरातः' इति लोपे कृते आकाराभावान्न भविष्यति नात्र लोपः प्राप्नोति 'ईहल्यघो' रितीत्त्वेन बाध्यते एवमप्याकाराव भविष्यति, नापीत्त्वं प्राप्नोति अन्तिभावेन बाध्यते, नात्रान्तिभावः प्राप्नोति जुस्भावेन बाधनात्, तदेवं लोप ईत्त्वेन ईत्त्वमन्तिभावेन अन्तिभावो जुस्भावेन जुस्भावो लोपेन लोप ईत्त्वेनेति चक्रकमव्यवस्था प्राप्नोति । नैष दोषः । आयचादिषूपदेशिवद्वचनादुपदेशकालएव झस्यान्तिभावे कृते लोपो लोपेन व्यवस्था, किं चात इत्यत्र सिज्ग्रहणमनुवर्त्तते आकारान्तात्सिज्लुगन्तादिति तेन न कश्चिदनिष्टप्रसङ्गः, तदेवमाध्यायपरिसमाप्तेर्धात्वधिकार

Digitized by Google

इति स्थितं, वक्ष्यति 'तव्यत्तव्यानीयर' इति, किं च स्यात् यदि तव्यादिविधौ धातोरिति नानुवर्त्तेत ङ्याप्प्रातिपदिकादपि तव्यादयः स्युः, साधने तव्यादयो विधीयन्ते साधनं च क्रियायाः क्रियाया अभावात्साधनाभावः साधनाभावान् ङ्याप्प्रातिपदिकात्तव्यादयो न भविष्यन्ति, कथं तर्हि कर्मादिषु विधीयमाना द्वितीयादयो भवन्ति, नैव प्रातिपदिकार्थस्य साधने द्वितीयादयः किं तर्हि शब्दान्तरवाच्यक्रियापेक्षे तस्यैव कर्मादिभावे, तव्यादयस्तु प्रकृतिवाच्यक्रियापेक्षे साधने चरितार्था न ङ्याप्प्रातिपदिकाद्भविष्यन्ति, इदं तर्हि प्रयोजनं सत्याणाप्रयेत्यादयो येऽपभ्रंशाः क्रियावचनास्तेभ्यस्तव्यादयो मा भूवन्निति, नहि ते धातवः, भूवादिपाठाश्रयत्वाद्धातुसंज्ञायाः, किं च सोपसर्गाल्लङादयो मा भूवन्निति धात्वधिकारः क्रियते अन्यथा प्राकरोत्प्रास्थित अध्यैष्टेति धातूपसर्गसमुदायस्य विशिष्टक्रियावचनत्वात्ततः प्रत्ययविधावङ्गसंज्ञायामडादिप्रसङ्गः, चोदयति। 'धातुग्रहणमनर्थं यङ्विधौ धात्वधिकारादिति'। धातोरेकाच इत्यत्र यङ्विधौ धात्वधिकारादिति धातोरेकाच इत्यत्र यङ्विधौ यद्धातुग्रहणं तस्येहाधिकारादित्यर्थः। परिहरति। 'कृदुपपदसंज्ञार्थं त्विति'। एतदेव व्याचष्टे। 'अस्मिन्निति'। अस्मिन्नेवेत्यवधारणं द्रष्टव्यं तद्दर्शयति। 'पूर्वत्र मा भूतामिति' असत्यस्मिन्नधिकारे धात्वधिकारे यत्सप्तम्या निर्दिष्टं तदुपपदमित्येतावानर्थः स्यात् ततश्च पूर्वत्रापि स्यात् 'च्लि लुङि' लुङन्त उपपदे च्लिरिति, एवं कृत्संज्ञापि धातोर्विहितस्यातिङो भवतीति पूर्वत्रापि स्यात् ततश्च करिष्यतीत्यत्र स्यप्रत्ययस्य कृत्संज्ञायां कृदन्तं प्रातिपदिकमिति प्रातिपदिकत्वे सति तिङान्तेऽप्येकत्वे वचनग्रहणादेकवचनस्य चोत्सर्गत्वात्सोरुत्पत्तिः प्रसज्येत तस्मादस्मिन्धात्वधिकारे यथा स्यातां पूर्वत्र मा भूतामिति पुनर्धात्वधिकारः क्रियते। ननु चाधिकारेण ते संज्ञे विधास्यते प्रत्ययसंज्ञा च तत्र ते पूर्वत्र भविष्यत इत्याशङ्क्य प्रयोजनान्तरमाह 'आर्द्धधातुकसंज्ञार्थं चेति'। कः पुनरार्द्धधातुकसंज्ञायां द्वितीयधातुग्रहणस्योपयोग इत्यत आह। 'धातोरित्येवं विहितस्येति'। 'लूभिरिति'। अत्र सत्यपि प्रातिपदिकत्वे धातुत्वमप्यस्ति पूर्वप्रवृत्ताया धातुसंज्ञाया अनिवर्तनात् ततश्च

Digitized by Google

धातोरेवायं विहित इति आर्द्धधातुकसंज्ञा स्यादेव. यदि तु शर्मि धातो-रित्यत्र धातुग्रहणस्य द्वितीयस्यार्द्धधातुकसंज्ञार्थं स्वरितत्वं प्रतिज्ञायेत अयमप्यधिकारः शक्योऽकर्तुं वासरूपविधिरप्यधिकारेण सिद्धस्तेन क्सादि-भिः सिचः समावेशो न भविष्यति ॥

"तत्रोपपदं सप्तमीस्थम्" ॥ सप्तमीस्थमित्यस्यार्थमाह । 'सप्तम्या निर्दिष्टमिति' । सप्तम्या विभक्त्योच्चारितमित्यर्थ । सप्तम्यन्तेन पदेन प्रतिपादितमिति वा, अस्मिन्पक्षे सूत्रे सप्तमीशब्देन सप्तम्यन्तमुच्यते सप्तम्यन्ते पदे कर्मणीत्यादौ प्रतिपाद्यत्वेन स्थितं कुम्भादिकमित्यर्थः, प्रथमे तु पक्षे कर्मणीत्यादेर्यः सप्तम्या निर्देशः स एव कुम्भमित्यादेरपि प्रयोगगतस्य सप्तम्या निर्देशः यथा 'तस्यापत्य' मित्यादौ तस्येति सामान्यं विशेषोपलक्षणार्थमिति तदीयमेव प्राथम्यं विशेषाणामपि भवति तद्वद-त्रापि। 'कुम्भकार इति' । अत्रोपपदत्वात्समासः कृदुत्तरपदप्रकृतिस्वरत्वं च भवति। 'स्थग्रहणमित्यादि' । सूत्रेषु यः सप्तम्या विभक्त्या निर्देश उच्चा-रणं सप्तम्यन्तेन वा पदेन प्रतिपादनं तदेव संज्ञाङ्गमिति प्रतिपत्त्यर्थमि-त्यर्थः । ननु सप्तमीशब्देन साहचर्यात्सूत्रादिग सप्तम्या निर्दिष्टं ग्रहीष्यते नार्थ एतदर्थेन ग्रहणेन तत्राह । '[1]अन्यथा हीति' । मुख्यार्थसंभवे गौणस्या-ग्रहणात् सप्तम्या एव संज्ञा स्यात् संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्र-तिषेधात्, न चासतस्संज्ञिनः संज्ञा शक्या विधातुमिति यत्र सप्तमी श्रूयते तत्रैव स्यादित्यर्थः। 'स्तम्बेरम इति'। 'स्तम्बकर्णयोरमिजपोरि'त्यच् 'तत्पु-रुषे कृति बहुल' मित्यलुक्। 'यद्ववेति'। यत्र सूत्रे सप्तमीश्रुतिः सप्तमीश-ब्दस्य श्रवणमित्यर्थः । 'अशब्दसंज्ञेति' । स्वरूपग्रहणप्रतिषेधादभ्युपगम्य वादोऽयं सर्वथेष्टं न सिद्ध्यतीत्यत्र तात्पर्यम् । 'स्थग्रहणात्त्विति'। स्थग्रहणे सति सौत्रसप्तम्युपलक्षितस्य संज्ञाविधानात्सर्वत्र सिद्ध्यतीत्यर्थः । ननु च लघ्वर्थं संज्ञाकरणं तत्किमर्थं गुर्वी संज्ञा क्रियत इत्यत आह । 'गुरुसंज्ञाकर-णमिति' । उपोच्चारितं पदमुपपदमित्येवमर्थानुगता संज्ञा अन्वर्थसंज्ञा । 'समर्थपरिभाषाव्यापारार्थमिति' । इह यदा स्वार्थद्रव्यलिङ्गात्मकस्त्रिकः

१ इतरथेति २ पुस्तके पाठः स एव मुद्रितमूलपुस्तकानुगुणः ।

Digitized by Google

प्रातिपदिकार्थस्तदा नान्तरेण विभक्तिं कर्मादिकारकाण्युपपदमुपपद्यत इत्य-
वश्यमुत्पाद्या विभक्तिरिति पदविधित्वादेव सिद्धः परिभाषाव्यापारः,
पञ्चकपक्षे तु प्रातिपदिकस्यैव कर्माद्यभिधायित्वेन पदविधित्वाभावा-
त्परिभाषाव्यापारो न स्यादित्यन्वर्थया संज्ञया बलात्प्रवर्त्यते। नैतदस्ति।
पञ्चकपक्षेऽपि विभक्त्युत्पत्त्या पदत्वे सत्येव प्रत्यय इति प्रतिपादनात्,
ननु गतिकारकोपपदानां कृद्भिस्सह समासवचनं प्राक् सुबुत्पत्तेरिति वच-
नात्कथमुपपदस्य सुबन्तत्वं, सामि स्मृतो भवान्, 'उपपदमतिङ्' इत्यत्र हि
सुपेति तृतीयान्तमेव निवृत्तं सुबिति प्रथमान्तमनुवर्त्तत इत्यदोषः। कथ-
मन्यथा चर्मकारादौ नलोपादि स्यात् 'पश्य कुम्भं करोति कटमिति'।
धातोरिति वर्त्तते कर्मादिशब्दाश्च संबन्धिशब्दाः तत एवं विज्ञास्यामो यस्य
धातोर्यत्कर्मेति, एवमपि महान्तं कुम्भं करोतीत्यत्र प्राप्नोति न वा भवति
महाकुम्भकार इति भवति यदेतद्वाक्यं महान् कुम्भो महाकुम्भः महा-
कुम्भं करोतीति, यदा त्वेतद्वाक्यं महान्तं कुम्भं करोतीति तदा नेष्यते,
किं च स्याद् यद्यत्र स्यात् कुम्भशब्दस्य कारशब्देन समासे कृते तदर्थ-
स्यैकार्थीभावात् महच्छब्देन समासो न स्याद् अन्वर्थत्वादेव संज्ञायाः
सप्तमीनिर्दिष्टत्वेऽपि प्रकृत्यर्थविशेषणात्तद्विशेषणानां च उपोच्चारित-
पदत्वाभावादुपपदसंज्ञा न भवति, अथ तत्रग्रहणं किमर्थं धात्वधिकारः
प्रतिनिर्दिश्यते तत्रैतस्मिंस्तृतीये धात्वधिकार इति, नैतदस्ति प्रयोजनम्,
अधिकारादप्येतत्सिद्धम्। इदं तर्हि प्रयोजनं सप्तमीस्थस्य प्रत्ययोत्पत्तिं
प्रति निमित्तत्वं यथा स्यादिति, कथं प्रत्यय इति वर्त्तते सप्तमीस्थमुप-
पदसंज्ञं भवति तत्र चोपपदे सत्येव प्रत्यय इति, अथ कर्मणीत्यादिका
सत्सप्तमी तत्कृतोऽसत्युपपदे प्रत्ययप्रसङ्गः, न, कर्मणीत्यादिका सौत्री
सप्तम्यर्थापेक्षा तथा हि सत्यण्प्रत्ययस्याभिधेयं कर्म स्यात् यथा 'धः
कर्मणि ष्ट्रनि' ति तथा चोपपदत्वं न प्रतीयेत अतो यथेत्संज्ञार्थमनुनासि-
कत्वं प्रतिज्ञायते तथार्थनिरपेक्षा केवलमुपपदसंज्ञाया लिङ्गं सप्तमी तथा
च धातोरण् भवति कर्म चोपपदमित्येतावानर्थः स्यात् कर्मणः प्रत्ययो-
त्पत्तिं प्रति निमित्तत्वं न प्रतीयेत तस्मात्तदर्थं तत्रग्रहणं, किमिदानीं

॥ श्रियै नमः ॥

श्रीपतये नमः ।

श्रीमते रामानुजाय नमः ।

प्रणम्य जैमिनिमुनिं खण्डदेवकृताविह
अनुग्रहाय मन्दानां सङ्ग्रहोऽयं विधीयते ॥ १ ॥

अथ पूर्वमीमांसाया अवशिष्टा संकर्षण-संकर्ष*काण्ड-पदद्वयव्यवहृता चतुरध्यायी भाट्ट†दीपिकानामकव्याख्यासंवलिता आरभ्यते ।

ॐ अविघ्नमस्तु ॥ एवं द्वादशभिरध्यायैः प्रकृतिविकृतिभेदेन कतिपयान् न्यायान् संशोध्य तैरेव न्यायैरितस्ततो विप्रकीर्णान्वेदवाक्यार्थान्नैदम्पर्येण सम्यग् निष्कृष्य निर्णेतुमेषा चतुरध्याय्यारभ्यते । अत एव संकर्षे न प्रत्यधिकरणं सङ्गत्यपेक्षा ॥

सू० अनुयजतीति ॥ १ ॥

ज्योतिष्टोमे सोमस्याग्ने! वीहीत्यनुयजतीति श्रुते वाक्ये सोमयागोद्देशेन मन्त्रविधिः । इति-शब्देन करणत्वस्यानु-शब्देन पश्चाद्भाविनः कार्यस्य चोक्तिः । यागोत्तरमनुमन्त्रणं वा विधीयत इति प्राप्ते यजिश्रुत्योपस्थितस्य यागान्तरस्यैव सोमयागोत्तरकालविशिष्टस्य विधिः । तस्मादनुवषट् कृत्यं देवतानां तृप्त्या इति तृप्त्यर्थतावादस्यान्यथाऽनुपपत्तेः ॥

---

* यथा चैतस्याः संकर्षण-संकर्ष-काण्डपदेन व्यवहारस्तथा निरवोचाम शास्त्रदीपिकाभूमिकायाम् । श्रीभाष्ये तृतीयाध्याये तृतीयपादे प्रधानाधिकरणे श्रीभाष्यकाराः "तदुक्तं सांकर्षणे 'नाना वा देवतापृथक्त्वा'दि"ति सूत्रमुद्धरन्तः संकर्षकाण्डं संकर्षणकाण्डपदेनापि व्यवहरन्तीत्युभयथाऽपि व्यवहारः । यद्यपि शाङ्करभाष्यादिषु नाना वा देवता पृथग् ज्ञानादिति पाठ उपलभ्यते, उपलभ्यते चानन्दज्ञानादिकृतभाष्यव्याख्यानेऽपि तथा पाठसमादरः, तथाऽपि श्रीभाष्यस्थं नाना वा देवतापृथक्त्वादिति, शाङ्करभाष्यस्थं नाना वा पृथग् ज्ञानादिति चार्थकथनमात्रं न तु सूत्रानुपूर्वीनिर्देशः सङ्कर्षे देवताकाण्डे चतुर्दशाध्याये द्वितीयपादे "तेषां पृथक्" इति, "नाना वा इति च पृथक्सूत्रद्वयानुपूर्वीदर्शनात् । तदिदमग्रे चतुर्दशे स्फुटमिति नेह बहु प्रपञ्च्यते इति ॥

† यद्यपि संकर्षणचतुरध्यायी शबरस्वामिभिर्व्याख्याता तथाऽपि न तद्भाष्यमुपलब्धुमीश्महे इति सांप्रतमतिकष्टेन प्राप्तमिदमेव प्रकाशयामः ।

सू० स द्रोणकल*शात् ॥ २ ॥

सोऽयमनुवषट्कारो द्रोण†कलशस्थद्रव्येण यष्टव्यः, तस्य ध्रौ‡वाज्यवत् सर्वार्थत्वात् द्रोणकलशं प्रकृत्यैषा वा §एतेषां योनिरिति श्रुतेः। न सर्वं जुहोतीति वचनलब्धस्य सोमयागद्रव्यशेषस्य भक्षणार्थतयाऽप्युपपत्तेरिति प्राप्ते भक्षवदनुवषट्कारस्यापि पूर्वेष्टशेष एव द्रव्यम्। संस्था वा एषा यदनुवषट्कारः संस्थाभक्ष इति पूर्वद्रव्यसमापकत्वश्रुत्यविशेषात् स उ एव सोमस्य स्विष्टकृद्भाग इति श्रुत्याऽनुयागस्य स्विष्टकृद्भागत्वेन प्रतिपत्तित्वावश्यम्भावाच्च, एतेन सावित्रे नानुवषट्करोति न भक्षयतीत्यपि लिङ्गमुपपन्नम् ॥

सू० तन्त्रं प्रदानम् ॥ ३ ॥

तस्यार्थवादसहकृतमन्त्रवर्णसमर्पिताग्निस्विष्टकृद्देवताकतया दार्शपौर्णमासिकस्विष्टकृद्वदेव तन्त्रेणानुष्ठानमिति प्राप्तेऽनु-शब्देन तत्तदभ्यासोत्तरकालविधानेन तस्य चाव्यवहितस्यैव स्वरसतः प्रतीतेरावृत्तिः। न च पृषदाज्यवत्पात्रान्तरे स्थापनम्। एकदेशद्रव्यकत्वेनाप्रयोजकत्वात्। एतेन द्विदेवत्यर्तुयाजादिष्वनुवषट्कारनिषेधोऽप्युपपन्नः। एवमेव भक्षाणामप्यावृत्तिरुपपादनीया ॥

सू० शामित्रं तीर्त्वा ॥ ४ ॥

वाजपेये प्राजापत्यान्प्रकृत्य तान्पर्यग्निकृतानुत्सृजते ब्रह्मसामन्यालभत इति श्रुतयोः ||पर्यग्निकरणसं¶ज्ञपनयोर्मध्यवर्त्तिपदार्थः *शामित्रदेशं

---

* लोके कलस-शब्दस्य दन्त्योपधत्वेऽपि वेदे तालव्योपधपाठ एव साम्प्रदायिकः। शुक्लयजुःसंहितायाम् एकोनविंशाऽध्याये २८ मन्त्रे वायव्यैर्वायव्यान्याप्नोति स तेन द्रोणकलशमिति तालव्योपधपाठदर्शनात् ॥

† जुहूसदृशे महापुष्करे द्वे पात्रे ते द्रोणकलशपदवाच्ये ॥

‡ ध्रुवानामकपात्रस्थेनाज्येनेत्यर्थः ॥

§ तैत्तिरीयसंहितायां तृतीयकाण्डे द्वितीयप्रपाठके द्वितीयानुवाके द्रोणकलशऽभ्याधवनीय इति ॥

|| हविषामासमन्तात्प्रादक्षिण्येनोल्मुकस्य परिभ्रमणं पर्यग्निकरणमित्युच्यते ॥

¶ उपाकरणबर्हिषि प्रतीचीनशिरसमुदीचीनपादं पशुं शाययित्वा शमितारः संज्ञपयन्ति एवरीत्या पशोर्मरणं संज्ञपनमित्युच्यते ॥

* आग्नीध्र आहवनीयसमीपे उल्मुकं निधाय यथाऽऽगतन्निवृत्तः पुनः पर्येति तदनन्तरं प्रतिप्रस्थाता उपवेषेण पुरःषगार्हपत्यादुदीचोऽङ्गारान्निरूहति "मातरिश्वनो घर्मो-

प्रति प्रापणं, स च क्रतुपशुभिः सह *प्रातःसवन एव कार्यः। अधि†गुप्रैषस्य तदानीमेव वक्तव्यत्वात् । अन्यथा प्रैषस्यावृत्त्यापत्तेः । निष्ठाप्रत्ययोक्तस्योत्सर्जनपूर्वत्वस्य व्यवधानेऽपि भुक्त्वाऽऽगत इत्यादाविवाविरोधात् । यूपादुन्मोचनमेव वोत्सर्गपदार्थ इति कार्ष्णाजिनेर्मतेन प्राप्ते यूपादुन्मोचनादिप्राणवियोगान्तव्यापारस्यैकपदार्थत्वात्संज्ञपनकरणकभावनायाः सेतिकर्त्तव्यताकाया एवालम्भविधिनोत्कर्षादुत्सृजतिरितरव्यापारोपरममनुवदतीति क्त्वा-प्रत्ययोक्तमव्यवहितपूर्वत्वं न बाधनीयम् । अध्रिगोस्त्वावृत्तिर्मनो‡तादेरिव युक्तैवेत्युक्तम् ॥

श्रीति मन्त्रेण तानादय दक्षिणाया द्वारा दक्षिणेन विहारं प्रक्रमयजमानयूपानामन्तरत आहरन् स्वयं बहिर्गच्छन् अन्तरेण चात्वालोत्करावुदगत्वा शामित्रशालायां निदधाति अयं निहितोऽग्निः शामित्र इत्युच्यते। यश्च उर्ध्वाग्रमसिवत् स्फ्यं दक्षिणहस्ते धारयन्नुत्करदेशे च दक्षिणाभिमुखस्तिष्ठति अध्वर्युणा आश्रावणे कृते अस्तु-शब्दपूर्वकमौषट् शब्दोच्चारणरूपप्रत्याश्रवणं करोति स आग्नीध्र इति अग्नीदिति चोच्यते।

* अध्वर्युः अग्निर्मूर्धादिव इत्येकामाहुतिं द्वेमिन्द्राग्नी व्याहृतीश्च हुत्वाऽऽह प्रशास्तः प्रसुहि। तेन सर्प्यतेत्युक्ते सर्वे यथा प्रसृप्तं निःसर्प्यन्ति सनिष्ठन्ते प्रातः सवनम् अथ प्रातःसवनमित्यारभ्यैतदन्तं कर्म्मप्रातःसवनमित्युच्यते ॥

† अधिगुप्रैषाख्यो मैत्रावरुणप्रैषोऽभिहितः अथ होताऽधिगुमन्वाह। "दैव्याः शमितार" इति। अधिगुप्रैषमन्त्रस्तु। "दैव्याः शमितार उत मनुष्या आरभध्वम्। उपनयत मेध्या दुरः। यथायथाऽस्य श्रपणं तथास्तये" त्यन्तः। अत्र शमितारः-विशसनकर्तारः ते च द्विविधाः देवरूपा मनुष्यरूपाश्च ते एव सम्बोध्यन्ते हे दैव्याः शमितारः। अपि च हे मनुष्याः शमितारः यूयमुभयेऽपि वक्ष्यमाणं कर्म कर्तुमारभध्वम् इत्यर्थ इति साम्प्रदायिकाः।

‡ मनसा उता रचिता सर्वैर्देवैः प्रार्थिता देवता मनोतेति तैत्तिरीयब्राह्मणभाष्ये सायनाचार्याः, ततश्च मनोता-शब्देनाग्निरुच्यते "अग्निर्वै देवानां मनोतेति" श्रुतेः, तैत्तिरीयब्राह्मणे तृतीयकाण्डे षष्ठप्रपाठके दशमानुवाके,। "त्वं ह्यग्ने प्रथमो मनोतेति" श्रुतेश्च तैत्तिरीयसंहितायां च षष्ठकाण्डे तृतीयप्रपाठके नवमानुवाके, "पशोर्वा आलब्धस्य मनोऽपक्रामति मनोतायै हविषोऽवदीयमानस्यानुब्रूहीति" ॥

ऋग्वेदीयैतरेयब्राह्मणस्य द्वितीयपञ्चिकायां प्रथमाध्याये दशमखण्डे मनोतायै हविषोऽवदीयमानस्यानुब्रूहीत्याहाध्वर्युस्त्वं ह्यग्ने प्रथमोमनोतेति सूक्तमन्वाह तदाहुर्यदन्यदेवत्य उत पशुर्भवत्यथ कस्मादाग्नेयीरेयमनोतायै हविषोऽवदीयमानस्यान्वाहेति तिस्रो वै देवानां मनोतास्तासु हि तेषां मनांस्योतानि वाग्वै देवानां मनोता तस्यां हि तेषां मनांस्योतानि गौर्वै देवानां मनोता तस्मिन् हि तेषां मनांस्योतान्यग्निर्वै देवानां मनोता तस्मिन् हि तेषां मनांस्योतान्यग्निः सर्वा मनोता अग्नौ मनोताः सङ्गच्छन्ते तस्मादाग्नेयीरेव मनोतायै हविषोऽवदीयमानस्यान्वाहेति ।

सू० क्रत्वङ्गं वा ॥ ५ ॥

अ*ग्निं चित्वा सौत्रा†मण्या यजेतेति संयोगस्य कालार्थत्वाभावात्स्थण्डिलरूपद्रव्यार्थत्वमाराादुपकारकाणामपि पवमानहविषां द्रव्याङ्गत्वदर्शनात् ।

श्येनचितिं चिन्वीत ‡स्वर्गकाम इति फलार्थायाश्चितिक्रियाया आकाङ्क्षया तदङ्गत्वमेव वेति प्राप्ते सन्निपातिनोः स्थण्डिलचयनयोराराादुपकारकानाकाङ्क्षतया तत्संयोगात्क्रतुस्तदाख्य इति न्यायेन साग्निचित्यक्रतोरेव चिनोत्यर्थत्वात्क्रत्वङ्गं सौत्रामणी वैमृधवत्क्रतोरनन्तरमेवानुष्ठेया ॥

सू० चयनाङ्गं वा ॥ ६ ॥

§रुद्रो वा एष यदग्निस्तस्य तिस्रः शरव्याः प्रतीची तिरश्च्यनूची ताभ्यो वा एष आवृश्च्यते योऽग्निं चिनुतेऽग्निं चित्वा तिसृ॥धन्वमयाचितं ब्राह्मणाय दद्यात्ताभ्य एव नमस्करोत्यथो ताभ्य एवात्मानं निष्क्रीणीते इति श्रुतं तिसृधन्वदानमपि पूर्वन्यायेन क्रत्वङ्गमिति प्राप्ते स्थण्डिलस्यैव रुद्रत्वात्तदीयशरव्याभिरग्निचित आव्रश्चनमेतद्दानेन ताभ्य आ-

---

* तैत्तिरीयसंहितायाः पञ्चमकाण्डे षष्ठप्रपाठके तृतीयानुवाके ।

† सप्तमीहविर्यज्ञसंस्था पशुत्रयसाध्या सौत्रामणीशब्देनोच्यते सा द्विविधा एका कौकिली अपरा चरका अग्निं चित्वा सौत्रामण्या यजेतेत्यादावङ्गत्वेन श्रूयमाणा चरकैव।

‡ शाखान्तरे तु सुवर्गकाम इति पठन्ति ।

§ तैत्तिरीयसंहितायाः पञ्चमकाण्डे पञ्चमप्रपाठके सप्तमानुवाके धनुर्दानप्रकरणे "रुद्रो वा एष-इत्यारभ्य आत्मानं निष्क्रीणीते" इत्यन्तो मन्त्रः तदर्थस्तु योऽयमग्निः स एव रुद्रः क्रूरो देवः। "रुद्रो वै क्रूरः"। ६ । २ । ३। इति ह्यन्यत्राम्नातम् । तस्य च क्रूरस्य तिस्रः शरव्याः शरेण साध्याः प्रत्यञ्चः तिस्रः शरव्याः । यद्वा हिंसकत्वादिषुरेव शरव्या- सा च त्रेधा प्रतीची सम्मुखमागच्छन्ती, तिरश्ची पार्श्वयोर्गच्छन्ती अनूची पृष्ठत आगच्छन्ती चेति । एवं सति योऽग्निं चिनुते स एव ताभ्यः इषुभ्यो निमित्तभूताभ्य आवृश्च्यते सर्वत श्छिद्यते ताभिः प्रहृतो भवतीत्यर्थः । अतस्तत्परिहाराय तिसृभिरिषुभिर्युक्तमेकं धनुः अयाचितमपि ब्राह्मणाय दद्यात् तेन दानेन बाधिकाभ्यः ताभ्य इषुभ्यो नमस्करोत्येव, । अपि च ताभ्य इषुभ्यः सकाशादेव आत्मानं स्वशरीरं निष्क्रीणीते ।

॥ तैत्तिरीयसंहितायाः पञ्चमाष्टके पञ्चमप्रपाठके सप्तमानुवाके, तिसृधन्वमयाचितमिति यजुः, तैत्तिरीयसंहितायाः प्रथमकाण्डेऽष्टमप्रपाठके एकोनविंशानुवाके. "तिसृधन्वꣳ शुष्कदृतिर्दक्षिणा," तदीयब्राह्मणे च, "तिसृधन्वꣳ शुष्कदृतिर्दक्षिणा समृद्ध्यै." । तिसृभिरिषुभिर्युक्तं धनुस्तिसृधन्वं तत्प्रक्षेपाय निर्मिता शुष्कदृतिस्तदुभयञ्च देयमिति माधवाचार्याः ।

त्मनो निष्क्रयवादश्चास्य क्रियाङ्गत्व एवोपपद्यते । न च सन्निपातिनोऽङ्गस्याङ्गान्तरं विप्रतिषिद्धं रथन्तराङ्गस्य वरदानस्य दर्शनात् ॥

सू० योऽग्निम् ॥ ७ ॥

यो*ऽग्निं चिनुयात्तं दक्षिणाभीराधयेदित्याम्नातं दक्षिणाभीराधनमपि वरदानवच्छ्रवणादङ्गमिति प्राप्ते दक्षिणाया भृतित्वेनानत्यर्थत्वात्तस्याश्च प्रयोगप्रयुक्तत्वात् दृष्टार्थत्वाच्च क्रतोरेवाङ्गम् ॥

सू० गुणचोदना वा ॥ ८ ॥

प्रकृतितः प्राप्तदक्षिणात एता दक्षिणा भिन्ना एव विधीयन्त इति धेन्वेव प्राकृतीनां बाध इति प्राप्ते राधनस्य प्रीत्युत्पादनरूपत्वाद्गुणविधिरेवायं कल्पसूत्रमूलभूतश्रुतावधिकदक्षिणाविधानादुभयसमुच्चये सिद्धे याऽधिका दक्षिणा सा यथा प्रीतिजनिका स्यात्तादृशी देयेत्यर्थः ॥

सू० उल्मुकहरणे ॥ ९ ॥

देवे पशावग्निना पुरस्तादेति रक्षसामपहत्या इति श्रुतं पशोः शामित्रदेशनयनकाले वपानयनकाले चोल्मुकस्य नयनं प्रत्याहरणं च तद्वाजपेये प्राजापत्यानां क्रतुपशूनां च कालभेदेन प्रचारादावर्त्तेत, उभयेषामपि राक्षसापहननस्यावश्यकत्वादिति प्राप्ते रक्षोऽपहननश्रुतेरर्थवादत्वेन अपणार्थताया एवोचितत्वात्कालान्तर आनीतस्यापि अपणार्थत्वानपायात्तन्त्रम् ॥

सू० अभितः ॥ १० ॥

स्वाहा † देवेभ्योदेवेभ्यः स्वाहेत्यभितो वपां जुहोति पुन ‡ रूर्जा, स-

* तैत्तिरीयसंहितायाः पञ्चमकाण्डे षष्ठप्रपाठके अष्टमानुवाके ।

† तैत्तिरीयसंहितायास्तृतीयाष्टके प्रथमप्रपाठके पञ्चमानुवाके तृतीयमण्डले, स्वाहा देवेभ्य इत्यादिः ॥

‡ "पुनरूर्जा सहरय्येत्यभितः पुरोडाश माहुती जुहोति" तैत्तिरीयसंहितायाः प्रथमाष्टके ।

Digitized by Google

हरत्येत्यभितः *पुरोडाशमाहुती जुहोतीत्यादावभितोवृत्तं निधेहीत्यादाविव देशवादः, अभित इत्यस्य प्रतिसम्बन्धिनि पदे द्वितीयाविधानाद्यथा वपा पुरोडाशश्च मध्यतोभवति तथा जुहुयादित्यर्थे इति प्राप्ते कर्मण एव पूर्वं प्रक्रान्ततया वपापदस्य तद्द्रव्यकयागपरत्वात्तत्पूर्वापरकालवादोऽयं, न च लक्षणा दोषः। "अभिरभाग" इति स्मृत्यैव तदनुमतेः। किञ्च अभितःपदस्योभयत इत्यर्थकस्य देशवादे कतरयोर्देशयोर्ग्रहणम्। अनियमे विकल्पापत्तिः। कालवादे तु पूर्वापरयोर्द्वयोरेवोपस्थितेर्न क्षतिः। अत एव देवेभ्यः स्वाहेत्युपरिष्टादिति श्रुत्यन्तरे व्यक्तः कालवादः॥

सू० हविष्कृत् ॥ ११ ॥

हविष्कृदेहीति मन्त्रे हविष्कृत्पदेनाध्वर्युरुच्यते। हविष्करणस्याध्वर्यवत्वात् मन्त्रस्तु परेण प्रयोज्यः। प्रैषेषु च पराधिकारात्। वाग्देव्येव वा हविष्कर्त्री। वाग्वै हविष्कृद्वाचमेव तदाह्वयतीति वाक्यशेषात्। न चैतत्पक्षे आज्यौषधसान्नाय्यानामविशेषेण देवी कर्त्र्यापद्यत इति वाच्यम्। पशुपुरोडाशे हविष्कृता वाचं विसृज्य पशुं विशास्तीति श्रवणेनौषधमात्रहविःकर्तृत्वावगतेः। आज्यनिर्वापस्य पूर्वं वृत्तत्वेन तदर्थमाहूताया वाग्देव्याः पुनराह्वानाभावेन वाग्विसर्गे हविष्कृत्प्रैषकालिकत्वविध्यनुपपत्तेः। न च शास्त्रान्त्याधिकरणन्यायेन प्रैषावृत्तिः। एतत्पक्षे प्रैषस्यादृष्टार्थत्वेन प्रयाजानामिव प्रसङ्गोपपत्तेः। तस्मादोषधहविष्कृद्व्यैवेति प्राप्ते पत्न्येव हविष्कृदुपोत्तिष्ठति देवानृषीन्पितॄन्त्साभिद्रुत्या वहन्तीति वाक्यशेषाद् दृष्टार्थत्वाच्च वाचोहविष्कृत्त्वमर्थवादमात्रम्॥

सू० नयने ॥ १२ ॥

च †मसाध्वर्यूणामिव पृथग्वरणाभावाच्छमितृ–पदेन यौगिकवृत्त्यावृताऽवृतसाधारणो यः कश्चिदभिधीयत इति स्थितं तृतीये। ते च शमि-

* मदन्तीनलेन सिद्धस्य पिष्टपिण्डस्य चतुर्थ्यन्तदेवतानामपूर्वकत्वेति पदान्तेन मन्त्रेण अभिमर्शनानन्तरंकूर्मवठाकारे कृते पुरोडाशपदवाच्यं तत्। "यथाहस्म भगवानापस्तंबः" अतुङ्गमनपूपाकृतिं कूर्मस्येव प्रतकृतिं अश्वशफमात्रं करोति।

अतुंगो नुच्चपृष्ठः अनपूपाकृतिः न चापूपवदतिनीचः किं तु यथा यं कूर्मस्य प्रकृतिरिव भवति तथा करोति।

† तैत्तिरीयब्राह्मणभाष्ये तृतीयकाण्डे द्वादशप्रपाठके नवमानुवाके चमसैर्होतारः चमसाध्वर्यव इति सायनाचार्याः।

Digitized by Google

तारोबहवः कार्याः । शमितारो नयन्तीति विधौ शमितार उपेतनेत्यादिमन्त्रेष्वपि बहुवचनदर्शनादिति प्राप्ते शमितुरेकत्वेऽप्यन्येषामपि पशुना सह शामित्रदेशगमनदर्शनाच्छमितृसाहित्यमात्रेण सर्वेषां शमितार इति निर्देशः । विनिषद्योद्गातार इत्यनुद्गातृसाहित्येन प्रयोगदर्शनात् ॥

सू० मनुष्याः ॥ १३ ॥

ते सह गन्तारो ये केचन भवेयुः । दैव्याः शमितार आरभध्वमुत मनुष्या इति मन्त्रे तु ऋत्विग्भूतदेवप्राये पाठेनोपसंहारादिति प्राप्ते ऋत्विज एव स्युः । तेषामुल्मुकनयनादिविहितकर्मार्थं गमनस्य क्लृप्तत्वात् । कर्मासंबद्धेषु तत्कल्पने मानाभावात् ॥

सू० शमिताऽन्यः ॥ १४ ॥

दैव्याः शमितार इत्यारभ्य शमितारो यदत्र सुकृतं कृणवतेत्यन्तं यावन्तः पदार्थाः कर्तव्यत्वेन कीर्तितास्ते सर्वे शमनक्रियान्तर्भूता एव । तद्बहिर्भूता अपि सामर्थ्यलभ्यास्तद्गतमक्षिकानिवारणादयोऽपि तथा । तानेतान् श्रौतानार्थांश्च पदार्थानेकः सह गन्तृभ्योऽन्यः शमितेव कुर्यात् । उद्गीथभक्तिगानमुद्गातेवेति प्राप्ते श्रौतानेव स कुर्यात् । आध्वर्यवसमाख्याते वेदे समाम्नातानामध्वर्योरेव कर्तृत्वावश्यंभावात् । आर्थेषु त्वनियमः । न च पराङावर्तते ऽध्वर्युरिति वचनविरोधः । तस्य प्रथमाध्वर्युपरत्वात् । इतरमन्यस्तेषामिति न्यायेनाध्वर्युगणस्यान्यतमस्य शमितृत्वेऽपि समाख्योपपत्तेः ॥

सू० संज्ञपने च ॥ १५ ॥

हिंसारूपे संज्ञपने न हिंस्यादिति निषेधेनान्यः सैनिक एव कर्ता स्यादिति प्राप्ते वातं प्राणमन्ववसृजतादित्यादिमन्त्रैस्तस्यापि शमनान्तर्भावात्तदंशे समाख्याबाधायोगात्तत्राप्यध्वर्युगणस्थ एव कर्ता स्वधिते मैनं हिंसीस्तस्माद्यज्ञवधोऽवध इत्यादिलिङ्गदर्शनेनास्य पापजनकत्वाभावात् । भाष्ये तु चतुरधिकरणीयमेकीकृत्य व्याख्याता । लिङ्गदर्शनाच्चेति चरमसूत्रं तु सर्वसाधारण्याय शृतं हविः शमितरिति प्रैषे सति शृत-

Digitized by Google

मिति चि: प्रत्याहेति लिङ्गशमनश्रपणयोः समानकर्तृकतां बोधयतीति व्याख्यातम् । श्रपणस्य प्रकृतावध्वर्युकर्तृकत्वादिनिश्चयादिति तदाशयः । एवं त्वेष न्यायः सोमान्तर्गतपशुष्वेव । वपायागेऽध्वर्युप्रतिप्रस्थात्रोर्व्यापृतत्वेऽपि तृतीयस्याध्वर्योः सत्त्वात् । आवपाहोमादुपोद्धरणविलस्य पार्श्वनाच्छादनस्य शमितृकर्तृकत्वाम्नाननिर्वाहात् । निरूढादिषु त्वनायत्याऽन्यः शूद्रादिः शमिता स्यात् । अत एवार्धं च वैकर्तस्य होमा च शमितुस्तद् ब्राह्मणाय दद्याद्यब्राह्मणः स्यादिति लिङ्गात्संज्ञपनसूत्रेऽन्यपदानुकर्षेण तावन्मात्रे त्वन्य एव कर्त्तेति सुव्याख्यं याज्ञिकाद्यविरोधाय ॥

इति संकर्षे भाट्टदीपिकायां त्रयोदशाध्यायस्य प्रथमः पादः ॥ १ ॥

अथ त्रयोदशोऽध्याये द्वितीयः पादः ।

सू० पत्नीम् ॥ १ ॥

पत्नीं संनह्याज्येनोदेहीत्यध्वर्युकर्तृकप्रैषे पत्नी-शब्दस्य प्रतिसम्बन्धिबोधमपेक्ष्य स्वार्थोपस्थापकत्वे*नार्द्धो वा एष आत्मनो यत् पत्नीत्याम्नानाद्दम्पत्योरेककारकत्वेन च गृहकर्मसु पत्न्येव निपुणा मदपेक्षयेति लौकिकवाक्य इव वक्तुर्भार्याया एव बोधादध्वर्युभार्याया एव संनहनम् । ऋत्विक्संस्कारवत्क्रतूपकारकत्वसम्भवादिति प्राप्ते संपत्नी पत्या सुकृतेन गच्छतामिति मन्त्रवर्णाद्यजमानपत्न्या एव फलभोक्तृत्वादध्वर्युवक्तृकेऽपि तस्मिन्पत्नीपदेन यजमानाया एव बोधदर्शनात्तस्या एव संस्कारः । †यस्य व्रत्येऽहन्पत्न्यनालम्भुका भवति तामपरुध्य यजेतेति लिङ्गाच्च । अध्वर्युभार्यापरोधस्य स्वभावसिद्धत्वेन पुनर्विधानायोगात् ॥

---

* तैत्तिरीयसंहितायाः षष्ठकाण्डे प्रथमप्रपाठके अष्टमानुवाके अर्द्धो वेत्यादि-

† तैत्तिरीयब्राह्मणे तृतीयकाण्डे सप्तमप्रपाठके नवमानुवाके यस्य व्रत्येऽहनित्यादिः व्रत्येऽहन्-यागानुष्ठानदिने, यस्य यजमानस्य, पत्नी, अनालम्भुका-स्प्रष्टुमयोग्या, रजस्वला भवति एतदीयस्य यज्ञस्य अर्द्धः-एको भागः मीयते-विनश्यति, दम्पती हि कर्मणः कर्तारौ तत्र स्त्रियाः कर्मायोग्यत्वादर्द्धहानिः तदानीं हानिपरिहाराय तां स्त्रियम् अपरुध्य-बहिर्निःसार्य्य अग्रेण वेदिमन्तर्वेदिर्वोदगुन्वं सचहनं स्तोर्त्वा यजेत इति तैत्तिरीयब्राह्मणभाष्ये सायनाचार्य्याः ॥

सू० एवं वा ॥ २ ॥

पत्न्याः संनहनेन कृतो* सा कुर्यादिति विधावेकत्वस्योपादेयविशेषणत्वेन विवक्षितत्वादौदुम्बरीसंमानवदेकस्यामपि विधेश्चारितार्थ्यादेकैव या काचिद्यजमानपत्नी संनह्येति प्राप्ते सर्वासामपि संनहनादिसंस्काराः कर्तव्याः । कर्तृत्वाविशेषात् । फलाधानांशप्रयुक्तत्वेन सन्निपातित्वाच्च । ग्रहवत्संस्कार्यत्वाविशेषेण संख्याया अविवक्षितत्वाच्च । पत्नीप्रातिपदिकस्य यज्ञस्वामिमात्रवाचित्वाच्च ॥

सू० भूयांसि कर्माणि ॥ ३ ॥

ऐन्द्राग्नाः षड् यागाः काम्या †याज्यानुवाक्यायुगले तु द्वे एवाम्नाते तत्राद्यं युगलमाद्यस्य कर्मणोऽङ्गं निर्विवादम् । अन्यत्तु युगलं पञ्चानामपि कर्मणामङ्गम् । युगलद्वयं वा पुनः पुनरावर्त्य त्रिरनुवाकपाठे तदन्तर्गतमन्त्राणामिव दण्डकलितवद्विषमाणामेकं समानामन्यदङ्गमिति प्राप्ते समं स्यादिति न्यायेनाङ्गिनामङ्गयोश्च विभागे सत्याद्यत्रयस्याद्यमन्त्यत्रयस्यान्त्यमङ्गमिति स्वस्थानविवृद्धिः ॥

सू० भूयांसो मन्त्राः ॥ ४ ॥

दर्शपूर्णमासयोः पुरोडाशपिण्डविभागे यथाभागं व्यावर्तेथां भगो वां विभजत्वित्यादयो बहवो मन्त्रा आम्नाताः । ते सर्वेऽपि समुच्चित्य विभजनेऽङ्गानि अन्यतमग्रहणे विनिगमनाविरहात् । एकस्य विनियोगे अन्यस्याकाङ्क्षाया अशान्तेः ॥ अनेकेषामङ्गिनामेकस्मिन्नङ्गे समुच्चयवदुपरीत्यस्यापि न्यायतौल्येन सिद्धेरिति प्राप्ते कृतस्य प्रकाशनस्य पुनः करणासम्भवान्मन्त्राकाङ्क्षायाश्च विकल्पेन विनियोगेऽपि शान्तेस्तां चतुर्भिरादत्त इत्यादिलिङ्गाच्च विकल्पेन विनियोगः ॥

सू० ऐन्द्रम् ॥ ५ ॥

‡सांनाय्यं प्रकृत्य श्रूयते । न‡ दारुपात्रेण दुह्यादग्निवद्धि दारुपात्रं

---

* कृतोऽपकुर्यादिति पा० ।

† पुरः पूर्वम् यागाद्देवतामनुकूलयितुं या अनुच्यते इति व्युत्पत्त्या पुरोनुवाक्यापदमनुवाक्यापदं च ऋग्विशेषबोधकम् ।

‡ तैत्तिरीयसंहिताया द्वितीयकाण्डे पञ्चमप्रपाठके तृतीयानुवाके सांनाय्यप्र-

यद्दारुपात्रेण दुह्यादयातयाम्ना हविषा यजेताथो खल्वाहुः पुरोडाशमुखानि वैहवींषि नेत इतः पुरोडाशं हविषो यामोस्तीति काममेव दारुपात्रेण दुह्यादिति, अत्राग्नेयपुरोडाशोऽग्निदेवत्यः दारुणोऽन्तरग्नेः सत्त्वेन दारुसंबद्धपयसोऽप्यग्निसंबन्धानपायादनुचीनावाग्नेयावेव यागौ संपन्नौ। तस्य जामितापादकत्वात्तत्परिजिहीर्षया पुरोडाशमुखानि वा इति वाक्येनाग्नेयसांनाय्ययोर्मध्ये यागान्तरं पुरोडाशद्रव्यमुपांशु याजवद्विधीयते। तस्यापि पयोद्रव्यकत्वे उक्तरीत्याऽग्निसंबन्धाज्जामितातादवस्थ्यापत्त्या तदनुक्तिः। तुल्यन्यायेन मध्यस्थयागस्याग्निदेवताकत्वेऽपि जामितानपायात्तदितरदेवताकत्वे सिद्धे इन्द्राय त्वा जुष्टं *प्रोक्षामीति प्रकरणाम्नातमन्त्रानुत्कर्षायेन्द्र एव देवतेति नियम्यते। संप्रतिपन्नदेवताकत्वाच्च सांनाय्येन सहास्य प्रदानम्। आग्नेयोऽष्टाकपाल इति वाक्य इव विधिकल्पनाऽपि न दुष्यतीति बोधायनकल्पानुगुणे पूर्वपक्षे प्राप्ते—सिद्धान्तस्तु जातेष्टिवाक्य इवोपक्रमोपसंहारयोर्दारुपात्रकरणकदोहकीर्त्तनादेकवाक्यत्वम्। तत्र च दोहोद्देशेन दारुपात्रमेव विधीयते। दारुपात्रे च दोषसद्भावादयुक्ततामिवाशङ्क्याथो खल्वित्यादिना तदभावं समर्थ्य काममिति निगमनवाक्ये विधेः स्पष्टं प्रतीतेः। एवं सति मध्ये यागान्तरविधाने वाक्यभेदः स्यादेव आग्नेयवाक्ये देवतातद्धितादिना द्रव्यदेवतासंबन्धप्रती-

---

ब्दनिर्वचनं दर्शितं मन्त्रस्तु "इन्द्रस्य वृत्रं जघुष इन्द्रियं वीर्यं पृथिवीमनुव्यार्च्छत्तदोषधयो वीरुधोऽभवन्त्स प्रजापतिमुपाधावद्वृत्रं मे जघुष इन्द्रियं वीर्यं पृथिवीमनुव्यारत्तदोषधयोवीरुधोऽभूवन्निति स प्रजापतिः पशूनब्रवीदेतदस्मै समयतेति तत्पशवओषधीभ्योऽध्यात्मन्त्समनयत्तत्प्रत्यदुहन् यत्समनयन् तत्सांनाय्यस्य सांनाय्यत्वं" इति। वृत्रं जघुषो हतवतः व्यार्च्छत् विविधत्वेन प्राप्नोत्। ओषधिवीरुधयोर्भेदः पूर्वाचार्यैर्दर्शितः—"ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुध" इति तदेतदिन्द्रियसामर्थ्यस्यौषध्यादिरूपं प्रजापतेरग्रे कथितवान्। स च प्रजापतिरेतदिन्द्रियसामर्थ्यमिन्द्रार्थं सम्यक् प्रापयतेति पशूनब्रवीत्। तत्सामर्थ्यं पशव ओषधीभ्यः सकाशादानीय स्वात्मन्यधि स्वशरीरे सम्यक् स्थापितवन्तः पुनः स्वनिष्ठं तद्वीर्यं क्षीरादिरूपमिन्द्रं प्रति दुग्धवन्तः। यस्मात्पशवः समनयन् तस्मात्सांनाय्यनाम भवतीति सायनाचार्य्याः। किञ्च दधिपयसी च "पाय्यसांनाय्येति" सूत्रेण निपातनात्कर्मव्युत्पत्त्या सांनाय्य पदाभिधेये।

‡ तैत्तिरीयब्राह्मणे तृतीयकाण्डे द्वितीयप्रपाठके द्वितीयानुवाके

* स्रुवकायामग्निहोत्रहवण्यां तिरःपवित्रमप आनीय त्रिरुत्पूय उन्मृज्य उपस्थापयत्तेन जलेन सपवित्रेणोत्तानेन दक्षिणपाणिना सेचनं पुरोडाशीयानां यत् तत्प्रोक्षणमित्युच्यते।

त्याऽऽमित्रावाक्य इव यागकल्पनसम्भवेऽपि द्रव्यमात्रश्रवणेन कथं तत्कल्पना । आग्नेययागस्य स्पष्टमकीर्त्तनात्कथमनूचीनताऽवगमः । उपांशुयाजे यदन्वञ्चौ पुरोडाशावन्तरा यजतीत्यादिपदश्रवणाद्वैषम्यम् । अनुत्कर्षमात्रलिप्सया देवताकल्पने पूषादिदेवताः कुतो न नियम्यन्ते । पूषानुमन्त्रणमन्त्रादेरनुत्कर्षसम्भवात् । यागान्तरकल्पनायद्दे वा इत इतः पुरोडाशपदेनोभयतः पुरोडाशवत उपांशुयाजस्यैव परामर्शः कुतो न इतः । बहूचब्राह्मणेनैकवाक्यत्वसम्भवात् । तस्मादर्थवादवाक्येऽग्निस्पृष्टदाहसंबन्धमात्रेण दोषमाशङ्क्यायातयामरूपपुरोडाशस्य प्रथमं सत्त्वात्तदुत्तरं क्रियमाणं सर्वमयातयाममेवेति परिहृत्य पश्चाद्द्वारुपात्रं विधीयत इत्येव युक्तमिति ॥

सू० समानतन्त्रः ॥ ६ ॥

पौर्णमास्यङ्गभूतो वैमृधयागस्तया समानतन्त्र एव कार्यो न तत्पश्चात् । *"वैमृ†धः पूर्णमासेऽनुनिर्वाप्योभवति तेन पूर्णमासः सेन्द्र ऐन्द्रं दध्यमावास्यायां तेनामावास्या सेन्द्रेति सान्नाय्येन" तुल्यवच्छ्रुतेः । संस्थाप्येति क्त्वाश्रुतिरनुनिर्वपतीत्यनु–शब्दश्चानुवषट्कारयागादाविव प्रधानयागोत्तरकालाभिप्रायेणाप्युपपद्यत इति प्राप्ते स वै पौर्णमासेन हविषेष्ट्वाऽनुनिर्वाप्य इति वचनान्तरे पौर्णमासेनेति तृतीयानिर्देशेन‡ साङ्गप्रधानकरणकभावनानिर्देशेन प्रयोगोत्तरकालप्रतीतेः संस्था–शब्दस्यापि प्रयोगसमाप्तिपरत्वात्तत्र यच्छक्नुयात्तद्द्व्यादिति दक्षिणाभेददर्शनाच्च भिन्नतन्त्र एव । तुल्यता त्विन्द्रवत्त्वमात्रेणाप्युपपद्यते ॥

सू० स नित्यः ॥ ७ ॥

* पौर्णमास्यामनुनिर्वाप्यं वैमृधं विधातुं प्रस्तौति । "इन्द्रं वृत्रं जघिवांसं मृधोऽभिप्रावेपन्त स एतं वैमृधं पूर्णमासेऽनुनिर्वाप्यमपश्यत्तन्निरवपत्तेन वै स मृधोऽपाहत" इति । इन्द्रो वृत्रं हतवान् तमिन्द्रं मृधो वृत्रपक्षपातिनो वैरिणोऽभितः समागत्य प्रकर्षेण भयमुत्पाद्याकम्पयन्त । विनाशिता मृधो वैरिणो येन देवेनासौ विमृत् । स देवो यस्यैकादशकपालस्य पुरोडाशस्य सोऽयं वैमृधः । तं पुरोडाशं पूर्णमासयागेऽनुनिर्वाप्यं प्रधानकर्म्मणः पश्चात् निर्वापयोग्यमपश्यदिति तैत्तिरीयसंहिताया द्वितीयकाण्डे पञ्चमप्रपाठके तृतीयानुवाके सायनाचार्य्याः ।

† तैत्तिरीयसंहिताया द्वितीयकाण्डे पञ्चमप्रपाठके चतुर्थानुवाके

‡ तृतीयया साङ्गप्रधान करणकभावनानिर्देशेनेति पाठान्तरम् ।

स वैमृधो निमित्तोपबन्ध*मात्रेण श्रुतत्वान्नित्य इति प्राप्ते यद्यग्रे निरुप्य नानुनिर्वपेदित्यादिना निन्दार्थवाददर्शनात्प्रारब्धस्यापरित्यागवचनबलाद् यद्येतानालभेत वायव्यस्यैव शिर उपदध्यादिति वचनात्पुरुषशीर्षाद्युपधानस्येवानित्यस्तत्प्रक्रमः ॥

सू० अग्र-शब्दः ॥ ८ ॥

यदग्रे निरुप्येत्यस्य पौर्णमासीप्रकरणे पाठादग्र-शब्देनाधानाव्यवहितोत्तरपौर्णमास्येव ग्राह्येति प्राप्ते अग्रे कृत्वा नेदानीं कुरुत इत्यादावकरणपूर्वकालमात्रप्रत्यायकस्याग्र-शब्दस्य पौर्णमासीविशेषपरत्वे लक्षणापत्तेरग्रे निरुप्येति वाक्यस्य प्रकरणाद्बलीयस्त्वाद्यस्यां कस्यांचित्पौर्णमास्यामुपक्रम्य नोत्स्रष्टव्यम् । याज्ञिकास्तु वैमृधोऽनित्य एव । ऐकतन्त्र्यभिन्नतन्त्रत्वयोः परं विकल्पः ॥ एनयोर्मध्ये प्रथमपौर्णमास्यामिच्छया यः पक्षः परिगृहीतस्तमेव पक्षं यावज्जीवमवलम्बेतेत्याहुः ॥

सू० न द्वे ॥ ९ ॥

दर्शप्रकरणे अभ्युदितेष्टौ श्रूयते । †"न द्वे यजेत यत्पूर्वया सम्प्रति यजेतोत्तरया‡च्छम्बट् कुर्याद्यदुत्तरया सम्प्रति यजेत पूर्वयाच्छम्बट् कुर्यान्नेष्टिर्भवति न यज्ञस्तदनु ह्रीतमुख्यपगल्भो जायत एकामेव यजेत प्रगल्भोऽस्य जायते नादृत्य तद् द्वे एव यजेतेति" । यद्यपि यागद्वयपक्षे पौर्वापर्यानवधारणादिदोषसद्भावादेकयागपक्षस्यैव प्रगल्भता, तथाऽपि तं पक्षं प्रगल्भतरत्वाभावादनादृत्य यागद्वयमेव कुर्यादित्यर्थः । तदिदं यागद्वयमभ्युदितेष्टिर्दर्शेष्टिश्च । संख्यायाः सन्निहितपरामर्शित्वात् । दर्शस्य प्रकरणात्सन्निधिनाऽभ्युदितेष्टेश्चोपस्थितत्वात् । वस्तुतस्तु अस्मिन्नेव प्रकरणे शाखान्तरे द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत यः कामयेत पशुयामि-

* निमित्तोपबन्धमन्तरेणेति पा० ।

† तैत्तिरीयसंहितायां द्वितीयकाण्डे पञ्चमप्रपाठके पञ्चमानुवाके ।

‡ छंबट् इत्यव्ययं प्रणाशवाचि यथा श्रीमद्भागवते तृतीयस्कन्धेऽष्टादशाध्याये षड्विंशे श्लोके "एषा घोरतमा सन्ध्या लोकच्छंबट्करी प्रभो । उपसर्पति सर्वात्मन् सुराणां जयमावहे"त्यत्र लोकच्छंबट्करीत्यस्य लोकप्रणाशकरीत्यर्थः ।

Digitized by Google

तीति श्रुतस्य द्विरभ्यासस्य विधायकमेतद्वचनम् । अन्यथा विकृतिप्रकृत्योरकालोपक्रमपर्वावच्छिन्नजीवननिमित्तयोर्विहितत्वेन निमित्तानन्तरमेव कर्तव्यताया ज्ञातत्वेन सम्प्रति कतरत्कर्त्तव्यमित्यार्थवादिकः संशयोपन्यासो न समञ्जसः स्यात् । अभ्यासपक्षेऽमावास्यापौर्णमास्योर्मध्ये कतरा प्रथममभ्यसनीयेति सन्देग्धुं युज्यते । तस्माद् द्विरिज्यावाद इति प्राप्ते वृद्धिकामपदाश्रवणाद्दर्शाभ्युदितेष्ट्योरेवायं वादः, अर्द्धं हविरातञ्चनाय निदध्यादिति विधानाल्लिङ्गादेव दर्शेष्टिरपि प्राप्तैवेति चेत् सत्यम्, अभ्युदितेष्टेर्देवतामात्रविकारेऽपि दर्शत्वानपायाच्चोदितं कर्म कृतमेवेति पुनर्न किमपि कार्यमित्यातञ्चनार्थमर्द्धं हविः स्थापनं व्यर्थमित्याशङ्काऽपनिनीषया तच्छेषोऽयं वादः । एकामेव यजेत न द्वे इत्याशङ्कितुः पक्षं स्तुत्वाऽनूद्य दूषयति । यत्पूर्वयेति । सम्प्रति कृतेयमिष्टिर्यदि पूर्वा दर्शेष्टिरेव तदाऽस्या अकालोपक्रान्तत्वात्प्रायश्चित्तेष्टिलोपः । यदि चेयमुत्तरा प्रायश्चित्तेष्टिरेव तदा परदिने पर्वणि कर्त्तव्याया अप्यकरणाच्छम्बट्कारः । अतो द्वयोः कर्मणोर्भेदावश्यम्भावादेकामेव न द्वे इति पक्षमनादृत्य द्वे एव यजेत न केवलामभ्युदितेष्टिमिति पक्षस्यैवाश्रयणीयत्वादर्द्धमातञ्चनाय निदध्यादित्यर्थवादार्थः ॥

सू० यत् पितृभ्यः ॥ १० ॥

*अमावास्यायां पिण्डपितृयज्ञोत्तरमेव दर्शेष्टितन्त्रं प्रक्रान्तव्यम् ।

* तैत्तिरीयसंहिताया द्वितीयकाण्डे पञ्चमप्रपाठके तृतीयानुवाके "इन्द्रो वृत्रꣳ हत्वापरां परावतमगच्छदपाराधमिति मन्यमानस्तं देवताः प्रैषमैच्छन्सोऽब्रवीत्प्रजापतिर्यः प्रथमोऽनुविन्दति तस्य प्रथमं भागधेयमिति तं पितरोऽन्वविन्दन् तस्मात्पितृभ्यः पूर्वेद्युः क्रियत" इति तदर्थस्तु वृत्रवधेनासुराणामपराधं कृतवानस्मीति मन्यमानइन्द्रो भीतोऽत्यन्तं दूरमगच्छत् । तमिन्द्रं प्रति देवता आह्वानमैच्छन् । देवानां मध्ये योऽन्विष्य प्रथममिन्द्रं लभते तस्य प्रथमं भागो दीयत इति प्रजापतिना उक्ताः पितरः प्रथममिन्द्रं यस्मादलभन्त तस्मात्पितृभ्यः पूर्वेद्युः पिण्डपितृयज्ञं कुर्य्यात्, दर्शयागदेवतानाममावास्यायामारम्भः प्रतिपदि तद्यागः । पितृणां त्वमावास्यायामेव पिण्डदानं । ननु तैत्तिरीयब्राह्मणे तृतीयप्रपाठके दशमानुवाके । "इन्द्रो वृत्रꣳ हत्वा । असुरान्पराभाव्येत्यारभ्य पितृभ्य एव तद्यज्ञं निष्क्रीय यजमानः प्रतनुत" इत्येते मन्त्राः । तदर्थस्तु । इन्द्रः पुनर्युद्धे वृत्रं हत्वा तदीयानसुरांश्च पराभूतान्कृत्वा यदमावास्यां यागदिनं प्रति स्वगृहे समागत्य

Digitized by Google

सोमयागे दर्शपौर्णमासोत्तरत्वस्येव दर्शे पितृयज्ञोत्तरत्वस्यास्मभ्यमेव प्रथमं निरूप्यतामिति पितृप्रार्थितवरदानार्थवादेनावगमितत्वात्। *यत्पितृभ्यः पूर्वेद्युः करोति पितृभ्य एव तद्यज्ञं निष्क्रीय यजमानः प्रतनुते इति श्रुतेश्च। अत एव प्रातरग्निहोत्रं हुत्वाऽन्यमाहवनीयं प्रणयतीति विहितं प्रणयनमपि पितृयज्ञाङ्गमेव। दृष्टाङ्गत्वेऽग्नेः परेद्युः कर्मापवर्ग एव तदपनयेन पितृयज्ञस्यान्यभावापत्तेः। न च निशीष्टिवद्दार्शिकप्रणयनोपकार्यत्वं पितृयज्ञस्यापूर्वत्वात्। न वैष्टिकानामिव सौमिकप्रणयनोपकार्यत्वं तस्य दर्शानङ्गत्वात्। प्रणयनस्य पितृयज्ञाङ्गत्वे तु तदपवर्गे दर्शार्थं पुनः प्रणयनसंभवात्, हुत्वेति क्त्वा–प्रत्ययस्य पूर्वकालमात्रपरत्वेनापराह्णे एव प्रणेतुमुचितत्वात् वचनादपकर्षो वा। तस्मात्पितृयज्ञं समाप्यैवान्वाधानमिति प्राप्ते पूर्वाह्णापराह्णकालविहितयोरन्वाधानपितृयज्ञयोः कालातिक्रमायोगात्प्रणयनस्यापराह्णे करणे प्रातरग्निहोत्रं हुत्वेत्यस्यानतिप्रयोजनकत्वापत्तेः पितृयज्ञस्यापूर्वत्वेऽपि दार्शिकप्रणयनेन प्रसङ्गादुपकारसिद्धेः प्रणयनविध्यनन्तरं दार्शिकानेकपदार्थविधानदर्शनेन च †दर्शाङ्गत्वस्यासंदिग्धत्वाद्दर्शन-

शुक्लप्रतिपदि ह्यमावास्या यागः क्रियते। ततः पूर्व्वेद्युः पितर आगतास्तैः पितृभिः सह यज्ञोऽपि गतः। तं पितृभिः सहावस्थितं यज्ञं देवाः स्वार्थमयाचन्त पूर्व्वमस्मदीयो यज्ञ इदानीं भवत्समीपमागतः पुनरस्मभ्यमेव यज्ञो दातव्य इति। ततः पितरस्तमदत्वा तद्दानार्थमुत्कोचमपेक्षितवन्तः। पूर्व्वेद्युर्दर्शदिने ऽस्मदर्थं कर्म्म कर्तव्यम् ततः प्रतिपद्यनुष्ठेयं दर्शपूर्णमासाख्यं यज्ञं दास्याम इति प्रतिजानीरन्। ततो देवैस्तथेत्यङ्गीकृते तं यज्ञं दत्तवन्तः तस्मात्पित्र्यर्थं कर्म्म पूर्व्वेद्युः पूर्व्वदिने कुर्वन्ति। तथा कृते तेन मूल्येन यज्ञं पितृभ्योनिष्क्रीय यजमानस्तमनुष्ठातुं प्रवर्त्तते। इति महता प्रश्नेन पिण्डपितृयज्ञो विहितः,। बाढं एवं तर्हि सहाय्यप्रशंसार्थमत्र तदनुवादोऽस्तु तामेव स्तुतिं द्योतयितुममावास्यानिर्व्वचनं दर्शयति,। "सो ऽमावास्यां प्रत्यागच्छत्तं देवा अभिसमगच्छन्तमावै नोऽद्य वसु वसतीतीन्द्रो हि देवानां वसु तदमावास्याया अमावास्यत्व"मिति। तदर्थस्तु पितृभिरन्विष्य लब्धः स इन्द्र आमावास्यायां पलायनदेशात्प्रतिनिवृत्य समागतस्ते देवाः परस्परमिदमब्रुवन्। अद्य नोऽस्माकं वसु श्रेष्ठं धनमावसति सह तिष्ठति सर्व्वेषां साधारणत्वे वर्ततइत्यर्थः। किं तद्वस्विति तदुच्यते इन्द्रः खलु सर्व्वेषां देवानां वसुश्रेष्टं धनं तस्मिन्वर्तमाने सति स्वामिलाभात्। यस्माद्देवा एवमुक्तवन्तस्तस्मादमावसत्यद्येति व्युत्पत्त्या ऽऽमावास्यानाम सम्पन्नमिति सायनाचार्य्याः।

* तैत्तिरीयब्राह्मणे प्रथमाष्टके तृतीयप्रपाठके दशमानुवाके।

† दर्शाङ्गत्वस्येति पा०।

Digitized by Google

न्वाधानक्रमोत्तरमेव स्वकाले पितृयज्ञः । पूर्वेद्युरिति वचसो वरप्रार्थनार्थवादस्य च प्रधानयागाभिप्रायेणोपपत्तेः ॥

सू० उत्तरस्मिन् ॥ ११ ॥

यदा सिनीवाली कुहूश्चेति द्वे अपि क्रमेणाऽऽपततस्तदाऽपि पूर्वाधिकरणन्यायेन पूर्वस्मिन्नेव पर्वणि पितृयज्ञे प्राप्ते परस्मिन्नेवेत्युच्यते । यदहरेव पुरस्तान्न दृश्यते तदहर्दद्यादिति यत् पितृभ्यः पूर्वेद्युरित्यपराह्णे ददातीति वचनत्रयैकवाक्यतया लब्धस्य चन्द्रादर्शनापराह्णविशेषणद्वितयविशिष्टामावास्याकालस्तस्य तत्रैव लाभात् । चन्द्रादर्शनेऽमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीत्येकस्मिन्नेव वाक्ये विशिष्टकालविधिः प्रतीत्ताविषयतयोपादेयत्वाच्च न विशेषणयोरविवक्षेति तु भाष्ये स्थितम् । न च पूर्वदिने चन्द्रदर्शनाभावस्यैव परदिनापराह्णेऽमावास्याया अभावादन्यतरपरित्यागावश्यकत्वे यत्पूर्वे द्युरिति वचनानुसारेण चन्द्रादर्शनस्यैव हानं युक्तमिति वाच्यं यां तिथिं समनुप्राप्योदयं याति दिवाकर इति स्मृत्या परदिनेऽमावास्यायाः पूर्णतोक्तेः । अपराह्णे सूर्याचन्द्रमसोरतीव सन्निकर्षात् ॥

ननु पिण्डान्वाहार्यकश्राद्धं क्षीणे राजनि शस्यत इति स्मृत्यन्तरेण चन्द्रादर्शनपदस्य चन्द्रक्षयोपलक्षकत्वेन व्याख्यानाच्चन्द्रक्षयस्य च "ष्टमेऽशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः । अमावास्याष्टमांशे च पुनः किल भवेदणु"रिति स्मृत्या चतुर्दशीयुक्तामावास्यायामेवोपलम्भात्सिनीवाल्यामेव पितृयज्ञः, अत एव यदहस्त्वेव चन्द्रमा न दृश्यते ताममावास्यां कुर्वीतेत्यादिवचनैरन्वाधानस्यापि काले चन्द्रादर्शनस्य विशेषणत्वात्तुल्यन्यायेन परदिने तदनुष्ठाने प्रसक्ते । "पत्नान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः । पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुध." । इत्यादिनाऽऽन्वाधानपितृयज्ञश्राद्धानामेककर्तव्यताविधानादन्वाधानवाक्यस्थचन्द्रादर्शनपदं चन्द्रक्षयोपलक्षकमेवेत्युक्तं कर्मप्रदीपे इति चेत् न । "अर्वागस्तमयाद्यत्र द्वितीया तु प्रदृश्यते । तत्र यागं न कुर्वीत सर्वे देवाः पराङ्मुखाः"

Digitized by Google

इति वचनेन सायं चन्द्रदर्शनविशिष्टप्रतिपदि प्रधानयागनिषेधादुभयोरपि चन्द्रादर्शनस्यावश्यकत्वे द्व्यहकालक्रियमाणयोरङ्गप्रधानयोस्तदसम्भवेऽङ्गगुणविरोधन्यायेनान्वाधान एव तद्बाधस्य युक्तत्वात् । अत एव "तद्धैके दृष्ट्वोपवसन्ती"ति श्रुतिः । दृश्यमानेऽपि कदाचिदिति गोभिलश्च- पितृयज्ञस्य तु यदहरेव पुरस्तान्न पश्चाच्च दृश्यते, इति श्रुत्यन्तरेण कुहूमेव विशिष्य विधानाच्च स्मृत्या क्षीणचन्द्रोपलक्षितकत्वेन व्याख्या युक्ता, अपि त्वमावास्यापदस्येव सूर्याचन्द्रमसोः सन्निकर्षपरत्वं पञ्चदशाद्याधिकरणसिद्धं सूत्रोक्तं युक्तं, न च यदहः पश्चाच्चन्द्रमा अभ्युदेति तदहर्यजन्निमाँल्लोकानभिजयतीत्यादिश्रुतिभिश्चन्द्रदर्शनदिने यागनिषेधस्मृतेरपि बाधोऽस्त्विति वाच्यम् । चन्द्रदर्शनदिनं प्रशस्तमपि तददर्शनात्प्रशस्ततरादूनमेवेति रीत्या जर्तिल*गवेधुकस्तुतेः क्षीरविधिशेषत्ववच्चन्द्रादर्शनदिने यागविधिशेषत्वेनाप्यस्यार्थवादस्योपपत्तेः, अमावास्याष्टमांशप्रभृतिचन्द्रोदयस्य सत्त्वादुदितमात्रस्य लोकैरदर्शनाच्छ्रुतिस्मृत्योरविरोध इति केचित् । तस्मात्सिनीवाल्यामन्वाधानं कुहूां यागोत्तरं पितृयज्ञः । वरदानार्थवादादिश्च पूर्णयोः पूर्वप्रतिपदो† ऽनुपपन्नः ॥

सू० दक्षिणाग्नौ ॥ १२ ॥

पितृयज्ञे एव दक्षिणाग्नौ श्रपितस्यापि हविष आहवनीय एव होमः । गार्हपत्ये श्रपितस्यापि तथा दर्शनात् । यदाहवनीये जुहोतीति वाक्यस्य बाधे मानाभावात् दक्षिणाग्नेरेकोल्मुकं धूपाय धरतीति वचनान्तरेण प्रणीताग्नेरपि सत्त्वात्तस्य च पशावतिप्रणीतवद्दृष्टार्थत्वाच तत्रैव वा होम इति प्राप्ते यस्मिन् श्रपयति तस्मिन् जुहोतीति वचनेनैव सिद्धान्तः । प्रणीतस्य त्वायतनाद्बहिर्निःसारणेन ततोभिन्नत्वात् ।

* "जर्तिलयवाग्वा वा जुहुयाद् गवीधुकयवाग्वा वा न ग्राम्यान् पशून् हिनस्ति नारण्यानथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेत्यजक्षीरेण जुहोतीति" जर्तिलगवीधुकस्तुतिवाक्यं तत्र जर्तिल-शब्देनारण्यास्तिलाः । गवीधुकाः-आरण्यगोधूमाः, ततश्चेह यथा जर्तिलगवीधुकस्तुतेः क्षीरविधिशेषत्वं तथेत्यर्थः । केचित्तु गवेधुगिति पाठं कथयन्ति तमुमं पाठमुपेक्षिष वैदिकसम्प्रदायविरोधात् ।

† पर्वप्रतिपदोरुपपन्नः इति पुस्तकान्तरपाठोयुक्तः ।

वद् ब्राह्मणो मनुष्येष्विति निर्देशेन ब्राह्मणवर्णस्याग्निसम्बन्धप्रतिपत्तेश्चेति तदेतत्त्रयमनुपपन्नं सदेव सोम्येदमग्र आसीदित्यादिवाक्यसारूप्यभङ्गायोगात्कारणत्वस्य परमात्मासाधारण्यस्य समर्थितत्वाच्च । किञ्च उपक्रमस्थब्रह्म-शब्दमुख्यार्थहानिप्रसङ्गः, वर्णमात्रस्य अग्निसञ्ज्ञदेवतायास्तदधिष्ठितवर्णस्य च इन्द्रवरुणसोमादिसमस्तदेवतास्रष्टृत्वायोगश्च "ब्राह्मणोऽस्य मुखमासीत् पद्भ्यां शूद्रः मुखादिन्द्रश्चाग्निश्चेति ब्राह्मणस्येन्द्रादेरग्नेश्च परमपुरुषसृष्टत्वश्रवणेन इन्द्रादीनामग्निसृष्टत्वायोगश्च, अस्याः श्रुतेर्गत्यन्तरसम्भवेन कल्पभेदेन सृष्टिभेदपरत्वकल्पनञ्चानुपपन्नं "तदग्निनैव देवेषु ब्रह्माऽभवद् ब्राह्मणो मनुष्येष्वि"ति तच्छब्दपरामृष्टप्रकृतब्रह्मणोऽग्निब्राह्मणान्यत्वं च प्रतीयते, तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येष्वेताभ्यां हि रूपाभ्यां ब्रह्माभवदित्यग्निब्राह्मणयोर्वैयधिकरण्येन ब्रह्मरूपत्वनिर्देशेन ताभ्यां रूपिणो ब्रह्मणो विलक्षणत्वं च प्रतीतम्, एवमिन्द्रादिस्रष्टृत्वात् पृथग्व्यपदेशाच्च ब्रह्म-शब्दस्य आन्यवस्थपरब्रह्मपरत्वञ्च व्युदस्तं, न ह्यग्निरूपाद् ब्रह्मण इन्द्राद्युत्पत्तिः, अतोऽग्निविशिष्टत्वोपस्थापनकल्पनवैयर्थ्यम्, अशाब्दत्वं च, न हि केवलब्रह्म-शब्दोऽन्यवस्थपरमात्मवाची प्रथमब्रह्म-शब्दोऽन्यवस्थब्रह्मपरश्चेत्तदग्निनैवेति प्रकृतपरामर्शिनस्तच्छब्दस्य वैयधिकरण्यमनुपपन्नम्, अन्यवस्थस्य ब्रह्मणोऽग्निना विशिष्टत्वं चायुक्तम्, एकस्यैवाग्नेर्विशेषणत्वविशेष्यत्वानुपपत्तेः, अन्यन्तरकल्पने च तस्याऽन्यन्तरं प्रति रूपत्वानुपपत्तेश्च, न त्विन्द्रादिसृष्टिरविवक्षिता तद्विवक्षायां ह्यग्निब्राह्मणपरत्वानुपपत्तिः किन्तु तद्देवताधिष्ठेयक्षत्रादिसृष्टिरेव विवक्षिता "तदग्निनैव देवेषु ब्रह्माभवद् ब्राह्मणो मनुष्येषु एताभ्यां हि रूपाभ्यां ब्रह्माभवदि"ति, च वाक्यद्वयं ब्राह्मणवर्णस्यैव देवमनुष्यविभागेन द्वैविध्यपरमिति उच्यते—न तावदिन्द्रादिसृष्ट्यविवक्षाया आद्या तदेतद् ब्रह्म क्षत्रं विट् शूद्र इति चातुर्वर्ण्यनिगमने कथं चातुर्वर्ण्यं क्षत्रियादिवर्णत्रयसृष्टिर्ह्युक्तेत्यपेक्षायान्तदग्निनैव देवेषु ब्रह्माभवदित्यग्निना देवेषु चतुस्सङ्ख्यापूरणादग्निश्च मृत्युसञ्ज्ञसूक्ष्माचिच्छरीरकपरमात्मसृष्टतया प्रागुक्तः, तस्य श्रान्तस्य तप्तस्य तेजोरसो निरवर्तत अग्निरिति श्रान्त—

शब्दः कारणलक्षणया ब्रह्मपरः ब्रह्मसङ्कल्पस्येत्यर्थः तपसश्च तप आलोचने सृज्यवर्गपर्यालोचनवत इत्यर्थः, एवं तत्राग्निरेव सृष्टतया श्रुतः । न तु तदधिष्ठितो ब्राह्मणवर्णः इहाऽपि तेन चतुस्सङ्ख्यापूरणादन्यप्रायन्यायेन क्षत्रादिविभागवत्तदभिमानीन्द्रादिसृष्टिर्विवक्षितेत्यवगम्यते न तु तदधिष्ठितवर्णमात्रस्य सृष्टिः तदग्निनैव देवेषु ब्रह्माभवत् ब्राह्मणो मनुष्येष्वित्युक्तिः पूर्वं ब्राह्मणवर्णस्य ब्रह्म-शब्दानुक्ततां ज्ञापयति, पूर्वोक्तानामिन्द्रक्षत्रियादीनामनया वचनव्यक्त्या पुनरनुक्तत्वात्, न हि क्षत्रवर्णो देवेष्विन्द्रेण क्षत्रमभवत् मनुष्येषु क्षत्रियेणेति वाक्यं श्रूयते, अत एवाग्नेरपि ब्रह्म-शब्दानुक्तत्वं सिद्धं, न हीन्द्रादेर्देवेष्विन्द्ररूपेण क्षत्रमभवन्मनुष्येषु क्षत्रियेणेति वाक्यमस्ति । ननु "क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्र" इति श्रूयते इति चेत् ततः किं वर्णान्तरेष्वपि द्वैविध्यं प्रतीयत इति चेन्न तदग्निनैवेत्यादिवाक्यविरुध्यात्, न हि क्षत्रवर्णो देवेष्विन्द्रादिरूपेण क्षत्रियोऽभून्मनुष्येषु क्षत्रियेणेति श्रुतं, तथाऽपि वर्णान्तरद्वैविध्यपरत्वेऽध्याहारबाहुल्यप्रसङ्गः, तर्हि अस्याः श्रुतेः कोऽर्थः उच्यते-ब्राह्मणाभिमान्यग्निसृष्टेः पूर्वमुक्तत्वात् क्षत्राद्यभिमानीन्द्रादिसृष्टिमिहोक्त्वा अग्निसृष्टिः स्मारिता तदग्निनैवेति वाक्येन, अग्निनेतीत्थम्भावे तृतीया, अग्निना विशिष्टं तत्परं ब्रह्म देवेषु ब्रह्माभवदग्निद्वारा ब्राह्मणाऽभिमान्यभवदित्यर्थः, अनेन इन्द्रादिद्वारा परब्रह्मण एव क्षत्राद्यभिमानित्वमित्यर्थसिद्धं, वर्णाभिमानिदेवतानाञ्च तपोविशेषात् ब्राह्मण्यादिविभागोऽस्तीति वा ब्राह्मणक्षत्रादिव्यवहारः 'ब्रह्मा बृहस्पतिः क्षत्रमिन्द्रः मरुतो वै देवानां विश" इत्यादि श्रुतेः, तदानीमग्न्यादिद्वारा परब्रह्मण एव ब्राह्मणत्वादिविभाग उक्तः स्यादिति बहु स्यामिति सर्वविधबहुत्वं हि तत्तद्द्वारा ब्रह्मगतम्, एवं वर्णाभिमानिदेवतासृष्टिरुक्ता । अथाऽभिमानविषयभूतब्राह्मणादिसृष्टिम् "ब्राह्मणोऽस्य मुखमासीत् बाहूराजन्यः कृत" इत्यादिश्रुतिप्रसिद्धामुपजीव्य तद्द्वारा तत्फलभूतमानुषवर्णविभागभाक्त्वम्परमात्मन उच्यते-ब्राह्मणो मनुष्येष्विति तत्परं ब्रह्म मनुष्येषु ब्राह्मणरूपभाक्तद्द्वारा ब्रह्माभवत् क्षत्रियेण विशिष्टं सत्तद् ब्रह्म तद्द्वारा क्षत्रियत्ववदभूदनया भूमिद्वारा काठि-

Digitized by Google

व्यवसाभूतत्वादित्यर्थः, श्रुतपदानुषङ्गेण निर्वाहे सम्भवति वाक्याध्याहारेण योजनाऽनुपपत्तेः, अथ्येऽग्निब्राह्मणयोः प्रशंसा तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे[1] मनुष्येष्विति, । तत्प्राशस्त्यहेतुमाह "एताभ्यां हि रूपाभ्यां ब्रह्माभव"दिति, अग्निब्राह्मणरूपाभ्यां परं ब्रह्म विशिष्टमभवदित्यर्थः, इन्द्रवरुणादीनां च परमात्मरूपत्वाविशेषे ऽपि अग्निब्राह्मणयोस्तद्रूपत्वकथनं तत्प्रशंसाय विवक्षितत्वात्, एताभ्यां हीत्यादिवाक्यस्य ब्रह्मद्वैविध्यपरत्वं प्रयोजनाभावादयुक्तं, न हि ब्रह्मद्वैविध्यमात्रवाक्यमुत्कर्षाय भवति, इदञ्च वाक्यमुत्कर्षोपपादनपरमिति हि-शब्देन ज्ञायते, ब्रह्म-शब्दार्थवैरूप्यं तु तपसा चीयते ब्रह्म तस्मादेतद् ब्रह्मेति मुण्डकोपनिषदीव घटते, मुख्यार्थासम्भवे लाक्षणिकार्थस्वीकारस्य तत्सम्भवेऽमुख्यार्थस्वीकारहेतुत्वाभावात्, वक्ष्यते हि "स्याच्चैकस्य ब्रह्मशब्दव-दि"ति पूर्वपक्षहेतुषु तत्रविदृष्ट्वप्रसिद्धेरन्यथासिद्धिरुक्ता । किञ्च तद्वा-विसर्गचयपरसृष्टिप्रवचनेन ब्रह्म वा इदमिति वाक्यस्य कारणवाक्यसारूप्यनिबन्धनं परमात्मपरत्वं भङ्क्त्वा ब्रह्म-शब्दस्य प्रथमवर्णतदभिमानिदेवताविषयत्वाश्रयणमयुक्तं सदेवेत्यादिवाक्ये ऽपि तेजोऽबन्नसृष्टेर्वेद्यमाणत्वेन सच्छब्दस्याऽपि वायुतदभिमानिदेवताविषयत्वप्रसङ्गात् स विशमसृजतेति पुंलिङ्गनिर्देशस्यात्म-शब्दाभिप्रायः, एतद्ब्राह्मणोपक्रमे हि "आत्मैवेदमग्र आसी"दिति श्रूयते अतस्स इति निर्देशो न तत्प्रशंसार्थः अस्तुतब्राह्मण-शब्दार्थोभिप्रायः, व्यवहितशब्दानुगुणलिङ्गभाक्त्वं सर्वनामपदस्य श्रुतिषु दृश्यते यथा मुण्डकोपनिषदि यस्सर्वज्ञस्सर्ववित् यस्यैष महिमा भुवि दिव्ये ब्रह्मपुरे ह्येष व्योमन्यात्मा प्रतिष्ठितः मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽऽन्ने हृदयं सन्निधाय तद्विज्ञानेन परिपश्यन्ति धीराः आनन्दरूपममृतं यद्विभाती"ति अत्रात्म-शब्दे सन्निहितेऽपि ब्रह्म तल्लक्ष्यमुच्यत इति व्यवहितब्रह्म-शब्दाभिप्रायेणामृतं यत्तदिति निर्दिश्यते, न तु स त आत्माऽन्तर्याम्यमृत इतिवत्पुंलिङ्गत्वेन । नन्वस्मिन्नेव ब्राह्मणे "तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तद् ब्रह्मावेत्

१ ब्राह्मणे इति पा० ।

यस्मात् सर्वमभवदिति पृष्ट्वा तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणा"मिति ब्रह्म-शब्दवाच्यस्य अविद्यातिरोहितस्य अहं ब्रह्मास्मीति ज्ञानेन सर्वात्मभावापत्तिश्रवणात्परब्रह्मणोऽविद्यातिरोधानासम्भवात्, ब्राह्मणादिषु तत्सम्भवादुपक्रमस्थब्रह्म-शब्दो ब्राह्मणवर्णपर इत्यत्राऽपि तदनुरोधेन ब्राह्मणवर्णपरत्वं ब्रह्म-शब्दस्योपपन्नमिति नैवम् उपक्रमेऽपि ब्रह्म-शब्दस्य परमात्मपरत्वात्तत्र चानादिविद्यातिरोधानं श्रूयते, तद्वाचकशब्दाभावात्, तथा हि "ब्रह्मविद्यया सर्वं भविष्यन्तः सर्व-शब्दवाच्यपरमात्मपर्यन्ताविर्भावकामा मनुष्या मन्यन्ते किमु तद्ब्रह्मावेद्यस्मात्तत् सर्वमभवदि"ति, तद् ब्रह्म किं वेद्यं वस्त्वन्तरमवेद्यस्माद्वेदनात् तत् सर्वमभवदिति ब्रह्मणोऽपि परं तदुपास्यं वस्त्वस्ति न वेति बुभुत्सोत्थापिता, उपास्यान्तरशून्यमित्युत्तरमाह तदात्मानमेवावेदहं ब्रह्माऽस्मि तस्मात्तत्सर्वमभवदिति आत्मानमेवावेन्न त्वन्यदुपास्यं तस्मात्तत् सर्वमभवदिति अर्थः, अन्यवेदनस्योपायत्वनिषेधे तात्पर्यं न तु स्ववेदनस्योपायत्वविधाने यथा ' स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप"इति कारणान्तरनिषेधेन परमकारणत्वसिद्धिः, एवमुपास्यान्तरनिषेधेन ब्रह्मणः परमोपास्यत्वमिह विवक्षितं कारणान्तराभावाफलमुपास्यान्तराभावः कारणस्यैव हि ध्येयत्वम्, एवमुपास्यान्तरशून्यं ब्रह्म जानतः फलमाह "तद्योय" इति, अतः उपक्रमैकार्थ्यं च परमात्मपरत्वसाधकं तस्माद्ब्रह्म वा इदमग्र आसीदेकमेवेत्यादिवाक्यस्य परमपुरुषस्यपरत्वं सिद्धं, तथा बृहदारण्यक एव आत्मैवेदमग्र आसीत्पुरुषविधः सोऽन्वीक्ष्य नान्यदात्मनोऽपश्यदित्यादि श्रूयते, इहात्म-शब्दादीक्षणाच्च चेतनस्य प्रतिपाद्यत्वेऽपि न स परमात्मा स हि निरतिशयानन्दः, इह च सोऽबिभेत्तस्मादेकाकी ह बिभेति स सहायमीक्षाञ्चक्र'इति भयान्वयोऽवगतः, परमात्मा हि न भयाश्रयः किन्तु भयहेतुः "भीषाऽस्माद्वातः पवत" इति श्रुतेरिति, उच्यते-अयं परमात्मा कारणवाक्यसारूप्यादस्य वाक्यस्य अग्र आसीदिति कारणवाक्यत्वं हि प्रतीयते अस्यात्मनः पुरुषविधत्वं चानन्दमयत्वं ज्ञापयति आत्मन

आकाशः संभूतः इत्युपक्रम्य अन्योऽन्तर आत्माऽऽनन्दमय इत्युक्त्वा तस्य पुरुषविधत्वप्रतिपादनात् "स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान् पाप्मन औषत् तस्मात्पुरुष" इति सर्वपाप्मप्रदाहकत्व पुरुष-शब्दवाच्यत्वावगमाच्च पर एव भयान्वयस्तु न परमात्मनः किन्तु तत्कार्यभूतपुरुषस्य सोऽहमस्मीत्यग्रे व्याहरत्ततोऽहं-नामाभवदिति तत्रैव ह्युक्तम्, अहमिति हिरण्यगर्भनाम अहमभिमानाश्रय सृष्टिपुरुषाणां प्रथमत्वाद्धिरण्यगर्भस्य, तथा मोक्षधर्मेच चतुर्मुखस्याहङ्कारसंज्ञत्वमगम्यते "मया सृष्टः पुरा ब्रह्मा यज्ञमयजत्स्वयम् । ततस्तस्मै वरान् प्रीतोददावहमनुत्तमात् । मत्पुत्रत्वं च कल्पादौ लोकाध्यक्षत्वमेव च । अहङ्कारकृतं चैव तथा पर्यायवाचकमि"ति, तत्रैव भृगुभरद्वाजसंवादे "तस्मात्पद्मात्समभवद् ब्रह्मा वेदमयोविधिः । अहङ्कार इति ख्यातः सर्वभूतात्मभूतकृत् ॥ ब्रह्मा वै सुमहातेजा य एते पञ्च धातव" इत्युक्तत्वात्, तस्मादयमर्थः-अहमस्मि अहं स्यां चतुर्मुखः स्यामिति सङ्कल्पवाक्यं व्याहरत्ततोऽहं-नामा चतुर्मुखोऽभवदित्यर्थः, अतश्चतुर्मुखरूपस्य परमात्मनः प्रकृतत्वात्तस्य सर्वपाप्मप्रदाहकत्वं साक्षाद्विशेषणमुक्तं, तद्रूपभूतश्चतुर्मुखः सोऽबिभेदिति भयाश्रयतयोच्यत इति, अतः आत्मा परमात्मेति स्थितं, तथाऽत्रैव बृहदारण्यके श्रूयते "नैवेह किञ्चनाग्र आसन्मृत्युनैवेदमावृतमासीदशनाया हि मृत्युः तन्मनोऽकुरुतेत्यादि अत्र मृत्युसंज्ञो न परमात्मा तदसाधारणधर्माश्रवणात्तस्याशनायाविशिष्टत्वाच्च, अविजिघत्सोऽपिपास इति हि परः श्रूयते सोऽर्चन्न चरदिति तस्यार्चनादिकर्मकर्तृत्वं श्रूयते परश्चाकर्मवश्यः "स एष सर्वेभ्यः पाप्मभ्य उदितः अपहतपाप्मे"ति श्रवणात्, अत एव अप्रतत्त्वसृष्टा नारायण इति च न शङ्क्यम् "अपहतपाप्मा दिव्यो देव एको नारायण" इति तस्यापहतपाप्मत्वादतः प्रसिद्धमृत्युरिहविवक्षितः सूर्यो वा तदर्कस्यार्कत्वमित्युक्तत्वात्, उच्यते-अग्र इति कारणावस्थत्वादयं मृत्युसंज्ञोऽचिच्छरीरकः परमात्मा "यस्य मृत्युश्शरीरं स दिव्यो देव एको नारायण इति श्रुतेः, अशनाया नाम जगत्संजिहीर्षा तद्वत्तया अशनाया-शब्दस्तस्मिन् प्रयुक्तः, तन्मनोऽकुरुतेति मनस्कारश्च परत्वसाधकः, अर्चन्निति पदस्यायमर्थः-अर्चनं-प्रीणनं कर्मकारकं च स्वयमेव अप्तुताख्या-

Digitized by Google

हाराद्दपि प्रकृतस्यैव कर्मत्वोपपत्तेः “लक्षणहेत्वोः क्रियायाः” इति शत्रन्त-
तया जगद्व्यापारलीलया स्वात्मानं प्रीणयितुमाचरदित्यर्थः, अपां सृष्टिश्च
स्रष्टुर्नारायणत्वे लिङ्गम्। “एको ह वै नारायण आसीदित्युपक्रम्य ‘ता इमा
अपि” इति श्रुतेः, अर्क-शब्दश्च परस्मिन् प्रीणनगुणयोगाद्वर्तते अत एव हि
भगवन्नामसहस्रे पठ्यते ‘अर्को वाजसनः शृङ्गी”ति, अपां रसः सारांशः तत्सम-
हन्यत सा पृथिव्यभव”दिति ब्रह्माण्डसृष्टिरुच्यते ता इमा आपः तद्विरेक-
समण्डमभवदिति महोपनिषदैकार्थ्यादतो मृत्युशरीरो नारायण इह प्रति-
पाद्यः सुबालोपनिषदि तदाहुः किं तदासीत्तस्मै स होवाच न सन्नासन्न स-
दसदि”ति तस्मात्तमः सञ्जायत इति श्रूयते अत्रेतच्छब्दादिकं नावगम्यते
धर्मिवाचिशब्दश्च सद्ब्रह्मात्मादिर्न प्रयुक्तः, अतस्सदसदनिर्वचनीयं कारणं
प्रतीयते, उत्तरत्र प्रतिपाद्यमानो नारायण एव न परमकारणं तमः प्रभृतिसृष्टि-
मुक्त्वा तदण्डं समभवदिति अण्डोत्पत्तिमभिधाय मध्ये पुरुषो दिव्यः
सहस्रशीर्षा पुरुष” इति तस्य अण्डान्तर्वर्तित्वप्रतिपादनात् मृत्युर्वै परे देव
एकीभवति परस्तान्न सन्नासन्न सदसदिति सदसदुभयविलक्षणस्य देवात्
परत्वं चावगम्यते, नैवम् उच्यते कारणत्वाद्धेव नारायणपरत्वं सिद्धम्
अस्यामुपनिषदि नारायणस्यैव भूयो भूयः प्रतिपादनं च तात्पर्यलिङ्गं कोऽयं
विज्ञानघन उत्क्रामन् स केन कतरद्वा स्थानमुत्सृज्योत्क्रामति तस्मै स होवा-
चेत्युपक्रम्य अपुनर्भवाय कोशं भिनत्तीत्यारभ्य अक्षरं भित्त्वा मृत्युं भिनत्ति
मृत्युर्वै परे देव एकीभवति स परस्तान्न सन्नासन्न सदसदिति मृत्योः परे देवे
एकीभावः श्रूयते, मृत्युश्च तमःस्थानप्रमाणात्तद्धि अक्षरात्परं श्रुतम् अतस्तम-
स्संज्ञमृत्योः कारणं सदसदुभयविलक्षणतयोक्तं वस्तु परो देव इति प्रतीयते,
विभागापादनस्यैवाविभागस्थानत्वात्, परो देवश्च नारायणः ‘दिव्यो देव
एको नारायण इत्युक्तत्वात्” न च देवात्परं सदसदुभयविलक्षणं किन्तु देव
एव मृत्युसंज्ञतमोपादानाविभागस्थानयोरैक्यत्वात्, अतस्तमोपादानत्वावि-
भा[1]गस्थानत्वाभ्यां देवत्वावगमाद्देवस्य नारायणत्वान्मुमुक्षुप्राप्यत्वाच्च नारा-
यण एव सदसदुभयविलक्षणः केवलाच्चेतनादचेतनान्मिश्रिततदुभयरूपका-

१ तमोपादानत्वाविभागस्थानत्वाभ्यामिति पा०।

Digitized by Google

भिन्न एव त्रिलक्षणतया नारायणो न चासच्च सदसदित्युच्यते मध्ये पुरुषो-
ष्विव इति वाक्यं तस्याण्डमध्ये स्वसृष्टचतुर्मुखरूपेणावस्थानं दर्शयति केव-
लपुरुष-शब्दश्चतुर्मुखपरः तच्छरीरकः परमात्मा सहस्रशीर्षा पुरुष इत्युच्यते
सोऽग्रे च भूतानां मृत्युमसृजदिति त्रिशिरस्कमृत्युसृष्टिश्चतुर्मुखरूपधरपरमा-
त्मकर्तृका, अत एव हि तस्य ब्रह्माभिभीत इत्यनन्तरमुच्यते, अतो न सच्चा-
सच्च सदसदित्युक्तं जगत्कारणं नारायण इति स्थितम् । असावादित्यो ब्रह्मेति
ब्रह्मैव सन् ब्रह्माऽप्येति य एवं वेद तदुक्तमृषिणा "सूर्य आत्मा जगतस्तस्थु-
षश्चे"त्यादिष्वपि, असावादित्य इत्यपरोक्षनिर्देशापवादकचिदचिद्भाव-
लक्षणधर्मान्तराश्रवणात्सिद्धादित्येऽमुमुपास्य आत्मेति न शङ्कनीयं अन-
दन्तरात्मत्वस्य ब्रह्मसाम्यापत्तिपूर्वकब्रह्मप्राप्तिरूपमोक्षोपायभूतवेदनविष-
यत्वस्य च परमकारणव्याप्तत्वात्, कारणत्वस्य च परमपुरुषत्वसाधकत्वादव-
यवशक्त्याऽपर्यवसानाद्वा सूर्यादिशब्दवाच्यपरमपुरुषविषयं सूर्य आत्मे-
त्यादिवाक्यं, तथा प्रश्नोपनिषदि च "कुतो ह वा इमाः प्रजा जायन्त इति
तस्मै सहोवाच प्रजाकामो ह वै प्रजापतिः स तपोऽतप्यत रयिं च प्राणञ्चे-
त्येतौ मे बहुधा प्रजाः करिष्यत इति इत्यादित्यो ह वै प्राणो रयिरेव चन्द्र-
मा इत्यादि श्रूयते, इहापीतरविशेषनिरतिशयानन्दाद्यश्रवणात्स तपोऽत-
प्यतेति कर्माधीनसृष्ट्यवगमाच्च चतुर्मुख एवेति न शङ्कनीयं किन्तु चन्द्रादित्य-
विसृष्टेरण्डान्तर्वर्तिविषयायाश्चतुर्मुखकर्तृकत्वसंभवेऽपि तदन्तर्यामिपरम-
पुरुष एव प्रजापति-शब्दवाच्यः अपर्यवसानादवयवशक्त्या वा तस्यैव वा-
च्यत्वं स्यात्, अस्मिन्नेव खण्डे परब्रह्मप्राप्तिरुक्तत्वात्, तपसा ब्रह्मचर्येण
श्रद्धया विद्ययाऽऽत्मानमन्विष्यादित्यमभिजायन्त" इत्युक्त्वा "एतस्मान्न पु-
नरावर्तन्त" इति अर्चिरादिगत्याऽनावृत्तिप्रतिपादना "येषां तपो ब्रह्मचर्यं ये-
षु सत्यं प्रतिष्ठितं तेषामसौ विरजो ब्रह्मलोक" इति निर्दोषपरमात्मलाभव-
चनाच्च ब्रह्मैव लोको लोकः विरज-शब्देन प्रसिद्धब्रह्मलोकव्यावृत्तेः, अतः
परमापरत्वं हि प्रतीयते, उत्तरखण्डेषु च "एष हि द्रष्टा श्रोता घ्राता रस-
यितेत्यादिना प्रत्यगात्मा विशोध्यते ततश्चोपरिष्टात्परमपुरुषमभिध्यायीत
परात्परं पुरिशयं पुरुषमीक्षते इति परमपुरुषोपासनं तत्प्राप्तिरूपफलं च

Digitized by Google

श्रूयते, अत उपक्रमे प्रजापति-शब्दवाच्यो महावाक्यस्वारस्यात्परमपुरुष इति सिद्धम् । हिरण्यगर्भस्समवर्त्तताग्र इत्यत्रापि प्रसिद्धहिरण्यगर्भ एव कारणत्वेन निर्दिष्टः तद्व्यावर्त्तकधर्माश्रवणात् न ह्यत्र समस्तकार्यैकान्त्यनुगुणेक्षणविशेषानवधिकानन्दाक्रमैश्वर्यत्वादयोऽवगम्यन्ते, पृथिव्यादिधारकत्वं तु न व्यावर्त्तकम् अण्डान्तर्गतपदार्थधारणादेरण्डाधिपतौ संभवाद्, अमृतमृत्युशब्दौ च देवभोग्यत्राणापहर्तृविषयाविति तयोस्तद्विषयाभ्युपगमस्वं पृथिव्याद्याधारत्वादीनां चिदचिद्व्यावर्त्तकत्वेऽपि परमपुरुषसाधारणत्वाभावात्प्रसिद्धहिरण्यगर्भपरत्वमिति शङ्कायामुच्यते हिरण्यगर्भ-शब्दो भगवत्परः अग्रे समवर्त्ततेति कारणत्वश्रवणादनवच्छिन्नपतित्वस्य भगवदसाधारणं पतिं विश्वस्ये''ति नारायणानुवाके श्रवणात्, तस्य चानन्यपरत्वं वक्ष्यते, द्युपृथिव्यादिधारणं च तदसाधारणं "विष्णुना विधृते भूमी" इति श्रुतेः, कारणप्रकरणस्थावमृतमृत्यु-शब्दौ मुक्तबद्धपराविति, बन्धमोक्षहेतुत्वं च तदसाधारणं "तमेवं विद्वानमृत इह भवति नान्यः पन्थाः" इति श्रुतेः, "तस्य विश्व उपासते प्रशिषं यस्य देवा यत्राधिसूर उदितो व्येती''ति प्रतिपादितम् आदित्यादिसर्वदेवतानियमनञ्च तत्प्रत्यभिज्ञापकं "भीषास्माद्वातः पवते भीषोदेति सूर्यः य आदित्ये तिष्ठन् यः सर्वेषु देवेषु तिष्ठन्नित्या''दिश्रुतिप्रसिद्धः किञ्च 'यमन्तस्समुद्रे कवयो वयन्ति विद्युतः पुरुषादधीति समुद्रान्तर्वर्तिविद्युद्वर्णपुरुषप्रतिपादकेनाम्भस्य पार इत्यनुवाकेन लक्ष्मीपतित्वप्रतिपादकेनोत्तरनारायणेनास्याष्टर्चस्यैकत्वाच्च नारायणपरत्वम् । अद्भ्यस्सम्भूतो हिरण्यगर्भ इत्यष्टाविति ह्युच्यते विष्णुस्मृतौ च भगवत्समाराधने "हिरण्यगर्भस्समवर्त्तताग्र इत्यष्टाभिर्हविर्निवेदयेदिति हविर्निवेदने विनियोगादस्याष्टर्चस्य भगवत्प्रतिपादकत्वमवगम्यते, अत एव हिरण्यगर्भः शत्रुघ्न इति भगवन्नामसहस्रे पठ्यते, अतोऽत्र हिरण्यगर्भ-शब्दवाच्यो नारायण इति स्थितम् । अत एव 'सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पय''दित्यत्र धातृ-शब्दस्य परमपुरुषविषयो निश्चितः, इदं हि वाक्यम् अम्भस्यपार इत्यनुवाकस्थम् । नन्वत्राप्युपक्रमे प्रजापतिश्चरति गर्भे अन्तरिति प्रजापतिः श्रुतः, प्रजापतिश्च हिरण्यगर्भः समुद्रशायित्वलिङ्गसचिवपुरुष-शब्दश्रुतेरुपक्रमोपसंहा-

Digitized by Google

रस्य प्रजापतिधातृशब्दरूपश्रुतिद्वयपरास्तत्त्वादिति । न उपक्रमस्य प्रजापति-शब्दस्य हिरण्यगर्भपरत्वानुपपत्तेः, "तदेवाग्निस्तद्वायुस्तत् सूर्यस्तदु चन्द्रमाः तदेव शुक्रममृतन्तद् ब्रह्म तदापस्स प्रजापति"रित्यग्निवाय्वादीनामिव प्रजा-पतेरपि कारणभूतप्रजापतिविभूतितया तद्व्यतिरेको ह्यवगम्यते, यथा "यमि-न्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्यमाहुः यो देवानां देवतमस्तमोजाः तस्मा इन्द्राय सुतमाजुहोमी"त्यत्र इन्द्र-शब्दवाच्यस्य प्रसिद्धेन्द्रव्यतिरिक्त-त्वावगमः, अतस्सूर्याचन्द्रमसौ धातेत्यत्र धातृ-शब्दस्तपश्शब्देन पूर्वप्रस्तुत-परमात्मपरः, अत एव धातुः प्रसादान्महिमानमीशमित्यत्र धातृ-शब्दोऽपि व्याख्यातः, मुमुक्षूपास्यत्वस्य कारणत्वव्याप्तत्वात्, "अजस्य नाभावध्येकम-र्पितं यस्मिन्निदं विश्वं भुवनमधिश्रितं विश्वकर्मा ह्यजनिष्ट देवः स प्रजापति-रेकः पुष्करपर्णे समभवत्" यन्नाभिपद्माद्भवन्महात्मा प्रजापतिर्विश्वसृग् विश्वरूपः । तत्र ब्रह्मा चतुर्मुखोऽजायत, नारायणाद् ब्रह्मा जायते, यो ब्रह्माणं विदधाति पूर्वमित्यादिभिश्चतुर्मुखस्य भगवन्नाभिपद्मसृष्टत्वावग-मात्कार्यभूते तस्मिन्नसम्भवेन मुमुक्षूपास्यत्वस्य भगवदसाधारणत्वादुपक्र-मभूते अम्भस्यपार इत्यनुवाके "य एनं विदुरमृतास्ते भवन्तीति"भगवत एवामृतत्वप्राप्त्युपायताप्रतिपादनस्यानुरोद्धव्यत्वात्, उपक्रमस्थधातृ-शब्दै-करूप्यस्य न्याय्यत्वादुत्तरे चानुवाके चतुर्मुखशिवयोरिन्द्रवन्नारायणविभूतित्व-प्रतिपादनादस्मिन्नप्यनुवाके "यस्मात्परं नापर"मिति मन्त्रेण परमपुरुषस्यैव सर्वस्मात्परत्वप्रतिपादनात्, ब्रह्मकार्यवर्गप्रतिपादनप्रकरणे "ब्रह्मा देवानां पदवीः कवीना"मिति मन्त्रेण प्राणसमुद्रादीनामिव चतुर्मुखस्य कार्यत्वाव-गमाच्च । ननु सप्त प्राणाः प्रभवन्तीतिवन्नोत्पत्तिः श्रूयते न महिषश्ये-नादीनामिवोत्पत्तेः प्रकरणसिद्धत्वात्तस्य बाधकाभावाच्च । ननु यस्मात्पर-मित्यतः पूर्वमेव विश्वाधिको रुद्रो महर्षि"रिति श्रवणात् "यः परः स महे-श्वरः" इत्युपसंहारे श्रुतत्वाच्च धातृ-शब्दस्यापि रुद्रपरत्वं न्याय्यमिति उच्यते-उपक्रमस्थतया प्रबलस्य धातृ-शब्दस्य रूढिपरित्यागे को हेतुः उपसंहारो हि दुर्बलः, रुद्रमहेश्वरशब्दरूपश्रुतिद्वयमिति चेत्तथाऽपि न बाधकत्वं, तुल्यबलत्वाद्धातृपदश्रुतिरेकाऽप्युपक्रमस्थतयाऽनुग्राह्येति रुद्रमहे-

Digitized by Google

श्वरश्रुत्योरनेकत्वेऽप्युपक्रमविरोधाद्दुर्बलत्वं, तस्मात्तुल्यबलता । किञ्च यो देवानां प्रथमं पुरस्ताद्यः परस्स महेश्वर इत्यनुवादरूपवाक्यस्थत्वाच्च दौर्बल्यमधिकम्, अतो धातृरुद्रमहेश्वरशब्दानामन्योन्यविरोधात् अन्योऽन्यबाध्यबाधकभावानुपपत्तेश्च अर्थनिश्चायकत्वेऽनुपपन्ने सति प्रमाणान्तरायत्तोऽर्थनिश्चयः, तत्र धातृ-शब्दस्य भगवत्परत्वमुपपादितं तदुपपादकहेतुभिः धातृशब्दरूढित्यागेनाप्यभायन्यायाच्च रुद्रमहेश्वरशब्दयोरपि रूढित्यागस्य न्याय्यत्वाद् यो देवानां यः पर इत्यनुवादस्यान्यसापेक्षत्वात् अ इति ब्रह्मेति श्रुत्या ब्रह्मणोऽकारवाच्यत्वावगमाद्, ब्रह्मणश्च लक्षणं जगत्कारणत्वमिति कारणवाक्यप्रतिपाद्यनारायणस्याकारवाच्यत्वावगमात्तस्य लोकप्रसिद्धत्वा"दकारेणोच्यते विष्णु"रिति श्रुत्यन्तराच्च नारायणस्याकारवाच्यतासिद्धेश्च रुद्रमहेश्वर-शब्दौ रोदयति महानीश्वर इति अवयवशक्त्या भगवत्पराविति युक्तं, नारायणस्यैव यच्छब्दानूदितत्वात्तस्यैव हि महेश्वरत्वरूपगुणविधानं युज्यते, न हि जुहूमनूद्य विधीयमानं पर्णमयत्वं कपालस्य भवति, अतो धातृरुद्रमहेश्वर-शब्दवाच्यो नारायण इति स्थितम् । अतएव श्वेताश्वतरोपनिषदि च "विश्वाधिको रुद्रो महर्षिः हिरण्यगर्भं जनयामास पूर्व"मिति वाक्यं च व्याख्यातम् अनुवादरूपतया पूर्वोदाहृतप्रमाणान्तरसापेक्षत्वात्, तथा हि बहूच-शतपथ-सुबाल-महोपनिषत्-सामवचनादिभिर्हिरण्यगर्भजन्यत्वे श्वेताश्वतरवाक्येन, हिरण्यगर्भजनकत्वे च रुद्रस्यावगम्यमाने तयोरविरोधेन निर्वाहासम्भवे प्राबल्यदौर्बल्यचिन्ता युक्ता, अविरोधश्च वस्त्वैक्येन वा कल्पभेदेन वा, जन्मनोऽवताररूपतया वा, सम्भवेत्तत्र तावद्वस्त्वैक्यमिह नाविरोधनिर्वाहक्षमं भवेत् क्षीराद्दधि दध्नः क्षीरमितिवचसोरिवावस्थाद्वयपौर्वापर्यविपर्यासविरोधस्य दुष्परिहरत्वात्, कल्पभेदादविरोधकल्पनं सूर्याकाशप्राणादिष्वपि प्रसज्येत्, । ननु अश्रुतस्य कल्पभेदस्य कल्पनमनन्यथासिद्धेन कल्पकेन स्यात्सूर्याकाशादिविषयवाक्यानां परमात्मपरतयाऽप्युपपत्तौ न तत्कल्पनमिति चेत्, इहाऽपि तुल्यम्, अवतारपक्षेऽपि इन्द्रादिप्रकरणेष्विव हिरण्यगर्भरुद्रप्रकरणेष्वपि तस्याश्रुतत्वादिन्द्रादीना-

Digitized by Google

मिव कर्मवश्यत्वं प्रतिपादयन्त्यामुत्पत्तिश्रुतौ परिपन्थिन्यामन्यतरोत्पत्तेरव-
तारकूपत्वकल्पनायोगादनुपपन्नः रुद्रस्यानपहतपाप्मत्वं च शतपथेऽवगतम्
अनपहतपाप्मा वाऽहमस्मीति रुद्रवचः, अत एकैक एवेश्वरः कदाचिद्धिरण्य-
गर्भावस्थात्स्वस्माद्रुद्ररूपोऽवतरति कदाचिद्रुद्रावस्थात्स्वस्माद् हिरण्यग-
र्भरूपो ऽवतरतीति कल्पनमप्यनुपपन्नं गौरवनिरस्तं च वस्त्वैक्यं द्वयोरन्य-
स्यावतारूपत्वमपि हि कल्प्यं वस्त्वैक्यकल्पभेदजन्मद्वयावतारूपत्वपक्षेषु
रुद्रोत्कर्षवादिमतं च न जीवति, एवं विरोधस्य दुष्परिहरत्वे सति हिरण्यग-
र्भरुद्रशब्दयोरन्यतरपदप्रसिद्ध्यनादरेण निर्वाहः स्यात्तथाऽऽकाशादिपदा-
नान्तच हिरण्यगर्भ–शब्दस्य प्रसिद्ध्यनादरेण स्कन्दाद्युत्पत्तिरुक्ता स्यात्ततश्च
रुद्रस्य परमकारणत्वं न सिद्ध्येच्चतुर्मुखकार्यत्वस्य श्रुत्यन्तरावगतस्यानपो-
दितत्वात्ततोऽपि रुद्र–शब्दस्यैव प्रसिद्ध्यनादरो न्याय्यः प्रसिद्धेतरार्थपरिग्र-
हस्य मानान्तराधीनत्वान्मानान्तरप्रसिद्धिद्योतकस्य यद्वृत्तस्य रुद्रसामा-
नाधिकरण्याच्च, रुद्र–शब्दस्य मानान्तरानुगुणेऽर्थे निश्चिते तावतैव
विरोधस्य परिहृतत्वेन हिरण्यगर्भशब्दप्रसिद्ध्यनादरे कारणाभावात्, तथा च
श्रुतयो रुद्रस्य कार्यत्वं हिरण्यगर्भस्य स्रष्टृत्वं चावगमयन्ति बह्वृचे तावत्
"तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेष नृम्णः सद्यो जज्ञानो निरि-
णाति शत्रूनि"ति । न चास्य मन्त्रस्य उदगादिति ब्राह्मणानुरोधेनादित्य-
विषयत्वं शङ्कनीयं भूतपतित्वसद्योजातत्वाभ्यामुग्र–शब्दरूढिबलाच्च
रुद्रविषयत्वसिद्धेरुदयलिङ्गस्य दुर्बलत्वादुदगादिति पदस्य तदुत्पत्तिदर्शन-
योरन्यतरपरत्वेऽपि मुख्यवृत्तिभङ्गाभावाद्विरोधिहेत्वन्तराभावाच्च । तथा
सुबालोपनिषदि अपानान्निषादायक्षराक्षसगन्धर्वाश्चास्थिभ्यः पर्वता लो-
मभ्य ओषधिवनस्पतयो ललाटात्क्रोधजो रुद्रो ऽजायत इति महोपनि-
षदि अथ पुनरेव नारायणः सोऽन्यं कामं मनसा ध्यायीत त्र्यक्षः शूल-
पाणिः पुरुषो ऽजायत नारायणोपनिषदि "नारायणाद् रुद्रो ऽजायत
इति, बृहदारण्यके ब्रह्म वा इदमग्र आसीत्तदेकं सन्नव्यभवत् यान्येतानि देव-
क्षत्राणि इन्द्रो वरुणस्सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान" इति, शतपथे
चाष्टमूर्तिब्राह्मणे अभूद्वा इदमप्रतिष्ठेत्यारभ्य "भूतानां च प्रजापतिः संव-

त्सरायादीक्षितभूतानां पतिर्गृहपतिरासीदुषाःपत्नीत्यादिकमुक्त्वा "भूतानां पतिस्संवत्सर उषसि रेतोऽसिञ्चत्सम्वत्सरे कुमारोऽजायत सोऽरोदीत् तं प्रजापतिरब्रवीत्कुमार? किं रोदिषि यच्छ्रमात्तपसोऽधिजातोऽसीति सोऽब्रवीदनपहतपाप्मा वा अहमनाहितनामा" नाम मेधेहि पाप्मनोऽपहत्या इति तं प्रजापतिरब्रवीद् रुद्रोऽसीति तदस्य तन्नामाकरोदग्निस्तद्रूपमभवदग्निर्वै रुद्रो यदरोदीत्तस्माद्रुद्रः सोऽब्रवीज्ज्यायान्वा अहमस्मि धेह्येवं मे नामे"ति तं प्रजापतिरब्रवीत् भवोऽसीति शर्वोऽसीति ईशानोऽसीति पशुपतिरसीति उग्रोऽसीति भीमोऽसीति महादेवोऽसी' ति अत्र प्रजापतिः संवत्सरोमहान् क इति संवत्सर शब्दवाच्यतया प्रसिद्ध चतुर्मुखसृष्टत्वादनपहतपाप्मत्वतद्दत्तसंज्ञामूर्त्यष्टको रुद्रः प्रतीयते, शैलालिब्राह्मणे चतुर्मुखाद्रुद्रोत्पत्तिः श्रूयते साम्नि च "विरूपाक्षाय दत्ताञ्जये ब्रह्मणः पुत्राय ज्येष्ठाय श्रेष्ठायामोघाय कर्माधिपतय" इति ब्रह्मपुत्रत्वं रुद्रस्य प्रतीयते, चतुर्मुखस्य नारायणात्मकत्वाद्रुद्रस्य, नारायणसृष्टत्वश्रुतिश्चाविरुद्धा कदमामसिष्यतीति रुद्र इत्यब्रवीद्रुद्रोवै क्रूरः सोऽस्यत्विति "सोऽब्रवीद्वरं वृणा अहमेव पशूनामधिपतिरसानी"ति तस्माद् रुद्रः पशूनामधिपतिरिति देवतावरदानलब्धपशुपतिभावः प्रतिपाद्यते, तथा "अस्य देवस्य मीढुषोवाव विष्णोरेतस्य प्रभृदेहविभिः विधेहि रुद्रियं महित्व"मित्यनेन च पूर्वोदाहृतवचनानुग्रहात्स्वस्यान्न भगवदाराधनबललब्धमहिमत्वं रुद्रस्यावगम्यते, अतश्चतुर्मुखसृज्यस्य भगवत्समाराधनलब्धमहिम्नो रुद्रस्य चतुर्मुखसृष्टत्वं युक्तम् । ननु परमकारणत्वं शिव-शब्दवाच्यस्यैव श्रूयते "यदा तमस्तन्न दिवा न रात्रिर्न सच्चासच्छिव एव केवल" इति न तस्य भगवदसाधारणस्य बहूपनिषद्वाक्यैर्न्यायानुगृहीतैर्निश्चितत्वात् । किञ्च नारायणमहापुरुषादिशब्दानामसाधारणत्वात् बहूपनिषत्स्थत्वात् एकोपनिषदभ्यस्तत्वात्साधारणनामैकोपनिषत्स्थानां शिवादिशब्दानां तदनुरोधेन वर्णनीयत्वादिहाप्युपक्रमोपसंहारादिपर्यालोचनायां भगवत्यत्यभिज्ञापकबहुविशेषणदर्शनाद्विशेषतःपुरुषसूक्तैकार्थ्यावगमाच्च शिवरुद्रादिशब्दानामपि परमपुरुषपरत्वसिद्धेः, रुद्रो बहुशिरा बभ्रुरिति भगवति रुद्र-शब्दः

Digitized by Google

प्रयुक्तः अग्नौ च रुद्रो भूत्वाऽग्निरनूत्थाय च अध्वर्युं च यजमानं च
हन्या"दिति प्रयुक्तः "शिवः शिवानामशिवो ऽशिवानां, शिवास्ते सन्तु
पन्थानः, शिवम"स्त्विति विशेषतो भगवति च शाश्वतं शिवमच्युतमिति
शिव-शब्दः प्रयुक्तः पुँल्लिङ्गैकवचनान्तत्वात्त्वसाधारण इति चेत्तर्हि प्रातिप-
दिकसाधारण्यमनुज्ञातं भवति, पुँल्लिङ्गैकवचनान्तोऽप्यसाधारणो न भवति
तादृशस्याप्यर्थान्तरपरत्वशक्त्यनपगमादरुणः कपिल इति शब्दवत्र हि तौ
रविसारथिमुनिविशेषासाधारण्यादर्थान्तरप्रत्यायनशक्तिविधुरौ भवतः, नैवं
नारायणमहापुरुषादिशब्दा अन्यत्र प्रयुक्ताः, महादेवं वा महापुरुषं वाऽ-
र्चयेदिति देवताविशेषविषयो हि प्रयोगः पुरुष-शब्दोऽपि स्वतो भग-
वद्विषयः, पुरुषो वै रुद्र इत्यप्यस्तीति चेत् सत्यं, स च भगवद्विषय
एव सर्वो वै रुद्र इत्यस्योपपादनाय रुद्रस्य पुरुषात्मकत्वपरत्वाद्वाक्यस्य
सर्वगत्वादनन्तस्य स एवाहमवस्थित इतिवत्, अतो हिरण्यगर्भका-
र्यतया श्रुत्यन्तरसिद्धस्य तज्जनकत्वायोगः । किञ्च न केवलमनुवा-
दरूपत्वादस्मिन्वाक्ये रुद्र-शब्दस्य भगवद्विषयत्वनिश्चयः, किन्तु हिर-
ण्यगर्भजनकत्वविशेषितत्वाच्च तस्य भगवद्विषयत्वनिश्चयः, तज्जनक-
त्वस्य नारायणचिह्नत्वात्, यथा "सर्वाणि रूपाणि विचित्य धीरो
नामानि कृत्वाऽभिवदन्यदास्ते" इति परमपुरुषस्य नामरूपनिर्वोढृत्वश्र-
वणादा"काशो ह वै नामरूपयोर्निर्वहिते"त्यत्र आकाश-शब्दस्य
भगवद्विषयत्वनिश्चयः तद्वत्, न च अनयैव श्रुत्या हिरण्यगर्भजनकत्वं
रुद्रचिह्नमिति शङ्कनीयं, हिरण्यगर्भजनकताया रुद्रचिह्नतानिश्चयस्य हिर-
ण्यगर्भजन्यत्वश्रुतिप्रति[1]चिह्नत्वात् भगवतो हिरण्यगर्भजन्यत्वश्रुत्यभावेन
तज्जनकतायास्तच्चिह्नतानिश्चयस्यानपवादत्वाच्च अस्य वाक्यस्य रुद्र-
परत्वनिश्चये सति हिरण्यगर्भजनकत्वस्य रुद्रचिह्नत्वनिश्चयः, तन्निश्चये
सति अस्य वाक्यस्य रुद्रपरत्वनिश्चय इत्यन्योन्याश्रयश्च, अनुवादरूप-
त्वाच्च रुद्रपरत्वानिश्चय इत्युक्तम् । किं च कार्य्यभूतस्य विश्वाधिकत्वायो-
गाद्विश्वाधिकत्वविशेषितरुद्र-शब्दस्य विशोकत्वोपलक्षितसत्यकामत्वा-

१ उन्य अप्रतिबद्धत्वादिति पा॰ ।

दिविशेषितस्य तथाऽपि दहरं गगनं विशोकः दहरोऽस्मिन्नन्तर आकाश इत्यादिवाक्यस्थगगनादिशब्दस्येव प्रसिद्धार्थपरत्वाभावेन भगवत्परत्वसिद्धिः। नन्विदमिष्टं रुद्र-शब्दस्य कार्यावस्थोच्छेदेन कारणरूपपरत्वं, सत्यं, स तु परमपुरुष एव तस्यैव परमकारणत्वात्। ननु रुद्र एक एव कारणावस्थः प्रतिपाद्यत इति चेदिन्द्र एव वा आकाश एव वा कारणावस्थः तत्तद्वाक्यप्रतिपाद्यः किं न स्यात्, इन्द्रादेः प्रसिद्धस्यैव परमकारणावस्थासद्भावे मानान्तराभावादिति चेत्, तत एवात्राऽपि प्रसिद्धस्यैव परमकारणत्वासिद्धिरिति तुल्यं, शिवादिशब्दानां विशेषोपस्थापनासमर्थत्वमुक्तम् अतोऽस्य वाक्यस्य भगवद्विषयत्वं सिद्धम्। यद्यपि कल्पभेदेन हिरण्यगर्भजनकत्वेऽपि रुद्रस्य न भगवतः परमकारणत्वविरोधः तथाऽपि न्यायपर्यालोचनायां नारायणपरत्वं रुद्र-शब्दस्य युज्यत इति प्रतीयते। किञ्चास्यामप्युपनिषदि प्रथमद्वितीयखण्डयोर्देवात्मशक्तिं प्रेरितारं च मत्वा अमृतत्वं भजते विश्वमीशः, यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत्-ज्ञात्वा देवम् एको हि देवः प्रदिशोऽनुसर्वा इति देवात्मप्रेरित्रीशब्रह्मशब्दैः परमात्मा निर्दिष्टः, ते च दिव्यो देव एको नारायणः विश्वं नारायणं देवमक्षरं परमं प्रभुम्। आत्मा नारायणः पर अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ईशः सर्वस्य जगतः येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" इत्यादिवाक्यप्रतिपन्ननारायणप्रत्यभिज्ञापकाः, अत्रेश-शब्दस्य न रूढः प्रयुक्तः किन्तु गुणयोगात्, अनीशश्चात्मा द्वावजावीशनीशौ, ईशः सर्वस्येति निर्देशस्य सप्रतिसम्बन्धितया अन्वयवाचिविवक्षाज्ञापकत्वादनन्तश्चात्मा विश्वरूपो ह्यकर्तेत्यत्रानन्त-शब्दस्तु योगरूढः, रूढ्यविवक्षानिमित्तप्रतियोगिकनिर्देशाभावात्, तृतीये च य एतद्विदुरमृतास्ते भवन्त्यनेनाभ्यस्य पार इत्यनुवाकः प्रत्यभिज्ञाप्यते स हि परमपुरुषविषयः एवमुपक्रमो भगवत्परः 'एको हि रुद्र इत्यस्यानन्तरं विश्वतश्चक्षुरुत विश्वतो मुख इत्यादिमन्त्रश्च भगवत्प्रत्यभिज्ञापकः, तस्य विराट्पुरुषविषयत्वात्, द्यावापृथिवी जनयन्निति च शीर्ष्णो द्यौः समवर्तत पद्भ्यां भूमिरिति वाक्यप्रत्यभिज्ञापकं यो यो देवानामिति वाक्यमनुवादरूपमिति स्फुटं, कार्यस्य परमकारणत्वायोगाद्रुद्र-

Digitized by Google

शब्दस्य कार्यरुद्रव्यतिरिक्तविषयत्वे सति वाक्यस्यानुवादरूपतया योग्या-र्थज्ञापकवाक्यानुगुण्यम् अनन्यभगवदसाधारणविशेषणानुगुण्यं च भगवद्वि-षयत्वनिश्चयः "या ते रुद्र शिवा तनूरि"त्यस्यानन्तरं ततः परं ब्रह्म परं बृह-न्तमिति वाक्यं च नारायणः परं ब्रह्मेति महोपनिषत्प्रत्यभिज्ञापकम् ईशं तं ज्ञात्वाऽमृता भवन्तीत्यत्र ईश-शब्दः पूर्ववद्यौगिकः वैरूप्यायोगाद्वेदाह-मेतमित्यनन्तरवाक्यस्यैतच्छब्दस्य पूर्वं रुद्र-शब्दवाच्यस्य महापुरुषतामव-गमयति प्रकृतपरामर्शित्वात्ततो यदुत्तरतरमिति वाक्यन्तु परमतस्सेतून्मा-नेत्यत्र उपपादयिष्यते, सर्वाननशिरोग्रीवत्वञ्च पुंसूक्तार्थस्मारकं, सर्वव्यापि-त्वन्तु सर्वं व्याप्य नारायणः स्थित इत्येतत् स्मारयति, भगवच्छब्दस्तु भग-वान् पवित्रं वासुदेवः पवित्रम्भगवान् वासुदेवः परा प्रकृतिः परं पवित्रं भगवान् वासुदेवः ये भगवन्तं वासुदेवमेवं विदुरिति वासुदेवासाधारणः अत एव हि स्मर्यते "एवमेव महाशब्दो मैत्रेय भगवानिति परमब्रह्मभूतस्य वासुदेवस्य नान्यग" इति, सत्त्वप्रवर्तकत्वं भगवत इति स्फुटं, "यो ह खलु वा अस्य सात्त्विकोंऽशः सोऽसौ ब्रह्मचारिणो योऽयं विष्णु"रिति मैत्रायणीयश्रुतेः, अन्तरात्मत्वं च तदा सुबालोपनिषत्प्रत्यभिज्ञापकत्वात् हृदा मनीषेति तु विद्युद्वर्णपुरुषस्मारकम् । अथ सहस्रशीर्षेत्यादिमन्त्रद्वयमेवाधीतम् ईशानपदं तु नपुंसकत्वाद्यौगिकमेव न तु रूढं पुंलिङ्गताप्रसङ्गात्सर्वस्य शरणं सुहृदिति नारायणो माता पिता भ्राता निवासश्शरणं सुहृद्गतिर्नारायण" इति श्रु-तिप्रत्यभिज्ञापकं तमाहुरग्र्यं पुरुषं महान्तमिति महापुरुष एव स्पष्ट-मुक्तः, धातृ-शब्दमपि महापुरुष एव स्पष्टमुक्तः धातृशब्दे नैकार्थतया अणो-रणीयानिति चतुर्थे च "द्वा सुपर्णे"त्यादिमन्त्रद्वयं मुण्डकोपनिषदैकार्थ्यात्प-रमपुरुषपरत्वज्ञापकम् । अतो "मायिनं तु महेश्वर"मिति, महेश्वर-शब्दो मायाप्रेरकत्वपरः, "सर्वलोकमहेश्वरं क्षीरोदस्योत्तरं तीरं जग्मुर्लो-कहितार्थिन" इतस्सद्वारमारभ्य वाक्यं "स्व[1]स्योमहेश्वर"इत्यादिषु यौ-गिको महेश्वर-शब्दो भगवति प्रयुक्तः, यस्मिन्निदं सञ्च विचैति सर्वमिति प्रकृतस्य सर्वस्य नियन्तृत्वमीशान-शब्देनोच्यते, पूर्वम् अङ्गुष्ठमात्रः पुरुषो-

१ स्वस्थोमहेश्वर इति पा० ।

न्तरात्मेत्युक्तत्वात्तत्रेशानो भूतभव्यस्येति ईशनस्य प्रतिसंबन्ध्यभिधानेन रूढिविरहावमात् भूतभव्यशब्दनिर्दिष्टस्य इह सर्व-शब्देन प्रतिपन्नत्वाच्च "य ईशोऽस्य द्विपदः चतुष्पदः कस्मै देवाय हविषा विधेमे"त्यनेन हिरण्य गर्भं इत्याम्रष्टचेतुल्यविषयत्वं प्रतीयते । तच्च भगवत्परमित्युपपादितम्, एवं भगवत्परानेकोपनिषदैकार्थ्यप्रतीतेः ज्ञात्वा शिवं, शिव एव केवल, इति शिव शब्दद्वयं तत्परमेव मुहुरभ्यस्यमानस्याऽपि शिव-शब्दस्य रूढार्थत्याग आकाश-शब्दस्येवोपपन्नः आकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तंयन्ति आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमिति ह्याकाश-शब्दोऽभ्यस्तः । किञ्च सर्वव्यापी च भगवांस्तस्मात्सर्वगतः शिव इत्ययं शिव-शब्दः प्राकरणिकशिव-शब्दानां माङ्गल्याभिप्रायकत्वमेव दर्शयति सर्वगतत्वेऽपि भगवच्छब्दवाच्यत्वान्निर्दोष इति हि तस्यार्थः, अन्यथा सर्वव्यापिसर्वगतशब्दयोः पुनरुक्तिप्रसङ्गात्तदुत्तरं तत्सवितुर्वरेण्यं ध्रुवमित्यनेन अक्षरं परमं प्रभुम् एतत्सवितुर्वरेण्यं ध्रुवमचलम् अमृतं विष्णुसंज्ञं सर्वाधारं धामेति श्रुतिद्वयैकार्थ्यमवगम्यते, हृदामनीषेति वाक्यं नैनमूर्द्ध्वमित्यादिमन्त्रद्वयं च मध्यगतवाक्यस्थशिव-शब्दस्य परमपुरुषविषयतां ज्ञापयति, तद्धि वाक्यत्रयं सहस्रान्तर्वर्तिविद्युद्वर्णपुरुषविषयम् अतो मानस्तोकमन्त्रस्थरुद्र-शब्दोऽप्यवयवशक्त्या अपर्यवसानाद्वा भगवद्विषयः, अतः पञ्चमेऽपि भावाभावकरं शिवमिति शिव-शब्दो व्याख्यातः षष्ठे च कालस्याऽपि परिच्छेदकः काल उक्तः, भगेशम् ऐश्वर्य्यादीनां षण्णामीशम् ऐश्वर्य्यनिर्वाहकत्वस्य निरङ्कुशत्वमेवोक्तं तमीश्वराणां परमं महेश्वरमितीति महेश्वरमिति यौगिकनिर्देशो न तु रूढार्थपरः, वाक्यस्यैश्वर्य्यपारम्यप्रतिपादकत्वादीश्वराणामिति प्रतिसम्बन्धिनिर्देशाच्च, देवतानां परमं दैवतं पतीनां परमं पतिमित्यनन्तरनिर्देशवत् तद्धि वाक्यं दैवतत्वपतित्वपारम्यपरं तत्र दैवतपतिशब्दो न क्वचिद्देवताविशेषे रूढो महेश्वर-शब्दश्च तत्स्थानीय इति स्फुटं, न तत्समश्च पराऽस्य शक्तिरित्यादिभिश्च तत्पारम्योपपादनम्, एको देव इत्यादिवाक्यस्थविशेषणानि च नारायणप्रत्यभिज्ञापकानि, गूढोऽत्मा न प्रकाशते, व्याप्य नारायणः स्थितः,

सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण इत्याद्यैकार्थ्यात्, न तत्र सूर्य्यो भवति इति मन्त्रश्च मुण्डोपनिषत्कठवल्ल्यधीतत्वाद् विष्णोः प्रत्यभिज्ञापकः नान्यः पन्था इति पुंसूक्तं स्मारयति ईशादिशब्दानां यौगिकत्वम् ईशानस्य निरुपाधिकत्वं दर्शयति स ईशोऽस्येति, यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह शरणमहं प्रपद्ये अमृतस्य परं सेतुमिति निर्द्देशाश्च नारायणपरत्वसाधकाः य इत्यनुवादरूपत्वात् ब्रह्मणो भगवन्नाभिसम्भवश्रुतेर्दर्शितत्वात् निवासः सुहृद्गतिः नारायण इति श्रुतत्वादमृतस्यैष सेतुरिति मुण्डोपनिषदि श्रुतत्वाच्च । यद्वा धर्मवदिति वाक्यमुपायान्तराभावपरं नान्यः पन्था इत्युक्तार्थविवरणरूपम्, एवमुपक्रमोपसंहारादिभिः भगवत्परत्वावगमादस्या उपनिषदो भगवत्परत्वं सिद्धम् । ननु महापुरुषादिशब्दानां शिवादिशब्दसमभिव्याहृतानां शिवपरत्वं स्यात्, सत्यं, यद्येकविषयत्वमिष्टं शब्दानामिष्टं तत्, ते हि शब्दा एकविषयाः यदि परमपुरुषेतरविषयत्वं न, साधारणस्यायोग्यार्थस्य च शब्दस्य योग्यार्थासाधारणबहूपनिषत्स्थशब्दोपस्थापितविशेषपर्यवसानं हि युक्तमिति भिदा, न हि छाग-शब्दः पशुमात्रे पर्यवस्यतीति न च परमात्मादिशब्दः प्रसिद्धाकाशे पर्य्यवस्यति, योग्यत्वायोग्यत्ववैषम्यन्तु विशदयिष्यते ऽनन्तरमेव, अतः परमपुरुषविषयत्वमुपनिषदः स्थितम् । एवमीश्वर-महेश्वर-पुरुष-महापुरुषादिशब्दानां भगवद्विषयत्वात्, प्रपदनोपदेशशिरस्कत्वाच्चास्या उपनिषदो भवन्नीतिकार्थ्यं स्फुटतरम् । यत्तु केश्चिज्जल्पितं सोपपदनिरुपपदपुरुष-शब्दवाच्या तथाविधेश्वरवाच्यस्य प्रकर्ष इति तदतितुच्छं, तथा सोपपदनिरुपपदेन्द्रशब्दवाच्यस्यात्यन्तप्रकर्षप्रसङ्गात्, इदि परमैश्वर्य्ये इति धातोर्हीन्द्र-शब्दनिष्पत्तिः "इन्द्रो महेन्द्रः सुरनायको वे"ति हि प्रसिद्धिः श्रुत्यादिविरोधे समाख्यादौर्बल्यात्, हन्यतया संहार्य्यतया चावगतस्येन्द्रस्य सर्वस्मात्परत्वमनुपपन्नमिति चेत्तुल्यम् । किञ्च जीवविषयपुरुष-शब्दो निकृष्टार्थविषय इति परमात्मनः पुरुषशब्दवाच्यत्वं न निकर्षाय भवति न ह्यात्म-शब्दो जीवेऽपि प्रयुक्त इति परमात्मन आत्म-शब्दवाच्यतया निकर्षः स्यात्, न हि हरि-शब्दो मण्डूकवाचीति हरिशब्दवाच्यतया सिंहस्य

मण्डूकसाम्यमिन्द्रस्यादित्यस्य वा तदुभयसाम्यं भगवतो वा तैः साम्यं भवतीति, अथर्वशिखायाञ्च "कारणं तु ध्येयः सर्वैश्वर्यसम्पन्नः सर्वेश्वरः शम्भुराकाशमध्ये" इति प्रतिपाद्यमानं ध्येयत्वं परमपुरुषासाधारणधर्मान्तराश्रवणात्सिद्धशम्भुविषयमिति न शङ्कनीयं कारणत्वस्य तदसाधारण्यादेव तद्व्याप्तस्य मुमुक्षुध्येयत्वस्याऽपि तदसाधारणत्वात्। किञ्चास्य प्रकरणस्य कश्च ध्येय इत्युपक्रम्य कारणन्तु ध्येय इत्यनेन कारणत्वमनूद्य ध्येयत्वविधिपरत्वावगमात् पुरुषसूक्तादिप्रतिपन्नस्यैव परमात्मनो ध्येयत्वविधानपरमिदं वाक्यं न च शम्भुः कारणमिति वाक्यवृत्तिः किन्तु कारणं शम्भुर्ध्येय इति अन्यथा कश्च ध्येय इत्यस्योत्तरत्वायोगाऽच्छम्भु-शब्दस्यासाधारण्येऽप्याकाशप्राणादिशब्दवत्परमात्मपरत्वं न्याय्यं, न चायमसाधारणः शम्भुः स्वयम्भूर्द्रुहिण इति नामपाठात् तथा नारदीयपुराणे रुक्माङ्गदचरिते ब्रह्माणं प्रति यमवचने "शृणु मे वचनं शम्भो पितामहपितामह? मरणादधिकं देव यत् प्रतापस्य खण्डनमि"ति तत्रैव "तमेव देवताश्रेष्ठं सम्प्राप्ते हरिवासरे यदि चालयसे धैर्यात्ततोऽहं तव किङ्करः। स मे शम्भुर्महान् शम्भो तेन लुप्तः पदो ममे"ति द्रुहिणविषयतया प्रयुक्तत्वात्, "विश्वाय विश्वशम्भव"मिति भगवत्यपि श्रौतप्रयोगाच्च, ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे सम्प्रसूयन्त इति उत्पत्तिवादस्यानुवादरूपत्वात् प्रापकवाक्यानुरोधीति भगवदुत्पत्तिरवताररूपानूद्यते, भगवता सूत्रकारेणैव अथर्वशिखावाक्यस्यस्य शम्भुशब्दस्य भगवद्विषयत्वमुत्पत्तेरवताररूपत्वञ्चोपबृंहितम् "इति नारायणः शम्भुर्भगवान् जगतः प्रभुः। आदिश्य विबुधान् सर्वानजायत यदोः कुल" इति अवतारवचने शम्भु-शब्दस्य नारायणविषय-दर्शनात्पूर्ववाक्यप्रतिपन्नस्य भगवज्जन्मनोऽवताररूपत्वं शम्भु-शब्दस्य भगवद्विषयत्वं च हि दर्शितम्। ईशान-शब्दश्च यौगिकः कारणविशेषणं सर्वस्येशान इति श्रुत्यन्तरे सप्रतियोगिकनिर्देशाद्विहाऽपि तत्प्रत्यभिज्ञानात्, प्रयोगसाधारण्याच्च। मोक्षधर्मे हि "तस्मात्प्रसूतो यः कर्ता कार्यं कारणमेव च। सोऽनिरुद्धः स ईशानो व्यक्तिः सा सर्वकर्मस्वि"ति भगवति प्रयुज्यते, तत्र भगवद्वचनेन "नित्यं हि नाऽस्ति जगति भूतं स्थावरजङ्गमम्। ऋते नामेकमीशानं पुरुषं लोकजीवनमिति च

प्रयुक्तः । ननु न कारणं विशेष्यते किन्तु शम्भोरेव कारण-शब्दस्तु तद्विशेषणम् अन्यथा कारणं तु ध्येय इति पुंल्लिङ्गाऽनुपपत्तेः, सत्यं, शम्भु-शब्दो विशेष्यसमर्पकः ततः किं प्रसिद्धशम्भोर्ध्येयत्वसिद्धिरिति चेन्न कारण-शब्दस्य कार्य्यं शम्भुव्यावर्त्तकत्वात्, न च कारणत्वादिति हेतुगर्भता कल्प्या कार्य्यत्वस्य श्रुतिसिद्धत्वाद्भगवतः प्रसूयन्त इति उत्पन्नत्वेऽप्यस्य वाक्यस्यानुवादरूपत्वात्, अनुवादस्य प्रापकानुरोधित्वादुत्पत्तिप्रापकवाक्येषु चाकर्महेतुकत्वेनातत्फलार्थत्वेन च विलक्षणतया भगवज्जन्मनस्स्वेच्छाकृतस्य निरङ्कुशैश्वर्य्याविरोधित्वादजहत्स्वभावतया विचित्रैश्वर्य्योद्दीपकत्वाच्च परमकारणत्वाप्रच्युतेः, स्वपारतन्त्र्यावहकर्त्रन्तराभावो हि परमकारणत्वं "न चास्य कश्चिज्जनिता न चाधिप" इति हि श्रुतिः, अवतारवैलक्षण्यं च "अजायमानो बहुधा विजायते" इति प्रतिपाद्यते, अजायमान इति सांसारिकवज्जन्मनिषेधः, न स्वरूपनित्यत्वपरः, नापि जन्ममिथ्यात्वपरः अस्मद्देहादेरपि स्वरूपनित्यत्वादेरविशिष्टः "तस्य धीराः परिजानन्ति योनिमि"ति वाक्यस्य निरर्थकत्वप्रसङ्गादिदञ्च स्पष्टमुच्यते 'येन सूर्य्यस्तपति तेजसेद्धः पिता पुत्रेण पितृमान्योनियोनौ नावेदविन्मनुते तं बृहन्तं सर्वानुभुवमात्मानं सम्पराये एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् तस्यैवात्मा पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेने"ति योनियोनावित्यनेन परिजानन्ति योनिमिति श्रुतिः प्रत्यभिज्ञायते, येन सूर्यस्तपतीत्यनेन "तस्य भासा सर्वमिदं विभातीति" मुण्डोपनिषत्सा हि परमपुरुषपरा नावेदविन्मनुते तं बृहन्तमित्यनेन "वेदाहमेतमिति" "धीराः परिजानन्ती"ति श्रुतिः पदविदिति पद-शब्देन "तत्ते पदं सङ्ग्रहेण ब्रवीम्योमि"ति "तद्विष्णोः परमं पदमि"ति कठश्रुतिः "न कर्मणेत्यनेन "अपहतपाप्मा दिव्यो देव एको नारायण" इति वाक्यञ्च अत इदं वाक्यं भगवद्विषयं पुत्रेण स्वकार्य्यभूतेन दशरथादिना ऽपि पितृमत्त्वं तस्यावेदविदवेद्यत्वं तदवतारस्य अकर्मभूतत्वं तज्ज्ञानवताम्भवभयध्वंसश्च अत्र प्रतिपाद्यते, ईदृशजन्मानुवादश्च ध्यानविध्युपयोगी इतरसृज्यसजातीयतया अवतीर्णस्योपासकसौलभ्यज्ञापनार्थत्वादेवमत्र प्रतिपन्नस्य भगवज्जन्मनः स्वेच्छाव-

तारूपत्वादेव हि यदोः कुले जायमानो नारायणः शम्भु-शब्देन महाभारते विशेष्यते । नन्वेवं सति ब्रह्मादीनामपि जन्म स्वेच्छावताररूपं किं न स्यात्, न, प्रापकवाक्यानुरोधित्वादनुवादस्य, कुतस्तेषां जन्मनः कर्ममूलत्वावगमः? उत्पत्तिश्रुतेरेव उत्पत्तिश्चेत्कर्ममूलेत्यौत्सर्गिकं, भगवतस्तु अवतारश्रुत्या तदपोदितम्, अपवादाभावेऽप्यकर्ममूलत्वाश्रयणे सतीन्द्रादिजन्मनोऽप्यवतारत्वप्रसङ्गः, ब्रह्मादीनामिन्द्रादीनाञ्च जन्मनि विशेषाश्रवणादुत्पत्तिवदन्यत्रापि क्वचिद्भगवत इवाकर्मवश्यत्वाश्रवणात् "हिरण्मयःपुरुषः" "एष हि सर्वेभ्य पाप्मभ्य उदितः अपहतपाप्मा दिव्यो देव एको नारायणः अपहतपाप्मा स उत्तमः पुरुष इति हि भगवतोऽकर्मवश्यत्वं श्रूयते तदैक्याद्ब्रह्मादीनामकर्म्मवश्यत्वमिति चेन्न इन्द्रादीनामपि तथात्वप्रसङ्गादैक्ये सति अकर्मवश्यत्वं, कर्मवश्यत्वरूपभेदकधर्माभावे सत्यैक्यमिति अन्योन्याश्रयश्च, भगवतोऽकर्मवश्यत्वन्तु स्वप्रकरणसिद्धमिति नान्योन्याश्रयः, एवमुत्पत्तिप्रापकवाक्यसिद्धं भगवतोऽजायमानस्य जायमानत्वरूपं ब्रह्मादिभ्यो वैलक्षण्यमत्रैवोच्यते न कारणं कारणानामिति न प्रसूयत इति विभक्तिपरिणामेनानुषङ्गः कारणानां करणस्य भगवतो न ब्रह्मादिवदुत्पत्तिरित्यर्थः, शिव एको ध्येय इत्यत्राप्येक-शब्दः प्राधान्यपरः किमेकं दैवतमितिवत्, न ह्येकत्वसंख्या श्रूयते प्रश्नः प्रश्नवैयर्थ्यात्तस्माच्छाश्वतं शिवमितिवत् समाभ्यधिकरहित इति शिवो विशेष्यते, तेन प्रसिद्धशिवव्यावृत्तिः, अतोऽथर्वशिखायामपि भगवत एवध्येयत्वं प्रतिपादितं यतो हिरण्यगर्भ-प्रजापति-धातृ-स्वयंभ्वादय ईशान-शम्भु-रुद्र-महादेव-महेश्वर-परमेश्वरादयश्च कार्यविषयाः शब्दा अवयवशक्त्या वा अपर्यवसानाद्वा नारायणपरा इति युक्तम् । अत एव हि भगवत्सूत्रकार एव भगवति तान् शब्दान् महाभारते प्रायुङ्क्त, यथा हिरण्यगर्भश्शचुघ्नो व्याप्तो वायुरधोक्षज इति, कृष्णं प्रति द्रौपदी "पूर्वे प्रजानिसर्गे त्वामाहुरेकं प्रजापतिमि" ति मोक्षधर्मे "एकस्तद्वेद भगवान् धाता नारायणः स्वयमिति आश्वमेधिके "विष्णुरेवादिसर्गेषु स्वयंभूर्भवति प्रभु" रिति च स्वयंभूर्विष्णुरेव चतुर्मुखोत्पत्तेः प्राचीनतत्त्वसृष्टौ प्रभुर्भवति न तु चतुर्मुखादिरित्यर्थः "सोऽनिरुद्धः स ईशानो व्यक्तिः सा सर्वकर्मास्विति इति नारायणः शंभु-

भगवान् जगतः प्रभुः । आदिश्य विबुधान् सर्वान् अजायत यदोः कुलइति, रुद्रो बहुशिरा बभ्रुः, तथा "नमश्चकार हृष्टात्मा परमं परमेश्वरम् । जगाद जगतां स्रष्टा परमं परधर्मविदि"त्यारभ्य वासुदेव तद्देतत्ते मया गीतं यथा-तथमिति, जय विश्व महादेव । जय लोकहिते रतेत्या"रभ्य "नारायण सुदुष्पाप ! जय शार्ङ्गधनुर्धरे"ति "भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं यो मामजमनादिं च वेत्ति लोकमहेश्वरमिति" च ततस्ते विबुधाः सर्वे ब्रह्मा ते च महर्षयः । वेददृष्टेन विधिना वैष्णवं क्रतुमाहरन्नित्यारभ्य "ते कार्त्तयुगधर्माणो भागाः परमसत्कृताः । प्रापुरादित्यवर्णं तं पुरुषं तमसः परम् । बृहन्तं सर्वगं देवमीशानं वरदं प्रभुं ततोऽथ वरदो देवस्तान् सर्वान-मरान् स्थितान् । अशरीरो बभाषेदं वाक्यं स्वस्थो महेश्वर"इति च । अथ-र्वशिरसि च "रुद्रस्यैव सर्वात्मभावादय उच्यन्ते, परमपुरुषसाधारणलिङ्गा-भावात्सर्वात्मभावादयस्तु समस्तचिदचिद्भावर्त्तका अपि न तदसाधारणाः अतो रुद्रस्यैते सम्भवन्ति, अत एवात्र प्रतर्दनविद्यान्यायोऽपि नावतरति, प्रसिद्धेन्द्रस्य जीवत्वस्य चिदचिद्भावर्त्तकधर्मान्वयायोगात्तच्छरीरकपरमा-त्मनोपासनपरत्वमुक्तं न तु परमपुरुषासाधारणधर्मासम्भवादिन्द्रादीनामपि संहारादिकारणस्य रुद्रस्य चिदचिद्भावर्त्तकधर्मान्वयः सम्भवतीति स एव प्रतिपाद्यत इति न तच्छरीरकार्थान्तरपरत्वमिति शङ्कायामुच्यते कारणत्व-व्याप्तो यः कश्चिदपि चिदचिद्भावर्त्तकः परमपुरुषासाधारण इति स्थितत्वा-द्रुद्रस्य तदसम्भवेन तच्छरीरकपरमात्मपरत्वमास्थेयम् । किञ्च रुद्रस्य सृज्य-त्वादिश्रवणात्परमकारणत्वाभावस्य दर्शितः, संहार्यत्वं च "न ब्रह्मा-नेशान इत्युपबृंहिता चेयं श्रुतिः श्रीविष्णुधर्मोत्तरे "ब्रह्मा शंभुस्तथैवार्कश्च-न्द्रमाश्च शतक्रतुः । एवमाद्यास्तथैवान्ये युक्ता वैष्णवतेजसा जगत्कार्यावसा-ने तु वियुज्यन्ते च तेजसा । वितेजसश्च ते सर्वे पञ्चत्वमुपयान्ति वै" इति, अतः कार्यकोटिनिविष्टस्य सर्वात्मभावाद्यसम्भवात्प्रतर्दनोपासनन्यायेन तच्छरीरकपरमात्मपरतयैव निर्वाहो युक्तः । न चात्र न्यायापेक्षा परमात्मानु-प्रवेशस्य कण्ठोक्तत्वात्, तथा हि देवा ह वै स्वर्गं लोकमगमंस्ते देवा रुद्रमपृ-च्छन् को भवानिति सोऽब्रवीदहमेकः प्रथममासं वर्त्तामि च भविष्यामि च

नान्यः कश्चिन्मत्तो व्यतिरिक्त” इति सोऽन्तरादन्तरं प्राविशद्दिशश्चान्तरं
स प्राविशत्सोऽहं नित्यो नित्यो ब्रह्माहं प्राञ्चः प्रत्यञ्चोऽहं दक्षिणाञ्चो उद-
ञ्चोऽहमधश्चोर्ध्वं चाहं दिशश्च विदिशश्चाहं पुमानहमपुमान् स्त्रियश्चाहं
सावित्र्यहं गायत्र्यहं त्रिष्टुब्जगत्यनुष्टुप् चाहमित्या”दि, तत्र सर्वात्मभावमनु-
संदधतोऽहंरूपस्य बुद्धिस्थः परमात्मा स इति परामृश्यते, सः प्रथमपादेरन्तरा-
त्मनो बुद्ध्यहङ्काररूपान्तःकरणवर्गादन्तरं जीवात्मानं स परमात्मा प्राविशद्दि-
क्शब्दोपलक्षितबाह्याचेतनानामन्तरं च जीवं स परमात्मा प्राविशदिति तद-
नुप्रवेशः कण्ठोक्तः ननु सोऽन्तरादित्यादिकं श्रुतिवाक्यं न तु इन्द्रवाक्यन्त-
स्येति–करणेन समाप्तत्वादिति न सोऽहं नित्योऽनित्य इत्यादीनां इन्द्रवाक्या-
नामनुगतिदर्शनेन इन्द्रवाक्यापरिसमाप्तेः, तथा सति सोऽब्रवीदिति वाक्या-
न्तराध्याहारप्रसङ्गः स चानध्याहारे सम्भवति नोपपद्यते, तदयमर्थः देवता-
त्वेन साजात्येऽपि प्रभावातिशयदर्शनेन संदेहाद्देवा अपृच्छन् को भवानिति
किमस्मदादिवद्देवतामात्रम्? उत परमकारणभूत? इति प्रश्नाभिप्रायः, अह-
मेकमासमिति कारणत्वमुक्तं, प्रथमम्मासं वर्तामि च भविष्यामीति सर्वात्म-
भाव उक्तः, अन्वयमुखेनोक्तं सर्वात्मभावं व्यतिरेकेणोपपादयति नान्य इति,
इतिर्हेतौ मद्व्यतिरिक्ताभावादित्यर्थः, अयं सर्वात्मभावव्यपदेशः किं परमा-
त्मत्वात्? उत परमात्मात्मकत्वा? दिति शङ्कायां परमात्मानुप्रवेशनिबन्धन
इत्याह “सोऽन्तरादि”ति, स्वस्मिन् परमात्मानुप्रवेशस्य दृष्टान्ताभिप्राये-
णेदमुक्तं दिशश्चान्तरमिति । यद्वा नान्यः कश्चिन्मत्तो व्यतिरिक्त इत्युक्ते
सर्वात्मव्यपदेशः कीदृश इत्यपेक्षायामाह “इती”ति, इतिः प्रकारे इत्थमि-
त्यर्थः, विवक्षितत्वं सर्वात्मकत्वप्रकारमाह “सोऽन्तरादि”ति, यद्वा इति-
शब्दस्योत्तरत्रान्वयः दिशश्चान्तरं स प्राविशदितीति यस्मात्परमात्मा प्रावि-
शत्तस्मादस्मच्छरीरकपरमात्मनोऽन्यन्नास्तीत्यर्थः, अध्याहारादपि श्रुतपद-
स्यान्वयविशेषकल्पनं नाय्यम् । अस्तु वाऽयमिति–शब्दः समाप्त्यर्थः, उत्तरत्र
च सोऽब्रवीदित्यध्याहारस्सह्यतां तदानीमप्ययमर्थः स इन्द्रः देहेन्द्रियादे-
रन्तराज्जीवादन्तरं परमात्मानं बुद्ध्वा प्राविशदिति यथा “यस्य यस्य हि यो
भावः तेन तेन हि तं नरम् । अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेदि”ति,

एवं मामुपास्स्व तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च सर्वगत्वादनन्तस्य स एवाहमवस्थितः । मत्तः सर्वमहं सर्वं मयि सर्वं सनातने । अहमेवाऽव्ययो नित्यः परमात्मेत्यचिन्तयदितीन्द्रवामदेवप्रह्लादादीनामिव स्वान्तर्यामिपरमात्मबुद्ध्या रुद्रस्य सर्वात्मभावोपदेश इत्युक्तं भवति, तथा ह्युपबृंहितवान् सूत्रकारस्त्रिपुरविजये "विष्णुरात्मा भगवतो भवस्यामिततेजसः" । ब्रह्मरुद्रसंवादे "तवान्तरात्मा मम च ये चान्ये देहिसञ्ज्ञिताः । सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचिदि"ति च सोऽहमित्यादिना सर्वात्मभावप्रपञ्चनं, द्वितीयखण्डो रुद्रवाक्यानुवादेन स्तुतिपरत्वात्तदन्तर्यामिपरमात्मविषयः, यो वै रुद्रः स भगवानिति यो रुद्रान्तर्यामी स वासुदेव इत्यर्थः, भगवच्छब्दस्य वासुदेवासाधारणत्वात्तच्च दर्शितं यो वै रुद्रः स भगवान् यश्च विष्णुरित्यन्तर्यामिण एव अवताररूपविशिष्टत्वमुक्तं, तृतीये तु परमात्मनो वैभवन्तद्वाचकस्योंकारस्य नामधेयानि चतुर्थे तन्निर्वचनं पञ्चमे, षष्ठे तु तदेतदुपासितव्यं "निचाय्य तं शान्तिमेती"ति रुद्रशरीरकपरमात्मोपासनं साङ्गमुक्तं, व्रतमेतत्पाशुपतमिति पशुपतिरूपपरमात्मोपासनाङ्गतया पशुपतिसंबद्धं पाशुपतं न तु पाशुपतागमप्रतिपाद्यं, तद्धि तद्वदुपकल्पकाभावात्, समन्त्रकभसितस्पर्शनं तु प्रकरणगृहीतत्वाच्च इत्येव प्राप्नोति दर्शपूर्णमासप्रकरणगृहीतप्रयाजवत्सोमाग्निप्रकरणगृहीतसुराग्रहवच्च, तस्मादथर्वशिरसि रुद्रान्तरात्मा नारायण एव प्रतिपाद्यः, यथा प्रतर्दनविद्यायामिन्द्रान्तर्यामी इन्द्रो मायाभिः पुरुरूप ईयते, मामुपास्स्व "इन्द्रं निचिक्युः परमे व्योमन्नि"ति कारणत्वोपास्यत्वप्राप्यत्वानीन्द्रविषयाणि, यथा प्रसिद्धेन्द्रव्यतिरिक्तविषयाणि व्याख्यातानि तथैवान्यत्रापि रुद्रविषयाणि कारणत्वादिपराणि वाक्यानि नेतव्यानि, "स ब्रह्मा स शिवः सेन्द्र" इति तस्येन्द्रतुल्यतया भगवद्विभूतित्वात् । ननु हिरण्यगर्भः समवर्तताग्रे एको ह वै नारायण आसीत् न सन्न चासच्छिव एव केवल" इति, विराजोऽधिपुरुषः इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशानः ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्ते" इति त्रयाणामपि कारणत्वे कार्यत्वे चाविशेषश्रुतेः नारायणादिशब्दानां रूढिमाश्रित्य हिर-

ण्यगर्भादिशब्दानां प्रसिद्धार्थत्यागे को हेतुः आकाशादेव समुत्पद्यन्ते प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते इन्द्रो मायाभिः पुरुरूप ईयते आत्मन आकाशः संभूत एतस्माज्जायते प्राण इन्द्रो वरुण इत्याकाशप्राणेन्द्रादीनां च कार्यत्वकारणत्वश्रवणाविशेषेऽप्याकाशादिशब्दानां रूढित्यागे को हेतुः कार्य्यतयाऽवगतानां परमकारणत्वायोग्यत्वमिति चेत्तुल्यम् । ननु न कारणविषयोर्हिरण्यगर्भरुद्र-शब्दयोः प्रसिद्धार्थायोग्यता कार्य्यत्वे सति ह्ययोग्यत्वं कारणविषयरुद्रादिशब्दाः प्रसिद्धपरा एव, कार्य्यविषयास्तु प्रसिद्धेतरविषयाः, स्युः न, कारणविषयाणां रुद्रादिशब्दानां प्रसिद्धार्थपरत्वे सत्येककारणत्वानुपपत्तेः तदनुपपत्तिश्च रुद्रादिशब्दानामेकव्यक्तिविषयत्वेन व्युत्पत्त्यभावात्कारणैकत्वमवर्जनीयम् अन्यथा ऽद्वितीयत्वप्रतिज्ञादृष्टान्तसमाभ्यधिकनिषेधाद्यनुपपत्तेः, अतः कारणविषयाणां रूढित्यागे प्राप्ते सत्ययोग्यार्थानामेव रूढिरनादरणीया न तु योग्यस्वार्थानामपि, इत्थं हिरण्यगर्भादिशब्दानां प्रसिद्धार्थायोग्यत्वं नारायणादिशब्दानां योग्यार्थत्वं च दर्शितम् । अतोऽन्यत्रापि रुद्रहिरण्यगर्भादिविषयाणि वाक्यानि एवं नेयानि एवं दिङ्मात्रं दर्शितम् । अनन्ताः कारणपरवाक्यविशेषा एवं व्याख्येयाः यतोऽनुवादरूपतया साधारणतया योग्येतरार्थतया योग्यार्थप्रत्यभिज्ञापकधर्मपरतया च प्रापकासाधारणयोग्यार्थतद्धर्मप्रत्यभिज्ञाप्यवस्तुविशेषविषयवाक्यसाकाङ्क्षाः सर्वे वाक्यविशेषास्तत्तदधिकरणन्यायानुगृहीताः नारायणपराः अत एव ह्युक्तं भगवता व्यासेन सूत्रकारेण "तत्त्वं जिज्ञासमानानां हेतुभिस्सर्वतो मुखैः । तत्त्वमेको महायोगी हरिर्नारायणः परः" इति, हेतुभिः—समन्वयलक्षणोक्तन्यायैस्सर्वतोमुखैस्तत्तन्मुखभेदभिन्नैरित्यर्थः, तथा सर्वविद्योपास्यश्च स एवेत्युक्तम् 'आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदे"ति, आलोड्येत्यनेन प्रामाण्यपर्यालोचनमुक्तं, विचार्येत्यनेन शास्त्रतः परीक्षणमुक्तं, सुनिष्पन्नं बाह्यकुदृष्ट्या ऽविचाल्यं निश्चितमित्यर्थः, तस्मादयोगान्ययोगव्यवच्छेदेन नारायणस्य कारणत्वं पादचतुष्टयेन प्रतिपादितमिति सिद्धम् । व्याख्याताव्याख्याता इत्युक्ते व्याख्यात-शब्दस्य अव्याख्यातशब्दस्य च समासेनैकपद्ये सति सर्ववाक्यविशे-

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
काशिका पण्डितवरवामनादित्यविरचिता पूर्वार्धम् ५ रु॰ उत्तरार्धम् ५ रु॰ ..	१०)
बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	७)
प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१।)
लघुकौमुदी वरदराजकृता	१)
लघुकौमुदी श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता	८)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः -	≡)
वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम्	४)
मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका	१)
अमरकोशः सटीकः	४)
योगवार्तिकम्	३।)
वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
शीतपदार्थनिर्वचनम्	४)
वाक्यार्थचन्द्रिका परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरशास्त्रि-संशोधिता	४)
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	६।।।)
तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम्	८।)
तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम्	४।।)
शास्त्रदीपिका	८।)
खण्डनखण्डखाद्यं सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्प-णीसहितम्	७।।)
काव्यप्रदीपः काव्यप्रकाशस्य टीकाव्याख्या वाराणसेयसमाट्प्रतिष्ठा-पितसंस्कृतपाठशालीयदर्शनशास्त्राध्यापकरामशास्त्रिभागवताचा-र्येण परिशोधितः	३।।)
वेदान्तसिद्धान्तमुक्तावली श्रीयुत आर्थर्‌विनिस महाशयेनेङ्गलेण्डीय-भाषायामवतारिता	२।।)
चित्रमीमांसा अप्पयदीक्षितकृता, श्री तै॰ रामशास्त्रिणा संशोधिता	१।)
[त]त्त्वबिन्दुः वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।≡)।।

Digitized by Google

CONTENTS.

Page.

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed: Dāmodara Śāstrī, Professor, Sanskrit College, Benares. ... 553

SAṂKARSHAKĀṆḌA OF PŪRVAMĪMĀṂSĀ WITH BHĀṬṬADĪPIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. ... 569

ŚRĪBHĀSHYA WITH ŚRUTAPRAKĀŚIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. ... 585

Digitized by Google

HARVARD COLLEGE
MAR 20 1893
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 12.] DECEMBER, 1892 [Vol. XIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1892.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

ह्येय एवायं ग्रन्थस्तत्रैतस्मिन्धात्वधिकारइति, न ब्रूमो ह्येय इति सोपस्कारस्तु भवति एतस्मिन्धात्वधिकारे यत्सप्तम्या निर्दिष्टं तदुपपदसंज्ञं भवति तत्र च सति प्रत्यय इति ॥

"कृदतिङ्" ॥ 'तिङ्वर्जित इति' । तिङ्त्वेन त्यक्तस्तिङ्त्वेन रहितः, तिङोन्य इति यावत् । 'अतिङिति किमिति' । इह क्रियमाणोप्ययं प्रतिषेधः स्वाश्रयामेव तिङः कृत्सञ्ज्ञां बाधितुं प्रभवति न तु लकारस्य कृत्वात्स्थानिवद्भावेन प्राप्ताम् अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति वचनादिति मत्वा प्रश्नः, तिङ्भाविनो लकारस्यैव कृत्सञ्ज्ञा प्रतिषिद्ध्यते प्रतिषेधसामर्थ्याद्वा स्थानिवद्भावो न भविष्यतीत्युत्तरम् । 'चीयात्स्तूयादिति' । ननु च ज्ञापकादेतत्सिद्धं यदयमकृत्सार्वधातुकयोरिति पृथक् सार्वधातुके प्रतिषेधं शास्ति तज् ज्ञापयति अकृदिति प्रतिषेधो न तिङु भवतीति यदि स्यात् चिनुयात्सुनुयादित्यादौ सार्वधातुकेपि कृत्प्रतिषेधादेव दीर्घो न भविष्यति किं पृथक् सार्वधातुकपर्युदासेन, इह तर्हि पचति पठति 'ह्रस्वस्य पिति कृति तुगि'ति तुङ् माभूदिति, तुग्विधौ धात्वादेरित्यतो धातुग्रहणमनुवर्तिष्यते, एवमपि चिकीर्षति जिहीर्षतीत्यत्र प्राप्नोति, शपा व्यवधानाच्च भविष्यति, एकादेशे कृते नास्ति व्यवधानम्, एकादेशः पूर्वविधौ स्थानिवद्भवतीति व्यवधानमेव, नात्र स्थानिवद्भावः प्राप्नोति परत्वादन्तवद्भावेन बाध्यते तस्माच्चिकीर्षतीत्यादौ तुङ् माभूदित्यतिङिति प्रतिषेधः कर्त्तव्यः, किं च तिङन्तस्य कृदन्तं प्रातिपदिकमिति प्रातिपदिकसञ्ज्ञायां पचेरन् नलोपः प्राप्नोति, पपाच ब्रह्मणी टाप्प्राप्नोति, सर्वत्र च स्वाद्युत्पत्तिः प्रसज्येत तदेतदस्मादन्यार्थादतिङिति प्रतिषेधादेव सिद्धे चीयादित्यादौ ज्ञापकत्वाश्रयितव्यमिति वृत्तिकारो मन्यते स्म ॥

"वा ऽसरूपोऽस्त्रियाम्" ॥ असरूप इति पदच्छेदः, अन्यथा लाघवे विशेषाभावादसन्देहार्थं सरूपोऽस्त्रियां वेति ब्रूयात्, अपवादविषयेपि केषां चित्कृतां प्रवृत्तिर्यथा स्यादित्येवमर्थमिदं वचनं, यथोक्तम् असरूपस्य वावचनमुत्सर्गस्य बाधकविषये निवृत्त्यर्थमिति, परिभाषा चेयम्, अस्मिन्धात्वधिकारे स्त्र्यधिकारव्यतिरेकेण यान्यसरूपस्यापवादस्य विधायकानि

शास्त्राणि तच्छेषभूतानि, तत्रतत्र वचने क्रियमाणे गौरवं स्यादिति साधारणरूपेण परिभाष्यते, तत्र च असरूप इति अर्थे क्रममात्रस्य विकल्पने सर्वस्यैवासरूपत्वात्किञ्चित्प्रदपेक्षया, ऽसरूपपदं चैतत्सापेक्षं प्रतियोगिनि यतोऽत्र भिन्नरूपत्वमसरूपत्वमिष्यते, केन चिद्धि किञ्चित्सरूपमसरूपं वा भवति तत्र केनासरूप इत्यपेक्षायां स्वविधानवेलायां यः स्वस्मिन्विषये प्राप्तः स एव बुद्धिस्थः प्रतियोगी गम्यते, ऽपवादविधानसमये चोत्सर्गस्तमपि विषयमवगाहुमुपक्रमान उपारूढो बुद्धौ भवतीति तदपेक्षया भिन्नरूपोपवाद एवात्रासरूपो विवक्षित इत्याह । 'असरूपोपवादप्रत्यय इति'। एवं स्थिते यद्ययमुत्पत्तिविकल्पस्यादपवादप्रत्ययो वा भवतीति, ततः स्वविषये कामं विकल्पस्तस्य लभ्यते न तूत्सर्गः प्रवर्तेत तत्रातद्विषयो ह्यसौ, उत्सर्गापवादशास्त्रयोर्हि प्रमितिव्यापारे पर्यवसिते पश्चान्नियमत्रैव प्रदेशे स्थिता ऽपवादस्य पक्षे प्रवृत्तिं प्रतिबध्नाति, अपवादशास्त्रेण यः स्वीकृतो विषयस्तद्व्यतिरिक्तविषया सामान्यशास्त्रस्य प्रमितिरित्यपवादस्याप्रवृत्तावपि नैवोत्सर्गस्य तस्मिन्विषये प्रमितिः प्रवृत्तिर्वोपपद्यते तद्धितवत्, तद्यथा दक्षस्यापत्यमत इञ् विकल्पिते पक्षे ऽण् न भवति अपि तु वाक्यमेव भवति तत्कस्य हेतोः समर्थानां प्रथमाद्वेति तटस्थेन पक्षे प्रवृत्तिर्निरुध्यते न पुनरेकवाक्यतया प्राप्तिरेव विकल्परूपितेति तथेहापीति, अपवादाभावपक्षे प्रकृतिरेव कर्त्राद्यभिधानायानुज्ञाता स्याद्यथाग्निचिदित्यादौ क्विबादिलोपे तदाह । 'तत्रोत्पत्तिर्वा प्रसज्येत यथा तद्धितइति'। तमिममुत्पत्तिविकल्पपक्षे दोषं दृष्ट्वा बाधकत्वं विकल्प्यतइत्याह । 'वा बाधको भवतीति'। उक्तं च सिद्धन्त्वसरूपबाधकस्य वावचनादित्यसरूपो वा बाधको भवतीति वक्तव्यमित्यर्थः। ननु तत्रतत्रोच्यते यत्रान्यत्क्रियापदव श्रूयते तत्रास्तिर्भवतिपर इति ततश्चासरूपो वेत्युक्ते भवतीत्येवाध्याहारो युक्तो न पुनर्वा बाधक इति । उच्यते। उत्पत्तिविकल्पस्य प्रयोजनं केवलायाः प्रकृतेः प्रयोगः, केवला च प्रकृतिः स्वार्थमात्रमभिधातुमसमर्था किं पुनः कर्त्रादिकमभिधास्यति प्रकृतिप्रत्ययसमुदाये हि प्रयुज्यमानेन्वयव्यतिरेकाभ्यामयं प्रकृत्यर्थो ऽयं

Digitized by Google

प्रत्ययार्थे इति व्यवस्थाप्यते ऽनुत्पन्नप्रत्यया तु प्रकृतिर्न कञ्चिदप्यर्थं गमयति, प्रयोगोपि हि तस्या दुर्लभः परश्चेति नियमात्, तद्विते त्वनुत्पत्तिपक्षे ऽप्युत्सर्गप्रवृत्तिव्यतिरेकेण प्रत्ययान्तरमस्ति षष्ठी, इह तु न तथेति सामर्थ्याद्बहिरङ्गमपि बाधकत्वमविकल्प्यते । ननु च शास्त्रं शास्त्रेण बाध्यते न पुनः कार्यं कार्येण निदानोच्छेदेनैव हि निदानिन उच्छेदः शक्यते कर्तुं नहि प्रदीपे ऽनुच्छिन्ने तत्प्रकाश उच्छिद्यते तत्किमुच्यते ऽपवादप्रत्यय इति, एवं तु वक्तव्यम् अपवादशास्त्रमिति । उच्यते । सर्वस्यैवापवादशास्त्रस्य स्वगतमसारूप्यमव्यभिचारीति प्रत्ययद्वारकं तदाश्रयणीयमित्यपवादप्रत्यय इत्युक्तम् । एवम्भूतस्य प्रत्ययस्य विधायकं शास्त्रमित्यर्थः । यद्वा प्रत्ययस्य बाधकत्वविकल्पसामार्थ्याच्छास्त्रमपि पक्षे बाधकं भविष्यति । अथ वा वृत्तौ वस्तुमात्रं दर्शितं यथा त्वयमर्थ उपपद्यते तथा सूत्रं व्याख्येयं तत्रेदं व्याख्यानं परिभाषेयमित्युक्तं तत्रैकपरिभाषावदियमपि पदमुपस्थापयति अस्मिन्धात्वधिकारे यत्रासरूपोपवादप्रत्ययो विधीयते तत्र वेत्युपतिष्ठते स्त्र्यधिकारे तु नेति किं कृतं भवति ददातिदधात्योर्विभाषेत्यादिवत् प्रमितिरेव विकल्पदूषिता भवति ततस्तद्द्वेषोत्सर्गस्य प्रवृत्तिसिद्धिरिति, अथासरूप उत्सर्गप्रत्ययोपवादविषये वा भवतीति विज्ञायमाने को दोषः, न खलु कश्चिद्दोषः, अपवादविकल्पे प्राप्ते विभाषा उत्सर्गविकल्पे त्वप्राप्तविभाषेति किन्तु प्रतियोग्यपेक्षमसरूपपदमप्यपवादमेव गोचरयतीत्युक्तम् । अस्त्रियामित्यत्र पक्षत्रयं सम्भवति अभिधेयसप्तमी वा स्यात् स्त्रियामभिधेयायां वासरूपो न भवतीति, स्त्रियामित्येव वा विहितस्यासरूपस्य निषेधः स्यात् स्त्रियामित्युच्चार्य ये विधीयन्ते ते नेति, स्त्रीग्रहणं वा स्वर्यते स्वरितेनाधिकारावगतिर्भवतीति स्त्रियां क्तिन्नित्यस्मिन्नधिकारे नेति, तत्राद्ये पक्षे विक्षिपा विक्षेपिका विक्षेप्तेति कविषये ण्वुल्तृचौ न स्याताम्, द्वितीये तु 'कर्मव्यतिहारे णच् स्त्रियां' व्यावक्रोशी व्यावकृष्टिरिति णचो विषये क्तिन् न स्यात्, द्वयोरपि स्त्रियामित्युच्चार्य विधानादिति, ममाद्ययोः पक्षयोर्दोषं दृष्ट्वा तृतीयं पक्षमाश्रित्याह । 'स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वेति' । केचिदाहुः । अपवा-

दप्रत्ययं वर्जयित्वेति वक्तव्ये प्रत्ययं वर्जयित्वेति वचनं प्रत्ययमात्रपरिग्रहार्थं तेनोत्सर्गापवादयोर्द्वयोरपि स्त्र्यधिकारनिवेशिनोरयं प्रतिषेधः, किं सिद्धं भवति आसना आस्या स्त्र्यधिकारविहितेनापि युचापवादेन ण्वुल्लोपर्यंतः समावेशः सिद्धो भवति, घञस्तु क्तिनादिभिरनभिधानादसमावेश इति, अन्ये तु अपवादो वा बाधको भवतीति प्रकृतत्वात्स एवात्र प्रत्यय इति व्याचक्षते तेन घञः क्तिबादिभिरसमावेशः 'आस्येत्यत्र कृत्यल्युटो बहुलमिति ण्यदिति'। 'ण्वुलतृचावुत्सर्गाविति'। धातुमात्रे विधानात्। 'इगुपधज्ञाप्रीकिरः क इत्यपवाद इति'। धातुविशेषे विधानात्, किं पुनः प्रयोगगतमसारूप्यमाहोश्विदुपदेशगतं, किं चातः प्रयोगे लादेशेषु प्रतिषेधो ह्यो ऽपचदित्यत्र लुङपि प्राप्नोति प्रयोगे ह्यसरूपत्वात् लङ्यनद्यतनेऽकारः प्रत्ययः, लुङ्यपाक्षीदितीच्छब्दः, श्वः कर्तेत्यत्र लृडपि प्राप्नोति, ज्ञापकात्सिद्धं यदयं 'हशश्वतोर्लङ्चे' ति लिड्विषये लङं शास्ति तज् ज्ञापयति न लादेशेषु वासरूपविधिरिति, एवमपि ग्रामणीः ग्रामनाय इति क्विबादिविषये ऽणादयो न स्युः नहि क्विबादयः प्रयोगे रूपवन्तो लोपविधानात्तेषाम्, तस्मादुपदेशगतमसारूप्यं, यद्येवमनुबन्धभिन्नेषु विभाषा प्रसङ्गः काणोरपि ह्युपदेशे भिन्नं रूपं प्रयोगे तु समानं तत्राह। 'नानुबन्धकृतमिति'। अनुबन्धानामनेकान्तत्वात्तत्कृतमसारूप्यं नाश्रीयते तथा चोदीचां माङ इति श्रूयमाणेऽपि ङकारे तस्यानेकान्तत्वादव्याहतमेजन्तत्वमित्यात्वं प्रयुक्तं ददातिदधात्योर्विभाषेति विभाषाग्रहणं च लिङ्गमस्यार्थस्य, अन्यथा ऽनुबन्धकृतादसारूप्यादेव शविषये णो भविष्यतीति किन्तेन, इह क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिः प्राप्नोति, हसितं छात्रस्य शोभनं हसनं छात्रस्य अत्र क्तल्युड्विषये घञपि प्राप्नोति, तुमुन् इच्छति भोक्तुम्, अत्र इच्छार्थेषु लिङ्लोटाविति लोट् प्राप्नोति, तुमुना च बाध इष्यते लिङ् तु लिङ् चेति वचनाद्भवत्येव, यद्येवमस्मादेव नियमाल्लोडपि न भविष्यति, खलर्थे आतो युच् ईषत्पानः, अत्र खलपि प्राप्नोति। ननु स्त्र्यधिकारे तावदस्त्रियामिति प्रतिषेधादस्याप्रवृत्तिः परस्तादपि विच्छिन्नत्वादेव न भविष्यति, स्यादेतदेवं, यद्ययमधिकारस्स्यात् परिभाषा त्वियेत्युक्तम्

दृश्यते च स्व्यधिकारादूर्ध्वमपि वासरूपविधिः, आसित्वा भुङ्क्ते आस्यते भोक्तुमित्यपि यथा स्याद् अन्यथा भोजनार्थत्वादासनस्य पौर्वकाल्यमवगम्यते तुमर्थाधिकाराद्भावे क्त्वाप्रत्ययस्तत्रैव च लकार इति समानविषयत्वाद्बाध्यबाधकभावः स्यात्, तथा कालो भोक्तुं कालो भोजनस्य तुमुना ल्युटो बाधस्यात्, तस्मात् स्व्यधिकारस्य परस्तादपि वासरूपविधिरेषितव्यः, 'अर्हे कृत्यतृचश्चे' त्यत्र कृत्यतृज्ग्रहणं ज्ञापकं स्व्यधिकारस्य परस्तादनित्यैषा परिभाषेति, तस्मात् क्तल्युट्तुमुन्खलर्थेषु प्रतिषेधो ऽवक्तव्य एव ॥

"कृत्याः प्राङ् ण्वुलः"॥'ण्वुल्तृचाविति वक्ष्यतीति'। रोगाख्यायां ण्वुल् बहुलमित्ययं त्ववधिर्न भवति अर्हे कृत्यतृचश्चेति पृथक् तृचो ग्रहणात्, यद्येवं प्राङ् ण्वुल इति न वक्तव्यं कृत्या इत्येवास्तु तृज्ग्रहणादेव ज्ञापकात्परतोनुवृत्तिर्न भविष्यति योगापेक्षं च ज्ञापकं 'ण्वुल्तृचा' वित्यस्माद्योगात्प्राक् कृत्यसञ्ज्ञाधिकार इति, सत्यं कृत्या इत्येतावदेव पठितं सूत्रकारेण वृत्तिकारस्तु भाष्ये पूर्वपक्षरूपेण पठितं सूत्रे प्रचिक्षेप विचित्रा हि वृत्तेः कृतिर्वृत्तिकारेण, कृत्या इति बहुवचनमनुक्तसमुच्चयार्थं तेन केलिमर उपसङ्ख्यानमित्यादि नोपसंख्येयं भवति ॥

"तव्यत्तव्यानीयरः" ॥ 'वसेरिति' । वस निवास इत्यस्य ग्रहणं न तु वस आच्छादन इत्यस्य लुग्विकरणस्य तयोरेव कृत्यक्तखलर्था इति वचनात्कर्त्तरि न प्राप्नोतीति वचनं णिद्वद्भावार्थं च । 'वास्तव्य इति' । तद्धितान्तो वा पुनरेष भविष्यति वास्तुनि भवो वास्तव्यः, दिगादित्वाद्यत्, अवास्तव्य इत्यत्र स्वरभेदो नास्ति कृत्योकेष्णुजिति यदन्तोदात्तत्वं तदेव 'ययतोश्चातदर्थे' इत्यनेन भविष्यति, केलिमर इति ककारो गुणवृद्धिप्रतिषेधार्थः, रेफस्स्वरार्थः । 'कर्मकर्त्तरि चायमिष्यत इति' । भाष्ये तु पचेलिमा माषाः पक्तव्याः भिदेलिमास्सरला भेत्तव्या इति शुद्धे कर्मणि प्रदर्शितम् ॥

"अचो यत्" ॥ 'अज्ग्रहणं किमिति' । पूर्वसूत्र एव यद्ग्रहणं कर्त्तव्यमिति प्रश्नः । 'यावतेत्यादि' । द्वये हि धातवो ऽजन्ता हलन्ताश्च तत्र हलन्ताद् ण्यतं वक्ष्यति अतः पारिशेष्यादजन्तादेव यद्भविष्यतीत्य-

Digitized by Google

भिप्रायः । 'अजन्तभूतपूर्वादपीति'। पूर्वं भूतो भूतपूर्वः 'सुप् सुपे'ति समासः अजन्तश्चासौ भूतपूर्वश्च अजन्तभूतपूर्वः । 'दित्स्यं धित्स्यमिति' । दाञो धाञश्च सन् द्विर्वचनं सनिमीमाघ्वित्यादिना इस् 'सः स्यार्द्धधातुक' इति तत्वम् 'अत्र लोपोऽभ्यासस्य' दित्स धित्स इति स्थिते अनुत्पन्नएवार्द्धधातुके बुद्धिस्थे एवातो लोपे कृते सम्प्रत्ययं हलन्त इति ण्यत् स्याद् अज्ग्रहणात्तु भूतपूर्वमजन्तत्वमाश्रित्य यद्भवति तेन यतो नाव इत्याद्युदात्तत्वं ण्यति तु तित्स्वरितं स्यात्, चिकीर्ष्यमित्यादौ तु ण्यत्कृतो विशेषाभावः, 'यतो नाव' इत्यत्र हि द्व्यच इति वर्त्तते यदा त्वार्द्धधातुके परतो लोपः, तदैतदज्ग्रहणं न कर्त्तव्यमेव । 'तकिशसीत्यादि'। तकि हसने शसु हिंसायां चते चदे याचने यती प्रयत्ने जनी प्रादुर्भावे 'यतो नाव' इति स्वरार्थं जनेर्यद्विधानं जन्यमिति रूपं न तु ण्यतापि सिद्धं 'जनिवध्योश्चे'ति वृद्धिप्रतिषेधात्, शंसिमपि के चित्पठन्ति, तद्वा नराशंस्यं राद्ध्यं च । 'हनो वा वध चेति'। हन्तेर्वा यत्प्रत्ययो भवति तत्सन्नियोगेन च वधादेशः । 'वध्यमिति' । तद्धितान्तो वा पुनरेष भविष्यति वधमर्हतीति वध्यः, दण्डादिभ्य इति यत्, यदि तद्धितः समासो न प्राप्नोति असिवध्यो मुसलवध्य इति, कृति पुनः सति 'कर्तृकरणे कृता बहुल'मिति समासः सिद्धो भवति । 'घात्यमिति' । 'हनस्तोऽचिण्णलो'रिति तत्वं हो हन्तेर्ञ्णिन्नेष्विति कुत्वम् ॥

"ऋहलोर्ण्यत्" ...

"पोरदुपधात्" । 'पाक्यं वाक्यमिति'। 'चजोः कुघिण्ण्यतो'रिति कुत्वम् । 'कोप्यं गोप्यमिति' । कुप कोपने गुप व्याकुलत्वे । 'आप्यमिति'। आप्लृ व्याप्तौ एषु त्रिषु 'यतो नाव' इत्याद्युदात्तत्वञ्च भवति तित्स्वरित एव तु भवति ॥

"शकिसहोश्च" । 'शक्लृ शक्ताविति' । उपलक्षणमेतत् शक विभाषितो मर्षणइत्यस्यापि ग्रहणम् । 'षह मर्षणइति' । ननु षह शक्त्यर्थइत्यस्यैव परस्मैपदिनोऽननुबन्धकस्य ग्रहणं प्राप्तं, नैष दोषः, प्रत्ययविधिविषयत्वादननुबन्धकपरिभाषायास्तस्माद् द्वयोरपि ग्रहणम् । अन्ये तु 'कृत्यल्युटो बहुल'मिति वृत्तिकारोक्तयोरेव ग्रहणमिच्छन्ति ॥

"गदमदचरयमश्चानुपसर्गे" ॥ 'अनुपसर्गेभ्य इति'। सूत्रेऽनुपसर्ग इति व्यत्ययेन पञ्चम्यर्थे सप्तमीति भावः। अत एवोपसर्गादन्योऽनुपसर्गस्तस्मिन्ननुपसर्गे उपपदइत्यर्थो न भवति, एवं हि केवलेभ्यो न स्यात् 'वदः सुपि क्यप् चे' त्यत्र सुब्ग्रहणमनर्थकं स्यात्, अनुपसर्ग इति हि वर्त्तते तत्र नञिवयुक्तन्यायेनोपसर्गसदृशस्य सुबन्तस्य ग्रहणं भविष्यति। 'नियमार्थमिति'। अनुपसर्गादेव यथा स्यात्सोपसर्गान्मा भूदिति, कथं तर्हि तेन न तत्र भवेद्विनियम्यमिति, प्रमादपाठोयं विनियाम्यमिति पाठः, एतेन इति यवोपचर्यम् इति व्याख्यातम्। 'चरेराङि चागुराविति'। सोपसर्गार्थं वचनम्। 'आचर्यो देश इति'। गन्तव्य इत्यर्थः। उपनेता गुरुः॥

"अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु" ॥ 'अवद्यमिति'। 'निपात्यतइति'। वदेर्नञ्युपपदे 'वदः सुपि क्यप् चे' ति यत्क्यपोः प्राप्तयोर्यदेव यथा स्याद् गर्ह्यएव च यथा स्यादित्युभयार्थंन्निपातनम्। 'अवद्यं पापमिति'। अवदनार्हत्वात्। 'अनुद्यमन्यदिति'। गुरुनामादि तद्धि गर्ह्यं न भवत्यथ च वदनार्हमपि न भवति अत्र क्यबेव भवति यजादित्वात्सम्प्रसारणं 'नलोपो नञः' 'तस्माच्चुडचि' 'पण्यंअव[१]हर्त्तव्यमिति'। निपातनस्य रूढ्यर्थत्वात् पण्यशब्दस्य च तत्रैव रूढत्वात्, उक्तं च॥

धातुसाधनकालानां प्राप्त्यर्थंन्नियमस्य च।
अनुबन्धविकाराणां रूढ्यर्थं च निपातनम्॥

इति। 'पाण्यमन्यदिति'। स्तुत्यमित्यर्थः। 'वर्येति स्त्रियां निपात्यतइति'। सूत्रेऽवद्यादीनि अविभक्तिकानि पृथक् पदानि न तु द्वन्द्वस्य जसन्तनिर्देश इति भावः। 'शतेन वर्येति'। वृङ् सम्भक्तावित्यस्येदं निपातनं तत्रैवानिरोधसम्भवात्। 'वृत्यान्येति'। वृञ् वरणे एतिस्तुशास्वित्यादिना क्यप्। 'वार्या ऋत्विज इति'। एतिस्तुशास्वित्यत्र वृञो ग्रहणं वृङस्तु स्त्रीलिङ्गादन्यत्र ण्यदेव भवति, भट्टिकाव्ये तु पुँल्लिगेपि यदेव प्रयुक्तः सुग्रीवो नाम वर्योसौ भवता चारुविक्रम इति॥

१ पण्यमिति निपात्यते व्यवहर्त्तव्यं चेतद्व्रतीति मूलानुसारेण टीका, मुद्रितमूलपुस्तके तु पण्यमिति निपात्यते पणितव्यं चेदिति पाठः।

Digitized by Google

"वह्यं करणम्" ॥ 'वहेर्धातोः करणे यत्प्रत्ययो निपात्यत-इति'। अर्थव्याख्यानमेतत्, वह्यमिति निपात्यते करणं चेद्भवतीति वक्तुं युक्तम् ॥

"अर्यः स्वामिवैश्ययोः" ॥ 'स्वामिन्यन्तोदात्तत्वञ्चेति'। अथ यो वैश्यः स्वामी च तत्र कथम्, उच्यते, वैश्याख्यायामाद्युदात्तत्वं स्वा-म्याख्यायामन्तोदात्तत्वं,तथा चार्यस्य स्वाम्याख्यायामिति फिट्सूत्रे आख्या-ग्रहणं कृतम्। 'आर्यो ब्राह्मण इति'। प्राप्तव्य इत्यर्थः ॥

"उपसर्या काल्या प्रजने" ॥ 'उपपूर्वात्सर्तेरिति'। भौवादिकस्य जौहोत्यादिकस्य च सर्तेर्गतिशास्त्र्यर्त्तिभ्यश्चेति निर्द्देशात्सूत्राद्बहिरपि लुका निर्द्देशः। 'प्राप्तकाला काल्येति'। तदस्य प्राप्तमिति वर्त्तमाने 'कालाद्य-दि'ति यत् प्रजननं प्रजनः भावे घञ् 'जनिवध्योश्चे'ति वृद्धिप्रतिषेधः। 'उपसर्या गौरिति'। गर्भाधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः, वृषभोपगम-नस्य प्राप्तकालेति यावत्। 'उपसार्येति'। उपसरणीया प्राप्तव्येत्यर्थः ॥

"अजर्यं सङ्गतम्" ॥ 'सङ्गमने कर्त्तरीति'। सूत्रे सङ्गतमिति नपुं-सके भावे क्त इति दर्शयति, कर्त्तरीति तयोरेव कृत्यक्तखलर्था इति भावे मा भूदिति निपातनाश्रयणं तेन भावे सङ्गतकर्तृकेपि ण्यदेव भवति अजार्यं सङ्गतेनेति। 'अजरितेति'। तृच् ॥

"वदः सुपि क्यप् च" ॥ 'अनुपसर्ग इति वर्त्तत इति'। सत्सूद्वि-षेत्यादौ सूत्रे वक्ष्यति उपसर्गग्रहणं ज्ञापकमन्यत्र सुब्ग्रहणे उपसर्गग्रहणं न भवतीति तच्चावश्यं तथैवाश्रयणीयं सुप्यजातौ 'स्पृशोनुदके क्विन्'-त्या-दावुपसर्गग्रहणं मा भूदिति ततश्च नार्थ इहानुपसर्गग्रहणानुवृत्त्या। 'सुबन्ते उपपदे अनुपसर्ग इति'। यद्यपि पूर्वं बहुव्रीहेः पञ्चम्यर्थे सप्तमीति व्या-ख्यातम् इह तु विरोधाभावात्तत्पुरुषात्स्वार्थएव सप्तमीति भावः। 'ब्रह्मो-द्यमिति'। भावे क्यप् पूर्ववत्संप्रसारणं ब्रह्मवेदः तस्य वदनमित्यर्थः, कथं पुनः सकर्मकाद्भावे कृत्यप्रत्ययः यावता भावे चाकर्मकेभ्यः 'तयोरेव कृत्यक्तखलर्था' इति वक्ष्यति न च कर्माविवक्षयाऽकर्मकत्वं ब्रह्मेति कर्मणः श्रुतत्वात् तस्मादुत्तरसूत्रादिह भावग्रहणमपेक्षणीयमित्याहुः ॥

"भुवो भावे" ॥ 'यत्तु नानुवर्त्ततइति'। पूर्वसूत्रे चानुकृष्टत्वात्। ननु 'तयोरेव कृत्यक्तखलर्थाः' इति भावकर्मणोः कृत्या विधीयन्ते ऽनुपसर्गइति चानुवर्त्तते ऽनुपसर्गश्च भवतिरकर्मक एवातः सामर्थ्याद्भावएव भविष्यति, ननु च प्राप्त्यर्थः सकर्मक एव, सत्यं, व्यक्तिनिर्द्देशात् प्राथम्याच्च सत्तार्थस्यैव ग्रहणम्, न च कालादिकर्मणि प्रसङ्गः, अनभिधानात् तत्किमर्थं भावग्रहणमित्यत्राह। 'भावग्रहणमुत्तरार्थमिति'। 'हनस्त चे' ति सकर्मकादपि हनो भावे यथा स्याद् ब्रह्महत्या वर्त्ततइति कर्मणि मा भूत्त्वया घात्यो वृषल इति ॥

"हनस्त च" ॥ 'ब्रह्महत्येति'। स्वभावतः स्त्रीलिङ्गत्वमस्य क्यबन्तस्य यथान्येषाम्भावे कृत्यानां नपुंसकत्वं, छन्दसि तु क्यबन्तस्यापि नपुंसकत्वमिष्यते सनादेव दस्युहत्याय जज्ञिषे, छन्दसि च स्त्रियां चिद्दृश्यः, अस्यै ब्रह्महत्यायै तृतीयं परिगृहाणेति,। 'प्रघातो वर्त्ततइति'। किं पुनः कारणं घञ् प्रत्युदाह्रियते न ण्यदित्यत आह। 'ण्यत्तु भावे न भवतीति'। कर्माविवक्षायामकर्मकत्वे सत्यपीति भावः, सकर्मकात्तु भावे ण्यतः प्राप्तिरेव नास्ति ॥

"एतिस्तुशास्वृदृजुषः क्यप्" ॥ एतीति तिपा निर्द्देशः, किमर्थं धातोर्ग्रहणं यथा स्यादिवर्णान्तस्य मा भूदिति, अत्र चेण एव ग्रहणं नेङिकोः तयोरधिपूर्वयोरेव प्रयोगादेतीति निर्द्देशानुपपत्तेः, तथा च रक्षार्थं वेदानामध्येयं व्याकरणमिति भाष्ये यदेव प्रयुक्तः। केचित्तु इणवदिक इति वक्तव्यमिति वचनादधीत्यां मातेत्यप्युदाहरन्ति। 'स्तुत्य इति'। ह्रस्वस्य तुक्। 'शिष्य इति'।'शासइदङ्हलो' रितीत्वं 'शासिवसिघसीनां चे' ति षत्वम्, आङः शासुइच्छायामित्यस्यापि ग्रहणमविशेषात् तेनाशास्यमिति धातुस्वरेण मध्योदात्तं पदं भवति ण्यति तु गतिकारकोपपदात्कृदिति अन्तस्वरितत्वं स्यात्। केचित्तु शासु अनुशिष्टावित्यस्यैव ग्रहणमिच्छन्ति। 'ओरावश्यकइत्यादि'। इह स्तुग्रहणस्यावकाश आवश्यकाविवक्षायां स्तुत्य इति, 'ओरावश्यके' इत्यस्यावकाशोऽवश्यलाव्यमिति, अवश्यस्तुत्य इत्यत्रोभयप्रसङ्गे परत्वाद् ण्यत्स्यात् पुनः क्यब्ग्रहणात्क्यबेव भवति।

‘वृग्रहणे वृञो ग्रहणमिष्यते न वृङ इति’। ज्ञापकात्, यदय ‘मीढ्वन्ववृषं सदुहां ययत’ इति वार्यशब्दस्याद्युदात्तत्वं शास्ति तत्र चेडिवन्दिभ्यां साहचर्यादात्मनेपदिनो वृङो ग्रहणम्। ‘शंसिदुहीत्यादि’। शंसु स्तुतौ दुह प्रपूरणे गुहू संवरणे।‘ शस्यमिति’। क्यप्यत्र उपधालोपः, भाष्यएतदुपसङ्ख्यानं न दृष्टम्। ‘आङ्पूर्वादिति’। अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु। ‘आज्यमिति’। ‘कृत्यल्युटो बहुल’मिति करणे क्यप्, पूर्ववदुपधालोपः, अथ कस्माद् ण्यत्येवोपधालोपो नोक्तः कुत्वप्रसङ्गात्तित्स्वरप्रसङ्गाच्च तस्मात्क्यबन्त एषः, यद्येवमवग्रहः प्राप्नोति आज्यमित्या अज्यमिति, अवगृह्यतां को दोषः; नहि लक्षणेन पदकारा अनुवर्त्त्याः किन्तु पदकारैर्नाम लक्षणमनुवर्त्त्यं पदविच्छेदो हि पौरुषेयः संहितैव तु नित्यार्थं चार्थनिश्चयाभावे नावगृह्णन्ति यथा हरिवदिति किं हरिशब्द इकारान्त उत हरिच्छब्दस्तकारान्त इति सन्देहात्। ‘कथमिति’। इण एवैतद्रूपमिति मन्यमानस्य प्रश्नः। ‘एरिति’। इ गताविति इत्यस्य॥

“ऋदुपधाच्चाक्लृपिचृतेः”।‘क्लृपिचृती वर्जयित्वेति’। क्लृपू सामर्थ्ये चृती हिंसाग्रन्थनयोः क्लृपेर्लत्वस्यासिद्धत्वादृकारलृकारयोस्सवर्णसंज्ञाविधानाच्च ऋदुपधात्वम्। ‘कृत संशब्दने ण्यदेव भवतीति’। अनित्यण्यन्ताश्चुरादय इति णिजभावपक्ष इति भावः। इदमेव च तपरकरणं लिङ्गमनित्यण्यन्ताश्चुरादय इति णिजन्तात्तु णिलोपे कृते चाकृते च वित्स्यं धित्स्यमिति वक्ष्यदेव भवति। ‘पाणिसर्य्येति’। पाणिभ्यां सृज्यत इत्युपपदसमासः पूर्ववत्कुत्वम्, एवं समवसर्य्येत्यत्रापि॥

“ई च खनः”॥ दीर्घोच्चारणं किमर्थं न इ च खन इत्येवोच्येत दीर्घस्य ह्रस्वस्य वा आद्गुणे नास्ति विशेषः, ह्रस्वादेशे ‘षत्वतुकोरसिद्ध’ इत्येकादेशस्यासिद्धत्वाद् ध्रस्वाश्रयस्तुक् स्यादिति चेद् न, पदान्तपदाद्योरेकादेशस्तुग्विधावसिद्धः, अन्यथा वृत्तेच्छत्रमिति छावाद्गुणस्यासिद्धत्वा ‘च्छे च’ ति ह्रस्वाश्रयो नित्यस्तुक् स्यादित्यत आह। ‘दीर्घनिर्द्देश इत्यादि’। एतेन ह्रस्वद्वयमत्र विधीयते न दीर्घ इति दर्शयति पूर्वं तु यथाश्रुताश्रयणेनाक्रमीकारश्चान्तादेश इति। ‘तत्रेति’। प्रश्लेषे। ‘सति ये विभाषेत्यात्व-

Digitized by Google

बाधनार्थ इति' । अन्यथा ये विभाषेत्यस्यावकाशः खायते खन्यते अस्य त्ववकाशो यस्मिन्पक्षे आत्वं नास्ति आत्वपक्षे उभयप्रसङ्गे परत्वादन्तरङ्गत्वाच्चात्वं स्यात्, एतच्च ये विभाषेति विषयसप्तमीपक्ष उच्यते, तदा हि यकारादौ बुद्धिस्थ एव भवदात्वमन्तरङ्गम् अयं त्विकारः क्यपा सह विधानाद्बहिरङ्गः, परसप्तमीपक्षे त्विदमेवेत्वमन्तरङ्गं परनिमित्तमनपेक्ष्य विधानात् ॥

"भृञो ऽसञ्ज्ञायाम्"॥'भर्त्तव्या इत्यर्थे इति'। एतेन क्रियाशब्दत्वं दर्शयन् संज्ञात्वमपाकरोति।'संपूर्वाद्विभाषेति'। असंज्ञायामेव सूत्रेण नित्यं प्रसक्तस्य क्यपोऽयं विकल्पः। प्राप्तविभाषेत्यर्थः। 'संज्ञायामित्यादि'। प्रतिषेधस्येति शेषः। असंज्ञायामित्यस्य प्रतिषेधस्य भार्या नाम क्षत्रिय इत्यत्र पुंसि दृष्टत्वाच्चरितार्थत्वान्न ते सूत्रकारस्य भार्या शब्दः सिद्ध्यतीत्यर्थः। पुंसि चरितार्थे हि प्रतिषेधे स्त्रियां क्यपा भवितव्यम्। ननु भार्याशब्दोऽपि संज्ञा, अध्रियमाणापि हि भार्या भार्येत्युच्यते तत्कुतोऽस्य क्यपः प्रसङ्गः, न ब्रूमोऽनेन क्यपा भवितव्यमिति यस्तु संज्ञायामेव विधीयते संज्ञायां समजनिषदेत्यादिना तस्यात्र प्रसङ्गः, न च तस्यापि प्रतिषेधसामर्थ्यान्निवृत्तिः, पुंसि प्रतिषेधस्य चरितार्थत्वादिति चोद्यम् उत्तरमाह। 'स्त्रियां भावाधिकारोऽस्तीति'। ननु सञ्ज्ञायां समजनिषदेत्यत्र वक्ष्यति भावइति न स्वयं तु पूर्वक एवार्थाधिकार इति यथा समजन्ति तस्यामिति समज्या निषदन्ति तस्यामिति निषद्येत्यादि भवति तत्कथमिदमुच्यते स्त्रियां भावाधिकारोऽस्तीति, नेदमपूर्वं चोद्यं वृत्तिकार एव हि तत्र वक्ष्यति कथं तदुक्तं स्त्रियां भावाधिकारोऽस्तीति स्त्रियां स्त्रीप्रकरणे संज्ञायां समजेत्यादिना क्यपि विधीयमाने भावस्याधिकारो ऽभिधेयभावोपगमलक्षणो व्यापारोऽस्ति शब्दशक्तिस्वाभाव्याद् भावएव तेन क्यब् भवति न कर्मणि तेन भार्या प्रसिद्ध्यतीति कर्मणीत्यभिप्रायः, एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्येति भृञ् भरण इत्यस्यैव क्यब्विधौ ग्रहणं न डुभृञ् धारणपोषणयोरित्यस्य, अतस्तस्माद्वा भृञ् भरण इत्यस्माद्दीर्घान्ताद्वा भार्येति प्रसिद्ध्यतीति परिहारान्तरमप्यत्र सम्भवति ॥

Digitized by Google

"मृजेर्विभाषा" ॥ 'परिमार्ग्य इति'। 'मृजेर्वृद्धिः' पूर्ववत्कुत्वम् ॥

"राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः" ॥ 'राज्ञा सोतव्य इति'। अभिषिक्तः क्षत्रियो राजा तेन सोतव्योऽभिषवद्वारेण निष्पादयितव्य इत्यर्थः, कर्मणि क्यप् दीर्घत्वं च निपात्यते, 'राजा वा इह सूयतइति'। अत्र पक्षे लतात्मकः सोमो राजा राजानं क्रीणन्तीत्यादौ दर्शनात्, सुनोतिरत्राप्यभिषवे ऽधिकरणे, क्यप्निपातनं रूढ्यर्थं, तेन ज्योतिष्टोमादौ न भवति, पूर्वस्मिन्नपि पक्षेऽश्वमेधादावतिप्रसङ्गः। 'सृसर्त्तिभ्यामिति'। ननु सर्त्तेरुत्वं सुवतेर्वा रुडागम इत्यभिधानाद्विकल्पोऽत्राभिप्रेत इति चार्थाभावाद् द्वन्द्वानुपपत्तिः, भाष्यकारप्रयोगात्तु द्वन्द्वः, प्रयुक्तं हि भाष्ये सृसर्त्तिभ्यां च सर्त्तेरुत्वं सुवतेर्वा रुडागम इति। 'सर्त्तेरुत्वमिति'। दीर्घत्वं तु रपरत्वे सति 'हलि च' त्येव सिद्धम्। 'सुवतेर्वा रुडागम इति'। सुवतेरिति पञ्चमी सुवतेः परस्य क्यप इत्यर्थः, रुगागम इति पाठे षष्ठी। 'सरतीति'। आकाशे। 'सुवतीति'। षू प्रेरणे तुदादिः, कर्मणि लोकं प्रेरयतीत्यर्थः, उदिते हि तस्मिन्क्रियासु लोकस्य प्रवृत्तिः, कर्तृप्रत्ययेन कर्त्तरि निपातनं दर्शयति, एवं रुच्याव्यथ्ययोरपि द्रष्टव्यम्। आह च सूर्यरुच्याव्यथ्याः कर्त्तरीति। 'कुप्यमिति'। संज्ञायामेतदिष्यते सुवर्णरजतव्यतिरिक्तस्य धनस्येयं सञ्ज्ञा, सर्वत्रातिप्रसङ्गो निपातनाश्रयेण परिहार्यः। 'कर्मकर्त्तरि निपातनमिति'। अन्तोदात्तस्य चेति द्रष्टव्यम्, आह हि कृष्टपच्यस्यान्तोदात्तत्वं कर्मकर्त्तरि चेति, शुद्धे तु कर्मणि कृष्टपाक्य इत्येव भवति ॥

"पुष्यसिद्ध्यौ नक्षत्रे" ॥ 'पुष्यन्त्यस्मिन्नर्था इति'। आरब्धा इति शेषः। 'सिद्ध्यन्त्यस्मिन्निति'। अत्रार्था इत्यपेक्ष्यते पुष्यसिद्ध्यशब्दौ पर्यायौ स्वरूपपरत्वात्तु सूत्रे द्वन्द्वः ॥

"विपूयविनीयजित्या मुञ्जकल्कहलिषु" ॥ 'विपूयो मुञ्ज इति'। रज्ज्वादिकरणाय शोधयितव्य इत्यर्थः। 'विनीयः कल्क इति'। कल्कशब्दोऽयमस्ति पिष्ट औषधे, पथ्या शुण्ठी सैन्धवांशस्य कल्कः पेयो नित्यं सर्वरोगक्षयायेति, तैले घृते वा औषधे प्रक्षिप्ते यदवशेषं तत्रापि वर्त्तते, पापे च प्रसिद्धः तपो न कल्कोऽध्ययनं न कल्क इत्यादौ, इह तु प्रथमस्य

Digitized by Google

ग्रहणमिति केचित्, तद्विशेषेणेति वयं, तथा च माघः प्रायुङ्क्त, अविनीय संभ्रमविकासिभक्तिभिरिति । 'जित्य इति' । बलेनाक्रष्टव्यः, कृष्टसमीकरणार्थं स्थूलं काष्टं हलिरित्युच्यते ॥

"पदास्वैरिबाह्यापक्ष्येषु च" ॥ 'अस्वैरिणीति' । ईर प्रेरणे स्वयमेवेरितुं शीलमस्या इति ताच्छीलिको णिनिः, 'स्वादीरेरिणो' रिति वृद्धिः । 'बाह्यायामिति' । बहिर्भवा बहिषष्टिलोपश्चेति यञ्टिलोपौ, पक्षे भवः पक्ष्यः, दिगादित्वाद्यत् । 'यस्य प्रगृह्यसंज्ञा विहितेति' । ननु पदावयवस्य द्विवचनादेः प्रगृह्यसंज्ञा न तु पदस्य, सत्यं, यौगिकस्त्वयं पदशब्दः पद्यते गम्यतेऽनेनार्थ इति, यद्वा प्रातिशाख्ये द्विवचनान्तं पदमेव प्रगृह्यशब्दः प्रसिद्धः सन्निकर्षाच्च गृह्णातेरर्थः स्वरसन्ध्यभावादग्नी इत्यादौ कियतापि कालेन व्यवधानात्परस्परमचो न सन्निकृष्यन्ते । 'अवगृह्यमिति' । समासे पूर्वपदं तत्र हि पदकालेऽवग्रहो विच्छेदः । 'गृह्यका इमे गृहीतका इत्यर्थ इति' । उभयत्रानुकम्पायां कन्, पञ्जरादिबन्धेन परतन्त्रीकृताः शुकादय उच्यन्ते । 'ग्रामगृह्येति' । शेषलक्षणायाः षष्ठ्याः समासः । वासुदेवगृह्येत्यत्र तु कर्तरिषष्ठ्याः शेषषष्ठ्या वा समासः ॥

"विभाषा कृवृषोः" ॥ 'वृष्यमिति' । वृषु सेचने ॥

"युग्यं च पत्रे" ॥ 'पतत्यनेनेति पत्रमिति' । दाम्नीशसेत्यादिना करणे ष्ट्रन्, तद्वहति रथयुगप्रासङ्गमि'ति प्राग्दीव्यतीयेनैव यता सिद्धं स्वरेऽपि नास्ति भेदः क्यपि धातुस्वरः यत्यपि 'यतो नाव' इत्याद्युदात्तत्वम्, अयुग्यमित्यत्रापि न स्वरे भेदः, 'ययतोश्चातदर्थे' इत्योकेष्णुच्चार्वादयश्चेत्युभयत्रान्तोदात्तविधानात् ॥

"अमावस्यदन्यतरस्याम्" ॥ 'अमाशब्दः सहार्थे वर्त्तत इति' । अमात्य इत्यादौ दर्शनात् । 'तस्मिन्नुपपद इति' । उपपदत्वमपि निपातनादेव, अमेति वा सप्तम्या लुका निर्देशः, तकारोच्चारणात्प्रकृतस्य ण्यपस्ताव निपातनं न भवति, यदि तु परमप्रकृतस्य यतो निपातनं स्यात्स्वरे दोषः स्याद्यति सति वस्याशब्दे यतो नाव इत्याद्युदात्तत्वं कृदुत्तरपदप्रकृतिस्वरत्वेऽपि स एव स्वरोऽवतिष्ठेत ण्यति त्वन्तस्वरितत्वं भवति तथा

Digitized by Google

यता मुक्तं ऽमावास्येत्यधिकरणे ण्यत्र प्राप्नोति, 'कृत्यल्युटो बहुल' मिति भविष्यति, एवमप्युपपदसमासो न प्राप्नोति, मयूरव्यं सकादित्वाद्भविष्यति, एवमपि गतिकारकोपपदादिति स्वरो न प्राप्नोति, तथा 'अमावास्याया वे' ति ण्यदन्तस्य यत्कार्यं तदवदन्तस्यामावस्यशब्दस्य न स्याद् भिन्नत्वादिति यदन्तपक्षे दोषं दृष्ट्वा प्रकृतस्यापि ण्यत एव निपातनमित्याह । 'ण्यत्प्रत्ययो भवतीति'। किं तदुच्यते ण्यत्प्रत्ययो भवतीति न पुनर्ण्यत्प्रत्ययो निपात्यतइति, सत्यं स एवार्थो निपातनाद् ण्यत्प्रत्ययो भवतीत्यर्थः। 'अन्यतरस्यां वृद्ध्यभावो निपात्यतइति' । ण्यत्प्रत्ययो नित्यः वृद्ध्यभावस्तु पाक्षिक इत्यर्थः । 'सह वसतइति' । सन्निकृष्टौ वसतइत्यर्थः । यदुक्तं ण्यत्प्रत्ययो निपात्यतइति तत्रायं गुण इत्याह । 'एकदेशविकृतस्यानन्यत्वादिति' । ण्यति ह्यमावास्येति स्वतः प्राप्तं रूपं वृद्ध्यभावस्तु तस्यैव विकार इति भावः, यद्वा ण्यति वृद्धौ कृतायां पक्षे ह्रस्वोपि निपात्यते स एव वृद्ध्यभाव उक्तः, एवं श्लोकेप्यवृद्धितामिति, किमत्र निपात्यतइत्याशङ्कायां श्लोकः । 'अमावसोरित्यादि'। 'वृद्धिभावाभावकृतविशेषाश्रयो द्विवचननिर्देशः । 'निपातयामीति' । एकस्यैवेति शेषः, अमापूर्वयोर्वसोर्ण्यन्तयोर्मध्ये एकस्य वृद्ध्यभावमहं निपातयामीत्यर्थः । सूत्रकारेणेव्यमापन्नस्यैतद्वचनं, तथा सति किं सिद्धमित्यत्राह। 'तयेति' । एका तद्धितवृत्तिरेकदेशविकृतस्यानन्यत्वाद् एतयोर्द्वयोरपि सिद्ध्यतीत्यर्थः।'स्वरश्च मे प्रसिद्ध्यतीति'। एवं निपातयतो मम स्वरोपि सिद्ध्यति,व्याख्यातः स्वरः ॥

"छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि" ॥ 'गुणभावश्चेति'। यदा जुहोतेस्तदेति भावः। 'उपचाय्यपृडमिति'। मृड सुखे पृड च इत्येतस्मादिगुपधलक्षणः कः, उपचाय्यं च तत्पृडं चेति कर्मधारयः । 'हिरण्ये चेति वक्तव्यमिति' । 'हिरण्येभिधेयइत्यर्थः' । व्यत्ययमिति' । आद्यन्तविपर्यास इत्यर्थः । 'ण्यदेकस्मादिति'। एकस्माद्गातेर्ण्यत्प्रत्ययो निपात्यते, तदनन्तरेषु देवहूयादिषु चतुर्षु चतुर्भ्यो धातुभ्यः क्यब् निपात्यते । उपसर्गभेदाच्चयतेर्भेदः । 'द्वौ क्यपाविति'। द्वाभ्यां

धातुभ्यां द्वौ क्यपौ निपात्येते इत्यर्थः । 'ग्रर्यद्विधिश्चतुरिति' । सुजन्तमेतत्, क्रियाभ्यावृत्तिवाचिचतुरो वा ग्रयद्विधीयतइत्यर्थः ॥

"ऋहलोर्ण्यत्" ॥ 'ऋवर्णान्तादिति' । ऋतेस्तु ग्रहणं न भवति हला साहचर्यात् परं कार्यमिति निर्देशाद् 'ईडवन्दवृशंसदुहां ण्यत' इति लिङ्गाच्च ॥

"ओरावश्यके" ॥ 'अवश्यं भाव आवश्यकमिति' । मनोज्ञादित्वाद्वुञ्, अव्ययानां भमात्रे टिलोपः, किं पुनरवश्यार्थवाचिन्युपपदे प्रत्यय आहो स्विदावश्यके द्योत्ये, तत्राद्ये पत्तउपपदरहितात्प्रत्ययो न स्यात् लाव्यं पाव्यमिति तस्माद् द्वितीयः पत्त आश्रीयतइत्याह । 'आवश्यके द्योत्यइति' । 'स्वरसमासानुपपत्तिरिति' । उपपदपत्ते उपपदसमासो लभ्यते गतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिस्वरत्वं च द्योत्यपत्ते त्वेतदुभयमपि न सिद्ध्यतीत्यर्थः । 'अवश्यलाव्यमिति' । लुम्पेदवश्यमः कृत्यइति मलोपः, द्योतितार्थस्यापि क्व चित्प्रयोगो दृश्यते लाघवं प्रत्यनादरात्, न त्वेतदत्र वक्तव्यं लुम्पेदवश्यमः कृत्यइति वचनादेव द्योतिते अवश्यमः प्रयोग इति तस्यावश्यकर्तव्यादौ चरितार्थत्वात् । 'मयूरव्यंसकादित्वादिति' । तस्याकृतिगणत्वादिति भावः । 'उत्तरपदप्रकृतिस्वरत्वं चेति' । मयूरव्यंसकादिनिपातनादेव स्वरोपि भविष्यतीत्यपि शक्यं वक्तुम् ॥

"आसुयुवपिरपिलपित्रपिचमश्च" ॥ युप्रभृतीनां द्वन्द्वेन आसुनोतेर्द्वन्द्व इत्याहुः । सुनोतेरभिसम्बन्धस्तदाह । 'आङ्पूर्वात्सुनोतेरिति' । षु प्रसवैश्वर्ययोरित्यस्य त्वग्रहणं कृत्यल्युटो बहुलमिति, यु इति यु मिश्रणइत्यस्य ग्रहणं युञ् बन्धनइत्यस्य तु सानुबन्धकत्वादग्रहणम् । 'यतोपवाद इति' । 'अचो यत्' 'पोरदुपधादि' ति यथायोगं प्राप्तस्य । 'दाभ्यमिति' । दिभेर्धातुष्वपठितस्यापि चुरादौ बहुलमेतन्निदर्शनमिति वचनाच्छिष्टप्रयोगाच्च त्रपयत्यर्थयत्यवधीरयत्यादिवद्धातुत्वं द्रष्टव्यम् ॥

"आनाय्योनित्ये" ॥ 'रूढिरेषेति' । तेन घटादावतिप्रसङ्गो नोद्भावनीय इति भावो निपातनाच्च रूढित्वम्, उक्तं हि रूढ्यर्थं च निपातनमिति । 'कुतः पुनरनित्यत्वमित्यत्राह' । 'तस्य चानित्यत्वमिति' । 'नि-

Digitized by Google

त्यमजागरणादिति’। सततमज्वलनादित्यर्थः, ज्वलनमेव हि तस्य जागरणम्, दक्षिणाग्नावपि विशिष्ट एवेष्यते न सर्वत्रैवेति दर्शयति। ‘यश्चेति’। योनिरुत्पत्तिस्थानम् । वैश्यकुलादित्यादिना योनिविकल्पं दर्शयति । ‘आनाय्योऽनित्यइति’। ‘चेदिति’। घटादिष्वपि प्रसङ्ग इति शेषः। ‘भवेदिति’। सम्भावने लिङ् निपातनादेव सम्भाव्यतइत्यर्थः। ‘एकयोनाविति’ ‘आहवनीयेन’। ‘आनेयोन्यथा भवेदिति’। घटादावनित्ये भिन्नयोनौ च दक्षिणाग्ना ‘वचो यदि’ ति यदेव भवतीत्यर्थः॥

“प्रणाय्योसम्मतौ”॥ असम्मताविति बहुव्रीहिरित्याह। ‘अविद्यमाना सम्मतिरस्मिन्निति’। सम्मतिश्चात्र संमननं प्रीतिविषयभावोपगमनं कर्मव्यापारो विवक्ष्यते न संमन्तृव्यापारः तथा सत्यसंमन्तरि निपातनप्रसङ्गात् तस्य चानिष्टत्वादित्यभिप्रायेणाह।‘[1]संमतता संमतिरिति’।‘संमतिरभिलाषोप्युच्यतइति’॥ भोगविषयोप्यादरः संमतिशब्देनोच्यते, तन्त्रेणेत्यर्थः॥

“पाय्यसांनाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु”। मीयतेनेनेति मानं हूयत इति हविः निवसत्यस्मिन्निति निवासः समिधामाधानी ऋक् सामिधेनी। ‘माङो ण्यत्प्रत्यय इति’। करणे तत्र ‘आतो युक् चिण्कृतोरि’ति युक्। ‘मेयमन्यदिति’। भावकर्मणोर्यदेव भवतीत्यर्थः। ‘सानाय्यमिति’। सम्यङ्नीयते होमार्थमग्निं प्रतीति कर्मणि ण्यत्। ‘हविर्विशेष इति’। ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोमावास्यायामिति विहितयोर्दधिपयसोः। माघस्तु यथाश्रुतार्थग्राही हविर्मात्रे प्रायुङ्क्त हुतमयमवलीढे साधु सानाय्यमग्निरिति। ‘निचीयतेस्मिन्धान्यादिकमिति’। ‘अधिकरणे ण्यत्’। ‘धाय्येति’। धीयतेनया समिदिति करणे ण्यत् पूर्ववद्युक्। ‘ऋग्विशेषस्येति’। प्रवोवाजा अभिद्यवइत्यादिकस्य। ‘किं तर्हि का चिदेवेति’। समिध्यमानवतीं समिद्धवतीं चान्तरेण विकृतिषु प्रक्षिप्यमाणा पृथुपाजा अमर्त्य इत्यादिका। कथं पुन रयं विशेषो लभ्यतइत्याह। ‘रूढिशब्दो ह्ययमिति’। अत एव निपातनाश्रयणमिति भावः। रूढित्वमेव द्रढयति। ‘तथा चेति’। धाय्याः

[1] संमननमिति मुद्रितमूलपुस्तके पाठः।

अत एव तस्यादृष्टार्थत्वमपि न दुष्यति * ये रूपाणि प्रतिमुञ्चमाना इति मन्त्रे तस्य रक्षोपहननार्थत्वश्रवणात् ॥

सू० अप्यनाहिताग्निना ॥ १३ ॥

अग्निसाध्येषु दर्शपूर्णमासादिष्विव पितृयज्ञेऽप्यनाहिताग्नेर्नाधिकारः । यत्तु श्रूयते—अप्यनाहिताग्निना कार्यमेवेदं † चिन्मे क्षतमिदमविशदिदं चिव्हक्षवाम पितरश्चिन्मावेदयन्तीति तदनाहिताऽग्निनाऽप्येतत्कर्त्तव्यं किं पुनराऽऽहिताग्निनेत्येवमर्थवादत्वेनाप्युपपन्नमिति प्राप्ते अवधारणार्थकेनापि—शब्देन कर्तव्यमेवेति स्पष्टविधिना चानाहिताग्नेरप्यधिकारावगतेरितरांश एव तत्रार्थवादः ॥

सू० स लौकिके ॥ १४ ॥

तस्य वैश्वदेवादिवत्पचने ऽग्नौ लौ‡किकाग्नावप्यनियमेनानुष्ठाने प्राप्ते येषां त्रेताग्निसम्बन्धो नास्ति तेषां सर्वेषां कर्मणामनाहिताग्नेरौपासनाग्निसम्बन्धदर्शनादौपासनाग्नावेव पितृयज्ञः । वचनात्तु कतिपयकर्मणयंन्यन्तरे ऽपि ॥

सू० गार्हपत्यस्थानीयम् ॥ १५ ॥

य§दन्तरिक्षमिति मन्त्रेण गार्हपत्यस्योपस्थानं पितृयज्ञे विहितम् । तच्चाहिताग्निकर्तृकात्प्रकृतितोऽनाहिताग्निकर्तृकविकृतौ प्राप्तमिति तदर्थं गार्हपत्य उत्पादनीयः । प्रकृतौ होमार्थादग्नेरुपस्थेयस्य भिन्नत्वादिति

---

* शुक्लयजुः संहितायां द्वितीयाध्याये त्रिंशत्तमर्चि ये रूपाणि प्रतिमुञ्चमाना ऽअसुराः सन्तः स्वधया चरन्तीत्यादिः ।

† वैश्वदेवादित्यचनेऽग्नौवाऽनियमेनानुष्ठाने इति पा० ।

‡ तैत्तिरीयसंहितायाः प्रथमकाण्डे अष्टमप्रपाठके चतुर्थानुवाके । अग्निर्मातस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरितायानि चकृम करोतु मामनेनसमिति पृथिव्यादीन् लोकान् मनसा अजिहिंसिम हिंसितुमिच्छेम यन्मातरं पितरं वा हिंसितुमिच्छेमेति यत्तस्मात्सर्वस्मादेनसः पापाद्गार्हपत्यो मां प्रमुञ्चतु अन्यान्यपि दुरितानि यानि च मे स तेभ्योऽपि मुञ्चतु मानसमेनसं सर्वपापरहितं करोत्विति तैत्तिरीयसंहिताभाष्ये सायनाचार्य्याः ।

§ पाठस्तु यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वाजि हिंऽसिम इत्यादि ।

प्राप्ते संस्कारविशेषविशिष्टस्यैव गार्हपत्यत्वात्तादृशस्योत्पादने चानाहिताग्नित्वभङ्गात्प्रकृतावार्थिकस्य भेदस्य चोदकेनानतिदेशादायतनमात्रभेदेऽपि गार्हपत्यदक्षिणाग्न्योरभेदादस्मिन्नेव प्रणीयते तमेवोपतिष्ठेतेति वचनाच्चातिप्रणीताग्नेरौपासनाग्नेर्वोपस्थानम् ॥

सू० तत्र गार्हपत्य-शब्दः ॥ १६ ॥

तस्मिन्नेव मन्त्रे*ऽग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चत्विति गार्हपत्य-शब्दस्यासमवेतार्थत्वेऽपि मन्त्रानुग्रहायाविकारेण प्रयोगे होमाधिकरणत्वेन संस्कार्यत्वाद्गार्हपत्यपदमपनीयावसथ्य-पदप्रक्षेपरूप ऊहे वा प्राप्ते गार्हपत्य-शब्दमात्रं लुप्यते । तावन्मात्रस्यानन्वितवचनत्वात् । उपतिष्ठेतेत्यात्मनेपदेन मन्त्रस्य करणत्वेन प्राप्तेः प्राकृतस्य तस्य गार्हपत्यपदविनिर्मुक्तस्यैव समवेतार्थकत्वात् । अग्नेरदृष्टपुञ्जरूपस्याग्न्यन्तरेण प्रत्याम्नायाभावेन पदान्तरप्रक्षेपासम्भवात् । अत एव न देवताऽग्निर्क्रियमिति षाष्ठो न्यायः सङ्गच्छते ॥ ईदृशपदघटितमन्त्रस्यैव लोप इति याज्ञिकपक्षः क्वाचित्कस्तु चिन्त्य एव ॥

सू० यत्पौर्णमास्याम् ॥ १७ ॥

अग्नीषोमीयेण यजेत पौर्णमासीममावास्यामभिचरन्निति प्राकरणिकं वाक्यद्वयम् । तत्र द्वितीये यजेतान्तानुषङ्गेण-वैरिमरणोद्देशेनाग्नीषोमीयपुरोडाशविशिष्टपृथक्त्वर्थकरणकभावनाविधिः । तच्च प्रकरणिभ्यो भिन्नं स्वतन्त्रं वाक्येन प्रकरणबाधात् । वाक्यप्रकरणयोरविरोधाद्वा वैमृधवदङ्गं फलपदं तु सर्वकामवाक्यलब्धानुवादः । विधाने षष्ठप्रकारापत्तेर्वाक्यभेदाच्च, अमावास्यासमुदायप्रत्याम्नायत्वेन वा समुदायफलोद्देशेन प्रकरणिन एव पुनर्विधिः । समुदायतत्फलयोरन्यतरोद्देश इतरवैयर्थ्यमिति चेत् । तर्हि दार्शिकाग्नेयदेवतोद्देशेन भ्रातृव्यवत्प्रयोगे सोमसाहित्यविधिः प्राप्ताप्राप्तविवेकेन तथा पर्यवसानादिति प्राप्ते एकप्रसरताभङ्गाद्वायमपि पक्षो युक्तः । इन्द्रियकामवाक्य इव फलोद्देशेनाग्नीषोमीयं हविर्विधीयते

* पतस्यापि समानएवानुवाकः ।

Digitized by Google

प्रकरणलब्धस्याश्रयस्य यजिरनुवादः । स च दार्शिके समुदायमात्रे लाक्षणिकः । अमावास्या-पदस्य तात्पर्यग्राहकत्वात् । चतुर्थप्रकाराश्रयणाल्लाघवं च वाक्यगतेश्चित्रत्वादिति भाष्यमप्येवंपरमुन्नेयम् ॥

सू० अग्नीषोमीयेण ॥ १८ ॥

प्रथमवाक्ये तु प्रकृत एवाग्नीषोमीयोयागोवेष्टिवत्पृथक्कृत्य फलाय विधीयते । द्वितीयविधिप्रकारेऽतीव लाघवात् । तथा चैन्द्रवायवाग्रतावत्कामाग्र्योऽयमिति प्राप्ते समुदायवाचिपौर्णमासीपदवैयर्थ्यापत्तेरुक्तरीत्या चतुर्थ एव विधिप्रकारो युक्तः ॥

इति संक्षेपे भाट्टदीपिकायां त्रयोदशाध्यायस्य द्वितीयः पादः ॥ २ ॥

अथ त्रयोदशाध्याये तृतीयः पादः ।

सू० सर्वाधिकारः ॥ १ ॥

सा*कं प्रस्थायीयेन यजेतेति श्रुतस्य कर्मनाम्नः सहप्रदाननिमित्तकत्वादाग्नेयस्य दोहयोश्च सहैव प्रदानम् । आग्नेयेन पुरोडाशेन प्रचर्याग्नीध्रे स्रुचौ प्रदाय सह कुम्भीभिरभिक्रामन्नाहेति पौर्वापर्यस्योत्पत्तिशिष्टत्वेऽप्यानर्थक्याद्विकल्पो वेति प्राप्ते कुम्भीभिः साकं परतः प्रस्थानस्यैव शक्यतावच्छेदककोटिप्रवेशेन नामत्वोपपत्तावाग्नेयस्य सह प्रदाने मानाभावाद्दोहयोरेव सह प्रदानम् ॥

सू० सह कु†म्भीभिः ॥ २ ॥

स्रुचोराग्नीध्रहस्तेऽवस्थापनपूर्वकं कुम्भीग्रहणात्तासामेव प्रदान-

---

* दधिक्षीरपूर्णाभिश्चतसृभिः कुम्भीभिर्ब्राह्मणाहृताभिः साकमध्वर्योः प्रस्थानं प्रतिस्थानं यस्मिन् यागे सोऽयं साकम्प्रस्थायीयो यागविशेषः । तैत्तिरीयसंहितायां द्वितीयकाण्डे चतुर्थप्रपाठके चतुर्थानुवाके

† सौत्रामणीप्रकरणे शुक्लयजुः संहितायामेकोनविंशाध्याये षोडशर्चि कुम्भी सुराधानीति पदं तदर्थन्तु सुरा धीयते स्थाप्यते यस्यां सा सुराधानी कुम्भीति महीधराचार्यः । तत्रैवाध्याये सप्ताशीतितमर्चि कुम्भः सुराधानकुम्भ इत्यपि स एव ।

Digitized by Google

करणत्वं तेन मध्यमेन पलाशपर्णेन जुहोतीत्यादाविव स्रुचः प्रत्याम्नायः । भाष्ये तु सह कुम्भीभिरभिक्रामन्निति वाक्ये उपपदविभक्त्यपेक्षया कारकविभक्तेर्बलीयस्त्वात् कुम्भीनां प्रदानकरणत्वमुक्तं तत्प्रौढिमात्रं, यत्तु वाक्यं यावत्यः कुम्भ्यः स्युस्तावन्ति दारुपात्राण्युपक्लृप्तानि स्युस्तावन्तोब्राह्मणा दक्षिणत उपवीतिन उपोत्तिष्ठेयुरध्वर्योराहुतिमनुजुहुयुरिति, तत्र दारुपात्राणां करणत्वेनाश्रवणात्तदुपक्लृप्तिरदृष्टार्था । वस्तुतस्तु यत्कुम्भैर्जुहोति तच्छिद्रूयं दारुमयेण होतव्यमनिच्छिद्रयताया इति कुम्भनिन्दापूर्वकं दारुमयस्य होमकरणत्वेन विधानादुपक्लृप्तानां पात्राणामितरब्राह्मणकर्तृकानुहोमेष्वेव करणत्वम् । अध्वर्युकर्तृके तु होमे कुम्भ्य एव करणं कुम्भीसंख्यातोऽधिकस्य दारुपात्रस्यानुपक्लृप्तत्वात्, कुम्भनिन्दा तु ब्राह्मणकर्तृकानुहोमपरा, तस्मात् कुम्भीभिर्दारुपात्रैश्च होतव्यमिति प्राप्ते दारुमयेण होतव्यमिति वाक्ये ब्राह्मणकर्तृकत्वादिविशेषणविशिष्टोद्देशादनु-शब्दाश्रवणाच्च, होमेऽनुहोमे च दारुपात्रमेव करणं, तावन्तो ब्राह्मणा इति त्वध्वर्युसाहित्येनाप्युपपन्नम् । तेष्वेकोऽध्वर्युर्जुहुयादन्ये ऽनुजुहुयुः । पलाशपर्णस्य तु होम एव करणत्वेन श्रवणात्स्रुक्प्रत्याम्नायत्वम् ॥

सू० विवृद्धिर्वा ॥ ३ ॥

कुम्भ्याः प्रदानकरणत्वपूर्वपक्षोत्तरमन्तरा चिन्त्यते । दोहयोर्द्वित्वेन दोहकाले कुम्भ्याधिक्याभावात्सह कुम्भीभिरिति प्रदानकाले कुम्भीबहुत्वश्रवणाद्दोहेऽन्ये कुम्भ्यौ प्रदाने चान्ये । अत एव दोहकालीनं कुम्भ्यां संस्कारान्तरविधानं संगच्छते । तयोरेव प्रदानार्थत्वे तु स्रुक्संस्कारस्यैव प्रकृतितः प्राप्तेस्तदानर्थक्यं वैकृतेन प्राकृतबाधो वा स्यात् । पात्रभेदे तु समुच्चय इति प्राप्ते सायन्दोहाभ्यां चरति प्रातर्दोहाभ्यां चरतीति वचनात्प्रतिदोहं द्वे द्वे कुम्भ्यावित्येवन्दोहकाल एव तावतां धारणार्थं कुम्भीबहुत्वं सामर्थ्यात् प्राप्तं प्रदानकाले शेषकार्यापनयार्थमनूद्यते । एवं च चतुर्णामपि दोहानां प्रातरेव प्रचार इति पक्षे, कालभेदेन प्रचारे तु प्रचयशिष्टसंख्याऽनुवादः ॥

सू० तत्र शेषाः ॥ ४ ॥

तेष्वेव शेषकार्याण्युपस्तरणाभिघारणे च कर्त्तव्यानि कुम्भीतो-दाहपात्रेषु ग्रहणसमये उपस्तरणादिसम्भवात् । सावशेषस्यैव चोदका-नुग्रहाय ग्रहीतुं युक्तत्वाच्चेति प्राप्ते अभिक्रामं नाहेन्द्रायानुब्रूह्याश्राव-येन्द्रं यजेति प्रैषावित्यभिक्रमणकाल एव विधानादुपस्तरणादेः सशेषा-वदानस्य च कालातिक्रान्तेर्न कार्याणि ॥

सू० सन्ततम् ॥ ५ ॥

तदिदं प्रैषत्रयं सन्ततं वक्तव्यं न विरम्य सन्ततं वसोर्धारां जुहो-तीत्यादौ विरामादर्शनादिति प्राप्ते यथाकालमेव वक्तव्यं सामर्थ्यलक्षणात् लिङ्गात् । तस्य च वाक्याद्बलवत्त्वात् अभिक्रमणसमकालिकत्वं तु पुरो-ऽनुवाक्याप्रैषस्यैव अन्ययोस्त्वनुवादमात्रम् । सन्ततमाहेति तु समासवचनं तस्यैकशतं प्रयाजा इज्यन्त इतिवदिति मूले स्थितम् ॥

सू० द्विरिज्या ॥ ६ ॥

दाक्षायणयज्ञस्य दर्शपूर्णमासयोरेवाभ्यासरूपगुणविकारविशिष्ट-त्वाद्दर्शस्यैव पौर्णमास्या अप्यावृत्तिः । पौर्णमासे सन्नयेदिति वचनेन सान्ना-य्यस्य पौर्णमास्याममावास्यायां च करणवत्तेषामेतमर्द्धमासं प्रसुत इति वच-नेन सोमसंस्तुतस्य समस्तस्य कर्मणः कालेन सहात्यन्तसंयोगविधानेन तस्य समस्तकर्मावृत्तिमन्तरेणानुपपत्तेः । दर्शमात्रावृत्तौ च तद्विरोधादिति प्राप्ते सोमः* खलु वै सान्नाय्यमिति श्रुत्या कर्मैकदेशस्यैव सोमयागत्वेन संस्तवात्तस्यैव पौर्णमासेऽपि विधानाच्चार्द्धमासमित्यस्यापि तदेकवाक्य-तया सान्नाय्यस्यैवावृत्तिः ॥

सू० निरन्तरम् ॥ ७ ॥

अर्द्धमासमित्यत्यन्तसंयोगलक्षणद्वितीयावशादेव मासमधीते क्रो-शमधीत इत्यादाविव निरन्तरमभ्यास इति प्राप्ते द्वे अमावास्ये यजेतेति

* तैत्तिरीयब्राह्मणे तृतीयकाण्डे द्वितीयप्रपाठके तृतीयानुवाके ।

द्वित्वं विधायाऽऽग्नेयोऽष्टाकपालः पौर्णमास्यामाग्नेयोऽष्टाकपाल ऐन्द्रं दधि च पूर्वस्याममावास्यायामाग्नेयोऽष्टाकपालो मैत्रावरुण्यामित्तोत्तरस्यामिति प्रयोगद्वयस्य विधरणाच्च प्रत्यहमभ्यासः पौर्णमास्यां क्रियमाणस्य सान्नाय्यस्यैव सोमाभिषवत्वेनामावास्यायां क्रियमाणाया आमिक्षाया अनूबन्ध्यात्वेन संस्तवात्तन्मध्यपतितस्य सर्वस्यापि कालस्य सुत्यारूपत्वादत्यन्तसंयोगः स्तुत्यर्थत्वादप्युपपन्नः। किञ्च त्रिंशतं वर्षाणि कर्त्तव्यत्वेन विहितयोर्दर्शपूर्णमासयोर्यद्यु वै दाक्षायणयाजी स्यात्पञ्चदशवर्षाणि यजेत त्रिंशद्याजी संपद्यत इति पञ्चदशस्वेव वर्षेषु त्रिंशत्सम्पत्तिवचनाद् द्विरेवाभ्यासः॥

सू० तस्य व्रतम्॥ ८॥

तत्रैव तस्यैतद्व्रतमित्युपक्रम्य नानृतं वदेन्न मांसमश्नीयान्न स्त्रियमुपेयान्नास्य पल्पू*लनेन वासः पल्पूलयेयुरेतद्धि देवाः सर्वं न कुर्वन्तीति विहितानि व्रतानि प्राकृतव्रतानामेव गुणविकाररूपाणि दाक्षायणयज्ञस्यैव दर्शपूर्णमासगुणविकाररूपत्वेन तत्तदङ्गव्रतयोरपि तथात्वस्योचितत्वादिति प्राप्ते चातुर्मास्यव्रतवदमावास्येष्टिद्वयान्तरालेऽपरपक्ष एवैतद्व्रतम्, प्राकृतं तु प्रतिप्रयोगं व्रतोपायनादिव्रतविमोकान्तकालमेवेति तयोर्भेदात्। स एतमर्द्धमासं यज्ञो विततस्तस्यैतद्व्रतमित्यर्द्धमाससंयोगशिष्टत्वात्। एतत्प्रकरण एव पठितस्य ऋतौ भार्यामुपेयादिति प्रतिप्रसवस्य वैयर्थ्यापत्तेश्च॥

सू० आदिविकल्पः॥ ९॥

ईदृशानां गुणविकाराणामैच्छिको विकल्पः प्रतिप्रयोगं स्यात् दर्शपूर्णमासनिष्ठस्य यावज्जीविकत्वस्य विकारेष्वपि प्रवृत्तेरिति प्राप्ते

---

* तैत्तिरीयसंहिताद्वितीयकाण्डे पञ्चमप्रपाठके पञ्चमानुवाके पल्पूलनं वस्त्रशुद्धिसाधनमूषादि तेनास्य वासो न शोधयेयुः, यस्माद्देवाः पूज्या एतत्सर्वमनृतवदनादिकं न कुर्वन्ति तस्मादयमपि न कुर्यात्। पल्पूल-धातुः प्रक्षालनच्छेदनयोरिति महीधराचार्याःशुक्लयजुःसंहितायां त्रिंशत्तमेऽध्याये द्वादश्यां कण्डिकायां प्राहुः।

Digitized by Google

प्रथमप्रयोग एवायं विकल्पः कर्मधर्मरूपाणां विकारे प्रवृत्तावपि कर्तृधर्मस्य यावज्जीविकत्वस्य तदयोगात् ॥

सू० यूपविरोहणम् ॥ १० ॥

*यस्य यूपो विरोहति ईश्वरः पराभवितोस्त्वाष्ट्रं पशुं सायडं छागं लोमशं पिङ्गलं बभ्रुं बहुरूपमालभेतेति विहितं छिन्नयूपेऽङ्कुररोहणनिमित्तकं कर्म विकृतावेव प्रवर्त्तते । तासां हि सुत्याविवृध्या दीर्घततित्वात् । प्रकृतौ दीक्षाकाले छिन्नस्यानुच्छ्रितस्य यूपस्याल्पेन कालेन विरोहणासंभवादिति प्राप्तेऽनुच्छ्रितस्यापि यूपस्य विरोहणसंभवात्प्रकृतावप्यविरुद्धम् । संस्कारैकदेशयुक्तपलाशेऽपि यूपपदप्रयोगादवस्थाविशेषस्य निमित्तकोटावप्रवेशात् ॥

सू० तमपरम् ॥ ११ ॥

यद्दीक्षा यदि पशुना यदि सोमेन यजेत तत्रै+वास्य पूर्वोऽग्निश्चितः स्यात्तमपरमन्ववधाय यजेतेति श्रुते तमपरमित्यनेन पुराणाग्निद्रव्यसमीपदेशो लक्ष्यते । पूर्वोऽग्निर्यथा यजनीयदेशस्यापरभागे भवेत्तादृशे देशे यजेतेत्यर्थात् । नदीमन्ववसिता सेनेत्यादौ नदीसमीपदेशभानात् । अथवा तं पुराणाग्निदेशमेवान्ववधायाश्रित्यापरं यजेत पुनर्यजेतेत्यर्थः । पुराणस्याग्निस्थलस्य तत्रैव सत्त्वेन तदुपर्येव यजेतेति यावत् ।

---

* तैत्तिरीयब्राह्मणे प्रथमकाण्डे चतुर्थप्रपाठके सप्तमानुवाके यूपविरोहप्रायश्चित्तप्रकरणे मंत्राः, असुर्यं वा एतस्माद्वर्णं कृत्वा पशवोवीर्यमपक्रामन्ति यस्य यूपो विरोहति त्वाष्ट्रं बहुरूपमालभेत् त्वष्टा वै रूपाणामीशे य एव रूपाणामीशे सोऽस्मिन् पशून् वीर्यं यच्छति=नास्मात्पशवो वीर्यमपक्रामन्ति।

तदर्थस्तु यस्य यजमानस्य यूपो विरोहणमङ्कुरान जनयति एतस्मात् यजमानात् पशवो वीर्यमपक्रामन्ति किं कृत्वा असुर्यं वर्णमसुरेभ्यो हितं कृत्वा तदेनदपक्रमणं निवारयितुं त्वष्टृदेवताकं बहुवर्णोपेतं पशुमालभेत त्वष्टा हि रूपाणां स्वामी, "त्वष्टा वै पशूनां रूपकृदिति,' श्रुत्यन्तरात् अतः पशूनां त्वष्टा रूपस्वामी यजमाने तान्पशूनवीर्यं च नियच्छति ततो नास्मान् पशवो वीर्यमपक्रामन्तीति सायनाचार्य्याः तैत्तिरीयब्राह्मणे प्रथमाष्टके चतुर्थप्रपाठके सप्तमानुवाके।

\+ यत्रैवास्येति तु पु० ।

वचनात्पुनर्विनियोगे आहवनीयादेरिव निरष्टिकत्वाभावात् नद्याः सजलत्वेन सेनाश्रयत्वायोग्यत्वेन तत्र तीरलक्षणायामपि प्रकृते तदभावात् । कांस्यासनकटासनयोरासनत्वाविशेषेऽपि योग्यतयैव भोज्यभोक्तृधारणे व्यवस्थयैव विनियोगदर्शनादिति प्राप्ते मध्ये चिन्ता ॥

सू० सोमे प्रतिषेधः ॥ १२ ॥

उक्तवचने चयनोत्तरकालीनानामिष्टिपशुसोमानामविशेषेण ग्रहणात्सर्वाङ्गं पुराणाग्निद्रव्यमिति प्राप्ते पुनर्वास्तु वा एतत्क्रियते पुनर्वा एतत्पर्यन्ति यत्रैवाग्निचित्सोमेन यजेत तदेता एकविंशतिलोकम्पृणाम् उत्तरवेद्यामुपनिधाय यजेतेति वचनान्तरेण सोमे द्रव्यान्तरविधानात्सामान्यवचनेनेष्टिपशुबन्धयोरेव पुराणद्रव्यविधिः पर्यवस्यति । वस्तुतस्तु यदीष्टयेति वाक्येऽपि सोमस्य विशिष्य ग्रहणान्यथाऽनुपपत्योत्तरवेदिपुराणाग्निद्वयस्यैवैकविंशतिलोम्पृणानामप्यग्निचित्कर्तृकसोमे समुच्चयः सोमानन्तर्गतेष्टिपशूनां त्वेकविंशतिलोकंपृणाभाव इति स्थितादुत्तरमग्निचित्कर्तृकसोमे लोकम्पृणाद्रूपगुणान्तरविधिरयमेव । अन्यः सर्वोऽप्यस्यैवार्थवादः । इष्टिपशु-शब्दौ च सोमप्रयोगान्तर्गतेष्टिपशुमात्रपराविति न क्वापि पुराणाग्निद्रव्यस्य पुनर्विनियोगः ॥

सू० साग्निचित्यानाम् ॥ १३ ॥

एकविंशतिलोकम्पृणाभिरेषा पुनश्चितिः साग्निचित्यक्रतुष्वेव स्यात्तत्प्रकरणे पाठादिति प्राप्तेऽनग्निचित्येष्वेव व्यपदेशविशेषात् अग्निं चित्वा यजत इत्यनुक्त्वा अग्निचित् सन् यः सोमेन यजत इत्युक्त्या सोमेऽनग्निचित्यत्वस्यैव भानात् । विश्वजिति सर्वपृष्ठे ग्रहीतव्या अप्यग्निष्टोमे ग्रहीतव्या इत्यत्र व्यपदेशभेदेनैव विश्वजितोऽग्निष्टोमेतरसंस्थस्य ग्रहणात् । किंच प्रवा एषोऽस्माल्लोकात् च्यवते योऽग्निं चिनुते न वा एतस्यानिष्टकाहुतिरवकल्पते यां वा एषोऽनिष्टकामाहुतिं जुहोति स्रवति वै सा तां स्रवन्तीं यज्ञोऽनुपराभवति यज्ञं यजमानो यत्पुनश्चितिं चिनुत आहुतीनां प्रतिष्ठित्या इति वाक्यशेषेऽनिष्टकाहुतेव श्रवणकीर्तनाद-

Digitized by Google

नाग्निचित्यानामेवानिष्टकत्वेनोपस्थितेरग्निचितः केवलसोमयाग एवायं गुणविधिः । इयं पुनश्चितिरप्रसवणेत्युच्यते, या तु समृद्धयर्था पुनश्चितिः सा पुराणाग्नावन्यत्र वेति विकल्प इत्याकारे स्थितम् ॥

सू० प्लाक्षम् ॥ १४ ॥

अग्नीषोमीये पशौ प्लाक्षमुत्तरं बर्हिर्भवति समेधस्यैव पशोरवद्यतीति श्रुतं प्लाक्षशाखामयं बर्हिः संनिहिते सवनीयपशावुत्कृष्येत उत्तरपदविशेषणेन सवनीयपशोरेवोपस्थितेः यद्वा तिष्यार्बर्हिस्तदग्नीषोमीयस्येति वाक्यस्यावान्तरप्रकरणाद्बलीयस्त्वाच्च । पञ्चावत्तावद्गौ जामदग्न्यप्रयोगेऽसंभवच्चिवेशस्य प्राकरणिकस्यापि चतुरवत्तस्योत्कर्षदर्शनादिति प्राप्ते उत्तर-शब्दस्योत्तरपश्वङ्के लक्षणापत्तेरुरसवाक्य एव तस्यावदानाधारत्वेन विनियोगविधानाद्विविकार्ययोर्बाध्यबाधकभावाभावादनुत्कर्षः ॥

सू० पशुपुरोडाशार्थम् ॥ १५ ॥

सवनीयस्य पशोः क्रमेऽग्नीदग्नीन्विहरबर्हिस्तृ*णीहि पुरोडाशानलङ्कुरु पशुना देहीति प्रैषः श्रुतः । तत्र बर्हिस्तरणं पश्वर्थं पुरोडाशार्थं च । उभयोरविशेषेण संनिधानात् आकाङ्क्षितत्वाच्च, मध्यन्दिनतृतीयसवनयोरप्येवमेव प्रैषदर्शनात्तत्र च पशोरभावात्तदैकरूप्याय केवलपुरोडाशार्थमेव वेति प्राप्ते ऐष्टिकेषु प्रत्यक्षस्य बर्हिर्विधेरभावादनुपृष्ठं बर्हिस्तृणातीति सौमिकबर्हिर्विधेः सत्त्वाच्च तस्यैवायं स्तरणार्थः प्रैषः ॥

सू० यथाभा†गम् ॥ १६ ॥

भूयोमन्त्राधिकरणे यथाभागं व्यावर्त्तेथामित्यादिमन्त्राणां विकल्प उक्तस्ते देवते संबोध्य विभजनं विदधति देवतानां यागसंबन्धित्वात् संसृष्टद्रव्यकत्वात् । चेतनत्वेन संबोधनार्हत्वाच्चेति प्राप्ते पिण्डावेवात्र संबोध्यौ । तयोर्देवतातोऽन्तरङ्गत्वात् स्वधित्याद्यचेतनानामपि संबोधनदर्शनात् देवताया अपि शब्दरूपत्वाच्च ॥

* तृणाहीति पा० ।

† यथाभानमिति पुस्तकान्तरस्थपाठान्तरं तु न युक्तम् ।

सू० एतेन ॥ १७ ॥

इदमग्नेरिदमग्नीषोमयोरिति मन्त्रयोरपि पूर्वन्यायेन पिण्डविभागार्थत्वे प्राप्ते तत्संयुत्य द्वेधं कृत्वाऽभिमृशेदिदमग्नेरित्याम्नानाद्विभक्तयोरेव देवतानिर्देशः । अग्नयेऽग्नीषोमाभ्यामिति मन्त्रयोस्तु चतुर्थीनिर्देशादसंदिग्धं देवताऽभिधायित्वम् ॥

सू० *पुरोडाशगणे ॥१८ ॥

यत्र बहूनां पुरोडाशानामेकः पिण्डस्तत्रापि यथाभागं व्यावर्तेथामित्यविकृत एव मन्त्रः प्रयोक्तव्यः । विभागस्य पिण्डद्वैधीकरणार्थत्वादिति प्राप्ते व्यावर्तध्वं †भगो वो विभजत्वित्यादिरीत्योहेन प्रयोगः पिण्डद्वित्वेऽपि हविषां बहुत्वेन तेषां परस्परव्यावृत्तेरभिधेयत्वात् ॥

सू० उत्तमयोः ॥ १९ ॥

अन्त्योपान्त्यपिण्डविभागेऽपि हविर्बहुत्वानपायादूहेन प्रयोगे प्राप्ते यथा प्रकृत्यविकृत एव मन्त्रः पूर्वहविषां व्यावर्त्तितत्वेन द्वयोरेव हविषोर्व्यावर्त्तनीयत्वात् ॥

सू० सर्वत्र ॥ २० ॥

पुरोडाशगण एव देवतानिर्देशो विभागन्यायेन सर्वेषां हविषां स्यादिति प्राप्ते महतः पिण्डादेकैकस्य हविषः क्रमेण पृथक्करणाद्याग-

---

* तैत्तिरीयसंहितायां द्वितीयकाण्डे षष्ठप्रपाठके तृतीयानुवाके मन्त्राः अङ्गिरसो वा इत उत्तमाः सुवर्गं लोकमायन् तदृषयो यज्ञवास्त्वभ्यवायन् तेऽपश्यन् पुरोडाशं कूर्मभूतꣳसर्पन्त तमब्रुवन्निन्द्राय ध्रियस्व बृहस्पतये ध्रियस्व विश्वेभ्यो देवेभ्यो ध्रियस्वेति स नाध्रियत तमब्रुवन्नग्नये ध्रियस्वेति सोऽग्नयेऽध्रियत यदाग्नेयोऽष्टाकपालोऽमावास्यायाञ्च पौर्णमास्यां चाच्युतो भवति सुवर्गस्य लोकस्याभिजित्यै इति अङ्गिरोनामका ऋषयः इतः भूलोकात् उत्तमाः उद्गततमाः त्वरया निर्गताः स्वर्गं प्राप्ताः तत्र स्वर्गं त ऋषयः यज्ञवास्तु यज्ञभूमिमभिलक्ष्य समागताः तस्यां भूमौ पुरोडाशाभिमानी देवः स्वशरीरमन्तर्धाय कूर्मशरीरी भूत्वा प्रकर्षेण पलायते तं दृष्ट्वा त ऋषयोऽब्रुवन् इन्द्रादीनां मध्येऽन्यमस्मै त्वा दास्यामः त्वं ध्रियस्व त्वमवतिष्ठस्वेति ततः स पुरोडाशो नातिष्ठत् अग्न्यर्थं तिष्ठेत्युक्ते स्थितवान् अतो दिनद्वयेऽप्यष्टाकपालः पुरोडाश आग्नेयः अच्युतः कर्तव्यः तेन स्वर्गाभिजयो भवतीति सायनाचार्याः ।

† भागोर्वेति तु पा॰ ।

Digitized by Google

क्रमादेव तत्तद्देवताऽवधारणस्य कृतत्वादन्त्योपान्त्यपिण्डयोर्मध्ये कः पिण्डः किंदैवत्य इति निर्धारणायोगाद्दृष्टार्थो देवतानिर्देशोऽपि तयोरेव ॥

सू० चरुपुरोडाशाः ॥ २१ ॥

यत्र चर्वर्थं पुरोडाशार्थं च व्रीहिनिर्वापादितण्डुलीकरणान्तक्रिया कृता तत्र तेषां तन्त्रेण*ऽधिपवनस्यासम्भवात्तस्मिन्नेव काले विभागः प्रसक्तः स चामन्त्रक एव कार्यः प्राकृतकालाद्भिन्नकालत्वेन मन्त्राप्रवृत्तेः । साकंप्रस्थायीये कुम्भीतो दारुपात्रेषु दोहानां ग्रहणदशायामवदानधर्माणामन्यकालत्वादेव प्रवृत्त्यभावादिति प्राप्ते ऽवदानादिप्रदानान्तैकपदार्थप्रथमावयवरूपग्रहविग्रहणस्याभिक्रमणादितः पूर्वकालिकस्य कुम्भीभिरेव कृतत्वाद्दारुपात्राणां होमकरणत्वनिर्वाहकस्य ग्रहणान्तरस्याप्राकृतत्वेन चतुरवदानरूपत्वाभावात्तदवयवोपस्तरणादेरप्रवृत्तावपि हविर्विभागस्य समृद्ध्यर्थो पुनश्चितिः सा पुराणाग्नावन्यत्र वेति विकल्प इत्याकरे स्थितम् ॥ सामर्थ्यवशेन प्रागेव करणेऽपि प्राकृतत्वानपायात्तदङ्गमन्त्राणां च प्रधानानुसारित्वावश्यम्भावात् पाशुकप्रयाजानामन्यकालत्वेऽपि तन्मन्त्राणामिव प्रवृत्तिः ॥

सू० एकान्ते ॥ २२ ॥

यत्र चरवः पुरोडाशाश्च व्यतिषक्तास्तत्र क्रमानुग्रहायैकैकशो विभागः कर्त्तव्य इति प्राप्ते चरूणां सर्वेषामेकः पुरोडाशानामेक इति द्वावेव राशी युगपत्कर्त्तव्यौ तन्त्रभावे क्रमविपर्यासाभावात् ॥

सू० इदममुष्य च ॥ २३ ॥

तेष्वेव देवतानिर्देशो न कार्यः । अव्यतिषक्तेषु तेष्वनध्यवसानाभावात् । व्यतिषक्तेषु तु क्रमविरोधापत्तेरिति प्राप्ते चोदकप्राप्तस्य बाधे मानाभावादिदममुष्यामुष्य चेत्यादि रीत्या समुच्चित्य देवतानिर्देशः कर्त्तव्य एव । तदभावे कस्य राशेरधिवापः कार्य इति सन्देहापत्तेः तत्रानुष्ठाने क्रमस्यानङ्गत्वात् ॥

* पुरोडाशीयानां पेषणार्थं दृषदि स्थापनमधिवपनमित्युच्यते ।

सू० सर्वपृष्ठायाम् ॥ २४ ॥

बहुपुरोडाशानामेक एव पिण्डोयत्र विहितस्तत्र प्रदानकाले हविर्भागस्यावश्यकत्वाच्चरुपुरोडाशाधिकरणन्यायेन तदैव विभागमन्त्रः प्रयोक्तव्य इति प्राप्ते प्रदानकालेऽप्यविभक्तानामेव हविषां प्रतिदैवतं प्रदीयमानतया हविर्विभागस्यैवाभावाच्च तदङ्गमन्त्रप्रवृत्तिः ॥

इति सङ्कर्षे भाट्टदीपिकायां त्रयोदशाध्यायस्य तृतीयः पादः ॥ ३ ॥

अथ त्रयोदशाध्याये चतुर्थः पादः ॥

सू० वाजिनेन ॥ १ ॥

चातुर्मास्येषु वाजिभ्यो वाजिनमित्यत्र तादर्थ्यचतुर्थ्या यागोत्पत्तावेव सर्वस्य वाजिनस्य यागे विनियोगेनान्यत्र पुनर्विनियोगस्य शेषात्स्विष्टकृत इत्यादाविव शेषपदाभावे स्वेच्छया कर्तुमशक्यत्वाद्वाजिनेनोपसिञ्चतीति विहितमुपसेचनं च प्रयोजकं सदन्यद्वाजिनमाक्षिपतीति प्राप्ते यागोत्पत्तौ विनियोगश्रवणेऽपि परार्थाऽऽमिक्षाऽनुनिष्पन्नस्य वाजिनस्य विनियोगाकाङ्क्षायां यागोपसेचनयोः समकालप्रवृत्तेरसंयुक्तोत्पन्नयोर्वाज्यस्यैवोभयत्र विनियोगसम्भवाच्च वाजिनान्तरमुत्पाद्यम् ॥

सू० आमिक्षायाम् ॥ २ ॥

अस्ति सोम इव वाजिनस्याप्यनुवषट्कारः । स च स्विष्टकृद्रूप एव प्रधानद्रव्यप्रतिपत्तिरूपत्वात् । अत आमिक्षायां सोम इव वाजिनस्याप्यनुवषट्कारः, स च स्विष्टकृद्रूप एव प्रधानद्रव्यप्रतिपत्तिरूपत्वादत आमिक्षायागीयस्विष्टकृतं प्रत्याम्नेत् । अनिज्याशेषत्वद्धैयागः स्विष्टकृतमिवेति प्राप्ते वाजिनाऽनुवषट्कारस्य वाक्येन वाजिनसम्बन्धाद्वाजिनैकशेषप्रतिपत्तिरूपत्वेऽप्यामिक्षायागशेषस्य प्रतिपत्त्याकाङ्क्षाया अनिवृत्तेश्चोदकप्राप्तस्य स्विष्टकृतो न बाधः ॥

Digitized by Google

सू० तस्य वाजिनम् ॥ ३ ॥

अनुवषट्कारस्य सैामिकानुवषट्कारवत्स्विष्टकृद्विकारत्वात्प्रकृतितः प्राप्तं सकृदवदानादि कर्तव्यमिति प्राप्ते ऽनुपदेनाव्यवहितपूर्वत्वस्य प्रतीतेर्वषट्कारमन्वन्यो वषट्कार इत्यर्थस्यावदानादिना विप्रकर्षे बाधापत्तेरवदानादिविशिष्टक्रमिकयागद्वये द्वितीयस्यानुवषट्कार इति व्यवहाराभावात्पूर्वावत्तशेषादेव यागः कार्यः, अत एव त्रयाणां हविषां स्विष्टकृतेन समवद्यतीति न्यायप्राप्तानुवादः । त्रयाणामित्यस्य सोमवाजिनधर्माणामित्यर्थः, तेषामेवोपक्रमात् ॥

सू० विशाखत्वम् ॥ ४ ॥

मै*त्रं श्वेतमालभेत वारुणं कृष्णमपां चैाषधीनां च सन्धावन्नकाम इति प्रकृत्य श्रुते वि†शाखो यूपो भवतीति वाक्ये विशाखत्वस्य श्लक्ष्णत्वादिवददृष्टार्थत्वादग्रभागे द्वे शाखे यूपस्य सम्पाद्ये इति प्राप्ते वारुणप्रघासिकवेिहारद्वयवत्कार्यार्थत्वे सम्भवत्यदृष्टार्थत्वायोगात् पशुनियोजनस्थान एव शाखावान् यूपः सम्पाद्यः । अत एव द्वे ह्येते देवते समृध्या इति वाक्यशेषे देवताभेदेन यूपद्वित्वानुग्रहोक्तिः कार्यार्थत्व एव युज्यते । विशाखे यूपे त्रैता आलभ्यन्त इत्येतद्वाक्यशेषे त्रैतानां प्रथममाश्विनं कामाय मध्यम इत्यादिना शाखात्रये पशुबन्धनोक्तिरपि युज्यते ॥

---

* तैत्तिरीयसंहितायां द्वितीयकाण्डे प्रथमप्रपाठके नवमानुवाके च मन्त्राः। मैत्रं ५ श्वेतमालभेत वारुणं (कृष्णमपां) चैाषधीनां च संधावन्नकामो मैत्रीर्वा श्रोषधयो वारुणीरापोऽपां च खलु वा श्रोषधीनां च रसमुपजीवामो मित्रावरुणावेव स्वेन भागधेयेनोपधावति तावेवास्मा अन्नं प्रयच्छतोऽन्नाद एव भवति इति=तदर्थस्तु संधिशब्दं कालपरत्वेन देशपरत्वेन च द्वेधा सूत्रकारो व्याख्यातवान् अपां चैाषधीनां च संधाविति प्रावृषि शरत्प्रतिपत्तैा अपि चापां चैाषधीनां च संधाविति ऋत्वोर्मध्ये नदीक्षेत्रयोर्मध्ये इत्यर्थः श्रोषधीनामुपकारत्वेन मित्रसंबधित्वं साधु प्रयोग उभयरसोपजीवनेन प्रशस्ताः । एतदेवाभिप्रेत्य संधिं प्रशंसति अपां चैाषधीनां च संधावालभत उभयस्यावरुध्या इति ।

† पुनस्तत्रैव यूपस्य शाखाद्वयं विधत्ते, विशाखो यूपो भवति द्वे ह्येते देवते समृध्यै इति विविधे शाखे यस्यासैा विशाखः तदिदं सूत्रकारो दर्शयति विशाखो यूप इति यदूर्ध्वं रशनायास्तद्विशाखं यद्वोपर्युभे शाखे अष्टा शीसचषाले स्यातामिति सायनाचार्याः ।

सू० एतेन यूपकर्म ॥ ५ ॥

शाखायामेव नियोजनाम्नानात् खले वालिवत्तस्या अयूपत्वाव तत्र यूपधर्माः कर्तव्या इति प्राप्ते धर्माणां पशुनियोजनरूपकार्यार्थत्वात् खलेवाल्या अपि स्वरूपाविघातकाञ्जनादीनामिष्टत्वाच्च भवन्त्येव धर्माः ॥

सू० ऊर्ध्वम् ॥ ६ ॥

रशनापरिव्याणार्थं नाभिदघ्नं स्थलमवशेष्य तदूर्ध्वमेव शाखाभेदः कार्य इति प्राप्ते शाखास्वेव परिव्याणस्यावश्यकत्वादुपराद्बहिः कतिपयाङ्गुलोर्ध्वमेव विशाखता ॥

सू० अग्रमध्य–शब्दौ ॥ ७ ॥

दिवमग्रेण मा लेखीरन्तरिक्षं मध्येन मा हिंसीरिति मन्त्रस्य ह्युलेखनान्तरिक्षहिंसयोरसम्भवेनासमवेतार्थत्वाच्च विशाख ऊह इति प्राप्तेऽग्रमध्य–शब्दयोरसमवेतार्थत्वाभावादग्राभ्यामित्यादिरूहः कार्य एव ॥

सू० सहोपरम् ॥ ८ ॥

पञ्चारत्निं यूपं वृश्चति यजमानं संमितौदुम्बरीभवति नाभिदघ्नं परिव्ययतीत्यादौ यावान्भाग उपरान्तर्निखन्यते तावता सहैवैतानि परिमाणानि चतुर्हस्ता स्थूणेत्यादिवाक्येषु तथा दर्शनात् । पुरुषस्य नाभिर्यथा मध्यभागस्तथा यूपमध्यभागस्य तेन बोधाच्चेति प्राप्ते खातादूर्ध्वमेवैतानि परिमाणानि । चतुर्हस्ता स्थूणेत्यादिवाक्येषु तथा दर्शनात् पुरुषनियोजनादिकार्यार्थत्वात् । खातोपरिभाग एव नियोजनात् । परिव्याणदशायां खातस्याप्रकृतत्वेन स्वनाभिपरिमाणस्य तदूर्ध्वमेव सम्भवात् । एकविंशत्यरत्न्यादिपरिमाणान्तरपक्षे मध्यभागे परिव्याणासम्भवाच्च ॥

सू० यजमानेन ॥ ९ ॥

पुरुषव्यक्तिभेदेनारत्नितारतम्यादनियमेन यस्य कस्याप्यरत्निर्ग्राह्यः प्रयोगप्राशुभावादिति प्राप्ते यजमानेन संमित इति वचनान्तरैकवाक्यतया तदीयारत्निभिः संमित इत्येव नियमनाच्च तथा ॥

Digitized by Google

सू० अध्वर्योः ॥ १० ॥

व्याममात्राणि पक्षपुच्छानि भवन्तीत्यग्नौ श्रुतं तत्र कर्मण्यध्वर्योः प्रवृत्तत्वादनियमान्नियमस्य युक्तत्वाच्च तस्यैव व्यामो ग्राह्यः । शूर्पेण जुहोतीत्यत्र कर्माङ्गशूर्पस्यैव ग्रहणादर्शनादिति प्राप्ते यजमानसंमानव-त्सरचोदितत्वादनियमः । शूर्पस्य तु तदर्थमेवासादनविधानाद्वैषम्यम् ॥

सू० चतुरः ॥ ११ ॥

निर्वापे चतुर्मुष्टिपरिमाणस्याप्यनियमेन यस्य कस्यचिन्मुष्टौ प्राप्ते अस्माद्राशेर्मुष्टिमादत्स्वेति प्रेरितस्य चैत्रादेः स्वमुष्टिपरिमितस्यैवादान-दर्शनादध्वर्योरेव मुष्टिः ॥

सू० परिवीय ॥ १२ ॥

यूपैकादशिन्यां श्रुतम् । अग्निष्ठ ऐकादशिना रशनाः परिवीय वासयतीति अत्र रशनाभिः परिव्याणेनाग्निसमीपस्थं यूपं संस्कुर्यादि-त्यर्थः प्रकृतौ त्रिवृता यूपं परिवीयेति श्रवणात् । अत एव वैकृतवाक्ये द्वितीयासप्तम्यौ सक्तूनितिवत्तत्र जयानितिवच्च गुणप्रधानतापरे । परि-वीयेति च प्रकृतिलिङ्गसंयोगात्प्राकृतपरिव्याणनिवृत्तिः । परिधौ पशुं नियुञ्जीतेति वचनेन यूपनिवृत्तेर्दर्शनादिति प्राप्ते मध्ये चिन्ता ॥

सू० तासामेकाम् ॥ १३ ॥

नाभिदघ्नस्थले सर्वासां परिव्याणासम्भवे नैकामेव तत्र परिवीया-न्याभिर्यथाऽवकाशं परिव्याणम् । अथवा प्रकृतावपि रशनाद्वयस्य परिव्या-णायाप्यपर्याप्त एव नाभिदघ्नभाग इति तं देशमन्तर्भाव्यैव परिवीयते । अतोविकृतावपि सर्वाभिर्युगपदेव नाभिदघ्नं परितः परिव्याणमिति प्राप्ते पुनर्मध्ये चिन्ता ॥

सू० एतेनैकादशिन्याम् ॥ १४ ॥

वैकृतद्विरशन्येऽप्येकां विहितस्थले परिवीयेतरा यथा ऽवकाशमिति प्राप्ते युगपदुभाभ्यां परिव्याणं प्रकृतिवत् ॥

Digitized by Google

सू० स्थितादुत्तरम् ॥ १५ ॥

एकादशभीरशनायुगैर्युगपत्परिव्याणे तासां पुनरुपादानवेलायां युगपदेव मोक्षप्रसङ्गः । तथा च पत्नयूपपरिव्याणार्थरशनादानक्रमलोपापत्तिः । अग्निष्ठादेव द्वे रशने आदायैकैकं पत्नयूपं द्वाभ्यां द्वाभ्यां परिव्ययतीति पृथगग्निष्ठापादानकोप*दानश्रुतेः । तस्माद् द्वाभ्यां द्वाभ्यामेकादशकृत्वोऽग्निष्ठः परिवीयेत ॥

सू० तन्त्रं यूपमन्त्रः ॥ १६ ॥

युवा सुवासा इति होत्रो मन्त्र एकादशवारं प्रयोक्तव्यः प्रतिप्रधानप्रतिप्रधानं गुणावृत्तेरिति प्राप्ते क्रियमाणानुवादिमन्त्रस्यादृष्टार्थत्वेनाश्रूयमाणविशेषत्वात्तन्त्रतैव । प्रति प्रधानमिति न्यायस्तु परिवीरसीत्याध्वर्यवमन्त्रपरः । तस्य करणत्वेन दृष्टार्थत्वात् ॥

सू० आद्यस्थितादुत्तरम् ॥ १७ ॥

परिवीय वासयतीति श्रवणादग्निष्ठाधिकरणकेन परिव्याणकरणेन वासनेन रशनाः संस्कुर्यादित्येवार्थः । विभक्तिव्यत्यासस्य वासयतिपदवैयर्थ्यस्य चायुक्तत्वात् । अथ यदग्निष्ठादधिरशना विह्रियन्ते तेन सर्वेऽग्निष्ठा इति वचनेऽग्निष्ठवाससंस्कृतरशनासम्बन्धेन पत्नयूपानाममप्यग्निष्ठतासम्पत्तिकथनेन रशनासंस्कारत्वावगमाच्च । रशनासंस्कारके वासे गुणविधायकस्य परिवीयेत्यस्य धर्मग्रहणासमर्थत्वेन कालभेदेन च प्राकृतपरिव्याणनिवृत्तेः ॥

सू० ऐकादशिनान् ॥ १८ ॥

साग्निचित्ये विकृतिक्रतौ श्रुतम् । स्वर्गाय वा एष लोकाय चीयते यदग्निर्वज्र एकादशिनी यदग्नावेकादशिनीं मिनुयाद्वज्रेणैवैनं स्व†र्गाल्लोकादन्तर्दध्यादव्यवमिनुत्यात्स्वरुभिः पशून्व्यर्धयेदेकयूपं मिनोति नैनं वज्रेण स्वर्गाल्लोकादन्तर्दधाति न स्वरुभिः पशून्व्यर्धयतीति । अत्र

---

* अग्निष्ठापादानकोपादानेति पा० ।

† सुवर्गादिति पा० ।

Digitized by Google

त्राणां व्याख्यातत्वमुक्तं न स्यादिति तद्व्युदासार्थमसमस्ततया पृथक्पदत्वं ज्ञापयन् अभ्यासस्य प्रयोजनमाह "व्याख्याता इती"ति, नन्वभ्यासस्य कथं समाप्तिद्योतकत्वं श्रुतिसमाधेरिति ब्रूमः, श्रुतिषु हि कर्मभागे ज्योतिष्टोमदर्शपूर्णमासादिविषयतत्तत्प्रकरणावसानेषु नाभ्यासो दृश्यते, वेदान्तेषु दृश्यते—यथा"न च पुनरावर्त्तते न च पुनरावर्त्तते," "नावर्त्तन्ते नावर्त्तन्ते," "अमृतः समभवदमृतः समभवदि"ति "वेदानुशासनं वेदानुशासनं" "तस्माद् ब्रह्मणो महिमानमाप्नोति तस्माद् ब्रह्मणोमहिमानमाप्नोती"ति च, तत्रायमभिप्रायः कस्यचित्पुरुषस्य पुरुषार्थतदुपायप्रतिपादनं हि शास्त्रकृत्यं ज्योतिष्टोमादिज्ञानमात्रेण पुरुषार्थतदुपायज्ञानं वस्तुतो न परिसमाप्तम् अपवर्गतत्साधनयोरविदितत्वादमृतत्व-तदुपायविशेषज्ञाने सति हि ज्ञातव्यज्ञानं समाप्तं भवति, तदधिकपुरुषार्थन्तरतदुपाययोरभावेनाज्ञातव्यत्वादपवर्गोपायभूतविद्यान्तरेषु सत्स्वप्येकेनैव विद्याविशेषेण पुरुषार्थसिद्धेर्विद्यान्तरस्य कृतकरत्वादनपेक्षितत्वेन ज्ञातव्यत्वनियमाभावादतः पुरुषार्थसिद्ध्यर्थे ज्ञातव्यार्थस्य समाप्तिसूचको वेदान्तभागेषु तत्तत्प्रकरणावसानस्थोऽभ्यास इत्यवगम्यते, अत एव कर्मविचारलक्षणावसानेषु अनभ्यासः शारीरलक्षणावसानेष्वभ्यासश्चेत्यवगम्यते, तत्राध्यायावसानशास्त्रावसानवैषम्यद्योतनार्थमाद्याध्यायत्रयावसानेषु पदाभ्यासः, शास्त्रावसाने सूत्राभ्यासश्च कृतः, । यादवमिश्रपक्षस्यास्त्वेवमाहुः—नाध्यायपरिसमाप्तिद्योतकत्वमभ्यासस्य युक्तम् अर्थसमाप्तेरेवाध्यायसमाप्त्यवगमात्सूचनस्य विफलत्वात्, अतोऽध्यायावसानसूचकोऽप्यभ्यासोऽर्थापरिसमाप्तिद्योतकः, अध्यायशेषार्थविचारश्च द्वाभ्यां पादाभ्यां वर्तिष्यत इति नैतद्युक्तं काष्ठेःस्यास्यामित्येतावता वाक्यार्थापरिसमाप्तावपि वाक्यपरिसमाप्तेरिवाध्यायार्थापरिसमाप्तावध्यायपरिसमाप्तेरनुपपन्नत्वात्कर्ममीमांसायामिवाध्यायानां पादचतुष्टयात्मकत्वनियममतिलङ्घ्य प्रथमाध्यायस्यपादषट्कात्मकत्वेन निबन्धनीयत्वप्रसङ्गाच्च । किं प्रथमाध्यायार्थस्यैवापरिसमाप्तिद्योतक इत्युच्यते? उत वृत्तवर्त्तिष्यमाणयोः परस्परसाकाङ्क्षत्वद्योतक? इति, प्रथमे दूषणद्वयं दत्तं, द्वितीये त्वभ्यासवैयर्थ्यमेव द्वितीयाध्यायनिबन्धनादर्थस्वभा-

वाच्च परस्परसाकाङ्क्षत्वसिद्धेः, शास्त्रान्ते सूत्राभ्यासश्चानुक्तनिखिलन्यायास्तित्वसूचक इति चायुक्तम्, अर्थापरिसमाप्तौ शास्त्रपरिसमाप्तेः कार्स्न्यैः स्याल्यामिति वाक्यसमाप्तिवदनुपपन्नत्वादध्यायान्तरनिबन्धने चिरं जीवतः सूत्रकारस्याशक्त्यभावाच्चाखिलन्यायजातमसम्भवविध्वस्तं चादर्शनात्, साङ्ख्यादिषु शास्त्रेषु दृश्यत इति चेन्न, तत्राविरुद्धांशस्योपादेयताया विरुद्धांशस्य त्याज्यतायाश्चास्मिन्नेव शास्त्रे निर्णीतत्वात्, सुगतागमादीनां कार्त्स्न्येन त्याज्यतानिर्णयात्, तदुक्तन्यायानामखिलन्यायत्वेनास्तित्वद्योतने हानोपादानरूपोभयविधप्रयोजनाभावादितिहासपुराणादीनां वेदान्तोपबृंहणतया जगत्कारणवस्तुविषयाणां मन्वादिधर्मशास्त्राणां जैमिनीयन्यायैरिव शारीरकन्यायैरेवानुगृहीतार्थत्वाच्च, किं तर्ह्यभ्यासस्य फलम्? अर्थपरिसमाप्तिर्हि सर्वं व्याख्याता इत्यनेनैव भगवता, उक्तन्यायाविषयवाक्याभावात् नैवम् "एतेन योगः प्रत्युक्तः," "एतेन शिष्टापरिग्रहा," इतिवदेतच्छब्दस्यानन्तरपूर्वोक्तार्थपरामर्शकत्वे प्रकृत्यधिकरणोक्तन्यायपरामर्शितया निमित्तोपादानभेदपरवाक्यविशेषा व्याख्याता इत्युक्तं स्यात्ततश्च सर्वं व्याख्याता इत्यनेनाप्यध्यायसमाप्त्यवगम्यो न स्यात्, अतः पदाभ्यासेन अध्यायसमाप्त्यवगमे सत्येव एतच्छब्दस्य पादचतुष्टयोक्तन्यायपरामर्शित्वावगम इत्यध्यायपरसमाप्तिद्योतनमभ्यासफलं शास्त्रावसाने प्रकृतपरामर्शिपदाभावात्तदसङ्कोचेनावसानसूचनफलकाभ्यासोऽनुपपन्न इति चेन्न शास्त्रावसाने तु सर्वं व्याख्याता इतीदृशनिर्देशाभावाच्छास्त्रसमाप्तेरभ्यासेनैव ज्ञाप्यत्वात्, पादावसानेषु पादार्थपरिसमाप्तावप्यनभ्यासः पादार्थस्याल्पतया ज्ञातव्यान्तरबाहुल्येन कृतांशसन्तोषाभावादतोऽध्यायार्थपरिसमाप्तिद्योतनमेवाभ्यासप्रयोजनं, न केवलमभ्यासप्रयोजनमेवानुपपन्नम्। तैः कृता सूत्रयोजनाऽप्यनुपपन्ना—प्रकृतेर्ब्रह्मत्वसमर्थनेन सर्वे महदादयोऽपि ब्रह्मत्वेन व्याख्याता इति हि तद्योजना, प्रकृतिश्चेति सूत्रे प्रकृति-शब्द उपादानपरः न त्वव्यक्तपर इति समर्थनेन सा व्युदस्ता भवति। किञ्च प्रकृतेर्ब्रह्मानन्यत्वेन ब्रह्मण उपादानत्वे प्रतिपादिते महदादीनां ब्रह्मत्वं न पृथक् समर्थनीयं तेषां प्रकृतिकार्यतया तद्द्रव्यानन्यत्वात्, कार्यकारणयोरनन्यत्वं समर्थनी-

यमिति चेन्न तस्यारम्भणाधिकरणकृत्यत्वान्महतः परमव्यक्तमित्यादिवाक्यानां च महदादितत्त्वप्रतिपादकत्वं चतुर्थाद्यविरुद्धं, न च चतुर्थाद्ये वैभववादः, इह त्वर्थतस्त्वोक्तिरिति कल्प्यम्, अस्य सूत्रस्य गत्यन्तरसम्भवेन कल्पकाभावात्, महदादितत्त्वप्रतिपादनपरत्वे पुरुषान्न परं किञ्चिदिति वाक्यस्य प्रकृतिपुरुषातिरिक्तेश्वरनिषेधकत्वप्रसङ्गाच्च, । एतेन प्रधानकारणनिरासेन सर्वे परमाण्वादिकारणवादा हेयतया व्याख्याता इति भास्करः, तदप्ययुक्तं तत्स्वरूपप्रतिक्षेपस्य तर्कपादकृत्यत्वात्पूर्वमकृतत्वाच्च तेषां श्रुतिसिद्धत्वं प्रतिक्षेप्यमिति चेदुदाहृतवाक्यानामतत्परत्वं तद्विरूपणादेव सिद्धमिति न पृथग्वक्तव्यम्, अनुदाहृतवाक्यानामतत्परत्वं विवक्षितमिति चेत्तर्हि तेषां प्रधानकारणताप्रतिपादकत्वं च प्रतिक्षेप्यन्तदानीमयमर्थः अनुदाहृतवाक्येष्वपि प्रधानपरमाणुकारणवादादयो निरस्ता इति तदानीमेतेनेति पदस्य प्रधानकारणवादनिराकरणेनेति व्याख्यानमयुक्तं परब्रह्मपरत्वसमर्थनेनेति वक्तव्यं, तस्माद्भाष्योक्तयोजनैव सामञ्जस्यवती, । पादचतुष्टयविभागमेवं वर्णयन्ति केचिदाचार्याः—प्रथमे पादे परमकारणीभूतचिदचिद्विलक्षणपुरुषविशेषनिर्णयः, द्वितीये जगच्छरीरकत्वं, तृतीये सर्वात्मकत्वप्रकारः, चतुर्थे त्वतत्कार्याणच्छरीरात्तदात्मकवस्त्वसम्भवः प्रतिपाद्यत इति, तेषु द्वितीयाद्येन सर्वजगच्छरीरकत्वं सर्वं खल्विदं ब्रह्मेत्यत्र दर्शितं, तत्र च न सौभरिवत् ज्ञानाधिष्ठितशरीरकत्वं किं तु स्वरूपेण सर्वशरीरेषु गुहाप्रविष्टस्य तच्छरीरकत्वमित्युक्तं द्वितीये, न केवलमिन्द्रियाश्रयशरीराणामेव इन्द्रियाणामपि तच्छ-

इति श्रीभगवद्रामानुजाचार्य्यविरचिते शारीरकमीमांसाभाष्ये प्रथमस्याध्यायस्य चतुर्थपादः समाप्तश्चाध्यायः ॥

रीरकत्वमुक्तं तृतीये, चतुर्थे तु न केवलमिन्द्रियाणां किन्तु सर्वतत्त्वानामपि तच्छरीरकत्वं प्रत्येकमुक्तं, पञ्चमे तु समुदायरूपेण च शरीरत्वमुक्तं, रूपोपन्यासादिति तस्य मुमुक्षूपास्यत्वं प्रपञ्चितं षष्ठ इति द्वितीयपादार्थः । तृतीये तु स्थित्यदनाभ्यामिति सर्वहेयास्पृष्टत्वमुक्तम् आद्येन तावन्मात्रं निरतिशयानन्द उक्तः, द्वितीये "यो वै भूमा तत्सुखमि"ति न मुक्तस्यैवानन्दमात्रं किन्तु

प्रशासितृत्वमुक्तं तृतीये भयानकत्वमात्रव्यावृत्त्यर्थं मुक्तप्राप्यत्वं चतुर्थे, प्राप्यस्यैव निरतिशयभोग्यं गुणाष्टमुक्तं पञ्चमे, तस्य मातृवदविजुगुप्सनं पितृवत् शिक्षकतयाऽभयहेतुत्वमुक्तं षष्ठे, त्रितयं प्रासङ्गिकं सुषुप्त्यादिसर्वावस्थास्वप्रहाणमुक्तं चरमे, एवमात्मत्वप्रकारस्तृतीयपादार्थः, शरीरगतदोषास्पृष्टतया स्वासाधारणरूपान्यथाभावाभावेन च स्थितस्य सर्वावस्थासु शरीरधारकस्य ह्यात्मत्वं तमेवैकं जानथाऽऽत्मानमिति हि आद्याधिकरणविषयवाक्यं, चतुर्थपादे तु तदनधीनत्वं जगत आद्ये व्युदस्तम्, अतत्कार्य्यत्वं द्वितीये, अतदात्मकत्वं तृतीये, तमेवमन्य आत्मानमिति हि वाक्यम् असदव्याकृतादिना येन केनापि शब्देन प्रतिपन्नस्याऽपि वस्तुनोऽतदात्मकत्वं चतुर्थे, विशेषतश्चेतनस्यातदात्मकत्वं पञ्चमषष्ठयो,स्सेश्वरसाङ्ख्योक्तमतदात्मकत्वं व्युदस्तं सप्तमे, समर्थितार्थस्य सार्वत्रिकत्वमुक्तमष्टमे, एवं जगतः तदधीनत्वतत्कार्य्यत्वादिप्रतिपादनमुखेनातादधीन्यातत्कार्य्यत्वादिव्युदसनाद् ब्रह्मैककारणत्वं स्थिरीकृतं चतुर्थपादेनेति, अयं च विभागः सम्प्रदायसिद्धत्वादुपपन्नश्चानुसन्धेयः ॥ सर्वव्याख्यानाधिकरणं समाप्तम् ॥

इति श्रीहरितकुलतिलकवाग्विजयिसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीमद्वरदाचार्य्यपादसेवासमधिगतभगवद्रामानुजमुनिविरचितशारीरकमीमांसाभाष्यहृदयेन श्रीसुदर्शनसूरिणा विलिखितायां श्रुतप्रकाशिकायां प्रथमस्याध्यायस्य चतुर्थः पादः। अध्यायश्च समाप्तः, शुभम् ॥ श्रीमते मीमांसाद्वयगुरवे रामानुजाचार्याय नमः ॥

अस्मिन्नध्यायेऽधिकरणसंख्या ३५ । सकलसूत्रसंख्या च १३८ ॥

एतस्य शुभकर्मणोऽनुष्ठानेन भगवान्नारायणः प्रसीदतु सलक्ष्मीकः॥ भगवन्नारायणार्पणमस्तु, प्रसीदन्तु चाचार्यवर्याः, क्षमध्वं च सात्त्विकनरस्वभावसुलभस्खलितानि अनुगृह्णन्तु चैतस्याध्ययनाध्यापनप्रचारेणेति क्रियासमभिहारेणाशासे ॥ श्रीः श्रीः श्रीः ॥

Digitized by Google

मीमांसाद्वयगुरवे श्रीमते रामानुजाचार्याय नमः ।

अथ श्रीभाष्ये ।

द्वितीयाध्याये प्रथमः पाद आरभ्यते ।

स्मृत्यधिकरणम् ।

सू० स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ १ ॥

भा० प्रथमेऽध्याये प्रत्यक्षादिप्रमाणगोचरादचेतनात्तत्संसृष्टात्तद्वियुक्ताच्च चेतनादर्थान्तरभूतं निरस्तनिखिलाविद्याद्यपुरुषार्थगन्धमनन्तज्ञानानन्दैकतानमपरिमितोदारगुणसागरं निखिलजगदेककारणं सर्वान्तरात्मभूतं परं ब्रह्म वेदान्तवेद्यमित्युक्तम्, अनन्तरमस्यार्थस्य सम्भावनीयसमस्तप्रकारदुर्धर्षणत्वप्रतिपादनाय द्वितीयोऽध्याय आरभ्यते ।

टी० सू० स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् । १ । प्रथमद्वितीयाध्याययोः सङ्गतिज्ञापनार्थं प्रथमाध्यायपादचतुष्टयार्थस्य संग्रहेण ज्ञापनार्थं च प्रथमाध्यायार्थं संग्रहेणाह "प्रथमेऽध्याय इत्यादिना, प्रत्यक्षादिप्रमाणगोचरादित्यनेनेक्षत्यानन्दमयाधिकरणयोः पौर्वापर्यहेतुर्विवक्षितः, आदि-शब्दोऽनुमानपरः, प्रत्यक्षपृथिव्यादीनामनुरूपं कारणं ह्यनुमीयते, तस्मादचेतनस्य प्रथमं बुद्धिस्थतया तन्निरास इत्यर्थः, अर्थान्तरत्वमुपपादयति "निरस्ते"ति, मुक्तव्यावृत्त्यर्थं निरस्तनिखिलाविद्याद्यपुरुषार्थगन्धमित्युक्तं, धर्मिस्वरूपमाह "अनन्ते"ति, सागर-शब्देन समूहो विवक्षितः, अपरिमित उदारगुणसागरो यस्येति बहुव्रीहिः, निखिलजगदेककारणम् आकाशादेरपि कारणं निमित्तोपादानरूपोभयविधकारणं

चेत्यर्थः जगत्कारणत्वे पूर्वोक्तहेयप्रत्यनीकत्वानुपपत्तिमाशङ्क्याह "सर्वान्तरात्मभूतमिति, एवं प्रथमाध्यायार्थमुक्त्वा द्वितीयाध्यायार्थमाह "अनन्तरमि"ति, प्रसक्तविरोधो हि परिहार्य्यः, अतो विरोधप्रसङ्गमाह "सम्भावनीये"ति, समस्तप्रकार–शब्देन पादचतुष्टयेऽपि ये विरोधावतरणमुखभेदास्ते विवक्षिताः, प्रथमेऽध्याये ऽयोगान्ययोगव्यवच्छेदमुखेन वेदान्तवाक्यानां ब्रह्मैककारणतापरत्वं वाक्यतात्पर्यपर्यालोचनया समर्थितम् । अथ द्वितीयाध्याये बाह्यतर्कविरोधपरिहार उच्यत इत्यर्थः । पादार्थो द्वितीयपादसङ्गत्यर्थं वक्ष्यते, तस्मात् प्रथमाधिकरणसङ्गत्यमाह–

सू० प्रथमं तावत्कापिलस्मृतिविरोधाद्वेदान्तानामतत्परत्वमाशङ्क्य तन्निराक्रियते–कथं स्मृतिविरोधाच्छ्रुतेरन्यपरत्वम् उक्तं हि "विरोधे त्वनपेक्षं स्या"दिति, श्रुतिविरुद्धायाः स्मृतेरनादरणीयत्वं, सत्यम्, औदुम्बरीं स्पृष्ट्वोद्गायेत्यादिषु

टी० "प्रथमं तावदि"ति, प्रथमाध्यायनिरूपितं कारणत्वं विषयः कपिलमन्वादिस्मृतिविप्रतिपत्तेः संशयः, अत्रैवं विचारः किं ब्रह्मणो जगत्कारणत्वं चालयितुं शक्यते न वे? ति तदर्थं किं वेदान्तवाक्यानि ब्रह्मकारणत्वपराणि? उतान्यपराणी? ति, तदर्थं साङ्ख्यस्मृतिविरोधो वेदान्तवाक्यानामतत्परत्वमापादयति नेति, तदर्थं? साङ्ख्यस्मृत्या वेदान्तोपबृंहणं कार्यं? मुत मन्वादिस्मृत्ये? ति, तदर्थं किं साङ्ख्यस्मृतिर्भ्रान्तिमूला? उत ने? ति, यदा न भ्रान्तिमूला तदा तया वेदान्तानामुपबृंहणीयत्वेन तद्विरोधात्तेषामन्यपरत्वात् ब्रह्मकारणत्वं चालयितुं शक्यमिति, यदा भ्रान्तिमूला तदा तया तेषामनुपबृंहणीयत्वात्तद्विरोधे तेषामन्यपरत्वाभावात् ब्रह्मकारणत्वम् अविचाल्यमिति । अधिकरणारम्भमाक्षिपति "कथ"मिति, कथं–शब्दः क्षेपे, हेतुमाह "उक्तमि"ति, हिर्हेतौ, "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमि"ति सूत्रं प्रत्यक्षश्रुतिविरुद्धं स्मृतिवचनमनपेक्ष्यमनादरणीयं स्मृतेरपि श्रुतमूलत्वानुमा-

नादादरणीयत्वमित्यत्राह 'असति ह्यनुमानमि'ति असति-प्रत्यक्षश्रुतिविरोधे हि स्मृतिमूलश्रुत्यनुमानमित्यर्थः । तदेतदभिप्रेत्याह "उक्तं ही"ति, परिहरति "सत्यमि"ति, सत्यं, तत्र श्रुतिविरोधात्स्मृतेरनादरणीयत्वमुक्तमेव, तत्र तुविशेषोऽस्तीत्यर्थः, औदुम्बरीमित्यादि "औदुम्बरीं स्पृष्ट्वोद्गायेदि"ति श्रुतिः "औदुम्बरी सर्वा वेष्टयितव्ये"ति स्मृतिः, अत्रायं विवक्षितो भेदः औदुम्बरीमित्यादिषु प्रत्यक्षश्रुतेरर्थो न नानाशिरस्कः प्रतीयते अपि तु एकरूप एव प्रतीयते अतस्तत्र प्रत्यक्षश्रुतेरव्याकुलत्वेन स्मृतिन्यायनिरपेक्षं स्वत एवार्थो निश्चेतुं शक्यते, तत्र विरुद्धार्था स्मृतिरुपेक्ष्या वेदान्तवाक्येषु नानाशिरस्कतयाऽर्थः प्रतीयते, अतो व्याकुलत्वाद्वेदान्तवाक्यानामर्थः स्मृतिन्यायनिरपेक्षं स्वतो निश्चेतुं न शक्यते श्रुतेरयमर्थ इति निश्चिते सति हि तद्विरोधात् स्मृतेरनादरणीयत्वं स च स्वतो दुर्निश्चय इति तदर्थं स्मृत्यपेक्षा, प्रथमाध्यायोक्ततर्कैरर्थो निश्चित इति चेत् न वचनविरोधे न्यायस्य दुर्बलत्वात्, अतः स्मृत्यैवार्थे निश्चिते तद्विरुद्धतया तर्क आभासः स्यात्, अतः स्मृतिवचनविरुद्धन्यायेन श्रुत्यर्थो न निर्णेतव्यः स्मृतिवचनेनैव तु निर्णेतव्य इतीममर्थमभिप्रेत्याह—

सू० स्वत एवार्थनिश्चयसम्भवात्तद्विरुद्धा स्मृतिरनादरणीयैव, इह तु वेदान्तवेद्यस्य तत्त्वस्य दुरवबोधत्वेन परमर्षिप्रणीतस्मृतिविरोधे सत्ययमर्थ इति निश्चयायोगात्स्मृत्या श्रुतेरतत्परत्वोपपादनमविरुद्धम्, एतदुक्तं भवति—प्राचीनभागोदितनिखिलाभ्युदयसाधनभूताग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादिकर्माणि यथावदभ्युपगच्छता श्रुतिस्मृतीतिहासपुराणेषु "ऋषिं प्रसूतं कपिल"मित्यादिवाक्यैराप्तत्वेन सङ्कीर्तितेन परमर्षिणा कपिलेन परमनिःश्रेयसतत्साधनावबोधित्वेनोपनिबद्धस्मृत्युपबृंहणेन विनाऽल्पश्रुतैर्म्म-

न्दमतिभिर्वेदान्तार्थनिश्चयायोगाद्यथाश्रुतार्थग्रहणे चाप्तप्रणीतायास्साङ्ख्यस्मृतेस्सकलाया एवानवकाशत्वप्रसङ्गाच्च स्मृतिप्रसिद्ध एवार्थो वेदान्तवेद्य इति बलादभ्युपगमनीयमिति, न च वाच्यं मन्वादिस्मृतीनां ब्रह्मैककारणत्ववादिनीनामेवं सत्यनवकाशत्वदोषप्रसङ्ग इति धर्मप्रति[1]पादनद्वारेण प्राचीनभागोपबृंहण एव सावकाशत्वात्, अस्यास्तु कृत्स्नायास्तत्त्वप्रतिपादनपरत्वात्तथाऽनभ्युपगमे ऽनवकाशत्वमेव स्यात्, तदिदमाशङ्कते स्मृत्यनवकाशदोषप्रसङ्ग इति चेदिति, अत्रोत्तरं—नान्यस्मृत्यनवकाशदोषप्रसङ्गादिति, अन्या हि मन्वादिस्मृतयो ब्रह्मैककारणतां वदन्ति यथाऽऽह मनुः—

टी० स्वत एवार्थनिश्चयसम्भवाद्वेदान्तवेद्यतत्त्वस्य दुरवबोधत्वेनेति कपिलस्य परमर्षित्वे किं प्रमाणं तथा सत्यपि तादृशबृहस्पत्याद्युक्तलोकायतादिवदनादरणीयं श्रुतेः स्मृत्यपेक्षा च नास्ति न्यायेनैव निरपेक्षत्वादित्यत्राह "एतदुक्त"मिति, ज्योतिष्टोमादिकर्माणि यथावदभ्युपगच्छतेत्यन्तेन लोकायतव्यावृत्तिरुक्ता, "ऋषिं प्रसूतं कपिलमि"ति तस्याप्तत्वे प्रमाणमुक्तं परमनिश्श्रेयसेत्यादिना अनन्यपरत्वमुक्तं स्मृत्युपबृंहणेन—स्मृतिरूपोपबृंहणेन अल्पश्रुतैर्मन्दमतिभिरित्यनेन स्मृतिसापेक्षत्वमुक्तम्, अनन्तशाखानुगतस्य वाक्यार्थस्यैकदेशज्ञैर्दुरवबोधत्वादिति भावः । अन्यथाऽनिष्टमाह "यथा श्रुते"ति, सकलाया इति सूचितमर्थं शङ्कोत्तरमुखेन विवृणोति "न चे"ति, न हि मन्वादिस्मृतेः कर्मपरत्वात्साकल्येनानवकाशत्वं साङ्ख्यस्मृतेर्निरवकाशत्वं न सह्यमाप्ततमत्वेन श्रुतिगतत्वादनन्तशाखानुगतवाक्यार्थस्य दुर्बोधत्वेनापेक्षितत्वाच्चेति ग्रन्थाभिप्रायः । पूर्वपक्षस्या-

१ धर्मप्रतिपादनपरप्राचीनभागोपबृंहणे इति पा० ।

Digitized by Google

नुत्सूत्रत्वमाह "तदिद"मिति, परिहारखण्डमवतारयति "तत्रोत्तर"मिति काः पुनरन्याः स्मृतयः कथं तासामनवकाशत्वमित्यत्राह "अन्याही"ति, स्मृतिवचनं दर्शयति "यथाऽह मनु"रिति, प्रलयावस्थाज्ञापनार्थमाह–

सू० आसीदिदं तमोभूतमित्यारभ्य "ततस्स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् । महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥

टी० "आसीदिदं तमोभूतमित्यारभ्ये"ति, भाष्ये ततः स्वयं भूः सोऽभिध्यायेति श्लोकद्वयमुपात्तं तयोरर्थवैशद्यायासीदिदमित्यारभ्य सप्तश्लोकी व्याख्यायते त इमे श्लोकाः "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥ ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् । महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥ योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः । सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥ सोऽभिध्याय शरीरात्स्वात् सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु वीर्यमपासृजत् ॥ तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ॥ तस्मिन् जज्ञे स्वयंब्रह्मा सर्वलोकपितामहः ॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पुंसस्तेन नारायणः स्मृतः ॥ यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम् ॥ तद्विसृष्टः स पुरुषोलोके ब्रह्मेति कीर्त्यते । इति, धर्म्मान्नो वक्तुमर्हसीति मुनिभिः पृष्टो भगवान्मनुर्धर्मान्विवक्षन्भगवदाराधनरूपस्य वर्णाश्रमधर्मस्याराध्यज्ञानसापेक्षत्वात् प्रथममाराध्यस्वरूपमाह "आसीदिदमित्यादिभिः श्लोकैः, तत्र परमकारणभूतस्यैव सर्वतादात्म्यसंभवादग्नीन्द्रब्रह्मादिसर्वदेवतादात्म्योपपत्त्यर्थं यतो वा इमानीत्याद्यनुसारेण लक्षणं च विवक्षन् भगवतः परमकारणत्वं वक्तुं वेदान्तेषु सृष्टेः प्रलयपूर्वकत्वेन प्रतिपादितत्वात् प्रथमं प्रलयदशामाह "आसीदि"ति, अत्र सुबालोपनिषदर्थो भगवता मनुना अनुसन्धीयते अतस्सुबालो-

१ तायदस्यायनं पूर्वमिति पा० ।

पनिषदुक्तार्थप्रकारेणात्र प्रलय उच्यते तत्र हि पृथिव्यप्सु प्रलीयत इत्यादिना पृथिव्यादिक्रमेण तमःपर्यन्तप्रलय उक्तः, तमाह "इदं तमोभूतमासीदि"ति, तत्र पृथिव्यादीनां स्वकारणेषु लयो वैयधिकरण्येन प्रतिपादितः, "तदेतदक्षयं नित्यं जगन्मुनिवराखिलम्। आविर्भावतिरोभावजन्मनाशविकल्पवदि"ति प्रक्रियया सत्कार्यवादकाष्ठामभिप्रेत्य सामानाधिकरण्येनेदं तमोभूतमित्युक्तं, तमोभूतं—तमोभाववत्तमोऽवस्थमासीदित्यर्थः तमसि लीयत इति निर्देशस्यायमर्थ इत्यभिप्रायः यथाऽऽह भगवान् बादरायणपिता पराशरः "अन्यवस्थे च सलिले वाय्ववस्थे च तेजसी"ति तमोऽवस्थस्य कारणस्य योग्यानुपलब्धिनिरस्तत्वशङ्काव्यावृत्त्यर्थमाह "अप्रज्ञातमि"ति, प्रकृष्टं ज्ञानमपरोक्षज्ञानं तेन विषयीकर्त्तुमशक्यमित्यर्थः अयोग्यत्वादनुपलब्धिस्तस्मान्न योग्यानुपलब्धिरित्यभिप्रायः । अयोग्यत्वमुपपादयति "अलक्षणमि"ति, शब्दस्पर्शविहीनं तद्रूपादिभिरसंहितमित्युक्तप्रकारेण रूपादिलक्षणरहितत्वात् प्रत्यक्षयितुमयोग्यमित्यर्थः । कार्येषु रूपादिमत्त्वदर्शनात्कारणेनापि रूपादिविशेषगुणवता भाव्यमतो न यथोक्तकारणमुपपद्यत इत्यत्राह "अप्रतर्क्यमि"ति, प्रतर्को—बाह्यतर्कः तदगोचरभूतं ते तर्काः कालात्ययापदिष्टा इति भावः । यद्वा अप्रज्ञातमिति प्रत्यक्षागोचरत्वस्योक्तत्वादप्रतर्क्यमित्यनुमानागोचरत्वमुक्तं स्यात्, तम एकी भवतीति वाक्योक्तमविभागावस्थत्वं तमसो दर्शयति "अविज्ञेयमि"ति, विज्ञानं विभागेन ज्ञानं परस्माद् ब्रह्मणः पृथग्व्यपदेशानर्हावस्थां क्षीरे नीरमिव प्राप्तमित्यर्थः । स्वरूपैक्याशङ्कापरिहारार्थमाह "प्रसुप्तमिव सर्वत" इति, यथा सुषुप्तौ जीवस्य परमात्मनः पृथग्व्यवहारानर्हावस्थापत्तिरेव न तु स्वरूपैक्यम्, एवं चिदचिदात्मकस्य जगतो ब्रह्मणि पृथग्व्यवहारानर्हसंसर्ग एव न स्वरूपैक्यमित्यर्थः, सुषुप्तौ सर्वथा साम्यव्यावृत्त्यर्थं सर्वत इति पदम्। यद्वा पूर्वमचिदंशप्रलयप्रकार उक्तः, प्रसुप्तमिव सर्वत इति तु चिदंशप्रलयप्रकार उक्तः, तत इति ततः सर्गकाले प्राप्त इत्यर्थः, संप्राप्ते सर्गकाले व्ययाव्ययावितिवद्भगवतः कारणान्तरसद्भावकृतोत्पत्तिप्रलयव्यावृत्त्यर्थमाह "स्वयम्भूरि"ति, परमकारणविषयो

Digitized by Google

हि स्वयम्भू-शब्दोऽवयवार्थपौष्कल्यान्नारायणपरो दृष्टः, यथा सभापर्वणि "अव्यक्तोऽव्यक्तलिङ्गस्थो य एष भगवान् प्रभुः। पुरा नारायणो देवः स्वयम्भूः प्रपितामह" इत्यारभ्य "ततः सभगवाँस्तोये ब्रह्माणमसृजत्स्वयमिति मोक्षधर्मे च नारायणो जगन्मूर्तिरित्यारभ्य "ततस्तेजोमयं दिव्यं पद्मं सृष्टं स्वयम्भुवा । तस्मात्पद्मात् समभवत् ब्रह्मा वेदमयोनिधि"रिति, आश्वमेधिके च "विष्णुरेवादिसर्गेषु स्वयम्भूर्भवति प्रभुरिति च, अतोऽयं स्वयम्भूशब्दो-नारायणविषयः, चतुर्मुखस्रष्टरि प्रयुक्तत्वात्, प्रबन्धान्तरवचनैतत्प्रकरणानुगुण्यात्, भगवच्छब्दसामानाधिकरण्याच्च देवताविशेषनिर्णयार्थं कारणत्वोपयोगिगुणपौष्कल्यज्ञापनार्थं चाह "भगवानि"ति, "तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः। शब्दोऽयं नोपचारेण अन्यत्र ह्युपचारत" इति वचनादिदं व्यञ्जयत् व्यष्टिरूपकार्यजातं व्यञ्जयितुं "लक्षणहेत्वोः क्रियाया" इति शतृप्रत्ययः, महाभूतादिवृत्तौजाः व्यष्टिकारणानि पृथिव्यादीनि महाभूतानि, आदि-शब्देन तत्कारणभूतमहदहङ्कारौ, गृह्येते, तेषु प्रवृत्तसङ्कल्पज्ञानरूपतेजाः तदर्थमव्यक्तः प्रादुरासीत् अर्श आद्यजन्तत्वात् पुँल्लिङ्गता, अक्षरावस्थाऽप्यर्थसिद्धा महानव्यक्ते लीयते अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते" इति हि क्रमः, पूर्वमविभक्ततमःशरीरको भगवान् व्यष्टिसृष्टिहेतुभूततन्मात्राहङ्कारसृष्ट्यर्थं स्वसङ्कल्पाद्विभक्ततमःशरीरकोऽक्षरावस्थाप्राप्तिपूर्वकमव्यक्तावस्थप्रकृतिशरीरकोऽभूदित्यर्थः । अव्यक्तशब्दमपि विवृण्वन् समष्टिव्यष्टिसृष्टिमनन्तर्वर्तिनीं संक्षेपेणाह "योऽसावि"ति, अतीन्द्रियग्राह्य इन्द्रियमतीत्य वर्तमानेन शास्त्रेणैव ग्राह्यः। यद्वा इन्द्रियग्राह्यादतीत्य वर्तमानः इन्द्रियग्राह्यादतीत्य वर्तमानत्वं तुच्छस्याप्यस्तीति तद्व्यावृत्त्यर्थमाह "सूक्ष्म" इति, अत एवाव्यक्तो न तुच्छतयेत्यर्थः सनातनः-स्वयमव्यक्तशरीरकत्वेऽपि स्वयमप्रच्युतस्वभाव इत्यर्थः, स एव इति कार्यकारणयोरेकद्रव्यत्वं सूचितं, स्वयमेव कार्यं कारणं चेन्निमित्तान्तरापेक्षा स्यादित्यत्राह "स्वयम्भि"ति, मृत्कुलालादौ निमित्तोपादानयोर्भेददर्शनादेकस्यैव निमित्तोपादानत्वं अनुपपन्न इत्यत्राह "अचिन्त्य" इति, बाह्यतर्काः श्रुतिनिरस्ता

Digitized by Google

इति भावः । सर्वभूतमय उद्भवो सर्वसर्वे समष्टिव्यष्टिरूप उद्भवो कार्यका-रणयोरेकद्रव्यत्वे कार्यकारणवैषम्यं किमित्यत्राह "उद्भवावि"ति, सूक्ष्म-रूप उद्भवाविति पदाभ्यां सूक्ष्मत्वस्थूलत्वे गत्र कार्यकारणदशावैषम्यं न तु द्रव्यभेद इत्युक्तं भवति, एवं संक्षेपेण समष्टिव्यष्टिसृष्टिमुक्त्वा समष्टिसृष्टिं पृथगाह—

मू॰ सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु वीर्यमपासृज"दिति, भगवद्गीतासु च, "अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते," इति च, तथा च महाभारते "कुतः सृष्टमिदं सर्वं जगत्स्थावरजङ्गमम् । प्रलये च कम-भ्येति तन्मे ब्रूहि पितामहे"ति पृष्ट आह "नारायणो जगन्मूर्तिरनन्तात्मा सनातन" इति, तथा तस्माद्व्यक्तमु-त्पन्नं त्रिगुणं द्विजसत्तम ? इति अव्यक्तं पुरुषे ब्रह्मन्नि-ष्क्रिये सम्प्रलीयत" इति च ।

"सोऽभिध्याये"ति, अभिध्यानं—सङ्कल्पः स्वरूपेणैव समष्टिव्य-ष्टिरूपेण परिणतश्चेद्भगवच्छब्दोक्तनिर्दोषत्वादिविरोध इत्यत्राह "श-रीरात्स्वादि" ति, शरीर—शब्देन तमोऽव्यक्तावस्थं चित्संसृष्टमचिद्व-स्तूच्यते सिसृक्षुर्विविधाः प्रजाः व्यष्टिसिसृक्षयेत्यर्थः, अप एव ससर्जादौ अप्छब्दोऽण्डकारणसमस्ततत्त्वप्रदर्शनार्थः, पृथिवीमयस्याण्डस्यानन्तरका-रणं ह्यापः, अतोऽप्शब्दनिर्देशः, अप इति व्याख्येयश्रुतिगताप्शब्दः स्मारि-तः, "ता इमा आपः तद्विरण्मयमण्डमभव" दिति हि श्रुतिः अप्शब्दार्थश्च पूर्वमेव महाभूतादिवृत्तौजा इत्यादिना व्याख्यातः, एवकारेण त्रिवृत्करणं व्यावर्त्यम्, अत्रिवृत्कृता आप इत्यर्थः । तासु वीर्यमपासृजत् वीर्यं त्रिवृत्-करणजनितामण्डोत्पादनशक्तिं तास्वजनयदित्यर्थः, अत्र "नानावीर्याः पृथग्भूता नाशक्नुवाचित्याद्यनुसन्धेयम् एवं समष्टिसृष्टिमुक्त्वा व्यष्टिसृष्टि-

Digitized by Google

माह "तदण्डमि"ति, तदण्डकारणतत्त्वजातम्, इतरहेयव्यावृत्त्यर्थमाह "सहस्रांशुसमप्रभ"मिति, तत्र चतुर्मुखसृष्टिमाह "तस्मि"न्निति, सर्वलोकपितामह इत्यनेन देवमनुष्यादीनां दक्षादयः स्रष्टारः तेषां स्रष्टा चतुर्मुख इति भगवतोऽण्डान्तर्गतवस्तुसर्गः सद्द्वारक इत्युक्तं भवति, स्वयं भगवान्नारायणः परमकारणभूतः स्वयमेव चतुर्मुखशरीरकोऽभवदित्यर्थः । "विष्णुर्ब्रह्मस्वरूपेण स्वयमेव व्यवस्थित" इति वचनात्सुबालोपनिषदि "अज एको नित्य इति निर्विकारत्वं जगत्कारणत्वं जगदन्तरात्मत्वं चोक्त्वा नारायण—शब्दोऽसकृदावर्तितः, अतो जगत्कारणत्वादिकं त्रितयमपि नारायण-शब्दस्यावयवार्थ इति श्रुतेरभिप्राय इति मत्वा जगत्कारणत्वादिप्रवृत्तिनिमित्तकं नारायण-शब्दं परमकारणस्य वाचकत्त्वेनाह "आपो नारा" इति, चित्संसृष्टान्यण्डकारणतत्त्वान्यापः। तासां नारत्वमुपपादयति "आपो वै नरसूनव" इति, रीङ् क्षय इत्यस्माद्धातोर्डप्रत्यये टिलोपे च कृते र इति भवति, नरः-अक्षयः निर्विकार इत्यर्थः। "जन्हुर्नारायणो नर"इति वचनान्तर इति भगवन्नाम, तस्माज्जात इत्यण्प्रत्यये कृते नारा इति भवति नराख्या आपो ऽयनमस्येति नारायणः, एवं नर-शब्देन निर्विकारत्वं, नार-शब्देन जगत्कारणत्वमयन-शब्देन जगदन्तरात्मत्वं चेत्यर्थत्रयमुक्तं भवति, तस्मिन् तत्र स्वयं ब्रह्मेति भगवत एव प्रस्तुतत्वात् स एवात्रास्येति सर्वनामशब्देन परामृश्यत इति न व्यवहितपरामर्शत्वदोषः। यत्तु व्याख्यातृन्तरैः सर्वनामशब्दः प्रधानपरामर्शी शाब्दप्राधान्यं च प्रथमानिर्दिष्टस्य, स च चतुर्मुख इति स एव नारायणसंज्ञ इत्याशङ्क्य बहुश्रुतिवचनविरोधादुपरि चतुर्मुखस्य भगवद्विसृष्टतावचनाच्च भगवत एव नारायणसंज्ञेति परिहृतं, तच्चाविरुद्धम्, । अथ चतुर्मुखस्य नारायणसंज्ञत्वव्यावृत्त्यर्थमितरदेवानां द्रुहिणसृष्टानां परत्वशङ्कादूरोत्सारणार्थं-चतुर्मुखस्य भगवद्विसृष्टतामाह-

सू० आह च भगवान्पराशरः "विष्णोस्सकाशादुद्भूतं जगत्तत्रैव च स्थितम्। स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः" इति,

Digitized by Google

टी० “यत्तदि”ति, यत्तदित्यनुवादरूपत्वात् स भगवानत्रानूद्यते, अव्यक्तस्य चिदचित्समुदायरूपत्वादव्यक्तशरीरकं ब्रह्म सदसच्छरीरकं भवति, तद्विसृष्टः—तेन विशेषेण जीवबुद्ध्यव्यवधानेन भगवतैव सृष्टः स ब्रह्मेति कीर्त्यत इत्यर्थः । अस्मिन्प्रबन्धेऽवसानेऽपि प्रशासितारमित्यादिना भगवान्कीर्तितः, मध्ये च ब्रह्मविद इत्यादिना भगवज्ज्ञानविदः कीर्तिताः । एवं भगवता मनुना पुरुषसूक्तनारायणानुवाकप्रतिपाद्यस्य परब्रह्मशब्दवाच्यस्य भगवतः समाराधनरूपाणि कर्माणि विवृण्वता भगवत्स्वरूपमुपदिष्टम्, एवं स्मृत्यन्तरेषु च द्रष्टव्यं कार्त्स्न्येन तत्त्वपराणामपि स्मृतीनामनवकाशत्वं स्यादित्यभिप्रायेणाह “भगवद्गीतासु चे”ति,

सू० आह चापस्तम्बः “पूः प्राणिनः सर्वे गुहाशयस्य न ह[1]न्यमानस्य विकल्मषस्य” इत्यारभ्य “तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकस्स नित्य” इति, यदि कपिलस्मृत्या वेदान्तवाक्यार्थव्यवस्था स्यात् तदैतासां सर्वासां स्मृतीनामनवकाशत्वरूपो महान् दोषस्स्यात्, अयमर्थः—यद्यपि वेदान्तवाक्यानामतिक्रान्तप्रत्यक्षादिसकलेतरप्रमाणसम्भावनाभूमिभूतार्थप्रतिपादनपरत्वात्तदर्थवैशद्याय अल्पश्रुतानां प्रतिपत्तॄणां तदुपबृंहणमपेक्षितं तथाऽपि तदर्थानुसारिणीनामाप्ततमप्रणीतानां बह्वीनां स्मृतीनां तदुपबृंहणाय प्रवृत्तानामनवकाशता मा प्रसाङ्क्षीदिति श्रुतिविरुद्धार्था कपिलस्मृतिरुपेक्षणीया

टी० आपस्तम्बोक्तिमाह “आहे”ति’ अध्यात्मखण्डयोः प्रथमे खण्डे पूः प्राणिन इति वाक्यं, द्वितीये खण्डे तस्मात्काया इति वाक्यं, तस्मादित्युक्ते कस्मादित्यपेक्षापूरणार्थं काय-शब्दस्य भगवच्छरीरपरत्व-

१ अहन्यमानस्येति पा० ।

Digitized by Google

दर्शनार्थं च पूः प्राणिन इति वाक्यमुपात्तं, पूः–पुरं शरीरमित्यर्थः, यथा भट्टहलायुधः "अङ्गं वपुर्वर्ष्म पुरं प्रतीक"मिति न तावदुपबृंहणैरपेक्ष्यात् कपिलस्मृतेरुपेक्ष्यत्वं सुवचं मन्वादिस्मृतेः सावकाशत्वं चोक्तं कपिलस्याप्तत्वे प्रमाणं चोक्तं, कपिलस्मृतिं विहाय स्मृत्यन्तरेणोपबृंहणे च को हेतुरिति शङ्कायामाह "अयमर्थ" इति, संभावनाभूमिभूतेति, भूत–शब्दः सिद्धपरः, सिद्धार्थप्रतिपादनपरत्वात्, अयमर्थः कार्यपरत्वे तुल्यविकल्पत्वेनाधिकारिभेदेन वाऽर्थविरोधः सुपरिहरः सिद्धवस्तुपरत्वेऽन्यतरस्मृत्यनुगुणं वेदार्थो नेयः न तूभयानुगुणमिति तथाऽपीत्यादिना कल्पितस्मृतिं विहाय मन्वादिस्मृतिभिरेवोपबृंहणीयत्वे वैषम्यमाह आप्ततम–शब्दस्यायं भावः, यथाऽवस्थितवस्तुदर्शित्वं यथादृष्टार्थवादित्वं चेति द्विविधाऽऽप्तिः, तत्र "ऋषिं प्रसूतं कपिलमिति कपिलस्य महर्षित्वमुच्यमानं मन्त्रद्रष्टृत्वातीन्द्रियानेकार्थद्रष्टृत्वादिनाऽप्युपपद्यते न तु सार्वत्रिकं यथावस्थितार्थदर्शित्वमपेक्षते । मन्वादीनान्तु "यद्वै किञ्च मनुरवदत्" "स होवाच व्यासः पाराशर्य" इत्यादिभिस्सार्वत्रिकयथावस्थितदर्शनपूर्वकयथादृष्टार्थवादित्वमुक्तं, तस्मादाप्ततमा मन्वादयः, कपिलस्य त्वाप्तिमात्रमिति श्रुतिविरुद्धार्था–न्यायानुगृहीतश्रुतिविरुद्धार्थेति भावः । अत्रायमर्थः परेण न हि वचनविरोधे न्यायः प्रवर्त्तते इति न्यायानुगृहीतश्रुतेरपि स्मृत्यनुगृहीतश्रुतिः प्रबलेत्युक्तं, तत्रोत्तरं न्यायविरुद्धस्मृत्यनुगृहीतश्रुतेरपि न्यायाविरुद्धस्मृत्यनुगृहीतश्रुतिः प्रबला ऋषिमात्रप्रणीतस्मृत्यनुगृहीतश्रुतेरप्याप्ततमप्रोक्तस्मृत्यनुगृहीतश्रुतिः प्रबला एकस्मृत्यनुगृहीतश्रुतेरपि बहुस्मृत्यनुगृहीतश्रुतिःप्रबलेति आप्ततमप्रणीतन्यायानुगृहीतानेकस्मृत्यनुगृहीतश्रुतिराप्तमात्रोक्तन्यायविरुद्धैकस्मृत्यनुगृहीतश्रुतेरपि प्रबलेति संग्रहोक्तिः । दूषणान्तरमाह–

सू॰ उपबृंहणं च श्रुतिप्रतिपन्नार्थविशदीकरणं, तच्च विरुद्धार्थया स्मृत्या न शक्यते कर्तुं, न चैतासां स्मृतीनां प्राचीनभागोदितधर्म्मांशविशदीकरणे न सावकाशत्वं परब्रह्मभूतपरमपुरुषाराधनत्वेन धर्मान्विदधतीनामेतासामाराध्यभूतप-

रमपुरुषप्रतिपादनाभावे सति तदाराधनभूतधर्म्मप्रतिपादनाऽसम्भवात्

टी० "उपबृंहणं" चेति, विरुद्धार्थया—न्यायानुगुणस्मृत्यनुगृहीतश्रुतिविरुद्धार्थया उपबृंहणानुपपत्तिर्दूषणमित्यर्थः । सावकाशत्वं प्रतिवदति "न चेतासामि"ति, अस्थिराणां कालान्तरभाविफलप्रदत्वं सद्वारकमेव तत्र कृष्यादेरङ्कुरादिद्वारकत्ववत्किमचेतनद्वारकत्व? मुत राजसेवादेरिव चेतनद्वारकत्व? मित्यपेक्षायां चेतनद्वारकत्वं श्रुतिरेवाहेति श्रुतहानाश्रुतकल्पनानुपपत्त्या परब्रह्मणि तासां तात्पर्यमस्तीत्यर्थः ॥

भा० तथा हि परमपुरुषाराधनरूपता सर्वेषां कर्म्मणां स्मर्य्यते "यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ ध्यायेन्नारायणं देवं स्नानादिषु च कर्म्मसु । ब्रह्मलोकमवाप्नोति न चेहावर्तते पुनः ॥ यैस्स्वकर्मपरैर्नाथ ! नरैराराधितो भवान् । ते तरन्त्यखिलामेतां मायामात्मविमुक्तये" इति,

टी० कर्मणां भगवदाराधनरूपत्वे प्रमाणमाह "तथा ही"ति, यतः प्रवृत्तिरिति भगवद्गीता "ध्यायेन्नारायणं देव"मिति दक्षस्मृतिः, यैः स्वकर्मेति वैष्णवे पुराणे, अत्रायमभिप्रायः पूर्वभागोपबृंहणपराणामपि स्मृतीनां कर्माराध्ये भगवति तात्पर्यमस्त्येव, उपनिषद्भागोपबृंहणपराणामत एवान्यत्र निरवकाशानामितिहासपुराणानामतीव तात्पर्यमस्ति, इतिहासपुराणयोः कर्मकीर्तनं भगवदुपासनाङ्गत्वेन, धर्मशास्त्रेषु ब्रह्मकीर्तनं कर्माराध्यत्वेनेति अनभिसंहितफलकर्मणां हि भगवदाराधनरूपता फलप्रदानां तु कर्मणां तदाराधनरूपत्वाभावात् न तत्प्रतिपादकशास्त्रस्य ब्रह्मणि तात्पर्यमित्याशङ्क्य परिहरति—

सू० न चैहिकामुष्मिकसांसारिकफलसाधनकर्म्मप्रतिपादनेनै-
तासां सावकाशत्वं, यतस्तेषामपि कर्म्मणां परमपुरुषा-
राधनत्वमेव स्वरूपं, यथोक्तं "येऽप्यन्यदेवताभक्ता य-
जन्ते श्रद्धयाऽन्विताः । तेऽपि मामेव कौन्तेय यजन्त्यवि-
धिपूर्वकम् ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु
मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ इति, तथा "यज्ञै-
स्त्वमिज्यसे नित्यं सर्वदेवमयाच्युत ! हव्यकव्यभुगेकस्त्वं
पितृदेवस्वरूपधृगि"ति च, यदुक्तमृषिं प्रसूतं कपिलमिति
कपिलस्याप्ततया सङ्कीर्तनात्तत्स्मृत्यनुसारेण वेदान्तार्थ-
व्यवस्थापनं न्याय्यमिति तदसत्, बृहस्पतेः श्रुतिस्मृतिषु सर्वे-
षामतिशयितज्ञानानां निदर्शनत्वेन सङ्कीर्तनात्तत्प्रणी-
तेन लोकायतेन श्रुत्यर्थव्यवस्थापनप्रसक्तेरिति ॥

टी० "न चैहिकेत्यादिना यदुक्तमित्यादि । ननु न लोकायतेन श्रुत्यर्थव्यवस्थापनप्रसङ्गः, न हि लोकायते ऽग्निहोत्राद्यभ्युपेतं कपिलस्य तु तदभ्युपगतो तद्वाक्येन श्रुत्यर्थव्यवस्थापनं युक्तमिति चेन्न बृहस्पतिप्रणीतस्यापि लोकायतस्य परित्यागो यद्धेतुकः स श्रुत्यर्थविरोधोऽत्रापि विद्यते चेत्तद्वदेव कपिलस्मृतिरपि विरुद्धांशे त्याज्या, तथा चौदुम्बरी सर्वा वेष्टयितव्येत्यत्र च निर्णीतं तद्वदिति परिहारः । उत्तरसूत्रशङ्कामाह

सू० अथ स्यात्कपिलस्य स्वयोगमहिम्ना वस्तुयाथात्म्योपलब्धे-
स्तत्स्मृत्यनुसारेण वेदान्तार्थो व्यवस्थापयितव्य इति, अत
उत्तरं पठति—

सू० इतरेषां चानुपलब्धेः ॥ २ ॥

च—शब्दस्तु—शब्दार्थस्योदिताशङ्कानिरासार्थः, इतरेषां म-

न्वादीनां बहूनां स्वयोगमहिमसाक्षात्कृतपर[1]परतत्त्वयाथात्म्यानां निखिलजगद्भेषजभूतस्ववाक्यार्[2]थतया "यद्वै किञ्चन मनुरवदत्तद् भेषज"मित्यादिश्रुतिप्रसिद्धानां कपिलदृष्टप्रकारेण तत्त्वानुपलब्धेः श्रुतिविरुद्धा कपिलोपलब्धिर्भ्रान्तिमूलेति न तया यथोक्तो वेदान्तार्थश्चालयितुं शक्यत इति सिद्धम् ॥ स्मृत्यधिकरणं समाप्तम् ॥

टी० ॥ "अथ स्यादि" ति मन्वादीनां धर्मप्रवर्तनादिष्वन्यपरत्वाच्च योगावसरः, कपिलस्तु योगसाक्षात्कृतार्थतत्त्व इति तत्स्मृतिरादरणीयेत्यर्थः । सू० इतरेषां चानुपलब्धेः, व्याचष्टे "च-शब्द" इति. यदि कपिलस्य स्वस्मृतिप्रकारेणोपलब्धिरस्ति सा बहूनां स्मर्तॄणां तत्त्वोपलब्धिविरोधात् भ्रान्तिरित्यर्थः । न च तेषां धर्मानुष्ठानपरत्वाद्योगानवसरः अनभिसंहितफलधर्मानुष्ठानस्य योगाङ्गतयाऽत्यन्तानुकूलत्वात्तद्रहितस्य योगो न समीचीनः सरजस्तमस्कत्वात् ॥ स्मृत्यधिकरणं समाप्तम् ।

योगप्रत्युक्त्यधिकरणम् । **सू० एतेन योगः प्रत्युक्तः ॥ ३ ॥**

भा० एतेन कापिलस्मृतिनिराकरणेन योगस्मृतिरपि प्रत्युक्ता । का पुनरत्राधिका शङ्का यन्निराकरणाय न्यायातिदेशः? योगस्मृतावपीश्वराभ्युपगमान्मोक्षसाधनतया वेदान्तविहितयोगस्य चाभिधानात् वक्तुर्हिरण्यगर्भस्य सर्ववेदान्तप्रवर्तनाधिकृतत्वाच्च तत्स्मृत्या वेदान्तोपबृंहणं न्याय्यमिति ॥

टी० सू० एतेन योगः प्रत्युक्तः, अत्र विषयसंशयहेतू पूर्ववत्, ब्रह्मकारणत्वं विचाल्य? मुत नेति विचारः, तदर्थमीश्वराधिष्ठितं प्रधानं कारणं? मुत ब्रह्मे? ति किं योगस्मृतिविरोधेन वेदान्तानामन्यपरत्वमापाद्य? मुत ने? ति

१ परावरतत्त्वयाथात्म्यानामिति पा० ।
२ भेषजभूतस्ववाक्यतयेति पा० ।

Digitized by Google

किं तया वेदान्तोपबृंहणं कार्यं? मुत ने? ति किं सा भ्रान्तिमूला? उत ने? ति किं हिरण्यगर्भस्य भ्रमः सम्भवति ने? ति यदा न सम्भवति तदा तदुपबृंहणीयतया वेदान्तानां तद्विरोधेऽन्यपरत्वादीश्वराधिष्ठितं प्रधानं कारणमिति ब्रह्मकारणत्वं विचाल्यमिति। यदा भ्रमस्सम्भवति तयोपबृंहणीयत्वाभावाद्वेदान्तवाक्यानां तद्विरोधेऽन्यपरत्वाभावादीश्वराधिष्ठितप्रधानस्य जगत्कारणत्वाभावात् ब्रह्मकारणत्वमविचाल्यमिति। सूत्रस्योत्तरार्थमाह "एतेने"ति, वैदिकतत्त्वाभ्युपगममनुष्ठानाभ्युपगमं चाह "ईश्वरतत्त्वाभ्युपगमाद्योगस्य चाभिधाना"दिति, परिहारे तत्त्ववैषम्यमाह—

सू० परिहारस्त्वब्रह्मात्मकप्रधानकारणवादान्निमित्तकारणमात्रेश्वराभ्युपगमाद् ध्यानात्मकस्य योगस्य ध्येयैकनिरूपणीयस्य ध्येयभूतयोरात्मेश्वरयोर्ब्रह्मात्मकत्वजगदुपादानत्वादिसर्वकल्याणगुणात्मकत्वविरहादवैदिकत्वाद्धिरण्यगर्भस्यापि क्षेत्रज्ञभूतस्य कदाचिद्रजस्तमोऽभिभवसम्भवाच्च योगस्मृतिरपि तत्प्रणीतरजस्तमोमूलपुराणवद्भ्रान्तिमूलेति न तया वेदान्तोपबृंहणं न्याय्यमिति॥ योगप्रत्युक्त्यधिकरणं समाप्तम्॥

टी०॥ "अब्रह्मात्मके"ति, अनुष्ठानवैषम्यं चाह "ध्यानात्मकस्ये"ति, न हि ध्यानस्य ध्यानत्वान्मोक्षोपायत्वं गर्दभध्यानादिषु व्यभिचारात्, तस्माद् ध्येयविशेषविषयमेव ध्यानं मोक्षसाधनमिति ध्येयवैषम्यात्तदेकनिरूपणीयध्यानवैषम्यादित्यर्थः, आत्मेश्वरयोरिति ब्रह्मात्मकत्वं जीवस्य जगदुपादानत्वादिकल्याणगुणयोग ईश्वरस्य क्षेत्रज्ञभूतस्येति यो ब्रह्माणं विदधातीति सृज्यत्वश्रुतिरवतारश्रुत्यनपोदिता ब्रह्मणः क्षेत्रज्ञत्वे प्रमाणं यथेन्द्रवरुणादीनां कर्मकृतनामरूपाभ्यां योजनीयत्वं हि चेतनस्य सृज्यत्वमिति भावः। कदाचिद्रजस्तमोऽभिभवसम्भवादिति कल्पविशेषेषु गुणविशेषोन्मेषविषयपुराणवचनार्थोऽभिप्रेतः। ननु शौनकेनैव ब्रह्म-

Digitized by Google

णो भगवदंशत्वं भगवद्वचनेनैव प्रदर्श्यते "त्वमप्यत्र महाभाग! मदंशः कमलोदरान्नाभिसम्भवाज्जातः प्रजासृष्टिकरः पर' इति, तस्मादाब्रह्मस्तम्बपर्यन्ता इति नाभिविधिर्विवक्षितः किन्तु मर्यादेति, नैवं स्तम्बस्याप्यकर्मवश्यत्वप्रसङ्गात् । स्थावरदेहस्य कर्मनिबन्धनत्वं च स्मर्यते "पुमान्न देवो न नरो न पशुर्न च पादपः । शरीराकृतिभेदास्तु भूपैते कर्मयोनय" इति, भगवदंशत्वव्यपदेशस्तत्तदनुप्रवेशनिबन्धन इति, तत्रैवोक्तं "यदि तेऽनुग्रहकृता मयि बुद्धिर्जनार्दन? । तन्मां भक्त इति ज्ञात्वा कथयाऽऽत्मानमच्युते''ति, ब्रह्मणा: प्रागविदितभगवत्स्वरूपजिज्ञासया प्रार्थनमुक्तम्, अनुग्रहकृता—अनुग्रहरूपेण कृताऽनुग्रहाय कृता वा । कथयामि तवात्मानमनाख्यागोचरं परम् । म वाचां विषयोयोऽसावविशेषस्वलक्षणः प्रसादसुमुखः सोऽहमिमं यच्छामि ते वरम् ॥ अनाख्यातस्वरूपं मां भवान् ज्ञास्यति योगतः । भक्तो मां तत्त्वतो वेत्ति मयि भक्तिश्च ते परा । जिज्ञासा परमा ब्रह्मँस्तेन जाता मतिस्तव । एवमुक्तस्ततो ब्रह्मा विष्णुना प्रभविष्णुना । विष्णुस्वरूपजिज्ञासुर्युयोजात्मानमात्मना । स ददर्शातिसूक्ष्माणां सूक्ष्मं ज्योतिरजं प्रभुम् । निमेषार्धार्धमात्रेण व्याप्ताशेषचराचरम् । आत्मानमिन्द्ररुद्रार्कचन्द्राश्विवसुमरुतान् । खादीनपि च शब्दादीन् ददृशे स च तन्मया''निति भक्तिप्रीतिभगवत् प्रसादलब्धयोगेन ब्रह्मणा युगपद्विश्वव्यापिभगवत्स्वरूपसाक्षात्कारस्तत्र भगवत्स्वरूपे च इन्द्रवस्वादिजीववदाकाशाद्यचेतनवच्च स्वात्मनो रुद्रस्य च दर्शनं चोक्तं तत्रावतारप्रश्नानन्तरं भगवता परित्राणाय साधूनामित्यारभ्य "पूर्वोत्पन्नेषु भूतेषु नृदेवादिषु चाप्यहम् । अनुप्रविश्य धर्मस्य करोमि परिपालनम् ॥ प्रविश्य च तथा पूर्वां तनुं धर्मभृतांवर! जगतोऽस्य जगत्यस्मिन् करोमि परिपालन''मित्यवतारद्वैविध्यमुक्त्वा ॥ यद्वै धर्मोपकाराय यच्च दुष्टनिबर्हणम् । चरितं मानुषादीनां यद्वै जानीष्व मत्कृतमित्यनेनानुप्रवेशावतारेषु स्वानुप्रविष्टजीवगतप्रकृष्टचेष्टितानामेव स्वचेष्टितत्वं न निकृष्टचेष्टितानामिति प्रतिपाद्य "उत्पाद्य पृथिवीं सम्यक् स्थापयित्वा यथापुरा । सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते''मिति चतुर्मुखस्य भगवदंशत्वमनुप्रवेशकृतमिति सुस्पष्टमुक्तं, तच्च

Digitized by Google

ब्रह्मणो मुक्तावस्थायामिन्द्रस्येव रुद्रस्य भगवदात्मकत्वदर्शनस्योपक्रमावगततया "संकर्षणात्मकश्चैव कल्पान्ते च रसातलात् । समुत्पत्स्ये तदा रुद्रः कालाग्निरिति विश्रुतः" इति च संकर्षणानुप्रवेशेन रुद्रस्य भगवदात्मकतायाः प्रतिपादितत्वात् "नृत्यत्यन्ते च यद्रूपमिति रूपतयोक्तत्वात् "तवान्तरात्मा मम चेति भगवदन्तर्यामित्ववचनाच्च । रुद्रस्यापि भगवदंशत्वमनुप्रवेशकृतं तथा श्रीविष्णुधर्मोत्तरे "ब्रह्मा शम्भुस्तथैवार्कश्चन्द्रमाश्च शतक्रतुः । एवमाद्यास्तथैवान्ये युक्ता वैष्णवतेजसा । जगत्कार्यावसाने तु वियुज्यन्ते च तेजसा । वितेजसश्च ते सर्वे पञ्चत्वमुपयान्ति चे"ति ब्रह्मादीनां भगवत्तेजोवियोगेन प्रलयप्रतिपादनाच्चानुप्रवेशः सिद्धः । तथा मोक्षधर्मे "नारायणो महायोगी शुभाशुभविवर्जितः । ससर्ज नाभिजं पुत्रं ब्रह्माणममितप्रभम् । ततः स प्रादुरभवदथैनं वाक्यमब्रवीत् मम त्वं नाभितो जातः प्रजासर्गकरः प्रभुः । सृज प्रजास्त्वं विविधा ब्रह्मन् सजडपण्डिताः । स एवमुक्तो विमुखश्चिन्ताव्याकुलमानसः । प्रणम्य वरदं देवमुवाच हरिमीश्वरम् । का शक्तिर्मम देवेश ! प्रजाः स्रष्टुं नमोऽस्तु ते । अप्रज्ञावानहं देव विधत्स्व यदनन्तरम् । स एवमुक्तो भगवान् बभूवान्तर्हितस्ततः । चिन्तयामास विश्वेशो बुद्धिं बुद्धिमतां वरः । स्वरूपिणी ततो बुद्धिरुपतस्थे हरिं प्रभुम् । योगेन चैनां संयोज्य स स्वयं युयुजे तदा । स तामैश्वर्ययोगस्थां बुद्धिं शक्तिमतीं सतीम् । उवाच वचनं देवो बुद्धिं वै प्रभुरव्ययः । ब्रह्माणं प्रविशस्वेति लोकसृष्ट्यर्थसिद्धये । ततस्तमीश्वरादिष्टा बुद्धिः क्षिप्रं विवेश सा । अथैनं बुद्धिसंयुक्तं पुनस्तं ददृशे हरिः । भूयश्चैनं वचः प्राह । सृजेमा विविधाः प्रजाः । बाढमित्येव जग्राह यथाज्ञां शिरसा हरेः । तथाऽकरोच्च धर्मात्मा ब्रह्मा लोकपितामह" इति भगवदनुप्रविष्टया तदाहितशक्त्या बुद्ध्यानुप्रविष्टत्वात् सृष्टिसामर्थ्यं ब्रह्मण उक्तम् स स्वयं युयुज इति, बुद्धेरन्तरनुप्रवेशो ह्युक्तः अर्थान्तरानुपपत्तेः, अतश्चतुर्मुखस्य भगवदवतारत्वमनुप्रवेशकृतं, तस्मादाब्रह्मस्तम्बपर्यन्ता इत्यभिविधिरेव विवक्षितः परैस्त्वाद्य[1] द्वितीयं सूत्रमेवं व्याख्यातम् इतरेषा-

१ परैस्त्वाद्ये द्वितीयमिति पा० ।

माहङ्कारादीनां तत्त्वानां श्रुतावनुपलब्धेः, अतः कार्यस्मृत्यनुपपत्त्या च कारणस्मृत्यनुपपत्तिस्तात्पर्यार्थ इति तदयुक्तं श्रुतावेवोपलब्धेः "तन्मात्राणि भूतादौ लीयन्ते भूतादिर्महति लीयते महानव्यक्ते लीयते अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयत" इति तथा "बुद्धिरध्यात्मं बोद्धव्यमधिभूतं ब्रह्मा तत्राधिदैवत"मिति अहङ्कारोऽध्यात्ममहङ्कर्त्तव्यमधिभूतं रुद्रस्तत्राधिदैवत"मिति तथा यस्याहङ्कारः शरीरं यस्य बुद्धिः शरीरं यस्याव्यक्तं शरीर"मिति तथा मनो भित्त्वा भूतादिं भिनत्ति भूतादिं भित्त्वा महान्तं भिनत्ति महान्तं भित्त्वा ऽव्यक्तं भिनत्ति" इति एषु वाक्येषु बुद्धि-शब्दोमहत्तत्त्वव्यापारपारः "महान् वै बुद्धि लक्षणम्" इति श्रुतेः, अतोऽव्यक्तमहदहङ्काराः श्रुतावुपलभ्यन्ते, स्मर्यन्ते च "यत्तत्कारणमव्यक्त"मित्युपक्रम्य "त्रिविधोऽयहङ्कारोमहत्तत्त्वादजायते"ति, अतः स्मृत्युपबृंहिता श्रुतिर्महदादौ प्रमाणं, सूत्रकारैस्तु "महतः परमव्यक्त" मित्यादेः कठवल्लीवाक्यस्यैव महदादितत्त्वपरत्वं प्रतिक्षिप्तमर्थविरोधात्, सुबालोपनिषद्वाक्यानां तु विरोधाभावाच्च प्रतिक्षिप्तम् अतः श्रुतावनुपलब्धेरिति व्याख्यानमयुक्तम्,। अब्रह्मात्मकानां महदादीनां श्रुतावनुपलब्धिर्विवक्षितेति चेन्न अब्रह्मात्मकप्रधानमपि श्रुतिष्वनुपलब्धमिति प्रधानादितरेषां लोके वेदे चानुपलब्धेरिति व्याख्यानमनुपपन्नम्,। एतेन योगः प्रत्युक्त इत्यत्र अधिकशङ्कापरिहारौ परैरेवमुक्तौ "त्रिरुन्नतं स्थाप्य समं शरीरं तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणां विद्यामेतां योगविधिं च कृत्स्न"मित्यादिषु श्रुतिषु योगस्मृत्यर्थस्य परिगृहीतत्वाद्योगस्मृतेः प्रामाण्यशङ्का एकदेशसंप्रतिपत्तावप्येकदेशान्तरविप्रतिपत्तेरप्रामाण्यमिति परिहार इति तच्च तावदधिकशङ्कोक्तिरनुपपन्ना आधिक्याभावाच्छङ्कायाः, श्रुतिपरिग्रहो हि सांख्यस्मृतेरपि तुल्यः 'तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपापैः । पुरुषं निर्गुणं साङ्ख्यम् अथर्वशिरसो विदु"रिति श्रुत्यविरुद्धांशस्य श्रुत्या परिग्रह इति निर्वाहश्च द्वयोरपि तुल्यः, अतः शङ्काया अधिकत्वाभावात् परिहारश्चानधिकः एकदेशसम्प्रतिपत्तावप्येकदेशविप्रतिपत्तेरप्रामाण्यमपि द्वयोस्तुल्यम् अतः शङ्कापरिहारावनुपपन्नौ । यादव-

Digitized by Google

प्रकाशैस्तु द्वितीयं सूत्रमेवं व्याख्यातं कार्य्येषु सुखदुःखमोहदर्शनेन कथंचित् प्रधानानुमानेऽपि कुण्डलादौ सुवर्णादेरिव कार्येष्वनुपलब्धानां पुरुषमहदहङ्कारादीनां तत्त्वान्तरत्वेन परिकल्पनमयुक्तं पृथिव्यादीनामेव कश्चिदंशो हृदयादिस्थानस्थः पुरुषो महदहङ्कारादयश्च स्युरित्युपगमे बाधाभावादिति, अतः कार्यस्मृत्यनुपपत्तेश्च कारणस्मृत्यनुपपत्तिरिति सूत्रं च कपिलादिस्मृतीनामेव योगिप्रत्यक्षमूलत्वं स्मृत्यनवकाशदोषनिराकरणेन प्रत्युक्तमिति व्याख्यातं तत्र तावदितरेषामिति सूत्रयोजनाऽनुपपन्ना भोक्तृत्वाध्यवसायाभिमानादिकार्योपलम्भात् तानि कार्याणि पृथिव्यादीनामंशविशेषेष्वेव स्युरिति चेत् सुखदुःखमोहादयश्च तेष्वेव स्युरिति प्रसङ्गस्याविशिष्टत्वात् प्रधानकल्पनमनुमत्य पुरुषमहदादिव्युदासो निर्निबन्धनः तस्यापि व्युदासो ऽभिमतश्चेदितरेषामिति पदवैयर्थ्यं, तदा हि सर्वेषां चानुपलब्धेरिति वक्तव्यं, तथा च मन्दफलं युक्तिभिस्तत्कल्पनानां तर्कपादे निरसिष्यमाणत्वात्, अतः कपिलस्मृतेर्योगिप्रत्यक्षमूलत्वव्युदसनमपेक्षितमिति तदेव विवक्षितम् । एतेनेति सूत्रेण तद्व्युदस्यत इति चेन्न साङ्ख्यस्मृतेरिव योगस्मृतेः श्रुतिविरुद्धांशव्युदसनस्यापेक्षितत्वात्, तस्य च शब्दानुकूलत्वादपेक्षितसिद्ध्यनुगुणनिर्वाहे सम्भवति तदननुगुणनिर्वाहाश्रयणस्यानुपपन्नत्वात्स्मृत्यनवकाशसूत्रेणैव योगस्मृतिव्युदासोऽपि सिद्धेस्तुल्यन्यायत्वादिति चेत् न अधिकशङ्कायाः संभवात्, अतो योगस्मृतिविषयमतिदेशाधिकरणमेतेनेति सूत्रितमिति युक्तम् ॥ योगप्रत्युक्त्यधिकरणं समाप्तम् ॥

विलक्षणत्वाधिकरणम् ।

सू० न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ४ ॥

भा० पुनरपि स्मृतिविरोधवादी तर्कमवलम्बमानः प्रत्यवतिष्ठते यत्साङ्ख्यस्मृतिनिराकरणेन जगतो ब्रह्मकार्य्यत्वमुक्तं तन्नोपपद्यते अस्य प्रत्यक्षादिभिरचेतनत्वेनाशुद्धत्वेनानीश्वरत्वेन दुःखात्मकत्वेन चोपलभ्यमानस्य चिदचिदात्मकस्य

च जगतोभवदभ्युपेतात्सर्वज्ञात्सर्वेश्वराद्धेयप्रत्यनीकादानन्दैकतानाद्ब्रह्मणो विलक्षणत्वात् । न केवलं प्रत्यक्षादिभिरेव जगतो वैलक्षण्यमुपलभ्यते, शब्दाच्च तथात्वं—विलक्षणत्वमुपलभ्यते "विज्ञानं चाविज्ञानं च एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः अनीशश्चात्मा बध्यते भोक्तृभावादित्यादिभिः, कार्यस्य हि जगतोऽचेतनत्वदुःखित्वादयो निर्दिश्यन्ते ।

टी० सू० न विलक्षणत्वादस्य तथात्वं च शब्दात्, सङ्गतिमाह "पुनरपी"ति, मन्वादिस्मृतिभिरुपबृंहणं कार्यमित्युक्तं, मन्वादिस्मृतयस्तर्कविरुद्धाः साङ्ख्यस्मृतिस्तर्कानुगृहीता अतस्तयोपबृंहणं कार्यमिति प्रत्यवस्थानात्सङ्गतिरित्यर्थः प्रथमविचारः पूर्ववत्, तदर्थं किं चेतनाद् ब्रह्मणो ऽचेतनजगदुत्पत्तिः सम्भवति ने?ति विचारः, तदर्थं किं जगत्कारणस्य जगत्सालक्षण्यानुमितिहेतुरनैकान्तिकः, नेति यदा नानैकान्तिकः तदा चेतनाद् ब्रह्मणोऽचेतनजगदुत्पत्तेरसम्भवाद् ब्रह्मकारणवादश्चाल्यः, यदा त्वनैकान्तिकस्तदा ब्रह्मणो विलक्षणजगदुत्पत्तिसम्भवाद् ब्रह्मकारणत्वमविचाल्यमिति । सोत्र नेति पदं व्याचष्टे "यदि"ति, अस्येति व्याख्येयं तद्व्याचष्टे "प्रत्यक्षादिभिरि"ति, अस्येति पदं लौकिकप्रमाणसिद्धाकारविशिष्टपरामर्शीति भावः । विलक्षणत्वादिति पदं व्याचष्टे "भवदभ्युपेतादि"ति, अचेतनत्वेनेत्यादिविशेषणचतुष्टयप्रतियोगित्वेन सर्वज्ञत्वादित्यादि विशेषणचतुष्टयमुक्तं तथात्वमित्यादिकं सूत्रखण्डं व्याचष्टे "न केवलमि"ति, तथात्वपदव्याख्यानं विलक्षणत्वमिति, विलक्षणत्वोपबृंहकं शब्दमुदाहरति "विज्ञानमि"ति,

सू० यदि यत्कार्यं तत्तस्मादविलक्षणं यथा मृत्सुवर्णादिकार्यं घटरुचकादि, अतो ब्रह्मविलक्षणस्यास्य जगतस्तत्कार्य-

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

रु०

काशिका पण्डितवरवामनादित्यविरचिता पूर्वार्धम् ५ रु॰ उत्तरार्धम् ५ रु॰ .. १०)
बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम् .. .. ३)
प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम् .. .. ११)
लघुकौमुदी वरदराजकृता .. .. १)
लघुकौमुदी श्रीयुतडाक्तरबालण्टेनाचार्य्येणाङ्गलण्डीयभाषायां कृता .. .. ८)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः ≡)
वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणाङ्गलण्डीयभाषायां कृतम् .. .. ४)
मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद .. .. ४)
शाश्वतधर्मदीपिका .. .. १)
अमरकोशः सटीकः .. .. ४)
योगवार्तिकम् .. .. ३।)
वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः .. .. .. १)
शीतपदार्थनिर्वचनम् .. .. ४)
वाक्यार्थचन्द्रिका परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि-
संशोधिता .. .. ४)
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-
शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ६॥)
तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् .. .. ८।)
तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् .. .. ४॥)
शास्त्रदीपिका .. .. ८।)
खण्डनखण्डखाद्यं सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्प-
णीसहितम् .. .. ७॥)
काव्यप्रदीपः काव्यप्रकाशस्य प्रतिच्छायाव्याख्या वाराणसेयसमादृप्रतिष्ठा-
पितसंस्कृतपाठशालीयदर्शनशास्त्राध्यापकरामशास्त्रिभागवताचा-
र्येण परिशोधितः .. .. ३॥)
वेदान्तसिद्धान्तमुक्तावली श्रीयुत आर्थर्विनिस महाशयेनेङ्गलेण्डीय-
भाषायामवतारिता .. .. २॥)
चित्रमीमांसा अप्पयदीक्षितकृता, श्री तै॰ रामशास्त्रिणा संशोधिता .. .. १।)
तत्त्वबिन्दुः वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः .. .. ।≡)॥

Digitized by Google

CONTENTS.

Page.

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed: Dāmodara Śāstrī, Professor, Sanskrit College, Benares. ... 609

SAṂKARSHAKĀṆḌA OF PŪRVAMĪMĀṂSĀ WITH BHĀṬṬADĪPIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. ... 625

ŚRĪBHĀSHYA WITH ŚRUTAPRAKĀŚIKĀ, Ed: Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. ... 641

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

THE BORROWER WILL BE CHARGED THE COST OF OVERDUE NOTIFICATION IF THIS BOOK IS NOT RETURNED TO THE LIBRARY ON OR BEFORE THE LAST DATE STAMPED BELOW.

CANCELLED
BOOK DUE-WID
SEP 29 1977
OCT 26 1977

STALL-STUDY
CHARGE
CANCELLED

BOOK DUE-WID
DEC 1 6 1977
CANCELLED
NOV 1

Digitized by Google

3 2044 107 353 070

Digitized by Google